श्रीभिक्षुशब्दानुशासनम्

आदर्श साहित्य संघ प्रकाशन

श्रीभिक्षुशब्दानुशासनम्

[अष्टाध्यायीबृहद्वृत्त्या समलंकृतम्]

प्रथमो भागः

प्रेरणास्रोत

पूज्यकालूगणी

सूत्रकार

व्याकरणविशारद मुनि चौथमल्ल

वृत्तिकार

जैनदर्शनपरमोपासक आशुकवि आयुर्वेदाचार्य
पण्डितरघुनन्दन

सम्पादक

मुनि राजेन्द्रकुमार

● प्रकाशक :
कमलेश चतुर्वेदी
प्रबन्धक : आदर्श साहित्य संघ
चूरू (राजस्थान)।

● प्रथम संस्करण : १९८२

● अर्थसहयोग :
स्वर्गीय श्री सोहनलालजी सेठिया (सुजानगढ़) की पुण्य-स्मृति मे
उनकी धर्मपत्नी श्रीमती रतनीदेवी सेठिया

● मूल्य : सौ रुपये।

● मुद्रक : पंकज प्रिंटिंग एजेन्सी के लिए महाजन प्रिंटर्स, मौजपुर, दिल्ली-५३।

ŚRĪBHIKṢUŚABDĀNUŚĀSANAM

[With a detailed Commentary entitled as Aṣṭādhyāyī-bṛhadvṛtti]

PART I

Under inspiration from
REVERED KĀLŪGAṆĪ

Original aphorisms by
Vyākaraṇaviśārada
MUNI CHAUTHMAL

Commentary by
PAṆḌITA RAGHUNANDAN, Āyurvedācārya,
An impromptu poet and a devotee of Jaina Philosophy

Edited by
MUNI RAJENDRAKUMAR

- *Published by* :

  Kamalesh Chaturvedi
  Manager, Adarsh Sahitya Sangh
  Churu (Rajsthan) India.

- *First Edition* : 1982

- *Publication financed by* :

  Shrimati Ratanidevi Sethia
  in memory of her husband late Shri Sohanlalji Sethia
  (Sujangarh).

- *Price* : **Rs. 100/- only**

- *Printer* :

  By Pankaj Printing Agency, at Mahajan Printers
  Maujpur, Delhi-53

आशीर्वचनम्

'श्रीभिक्षुशब्दानुशासनं' इत्यस्ति खलु संस्कृतशब्दशास्त्रेषु अमूल्यग्रन्थ । अस्य नामकरण तेरापंथधर्मसघस्य आद्यप्रवर्तकस्य आचार्यश्रीभिक्षुस्वामिन अभिधया ममजनि । धर्मसघे सम्कृतविकासाय अष्टमाचार्येण पूज्यपादेन श्रीकालूगणिना एक. स्वप्न. सयोजित, त स्वप्न मूर्तयितु च सार्थकोऽभून् तस्य पुरुषार्थ । स पुरुषार्थः फलितः, तस्य फलश्रुत्या व्याकरणग्रन्थो निष्पत्ति गत ।

यदा वयमास्म नवदीक्षिता मुनय आचार्यचरणयो स्थित्वा सस्कृतभाषाया अभ्यास कुर्वाणा अभूम तदा तत्रभवता बहुधा कथ्यते स्म यदेतादृशस्य व्याकरणस्य अपेक्षा विद्यते गम्य स्यात् क्रमः सारस्वत-चन्द्रिका इव सरल. रूपं च भूयात् पाणिनि-महाव्याकरणस्येव व्यवस्थितम् । तद्विशदशब्दशास्त्र अष्टाध्यायी-बृहद्वृत्ति-प्रक्रिया-अङ्गोपाङ्ग-प्रभृतिभि समलंकृतं भवेत् । इमे शब्दा अश्राविषत अस्माभिरनेकधा गुरुमुखारविन्दे । तेषा शब्दाना निमज्जनमुन्मज्जन चाद्राक्षम कल्पना-पाथोधौ । तस्मिन्ननेहसि मुखदमाश्चर्यमन्वभूम यस्मिन् वासरे कालूगणिन स्वप्न फलवान् जात । यादृशी गुरुचरणस्य मनोकामनासीत् तस्यैवानुरूपं परिममपादि **'श्रीभिक्षुशब्दानुशासनं' 'कालूकौमुदी'** चेति ग्रन्थद्वयस्य निर्माणम् । तस्मिन् दिनेऽस्माभि. चिन्तित—महापुरुषाणा स्वप्ना न केवल स्वप्ना एव भवन्ति ते मूर्त्तनामपि नयन्ते ।

स्वर्गीय. पूज्यपादकालूगणी अपूर्वपुण्यशाली आचार्य. आसीत् । व्यलोकिषत मया एतादृश सौभाग्यशालिन पुरुषा स्वकीये जीवने । तेन स्वस्मिन् युगे यावत्य. सफलता समुपलब्धा, विरलपुरुषा एव ता वरयितु भवन्ति प्रभूष्णवः । योऽपि विकासो दरीदृश्यते तेरापथधर्मसघे स तस्यैवावदानमिति मन्येऽहम् । साम्प्रत यदा न तस्योपस्थितिरस्माक मध्ये विद्यते तथापि तस्य प्रभाव. तथैव स्वकार्य सृजतीत्यह विश्वसिमि ।

नासीत् व्याकरणस्य निर्माण किमपि साधारण कार्यम् । तत्समयसाध्यं श्रमसाध्य तु आसीदेव, तस्मिन्नपि निष्ठाया एकाग्रतायाश्च योगोऽत्यन्तमपेक्षित । तस्मिन् कार्ये नियोजितो जात पूज्यगुरुदेवस्य दृढसकल्प., मुनिचौथमल्लस्वामिन पुरुषार्थ, आशुकविरत्नश्रावकपडितरघुनन्दनमहोदयस्याऽपूर्व योगदानञ्च । एकस्मिन् बिन्दौ तिसृणा धाराणा सगमोऽजनि सृजनस्य शलाकया च एकेन नवीनेन शब्दशास्त्रेण आकार आसादित । विदुषामभिमतमिद यदद्यावधि यावन्ति संस्कृत-व्याकरणानि ग्रथितानि तेषु सर्वेषु **'श्रीभिक्षुशब्दानुशासनं'** इति व्याकरणं सरलतमपद्धतिमावहति ।

जातमस्य ग्रन्थस्य निर्माण पञ्चदशकात् पूर्वम् । अस्य ग्रन्थस्य अनेके हस्तलिखिता आदर्शाः अस्माकं सघीयपुस्तकभाण्डागारे उपलब्धा सन्ति । यदाऽस्य सपादनस्य प्रसङ्गः उपनतो जात. तदा त्वरा प्राप्त: उत्साह. अस्माकं श्रमशील-तरुणशिष्यस्य मुनिराजेन्द्रकुमारस्य । तेन गहननिष्ठा-मनोयोग-परिश्रमपूर्वकेन त बृहद्व्याकरणग्रन्थ सम्पाद्य सशोध्य च महत्त्वपूर्ण कार्यमेकं व्यधायि । तस्य कार्यनिष्ठायाः श्रमशीलतायाश्च प्रवाह. अनिर्बाधरूपेण प्रवाहितो भूयादायतावपि इति मम शुभाशंसा ।

अस्य प्रकाशनस्य व्यवस्थाऽकारि आदर्शसाहित्यसघेन दुर्लभमिमं ग्रन्थ सुलभायितुम् । साम्प्रत ग्रन्थोऽय विदुषां विद्यार्थिनाञ्च हस्तगतो जायमानोऽस्ति । प्रबुद्धलोका तस्य विधास्यन्ते मूल्याकनं समीचीनमित्यस्माकं प्रबलात्मविश्वासः । सस्कृतभाषाया जिज्ञासव ग्रन्थमिमं कक्षीकृत्य लाभान्विता भविष्यन्तीति समाश्वासः ।

—आचार्यतुलसी

जैनविश्वभारती
महावीरजयन्ती
६ अप्रैल, १९८२
लाडनूं (राजस्थान)

प्रस्तुतिः

अभिमतमिदमस्ति अनेकेषां ग्रन्थानां—सत्यप्रवादनाम्नि पूर्वग्रन्थे शब्दप्राभृतनामकं व्याकरणमन्तर्गर्भितमासीत्। तत् प्राकृतभाषाया व्याकरणमासीदथवा संस्कृतभाषाया इति स्पष्टं नास्ति, तथापि अनुमीयते विद्वद्भिस्तत् संस्कृतव्याकरणमासीत्। पूर्वग्रन्थाः संस्कृतनिबद्धा आसन्निति सम्मतमस्ति, तेन तद्गतं व्याकरणमपि संस्कृतभाषाया आसीदिति सहजमनुमातुं शक्यम्। परमेतत् कथयितुमशक्यं यत्तद् व्याकरणं पाणिनिव्याकरणवत् लौकिकमासीदथवा वैदिकव्याकरणवदलौकिकम्। आचार-प्रज्ञप्तिप्रभृतिसंज्ञाभिरपि अनेकव्याकरणग्रन्थानां सूचना लभ्यते। किन्तु विलुप्तेषु महाग्रन्थागारेषु ते ग्रन्था अपि विलुप्ता अभवन्निति सूच्यते स्म पुरातनैराचार्यैः।

भगवतो महावीरस्य शासनकाले अर्धमागधीप्राकृतस्य प्राधान्यमभवत्, तेन संस्कृतव्याकरणेषु उपेक्षा समजनि जैनविदुषाम्। प्रचलिते पाणिनिमुनेर्व्याकरणे, विरच्यमानेषु दर्शनविषये नानाग्रन्थेषु, पुनरपि जैनाचार्याणां ध्यानमाकृष्टमभूत् संस्कृतं प्रति। सर्वप्रथममाचार्येण उमास्वातिना वैक्रमीये संवति २०१-१४२ (ई. १७९-२२०) तत्त्वार्थसूत्रपराभिधस्य मोक्षशास्त्रस्य प्रणयनमकारि। अन्यैरपि आचार्यैः संस्कृते ग्रन्थरचना प्रारब्धा। प्राकृतस्य एकच्छत्रता विलयं गता। संस्कृतस्य पुनरुदयो जातः। अस्यां परिस्थितौ संस्कृतव्याकरणं प्रति सहजमाकर्षणमुदपादि। ऐन्द्रव्याकरणस्य उल्लेखो निर्युक्तिसाहित्ये उपलभ्यते, परन्तु तद्विषये स्पष्टावबोधो नास्ति। अस्मिन् विषये डॉ० ए० सी० बर्नेलद्वारा लिखितं 'ऑन द ऐन्द्र स्कूल ऑफ ग्रामेरियंस' नामकं पुस्तकं द्रष्टव्यमस्ति। क्षपणकव्याकरणस्य उल्लेखोऽपि लभ्यते मैत्रेयरक्षितविरचिते तन्त्रप्रदीपे। तत्रास्ति क्षपणकमहान्यासस्य उल्लेखोऽपि। किन्तु नास्ति उपलब्धं तद् व्याकरणम्। उपलब्धेषु व्याकरणेषु प्राचीनतमं व्याकरणमस्ति पूज्यपाददेवनन्दिकृतं 'जैनेन्द्रव्याकरणम्'। अस्य निर्माणं विक्रमस्य षष्ठ्यां शताब्द्यां समजनि। द्वितीयं व्याकरणं लब्धमस्ति पाल्यकीर्तिशाकटायनस्य 'शाकटायन' संज्ञकम्। अस्य रचना विक्रमस्य नवम्यां शताब्द्यां समभूत्।

तृतीयं व्याकरणमस्ति 'सिद्धहेमशब्दानुशासनम्'। अस्य निर्माणं विक्रमस्य ११४५ संवति जातमिति मन्यते।

चतुर्थं व्याकरणमस्ति मलयगिरेः शब्दानुशासनं मुष्टिव्याकरणापराभिधानम्। आचार्यमलयगिरिः आचार्यहेमचन्द्रस्य समकालीन एवासीत्। अस्य व्याकरणस्य रचना विक्रमस्य द्वादश्यां शताब्द्यां समजनीति संभाव्यते।

व्याकरणविषये अन्ये लघवो महान्तो वा शतशो ग्रन्था जैनाचार्यैर्लिखिता अस्मिन् सहस्राब्दे।

तेरापथधर्मसंघे अष्टमाचार्याः पूज्यकालूगणिनः संस्कृतव्याकरणस्य अध्ययनेऽध्यापने च महतायासेन संप्रवृत्ता अभूवन्। तदानीं सारस्वत-सिद्धान्तचन्द्रिकयोरध्ययनस्य परंपरासीत्। आचार्यवर्यैरनुभूतं—सारस्वतस्य उत्तरार्धमपर्याप्तमस्ति, सिद्धान्तचन्द्रिकायाश्च पूर्वार्धमपर्याप्तमस्ति। तैः प्रारब्धं सिद्धान्तचन्द्रिकाया उत्तरार्धस्य, सारस्वतस्य पूर्वार्धस्य अध्यापनम्। कतिपयकालानन्तरमाचार्यवर्याणामन्तःकरणे तद्विकल्पमन्वेष्टुं भावना समुद्भूता। तेष्वेव दिनेषु आचार्यवर्यैः 'सारकौमुदी' लब्धा हस्तलिखिता। अतीव प्रसन्नता जाता। तदानीमेव 'मीठिया' इत्यपराभिधानेन मुनिचंपालालेन भ्रात्रा विशालकीर्तिगणिविरचितस्य अष्टाऽध्यायात्मकस्य शब्दानुशासनस्य हस्तादर्श उपलब्धः, आचार्यचरणेषु उपढौकितश्च। तं दृष्ट्वा आचार्यवर्यैर्महती प्रसन्नता प्रकटीकृता। अन्विष्यमाणो विकल्पः समुपलब्ध इति प्रकल्पितम्।

'सिद्धहेमशब्दानुशासनं' सर्वाङ्गसंपूर्णं व्याकरणमस्ति। आचार्यवर्याणां निर्देशाऽनुसारं केचित् साधवस्तस्याध्ययनमकार्षुः। परन्तु आचार्यवर्याणामेषा धारणा दृढमूला जाता—सिद्धहेमशब्दानुशासनस्य सूत्राणि कठोराणि सन्ति। विशालशब्दानुशासनस्य सूत्राणि मृदूनि सरलानि च विद्यन्ते। अस्य किञ्चित् परिष्कारः स्यात् तदा समीचीनं भवेत्। तत्परिष्काराय मुनिचौथमल्लो निर्दिष्टः। तत्सहयोगी संवृत्तः पंडितप्रवरो रघुनन्दनः। तस्य परिष्कारकर्मणि नवीनस्य व्याकरणस्य निर्माणमजनि। तस्य 'श्रीभिक्षुशब्दानुशासनं' इति नामकरणं जातम्। अस्य कार्यारम्भो जातो विक्रमस्य १९८० वर्षे, अस्य संपूर्तिर्जाता विक्रमस्य १९८८ वर्षे, माघशुक्ला त्रयोदश्यां, शनैश्चरवारे पुष्यनक्षत्रे।

पञ्चपाठिव्याकरणम्

व्याकरणपरम्परायां पञ्चपाठिव्याकरणस्य महत्त्वमुपगीतमस्ति। 'श्रीभिक्षुशब्दानुशासनं' धातुपाठ-गणपाठ-उणादि-लिङ्गानुशासन-समलंकृतमस्ति। न्यायदर्पणमपि अस्य स्वतन्त्रमस्ति। एतेषां सर्वेषामवयवानां प्रकाशनं प्रस्तुत-शब्दानुशासनस्य द्वितीयभागे प्रकल्पित विद्यते। एवमिदं सर्वाङ्गसंपूर्णमस्ति। पंडितविश्वनाथमिश्रेण कृत प्रस्तुत-व्याकरणस्य सर्वाङ्गपूर्णताया विशदं विवेचनमवलोकनीयमस्ति[1]।

अस्मिन् सर्वाङ्गसपन्ने व्याकरणे नाम-आख्यात-उपसर्ग-निपात-सन्धीनां च प्रौढ विवेचनं कृतमस्ति, किन्तु सरलप्रणाल्या नव्यानां सूत्राणां विरचना, नव्याना धातूना परिकल्पनाऽस्य वैशिष्ट्यमस्ति।

ग्रन्थपरिमाणम्

प्रस्तुतशब्दानुशासनस्य अष्टसु अध्यायेषु ३७८६ सूत्राणि विद्यन्ते। पूर्ण विवरणमित्थमस्ति—

अध्यायसंख्या	प्रथमश्चरण	द्वितीयश्चरण	तृतीयश्चरण	चतुर्थश्चरण	योग
१	६७	८५	६५	८९	२६६
२	१२३	१०५	११६	१२८	४७२
३	२०१	१६०	१०३	१२०	५८४
४	१४२	१३८	१२२	११८	५१२
५	८५	१०५	९०	१२४	४०४
६	८५	१५३	१४६	९८	४७८
७	१३२	१९१	१०८	१०४	५३५
८	१४३	१०१	११७	१३४	४९५
					३७८६

---

१. संस्कृत-प्राकृत जैन व्याकरण और कोश की परम्परा पृष्ठ, १६६-१६९।

बृहद्वृत्तिकारेण कृता आदिमंगलश्लोकाः

१. यत्पाणिपल्लवतलोषितपल्लवोऽपि, प्राप्नोति लोकविरलं कविवल्लभत्वम् ।
तस्या गुणीन्द्रगणवन्द्यपदोत्पलाया, वाण्या वरेण्यशरणं प्रणिपद्यमानः ॥

२. श्रीचौथमल्लमुनिनिर्मितरम्यभिक्षुशब्दानुशासनमिव विवृणोमि वृत्त्या ।
हृष्यन्तु यल्ललितसूत्ररसं निपीय, भृङ्गा मरन्दमिव विज्ञजनाग्रगण्याः ॥

३. येषां नितान्तनिहितैः करुणाकटाक्षैर्नव्योद्यमो भवति संस्कृतशब्दशास्त्रे ।
तेषां गणाधिपतिकालुमुनीश्वराणां, जीयाच्चिरं रुचिरसच्चरणाब्जरोचिः ॥

बृहद्वृत्तेः प्रशस्तिश्लोकाः

१. आसीत्कश्चिद् विपश्चिद् धृतपदकमलो भिक्षुनामा मुनीन्द्रो,
य: श्रीजैनोदितानामनुभवविभवैर्भूरिभावान् विभाव्य ।
मुग्धानुद्धर्तुकामः सपदि निपतितान् पापिपाषण्डिजाले,
तेरापन्थाह्वमऽर्च्यं व्यरचयत सतां संपदं संप्रदायम् ॥

२. भारीमालस्तदनु मुनिपो रायचन्द्रस्ततोऽभूत्,
जातः पश्चादऽगणितगुणो जीतमल्लो गणीशः ।
तस्यान्तेऽभूद् गणपमघवा तत्पदे चोत्तमोऽस्थात्,
श्रीमाणिक्यस्तदनु च मतो डालचन्द्रो मुनीन्द्रः ॥

३. समुपगम्य ततोष्टमपट्टकं,
नियमिनां यमिनां धुरिकीर्तितः ।
क्षितितले गणिकालुरयं गुणै-
रतिविभाति विभाकरवत् करैः ॥

४. शुभगुणगणारामे मेघः कुमार्गनगाशनिः,
दुरिततिमिरध्वंसे भानुर्भवाब्धिघटोद्भवः ।
सुगतिकमलां दातुं शक्तो जिनेन्द्रसमो भुवि,
स जयतु महाराजः कालुश्चिरं गुणमन्दिरम् ॥

५. तच्छिष्यवर्यमुनिचौथमलाऽभिधेन,
सम्यक्तया मथितशब्दमहार्णवेन ।
एकं कलासु सकलास्वपि दिक्षु भिक्षु-
शब्दानुशासनमिदं निरमाय्यमेयम् ॥

६. सर्वं गुरोर्भवति यन्मम किञ्चन स्या-
देवं विचार्य मतिमानिति शब्दशास्त्रे ।
ग्रन्थे स्वतो विरचितेऽपि गणिप्रधान-
श्रीभिक्षुनाम निजकर्तृपदे न्ययुङ्क्त ॥

७. नोणादिधातुगणबद्धविधिः परेषां,
पुष्टे कृशाम्बरमिवेह सुजाघटीति ।
तत्रोक्तपाठमपि तत् परिवर्त्य सम्य-
गक्षुण्णधीपरिचयः समदायि कर्त्रा ॥

८ एतद् विवृण्वन्तमलीगढस्थित-
सुनामयीग्रामनिवासिभूसुरम् ।
स्थलीस्थले वैद्यकवृत्तिवर्तिन,
जानीत तं मां रघुनन्दनाह्वयम् ॥

९ श्रीपूज्यसेवैकफलाभिलाषिणं,
सत्साधुमङ्गे सुतरा विलासिनम् ।
प्राप्याऽवकाशं निजवैद्यवृत्तित,
प्रवर्तमानं वृतवृत्तिवर्णने ॥ युग्मम् ॥

१० सरससरलसूत्र निर्विवादं वरेण्यं,
सदयहृदयसेव्य स्वल्पकालाभिलभ्यम् ।
निजविषयविशेषं भैक्षव शब्दशास्त्र,
जयतु जगति नित्य साधुसाध्य तदेतत् ॥

८ ८ ६ १
११ नगाऽङ्गनिध्यब्जनपस्त्रयोदशी-
दिने सचन्द्रे शनिपुष्ययोजिते ।
निवेशने छापरनामके वरे,
वृत्तेः समाप्तिः सुखपूर्विकाऽभवत् ॥

सारल्यं वैशिष्ट्यञ्च,

प्रस्तुत शब्दानुशासनं अन्तिम सर्वाङ्गसपन्न व्याकरणमस्ति, अस्ति आधुनिकञ्च, तेनेद ऋणमावहति सर्वेषा पूर्ववर्तिव्याकरणाना, विशेषत पाणिनीयस्य, सिद्धहेमशब्दानुशासनस्य, शाकटायनस्य, विशालशब्दानुशासनस्य, सारकौमुद्या वा । वैशिष्ट्यस्य अवकाशोऽपि तेनैव लब्धोऽस्ति इह । अस्मिन् विषये पाणिनीयव्याकरणात् श्रीभिक्षुशब्दानुशासनपर्यन्तं जातस्य विकासस्य परिशीलनमपि ध्यानमाकर्षति व्याकरणविशारदानाम् । द्रष्टव्यमस्ति श्रीभिक्षुशब्दानुशासनस्य

परिशीलनम्[१]। तत्र पाणिनीयव्याकरणश्रीभिक्षुशब्दानुशासनयोस्तुलनात्मकमध्ययनमस्ति। श्रीभिक्षुशब्दानुशासने सर्वाधिक. प्रभावः श्रीसिद्धहेमशब्दानुशासनस्य विद्यते। विशालशब्दानुशासनस्य सूत्रादर्शः इदानीमनुपलब्धोऽस्ति, तेन तद्विषये किञ्चिद् विशिष्टमुल्लिखितुमनर्हा वयम्।

पाणिनीयव्याकरणे वाक्यस्य परिभाषा नास्ति। परवर्तिकात्यायनेन वाक्यस्य परिभाषायास्तत्र सन्निवेशः कृतः—'एकतिङ्वाक्यम्'। अस्या विकास आचार्यहेमचन्द्रेण कृतः। श्रीसिद्धहेमशब्दानुशासने वाक्यस्य सर्वाङ्गपूर्णा व्याख्या विद्यते, यथा—'सविशेषणमाख्यातं वाक्यम्' [१/१/२६]। श्रीभिक्षुशब्दानुशासने किञ्चित् परिष्कारेण एषैव व्याख्या स्वीकृताऽस्ति—'सविशेषणमेवाख्यात वाक्यम्' [१/१/३०]।

सिद्धहेमशब्दानुशासनश्रीभिक्षुशब्दानुशासनयोः समानसूत्राणि।

१. **लोकात्** [हे० १/१/३]
लोकात् [भिक्षु० १/१/३]

२. **औदन्ताः स्वराः** [हे० १/१/४]
औदन्ताः स्वराः [भिक्षु० १/१/६]

३. **एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः** [हे० १/१/५]
एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः [भिक्षु० १/१/७]

सिद्धहेमशब्दानुशासनस्य आदिमगलरूपं सूत्र 'अर्हम्' विद्यते। एतत्पद परमेष्ठिवाचकमस्ति। एतस्य वृत्तौ आचार्यहेमचन्द्रेण एतत् लिखितमस्ति—'अर्हमित्येतदक्षरं परमेश्वरस्य परमेष्ठिनो वाचकं सिद्धचक्रस्यादिबीज सकलागमोपनिषद्भूतमशेषविघ्नविघातनिघ्नमखिलदृष्टादृष्टफलसंकल्पकल्पद्रुमोपममाशास्त्राध्ययनाध्यापनावधिप्रणिधेयम्'।

श्रीभिक्षुशब्दानुशासने आदिमगलरूप सूत्र 'ॐ' इति विद्यते। एतदपि पद परमेष्ठिनो वाचकमस्ति, यथा—ओमित्येतदक्षरमर्हद्शरीर्याचार्योपाध्यायमुनीनामाद्याक्षररूप, शिवपदस्यादिबीज, निखिलशास्त्रोपशास्त्ररहस्यभूतं, अशेषप्रत्यूहसमूहविच्छेदक, नानालोकिनाऽलौकिकफलसकल्पकल्पपादपोपम, आशास्त्राऽध्ययनाऽध्यापनाऽवधिप्रणिधेयम्।

सिद्धहेमशब्दानुशासने प्रत्याहारसूत्र नास्ति, श्रीभिक्षुशब्दानुशासने तद् विद्यते। पाणिनीयव्याकरणे प्रत्याहारस्य चतुर्दशसूत्राणि विद्यन्ते—१. अइउण् २. ऋलृक् ३. एओङ् ४. ऐऔच् ५. हयवरट् ६. लण् ७. ञमङणनम् ८. झभञ् ९. घढधष् १० जबगडदश् ११. खफछठथचटतव् १२ कपय् १३. शषसर् १४. हल्।

किन्तु श्रीभिक्षुशब्दानुशासने अनुबन्धरहित एकमेव सूत्र विद्यते—अइउऋलृ-एऐओऔ-हयवरल-ञणनङम-झढधघभ-जडदगब-खफछठथ-चटतकप-शषस. [१/१/४]। पाणिनिप्रक्रिया वैज्ञानिकी विद्यते, किन्तु तत्रास्ति प्रक्रियागौरव यत्र तत्र जटिलताऽपि च। सिद्धहेमशब्दानुशासने प्रक्रियालाघव सारल्यमपि च कृतमस्ति। श्रीभिक्षुशब्दानुशासने ततोऽप्यधिकमस्ति प्रक्रियालाघव सारल्यं च। सिद्धहेमशब्दानुशासने तत्पुरुषसमासप्रकरणे एक सूत्रमस्ति—

प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ताद्यर्थाः प्रथमाद्यन्तैः [३/१/४७]

अस्मिन् सूत्रे प्रथमाद्यन्तैः इति पदस्य स्पष्टता नास्ति। वृत्तावेव तद् हार्द स्पष्टीकृत विद्यते। श्रीभिक्षुशब्दानुशासने अस्य सूत्रस्य स्थाने पञ्चसूत्राणि विद्यन्ते सुस्पष्टानि सरलानि च—

१. **प्रादयो गताद्यर्थे प्रथमया** [३/१/६२]
२. **अत्यादयः क्रान्ताद्यर्थे द्वितीयया** [३/१/६३]
३. **अवादयः क्रुष्टाद्यर्थे तृतीयया** [३/१/६४]
४. **पर्यादयो ग्लानाद्यर्थे चतुर्थ्या** [३/१/६५]

---

१. संस्कृत-प्राकृत जैन व्याकरण और कोश की परपरा : पृष्ठ १५२-१६३।

५. निरादयो गताद्यर्थे पञ्चम्या [३/१/९६]

अत्र निदर्शनमात्रकृतमस्ति । प्रस्तुतशब्दानुशासनमधीयानानामेतत् स्वयमेव विदित भविष्यति ।

न स्त्री स्वातन्त्र्यमर्हति इति चिरन्तनं चिन्तनमस्ति, किन्तु वैयाकरणा स्वातन्त्र्यमर्हन्ति इति सुस्पष्टमेव । ग्रन्थकर्त्रा सिद्धहेमशब्दानुशासनात् भिन्नाऽपि पद्धति स्वीकृताऽस्ति । श्रीभिक्षुशब्दानुशासने—'ऋणे प्रवसनकम्बलदशार्ण-वत्सरवत्सतरस्यार्' [१/२/१४] 'ऋते तृतीयासमासे' [१/२/१५] इति सूत्राभ्यां संधिरेव इष्टोऽस्ति—तत्र असंधिमपीच्छति 'हैम' [१/२/२,७] प्रऋणं, सुखऋतः, दुखऋतः । 'शसात् खपा' इति सूत्रेण शसात् परा खपा द्विर्वा भवन्ति । सिद्धहेम-शब्दानुशासनादत्र भेदप्रदर्शितोऽस्ति—'हैमः' [१/२/३५] तु अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीयेभ्योऽपि इच्छति । त्वं क्खनसि, त्वं खनसि । कः प्पचति, कः पचति । क≍क्खनति, क खनति । क)(प्फलति, क)(फलति इत्यादि ।

एव नानाकोणीयैरधीयमानमिद शब्दानुशासनं स्वयमेव स्वरूपमाविष्कारिष्यति । केवल निदर्शनमात्रमिह प्रस्तुतमस्माभि ।

सपादनम्

परमपूज्यैः कालूगणिभिरेक स्वप्नो दृष्ट. स च तच्छिष्याभ्यां तेषां जीवनकाले एव साकारः कृतः । प्रलम्बा-दवधेरस्य शब्दानुशासनस्याऽध्ययनमस्माक धर्मसघे जायमानमस्ति । अनेकेषां विदुषामेषा शुभाशंसासीत् यद्यस्यशब्दानुशासनस्य प्रकाशन स्यात् तर्हि अनेके छात्रा सारल्येन सस्कृतमध्येतुमुत्सहेरन् । किन्तु नैषा भावना सपूर्तिमगमत् । श्रीमज्जयाचार्य-निर्वाणशताब्द्या अवसरे सहजमेव प्रकाशनयोग. समवतरित । जातमपि प्रकाशनम् । आचार्यवर्याणा श्रीतुलसीगणिनामनेन शब्दानुशासनेन सह प्रगाढ. सम्बन्धोऽस्ति, एतस्य प्रथमश्रेणिगाश्छात्रा वर्तन्ते । अस्य सशोधने सस्करणे परिष्करणे च कृतोऽस्ति बहु प्रयत्न. । आचार्यवर्याणामिच्छासीदस्य सुसम्पादन भवेत् । एतस्मिन् कर्मणि आचार्यवर्यैरभियोजितो मुनिराजेन्द्र । तेन अत्यन्तायामपूर्वकं व्यधायि प्रस्तुतग्रन्थस्य सम्पादनम् । सम्पादनस्य पद्धति प्रदर्शितास्ति सम्पादकीये । श्रम फलतीति फलश्रुतिरनुमोदनीयाऽस्ति । निर्माणस्य इतिवृत्त आचार्यवर्याणामाशीर्वचने अधिक सप्राणमस्ति । एतानि सर्वाणि वाच्यानि सभूतानि प्रस्तुतग्रन्थस्य प्रतिमाया प्राणप्रतिष्ठा कुर्वन्ति । एष एव महानन्दस्य विषयोऽस्ति मम सम्मुखे । विश्वसिमि शब्दानुशासनजगति अस्य सम्यग् मूल्यांकन भविष्यतीति ।

जैनविश्वभारती
महावीरजयती
६ अप्रैल, १९८२
लाडनू (राजस्थान)

—**युवाचार्यमहाप्रज्ञः**

सम्पादकीयम्

विलसतितरां खलु वीचिमाली ममाभिमुखो लोचनयुगले। यावानस्ति स अधिको विशालः तावानेव मनोज्ञोऽस्ति। यावान् स गम्भीरोऽस्ति तावानेव शाब्दिकः। अहं तस्य पुलिनपटले ऊर्ध्वन्दमोस्मि चिन्तयामि च यस्मिन् पारावारे किमपि आस्वादन न भवेत् न भवेच्च कोऽपि आनन्दो महोपलब्धिश्च, तस्मिन् महोदधौ मम निमज्जनं किमु सार्थकं भविष्यति ? प्रश्नचिह्नरूपेण मर्मका अन्तर्गता अज्ञात-भावना उत्पेदे। वस्तुतः व्यलोकि मया व्याकरणं महासमुद्ररूपेण। यदा यदा समीपीकृतो मया व्याकरणवारिधिः तदा तदा स ममजनि अत्यधिको विशालः स्वादविरसः शाब्दिकश्च। नासीत् कापि कल्पना अन्तःकरणे यदहं विदधे तस्य स्वीकरणम्। किन्तु पर्याप्तमस्ति पान्थस्य कृते पाथेयं यदि कोऽपि तत् प्रदातुं प्रभूष्णुः स्यात्। पूज्यपादानां आचार्यप्रवराणां समुत्साहितोऽहं एकेन मार्मिकश्लोकेन। प्रादुर्भूता मम मानसे एका बलवती प्रेरणा समाहित च मे चेतः सम्यग्रूपेण। एकदा वयं समुपासीनाः सतीर्थ्या वान्वयमा आचार्यवर्यान्। समजनि व्याकरणस्य विषये विचार-मन्थनम्। सारभूत तथ्यं प्रकटयन्तः आचार्यवर्याः अचीकथयन् —

'यद्यपि बहुनाऽधीषे, तथापि पठ पुत्र ! व्याकरणम्।
स्वजनः स्वजनो मा भूत्, शकलं सकलं शकृद् सकृद्' ॥

कयाचिद् जनयित्र्या स्वकीयः पुत्रः समुपदिष्टो ममतामयवचनेन—'पुत्र ! बहु अधीतं त्वया, साम्प्रतमपि अधीषे, तथापि व्याकरणस्य अध्ययनं अत्यावश्यकं त्वत्कृते। किञ्च तेन विना न ज्ञातुं समर्थोऽसि त्व श्वजन-स्वजनयोः शकल-सकलयोः शकृद्-सकृदोश्च अर्थभेदम्।'

प्राग् भवति भाषा पश्चाच्च समायाति व्याकरणं तां नियन्त्रयितुम्। भाषास्ति एकः अजस्रप्रवाहो व्याकरणञ्च तस्यास्तटबन्धनम्। प्रत्येकभाषायाः समृद्ध्यर्थं प्राणवत्तार्थं चावश्यकं भवति व्याकरणस्य निर्माणम्। अवलम्बितमस्ति भाषाया सर्वमस्तित्वं व्याकरणस्योपरि। किञ्च न जायते तेन विना प्राणप्रतिष्ठा।

संस्कृतं प्राकृतञ्च भाषाद्वयमिदं प्राचीनम्। भगवता महावीरेण प्रतिपन्ना जनभाषा प्राकृतभाषा। प्रस्तुतीकृता तस्यामेव भाषाया भगवता ज्ञातनन्दनेन स्वकीया धर्मदेशना। भगवतो महावीरस्य अनन्तर अनेके प्रबुद्धाः प्रगल्भाश्च महामनस्विनः जैनाचार्या बभूवुः। तैः प्राकृतभाषाया आगमग्रन्थानां व्याख्या व्यधायि। प्रवाहोऽयं गतिमानभूत् किञ्चिद् समयपर्यन्तम्। यदा प्राकृतभाषाया स्थानं गीर्वाणवाण्या अधिकृतं तदा विरचिता अनेके टीकाग्रन्थाः आगम-व्याख्यारूपेण जैनाचार्यैः संस्कृतभाषायाम्। तेषां प्रयत्नः प्राकृतग्रन्थानां प्रणयनेऽपि तथैव जायमानो लोकान् प्रीणयामास। तस्मात् प्रारभ्य अद्यावधि संस्कृतप्राकृतयोरेका अजस्रधारा प्रवृत्ता। तयोः द्वयोर्भाषयोर्निष्णाताः ऋषयो महर्षयश्च यथासमय स्वकीय-साहित्यिकप्रतिभया साहित्यजगत् समुपचक्रुः। निरमायि तैः कोश-टीका-व्याकरणप्रभृतिग्रन्थाः।

ईसापूर्वे चतुर्थशतके [ई० पू० ३५०] महर्षिपाणिनिमहोदया बभूवुः। तेषां युगं व्याकरणस्य कृते स्वर्णिमयुगं समासीत् इत्थमेव मन्यन्ते विज्ञजनाः। महर्षिपाणिनयः अङ्गोपाङ्गेन समलंकृतस्य महाव्याकरणस्य प्रणयनं विदधिरे। नयन्ति लोका स्वकीये स्मृतिपटले तान् व्याकरणजगति व्याकरणस्य स्रष्टृरूपेण। पाणिनिव्याकरणस्य प्रचलनमपि बहु चकास्ति। विश्वविद्यालयेषु विद्याध्ययने सलग्नान् विद्यार्थिनः कारयन्ति संस्कृताऽध्ययनं तस्यैवानुरूपेण।

कलिकालसर्वज्ञा श्रीमद्धेमचन्द्राचार्याः (विक्रम० ११४५-१२२९) बभूवुः। तैरनेके ग्रन्थाः प्रणीताः। संपस्पृशुः स्वलेखिन्या ते व्याकरणशास्त्रमपि। 'श्रीसिद्धहेमशब्दानुशासनं' महाव्याकरणमेकं निर्मितमस्ति तैरेव। तस्य पठन-पाठनं न विस्तृतं क्षेत्रमवगाहते। तस्य कारणं यत् तस्य मूल्यांकनमकारि लब्धवर्णैः साम्प्रदायिकदृष्ट्या। महर्षि-पाणिनेः प्रारभ्य हेमचन्द्राचार्यपर्यन्तः समयः साहित्यिकदृष्ट्या अतीव-समृद्धशाली गौरवान्वितः समुन्नतश्च परिगण्यते। तस्मिन्नवान्तरवधौ अनेकेषां व्याकरणग्रन्थानां प्रणयनं समजनि। तेषु विख्याः शाकटायन-जैनेन्द्र-सारस्वत-विशालशब्दा-नुशासनादयः ग्रन्थाः।

लघुरय सांख्यिकदृष्ट्या तेरापंथधर्मसंघ., किन्तु अनुशासन-संगठन-व्यवस्थया कस्यचिद् विशालधर्मसंघस्य तुलामधिरोहति। समाद्रियन्ते लोकास्तं विपुलाशां हृदि धारयन्तो यदनेन सघेन कल्याणभाजो भविष्यन्ति विशः। तेषां मनसि एका गहननिष्ठा घनीभूता सघ प्रति। तेरापथ-धर्मसंघस्य महान्त आचार्यास्तस्य सर्वतोमुखीविकासाय अनेकान् प्रयत्नान् विदधिरे, नवीनान् आयामांश्च उद्घाटयाञ्चक्रु। तेरापथस्य आद्यप्रवर्तका श्रीमद्भिक्षुस्वामिनः धर्मक्रान्त्यै सत्यान्वेषणाय च आगमान् दुदुहिरे। तस्मान्निसृत नवनीत प्रतिजनान् प्रेषयाञ्चक्रु। चतुर्थानुशास्तार श्रीमज्जयाचार्या. प्रज्ञापुरुषरूपेण प्रख्याता:। तै सार्धत्रयलक्षपदानि विरचय्य साहित्यक्षेत्रे एक नूतन कार्यमकारि। तस्य सर्वाधिकोपलब्धि: धर्मसघे सस्कृतस्य बीज-वपनम्। मध्यवर्तिभिराचार्यैः समुप्तं बीज अवश्यमेवाभिषिक्त, किन्तु अपर्याप्तम्। तेन तस्याङ्कुरस्य बहुमुखी विकासो न समजनि। यदा अष्टमाचार्या. पूज्यपादा कालूगणिन. पदासीना बभूवु, तैरेतादृशानि महान्ति कार्याणि सम्पादितानि यानि न कृतानि पूर्वाचार्यै.। ते स्वय सस्कृतरसिका. स्वसघमपि सस्कृतस्य आस्वादनाय प्रेरयाञ्चक्रु। ते स्वय नियुक्ता अन्यानपि तस्मिन् सस्कृतविकासेऽध्वनि नियोजयाञ्चक्रु। सस्कृतस्य पठन-पाठनाय पूज्यवरै सरल सुबोध च साङ्गोपाङ्ग-महाव्याकरण परिकल्पितम्। कार्यमिद मुनिचौथमलस्वामिना स्वीकृतम्। तस्मिन् कार्ये सहभागी जात आशुकवि. पण्डितरघुनन्दनमहोदय:। द्वयोर्मेलन धर्मसघाग समजनि सस्कृतविद्या-विकासाय, नैपुण्याय कल्याणाय च। येन केनापि नयनातिथीकृतोऽय कृती स स्मरति तस्य पण्डितस्य वाक्कौशल पठन-पाठनस्य कला सस्कृतस्य च अजस्र प्रवाहम्। महाव्याकरणमिदं परिपूर्णतामगात् अष्टवर्ष-प्रयासेन (विक्रमाब्दे १९८०-१९८८)। विशाल-कायग्रन्थोऽय तेरापथस्य आद्यप्रवर्तकश्रीभिक्षुस्वामिन अभिधया अभिहित:। वस्तुत श्रीभिक्षुशब्दानुशासनस्य निर्माण एका ऐतिहासिकी घटना इतिहासस्य पृष्ठेषु। अस्य व्याकरणस्य प्रकाशनं नितान्तमपेक्षितमासीत्। अद्यपर्यन्त साधव साध्व्यश्च तत् पठित्वैव सस्कृते निष्णातता गता इति सर्वविदितमेव। कालूजन्म-शताब्दिमहोत्सवे तत्प्रकाश नेतु चर्चा जाता. किन्तु सुसम्पादनाऽभावे साऽपि स्थगिता। व्याकरणस्य हस्तलिखितादर्श अस्माक पार्श्वे पञ्चाशत्वर्षपर्यन्त सुरक्षितोऽस्थात्। विक्रमाब्दे २०३३ पूज्यपादा. आचार्यश्रीतुलसीगणिन 'सरदारशहर' इति नाम्नि नगरे वर्षावास सपूर्य चूरूनगरे समागता.। शुक्रवासरस्य मगलमय प्रभातम्। विशाले स्थाने आर्यवर्याणामवस्थिति। एकस्मिन् कोणे मदीया उपस्थिति। पूज्यपादै मा दृष्ट्वैव सस्मित अभिहित—व्याकरणस्य सपादन प्रारभस्व। तस्मिन् कार्ये यत्किमपि संशोधन परिमार्जन चापेक्षित स्यात् तत्कृत्वा कार्य सुष्ठु सपादय। हस्तौ कुड्मलीकृत्य उररीकृत मया आर्यवचनम्। चित्त परिप्लुतमेकेन आवेगेन। महाकविकालिदासस्य सूक्तिरपि मानस-पटले नर्तितु लग्ना—**'प्रांशुलभ्ये फले रम्ये, उद्बाहुरिव वामनः।'** क्व च व्याकरण-जलधि क्व चाह उडुपेन तितीर्षुरस्म्। तदानीमेव महाप्रज्ञाना युवाचार्याणां सुभाषितेन समाहित मन.— यत्किमपि नास्ति दुस्तर पुरुषार्थिन कृते। कार्योत्साहो विजयते सर्वत्राऽपि। न कोऽपि त पराजेतुमल यस्य आत्मविश्वास व्याप्तोऽस्ति सर्वेषु आत्मप्रदेशेषु। अभीप्सित आसीत् व्याकरणस्य विषयो मम कृते, पर तस्य सपादनविषये नासीत् कोऽपि अनुभव। कार्यमासीत् गुरुतर दुरूह च। मया कर्तव्यबुद्धचा प्रतिपन्नमिद कार्य कर्तव्यपरायणभावेन च निर्व्यूढम्। कार्यं भवेत् लघु वा गुरु, विचारसरणौ तस्य गुरुत्व नानुभूत भवेत् पर यदा तस्य सपादनं जायते तदा न भवति सरल लघु च। प्रारब्ध कार्यम्। एकाग्रतादिगुणै सर्व कठिन कार्य सुगमायते इति अनुभूत मया कार्यकाले।

सम्पादनकार्ये अनेका. बाधा उत्पेदिरे। तासु महत्त्वपूर्णा प्रथमा निराकरणीया चासीत् हस्तलिखितादर्शस्य समीचीना प्रतिकृति। प्राचीनलिप्या केषाञ्चिदक्षराणामाकृति भिन्ना प्रतिभाति। तेषां सम्यगवबोध प्रथमचरणे स्यात्, तत तेषा प्रतिलिपि। पर या प्रतिकृति कृतासीत् सा अशुद्धिबहुला। तां विलोक्य ममावधारणा विपरीतता गता। कार्यस्य दुरूहता वृद्धि गता। एकदा ध्यातमिति मया यदहमेव सर्वस्य व्याकरणस्य प्रतिलिपि विधाय कार्य सुगमता नयामि। परन्तु तदपि अतीवसमयसाध्य श्रमसाध्य चासीत्।

न मया कदापि संपादन कृत कस्यापि ग्रन्थस्य, अत सम्पादनानुभवोऽपि शून्य एव। तां शून्यता पूरयितु निरीक्षित मया सुसम्पादित-पाणिनि-जैनेन्द्र-शाकटायन-हैमीव्याकरणम्। सपादनदृष्ट्या केचन बिन्दव मम चिन्तने-समायाता। तेषा यथास्थान उपयोगो व्यधायि मया।

अस्मिन् व्याकरणे स्थाने स्थाने अनेकेषां काव्यानामुदाहरणानि सन्ति उट्टंकितानि। तत्र तेषां नास्ति प्रमाणोल्लेखनम्। मया अस्यां दिशि प्रयतितम्। यानि प्रमाणानि उपलब्धानि सुगमतया दुष्करतया वा तानि यथास्थाने योजितानि, परं अवशिष्टान्यपि सन्ति अनेकानि। काव्यग्रन्थावाप्तिमन्तरेण तेषां स्थाननिर्दिष्टे. संभवो नास्ति इति ज्ञेयम्।

तथैव पाणिनिव्याकरणस्य हैमशब्दानुशासनस्य च सूत्राणि नामोल्लेखपूर्वक यानि उपढौकितानि ग्रन्थकर्त्रा, तेषां प्रमाणानि अन्विष्य नियोजितानि ।

अस्मिन् सम्पादनकार्ये पञ्चवर्षस्य समयो व्यतीतः । मुख्यतया अस्मिन्नेव कार्येऽहं संलग्नः आसम् । अन्यानि कार्याणि गौणीकृत्य तदेव मया प्रतिपन्नम् । विहारगोचरीप्रभृतीनि कार्याणि कुर्वताऽपि मया कालोऽतिवाहितः संपादनकार्ये । इदं महद् गुरुतरं कार्यं मम हस्ताभ्यां परिसंपन्नमिति महती प्रसन्नता । ग्रन्थोऽयं द्वयोर्भागयो परिसमाप्योऽस्ति । प्रस्तुतग्रन्थ. अष्टाध्यायीपूर्वकं बृहद्वृत्त्या समलंकृत । अस्मिन् अष्ट अध्याया सन्ति । प्रत्येकस्याऽध्यायस्य चत्वारश्चरणाः । सर्वेषां सूत्राणां सख्यास्ति ३७४६ ।

येषां प्रेरणा ममान्तःकरणे दिव्यज्योतिरूपेण सदा प्रज्वलिता तेषा महामनस्विना आचार्यचरणाना चरणयोः समुपढौकयामि प्राभृतमिदम् । येषां वात्सल्यपूरितया दृशा सदा स्नातोऽहं तेषां योगिराजानां युवाचार्यमहाप्रज्ञानां चरणकमलयोः चञ्चरीकभाव भजन् प्रमोदं वहामि । तेषां आचार्ययुवाचार्यवर्याणां सहयोगः मार्गदर्शन च मम प्रगतिवर्धकं जातमिति सुस्पष्टम् । यदा कदाऽपि या काऽपि आशका उत्पन्ना कार्ये तत्कालमेव तेषां सान्निध्यं प्राप्य निराकृता मया इति सतीर्थ्याः विदन्त्येव ।

स्मराम्यह प्रत्यह मुनिश्रीचन्द्रस्वामिनः सहयोगम् । ते मति व्याकरणविषये निष्णाता अध्येतारश्च । इतः पूर्वं ते व्याकरणमिदं पाठितवन्तोऽनेकश, अत व्याकरणस्य हार्दं तेषां हृदयगमीभूतमिति अनुभूतं मया । अजानता मया बहुवार तैः सार्धं व्याकरणमधिकृत्य विवदित, पर तैरुचितसमाधानेन मम चित्त समाहितम् ।

मुनिदुलहराजस्वामिन प्रति कोऽपि उल्लेख स्यादुपचारपूर्तिमात्रम् । तेषा वात्सल्य चैतन्यगतमिति नितान्तमनुभवामि । तेषां प्रेरणा अद्यापि मां प्रेरयति नवीने नवीने कर्मणि । ते आगमसंपादनकार्ये युवाचार्यमहाप्रज्ञानां ग्रन्थसम्पादने च सलग्ना सन्ति । अस्ति तेषां पुष्टोनुभव. अस्मिन् कार्ये । समये समये अनुशिष्टि प्राप्य तेषां मया सपादनमार्गे सरलतानुभूता । मम मार्गः प्रशस्तोऽजनि । अभिवादन करोम्यह तेषाम् ।


मुनि. शान्तिकुमारः मम सहपाठी । अस्ति प्रतिलिपिकार्ये तस्य सहयोगोऽपि प्रशसनीय ।

विद्यार्थिभ्यां मुनिधनञ्जयप्रशान्तकुमाराभ्या मम कार्यश्रम. लघु कृत । तेषा सहयोगदान अपेक्षते उल्लेखम् ।


श्रीभिक्षुशब्दानुशासनमिद संस्कृत प्रति अनुरागमुत्पादयेत् इत्याशया विरमामि । अभिलषाम्यह यत् भारतीयवाङ्मयं तद् गौरवास्पद स्थानमाभजेत । सुधीजनाना मनसि का प्रतिक्रिया भाविनीति नाह चिन्तयामि । स्वान्त.सुखाय कृतोऽय मम प्रयास सर्वेषु आह्लाद जनयेदिति मगल भावयामि ।

—मुनिः राजेन्द्रकुमारः

जैनविश्वभारती,
महावीरजयंती
६ अप्रैल, १९८२
लाडनूं (राज०)



ग्रन्थकर्तुः हस्तलिखितव्याकरणादर्शस्य प्रतिकृतिः—प्रथमं पत्रम्



ग्रन्थकर्तुः हस्तलिखितव्याकरणादर्शस्य प्रतिकृतिः—अन्तिमं पत्रम्

अनुक्रमः

प्रथमोऽध्यायः

प्रथमश्चरणः

यत्पाणिपल्लवतलोषितवल्लवोऽपि,
प्राप्नोति लोकविरलं कविवल्लभत्वम् ।
तस्या गुणीन्द्रगणवन्द्यपदोत्पलाया,
वाण्या वरेण्यशरणं प्रणिपद्यमानः ॥१॥

श्रीचौथमल्लमुनिनिर्मितरम्यभिक्षु-
शब्दानुशासनमिदं विवृणोमि वृत्त्या ।
हृष्यन्तु यल्ललितसूत्ररस निपीय,
भृङ्गा मरन्दमिव विज्ञजनाग्रगण्याः ॥२॥

येषां नितान्तनिहितैः करुणाकटाक्षै-
र्नव्योद्यमो भवति संस्कृतशब्दशास्त्रे ।
तेषां गणाधिपतिकालुमुनीश्वराणां,
जीयाच्चिरं रुचिरसच्चरणाब्जरोचिः ॥३॥

अथ शब्दानुशासनं चिकीर्षुर्ग्रन्थकारः आदाविष्टदेवनमस्कारमाचष्टे—

वीरं नत्वा जगद्वन्द्यं, कालुरामं च सद्गुरुम् ।
क्रियते चौथमल्लेन, भिक्षुशब्दानुशासनम् ॥

मया चौथमल्लाभिधेन मुनिना भिक्षुशब्दानुशामनं क्रियते । शब्दानां प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन अनुशासन—शब्दानुशासनम् । श्रीमज्जैनश्वेताम्बरतेरापन्थाभिधसंप्रदायाद्यपुरुषभिक्षुगणिराजसंबन्धिशब्दानुशासनं—भिक्षुशब्दानुशासनम् । ग्रन्थकर्त्रा महामहिम्नामादिगुरूणां श्रीभिक्षूणामेव तत्कृपयैव जायमानत्वादभिधानेन प्रकाश्यते । किं कृत्वेत्याह—जगद्वन्द्यं वीरं जगद्वन्द्यं च सद्गुरुं कालुरामाऽभिधवर्तमानाचार्यं नत्वा—नमस्कारं कृत्वेति । तत्रादिमं सूत्रम्—

१. ॐ ।

ओमित्येतदक्षरमर्हदशरीराचार्योपाध्यायमुनीनामाद्याक्षररूपं, शिवपदस्यादिबीजं, निखिलशास्त्रोपशास्त्ररहस्यभूतं, अशेषप्रत्यूहसमूहविच्छेदकं, नानालोकिताऽलोकितफलसंकल्पकल्पपादपोपमं, आशास्त्राऽध्ययनाऽध्यापनाऽवधिप्रणिधेयम्[1] । इममेव तात्त्विकं नमस्कारं बुद्ध्वा सूत्रकारः शास्त्रारम्भ एव प्रणिदधाति ।

---

१. आङभिविधौ, स च शास्त्रेण सह संबध्यते । अवधिशब्दस्तु मर्यादायाम् । स चाध्ययनाध्यापनाभ्याम् । ततोऽयमर्थ—शास्त्रमभिव्याप्य ये अध्ययनाध्यापने ते मर्यादीकृत्य प्रणिधेयमिदमित्यर्थः ।

२. सिद्धिरनेकान्तात्[1] ।

अस्तित्वनास्तित्वनित्यत्वाऽनित्यत्वसामान्यविशेषादिकोऽनेक: अन्त:[2]—स्वभावो यस्मिन् भावे सोऽयमनेकान्त:, अनेकात्मा इत्यर्थ: । तत. सिद्धिर्निष्पत्तिर्ज्ञप्तिर्वा प्रकृतानां शब्दानां वेदितव्या । एकस्यैव हि ह्रस्वदीर्घादिविधयोऽनेककारक-सन्निपात:, सामानाधिकरण्यं विशेषणविशेष्यभावादयश्च अनेकान्तं विना नोपपद्यन्ते । तत: अनेकान्तादेव विविक्तशब्द-प्रयोगात् सिद्धि:—सम्यग्ज्ञानं, तद्द्वारेण च नि:श्रेयसं भवेदिति ।

३. लोकात् ।

उक्तातिरिक्तानां क्रियागुणद्रव्यजातिकाललिङ्गस्वाङ्गसंख्यापरिमाणाऽपत्यवीप्सादीनां संज्ञानां परान्नित्यं नित्यादन्तरङ्गमन्तरङ्गाच्चाऽनवकाशमित्यादीनां च न्यायानां लोकात् शास्त्रप्रवृत्तये सिद्धिर्भवतीति वेदितव्यम् ।

४। अइउऋऌ-एऐओऔ-हयवरल-ञणनङम-झढधघभ-जडदगब-खफछठथ-चटतकप-शषस: ।

एतत् प्रत्याहार[3]सूत्रमसादिप्रत्याहारार्थम् । अ इ उ ऋ ऌ ए ऐ ओ औ—इत्यत्र स्पष्टतार्थं सन्धिरविवक्षित: । हकारादिष्वकार उच्चारणार्थ: ।

५. आद्यन्ताभ्यां प्रत्याहारे ।

प्रत्याहारे गृह्यमाणा वर्णा आद्यन्ताभ्या सह गृह्यन्ते । यथा अलप्रत्याहारे—अइउऋऌ-एऐओऔ-हयवरल इति । झभप्रत्याहारे—झढधघभ इति । जबप्रत्याहारे—जडदगब इति । एवमन्यत्रापि विज्ञेयम् ।

६. औदन्ता: स्वरा: ।

औदन्ता वर्णा. स्वरसञ्ज्ञका भवन्ति । अ-इ-उ-ऋ-ऌ-ए-ऐ-ओ-औ-स्वरा इति विवेक: । तकार उच्चारणार्थ: । स्वरसंज्ञाप्रयोजनं तु **'इवर्णादीनां स्वरे यवरला:'** [१/२/१] इत्यादि ।

७. एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुता: ।

मात्रा कालविशेष. । एकद्वित्रिमात्रा औदन्ता वर्णा यथासङ्ख्यं ह्रस्वदीर्घप्लुतसञ्ज्ञका भवन्ति । एकमात्रो ह्रस्व: —अ, इ, उ, ऋ, ऌ । द्विमात्रो दीर्घ:—आ, ई, ऊ, ॠ, ॡ, ए, ऐ, ओ, औ । त्रिमात्र: प्लुत:—आ३, ई३, ऊ३, इत्यादि । औदन्ता इति किम्? प्रतक्ष्य । अत्रार्धमात्रिकयोर्हंसयो समुदायस्यैकमात्रत्वेऽपि ह्रस्वसंज्ञाया अभावात् **'ह्रस्वस्य पित्कृति तुक्'**

---

१. दशधा सूत्राणि—

१. संज्ञासूत्र—**'औदन्ता: स्वरा:'** [१/१/६]
२ परिभाषासूत्र—**'प्रत्यय: प्रकृत्यादे:'** [८/४/१२७]
३. अधिकारसूत्र—**'वृद्धि'** [१/४/५३]
४. विधिसूत्रं—**'विवलादेकपदेऽपवान्ते कृतस्य सस्य'** [२/२/१४]
५. प्रतिषेधसूत्र—**'न स्ते मत्वर्थे'** [१/१/२६]
६. नियमसूत्रं—**'नाम सिद्व्यञ्जने'** [१/१/२३]
७ विकल्पसूत्रं—**'धावोवितो'** [१/२/४२]
८. समुच्चयसूत्र **'शसोता दीर्घ: सश्च न: पुंसि'** [१/४/७२]
९ अतिदेशसूत्र—**'उवित: क्त्वो वा'** [४/३/७९]
१० अनुवादसूत्र—**'तयो: समूहवच्च बहुषु'** [८/२/१७]

—इत्यादीनि सूत्राणि प्रत्येक ज्ञातव्यानि । एतेषां मध्ये इदमधिकारसूत्रमा शास्त्रपरिसमाप्ते: ।

२. अमति —गच्छति धर्मिणमिति **'कम्यमि ..'** [उ० १/२००] इति सूत्रेण त —अन्तो धर्म: स्वभाव: अवसानं समीपञ्च ।

३ प्रत्याह्रियन्ते—संक्षिप्यन्ते वर्णा यस्मिन्निति प्रत्याहार: ।

[४/४/४७] इति तुगागमो न भवति। वर्णानां[1] च ह्रस्वादिसंज्ञाविधानात् तितउच्छत्रमित्यादावकारोकारलक्षणवर्ण-समुदायस्य द्विमात्रत्वेऽपि दीर्घसंज्ञाया अभावात् '**अनाङ्माङो दीर्घाद् वा छः**' [१/३/२३] इत्यादिना द्वित्वविकल्पो न भवति। संध्यक्षराणां तु एकमात्रिकत्वाऽभावाद् ह्रस्वसंज्ञा न भवति। ह्रस्वादिसंज्ञाप्रयोजनं तु '**ह्रस्वस्य गुणो धिना**' [१/४/३६] इत्यादि।

८. अवर्णा नामिनः।

अवर्णवर्जिता ह्रस्वदीर्घप्लुता औदन्ता वर्णा नामिसंज्ञका भवन्ति। इ, ई, उ, ऊ, ऋ, ॠ, लृ, ॡ, ए, ऐ, ओ, औ। नामिसंज्ञाप्रयोजनं तु '**नामिनः स्वरेऽनामि**' [२/१/१०] इत्यादि।

९. लृदन्ताः समानाः।

ह्रस्वदीर्घप्लुता लृदन्ता वर्णाः समानसंज्ञका भवन्ति। अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, ॡ। समानसंज्ञा-प्रयोजनं तु '**समानानां सवर्णे दीर्घः सह**' [१/२/१२] इत्यादि।

१०. एऐओऔ संध्यक्षराणि।

ए, ऐ, ओ, औ—इत्येते वर्णाः संध्यक्षरसंज्ञका भवन्ति। संध्यक्षरसंज्ञाप्रयोजन तु '**आत्संध्यक्षराणां**' [४/२/१०१] इत्यादि।

११. अं अनुस्वारः।

अकार उच्चारणार्थः। अं इति अनुनासिक्यो वर्णः अनुस्वारसंज्ञको भवति। अनुस्वारसंज्ञाप्रयोजन तु '**मोऽनुस्वार-यमौ हसे सवर्णौ**' [१/३/१८] इत्यादि।

१२. अः विसर्गः।

अकार उच्चारणार्थः। अः इति कण्ठ्यो वर्णः विसर्गसंज्ञको भवति। विसर्गसंज्ञाप्रयोजन तु '**विसर्गस्य सश्छते**' [१/३/४४] इत्यादि।

१३. ह्रस्वो लघुः।

ह्रस्वो वर्णो लघुसंज्ञको भवति। लघुसंज्ञाप्रयोजनं तु '**लघोर्दीर्घोऽस्वरादेः**' [४/१/११२] इत्यादि।

१४. संयोगे गुरुः।

ह्रस्व इत्यनुवर्तते। संयोगे परे ह्रस्वो वर्णो गुरुसंज्ञको भवति। गुरुसंज्ञाप्रयोजनं तु '**दूरादामन्त्रितस्य गुरुर्वैको-ऽनन्त्योऽपि लनृत्**' [८/४/१११] इत्यादि।

१५. दीर्घः।

गुरुरित्यनुवर्तते। दीर्घो वर्णो गुरुसंज्ञको भवति।

१६. कुचुटुतुपु वर्गाः।

कु इति कखगघङ इत्येतेषां वर्णानां प्राचीनाचार्यविहितः संकेतः। एवं चु इति चछजझञाम्। टु इति टठडढणाम्।

---

१. न तु वर्णसमुदायस्य।

तु इति तथदधनाम् । पु इति पफबभमाम् । कुचुटुतुपुभिर्विहिता वर्णा. प्रत्येकं वर्गसंज्ञका भवन्ति । कखगघङ इति कवर्गः । एवं सर्वत्र ।

१७. स्वरानन्तरिता हसाः संयोगः ।

स्वरैरव्यवहिता हसाः सयोगसज्ञका भवन्ति । जातौ चेद बहुवचनं, तेन द्वयोर्बहूना च सयोगसंज्ञा सिद्धा भवति । अग्निरिति गनौ । अश्व इति शवौ । कर्णं इति रणौ । इन्द्रश्चन्द्रो मन्द्र इति नदराः । उष्ट्रो राष्ट्रं भ्राष्ट्रमिति षटराः । स्वरानन्तरिता इति किम् ? पचति पनसम् । **'स्कोः संयोगाद्योर्लोपः'** [२/१/११८] इति सकारलोपो मा भूत् । संयोगसंज्ञा-प्रयोजनं तु **'संयोगस्य'** [२/१/११६] इत्यादि ।

१८. तुल्यस्थानाभ्यन्तरप्रयत्नः सवर्णः ।

तुल्यं स्थानमाभ्यन्तरप्रयत्नाश्च यस्य स तुल्यस्थानाभ्यन्तरप्रयत्नः । तुल्यस्थानाभ्यन्तरप्रयत्नो वर्णो येन वर्णेन सह स त प्रति सवर्णसंज्ञको भवति । यत्र पुद्गलस्कन्धस्य वर्णभावापत्तिस्तत् स्थान कण्ठादि । यदाहु.—

अष्टौ स्थानानि वर्णानामुरः कण्ठ. शिरस्तथा ।
जिह्वामूलं च दन्ताश्च, नासिकौष्ठौ च तालु च ॥

तत्र अकुहविसर्गा कण्ठ्या । इचुयशास्तालव्याः । ऋटुरषा मूर्धन्या. । लृतुलसा दन्त्या । उपूपध्मानीया ओष्ठ्या. । एदैतौ कण्ठतालव्यौ । तालव्यावित्यन्ये । ओदौतौ कण्ठौष्ठ्यौ । ओष्ठ्यावित्यन्ये । वकारो दन्तौष्ठ्य । जिह्वामूलीयो जिह्व्यः । विसर्गादेश ≍क इति जिह्वामूलीय ।)(प इति उपध्मानीय । कपावुच्चारणार्थौ । वर्गपञ्चमान्तस्थाभिर्युक्तो हकार उरस्य । अनुस्वारो नासिक्य । कण्ठनासिक्य इत्यन्ये । अणनङमा. स्वस्थाननासिकास्थाना. । सर्बमुखस्थानमवर्णं[1], हविसर्गावुरस्यौ, कवर्गो जिह्वामूल इत्यन्ये ।

प्रयत्नो द्विविध —आभ्यन्तरो बाह्यश्च । तयोर्मध्ये आभ्यन्तर एवेह गृह्यते । स च चतुर्विधः—१. स्पृष्टः[2] २. ईषत्स्पृष्ट ३. विवृत[3] ४. ईषद्विवृतश्च । तत्र स्पृष्टं करणं वर्ग्याणाम् । वर्गे भवा वर्ग्याः । कादयो मपर्यन्ता. । ईषत्स्पृष्ट करणमन्तस्थानाम् । यवरला अन्तस्थाः । विवृत करणं स्वराणाम् । ईषद्विवृत करणमूष्मणाम् । शषसहा ऊष्माण ।

तत्र त्रयोऽकारा —उदात्तानुदात्तस्वरिता । प्रत्येकं सानुनासिकनिरनुनासिकभेदात् षट् । एव दीर्घप्लुताविति अष्टादशभेदा अवर्णस्य । तथेवर्ण । तथोवर्ण. । तथा ऋवर्ण. । तथा लृवर्ण । लृवर्णस्य दीर्घा न सन्ति, ततोऽस्य द्वादशभेदा इत्यन्ये । सध्यक्षराणा ह्रस्वा न सन्ति, तत एषामेकैकस्य द्वादशभेदा. । यवला द्विप्रभेदा.—सानुनासिकानिरनुनासिकाश्च । तौ द्वावपि परस्पर सवर्णौ । वर्ग्यो वर्ग्येण सवर्ण. । रेफोष्माणां[4] त्वतुल्यस्थानाभ्यन्तरप्रयत्नत्वात् सवर्णा न भवन्ति । आभ्यन्तरग्रहण बाह्यप्रयत्ननिवृत्त्यर्थम् । ते हि वैदिकप्रयोगेष्वेवोपयुज्यन्ते न तु सवर्णसज्ञायाम् । के पुनस्ते ? विवार., संवारः, श्वास , नादः, घोषः, अघोष , अल्पप्राणः, महाप्राण , उदात्त , अनुदात्त , स्वरितश्चेत्येकादश । कथं पुनरेते बाह्याः, स्पृष्टादय-स्त्वाभ्यन्तरा ? उच्यते—वायुना कोष्ठेऽभिहन्यमानेऽमीषां प्रादुर्भावात्, स्पृष्टादीनां तु कण्ठादिस्थानाभिघाते भावात् । अथवा विवारादयो वर्णनिष्पत्तिकालात् प्रथम वायुवशेनोत्पद्यन्ते स्पृष्टादयस्तु स्थानाभ्यन्तरप्रयत्नव्यापारेण वर्णोत्पत्तिकाल एवेति वर्णनिष्पत्तिकालभावा[5]ऽभावाभ्यां विवारादीनां बाह्यत्व स्पृष्टादीनां चाभ्यन्तरत्वम् । तत्र जिह्वामूलीयोपध्मानीयविसर्ग-खसानां विवार श्वासोऽघोषश्च । अनुस्वारहवानां संवारो नादो घोषश्च । वर्गाणां प्रथमतृतीयपञ्चमा अन्तस्थाश्चाल्प-

---

१ सर्वं मुखं स्थानमस्य । मुखस्थितानि सर्वाण्यपि स्थानानि अवर्णस्येत्यर्थ ।

२-३ स्पृश्यन्ते स्म स्पृष्टा वर्णा । स्पृष्टहेतुत्वात् प्रयत्नोऽपि स्पृष्ट । **'अश्वादिभ्यः'** [८/१/८३] इति अ. प्रत्ययः । प्रयत्नानां संज्ञा इमा यथा-कथचित् व्युत्पाद्यन्ते । एव विव्रियन्ते स्म विवृता वर्णा ।

४ अन्यवर्णापेक्षया तेषां सवर्णत्वाभावः रेफस्य तु रेफ सवर्णो भवत्येव । एवमूष्मणामपि सवर्णा न भवन्तीति ।

५. अत्राल्पस्वरत्वेन भावशब्दस्य पूर्वनिपातः ।

प्राणाः । इतरे[1] सर्वे महाप्राणाः । स्थानग्रहणं किम् ? कचटतपानां भिन्नस्थानानां तुल्याभ्यन्तरप्रयत्नानामपि मा भूत् । तप्र्ता, तप्र्तुं—इत्यत्र **'झसानां झसे सवर्णे'** [१/३/६३] इति पकारस्य तकारे परे लोपो न भवति । आभ्यन्तरप्रयत्नग्रहणं किम् ? चवर्गयशानां तुल्यस्थानानामपि भिन्नाभ्यन्तरप्रयत्नानां मा भूत् । अरुक्श्चोततीत्यत्र **'झसानां झसे सवर्णे'** [१/३/६३] इति शकारस्य चकारे परे लोपो न भवति । सवर्णसंज्ञाप्रयोजनं तु **'समानानां सवर्णे दीर्घः सह'** [१/२/१२] इत्यादि ।

१९. ऋलृवर्णौ वा ।

पूर्वेणाप्राप्ता सवर्णसंज्ञाऽनेन विधीयते । ऋवर्णलृवर्णौ परस्परं सवर्णसंज्ञौ वा भवतः । होतृ+लृकारः= होतृकारः, होतॣकारः । क्लृ+ऋकारः=क्लृकारः, कॄकारः ।

२०. तत्कालस्तपरेण ।

तः परो यस्मात् स तपरः । तपरो वर्णस्तत्कालस्य आत्मना तुल्यकालस्यैव ग्राहको भवति न तु सवर्णस्येत्यभिप्रायः । देवैः, वृक्षैः—इत्यत्र अतः परो भिस् ऐस् भवति न तु ह्रस्वादन्यस्मात् । खट्वाभिः, मालाभिः ।

२१. सितिबादिर्विभक्तिः ।

स्यादयस्तिबादयश्च प्रत्यया विभक्तिसंज्ञका भवन्ति । विभक्तिसंज्ञाप्रयोजनं तु **'अर्थवदधातुविभक्तिवाक्यं नाम'** [१/१/३१] इत्यादि ।

२२. तदन्तं पदम् ।

तदित्यनेन सितिबादिर्गृह्यते । स्याद्यन्तं तिबाद्यन्तं च शब्दरूपं पदसंज्ञं भवति । धर्मो वः सुखं, ददाति[2] न. शास्त्रम् । पदसंज्ञाप्रयोजनं तु **'पदादेकवाक्ये द्वितीयाचतुर्थीषष्ठीभिर्वस्नसौ बहुत्वे वा'** [२/१/५६] इत्यादि ।

२३. नाम सिदय्व्यहसे ।

सिति प्रत्यये यकारवर्जिते हसादौ च परे पूर्वं नाम पदसंज्ञं भवति । सिति—भवदीयः, अहंयुः, अहय्य्युँः, शुभंयुः, शुभय्युँ[3] । हसे—पयोभ्यां, पयोभिः, राजत्वं, राजता, राजकाम्यति । नामेति किम् ? वच्मि, यज्वा । सिदयहसे इति किम् ? भवन्तौ, राजानौ । यवर्जनं किम् ? वाचमिच्छति—वाच्यति । अन्तर्वर्तिन्यैव विभक्त्या तदन्तस्य पदत्वे सिद्धे सिद्ग्रहण नियमार्थं, तेन यकारस्वरादौ प्रत्ययान्तरे न भवति । सौश्रुतं, भागवतम् ।

२४. नं क्ये ।

नकारान्तं नाम क्ये[4] प्रत्यये परे पदसंज्ञं भवति । राजानमिच्छति—राजीयति । राजेवाचरति—राजायते । अचर्म चर्म भवति—चर्मायति, चर्मायते । पदत्वान्नकारलोपः । नमिति किम् ? वाच्यति । क्य इति किम् ? सामनि साधुः— सामन्यः । एवं वेमन्यः । अयेति प्रतिषेधात् पूर्वेणाऽप्राप्ते वचनम् ।

२५. यङो मुक् ।

यङो मुक् पदसंज्ञं भवति । पदत्वात् **'मोऽनुस्वारयमौ हसे सवर्णौ'** [१/३/१८] । तंतन्यते, तन्तन्यते । चंचूर्यते, चञ्चूर्यते । जंजपीति, जञ्जपीति । यंयम्यते, यय्यँम्यते । वंवम्यते, वव्वँम्यते ।

---

१. इतरत्वं पूर्ववाक्यापेक्षं, न सर्वेषामित्यर्थः । उदात्तादीनां स्वरेष्वेव संभवाच्च व्यञ्जनेषु इति व्यञ्जनोत्पत्तौ न कथ्यन्ते उदात्तादयो बाह्य-प्रयत्नाः ।

२. उदाहरणमेतत् तिबाद्यन्तरूपस्य ।

३. अत्र 'ऊर्णाहंशुभमः' [८/१/८६] इति मुसि कृते 'मोऽनुस्वारयमौ हसे सवर्णौ' [१/३/१८] इति सूत्रेण सानुनासिकयकारः ।

४. अत्र क्यग्रहणस्य प्रयोजनं क्यच्क्यङ्क्यष्प्रत्ययानां ग्रहणार्थम् ।

२६. न स्ते मत्वर्थे ।

सकारान्त तकारान्त च नाम मत्वर्थे प्रत्यये पदसंज्ञं न भवति । यशस्वी, पयस्वी, पेचुष्मान्, विदुष्मान्, यशस्वान् । मरुत्वान्, तडित्वान्, उदश्वित्वान् । स्ते इति किम् ? तक्षवान्, राजवान् । मत्वर्थे इति किम् ? पयोभ्यां, नोभ्याम् । '···**अयड्ते**' [१/१/२३] इति पदत्वे प्राप्ते निषेधार्थं वचनम् ।

२७. मनुर्नभोऽङ्गिरो वति ।

मनुस्, नभस्, अङ्गिरस्—इत्येतानि नामानि वति प्रत्यये परे पदसंज्ञानि न भवन्ति । मनुरिव मनुष्वत् । एवं नभस्वत्, अङ्गिरस्वत् । पदत्वाऽभावाद् विसर्गो न ।

२८. थटि ।

थट्प्रत्यये परे पूर्वं नाम पदसंज्ञं न भवति । षष्ठः, षष्ठी । पदत्वाऽभावाद् जबत्वं न । चतुर्थः, चतुर्थी । रेफस्य विसर्गो न ।

२९. वृत्त्यन्तः[1] ।

परार्थाभिधानं वृत्तिः । तद्वांश्च पदसमुदायः समासादिः । तस्या अन्तोऽवसानं पदसंज्ञो न भवति । परमदिवौ, स्वलिहौ, गोदुहौ, परमवाचौ, बहुदण्डिनौ । एषु पदत्वाऽभावादुत्वढत्वघत्वकत्वलोपादीनि न भवन्ति । वृत्तिग्रहणं किम् ? चैत्रस्य कर्म । अन्तग्रहणं किम् ? राजवाक् । अत्र नलोपो भवति । वाक्त्वक्स्रुच इति त्रयाणां वृत्तौ न द्वयोः पृथग्-वृत्तिरिति मध्यमस्य निषेधो न भवति । अथ वाक्त्वचमित्यत्र समासान्ते सति वृत्त्यन्तत्वाऽभावात् पदत्वं प्राप्नोति । तथा च कत्वं स्यात् । उच्यते—समासात् समासान्तो विधीयत इति त्वचो वृत्त्यन्तत्वम् । अन्तर्वर्तिन्या विभक्तेः स्थानिवद्भावेन पदत्व प्राप्तमनेन निषिध्यते, न च सित्येवेति नियमेन तन्निवर्तयितुं शक्यम् । '**प्रत्ययः प्रकृत्यादेः**' [८/४/१२७] इति हि यस्मात् समुदायात् प्रत्ययविधानं तस्यैव पदत्वं नियमेन निवर्त्यते न तु तदवयवस्येति ।

३०. सविशेषणमेकाख्यातं वाक्यम् ।

तिबाद्यन्त पदमाख्यातम् । विशेषणेन[2] सहितं सविशेषणम् । सविशेषणमेकमेवाख्यातं वाक्यसंज्ञं भवति । धर्मो वो रक्षतु, धर्मो नो रक्षतु । उच्चैर्वो वदति, उच्चैर्नो वदति । भोक्तुं त्वा याचते, भोक्तुं मा याचते । शालीनां ते ओदनं ददाति, शालीनां मे ओदनं ददाति । अप्रयुज्यमानविशेषणे—पुनीहि[3] ३, सक्तूंश्च पिब । अप्रयुज्यमान आख्याते—शीलं ते स्व, शील मे स्वम् । अर्थात् प्रकरणाद् वा आख्यातं गम्यते । एकाख्यातमिति किम् ? ओदनं पच तव भविष्यति मम भविष्यति । भिन्नवाक्यत्वाद् वस्नसादयो न । कथं कुरु कुरु न. कटम् ? उच्यते—द्विर्वचने कृते अर्थाऽभेदादेकमेवाख्यातम् । वाक्यसंज्ञाप्रयोजनं तु '**पदाद्वेकवाक्ये द्वितीयाचतुर्थीषष्ठीभिः**···' [२/१/५६] इत्यादि ।

३१. अर्थवदधातुविभक्तिवाक्यं नाम ।

अर्थो द्विविधः—अभिधेयो द्योत्यश्च । तत्र अभिधेयः पञ्चप्रकारः—स्वार्थो द्रव्यं लिङ्गं संख्या शक्ति-

---

१ वर्तनं वृत्ति, क्तिः । यद्वा वर्तन्ते स्वार्थपरित्यागेन पदान्यत्रेति आधारे क्तौ वृत्तिः पदसमुदायादिरूपा । सा त्रेधा—

१. समासवृत्तिः—यथा राजपुरुषः ।
२. तद्धितान्तवृत्तिः—यथा औपगवः ।
३. नामधातुवृत्तिः—यथा पुत्रकाम्यति ।

२ साक्षात् पारंपर्येण वा यस्यानेन संबन्धस्तद् विशेषणम् ।

३. '**क्रियाशीःप्रैषेषु**' [८/४/१०४] इति प्लुतः ।

रिति[1]। चोत्यश्च समुच्चयादिः । तद्वच्छब्दरूपं धातुविभक्त्यन्तवाक्यवर्जितं नामसंज्ञं भवति। वृक्षः, प्लक्षः, शुक्लः, कृष्णः, डित्थः, डवित्थः, स्वः, प्रातः, धवश्च, खदिरश्च । च समुच्चये । विपराभ्यां जेः इत्यादि । अर्थवदिति किम् ? वनम्, धनम् । अत्र नान्तस्यावऽर्धेर्मा भूत् । नामत्वे हि स्याद्युत्पत्तौ पदत्वान्नलोप स्यात् । धातुविभक्तिवर्जन किम् ? अहन्, वृक्षान्, अयजन् । अत्र नामत्वाऽभावे **'नाम्नो नोऽनह्नः'** [२/१/१२१] इति नलोपो न भवति। विभक्त्यन्तवर्जनाच्चाबादिप्रत्ययान्तानां नामसंज्ञा भवत्येव—अजा, बहुराजा, कुमारी, गौरी, गार्ग्यायणी, कारकः, कर्ता, औपगव., आक्षिक. । वाक्यवर्जनं किम् ? साधुर्धर्मं ब्रूते—इत्येवंरूपाद् वाक्याद् विभक्तौ अनिष्टरूपप्रसङ्गः । अर्थवत्समुदायस्य वाक्यस्य नामसंज्ञाप्रतिषेधात् समासादेर्भवत्येव । चित्रगुः, राजपुरुष । ईषदपरिसमाप्तो गुडः—बहुगुडो द्राक्षा । नामसंज्ञाप्रयोजनं तु **'नाम सिदयव्वृत्ते'** [१/१/२३] इत्यादि ।

३२. **भ्वादिर्धातुः ।**

भ्वादयो धातुसंज्ञका भवन्ति । भवति, अत्ति, जुहोति, दीव्यति, सुनोति, तुदति, रुणद्धि, तनोति, क्रीणाति, चोरयति । धातुसंज्ञाप्रयोजनं तु **'धातोः'** [३/३/१] इत्यादि ।

३३. **आयादिप्रत्ययान्तः ।**

आयादयः प्रत्यया अप्रत्ययावसाना धातुसंज्ञका भवन्ति । धातुत्वात् तिबादयः । गोपायति, कामयते, ऋतीयते, बोभूयते, बोभोति, चिकित्सति । पुत्रकाम्यति, पुत्रीयति । अश्वति, हसायते, पटपटायति, पटपटायते, कष्टायते, तपस्यति, पटयति, कण्डूयते, चोरयति, कारयते ।

३४. **अन्त्यस्वरादिष्टिः ।**

अन्ते भवोऽन्त्यः । अन्त्यः स्वरप्रभृतिवर्णष्टिसंज्ञो भवति । टिसंज्ञाप्रयोजनं तु **'डिति टेः'** [८/४/८४] इत्यादि । पटुमाचष्टे—पटयति । अत्र **'टेः'** [८/४/८४] इति टेर्लोपे वक्तव्ये अन्त्यस्वरस्य उकारस्य लोपो भवति। आदिग्रहणेन महाराज इत्यत्र **'नोऽपदस्य तद्धिते'** [८/४/६२] इति टेर्लोपे वक्तव्ये अन्त्यस्वरस्य अकारस्य तत्प्रभृतिनकारस्यापि लोपो भवति ।

३५. **अन्त्यात्पूर्व उपधा ।**

अन्त्याद् वर्णात् पूर्वो यो वर्णः स उपधासंज्ञको भवति । उपधासंज्ञाप्रयोजनं तु **'उपधायाः'** [४/२/२२] इत्यादि । चखाद, जगाद ।

३६. **आदैदौदारो वृद्धिः ।**

तकार उच्चारणार्थः । आत्, ऐत्, औत्, आर्—एते वृद्धिसंज्ञका भवन्ति । दाक्षिः, शैवः, औपगवः, आर्जवम् । वृद्धिसंज्ञाप्रयोजन तु **'वृद्धिः स्वराणामादेर्ञ्णिति तद्धिते'** [८/४/१] इत्यादि ।

३७. **एदोदरो गुणः ।**

एत्, ओत्, अर्—एते गुणसंज्ञका[2] भवन्ति । जयति, भवति, करोति । गुणसंज्ञाप्रयोजनं तु **'नामिनो गुणोऽक्ङिति'** [४/२/१] इत्यादि ।

---

१. (१) स्वार्थः—यमर्थमाश्रित्य शब्दोऽर्थकथने प्रवर्तते स स्वार्थः । स तु अतलाद्यभिव्यङ्ग्य जात्यादिरूपः ।
 (२) द्रव्यम्—तदाश्रयीभूत घटादिरूपम् ।
 (३) लिङ्गम्—पुंस्त्वादि ।
 (४) संख्या—एकत्वादि ।
 (५) शक्तिः—कर्तृत्वादिरूपा ।

२. गुणेन स्वरेषु किञ्चिद् वर्धनमेव क्रियते न तु न्यूनता । तेन ग्लायति, म्लायति—इत्यत्र ऐकारस्य स्थाने न्यून एकारो न भवति । न्यूनताया तु दोषो जायते न तु गुणः ।

३८. कार्यायेत् ।

इह शास्त्रे यो वर्णस्तत्समुदायो वा कार्याय एव निर्दिष्टः स इत्संज्ञको भवति । यथा अण्प्रत्यये णकारो वृद्धिकार्यार्थः । डुकृ॑ञ् करणे—इत्यस्मिन् धातौ डुरिति **'ड्वितस्त्रिमक् तत्कृते'** [५/४/८१] इति त्रिमक्प्रत्ययकार्यार्थः । अनुस्वारः **'नैकस्वरादनुस्वारेतः'** [४/३/८५] इतीड्निषेधकार्यार्थः । नकारः **'नितः'** [३/३/८६] इति फलवत्यात्मनेपदविधानकार्यार्थः । इत्संज्ञाप्रयोजनं तु **'तस्य लोपः'** [१/१/३९] इत्यादि ।

३९. तस्य लोपः ।

यस्य इत्संज्ञा तस्य लोपो भवति । उदाहरणानि तु पूर्वसूत्र एव विज्ञेयानि ।

४०. चादयो निपाताः ।

चादयः शब्दा निपातसंज्ञका भवन्ति । च[1], वा, ह, अह, एव, एवं, नूनं, शश्वत्, सूपत्, कूपत्, कुवित्, नेत्, चेत्, नचेत्, चण्, कच्चित्, यत्र, नह, नहि, हन्त, माकिस्, नकिस्, मा, माङ्, न, नञ् वाव, त्वाव, न्वाव, वावत्, त्वावत्, न्वावत्, त्वै, तुवै, न्वै, नुवै, रै, वै, श्रौषट्, वौषट्, वषट्, वट्, वाट्, वेट्, पाट्, प्याट्, फट्, हुफट्, छंवट्, अध, आत्, स्वधा, स्वाहा, अलम्, चन, हि, अथ, ओम्, अथो, नो, नोहि, भोस्, भगोस्, अघोस्, अंधो, हंहो, हो, अहो, आहो, उताहो, हा, ही, हे, है, हये, अयि, अये, अररे, अङ्ग, रे, अरे, अवे, ननु, शुकम्, सुकम्, नुकम्, हिकम्, नहिकम्, ऊम्, हुम्, कुम्, उञ्, सुञ्, कम्, हम्, किम्, हिम्, अद्, कद्, यद्, तद्, इद्, चिद्, किंचिद्, स्विद्, उत, वत, इव, तु, नु, यच्च, कच्चन, किमुत, किल, किकिल, किम्वित्, उदस्वित्, आहोस्वित्, अहह, नहवै, नवै, नवा, अन्यत्, अन्यत्र, शव्, शप्, अथकिम्, विषु, पट्, पशु, खलु, यदिनाम, यदुत, प्रयुत, यदा, जातु, यदि, यथाकथाच, यथा, तथा, पुद्, द्य, पुरा, यावत्, तावत्, दिष्ट्या, मर्या, आम, नाम, स्म, इतिह, सह, अमा, समम्, सत्रा, साकम्, सार्धम्, ईम्, सीम्, कीम्, आम्, आस्, इति, अड, अट, बाह्या, अनुषक्, खोस्, अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, ॡ, ए, ऐ, ओ, औ, प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, प्रति, परि, उप, अति, अपि, अभि, सु, उद् इति[2] चादयः । बहुवचनमाकृतिगणार्थम् । तेनाऽन्येषामपि चादिषूपात्तानामनुपात्तानां च चादिसधर्मणां निपातसंज्ञा भवति । एवं गणे बहुवचनं सर्वत्र आकृतिगणार्थमेव विज्ञेयम् । निपातसंज्ञाप्रयोजनं तु **'ओन्निपातः'** [१/२/८२] इत्यादि ।

४१. प्रादिरुपसर्गः क्रियायोगे ।

क्रियायोगे प्रादिगण उपसर्गसंज्ञको भवति । प्रणयति, परिणयति, अभिषिञ्चति, निषिञ्चति, प्रलम्भः, उपलम्भः । एषूपसर्गसंज्ञाया णत्वषत्वनुमागमा सिद्धाः । प्रादिग्रहणं किम् ? पुनर्नमति, साधु सिञ्चति । क्रियायोगे इति किम् ? प्रगतो नायकोऽस्माद्देशात्—प्रनायको देशः । अत्रानुपसर्गत्वाण्णत्वं न ।

धात्वर्थं[3] बाधते कश्चित्, कश्चित्तमनुवर्तते ।
तमेव विशिनष्टयन्योऽनर्थकोऽन्यः प्रयुज्यते ।।

बाधते यथा—प्रतिष्ठते[4], प्रस्मरति, प्रवसति, प्रलीयते, प्रतीक्षते, प्रतिपालयति ।

१　चादीनां निपातानामर्थः श्रीभिक्षुशब्दानुशासनस्य द्वितीयभागे परिशिष्टे [१७] द्रष्टव्यः ।

२　इतिशब्द एवंप्रकारार्थः । एवंप्रकाराश्चादयो गृह्यन्ते, न त्वेतावन्त इत्यर्थः । यतः —

इयन्त इति संख्यानं, निपातानां न विद्यते ।
प्रयोजनवशादेते, निपात्यन्ते पदे पदे ।।

३　प्रादेरव्ययत्वादनेकार्थता दर्शयति । धातुपाठे योऽर्थस्तदपेक्षया धात्वर्थं बाधते इत्युक्तम् । अन्यथाऽनेकार्थत्वाद् धातूनामयमर्थो न स्यात् ।

४　अत्र तिष्ठत्यादयश्चत्वारो गतिनिवृत्त्यादिलक्षणं प्रसिद्धमर्थं परित्यज्य तत्प्रतिपक्षभूते प्रस्थानविस्मरणप्रवासप्रलयलक्षणे वर्तन्ते । तदुत्तरौ त्वर्थान्तरमात्रे पालने इति ।

तमनुवर्तते यथा—अधीते, अध्येति, आचामति, आचष्टे, अनुरुध्यते, प्रलोकयति ।

तमेव विशिनष्टि यथा—प्रपचति, प्रकरोति, प्राणिति, प्राश्नाति, निरीक्षते, निष्टपति ।

अनर्थको यथा –प्रलम्बते, प्रार्थयते, विजयते, विजानाति, निमीलति, निखञ्जति, निरजति ।

एषा वा पञ्चभ्यः प्रायेण प्रयोगो भवति । आहरति, व्याहरति, अभिव्याहरति, समभिव्याहरति, प्रसमभिव्याहरतीति ।

उपसर्गसंज्ञाप्रयोजनं तु 'उपसर्गाण्णोपदेशस्य' [२/२/८५] इत्यादि । प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, प्रति, परि, उप, अति, अपि, अभि, सु, उद् इति प्रादिश्चाद्यन्तर्गणः ।

४२. श्रद्धाकृञोः ।

दधातौ करोतौ च परे श्रत् इत्यपि उपसर्गसंज्ञको भवति । श्रद्धा । उपसर्गत्वात्, 'आत उपसर्गे' [५/४/१०६] इति ङप्रत्ययः । श्रत्कृत्य । उपसर्गत्वाद् गतिसंज्ञा, गतित्वात् समासः, समासत्वात् क्त्वो यप् । धाकृञोरिति किम् ? श्रद्भूत्वा ।

४३. अन्तर्णत्वङकिषु ।

अन्तर् इति उपसर्गसंज्ञकं भवति णत्व, ङ, कि—इत्येतेषां विधाने सति । अन्तर्भवाणि । उपसर्गत्वात् 'हिनुमीनानीनाम्' [२/२/८६] इति णत्वम् । अन्तर्द्धा । उपसर्गत्वात् 'आत उपसर्गे' [५/४/१०६] इति ङप्रत्ययः । अन्तर्द्धिः । उपसर्गत्वात् 'उपसर्गेऽपिद्दाधः किः' [५/४/८४] इति किः । णत्वङकिष्विति किम् ? अन्तर्गर्भायः, अन्तर्म्लायः । अनुपसर्गत्वात् 'उपसर्गाद्वातो डोऽश्वः' [५/१/६६] इति डो न, किंतु आदन्तलक्षणो णः ।

४४. दुर्णत्वषत्वयोर्वा ।

दुर् इति णत्वषत्वविधानयोः उपसर्गसंज्ञक वा भवति । दुर्भवाणि, दुर्भवानि, दुःष्ठितम्, दुःस्थितम् ।

४५. नाऽधिपरी गतार्थौ ।

गतः—ज्ञातोऽर्थो ययोस्तौ गतार्थौ । गतार्थौ अधि, परि—इत्येतौ उपसर्गसंज्ञकौ न भवतः । अध्यागच्छति, पर्यागच्छति, आगच्छत्यधि, आगच्छति परि । उपरिभाव सर्वतोभावश्चान्यत प्रकरणादेः प्रतीयत इति गतार्थत्वम् । अनुपसर्गत्वात् प्राक्त्वनियमाऽभाव । अध्यागमन प्रयोजनमस्य अध्यागमनिकः । पर्यागमनिकः । अत्र अधिपरिशब्दयोरादेरकारस्य वृद्धिर्न भवति । उपसर्गत्वाऽभावेन गतिसंज्ञाया अभावे समासाऽभावेन पृथक्पदत्वात् । पर्यानीतम् । अत्राऽनुपसर्गत्वाण्णो न भवति । गतार्थाविति किम् ? अध्यागच्छति, पर्यागच्छति । अत्रोपरिभावस्य सर्वतोभावस्य च प्रकरणादेरप्रतीतस्य द्योतने उपसर्गसंज्ञा अस्त्येवेति प्राक्त्वनियमः ।

४६. सुः पूजायाम् ।

नेत्यनुवर्तते । पूजायां वर्तमानः सुशब्द उपसर्गसंज्ञको न भवति । सुसिक्तं भवता, सुस्तुत भवता । अनुपसर्गत्वात् षत्व न । पूजायामिति किम् ? सुषिक्तं नाम किं तवात्र । धात्वर्थोऽत्र कुत्स्यते ।

४७. अतिरतिक्रमे च ।

अतिक्रमेऽर्थे चकारात् पूजायां च वर्तमानः अतिशब्दः उपसर्गसंज्ञको न भवति । अतिसिक्तं भवता, अतिस्तुतं भवता—अतिक्रमेण सेकः स्तुतिश्च कृतेत्यर्थः । अत्र षत्वं न । अतिस्तुत्वा । अत्र समासाऽभावाद्यबादेशो न भवति । पूजायाम्—अतिसिक्तं भवता, अतिस्तुतं भवता । धात्वर्थोऽत्र प्रशस्यते । अतिक्रमे चेति किम् ? अतिषिक्तं भवता, अतिष्टुतं भवता । उपसर्गत्वात् षत्वम् ।

४८. निपातस्वरादयोऽव्ययम् ।

निपाताः स्वरादयश्च अव्ययसञ्ज्ञका भवन्ति । निपाताश्चादयः पूर्वमुक्ताः । स्वरादयो यथा—स्वर्[1], अन्तर्, प्रातर्, पुनर्, सनुतर्, सायम्, नक्तम्, अस्तम्, दिवा, दोषा, ह्यस्, श्वस्, शम्, योम्, मयस्, विहायसा, रोदसी, भूस्, भुवस्, भृशम्, सपदि, आशु, शीघ्रम्, झटिति, तूर्णम्, स्वस्ति, समया, निकषा, अन्तरा, बहिस्, अदस्, अवस्, अधस्, असाप्रतम्, अद्धा, ऋतम्, सत्यम्, इद्धा, मुधा, मृषा, वृथा, मिथ्या, मिथो, मिथु, मिथस्, मिथुस्, मिथुनम्, अनिशम्, मुहुस्, अभीक्ष्णम्, मङ्क्षु, उच्चैस्, नीचैस्, शनैस्, अवश्यम्, सामि, साचि, विष्वक्, अन्वक्, ताजक्, द्राक्, स्राक्, ऋधक्, पृथक्, धिक्, हिरुक्, ज्योक्, मनाक्, ईषत्, ज्योषम्, जोषम्, तूष्णीम्, कामम्, निकामम्, प्रकामम्, अरम्, वरम्, परम्, चिरम्, आरात्, तिरस्, मनस्, नमस्, भूयस्, प्रायस्, प्रबाहु, प्रबाहुक्, प्रबाहुकम्, आर्यहलम्, आर्य, हलम्, स्वयम्, कु, बलवत्, अतीव, सुष्ठु, दुष्ठु, ऋते, साक्षात्, सन्, प्रशान्, सनात्, सनत्, सना, विना, नाना, क्षमा, शु, सहसा, युगपत्, उपांशु, पुरतस्, पुरस्, पुरस्तात्, आविस्, प्रादुस्, अह, शुभ, कृत, पर्याप्त, येन, तेन, चिरेण, अन्तरेण, ते, मे, चिराय, अह्नाय, चिरात्, अकस्मात्, चिरस्य, अन्योन्यस्य, मम, एकपदे, अग्रे, प्रगे, प्राह्णे, हेतौ, रात्रौ, वेलायाम्, मात्रायाम्, अस्ति, नास्ति, भवति, विद्यते, असि, अस्मि, एहि, मन्ये, ब्रूहि, शङ्क्यं, अस्तु, भवतु, पूर्यते, स्यात्, आस, आह, वर्तते, नवर्तते, याति, नयाति, पश्य, पश्यत, आदह, आदङ्क, आतङ्क इति स्वरादिराकृतिगणः । स्वरादयो हि स्वार्थस्य वाचका न तु चादिवद् द्योतका इति । अन्वर्थसंज्ञा चेयमव्ययमिति लिङ्गकारकविभक्तिनानात्वेऽपि नानारूपतां न प्रतिपद्यत इति । यदुक्तम्—

सदृशं त्रिषु लिङ्गेषु, सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम् ॥

अव्ययसञ्ज्ञाप्रयोजनं तु **'अव्ययस्य'** [३/२/७] इत्यादि ।

४९. क्त्वाकृन्मान्तम् ।

क्त्वाप्रत्ययः मकारान्ताश्च कृत्प्रत्यया अव्ययसञ्ज्ञका भवन्ति । कृत्वा, हृत्वा, प्रकृत्य, प्रहृत्य । मान्तास्तावत्—कर्तुम्, हर्तुम्, भोक्तुम् । स्मारं स्मारं रोदिति । स्वादुङ्कारं भुङ्क्ते ।

५०. अधणतस्वाद्येनान्तः ।

धण्वर्जितास्तस्वादय एनपर्यन्ता[2] ये प्रत्ययास्ते अव्ययसञ्ज्ञका भवन्ति । देवा अर्जुनतोऽभवन् । अत्र **'व्याश्रये तसुः'** [८/१/९८] । ततः, तत्र, इह, क्व, कदा, एतर्हि, अधुना, इदानीम्, सद्य, परेद्यवि, अपरेद्युः, उभयेद्युः, परुत्, परारि, ऐषमः, कर्हि, यथा, कथम्, पञ्चधा, एकधा, ऐकध्यम्, द्वैधम्, द्वेधा, पञ्चकृत्वः, द्विः, सकृत्, बहुधा, प्राक्, दक्षिणतः, पश्चात्, पुरः, पुरस्तात्, उपरि, उपरिष्टात्, दक्षिणा, दक्षिणाहि, दक्षिणेन । अधणिति किम् ? पथिद्वैधानि, संशयद्वैधानि ।

५१. च्विसात्त्राडाच्तसिशसिज्वदामः ।

च्वि, सात्, त्रा, डाच्, तसि, शस्, इच्, वत्, आम्—इत्येते प्रत्यया अव्ययसंज्ञका भवन्ति । च्वि—शुक्लीकरोति । सात्—अग्निसात्करोति । त्रा—विप्रत्राकरोति । डाच्—पटपटाकरोति । तसि—सुदामतः । शस्—बहुशः । इच्—केशाकेशि । वत्—क्षत्रियवत् । आम्—उच्चैस्तराम्, उच्चैस्तमाम् । च्व्यादीनां साहचर्यादामस्तद्धितस्यैव ग्रहणं न तु षष्ठी-बहुवचनस्याम् ।

५२. गतिः ।

गतिसञ्ज्ञकाः शब्दा अव्ययसञ्ज्ञका भवन्ति । अदः कृत्य । अत्राव्ययत्वे **'अतः कृकमि···'** [२/२/४] इति सकारो न ।

---

१ स्वराद्यव्ययानामर्थः श्रीभिक्षुशब्दानुशासनस्य द्वितीयभागे परिशिष्टे [११] द्रष्टव्यः ।

२ तसु तस् त्र दा एद्युस् द्युस् हि था धा ध्यमुञ् धमुञ् एधा धण् कृत्वस् सुच् रि रिष्टात् अस् अस्तात् स्तात् अतस् आत् आ आहि एन इति ।

५३. सस्वरयवराणां य्वृतः संप्रसारणम् ।

स्वरसहितानां यकारवकाररकाराणां स्थाने यथासङ्ख्यमिकार उकार ऋकार इत्येतद्भावः सम्प्रसारणसंज्ञको भवति । इष्टः, इष्टवान् । उक्तः, उक्तवान् । पृष्टः, पृष्टवान् । सम्प्रसारणसंज्ञाप्रयोजनं तु **'यजादिस्वपिवचेः संप्रसारणं किति'** [४/४/११] इत्यादि ।

५४. शिस्थुट् ।

जसूणसादेशः शिस्थुट्सञ्ज्ञको भवति । पद्मानि तिष्ठन्ति । पद्मानि पश्य । थुट्संज्ञाप्रयोजन तु **'थुटि'** [१/४/५३] इत्यादि ।

५५. पुंस्त्रियोः[1] स्यमौजस् ।

औरिति प्रथमाद्वितीयाद्विवचनयोरविशेषेण ग्रहणम् । सि, औ, जस्, अम्, औ—इत्येते प्रत्ययाः पुलिङ्गे स्त्रीलिङ्गे च थुट्संज्ञका भवन्ति । राजा, राजानौ, राजानः । राजानं, राजानौ । स्त्रियाम्—सीमा, सीमानौ, सीमानः । सीमानं, सीमानौ । **'नोपधाया नुटि चाऽधौ दीर्घः'** [१/४/६३] । पुंस्त्रियोरिति किम् ? सामनी, वेमनी ।

५६. सिधिरामन्त्रणे ।

आमन्त्रणेऽर्थे सिरिति प्रथमाया एकवचनं धिसंज्ञं भवति । हे वीर, हे श्रमण । धिसंज्ञाप्रयोजनं तु **'अदेतोऽध्यमोलोपः'** [१/४/६६] इत्यादि ।

५७. डत्यतु संख्यावत् ।

डतिप्रत्ययान्तमतुप्रत्ययान्तं च नाम संख्यावद् भवति । एकद्व्यादिका लोकप्रसिद्धा संख्या, तत्कार्यं भजत इत्यर्थः । कतिभिः प्रकारैः—कतिधा । **'संख्याया धा'** [८/१/१२२] इति धा । कति वारा अस्य—कतिकृत्वः । **'वारे कृत्वस्'** [८/१/१२७] इति कृत्वस् । एवं यतिधा, यतिकृत्वः । ततिधा, ततिकृत्वः । अतु—यावता क्रीतः—यावत्कः । **'संख्याडतेरशत्तिष्टेः कः'** [७/२/६२] इति कः । यावद्धा, यावत्कृत्वः । तावत्कः, तावद्धा, तावत्कृत्वः । कियत्कः, कियद्धा, कियत्कृत्वः ।

५८. बहुगणं भेदे ।

बहु, गण—इत्येतौ शब्दौ भेदे वर्तमानौ संख्यावद् भवतः । भेदो नानात्वमेकत्वप्रतियोगि । बहुकः, बहुधा, बहुकृत्वः । गणकः, गणधा, गणकृत्वः । भेदे इति किम् ? वैपुल्ये संघे च संख्याकार्यं मा भूत् । बहुगणौ न नियताऽवधिभेदाभिधायकाविति संख्याप्रसिद्धेरभावाद् वचनम् । अत एव भूर्यादिनिवृत्तिः ।

५९. कसमासेऽध्यर्धः ।

अध्यर्धशब्दः कप्रत्यये समासे च विधातव्ये संख्यावद् भवति । अध्यर्धेन क्रीतम्—अध्यर्धकम् । **'संख्याडतेरशत्तिष्टेः कः'** [७/२/६२] इति कः । अध्यर्धेन शूर्पेण क्रीतम्—अध्यर्धशूर्पम् । अत्र संख्यापूर्वत्वेन द्विगुत्वे क्रीतार्थस्येकणः **'द्विगोः प्लुगद्विः'** [७/२/६६] इति प्लुक् । कसमासे इति किम् ? धादिप्रत्ययविधौ न भवति ।

६०. अर्धपूर्वपदः पूरणः ।

समासाऽवयवभूते पदे पूर्वपदमुत्तरपदं चेति प्रसिद्धिः । अर्धपूर्वपदः पूरणप्रत्ययान्तः शब्दः कप्रत्यये समासे च

---

१. अलौकिकोऽयं निर्देशः । अन्यथा पुमांश्च स्त्री चेति कृतेऽर्थत्वात् स्त्रीशब्दस्य प्रागनिपाते **'स्त्रियाः पुंसो द्वन्द्वाच्च'** [८/३/५०] इति समासान्ते च स्त्रीपुंसयोरिति स्यात् । अनेन चैतज्ज्ञाप्यते क्वचिदलौकिको निर्देशो भवतीति ।

विधातव्ये संख्यावद् भवति । अर्धपञ्चमकम्, अर्धपञ्चमशूर्पम् ।

६१. पञ्चम्याः प्रत्ययः ।

पञ्चम्यर्थाद् विधीयमानः शब्दः प्रत्ययसंज्ञको भवति । **'नाम्नः प्रथमा'** [२/४/२]—वृक्षः, वृक्षौ, वृक्षाः । **'नृतोऽस्वस्रादेः'** [२/३/७]—राज्ञी, कर्त्री । **'आबत स्त्रियाम्'** [२/३/१]—खट्वा । **'गुपूधूपविच्छिपणिपनेरायः'** [४/१/१]—गोपायति, धूपायति । **'ऋवर्णहसाद् घ्यण्'** [५/१/४८]—कार्यम्, पाक्यम् । प्रत्ययसंज्ञाप्रयोजनं तु **'प्रत्यये'** [१/३/२] इत्यादि ।

६२. आद्यन्तौ टित्कितौ ।

इत्शब्दः प्रत्येकं सम्बध्यते । टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ भवतः । टिदादौ किदन्ते इति विवेकः । टित् नुडाम इत्यादि । कित् **'शे वाचा मोऽश्वे'** [१/३/२१] इत्यादि । वीराणाम्, भवाञ्चशूरः ।

६३. मिदन्त्यस्वरात् परः ।

मिदागमः प्रत्ययो वा अन्त्यात् स्वरात् परो भवति । तस्यान्त्यस्वरस्यैवान्तावयवो मित् स्यादित्यर्थः । **'उदृदितो नुम्'** [१/४/५८]—भवान्, भवन्तौ, भवन्तः । **'रुधादेर्नम्'** [३/४/२९]—रुणद्धि, रुन्द्धः, रुन्धन्ति ।

६४. जात्याख्यायामेकस्मिन्नसंख्ये बहुत्वं वा ।

जातिर्नामायमेकोऽर्थः, तदभिधाने एकत्व एव प्राप्ते पक्षे बहुत्वार्थं वचनम् । जात्याख्यायां संख्यावाचिविशेषण-वर्जिते एकस्मिन्नर्थे बहुत्वं वा भवति । सपन्नो यव, सपन्ना यवा । क्षत्रियो वीरः, क्षत्रिया वीराः । जात्यर्थस्य बहुवद्भावात् तद्विशेषणानामपि बहुवद्भावः । तथा चोभयवाचिभ्यो बहुत्वम् । जातिग्रहणं किम् ? चैत्र, मैत्रः । आख्याग्रहणं किम् ? काश्यपप्रतिकृतिः काश्यपः । भवत्ययं जातिशब्दो न त्वनेन जातिराख्यायते, किन्तु प्रतिकृतिः । एकस्मिन्निति किम् ? संपन्नौ व्रीहियवौ । असंख्ये इति किम् ? एको व्रीहिः संपन्नः सुभिक्षं करोति ।

६५. अस्मदो द्वयोश्च ।

अस्मदो द्वित्वे चकारादेकत्वे च बहुत्वं वा भवति । आवां[1] ब्रूवः, वयं ब्रूमः । अहं ब्रवीमि, वयं ब्रूमः । आवां गार्ग्यौ ब्रूवः, वयं गार्ग्या ब्रूमः । अहं पण्डितो ब्रवीमि, वयं पण्डिता ब्रूमः । केचिद्विशेषणस्यैवाऽस्मदो द्वित्वैकत्वयोः स्थाने बहुत्वं वेच्छन्ति । तन्मते तत्र वयं गार्ग्याः पण्डिता वा ब्रूमः इत्यादि न सिध्यति ।

६६. फल्गुनीप्रोष्ठपदानां नक्षत्रे ।

फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्नक्षत्रयोर्बहुत्वं वा भवति । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः । नक्षत्रे इति किम् ? फल्गुनीषु जाते फल्गुन्यौ माणविके । द्वयोरित्येव, तेनैकस्मिन् नक्षत्रे न भवति । दृश्यते फल्गुनी । एकवचनान्तः प्रयोग एव नास्तीत्यन्ये । फल्गुनीप्रोष्ठपदानामिति शब्दपरो निर्देशः किम् ? तत्पर्यायाणां मा भूत् । अद्य पूर्वे भद्रपदे ।

६७. गुरावेकस्मिंश्च ।

गुरौ गौरवाऽर्हेऽर्थे वर्तमानस्य शब्दस्य एकत्वे चकाराद् द्वित्वे च बहुत्वं वा भवति । त्वं गुरुः, यूयं गुरवः । युवां गुरू, यूयं गुरवः । एष मे पिता, एते मे पितरः । अयं तपस्वी, इमे तपस्विनः । गुरुशिष्यौ, गुरुशिष्याः ।

---

१ अत्र द्वयोर्मध्ये एको ब्रूते ततश्च कथमावां ब्रूव इति ? उच्यते—द्वयोरप्यभेदोपचारात् ।

द्वितीयश्चरणः

१. इवर्णादीनां स्वरे यवरलाः[1] ।

इवर्णोवर्णऋवर्णलृवर्णानां स्वरे परे यथासंख्यं[2] य, व, र, ल—इत्येते आदेशा भवन्ति । दध्यत्र, नद्येषा । मध्वत्र, वध्वाननम् । पित्रर्थः, ऋादयः । लनुबन्धः, लाकृतिः । स्वरे इति किम् ? दधि भक्ष्यम् । मधु पिबति । पितृगुरुः । लृवर्ण । केचित्त्विवर्णादिभ्यः परान् यवरलानिच्छन्ति । दधियत्र, मधुवत्र इत्यादि ।

२. ह्रस्वोऽपदे वा ।

इवर्णादीनां स्वरे परे ह्रस्वो वा भवति अपदे—न चेत् तौ निमित्तनिमित्तिनौ एकत्र पदे भवतः । नदि एषा, नद्येषा । दधि अत्र, दध्यत्र । मधु अत्र, मध्वत्र । कर्तृ इदम्, कर्त्रिदम् । ह्रस्वस्यापि ह्रस्वः **पर्जन्यवल्लक्षणप्रवृत्तेः** । ह्रस्वविधानसामर्थ्याच्च कार्यान्तरं न भवति । कश्चित्तु ह्रस्वत्वाभावपक्षे प्रकृतिभावमपीच्छति । तन्मते नदी एषा, कुमारी अत्र—इत्याद्यपि भवति । अपद इति किम् ? नद्यौ, वध्वौ, नद्युदकम्, वध्वाननम्, नद्यर्थः । अन्तर्वर्तिविभक्त्यपेक्षया पदभेदेऽपि समासे सत्यैकपद्यम् । इवर्णादीनामिति किम् ? मुनयाचर, साधवाचर । स्वरे इति किम् ? नदी वहति ।

३. एवैतोरयायौ ।

एकारैकारयोः स्थाने स्वरे परे यथासंख्यं अय्, आय्—इत्येतावादेशौ भवतः । नयनम्, चयनम् । नायकः, गायकः । स्वरे इति किम् ? जले पद्मम् । रैधृतिः ।

४. ओवौतोरवावौ ।

ओकारौकारयोः स्थाने स्वरे परे यथासंख्यं अव्, आव्—इत्येतावादेशौ भवतः । भवनम्, पवनम् । श्रावकः, लावकः । स्वरे इति किम् ? गोशृङ्गम् । नौकाष्ठम् ।

५. येऽयकि ।

यगर्वजिते यकारादौ प्रत्यये परे ओकारौकारयोः स्थाने यथासंख्यं अव्, आव्—इत्येतावादेशौ भवतः । गव्यति, गव्यते । नाव्यति, नाव्यते । लव्यम्, पव्यम् । अवश्यलाव्यम्, अवश्यपाव्यम् । गव्यम्, नाव्यम् । ये इति किम् ? गोभ्याम्, नौभ्याम् । अयकीति किम् ? उपोयते[3], औयत, लौयमानिः[4] । यग्वर्जनाद् यकारादिः प्रत्ययो गृह्यते, तेनेह न भवति—नौयानम् ।

---

१. यवरला इत्यादेशचतुष्टयनिर्देशेन स्थानिचतुष्टयलाभः । अन्यथा इवर्णादीनामित्यादि पदादेकारादीनामपि ग्रहणं प्रसज्यते इत्याह ।

२. ननु द्विसप्ततिः स्थानिन आदेशाश्च सप्त इति कथमादेशादेशिनोर्यथासंख्यमिति चेद् ? न, सूत्रे वर्णग्रहणेन जातिग्रहणाद् यथासंख्योपपत्तेः ।

३. वेंञ् तन्तुसन्ताने—इति धातोर्यकि संप्रसारणे कृते ऊयते इति रूपं भवति भावकर्मणोः ।

४. लूयमानस्यापत्यम् ।

६. प्रधानगोरति वा संधिः पदान्ते ।

पदान्ते वर्तमानस्य प्रधानगोशब्दस्य संधिर्वा भवति अकारे परे । गोऽजिनम्, गोऽग्रम् । **'एदोतोऽतः पदान्ते'** [१/२/३२] इत्यकारलोप । सध्यभावपक्षे प्रकृतिभाव । गोअजिनम्, गोअग्रम् । प्रधानग्रहण किम् ? चित्रग्वग्रम् । गोरिति किम् ? द्योऽग्रम् । अतीति तपरकरण किम् ? गवाननम्, गवङ्गितम् । पदान्ते इति किम् ? गौरिवाचरति—गवति ।

७. गवः स्वरेऽनक्षे ।

पदान्ते वर्तमानस्य प्रधानगोशब्दस्य स्वरे परे गव इत्यादेशो वा भवति न तु अक्षे परे । गवाजिनम्, गवाग्रम्, गवेश । पक्षे—गो+अजिनम्=गोऽजिनम् । गो+अग्रम्=गोऽग्रम् । गवीश । अनेकवर्णादेश सर्वस्य । स्वरे इति किम् ? गोकुलम् । अनक्षे इति किम् ? गो+अक्षम्=गोऽक्षम् । पदान्ते इति किम् ? गवि ।

८. इन्द्रे ।

पदान्ते वर्तमानस्य प्रधानगोशब्दस्य गव इत्यादेशो भवति इन्द्रे परे । गवेन्द्र । नित्यार्थ वचनम् ।

९. गवाक्षः संज्ञायाम् ।

सज्ञाया विषये अक्षशब्दे परे गोर्गवादेशे गवाक्ष इति निपात्यते । गवाक्ष —वातायन । सज्ञायामिति किम् ? गवामक्षाणि—गोऽक्षाणि, गोअक्षाणि । केचिदसज्ञायामपि गवाक्षशब्द मन्यन्ते ।

१०. ऋद्लृतोॠ तो लोपो वा ।

ऋकारे लृकारे च परे ऋकारस्य लोपो वा भवति । होतृकार । पक्षे—होतृका । **'ऋद्लृतोः समानानां ह्रस्वः'** [१/२/४५] इति होतृऋकार । लृति—होल्लृकार । पक्षे लृकारस्य सवर्णत्वात् होतृकार, होल्लृकार, होतृलृकार ।

११. शकादीनां टेरन्ध्वादिषु ।

शकादीना टेर्लोपो भवति अन्ध्वादिषु परेषु । शकन्धुः, कर्कन्धु, कुलटा, पतञ्जलि । सारङ्ग पशुपक्षिणोरेव । अन्यत्र साराङ्ग । सीमन्त. केशवेशेषु । अन्यत्र सीमान्त । हलीषा, लाङ्गलीषा, मनीषा । शकादिगणोऽन्ध्वादिगणश्च यथादर्शनं विज्ञेय. ।

१२. समानानां सवर्णे दीर्घः सह ।

समानसज्ञकाना वर्णाना सवर्णे स्वरे परे परेण सह दीर्घो भवति । **'आसन्नः'** [८/४/१३२] । दण्डाग्रम्, तवायुः, खट्वात्र, सागता । दधीदम्, दधीहते, नदीन्द्र, नदीहते । मधूदकम्, मधूहनम्, वधूदरम्, वधूढा । पितृषभः । मातृकारः[1] । समानानामिति किम् ? अग्नये, भानवे । सवर्णे इति किम् ? दध्यत्र, मध्वत्र ।

१३. अवर्णस्येवर्णादावेदोदरल् ।

अवर्णस्य स्थाने इवर्ण, उवर्ण, ऋवर्ण, लृवर्ण—इत्येतेषु परेषु परेण सह यथासंख्यं एत्, ओत्, अर्, अल्—इत्येते आदेशा भवन्ति । जिनेन्द्रः, तवेहा, मालेयम्, सेक्षते । नवोदकम्, नवोढा, गगोदकम्, सोढा । परमर्षिः, तवर्कारः, महर्षिः । तवल्कारः । त्रिमात्रादेरपि स्थानिनः स्थाने द्विमात्रौ एव एदोतौ भवत, सूत्रे तयोरेव विवक्षितत्वात् । अवर्णस्येति किम् ? दधीदम्, मधूदकम्, पितृषभ, क्लृकार । इवर्णादाविति किम् ? दण्डाग्रम् ।

---

१ मातृ लृकार इति विग्रहे **'ऋलृवर्णौ वा'** [१/१/१९] इति सूत्रेण ऋलृवर्णौ परस्पर सवर्णसज्ञकौ ।

१४. ऋणे प्रवसनकम्बलवशार्णवत्सरवत्सतरस्यार् ।

प्रादीनामवर्णस्य ऋणे परे परेण सह आर् भवति । प्रार्णम्, वसनार्णम्, कम्बलार्णम्, दशार्णम्, ऋणार्णम्, वत्सरार्णम्, वत्सतरार्णम् । अत्राऽसंधिमपीच्छति **'हैमः'** [१/२/७]—प्रऋणमित्यादि ।

१५. ऋते तृतीयासमासे ।

अवर्णस्य ऋते परे परेण सह आर् भवति तृतीयासमासे । सुखेन ऋतः—सुखार्तः । दुःखार्तः, शीतार्तः । ऋते इति किम् ? सुखेन इतः—सुखेतः । तृतीया इति किम् ? परमश्चासौ ऋतः—परमर्तः । समासे इति किम् ? सुखेन ऋतः—सुखेनर्तः । अत्राप्यसंधिमपीच्छति **'हैमः'** [१/२/२]—सुखऋतः, दुःखऋतः ।

१६. ऋत्युपसर्गस्य ।

उपसर्गस्याऽवर्णस्य ऋकारादौ धातौ परे परेण सह आर् भवति । प्रार्च्छति, उपार्च्छति, परार्च्छति, प्रार्ध्नोति, परार्ध्नोति । ऋतीति किम् ? उपेतः । उपसर्गस्येति किम् ? इहर्च्छति । ननु सूत्रे केवलऋतीति ग्रहणेन ऋकारादौ धाताविति कथं स्यादिति ? उच्यते—उपसर्गग्रहणाद् धातुः स्वयमेव सिद्धः धातोः प्राक् चेति वचनात् ।

१७. नामधातौ वा ।

उपसर्गस्याऽवर्णस्य ऋकारादौ नामधातौ परे परेण सह आर् वा भवति । उपार्षभीयति, उपर्षभीयति । ऋतीति किम् ? उपोष्ट्रीयति । उपसर्गस्येति किम् ? इहर्षभीयति ।

१८. लृत्याल् ।

उपसर्गस्याऽवर्णस्य लृकारादौ नामधातौ परे परेण सह आल् वा भवति । अलोऽपवादः । उपाल्कारीयति, उपल्कारीयति । उपसर्गस्येति किम् ? इहल्कारीयति ।

१९. एदैतोरैत् ।

अवर्णस्य स्थाने एकारे ऐकारे च परे परेण सह ऐकारादेशो भवति । धर्मैषणा, तवैश्वर्यम्, गङ्गैति । अवर्णस्येति किम् ? दध्येतत् ।

२०. स्वस्येरेरिणोः ।

स्वशब्दस्याऽवर्णस्य ईर, ईरिन्—इत्येतयोः परयोः परेण सह ऐकारो भवति । स्वस्य ईरः—स्वैरः, घञ् । स्व ईरोऽत्रेति स्वैरमास्यताम् । स्वयमीरति ईर्ते वा स्वैरः, नाम्युपधलक्षणः कः । स्वयमीरितुं शीलमस्येति स्वैरी । **नामग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति** स्वैरिणी ।

२१. प्रस्यैषैष्ययोः ।

प्रस्याऽवर्णस्य एष, एष्य—इत्येतयोः परयोः परेण सह ऐकारो भवति । प्रैषः, प्रैष्यः । **'एदैतोरैत्'** [१/२/१९] इति अनेन ऐकारे सिद्धे **'एदोतोःपसर्गस्य लोपः'** [१/२/२६] इति लोपबाधनार्थं वचनम् । कथं प्रेषः, प्रेष्यः ? ईषे ईष्ये च भविष्यति । यदा आ+ईष्यः=एष्यः तदापि **'ओमाङोः'** [१/२/३०] इति अवर्णलोपे प्रेष्य इत्येव भवति । **येन प्राप्ते यो विधिरारभ्यते स तस्यैव बाधको भवति** इति न्यायात् **'एदोतोःपसर्गस्य लोपः'** [१/२/२६] इत्यस्यैवाय बाधको न तु **'ओमाङोः'** [१/२/३०] इति अस्य । **अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति** न्यायान्नेह—प्रेषते, प्रेष्यते ।

२२. ओदौतोरौत् ।

अवर्णस्य स्थाने ओकारे औकारे च परे परेण सह औकारो भवति । तवौदनम्, गङ्गौघः, चैत्रौत्कण्ठ्यम् ।

अवर्णस्येति किम् ? मध्वोदनम् ।

२३. अक्षस्योहिन्याम् ।

अक्षशब्दस्याऽवर्णस्य ऊहिन्यां परत परेण सह औकारो भवति । अक्षाणामूहोऽस्यामस्तीति अक्षौहिणी सेना ।

२४. प्रस्योहोढोढिषु ।

प्रस्याऽवर्णस्य ऊह, ऊढ, ऊढि—इत्येतेषु परेषु परेण सह औकारो भवति । प्रौह , प्रौढ , प्रौढि । प्रस्येति किम् ? उपोढ. । ऊहे नेच्छन्त्येके ।

२५. ऊटि ।

अवर्णस्य ऊटि परे परेण सह औकारो भवति । धौत , धौतवान् । धावे क्ते प्रत्यये **'च्छ्वोः शूटौ क्ष्मे च'** [४/३/३८] इति वकारस्य ऊटि कृते धा ऊत इत्यवस्थाया अनेन औकार । लावयति, पावयति इति क्विपि ञिलोपे ऊटि- – लौ , पौ ।

२६. एदोतोरुपसर्गस्य लोपः ।

धातोरेदोतो परयो उपसर्गस्याऽवर्णस्य लोपो भवति । प्रेजते. प्रेलयति । उपोषति, परोखति । उपसर्गसामर्थ्याद् धातुग्रहणम् । उपसर्गस्येति किम् ? प्रगता एलका अस्मात्—प्रैलको देश ।

२७. नेत्येधत्योः ।

पूर्वाऽपवादोऽयम् । उपसर्गस्याऽवर्णस्य लोपो न भवति एति, एधति—इत्येतयो परयो । उपैति. परैति । उपैधते । परैधते ।

२८. वा नामधातो ।

उपसर्गस्याऽवर्णस्य लोपो वा भवति नामधातोरेदोतो परयो । उपेडकीयति, उपैडकीयति । प्रोघीयति, प्रौघीयति ।

२९. एवेऽनवधारणे ।

उपसर्गस्येति निवृत्तम् । अनवधारणमनिश्चय । अनवधारणेऽर्थे एवशब्दे परे अवर्णस्य लोपो भवति । इहेव तिष्ठ, अद्येव गच्छ । स्वेच्छावृत्तिरत्र गम्यते, नाऽवधारणम् । अनवधारण इति किम् ? इहैव तिष्ठ, मा गा । इह निश्चयेन स्थानव्यमिति भावार्थ ।

३०. ओमाङोः ।

अवर्णस्य लोपो भवति ओम्, आङ्—इत्येतयो परयोः । अद्योङ्कार , सोमित्यवोचत् । आङ्— आ+ऊढा= ओढा, अद्य+ओढा -अद्योढा । आ+इहि—एहि, उप+एहि=उपेहि । आङिति आङादेश एव गृह्यते, केवल एवाङि परे अवर्णलोपस्य निरर्थकत्वात् ।

३१. ओष्ठौत्वोः समासे वा ।

अवर्णस्य लोपो वा भवति समासे ओष्ठ, ओतु—इत्येतयो. परयो । बिम्बोष्ठी, बिम्बौष्ठी, बिम्बोष्ठा, बिम्बौष्ठा । स्थूलोतु:, स्थूलौतु. । समासे इति किम् ? हे राजपुत्र ! ओष्ठ पश्य । हे छात्र ! ओतुस्वरं शृणु । अवर्णस्येति किम् ? शुच्योष्ठी ।

३२. एदोतोऽनः पदान्ते ।

पदान्ते स्थितादेकारादोकाराच्च परस्य अकारस्य लोपो भवति । तेऽत्र, यजन्तेऽत्र, पटोऽत्र । एदोत इति किम् ? दध्यत्र, मध्वत्र । अत इति तपरकरण किम् ? ते आगता । पदान्ते इति किम् ? नयनम्, पवनम् ।

३३. ऋतो रस्तद्धिते ये ।

ऋकारस्य रेफादेशो भवति यकारादौ तद्धिते परे । पितरि साधु—पित्र्यम् । भ्रात्र्यम् । तद्धिते इति किम् ? कार्यम्, हार्यम् । ये इति किम् ? पैतृकम् ।

३४. गव्यूतिः क्रोशयुगे ।

क्रोशयुगेऽभिधेये गव्यूतिरिति निपात्यते । गव्यूतिः—क्रोशयुगम् । अन्यत्र गोयूति ।

३५. असंधिरदसो मुमी ।

अदसःसम्बन्धिनौ मु, मी—इत्येतावसन्धी भवत । अमुमुईच, अमुमुईचा । अमी आसते, अमी अश्वा । अदस इति किम् ? अम्यत्र । अम् गतौ—इत्यतो भावे घञि अमः, सोऽस्याऽस्तीति इन् ।

३६. ईदूदेद् द्विवचनं स्वरे ।

ईत् ऊत् एत्—इत्येवमन्त द्विवचनं स्वरे परेऽसन्धिर्भवति । मुनी एतौ, त्रपुणी अत्र । साधू एतौ, अमू इति । माले इति, कुण्डे अत्र, पचेते इति । ईदूदेदिति किम् ? वृक्षावत्र । द्विवचनमिति किम् ? कुमार्यत्र । एषा प्लुतानामितावपि सधिर्न भवति । अग्नी३ इति, वायू३ इति । स्वरे इति किम् ? तव ई कामौ तवे । प्रत्यासत्तेः स्वरनिमित्तककार्यप्रतिषेधादिह भवत्येव—तव ई तवे आसाते ।

३७. मणीवादीनां वा ।

मणीवादीना शब्दाना द्विवचन स्वरे परेऽसधिर्वा भवति । मणीव, मणी इव । रोदसीव, रोदसी इव । दपतीव, दपती इव । मणीवादिगणो यथादर्शन विज्ञेय ।

३८. ओन्निपातः ।

ओदन्तो निपात स्वरे परेऽसधिर्भवति । अहो अत्र, उताहो इदम्, आहो एतत्, अहो ईशा, अथो अस्मै, अथो एहि । निपात इति किम् ? भानोऽत्र, गवीश्वर । निपात. प्रकृतावेव ओकारान्तो ग्राह्यस्तेनेह न—मिथोऽत्र ।

३९. स्वरोऽनाङ् ।

आङ्वर्जित स्वरो निपातोऽसंधिर्भवति स्वरे परे । अ अपेहि । आ[२] एव किल मन्यसे । आ एव नु तत् । इ इन्द्र पश्य । ई ईदृश संसार । उ उत्तिष्ठ । ऊ ऊषरे बीजं वपसि । ए इतो भव । अनाङिति किम् ? आ—ईषत् उष्णमोष्णम् । आ+इहि=एहि । आ+उदकान्तात्=ओदकान्तात् । आ+आर्येभ्यः=आर्येभ्यो यशो गतं गौतमस्य ।

ईषदर्थे क्रियायोगे, मर्यादाभिविधौ च यः ।
एतमात ङित विद्याद्, वाक्यस्मरणयोरङित्[३] ॥

१. संधिनिषेधः ।

२ अत्राकारो वाक्यालङ्कारे । पूर्ववाक्यार्थविपर्ययद्योतको वा ।

३. वाक्यशब्देन वाक्यार्थ उच्यते, चादीनां द्योतकत्वात् अर्थस्यैव च द्योत्यत्वात् न तु शब्दस्येति । आ एव किल मन्यसे । पूर्वप्रक्रान्तवाक्यार्थस्यान्यथात्वद्योतनायायमत्राकार. । तथा स्मृतेः सूचक आकारः स्मृत्यर्थो निर्दिश्यते—आ एव नु तदिति ।

निपात इति किम् ? अ (विष्णो) आगच्छ आगच्छ। स्वरग्रहणादिह केवल एव गृह्यते, तेनेह भवति—चेति, न्विति। स्वरे इति किम् ? जानु उ जानू। स्वरे परे इति प्रत्यासत्तेस्तन्निमित्तकसंधिप्रतिषेधादिह दीर्घत्वलक्षणः संधिर्भवत्येव—जानु उ अस्य रुजति, जानू अस्य रुजति।

४०. प्लुतोऽनितौ।

इतिशब्दवर्जिते स्वरे परे प्लुतोऽसंधिर्भवति। देवदत्त३ अत्र न्वसि। जिनदत्त३ इदमानय। सुश्लोक३ आगच्छ। अनिताविति किम् ? देवदत्तेति, सुश्लोकेति। केचित् तु इतिशब्दे विकल्पमिच्छन्ति।

४१. इ ३ वा।

इ३ इति प्लुत स्वरे परेऽसंधिर्वा भवति। चिनुहि३ इदम्, चिनुहीदम्। लुनीहि३ इति, लुनीहीति। कथ वशा३ इयम्, वशेयम् ? छान्दसावेतौ ? इतावप्राप्तेऽन्यत्र च प्राप्ते उभयत्र विकल्पोऽयम्।

४२. धावोविंतौ।

धिविषये य ओदन्तः स इतौ परेऽसंधिर्वा भवति। पटो इति, पटविति। साधो इति, साधविति। धाविति किम् ? अहो इति। ओदिति किम् ? अग्न इति। इताविति किम् ? वायोऽत्र, पटोऽत्र।

४३. उञ् ऊँ च।

इतौ परे उञ् वाऽसंधिर्भवति ऊँ इत्यादेशश्च वा भवति। तथा च सति त्रैरूप्य सिद्ध भवति। उ इति, ऊँ इति, विति। इताविति किम् ? उ उत्तिष्ठ। ञित्करणं स्वरूपग्रहणार्थं, तेन विकृतस्य न भवति—अह + उ=अहो, अहो इति। अथ ऊँ इत्येव चादिषु पठ्यतां किमादेशेन ? नैवम् तस्याऽनितावपि प्रयोग प्रसज्येत, तन्निषेधार्थमादेशवचनम्।

४४. णपाद्वः स्वरे स्वरवत्।

णपप्रत्याहारात् पर उञ् वकारो वा भवति स्वरे परे, स च वकार स्वरवद्[1] भवति। क्रुङ्ङ्वास्ते, क्रुङ्ङु आस्ते। किम्वावपनम्, किमु आवपनम्। किम्वुष्णम्, किमु उष्णम्। किम्विति, किमु इति। किमूँ इति, किंविति[2], किवँविति। किम्वुक्तम्, किमु उक्तम्। णपादिति किम् ? स्वरु उपैति, अन्तरु उपैति, घञु एति। स्वरे इति किम् ? किमु गच्छति। स्वरवत्करणाद् द्वित्वमनुस्वारयमाऽभावश्च।

४५. ऋद्लृतोः समानानां ह्रस्वः।

समानसंज्ञकानां वर्णानां ह्रस्वो वा भवति ऋकारे लृकारे च परे। महऋषिः, महर्षि। नदिऋच्छति, नद्यृच्छति। वधुऋणम्, वध्वृणम्। कर्तृऋषभ, कर्तृषभ। कन्यलृकार, कन्यल्कार। होतृलृकारः, होतृकार। ह्रस्वकरणसामर्थ्यादिव कार्यान्तर न भवति, अत एव ह्रस्वस्यापि ह्रस्व क्रियते। समानानामिति किम् ? वृक्षावृच्छति। ऋद्लृतोरिति किम् ? दण्डाग्रम्, कन्याया ऋकार—कन्यर्कार। कश्चित्तु पक्षे प्रकृतिभावमपीच्छति। तन्मते महाऋषि, वधूऋणम् इत्याद्यपि भवति। प्राच्छेंति इत्यादौ तु **'ऋत्युपसर्गस्य'** [१/२/१६] इति विशेषविधानादारेव भवति। **'ह्रस्वोपदे वा'** [१/२/२] इत्येव सिद्धे अवर्णार्थं पदार्थं च वचनम्।

---

१. ननु च स्वरवदिति विनापि प्रथमेव द्वित्वे क्रुङ्ङ्वास्ते इति सेत्स्यति, तत् किमनेनाऽत्र दर्शितेन ? सत्यम्, अत्र परत्वात् **'ङ्णनो ह्रस्वाद् द्विः स्वरे'** [१/३/२२] इत्यनेन जायमान द्वित्व बाधित्वा नित्यत्वाद् अनेन वकार। तस्य च स्वरवत्त्वाद् द्वित्वम्।

२ अत्र **'इवर्णादीनां स्वरे यवरलाः'** [१/२/१] इति वत्वे कृते **'मोनुस्वारयमौ हसे सवर्णौ'** [१/३/१८] इति अनुस्वारयमौ।

तृतीयश्चरणः

१. ञमे जबा ञमा वा पदान्ते ।

पदान्ते वर्तमाना जबा ञमे परे ञमा वा भवन्ति । तन्नयनम्, तद्नयनम् । चिन्नयति, चिद् नयति । एतन्मुरारि, एतद्मुरारि । वाङ् नयति, वाग् नयति । वाङ् मधुरा, वाग् मधुरा । ञमे इति किम्? वागत्र, षड् गच्छन्ति । जबा इति किम्? स्वर्नयति । पदान्ते इति किम्? विद्मः ।

२. प्रत्यये ।

पदान्ते वर्तमाना जबा ञमादौ प्रत्यये परे ञमा भवन्ति । नित्यार्थं वचनम् । षण्णाम्, वाङ्मात्रम्, वाङ्मयम् । पदान्ते इति किम्? यज्ञः, सद्म । कथं ककुद्मान्? ऊर्म्यादिगणे निपातनाद् भविष्यति ।

३. चपाच्छहछोऽमे वा ।

पदान्ते स्थिताच्चपादुत्तरस्य शकारस्य छकारो वा भवति अमे परे । तच्छान्तिः, तच्शान्तिः । षट् छ्यामाः, षट् श्यामाः । वाक्छूरः, वाक्शूरः । चपादिति किम्? प्राङ्शूरः, भवाञ् शोभनः । अमे इति किम्? वाक् श्च्योतति ।

४. जबाद्धो झभाः ।

पदान्ते स्थिताज्जबादुत्तरस्य हकारस्य झभा वा भवन्ति । आमन्नत्वात् यद्वर्गगो जबस्तद्वर्गगो झभो भवति । अज्झलौ, अज्हलौ । षड् ढलानि, षड् हलानि । तद्धितम्, तद्हितम् । वाग्घरिः, वाग्हरिः । ककुब्भासः, ककुब्हासः । जबादिति किम्? भवान् हसति ।

५. स्तोः श्चुभिः श्चुः ।

शकारचवर्गाभ्यां योगे सकारतवर्गयो स्थाने शकारचवर्गौ भवतः । सकारस्य शकारः, तवर्गस्य चवर्ग इति यथासङ्ख्यमादेशः । योगस्तु द्वयोर्मध्ये कस्यापि भवेत् । कश्शेते, भवाञ् शेते, कश्चिनोति, तच्चित्रम्, तज्जयति, यज्ञः, राज्ञः, तच्छादयति, भवाञ् जयति ।

६. ष्टुभिः ष्टुः ।

स्तोरित्यनुवर्तते । षकारटवर्गाभ्यां योगे सकारतवर्गयोः स्थाने षकारटवर्गौ भवतः । अत्रापि यथासङ्ख्यं पूर्ववत् । कष्षष्ठः, कष्टीकते, तट्टीकते, चक्रिण्ढौकसे, तण्णकारेण, ईट्टे ।

७. न पदान्ताट्टोरनाम्नवतिनगरीणाम् ।

पदान्ते वर्तमानाट्टवर्गात् परयो सकारतवर्गयो स्थाने ष्टुर्न भवति नाम्, नवति, नगरी—इत्येतेषां वर्जयित्वा । षट् सन्ति । षट् ते । मधुलिट् सीदति । पदान्तादिति किम्? ईट्टे । टोरिति किम्? चतुष्टयम् । अनाम्नवतिनगरीणामिति

किम् ? षण्णाम्, षण्णवतिः, सण्णगर्य. । नामिति ग्रहणादिह प्रतिषेधो भवत्येव---षड् नाम[1] ।

८. तोः षि ।

षकारे परे तवर्गस्य यदुक्त तन्न भवति । भवान् षण्ठ , सन् षण्ठ । षीति किम् ? तट्टीकते । तोरिति किम् ? सर्पिष्षु ।

९. शात् ।

तोरित्यनुवर्तते । शकारात् परस्य तवर्गस्य यदुक्त तन्न भवति । प्रश्न , विश्न. ।

१०. लि लः ।

तवर्गस्य लकारे परे लकारो भवति । तल्लुनाति । सानुनासिकनिरनुनासिकत्वेन यवला द्विधा, तेन सानुनासिकस्य स्थाने सानुनासिक एव लकारः । विद्वाँल्लिखति ।

११. ङ्णोः कुक्टुकौ शसे वा पदान्ते ।

पदान्ते वर्तमानयो ङकारणकारयोर्यथासंख्य कुक्, टुक्---इत्येतावागमौ वा भवत शसे परे । प्राङ्क् शेते, प्राङ्क् छेते, प्राङ् शेते । प्राङ्क् षण्ठ , प्राङ् षण्ठ । प्राङ्क् सायम्, प्राङ् सायम् । सुगण्ट्[2] शेते, सुगण्ट् छेते, सुगण् शेते । वण्ट्षण्डे, वण्षण्डे । वण्ट्सायम्, वण्सायम् । क्रुङ्क्षु, क्रुङ्षु । सुगण्ट्सु, सुगण्सु । ङ्णोरिति किम् ? भवाञ् शेते । शसे इति किम् ? सुगण् याति । पदान्त इति किम् ? बम्भण्षि[3] ।

१२. टनः सस्य तुट् ।

पदान्ते वर्तमानात् टकारान्तात् नकारान्ताच्च परस्य सस्य तुडागमो वा भवति । षट् त्सन्त , भवान् त्साधु । पक्षे—षट् सन्त., भवान् साधु । सस्येति किम् ? षड् भवन्ति, महान् षण्ड ।

१३ नोऽप्रशानः सक् छतेऽमपरेऽनुनासिकश्च वा ।

अम परो यस्मात् तस्मिन् छते परे प्रशान्वर्जितस्य नान्तस्य पदस्य सगागमो भवति, तस्य नकारस्याऽनुनासिकश्च वा । भवाँस्तनोति । पक्षे—भवांस्तनोति । 'हशसेऽनुस्वारः' [१/३/३५] । भवाँश्छादयति भवांश्छादयति । भवाँष्टीकते, भवांष्टीकते । अप्रशान इति किम् ? प्रशान् तनोति । छते इति किम् ? भवान् करोति । अमपरे इति किम् ? भवान् त्सरुकः ।
पदान्ते इति किम् ? भवन्त । नकारस्य लाक्षणिकत्वान्नेह—तन्तनोति ।

१४. नॄनः पे वा ।

नॄनिति शसन्तस्य नृशब्दस्याऽनुकरणम् । नॄन पदस्य पकारे परे सगागमो वा भवति, तस्याऽनुनासिकश्च वा । नॄँः पाहि, नॄँ)(पाहि, नॄं पाहि, नॄं)(पाहि, नॄन् पाहि । पे इति किम् ? नॄन् भोजयति ।

१५. द्विः कानः कानि न च विसर्गः ।

कानिति किम शसन्तस्याऽनुकरणम् । द्विरुक्तस्य कान कानि परे सगागमो भवति, सस्य विसर्गश्च न, तस्याऽनुनासिकश्च वा । काँस्कान्, कांस्कान् । द्विरिति किम् ? कान् कान् पश्यति । अत्रैक. कि प्रश्नेऽन्यस्तु क्षेपे । कानीति किम् ? कास्कान् पश्यति ।

---

१ नामशब्दो नकारान्तोऽकारान्तो वा अव्यय इति ।
२ सुष्ठु गणयतीति सुगण्, विच् ।
३ 'षढोः कः सि' [१/३/६] इति षत्वम् ।

१६. पुमः खपेऽमपरे ।

पुमिति पुम्सोः कृतसंयोगान्तलोपस्याऽनुकरणम् । अम् परो यस्मात् तस्मिन् खपे परे पुम्शब्दस्य सगागमो भवति, सस्य विसर्गश्च न, नस्याऽनुनासिकश्च वा । पुंस्कोकिल., पुम्स्कोकिल. । पुंस्ख्यानम्, पुस्ख्यानम् । पुँश्चली, पुंश्चली । पुंश्छत्रम्, पुश्छत्रम् । पुँस्पुत्र., पुंस्पुत्र. । पुँस्फलम्, पुस्फलम् । खप इति किम् ? पुदासः, पुगव. । अमपरे इति किम् ? पुंक्षीरम् । केचिदत्र ख्याधातौ वेति कथयित्वा पुंस्ख्यानम्, पुंख्यानमिति रूपद्वयमाचक्षते ।

१७. समः सुटि लुक् च वा ।

समित्येतस्य सुटि परे सगागमो वा भवति, सस्य विसर्गश्च न, मस्य लुक् च वा, तस्याऽनुनासिकश्च वा । सँस्स्कर्ता, संस्स्कर्ता, सस्स्कर्ता । सँस्स्कर्तुम्, संस्स्कर्तुम्, सस्स्कर्तुम् । पक्षे— सँस्कर्ता, संस्कर्ता, मस्कर्ता । सम इति किम् ? उपस्कर्ता । सुटीति किम् ? संकृति[1] । संचस्कारेत्यत्र तु व्यवधानान्न भवति ।

१८. मोऽनुस्वारयमौ हसे सवर्णौ ।

पदान्ते वर्तमानस्य मकारस्य हसे परे अनुस्वारयमौ हसस्यैव सवर्णौ पर्यायेण भवत. । सवर्ण इति यमस्यैव विशेषणं नाऽनुस्वारस्यासभवात् । चक्रम्यते, चङ्क्रम्यते । चचूर्यते, चञ्चूर्यते । दद्रम्यते, दन्द्रम्यते । बभण्यते, बम्भण्यते । ययम्यते, यय्यँम्यते । ववम्यते, वव्वँम्यते । **'यङो मुक्'** [१/१/२५] इति पदान्तत्वम् । वहलिहो गौ, वहल्लिँहो गौ । त्वं करोषि, त्वङ्करोषि । त्व चरसि, त्वञ्चरसि । त्वं टीकसे, त्वण्टीकसे । त्व तरसि, त्वन्तरसि । नकारस्य लाक्षणिकत्वात् अत्र **'नोऽप्रशानः सक्'''** [१/३/१३] इत्यादिना सगागमो न भवति । त्व पचसि, त्वम्पचसि । सयत, सय्यँत । अहंयु, अहय्यँु । त्वं लोक., त्वल्लोँक । सवत्सर, सव्वँत्सर. । पदान्ते इति किम् ? गम्यते, रम्यते । हसे इति किम् ? किमत्र । सवर्णाविति किम् ? ररम्यते, शशम्यते, त्व रमसे, त्व षष्ठ., त्व साधु, त्वं हससि ।

१९. हे मनयवलपरे ।

मनयवलपरे हकारे परे पदान्ते वर्तमानस्य मकारस्य स्थाने मनयवलानामेव सवर्णौ अनुस्वारयमौ पर्यायेण भवतः । किं ह्मलयति, किम्ह्मलयति । किं ह्नुते, किन् ह्नुते । किं ह्य, किय्ँ ह्य । किं ह्वलयति, किव्ँ ह्वलयति । किं ह्लादते, किल्ँ ह्लादते । मादिपर इति किम् ? किं हसति ? ह इति किम् ? किं ज्वलति ?

२०. सम्राट् ।

समो मकारस्य राजतौ क्विबन्ते परे अनुस्वाराऽभावो निपात्यते । सम्राट् भरत. । सम्राजौ, सम्राजः । साम्राज्यम् ।

२१. शे चग्वा नोऽश्चे ।

नान्तस्य पदस्य शकारे परे चगागमो वा भवति, श्चसंयोगावयवश्चेच्छकारो न भवति । भवाञ् च्छूर., भवाञ् चशूर, भवाञ् शूरः, भवाञ् छूर[2] । सूत्रे चकारविधानसामर्थ्यात् कत्व न भवति । शे इति किम् ? भवान् करोति । अश्च इति किम् ? भवान् श्च्योतति ।

२२. ङ्णनो ह्रस्वाद् द्विः स्वरे ।

ह्रस्वात् परे पदान्ते स्थिता ङकारणकारनकाराः द्विर्भवन्ति स्वरे परे। प्रत्यङ्ङिदम् । सुगण्णिह । कुर्वन्नास्ते— बहिरङ्गस्य द्वित्वस्याऽसिद्धत्वात् णत्व न । ङ्णन इति किम् ? त्वमास्ते । ह्रस्वादिति किम् ? भवानास्ते, राजन्निह ।

---

१. गर्गादिपाठात् सुडागमो न ।

२. अछौ अचशा अचछा, अशाविति चतुष्टयम् ।
   रूपाणामिह चकुछत्वचलोपानां विकल्पनात् ॥

स्वर इति किम् ? प्रत्यङ् करोषि । पदान्त इति किम् ? दण्डिनौ, दण्डिन: ।

२३. अनाङ्माङो दीर्घाद् वा छः ।

पदान्ते वर्तमानादाङमाङ्वर्जिताद्दीर्घात् परश्छकारो द्विर्वा भवति । कुटीच्छाया, कुटीछाया । वधूच्छत्रम्, वधूछत्रम् । रैच्छाया, रैछाया । नौच्छाया, नौछाया । अनाङ्माङ् इति किम् ? आच्छायति, माच्छिदत् । **'स्वरात्'** [१/३/२५] इति वक्ष्यमाणसूत्रेण नित्यमेव । ङिद्ग्रहणादिह तु विकल्प एव—आ च्छाया मन्यसे, आ छाया मन्यसे । आ च्छाया मा भूत्, आ छाया मा भूत् । वाक्यस्मरणयोरयमाकार । मा च्छिन्धि, मा छिन्धि । आङसाहचर्येणाऽव्ययस्य माङो ग्रहणादिहापि विकल्प एव—प्रमिमीत इति प्रमा:, विच् । प्रमाच्छात्र , प्रमाछात्र । दीर्घादिति किम् ? श्वेतच्छत्रम्, वाक्छत्रम् । पदान्ते इति किम् ? ह्रीच्छति, म्लेच्छति ।

२४. प्लुताद्वा ।

पदान्ते वर्तमानात् दीर्घस्थानात् प्लुतात् परश्छकारो द्विर्वा भवति । आगच्छ भो इन्द्रभूते३ च्छत्रमानय, आगच्छ भो इन्द्रभूते३ छत्रमानय । दीर्घादिति किम् ? आगच्छ भो देवदत्त३ छत्रमानय ।

२५. स्वरात् ।

अग्रे विकल्पविधानान्नित्योऽयं विधि: । पदान्त इति निवृत्तम् । पदान्तेऽपदान्ते च वर्तमानात् स्वरात् परश्छकारो द्विर्भवति । तव च्छत्रम्, वृक्षच्छाया, आच्छादयति, माच्छिदत्, गच्छति, इच्छति, ह्रीच्छति, म्लेच्छति । स्वरादिति किम् ? वाक्छत्रम् ।

२६. रहाद्यस्योऽनु वा ।

पूर्वमनुवर्तते । स्वरात् पराभ्यां रेफहकाराभ्यां परो रेफवर्जितो यसो वा द्विर्भवति, अनु—यदन्यत् कार्यं प्राप्नोति तस्मिन् कृते पश्चादित्यर्थ: । गौर्य्यत्र, गौर्यत्र । अर्क्क:, अर्क: । मूर्क्ख , मूर्ख । स्वर्ग्ग स्वर्ग । अर्घ्घ , अर्घ । अर्च्चा, अर्चा । ब्रह्म्मा, ब्रह्मा । जिह्व्वा, जिह्वा । बाह्य्यम्, बाह्यम् । स्वरादिति किम् ? ह्नुते । अर इति किम् ? पद्मह्रद । यस इति किम् ? अर्ह: । अन्विति किम् ? प्रोर्ण्णुनाव[1] । अत्र धातोर्द्वित्वे कृते द्वित्व यथा स्यात् ।

२७. अदीर्घादवसानैकहसयोः ।

पूर्वमनुवर्तते । अदीर्घात्स्वरात् परो रेफवर्जितो यस: अवसाने असंयुक्ते हसे च परे अनु वा द्विर्भवति । त्वक्क्, त्वक् । त्वग्ग्, त्वग् । षड्ड्, षड् । षट्ट्, षट् । तद्द्, तद् । तत्त्, तत् । एकहसे—दद्ध्यत्र, दध्यत्र । पत्थ्यदनम्, पथ्यदनम् । मद्ध्वत्र, मध्वत्र । पित्त्रर्थ , पित्रर्थ । त्वङ्ङ् करोषि, त्वङ् करोषि । सय्यँत, सय्यँत । अन्वित्यधिकारात् कत्वगत्वादिषु कृतेषु पश्चाद् द्वित्वम् । अदीर्घादिति किम् ? दात्रम्, पात्रम्, सूत्रम्, मूत्रम्, वाक् । दीर्घप्रतिषेधात् प्लुताद् भवत्येव—गो३त्त्रात, गो३त्रात । नौ३त्त्रात, नौ३त्रात । अवसानैकहसयोरिति किम् ? इन्द्र , चन्द्र:, कृत्स्नम्, मृत्स्ना, उष्ट्र:, दधि, मधु । अर इति किम् ? वर्या । यस इति किम् ? वह्यम्, नह्यस्ति ।

२८. यलाण्णपाः ।

यलात्परा णपा द्विर्वा भवन्ति । वृक्षवक्करोति वृक्षवक्रोति । उल्क्का, उल्का । नात्र द्वित्वमिति **'पाणिनिः'** यलादिति किम् ? भवान् मधुर: । णपा इति किम् ? हल्अकार ।

---

१ अत्रान्वित्यस्याऽभावे सत्यन्तरङ्गत्वात् द्वित्वे कृते पश्चात् णत्वादिनिमित्तत्वेन बहिरङ्गं द्विर्वचनं स्यात् । ततश्च प्रोर्ण्णुन्नावेत्य-निष्टरूपापत्ति । ननु द्वित्व कृतमपि निमित्ताभावे इति निवर्त्स्यति, किमनुग्रहणेन ? उच्यते—अनुग्रहणादेवायं न्यायोऽनित्य इति । यद्वा नायं सार्वत्रिको न्याय: कुम्भकारस्य विनाशे घटस्य दर्शनात् ।

२९. णपाद्यलाः ।

णपात्परा यला द्विर्वा भवन्ति । दध्य्यानय, दध्यानय । मध्व्वत्र, मध्वत्र । णपादिति किम् ? बाल्यम् । यला इति किम् ? वाग्जयति ।

३०. शसात् खपाः ।

शसात् परा खपा द्विर्वा भवन्ति । कश्च्चरति, कश्चरति । कष्ट्टीकते, कष्टीकते । स्त्थाली, स्थाली । शसादिति किम् ? भवान् करोति । खपा इति किम्? आस्यम् । **'हैमः'** [१/३/३५] त्वनुस्वारविसर्गजिह्वामूलीयोपध्मानीयेभ्योऽपीच्छति । त्वं क्खनसि, त्वं खनसि । कः प्पचति, कः पचति । क≍क्खनति, क≍खनति । क)(प्फलति, क)(फलति इत्यादि ।

३१. खपाच्छसाः ।

खपात् परा शसा द्विर्वा भवन्ति । वत्स्सरः, वत्सरः । अप्स्सरः, अप्सरः । तच्श्शेते, तच्शेते । षट्ष्षण्डे, षट्षण्डे । खपादिति किम् ? भवान् साधु । शसा इति किम् ? मध्नाति ।

३२. न रात्स्वरे ।

रेफात् परा शसाः स्वरे परे द्विर्न भवन्ति । दर्शनम्, विमर्शः । कर्षति, वर्षति । रादिति किम् ? तच्श्शेते, षट्ष्षण्डे, वत्स्सः । स्वरे इति किम् ? कश्श्र्यते, वष्ष्र्यते । **'रहाद्वर्यसोऽनु वा'** [१/३/२६] इति विकल्पे प्राप्ते निषेधार्थं वचनम् ।

३३. पुत्रस्यादिन्पुत्रादिनोराक्रोशे ।

पुत्रशब्दसंबन्धिन तकारस्य द्विर्न भवति आदिन्, पुत्रादिन्—इत्येतयो परयो आक्रोशे गम्ये । पुत्रादिनी त्वमसि पापे । पुत्रपुत्रादिनी भव । आक्रोशे इति किम् ? यथार्थकथने तु द्विर्भवत्येव —पुत्रानत्तीति पुत्त्रादिनी व्याघ्री, पुत्रादिनीति वा । पुत्त्रपुत्रादिनी नागी, पुत्रपुत्रादिनीति वा । आदिन्पुत्रादिनोरिति किम् ? पुत्त्रहती, पुत्रहती । पुत्त्रजग्धी, पुत्रजग्धी । **'अदीर्घाद्विरामैकव्यञ्जने'** [१/३/२७] इति विकल्पे प्राप्ते निषेधार्थं वचनम् ।

३४. म्नां झपे जम सवर्णोऽपदान्ते ।

अपदान्ते वर्तमानानां मकारनकाराणां स्थाने झपे परे झपस्यैव सवर्णो जमोऽनु भवति । गन्ता, गन्तुम्, शङ्किता, शङ्कितुम्, अञ्चिता, अञ्चितुम्, कुण्ठिता, कुण्ठितुम्, नन्दिता, नन्दितुम्, कम्पिता, कम्पितुम् । म्नामिति बहुवचनं वर्णान्तर-बाधनार्थम्, तेन कुर्वन्ति, कृषन्ति, विस्रम्भ , संरम्भः—इत्यत्र नकारस्य णत्वं बाधित्वा अनेन जम एव भवति । क्रान्त्वा, भ्रान्त्वा—इत्यत्रापि नकारे कृते णत्वबाधनार्थं पुनर्नकारः । झपे इति किम् ? गम्यते, हन्यते, आहन्महे, प्रहन्मः । अपदान्त इति किम् ? भवान् करोति । अन्वित्यधिकारात् व्यङ्क्ता, व्यङ्क्तुम्— इत्यत्राञ्जेर्गत्वे कत्वे च कृते पश्चात् ङकार । अन्यथा नकार एव स्यात् ।

३५. हशसेऽनुस्वारः ।

अपदान्ते वर्तमानानां मकारनकाराणां स्थाने हकारे शसप्रत्याहारे च परे अनुस्वारोऽनु भवति । गुर्वलिहि, स्वनड्वांहि कुलानि, पुंसि, गंस्यते, दंश , सुदंशि कुलानि, वपूंषि, धनूंषि, यशांसि, पयांसि । म्नामिति बहुवचनात् वृहण-मित्यत्र णत्वं दंशः इत्यादौ त्रत्व च बाधित्वा अनेनाऽनुस्वार एव भवति । एवं सर्पींषि, सुदृंशि । हशसे इति किम् ? गम्यते, हन्यते । अपदान्त इति किम् ? श्रेयान् हेतुः, भवान् साधुः । अन्विति किम् ? पिण्ढि, शिण्ढि । अत्र पिष्शिषोर्हौ तस्य धित्वे षस्य डत्वे च शसाभावान्मो नकारस्याऽनुस्वारो न भवति ।

३६. रो रि लोपो दीर्घश्चाविवृतः ।

रेफस्य रेफे परे लोपो भवति अकारेकारोकाराणां चानन्तराणां दीर्घो भवति । पुना रमते, प्राता रौति ।

नीरक्तम्, दूरक्तम् । पटू राजा । उच्चै रौति ।

३७. ढस्तड्ढे ।

तन्निमित्तो ढस्तड्ढः । ढकारस्य तड्ढे परे अनु लोपो भवति अकारेकारोकाराणां च दीर्घः । महतेः क्तौ, माढि । लीढम्, मीढम्, गूढम् । तड्ढे इति किम् ? मधुलिड् ढौकते । नाय लुप्यमानढकारनिमित्तो ढ । अदिदुत इति किम् ? आतृढम्, आवृढम् । अन्विति किम् ? लेढा, मेढा । अत्र गुणे कृते पश्चाद् ढलोप । अन्यथा हि पूर्वमेव ढलोपे दीर्घे च लीढा, मीढा—इत्यनिष्टं रूपं स्यात् ।

३८. सहिवहोरोच्चाऽवर्णस्य ।

सहि, वहि—इत्येतयोर्ढस्य तड्ढे परे अनु लोपो भवति अवर्णस्य च ओकार । सोढा । वोढा, उदवोढाम् । अवर्णस्येति किम् ? ऊढ ।

३९. चपानां शसे खथा वा ।

चपानां शसे परे खथा वा भवन्ति । वथ्स , वत्स । भवथ्सु, भवत्सु । सुगण्ठ्सु, सुगण्ट्सु । अख्षरम्, अक्षरम् । अफ्सर , अप्सर. । चपानामिति किम् ? भवान् साधु । शसे इति किम् ? पक्व , प्राप्य ।

४०. खसे चपा झथानाम् ।

झथानां खसे परे चपा भवन्ति । वाक् पूता, पट् कुर्वन्ति, दृषत्कल्प , गच्छति, उच्छति । खसे इति किम् ? भज्यते । झथानामिति किम् ? ण्च्योतति, कष्टीकते, पयस्सु ।

४१. वाऽवसाने ।

अवसान— अन्त: । अवसाने वर्तमानानां झथाना चपा वा भवन्ति । वाक्, वाग् । पट् षड् । तत्, तद् । ककुप्, ककुब् । अवसाने इति किम् ? वागत्र, वागीश । झथानामिति किम् ? सुगण्, भवान्, त्वम् ।

४२. न संधिः ।

उक्तो वक्ष्यमाणश्च संधिरवमाने न भवति । दधि[१] अत्र, ते आहु, तत् लुनाति, भवान् लुनाति, कुर्वन् शेते, वृक्षस्य छाया, ब्राह्मणस्य छत्त्रम्, भवान् छादयति, नृन् पाहि, कुण्डम् हसति, वृक्षव् याति, कुर्वन् आस्ते ।

४३. झबे जबा झसानाम् ।

झसानां झबे परे जबा भवन्ति । लब्धा, दोग्धा, बोद्धा, मज्जति, भृज्जति । झबे इति किम् ? लिख्यते । झसानामिति किम् ? वल्भते । अपदान्तार्थं वचनम् । पदान्ते तु **'झसा जबाः'** [२/१/१०८] इति वक्ष्यति ।

४४. विसर्गस्य सश्छते ।

विसर्गस्य सकारादेशो भवति छते परे । कश्छादयति, अन्तश्चरति, कस्थुडति, कस्तनोति, हरिष्टीकते । छते इति किम् ? हरिरत्र, क करोति, क पचति ।

४५. वा शसे ।

शसे परे विसर्गस्य सकारादेशो वा भवति । हरिश्शेते, हरि शेते । कष्षण्ड, क. षण्ड । शुद्धस्साधु, शुद्धः साधुः ।

---

१ इह दधिशब्दे एव उच्चारणाऽन्तो विवक्षित ।

४६. खपपरे लोपः ।

खपः परो यस्मात् तस्मिन् शसे परे विसर्गस्य लोपो वा भवति । चक्षु स्फुरति, चक्षुः स्फुरति, चक्षुस्स्फुरति । खपपरे इति किम् ? चक्षुः सुन्दरम् ।

४७. शसपरे खपे विसर्गः ।

शस परो यस्मात् तस्मिन् खपे परे विसर्गस्य विसर्ग एव भवति । कः त्सरुः, देवदत्तः क्षुब्धः, अद्भिः प्सातम् । नियमार्थमिदम् । तेनात्र सकारजिह्वामूलीयोपध्मानीया न ।

४८. कखपफयोः≍क)(पौ वा ।

कखे पफे च परे विसर्गस्य यथासङ्ख्य ≍क)(पौ जिह्वामूलीयोपध्मानीयसञ्ज्ञकौ वा भवतः । कपावुच्चारणार्थौ । क≍करोति, कः करोति । क≍खनति, कः खनति । क)(पचति, कः पचति । क)(फलति, कः फलति ।

४९. अतोऽत्युः ।

अकारात् परस्य विसर्गस्य उकारादेशो भवति अकारे परे । कोऽत्र, कोऽर्थः, जिनोऽर्च्यः । अत इति किम् ? देवा अत्र, अग्निरत्र, सुश्रोत३ अत्र । अतीति किम् ? सर्वज्ञ आस्ते, पय अ३श्वदत्त, क इह ।

५०. हबे ।

अकारात् परस्य विसर्गस्य उकारो भवति हबे परे । जिनो वन्द्यः, धर्मो जयति, देवो गच्छति । हबे इति किम् ? कः करोति, चैत्र शेते । अत इति किम् ? मुनिर्गच्छति, सुश्रोत३देहि । योगविभाग उत्तरार्थः ।

५१. अवर्णभोभगोअघोभ्यो लोपः ।

अवर्णाद् भोभगोअघोभ्यश्च परस्य विसर्गस्य लोपो भवति हबे परे । श्रमणा गच्छन्ति, धार्मिका जयन्ति, सुश्रोत३ देहि । अकारात्तु पूर्वेण उत्वमेव । भो गच्छसि, भगो हससि, अघो यासि । भोभगोअघो इत्येते आमन्त्रणार्था सकारान्ता अव्यया । केचित्तु भवद्भगवदघवता धौ परतो वत उत्वं कृत्वा एतानि रूपाणि इच्छन्ति । तेषां मते द्विवचनबहुवचनयोः स्त्रियां च न सिध्यति । भो ब्राह्मणौ, भो ब्राह्मणा , भो ब्राह्मणीत्यादि । हबे इति किम् ? कुमाराः क्रीडन्ति ।

५२. य्वोः पदान्ते ।

अवर्णादिभ्य परयोः पदान्ते वर्तमानयोर्यकारवकारयोर्लोपो भवति हबे परे । माला गच्छति । मालामयते इति मालाय्, क्विप् । मालाय् गच्छति—इत्यवस्थायां अनेन यकारलोपः । एवमव्य गच्छति, वृक्ष हसति । वृक्षं वृश्चतीति वृक्षवृट्, क्विप् । तमाचष्टे—णौ, वृक्षवृट् इ ति—इत्यवस्थायां टिलोपे ऋकारटकारयोर्लोपः वृक्षवयति । ततो विचि[१] वृक्षव् हसति—इत्यवस्थायामनेन वकारलोपः । हबे इति किम् ? अव्यय् करोति, वृक्षव् करोति । अवर्णादिभ्य इति किम् ? तरुव् गच्छति । पदान्ते इति किम् ? जय्यम्, भव्यम् ।

५३. स्वरे वाऽसंधिश्च ।

अवर्णभोभगोअघोभ्यः परयोः पदान्ते वर्तमानयोर्यकारवकारयोः लोपो वा भवति स्वरे परे, स चाऽसंधिः—संधेर्निमित्तं न भवति । त आगताः, तयागताः । ता इमौ, ताविमौ । क आस्ते, कयास्ते । भो एहि, भोयेहि । भगो अत्र, भगोयत्र । अघो इहि, अघोयिहि । एभ्य इति किम् ? दध्यत्र, मध्वत्र । पदान्त इति किम् ? नयनम्, लवनम् । स्वर इति किम् ? वृक्षव् करोति ।

---

१. वृक्षविरयत क्विपि सत्यूट् स्यादिति ।

५४. यो विसर्गस्य ।

स्वरे इत्यनुवर्तते । अवर्णभोभगोअघोभ्य. परस्य विसर्गस्य यकारादेशो भवति स्वरे परे। कयास्ते, कयिह, कयुष्ट्र, भोयत्र, भगोयत्र, अघोयत्र । एभ्य इति किम् ? मुनिरत्र । स्वरे इति किम् ? क. करोति, भो. करोति ।

५५. नामिनो रोऽबे ।

नामिन परस्य विसर्गस्य रेफो भवति अबे परे । हरिरत्र, वटुर्वदति । नामिन इति किम् ? चैत्रो याति । अबे इति किम् ? वटुश्शेते ।

५६. रः ।

रेफप्रकृतिकस्य विसर्गस्य रेफो भवति अबे परे । प्रातर्गत , अन्तर्याति । प्रातर् गत —इत्यवस्थायां **'स्रोर्विसर्ग'** [२/१/१०३] इति विसर्गः, पश्चादनेन पुना रकार । रेफप्रकृतिकस्येति किम् ? देवो गत । अत्र सकारप्रकृतिक-विसर्गत्वान्न रेफ ।

५७. वाऽहर्पत्यादयः ।

अहर्पत्यादय शब्दाः कृतरकारान्ता वा निपात्यन्ते । अहर्पति , अह पति , अह)(पति । गीर्पति , गी पति , गी)(पति. । धूर्पति , धू पति , धू)(पति. । आकृतिगणोऽयम् ।

५८. उषसो बुधे ।

उषस्शब्दस्य विसर्गस्य रेफो भवति बुधे परे । उषर्बुध. । अग्रे विकल्पविधानान्नित्योयं विधिः ।

५९. प्रचेतसो राजनि वा ।

प्रचेतस्शब्दस्य विसर्गस्य रेफो वा भवति राजनि परे। प्रचेता राजन् । **'रो रि लोपो दीर्घश्चाविदुत.'** [१/३/३६]। पक्षे—प्रचेतो राजन् ।

६०. सेषाद्धसे लोपः ।

सशब्दादेषशब्दाच्च परस्य विसर्गस्य लोपो भवति हसे परे । स याति, स ददाति । एष याति, एष ददाति । परमस ददाति । परमैष करोति । हसे इति किम् ? सोऽत्र, एषोऽत्र ।

६१. नाऽक्नञ्समासे ।

अकि सति नञ्समासे च सैषाभ्या परस्य विसर्गस्य लोपो न भवति हसे परे । सको राजा । एषको मन्त्री । **तन्मध्यपतितस्तद्ग्रहणेन गृह्यते** इति साकोऽपि प्राप्तिरिति प्रतिषेध । असो याति । अनेषो गच्छति ।

६२. हसाद्यमानां सरूपे यमे वा ।

हसात् परेषां यमाना लोपो वा भवति सरूपे यमे परे । जंगम्यते । अत्र **यङन्ताद् भावकर्मणोर्यक्प्रत्यये कृते अनेन** यङो यकारलोप. । पक्षे—जगम्य्यते । अदितेरयमादित्य, स देवता अस्य—आदित्यः स्थालीपाक , आदित्य्य इति वा । हसादिति किम् ? अन्नम्, भिन्नम् । सरूपे इति किम् ? माहात्म्यम् । केचित्तु **यमानां यममात्रे लोपमिच्छन्ति न तु सरूप एव** । तन्मते वभ्यते, वभ्र्यते, मभ्यते, मभ्र्यते इत्यादावपि भवति।

६३. झसानां झसे सवर्णे ।

हसादित्यनुवर्तते । वेत्यपि । हसात् परेषां झसानां लोपो वा भवति **सवर्णे झसे परे । तर्धिः, तर्द्धिः । शिण्ढि**

शिण्ड्ढ । पिण्ढि; पिण्ड्ढ । झसानामिति किम् ? शार्ङ्गम्, भार्ङ्गम् । झसे इति किम् ? सक्थ्ना, सक्थ्ने । सवर्णे इति किम् ? तर्प्ता, तर्प्तुम्, दर्प्ता, दर्प्तुम् । हसादिति किम् ? बोद्धा, योद्धा ।

६४. उदः स्थास्तम्भोः सः ।

उदः परयो स्था, स्तम्भ—इत्येतयो सकारस्य लोपो भवति । उत्थानम्, उत्तम्भनम्, उत्थाता, उत्तम्भितुम् । उद इति किम् ? संस्थाता, संस्तम्भिता । स्थास्तम्भोरिति किम् ? उत्स्नात । स इति किम् ? उत्तिष्ठति, उदस्थात् ।

६५. तदः सेः स्वरे पादपूरणं चेत् ।

तद परस्य सेर्लोपो भवति स्वरे परे, पादश्चेल्लोपे पूर्येत ।

सैष दाशरथी रामः, सैष राजा युधिष्ठिरः ।
सैष कर्णो महात्यागी, सैष भीमो महाबल ॥

पादपूरण चेदिति किम् ? स एष भरतो राजा ।

समस्ते सधिप्रकरणे ध्येयमेतत्—

संधिरेकपदे नित्यो, नित्यो धातूपसर्गयोः ।
नित्यः समासे वाक्ये तु, स विवक्षामपेक्षते ॥

चतुर्थश्चरण:

१. सि औ जस्—अम् औ शस्—टा भ्यां भिस्—ङे भ्यां भ्यस्—ङसि भ्यां भ्यस्—ङस् ओस् आम्—ङि ओस् सुपां त्रीणि त्रीणि प्रथमादिः ।

स्यादीनां त्रीणि त्रीणि वचनानि यथासंख्य प्रथमा-द्वितीया-तृतीया-चतुर्थी-पञ्चमी-षष्ठी-सप्तमी-संज्ञानि भवन्ति । इ-ज-श-ट-ङ-पा-अनुबन्धा **'हसेपः सेर्लोपः'** [१/४/२७] इत्यादौ विशेषणार्था । सि-औ-जस् इति प्रथमा । अम-औ-शस् इति द्वितीया । टा-भ्यां-भिस् इति तृतीया । ङे-भ्या-भ्यस् इति चतुर्थी । ङसि-भ्यां-भ्यस् इति पञ्चमी । ङस्-ओस्-आम् इति षष्ठी । ङि-ओस्-सुप् इति सप्तमीति विवेक । प्रथमादिसंज्ञाप्रयोजन तु **'नाम्न. प्रथमा'** [२/४/४४] इत्यादि ।

२. एकद्विबहुषु ।

स्यादीना यानि त्रीणि त्रीणि वचनानि सि-औ-जसादिलक्षणानि उक्तानि तानि एकत्वद्वित्वबहुत्वेष्वर्थेषु यथाक्रम भवन्ति । एकस्मिन्नर्थे—सि इत्येकवचनम् । द्वयोरर्थयो —औ इति द्विवचनम् । बहुष्वर्थेषु—जस् इति बहुवचनम् । जिन., जिनौ, जिना । एव सर्वत्र ।

३. सङ्ख्यायास्त्रेस्त्रयो नुटि ।

सङ्ख्यावाचित्रिशब्दस्य त्रय इत्ययमादेशो भवति नुटि परे । त्रयाणाम्. परमत्रयाणाम् । **'ह्रस्वापश्च'** [१/४/३७] इति नुट् । सङ्ख्याया इति किम् ? अतित्रीणाम्, प्रियत्रीणाम् । अत्रापि भवतीत्येके— प्रियत्रयाणाम् । स्त्रिया तु परत्वात् तिसृभाव. । तिसृणाम् ।

४. जस्शसोर्डतिष्णो लुक् ।

सङ्ख्याया इत्यनुवर्तते । डतिप्रत्ययान्तषकारान्तनकारान्तसङ्ख्याया परयो जस्शसोर्लुग् भवति । कति तिष्ठन्ति, कति पश्य, यति तिष्ठन्ति, यति पश्य । षट् तिष्ठन्ति, षट् पश्य । पञ्च तिष्ठन्ति, पञ्च पश्य । एवं सप्त, नव, दश । परमषट्, परमपञ्च । डतिष्ण इति किम् ? त्रय , चत्वार , तावन्त । शतानि, सहस्राणि—इत्यत्र सनिपातलक्षणत्वान्नान्तस्य न भवति । सङ्ख्याया इति किम् ? विप्रुष , राजान । तत्सबन्धिविज्ञानादिह न—प्रियकतयस्तिष्ठन्ति, प्रियकतीन् पश्य । प्रियषष , प्रियषष. । प्रियपञ्चान , प्रियपञ्च्ञ ।

५. औशऽष्ट: ।

जस्शसोरित्यनुवर्तते । अष्ट इति कृतात्वस्याऽष्टन्शब्दस्य निर्देशस्तत्र च सबन्धे षष्ठी । सबन्धत्वाद् गौणे न प्रयोग: । अष्टाशब्दसंबन्धिनोर्जस्शसो स्थाने औश् इत्यादेशो भवति । शकार सर्वादेशार्थ: । अष्टौ तिष्ठन्ति, अष्टौ पश्य, परमाष्टौ, अनष्टौ । कृतात्वस्य निर्देशादिह न—अष्ट तिष्ठन्ति, अष्ट पश्य, परमाष्ट, अनष्ट । तत्सबन्धिविज्ञानादिह न—प्रियाष्टास्तिष्ठन्ति, प्रियाष्ट पश्य । अतत्संबन्धिनोरपीच्छन्त्येके—प्रियाष्टौ तिष्ठन्ति, प्रियाष्टौ पश्य ।

६. वाऽष्टन आ:[१] स्यादौ ।

अष्टन्शब्दस्य मुख्यत्वे गौणत्वे च वर्तमानस्य स्यादौ परे आकारोऽन्तादेशो वा भवति । **'षष्ठ्यान्त्यस्य'**

---

१. सानुनासिकनिरनुनासिकयोरासन्नत्वे प्रायता इत्यत्र प्रायताग्रहणादत्र नकारस्य स्थाने निरनुनासिक एव आकार. ।

[८/४/१२३]। अष्टाभिः, अष्टभिः। अष्टाभ्यः, अष्टभ्यः। अष्टासु, अष्टसु। प्रियाष्टाः, प्रियाष्टा, प्रियाष्टौ, प्रियाष्टानौ, प्रियाष्टाः, प्रियाष्टानः। प्रियाष्टाम्, प्रियाष्टानम्, प्रियाष्टौ, प्रियाष्टानौ, प्रियाष्ट, प्रियाष्ट्नः। प्रियाष्टाभिः, प्रियाष्टभिः। हे प्रियाष्टाः, हे प्रियाष्टन्। गौणत्वे जस्शसोर्नेच्छन्त्येके—प्रियाष्टानस्तिष्ठन्ति, प्रियाष्ट्नः पश्येत्येव भवति। स्यादाविति किम् ? अष्टकः सघः, अष्टता, अष्टत्वम्, अष्टपुष्पी। केचित्तु सकारभकारादावेव स्यादाविच्छन्ति।

७. रायो हसे।

स्यादावित्यनुवर्तते। रैशब्दस्याकारोऽन्तादेशो भवति हसादौ स्यादौ परे। राः, हे राः, अतिराः, राभ्याम्, राभिः, राभ्यः, रासु। **एकदेशविकृतस्याऽनन्यत्वात्** अतिराभ्यां कुलाभ्याम्, अतिरासु कुलेषु। हसे इति किम् ? रायौ, रायः। स्यादाविति किम् ? रैसूत्रम्, रैभयम्।

८. अतो जस्भ्यां ये।

नाम्नोऽकारस्य आकारादेशो भवति स्यादौ जसि भ्यामि यकारे च परे। वीराः, वृक्षाः। आभ्याम्, श्रमणाभ्याम्। श्रमणाय, विप्राय। जसि '**अदेतोरपदान्तेऽतः**' [२/१/३१] इति अकारलोपबाधनार्थमाकारविधानम्। अत इति किम् ? मुनयः। स्यादाविति किम् ? बाणान् जस्यतीति क्विप्—बाणजः। अग्नये, वृक्षयोः।

९. भिस ऐस्।

अकारान्तान्नाम्नः[1] परस्य स्यादिभिसः स्थाने ऐस् इत्यादेशो भवति। अनेकवर्णत्वात् सर्वस्य। वीरैः, जिनैः, श्रमणैः, सयतैः, वृक्षैः, अतिजरैः। एमादेशेनैव सिद्धे ऐस्करणं **सन्निपातलक्षण**···इति न्यायस्याऽनित्यत्वज्ञापनार्थं, तेन अतिजरसैरित्यपि सिद्धम्। अन्ये त्वतिजरैरेवेच्छन्ति। अत इति किम् ? शालाभिः, मुनिभिः, दृषद्भिः। स्यादेरिति किम् ? चैत्रभिस्सा—चैत्रस्यौदनमित्यर्थः।

१०. इदमदसोऽक्येव।

इदम्, अदम्—इत्येतयोरक्येव सत्यकारात् परस्य भिस ऐस् भवति। इमकैः। अमुकैः। अक्येवेति किम् ? एभिः। अमीभिः। पूर्वेणैव सिद्धे नियमार्थमिदम्। एवकारस्त्विष्टावधारणार्थः।

११. एर्बहुस्भे।

नाम्नोऽकारस्य एकारादेशो भवति बह्वर्थविषये सकारे भकारे च परे स्यादौ। वीरेषु, एषु, एषाम्, अमीषाम्, सर्वेषाम्। वीरेभ्यः, वृक्षेभ्यः, एभिः, एभ्यः, सर्वेभ्यः। अत इति किम् ? खट्वासु, साधुषु, मुनिभ्यः, साधुभ्यः। बह्विति किम् ? वृक्षस्य, वृक्षाभ्याम्। स्भे इति किम् ? वीराः, वीरान्, सर्वे।

१२. ओसि।

नाम्नोऽकारस्य एकारादेशो भवति ओसि परे। वीरयोः, श्रमणयोः, देवयोः, वृक्षयोः। अत इति किम् ? अग्न्योः, दृषदोः।

१३. ङसिराद्।

अकारान्तान्नाम्नः परो ङसिराद् भवति। वीराद्, वृक्षाद्, अतिजराद्। अत इति किम् ? अतिजरसः। केचित्तु प्रागेवादादेशे जरसादेशमिच्छन्तोऽतिजरसादित्यपि मन्यन्ते।

---

१. **अर्थवशाद्विभक्तिपरिणामः**—इति न्यायेन पूर्वसूत्रस्थस्य षष्ठ्यन्तस्यापि अत इति पदस्य अत्र पञ्चम्यन्ततया परिणामः। अग्रे पुनः षष्ठ्यन्ततया।

१४. ङस् स्यः ।

अकारान्तान्नाम्न परो ङस् स्यो भवति । वीरस्य, वृक्षस्य, अतिजरस्य । अत इति किम् ? अतिजरस ।

१५. टेनः ।

अकारान्तान्नाम्न परष्टा[1] इनो भवति । वीरेण, वृक्षेण, अतिजरेण । अत इति किम् ? मुनिना, साधुना, अतिजरसा । अत्र परत्वान्नित्यत्वाच्च[2] प्रागेव जरसादेशे कृते अकारान्तत्वाऽभावः । अन्ये तु प्रागेवेनादेशे जरसादेशमिच्छन्तो-ऽतिजरसिनेत्यपि मन्यन्ते ।

१६. ङेर्यः ।

अकारान्तान्नाम्न परो ङेर्यो भवति । वीराय, वृक्षाय, अतिजराय । अत इति किम् ? अतिजरसे ।

१७. सर्वादेः स्मैः ।

सर्वादेरकारान्तस्य संबन्धिनो ङे इत्येतस्य स्मै इत्यादेशो भवति । सर्वस्मै, परमसर्वस्मै, असर्वस्मै, किंसर्वस्मै । एव विश्वस्मै[3], यस्मै, कस्मै । सर्वादयो यथा—सर्व, विश्व, उभ[4], उभयट्[5], अन्य, अन्यतर, इतर, डतर, डतम, त्वत्, त्व, नेम, समसिमौ—सर्वार्थौ, पूर्वपरावरदक्षिणोत्तरापराधराणि दिग्देशकालेषु, स्वमज्ञातिधनाख्यायाम्, अन्तरमपुरिबहिर्योगे परिधाने च । त्यद्, तद्, यद्, अदस्, इदम्, एतद्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्—इत्यसंज्ञायां सर्वादि । उभशब्दस्य द्विवचनम्स्वार्थिकप्रत्ययविषयत्वात् स्मैप्रभृतयो न भवन्ति । गणपाठस्तु हेत्वर्थप्रयोगे सर्वविभक्त्यर्थः । उभौ हेतू, उभौ हेतू, उभाभ्या हेतुभ्याम्, उभाभ्या हेतुभ्याम्, उभाभ्यां हेतुभ्याम्, उभयोर्हेत्वो, उभयोर्हेत्वो इति । उभयडिति टकार ईबर्थः । उभयी दृष्टि । अस्य च द्विवचन नास्ति । अस्तीत्यन्ये । डतरग्रहणेनैव सिद्धे अन्यतरग्रहणं डतमप्रत्ययान्तस्य अन्यशब्दस्य सर्वादित्वनिवृत्त्यर्थम् । अन्यतमाय । अन्ये त्वाहु —नाय डतरप्रत्ययान्तोऽन्यतरशब्द, किं तु अव्युत्पन्नस्तरोत्तरपदस्तराऽन्तो वा । तन्मते डतमान्तस्याप्यन्यशब्दस्य सर्वादित्वम् । अन्यतमस्मै । डतरडतमौ प्रत्ययौ, तयो स्वार्थिकत्वात् प्रकृतिद्वारेणैव सिद्धे पृथगुपादानमत्र प्रकरणेऽन्यस्वार्थिकप्रत्ययान्तानामग्रहणार्थम् । कतरस्मै, कतमस्मै, यतरस्मै, यतमस्मै, ततरस्मै, ततमस्मै । इह न भवति—सर्वतमाय, विश्वतमाय । त्वच्छब्द समुच्चयार्थः । तस्य स्मायादयो न भवन्तीति हेत्वर्थयोगे सर्वविभक्तित्वमकप्रत्ययश्च प्रयोजनम् । त्वत हेतुम्, त्वता हेतुना वसति । अज्ञानात्त्वतस्त्वकत । त्वशब्दोऽन्यार्थः । त्वस्मै । नेमशब्दोऽर्धार्थ । नेमस्मै । समसिमौ सर्वार्थौ । समस्मै, सिमस्मै । सर्वार्थत्वाऽभावे न सर्वादि —समाय देशाय धावति । पूर्वादिदिग्देशकालेषु—पूर्वस्मै, परस्मै, अवरस्मै, दक्षिणस्मै । दिग्देशकालाऽभावान्न सर्वादि —दक्षिणाय गाथकाय देहि, प्रवीणायेत्यर्थः । स्वमज्ञातिधनाख्यायाम् । आत्मात्मीयज्ञातिधनार्थवृत्ति स्वशब्द । तत्रात्मात्मीययो सर्वादि । यत् स्वस्मै रोचते तत् स्वस्मै ददाति—यदात्मने रोचते तदात्मीयाय ददातीत्यर्थ । ज्ञातिधनयोस्तु न सर्वादिः—स्वाय दातुं स्वाय स्पृहयति—ज्ञातये दातु धनाय स्पृहयति इत्यर्थ । अन्तरमपुरि बहिर्योगे परिधाने च । बहिर्भावेन बाह्येन वा योगे परिधाने चार्थे वर्तमानोऽन्तरशब्दो, न चेद् बहिर्योगेऽपि पुरि वर्तते । अन्तरस्मै गृहाय—नगरबाह्याय चाण्डालादिगृहायेत्यर्थ । चाण्डालादिगृहयुक्ताय वा नगराभ्यन्तरगृहायेत्यर्थः । पुरि तु न भवति—अन्तरायै पुरे क्रुध्यति —चाण्डालादिपुर्यै इत्यर्थः । अन्तरस्मै पटाय—पटचतुष्टये तृतीयाय चतुर्थाय वेत्यर्थ । प्रथमद्वितीययोर्बहिर्योगेणैव सिद्धत्वात् । बहिर्योगपरिधानाद् अन्यत्र न सर्वादि—अनयोर्ग्रामयोरन्तराय तापसाय । अत्रान्तरशब्द मध्यवाची । द्वियुष्मदस्मद्भवतां स्मायादयो न सभवन्तीति सर्वविभक्त्यादयः[6] प्रयोजनम् । द्वौ हेतू, द्वौ हेतू, द्वाभ्या हेतुभ्याम्, द्वाभ्या हेतुभ्याम्, द्वाभ्यां हेतुभ्याम्, द्वयोर्हेत्वो,

---

१ टा इति स्त्रीलिङ्गाबन्तप्रथमाया निर्देश ।

२. कृताकृतप्रसङ्गी विधिर्नित्य ।

३ सर्वशब्दसाहचर्याद् विश्वशब्दस्यापि समस्तार्थस्यैव ग्रहण न तु जगदर्थस्येति ।

४. उभ पूरणे—अतो नाम्न्युपधलक्षणे के उभ ।

५. उभपूर्वाद् यातेः **'आतो डोऽह्वावामः'** [५/२/५] इति डे निपातनात् टित्वे उभयट् ।

६. आदिशब्दाद् यथायोगमेकशेषपूर्वनिपातपुंवद्भावाऽद्रि-आत्-आयनिञ्-मयट्-अक-प्रयोजनानि ज्ञायन्ते ।

द्वयोर्हेत्वोः । अज्ञाते द्वे—द्वके स्त्रियौ कुले वा । द्वकौ पुरुषौ । युवाभ्यां हेतुभ्याम्, युवाभ्यां हेतुभ्याम्, युवाभ्यां हेतुभ्याम्, युवयोर्हेत्वो, युवयोर्हेत्वो । युवकाभ्याम् । युष्मादृश । आवाभ्यां हेतुभ्याम्, आवाभ्यां हेतुभ्याम्, आवाभ्यां हेतुभ्याम्, आवयोर्हेत्वो, आवयोर्हेत्वोः । आवकाभ्याम् । अस्मादृश । भवद्भ्यां हेतुभ्याम्, भवद्भ्या हेतुभ्याम्, भवद्भ्या हेतुभ्याम्, भवतोर्हेत्वो, भवतोर्हेत्वो । भवकान् । भवादृश । स च भवाश्च भवन्तौ । अत्र त्यदादित्वात् परत्वाच्च भवच्छेषः । भवान् पुत्रोऽस्येति भवत्पुत्र । अत्र सर्वादित्वात् पूर्वनिपात । उकारो नुमागमार्थ ईबर्थश्च । भवान्, भवती । असंज्ञायामिति किम् ? सर्वो नाम कश्चित्, तस्मै सर्वाय । सर्वादेरिति षष्ठीनिर्देशेन तत्संबन्धिविज्ञानादिह न सर्वादिः—प्रियाः सर्वे यस्य तस्मै प्रियसर्वाय । सर्वानतिक्रान्तायातिसर्वाय । अत इति किम् ? भवते ।

१८. ङसिङ्योः स्मात्स्मिनौ ।

सर्वादेरकारान्तस्य संबन्धिनोः ङसि, ङि—इत्येतयोर्यथासंख्य स्माद्, स्मिन्—इत्येतावादेशौ भवतः । सर्वस्माद्, सर्वस्मिन् । विश्वस्माद्, विश्वस्मिन् । अत इति किम् ? सर्वस्या, सर्वस्याम् । भवत, भवति । सर्वादेरिति किम् ? देवात्, देवे । तत्सबन्धिविज्ञानादिह न—प्रियसर्वात्, प्रियसर्वे । अतिविश्वात्, अतिविश्वे ।

१९. जस इश् ।

सर्वादेरकारान्तस्य सबन्धिनो जस इश् भवति । शकारः सर्वादेशार्थः । सर्वे, विश्वे, उभये, ते, के, ये । अत इति किम् ? सर्वाः, भवन्त । सर्वादेरिति किम् ? वीरा, पुरुषाः । तत्संबन्धिविज्ञानादिह न—प्रियसर्वा. पुमांस । सर्वाणि कुलानि --इत्यत्र तु परत्वान् नपुंसके शिरेव ।

२०. नेमाल्पप्रथमचरमतयडयडर्धकतिपयानां वा ।

नेमादीनामकारान्तानां संबन्धिनो जस इश् वा भवति । नेमात् प्राप्ते इतरेभ्योऽप्राप्ते विकल्पार्थं वचनम् । नेमे, नेमा । अल्पे, अल्पा । प्रथमे, प्रथमा । चरमे, चरमा । द्वितये, द्वितया । द्वये, द्वयाः । उभयटशब्दस्य त्वयट्प्रत्ययरहितस्याऽखण्डस्य सर्वादिपाठादन्तरङ्गत्वेन नित्यमेव इश् । उभये । अर्धे, अर्धाः । कतिपये, कतिपया । परमनेमे, परमनेमाः । तत्संबन्धिविज्ञानादिह न—प्रियनेमा, अतिनेमाः । सर्वादेरिति किम् ? नेमा नाम केचित् । अत इति किम् ? नेमाः स्त्रियः ।

२१. द्वंद्वे ।

द्वंद्वे समासे वर्तमानस्याऽकारान्तस्य सर्वादेः संबन्धिनो जस इश् वा भवति । पूर्वाश्च उत्तराश्च ते पूर्वोत्तरे, पूर्वोत्तरा । वर्णाश्रमेतरे, वर्णाश्रमेतरा । कतरकतमे, कतरकतमा । परमकतरकतमे, परमकतरकतमा । तत्संबन्धिविज्ञानादिह न—प्रियकतरकतमा, वस्त्रान्तरवसनान्तरा[1] । 'द्वन्द्वे न सर्वादिः' [१/४/२८] इति वक्ष्यमाणसूत्रेण निषेधे प्राप्ते विकल्पार्थं वचनम् ।

२२. पूर्वादिभ्यो नवभ्य इश्स्मात्स्मिनः ।

सर्वाद्यन्तर्गतेभ्यो नवसख्यकेभ्यः पूर्वादिभ्यो यथास्थान ये इश्, स्मात्, स्मिन् आदेशा उक्तास्ते वा भवन्ति । पूर्वे, पूर्वाः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । परे, परा. । परस्मात्, परात् । परस्मिन्, परे । नवभ्य इति किम् ? ते, तस्मात्, तस्मिन् । पूर्वादिभ्य इति किम् ? सर्वे, सर्वस्मात्, सर्वस्मिन् । पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर—एते पूर्वादयो नव ।

२३. अवर्णस्यामः सुट् ।

अवर्णान्तस्य सर्वादेः सबन्धिन आमः सुडागमो भवति । सर्वेषाम्, विश्वेषाम्, परमसर्वेषाम्, परमविश्वेषाम् ।

---

१. वस्त्रमन्तरं येषां ते वस्त्रान्तरा । एव वसनान्तरा. । तेषां द्वद्व इति प्रत्युदाह्रियते ।

सन्निपातलक्षणस्याऽनित्यत्वात् एत्वम् । सर्वासाम्, अन्येषाम्, अन्यासाम्, पूर्वेषाम्, पूर्वासाम् । अवर्णस्येति किम् ? भवताम्, भवतीनाम् । सर्वादिरिति किम् ? द्वितयानाम्, द्वयानाम् । कथं **'व्यथां द्वयेषामपि मेदिनीभृताम्'** [शिशुपालवधमहाकाव्यम् १२/१३] इति माघोक्तम् ? उच्यते—द्वय द्वैधमिच्छन्ति गच्छन्तीति द्वयेषस्तेषां द्वयेषामिति इषेः क्विबन्तस्य भविष्यति । तत्सबन्धिविज्ञानादिह न—प्रियसर्वाणाम् ।

२४. द्वंद्वे न सर्वादिः ।

द्वन्द्वे समासे सर्वादिः सर्वादिसंज्ञा न भवति । पूर्वापराय, पूर्वापरात्, पूर्वापरे, पूर्वापराधराणाम् । कतरकतमकाः—अत्र सर्वादित्वनिषेधादकप्रत्ययाऽभावे कच्प्रत्यये सति स्वार्थिकप्रत्ययान्ताऽग्रहणाद् **'द्वन्द्वे'** [१/४/२१] इति जस इश् न भवति ।

२५. तृतीयान्तात् पूर्वावरौ योगे ।

तृतीयान्तात् परौ पूर्व, अवर—इत्येतौ शब्दौ योगे संबन्धे सति सर्वादिसंज्ञकौ न भवत । मासेन पूर्वाय—मासपूर्वाय । संवत्सरेणावराय—संवत्सरावराय । तृतीयान्तादिति किम् ? ग्रामात् पूर्वस्मै, पूर्वस्मै मासेन, अवरस्मै पक्षेण । पूर्वावराविति किम् ? मासेन परस्मै । योगे इति किम् ? यास्यति चैत्रो मासेन पूर्वस्मै दीयतां कम्बलः ।

२६. ङिति तीयस्य वा ।

तीयप्रत्ययान्तस्य ङिति परे सर्वादिसंज्ञा वा भवति । द्वितीयस्मै, द्वितीयाय । द्वितीयस्यै, द्वितीयायै । द्वितीयस्मात्, द्वितीयात् । द्वितीयस्याः, द्वितीयायाः । द्वितीयस्याः, द्वितीयायाः । द्वितीयस्मिन्, द्वितीये । द्वितीयस्याम्, द्वितीयायाम् । एवं तृतीयस्मै, तृतीयाय इत्यादि । ङितीति किम् ? तत्रैव सर्वादित्वं यथा स्यात् नान्यत्र, तेनाक् न भवति । तथा च कप्रत्यये सति स्वार्थिकप्रत्ययान्ताऽग्रहणात् स्मैप्रभृतयो न भवन्ति । द्वितीयकाय, तृतीयकाय, द्वितीयकायै, तृतीयकायै इत्यादि । **अर्थवद्ग्रहणे नानर्थकस्य ग्रहणमिति** न्यायान्नेह—पटुजातीयाय । मुखतो भवः—मुखतीयः । **गहादित्वात्** ईय । मुखतीयाय । एवं पार्श्वतीयाय ।

२७. हसेपः सेर्लोप ।

ई ईप. इति पदच्छेद. । हसान्तादीरूपादीबन्ताच्च परस्य सेर्लोपो भवति । लिट्, लिड्, राजा, पर्णध्वत्, नदी, कुमारी, गौरी, बहुश्रेयसी, खरकुटी । ईरूपादिति किम् ? निष्कौशाम्बिः । हसेप इति किम् ? वीरः, देवः, वृक्षः, लक्ष्मीः, तन्त्रीः, ग्रामणीः ।

अवीलक्ष्मीतरीतन्त्री-श्रीह्रीधीनामुणादितः ।
अपि स्त्रीलिङ्गवृत्तीनां, सिलोपो न कदाचन ॥

२८. आपः ।

आ आप इति पदच्छेद । आरूपादाबन्तात् परस्य सेर्लोपो भवति । रमा, बाला, खट्वा, बहुराजा । आप इति किम् ? कीलालपाः, सोमपाः । आरूपादिति किम् ? बहुखट्वः । बहुप्रत्ययपूर्वत्वादिह तु भवति—बहुखट्वा । योगविभाग उत्तरार्थः ।

२९. ङितां यैयास्यास्यामः ।

आप इत्यनुवर्तते । आरूपादाबन्तात् परेषां स्यादेर्ङितां—ङेङसिङस्ङीनां स्थाने यथासंख्यं यै, यास्, यास्, याम्—इत्येते आदेशा भवन्ति । खट्वायै, खट्वायाः, खट्वायाः, खट्वायाम् । बहुराजायै, बहुराजायाः, बहुराजायाः, बहुराजायाम् । आबन्तादिति किम् ? कीलालपे, कीलालपः । आरूपादिति किम् ? बहुखट्वाय पुरुषाय । बहुप्रत्ययपूर्वत्वादिह तु भवति—बहुखट्वायै[1] विष्टराय इत्यादि ।

---

१ ईषदपरिसमाप्ता खट्वा बहुखट्वा, तस्मै बहुखट्वायै इति ।

३०. सर्वादेः स्यात् सुडापोऽश्च ।

सर्वादिसंबन्धिन आरूपादाबन्तात् परस्य ङितां यै, यास्, यास्, याम्—इत्येतेषां यकारस्य सुडागमो भवति, तत्संनियोगे आपोऽकारादेशश्च । सर्वस्यै, सर्वस्याः, सर्वस्याः, सर्वस्याम् । परमसर्वस्यै, परमसर्वस्याः, परमसर्वस्याः, परमसर्वस्याम् । अस्यै, अस्याः, अस्याः, अस्याम् । तीयप्रत्ययान्तानां ङिति सर्वादित्वविकल्पनाद्—द्वितीयस्यै, द्वितीयायै, द्वितीयस्याः, द्वितीयायाः, द्वितीयस्याः, द्वितीयायाः, द्वितीयस्याम्, द्वितीयायाम् । सर्वादेरिति किम् ? प्रियसर्वायै, अतिसर्वायै । यस्येति किम् ? सर्वाभिः । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा दिक् । दक्षिणपूर्वायै, दक्षिणपूर्वायाः दक्षिणपूर्वायाः, दक्षिणपूर्वायाम् । एषु बहुव्रीह्यादेरन्यपदार्थादिप्रधानत्वात् सर्वादित्वाऽभावः । कथं दक्षिणपूर्वस्यै, दक्षिणपूर्वस्याः, दक्षिणपूर्वस्याः, दक्षिणपूर्वस्याम् ? उच्यते—दक्षिणा चासौ पूर्वा चेति कर्मधारये भविष्यति । अथ बहुव्रीह्यादे सर्वादित्वाऽभावे कथं त्वकत्पितृकः, मकत्पितृकः, द्वकिपुत्रः, ककिसब्रह्मचारी—इत्यादावक् प्रत्ययः ? उच्यते—अन्तरङ्गत्वात् पूर्वमेवाक् भविष्यति ।

३१. एर्धिटौस्सु ।

आरूपस्य आबन्तस्य एकारोऽन्तादेशो भवति धि, टा, ओस्—इत्येतेषु परेषु । हे रमे, हे बाले, हे खट्वे, हे बहुराजे । रमया, गङ्गया, बहुराजया । रमयोः, गङ्गयोः, बहुराजयोः । आप इति किम् ? हे कीलालपाः । आरूपस्येति किम् ? बहुखट्वेन । बहुप्रत्ययपूर्वत्वादिह तु भवति —बहुखट्वया ।

३२ औरिः ।

आरूपादाबन्तात् पर औ इर्भवति । माले तिष्ठतः, माले पश्य । एव बहुराजे, बहुराजे नगर्यौ, कारीषगन्ध्ये कन्ये । आप इति किम् ? कीलालपौ पुरुषौ । आरूपादिति किम् ? बहुखट्वौ पुरुषौ । इह तु भवति—बहुखट्वे मञ्चकौ ।

३३. स्त्रीदुद्भ्यां ङितां दैदास्दास्दामो वा ।

स्त्रीलिङ्गाभ्यामिदुद्भ्यां परेषां तत्सबन्धिनामन्यसंबन्धिनां वा स्यादेर्ङितां स्थाने यथासंख्यं दै, दास्, दास्, दाम्—इत्येते आदेशा वा भवन्ति । दकारो '**ङित्यदिति**' [१/४/४४] इति विशेषणार्थः । बुद्ध्यै, बुद्धये । बुद्ध्याः, बुद्धेः । बुद्ध्याः, बुद्धेः । बुद्ध्याम्, बुद्धौ । धेन्वै, धेनवे । धेन्वाः, धेनोः । धेन्वाः, धेनोः । धेन्वाम्, धेनौ । एवं मुष्ट्यै, मुष्टये । इष्वै, इषवे । शुच्यै, शुचये । पट्वै, पटवे । पत्यै, पत्ये । स्त्रियै । कन्या पतिर्यस्य यस्या वा कन्यापत्यै, कन्यापतये । एव प्रियबुद्ध्यै, प्रियबुद्धये, प्रियधेन्वै, प्रियधेनवे, प्रियाशन्यै, प्रियाशनये, अतिशकट्यै, अतिशकटये स्त्रियै पुरुषाय वा । एषु समासार्थस्य पुरुषत्वेऽपि पत्यादिशब्दाना स्त्रीत्वमस्ति । अन्ये तु पुरुषस्य समासार्थत्वे सति नेच्छन्ति । तन्मते प्रियबुद्धये पुरुषाय इत्येव भवति । अन्यस्तु पुरुषस्यैव समासार्थत्वे सतीच्छति न तु स्त्रियाः । तन्मते प्रियबुद्ध्यै पुरुषाय इत्येव भवति । स्त्रीग्रहणं किम् ? मुनये[1], साधवे । इदुद्भ्यामिति किम् ? गवे, नावे । ङितामिति किम् ? बुद्धयः, धेनवः ।

३४. नित्यस्त्रीदूतः ।

अग्रे विकल्पविधानान्नित्योऽयं विधिः । नित्यस्त्रीलिङ्गादीकारान्तादूकारान्ताच्च शब्दात् परेषां तत्संबन्धिनामन्यसंबन्धिनां वा स्यादेर्ङितां स्थाने यथासंख्य दै, दास्, दास्, दाम्—इत्येते आदेशा भवन्ति । नद्यै, नद्याः, नद्याः, नद्याम् । लक्ष्म्यै, लक्ष्म्याः, लक्ष्म्याः, लक्ष्म्याम् । वध्वै, वध्वाः, वध्वाः, वध्वाम् । ब्रह्मबन्ध्वै, ब्रह्मबन्ध्वाः, ब्रह्मबन्ध्वाः, ब्रह्मबन्ध्वाम् । अतिलक्ष्म्यै, अतिवध्वै स्त्रियै पुरुषाय वा । खरकुटीव—खरकुटी, तस्मै खरकुट्यै ब्राह्मण्यै ब्राह्मणाय वा । नित्यस्त्रीग्रहणं किम् ? ग्रामण्ये, खलप्वे स्त्रियै । ईदूत इति किम् ? मात्रे, दुहित्रे । ङितामिति किम् ? लक्ष्म्यः, वध्वः ।

३५. वेयुवोऽस्त्रियाः ।

नित्यस्त्रीलिङ्गाभ्यामियुवस्थानिभ्यामीदूदन्ताभ्यां परेषां तत्संबन्धिनामन्यसंबन्धिनां वा स्यादेर्ङितां स्थाने यथा-

---

1. अत्र पुंस्त्रीत्वेपि पुंस्त्वमेव विवक्षितम् ।

संख्यं दै, दास्, दास्, दाम्—इत्येते आदेशा वा भवन्ति, अस्त्रिया—स्त्रीशब्दं वर्जयित्वा। श्रियै, श्रिये। श्रियाः, श्रियः। श्रियाः, श्रियः। श्रियाम्, श्रियि। भ्रुवै, भ्रुवे। भ्रुवाः, भ्रुवः। भ्रुवाः, भ्रुवः। भ्रुवाम्, भ्रुवि। श्रियमतिक्रान्ताय—अतिश्रियै, अतिश्रिये ब्राह्मणाय ब्राह्मण्यै वा। एवमतिभ्रुवै, अतिभ्रुवे। पृथुः श्रीर्यस्य तस्मै पृथुश्रियै, पृथुश्रिये पुरुषाय स्त्रियै वा। एव पृथुभ्रुवै, पृथुभ्रुवे। केचित्तु समासार्थस्य स्त्रीत्व एवेच्छन्ति, न पुंस्त्वे। तन्मते अतिश्रियै, अतिश्रिये स्त्रियै इत्यत्र भवति। इह न भवति—अतिश्रिये, अतिभ्रुवे पुरुषाय। पूर्वेण नित्यमपि न भवति। कश्चित्तु पूर्वमतविपर्ययमेवेच्छति। अतिश्रियै, अतिश्रिये पुरुषाय। इह न भवति—अतिश्रिये स्त्रियै। इयुव इति किम्? आध्यै[1], प्रध्यै, वर्षाभ्वै, पुनर्भ्वै। पूर्वेण नित्यमेव। नित्यस्त्रीग्रहणान्नेह—यवक्रिये, कटप्रुवे स्त्रियै। अस्त्रिया इति किम्? स्त्रियै, स्त्रियाः, स्त्रियाः, स्त्रियाम्। पूर्वेण नित्यमेव। अस्त्रिया इति निर्देशात् परादपि इयुवृयन्वादिकार्यात् प्रागेव नित्यस्त्रीदूदाश्रितं कार्यं भवति, तेन स्त्रियै, स्त्रीणाम्, भ्रुवै, भ्रुवे, भ्रूणाम्, भ्रुवाम्, आध्यै इत्यादि सिद्धम्।

३६. नुडामः।

नित्यस्त्रीलिङ्गाभ्यामियुवस्थानिभ्यामीदूदन्ताभ्यां परस्य तत्सबन्धिनोऽन्यसबन्धिनो वा आमो नुट् वा भवति स्त्रीशब्दं वर्जयित्वा। श्रीणाम्, श्रियाम्। भ्रूणाम्, भ्रुवाम्। अतिश्रीणाम्, अतिश्रियाम्, पृथुभ्रूणाम्, पृथुभ्रुवाम् स्त्रीणा पुरुषाणा वा। शोभना धीरेषा सुधीनाम्, सुधियाम्। अस्त्रिया इति किम्? स्त्रीणाम्, परमस्त्रीणाम्। उत्तरेण नित्यमेव। नपुंसकेऽपि ह्रस्वत्वेन भाव्यमित्युत्तरेण नित्यमेव। अतिश्रीणाम्, पृथुभ्रूणाम् वा कुलानाम्।

३७. ह्रस्वापश्च।

चकारो नित्यस्त्रीदूत इत्याकर्षणार्थः। ह्रस्वान्तादाबन्तान्नित्यस्त्रीलिङ्गादीदन्तादूदन्ताच्च परस्यामो नुट् भवति। ह्रस्व—वीराणाम्, देवानाम्, श्रमणानाम्, वनानाम्, धनानाम्, मुनीनाम्, साधूनाम्, बुद्धीनाम्, धेनूनाम्, पितॄणाम्, मातॄणाम्। आप्—खट्वानाम्, रमाणाम्, बहुराजानाम्। नित्यस्त्रीदूत—नदीनाम्, लक्ष्मीणाम्, गौरीणाम्, बहुश्रेयसीनाम्, वधूनाम्, स्त्रीणाम्। स्त्रीशब्दवर्जितयोरियुवादेशसबन्धिनोर्नित्यस्त्रीदूतो पूर्वेण विकल्प एव—श्रीणाम्, श्रियाम्। भ्रूणाम्, भ्रुवाम्। ह्रस्वापश्चेति किम्? सोमपाम्। नित्यस्त्रीग्रहणं किम्? ग्रामण्याम्, खलप्वाम्। स्त्रीति किम्? वातप्रम्याम्[2]।

३८. संख्यायार्ष्णः।

रेफान्तषकारान्तनकारान्तसंख्याया संबन्धिन आमो नुट् भवति। चतुर्णाम्। षण्णाम्। पञ्चानाम्, सप्तानाम्। परमचतुर्णाम्। परमषण्णाम्। परमपञ्चानाम्, अष्टानाम्, परमाष्टानाम्[3]। तत्सबन्धिविज्ञानादिह न—प्रियचतुराम्, प्रियषषाम्, प्रियपञ्चन्नाम्। संख्याया इति किम्? गिराम्, विप्रुषाम्, दण्डिनाम्। र्ष्णं इति किम्? त्रिंशताम्, पञ्चाशताम्।

३९. ह्रस्वस्य गुणो धिना।

ह्रस्वान्तस्य धिना सह गुणो भवति। हे मुने, हे साधो, हे पितः। हे बुद्धे, हे धेनो, हे मातः। नपुंसके तु परत्वात् पूर्वं सेर्लुकि धेरभावान्न गुणः। हे वारि, हे त्रपु, हे कर्तृ। 'नामिनो लोपः' [२/१/३] इत्यनेन यत्र सेर्लोपः तत्र तु स्थानिवद्भावाद् भवत्येव—हे वारे, हे त्रपो हे कर्तः। ह्रस्वस्येति किम्? हे श्रीः, हे भ्रूः। हे नदि, हे वधु—इत्यत्र तु ह्रस्वविधानसामर्थ्याद्धेरभावाच्च न भवति। धिनेति किम्? मुनिः, साधुः, पिता।

---

१. आध्यायति, प्रध्यायति, आदधाति, प्रदधाति इत्येवंशीलाया बुद्धेर्वाचकौ वर्षाभूवत् नित्यस्त्रीलिङ्गौ आधीप्रधीशब्दौ। क्रियाशब्दत्वेन सर्वलिङ्गत्वात् ग्रामण्यादिशब्दवन्नित्यस्त्रीविषयौ नेति केचित्।

२. वातं प्रमिमीते—'वातात् प्रमः कित्' [उ० ३/२१२] इति सूत्रेण ई प्रत्ययः।

३. अत्र परत्वात् पूर्वमनेन नुटि ततो 'वाष्टन आः स्यादौ' [१/४/६] इति विकल्पेनात्वम्। आत्वाभावपक्षेऽपि 'नोपधाया नुटि…' [१/४/६३] इति दीर्घे रूपसाम्यमेव।

४०. नित्यदिद्द्विस्वराऽम्बार्थानां ह्रस्वः ।

द्विस्वर-आ-अम्बार्थानामिति विश्लेष । नित्यं दिद् दैदास्दास्दाम्लक्षण आदेशो येभ्यस्तेषामाबन्ताना द्विस्वराम्बार्थानां च धिना सह ह्रस्वो भवति । नित्यदित्—हे स्त्रि, हे गौरि, हे कुमारि, हे लक्ष्मि हे तन्त्रि । हे ब्रह्मबन्धु, हे करभोरु, हे श्वश्रु, हे वधु । हे अतिलक्ष्मि, हे प्रियवधु । द्विस्वराम्बार्थ—हे अम्ब, हे अक्क, हे अल्ल, हे अत्त, हे अनम्ब, हे प्रियाम्ब । नित्यदिदिति किम् ? हे वातप्रमी', हे हूहू., हे ग्रामणी , हे खलपू. । नित्यग्रहणादिह न—हे श्री , हे ह्री , हे भ्रू । कथ हे सुभ्रु, हे भीरु ? स्त्रीपर्यायत्वादूङि कृते भविष्यति । अम्बार्थाना द्विस्वरविशेषण किम् ? हे अम्बाडे, हे अम्बाले, हे अम्बिके । आ इति विश्लेष. किम् ? हे मात । धिनेति किम् ? गौरी, कुमारी, अम्बा ।

४१. इवुतोऽस्त्रेरौरीवूत् ।

इदुद्भ्यां पर **औयथाक्रममीदूतौ** भवतः अस्त्रेः—**स्त्रिशब्द** वर्जयित्वा । मुनी तिष्ठतः, मुनी पश्य । साधू तिष्ठत , साधू पश्य । इदुत इति किम् ? वृक्षौ, नद्यौ । औ इति किम् ? मुनि', साधु. । सख्यौ, पत्यौ—इत्यत्र तु विधानसामर्थ्यान्न[1] भवति । अस्त्रेरिति किम् ? अतिस्त्रियौ पुरुषौ । कथ शस्त्रीमतिक्रान्तावतिशस्त्री पुरुषौ ? **अर्थवद्ग्रहणे नानर्थकस्य** इति प्रतिषेधाऽभावात् । इदमेव चाऽस्त्रिग्रहण ज्ञापक 'परेणापीयादेशेन इत्कार्य न बाध्यते' इति, तेनातिस्त्रयः, सहस्त्रयस्तिष्ठन्ति, अतिस्त्रये, अतिस्त्रे., अतिस्त्रीणाम्, अतिस्त्रौ निधेहीत्यादि सिद्धम् ।

४२. टा नाः पुंसि ।

इदुद्भ्या परष्टा ना भवति पुलिङ्गविषये । मुनिना, साधुना, अतिस्त्रिणा । अमुना—अत्र **'प्रागिनात्'** [२/१/८२] इति वचनात् पूर्वमुत्व पश्चान्नाभाव । पुंसीति किम् ? बुद्ध्या, धेन्वा । कथममुना कुलेन ? **'नामिनः स्वरेऽनामि'** [२/१/१०] इति भविष्यति ।

४३. एदोज्जसि ।

इदुतोर्यथासंख्यमेकारौकारौ भवत जसि परे । हरय , मुनय । साधव , भानव । बुद्धय., धेनव , अतिस्त्रय । जसीति किम् ? मुनि., साधु. ।

४४. ङित्यऽदिति ।

इदुतोर्यथासख्यमेकारौकारौ भवतः अदिति ङिति परे । मुनये, साधवे, अतिस्त्रये । मुने., साधो , अतिस्त्रे. । मुने', साधो', अतिस्त्रे । बुद्धये, धेनवे । बुद्धे., धेनो. । बुद्धे', धेनो । ङितीति किम् ? मुनि , साधु' । अदितीति किम् ? बुद्ध्यै, धेन्वै । बुद्ध्या., धेन्वा. । बुद्ध्याः, धेन्वा. । बुद्ध्याम्, धेन्वाम् ।

४५. ङेर्डौः ।

इदुद्भ्यां परस्य ङि इत्येतस्य स्थाने डौर्भवति । डित्त्वाट्टिलोपः । हरौ, भानौ, मुनौ, साधौ । बुद्धौ, धेनौ, अतिस्त्रौ, विंशतौ ।

४६. निय आम् ।

नीशब्दात् परस्य ङि इत्येतस्य स्थाने आम् इत्यादेशो भवति । नियाम्, सेनान्याम्, ग्रामण्याम् ।

४७. केवलसखिपतेरौः ।

इदन्ताभ्यां केवलसखिपतिभ्यां परस्य ङेरौर्भवति । सख्यौ, पत्यौ । पताविति कश्चित् । इदन्ताभ्यामिति किम् ?

---

१. अन्यथा ङेः स्थाने ईकारमेव विदध्यात् ।

सखायमिच्छतीति सखीयति, क्विपि यलोपे च सखीः। ततो ङौ सख्यि, पत्यि। केवलग्रहणं किम्? प्रियसखौ, नरपतौ। पूजितः सखा—सुसखा, तस्मिन् सुसखौ। एवमतिसखौ। ईषदूनः सखा—बहुसखा, तस्मिन् बहुसखौ। बहुपतौ। अत्र पूर्वेण डौरेव। केचिद् बहुप्रत्ययपूर्वादपि पतिशब्दादौकारमेवेच्छन्ति। तन्मते बहुपत्यौ।

४८. न टा नाः।

इदन्ताभ्यां केवलसखिपतिभ्यां परष्टा ना न भवति। सख्या, पत्या। केवलग्रहणं किम्? प्रियसखिना, भूपतिना, बहुसखिना, बहुपतिना। केचिद् बहुप्रत्ययपूर्वादपि प्रतिषेधमिच्छन्ति। बहुसख्या, बहुपत्या।

४९. ङित्येत्।

इदन्तयोः केवलसखिपत्योर्ङिति परे एकारो न भवति। सख्ये, पत्ये। सख्युः, पत्युः। सख्युः, पत्युः। सख्यौ,[1] पत्यौ। ङितीति किम्? सखायः, पतयः। केवलग्रहणं किम्? प्रियसखये, नरपतये, प्रियसखेः, नरपतेः। बहुसखये, बहुपतये, बहुसखेः, बहुपतेः। केचिद् बहुप्रत्ययपूर्वादपि प्रतिषेधं पूर्वेण ङेरौत्वं चेच्छन्ति। बहुसख्ये, बहुसख्युः, बहुसख्यौ। बहुपत्ये, बहुपत्युः, बहुपत्यौ।

५०. खितिखीतीयाद् ङसिङसोरत उः।

खितिखीतीसम्बन्धिन इवर्णस्थानाद्यकारात् परयोर्ङसिङसोरकारस्य उकारादेशो भवति। खिति—सख्युः, सख्युः, पत्युः, पत्युः। खीती—सह खेन वर्तते इति सखः, तमिच्छति—सखीयति। ततो क्विपि यलोपे सखीः। ततो ङसिङसोः—सख्युः, सख्युः। एवं पततीति पतः, तमिच्छतीति पतीः। पत्युः, पत्युः। सुतमिच्छति—सुत्युः, सुत्युः। सुखमिच्छति, सातमिच्छति—सुख्युः, सात्युः। लूनं पूनं वेच्छति—लून्युः, पून्युः। 'क्तादेशः' [२/१/६२] इति नत्वस्याऽसिद्धत्वात् तीरूपत्वम्। यादिति किम्? यत्र यत्वादेशस्तत्र यथा स्यात्। इह मा भूत—अतिसखेः, अतिपतेः। अत इति किम्? सख्याः, पत्याः। अत्र स्त्रियां ङसिङसोर्दासादेशेन अत्वाऽभावः।

५१. ऋतो डुः।

ऋकारान्तात् परयोर्ङसिङसोरकारस्य डु इत्यादेशो भवति। डित्वाट्टिलोपः। क्रोष्टुः, क्रोष्टुः। मातुः, मातुः। पितुः, पितुः। ऋत इति किम्? ग्रः[2]।

५२. अर्ङौ।

ऋकारस्य अर् भवति ङौ परे। धातरि, कर्तरि, पितरि, भ्रातरि, मातरि। ऋत इति किम्? ग्रि।

५३. घुटि।

अधिकारोऽयमा पादपरिसमाप्तेः, तेन यत्र विशेषोपादानं नास्ति तत्राय प्रवर्तते। ऋकारस्य अर् भवति घुटि परे। पितरौ, पितरः, पितरम्, पितरौ। मातरौ, मातरः, मातरम्, मातरौ। अतिपितृणि कुलानि इत्यत्र तु परत्वात्पूर्वं नुम्, नुमि सति व्यवधानान्नार्। घुटीति किम्? पितॄन्, पित्रा।

५४. तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄणामार्।

तृच्तृन्प्रत्ययान्तस्य स्वस्रादीनां च आर् भवति घुटि परे। कर्तारौ, कर्तारः, कर्तारम्, कर्तारौ। विदितारौ, विदितारः, विदितारम्, विदितारौ। स्वसारौ, स्वसारः, स्वसारम्, स्वसारौ। नप्तारौ, नप्तारः, नप्तारम्, नप्तारौ।

---

१. केवलसखीति औत्वे कृतेऽपि आदेशस्य स्थानिवत्त्वात् स्यादित्वे सति 'ङित्यदिति' [१/४/४४] इति एत्वं प्राप्तं, तन्निषिद्धम्।
२. गृधातोरनुकरणे गृः, तस्य ङसि।

नेष्टारौ, नेष्टारः, नेष्टारम्, नेष्टारौ। त्वष्टारौ, त्वष्टारः, त्वष्टारम्, त्वष्टारौ। क्षत्तारौ, क्षत्तारः, क्षत्तारम्, क्षत्तारौ। होतारौ, होतारः, होतारम्, होतारौ। पोतारौ, पोतारः, पोतारम्, पोतारौ। प्रशास्तारौ, प्रशास्तारः, प्रशास्तारम्, प्रशास्तारौ। अतिकर्तारौ, अतिकर्तारः, अतिकर्तारम्, अतिकर्तारौ। थुटीति किम्? कर्तृ कुलं पश्य। सौ तु परत्वात् डा एव। कर्ता, स्वसा इत्यादि। तृशब्दस्यार्थवतो ग्रहणेन प्रत्ययग्रहणात् नप्त्रादीनामव्युत्पन्नानां संज्ञाशब्दानां तृशब्दस्य ग्रहणं न भवतीति तेषां पृथगुपादानम्। इदमेव च ज्ञापकं **अर्थवद्ग्रहणे नानर्थकस्य ग्रहणं** भवतीति। व्युत्पत्तिपक्षे तु तृग्रहणेनैव सिद्धे नप्त्रादिग्रहणं नियमार्थम्, तेन अन्येषामौणादिकानामार् न भवति। पितरौ, मातरौ, भ्रातरौ। केचित्तु प्रस्तोतृ, उन्नेतृ, उद्गातृ, प्रतिहर्तृ, प्रतिस्थातृ—इत्येतेषामप्यौणादिकानामारं मन्यन्ते। प्रस्तोतारौ, प्रस्तोतारः, प्रस्तोतारम्, प्रस्तोतारौ।

५५. संख्यासायविभ्योऽह्नस्याऽहन् ङौ वा।

संख्यावाचिभ्यः सायशब्दाद् विशब्दाच्च परस्य अह्नस्य अहन् इत्यादेशो वा भवति ङौ परे। द्वयोरह्नोर्भवः—द्व्यह्नस्तस्मिन्[1] द्व्यह्नि, द्व्यहनि, द्व्यह्ने। एवं त्र्यह्नि, त्र्यहनि, त्र्यह्ने। यावदह्नि, यावदहनि, यावदह्ने। तावदह्नि, तावदहनि, तावदह्ने। सायमह्नः—सायाह्नस्तस्मिन् सायाह्नि, सायाहनि, सायाह्ने। अत एव सूत्रनिर्देशात् सायंशब्दस्य मकारलोपः। सायेत्यकारान्तो वा। विगतमहः—व्यह्नस्तस्मिन् व्यह्नि, व्यहनि, व्यह्ने। संख्यासायविभ्य इति किम्? मध्याह्ने। अह्नस्येति किम्? द्वयोरह्नोः समाहारो द्व्यहस्तस्मिन् द्व्यहे। ङाविति किम्? द्व्यह्नः।

५६. मातुरङ्धौ पुत्रे श्लाघ्ये।

श्लाघ्यपुत्रविषये सति मातृशब्दस्य अकारोऽन्तादेशो भवति धौ परे। मातृद्वारा यस्य पुत्रस्य श्लाघा भवेत् स श्लाघ्यपुत्रः। गार्गी माता यस्य तत्संबोधने—हे गार्गीमात। एव हे वात्मीमात। मातुरिति किम्? हे गार्ग्यपितृक। पुत्र इति किम्? हे मात, हे गार्गीमातृके पुत्रि। श्लाघ्य इति किम्? अरे गार्गीमातृक। धाविति किम्? गार्गीमातृकः।

५७. पुंसोः पुमन्सः।

पुंसु इत्येतस्योदितः थुटि परे पुमन्सादेशो भवति। अकार उच्चारणार्थः। पुमान्, पुमांसौ, पुमांसः, पुमांसम्, पुमांसौ। ईषदूनः पुमान्—बहुपुमान्। प्रियपुमान्, प्रियपुमांसि कुलानि, हे पुमन्। थुटीति किम्? पुंसः पश्य, बहुपुंसी कुले। पुंसोरुदित्त्वात् प्रियपुंसितरा, प्रियपुंस्तरा, प्रियपुंसीतरा—इत्यादौ ईब्[2] ह्रस्वपुंवद्विकल्पश्च[3] भवति।

५८. उवृवितो नुम्।

उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति थुटि परे। भवान्, भवन्तौ, भवन्तः, भवन्तम्, भवन्तौ। चक्रिवान्, विद्वान्, गोमान्। ऋदितः—गच्छन्, गच्छन्तौ, गच्छन्तः, गच्छन्तम्, गच्छन्तौ। कुर्वन्, अधीयन्, महान्, सुदन्। थुटीति किम्? भवता।

५९. अचः।

लुप्तनकारस्याऽञ्चतेर्नुमागमो भवति थुटि परे। प्राङ्, प्राञ्चौ, प्राञ्चः, प्राञ्चम्, प्राञ्चौ। अतिप्राङ्, प्राञ्चि कुलानि। थुटीति किम्? प्राचः पश्य।

---

१. द्वयोरह्नोर्भव इति विगृह्य **'भवे'** [७/१/३१] इत्यण्विषये **'अधिकं च तद्धितोत्तरपदसमाहारेषु'** [३/१/१२३] इति तत्पुरुषस्तस्य **'संख्यापूर्वो द्विगुश्च'** [३/१/१२४] इति द्विगुत्वात्रापि **'सर्वांशसंख्याऽव्ययात्'** [८/३/१०] इत्यादिना टः अह्नादेशश्च। ततो **'द्विगोरनपत्ये यस्वरादेर्लुगद्विः'** [६/२।२६] इत्यणो लुकि।

२. **ईब्नित्यं ह्रस्वपुंवत्त्वयोश्च विकल्पः।**

३. **'उवृवित्तसतरतमकल्पकल्प…'** [३।२।६४] इत्यादिना।

६०. युजोऽसमासे ।

युजन्र् योगे इत्यस्मादसमासे नुमागमो भवति थुटि परे । युङ्, युञ्जौ, युञ्जः, युञ्जम्, युञ्जौ । युञ्जि कुलानि । ईषदपरिसमाप्तो युङ्—बहुयुङ् । बहुयुञ्जौ, बहुयुञ्जः । असमासे इति किम् ? अश्वयुक्, अश्वयुजौ, अश्वयुजः । सुयुक्, सुयुजौ, सुयुजः । ऋन्निर्देश किम् ? युजङ्च् समाधावित्यस्य मा भूत् । युजमापन्ना मुनयः—समाधिं प्राप्ता इत्यर्थः । थुटीति किम् ? युजः पश्य, युजी कुले ।

६१. अवर्णादऽनः शतुर्वेपोः ।

ईश्च ईप् च तयोः ईपोः । नाप्रत्ययवर्जितादवर्णात् परस्य शतृप्रत्ययस्य नुम् वा भवति ईकारे ईपि च परे । तुदन्ती कुले, तुदती कुले । तुदन्ती स्त्री, तुदती स्त्री । एवं यान्ती, याती कुले स्त्री वा । अवर्णादिति किम् ? अदती, सुन्वती, रुन्धती कुले स्त्री वा । अन इति किम् ? क्रीणती कुले स्त्री वा । ददती स्त्री, ददती कुले—इत्यत्र तु कृतेऽपि नुमागमे 'श्नस्तो नो लोपः' [३/४/६६] इति नलोपः ।

६२. श्यश्यनः ।

नित्यार्थोऽयमारम्भः । श्यप्रत्ययाद् श्यन्प्रत्ययाच्च परस्य शतुर्नुम् भवति ईकारे ईपि च परे । पचन्ती कुले स्त्री वा । दीव्यन्ती कुले स्त्री वा । श्यश्यन इति किम् ? कुर्वती कुले स्त्री वा ।

६३. नोपधाया नुटि चाऽधौ दीर्घः ।

नान्तस्योपधाया दीर्घो भवति नुटि धिवर्जिते थुटि च परे । पञ्चानाम्, सप्तानाम्, दशानाम् । राजा, राजानौ, राजानः, राजानम्, राजानौ । सीमा, सीमानौ, सीमानः, सीमानम्, सीमानौ । सामानि, दामानि, लोमानि, वनानि, घनानि । नान्तस्येति किम् ? चतुर्णाम् । दृषद्, दृषदौ, दृषदः । अधाविति किम् ? हे राजन्, हे श्रीमन् । नुटि चेति किम् ? चर्मणा, चर्मणी ।

६४. न्स्महतः ।

न्सन्तस्य महच्छब्दस्य चोपधाया दीर्घो भवति धिवर्जिते थुटि परे । विद्वान्, विद्वांसौ, विद्वांसः, विद्वांसम्, विद्वांसौ । पयांसि, यशांसि । महान्, महान्तौ[1], महान्तः, महान्तम्, महान्तौ । महान्ति, अतिपुमांसि कुलानि, प्रियमहान् । महत्साहचर्यात् शुद्धधातोः क्विबन्तस्य न भवति[2] । सुहिंसौ, सुहिंसः । नामधातोस्तु भवत्येव । श्रेयस्यति, महत्यतीति क्विपि श्रेयान्, श्रेयांसौ, महान्, महान्तौ । थुटीति किम् ? श्रेयसः, महतः पश्य । अधाविति किम् ? हे विद्वन्, हे महन् ।

६५. अपः ।

अप्शब्दस्योपधाया दीर्घो भवति धिवर्जिते थुटि परे । आपः । शोभना आपो यस्मिन् स स्वाप् । स्वापौ, स्वापः । समासान्तप्रत्ययव्यवधानान्नेह—बह्वपा । थुटीति किम् ? अपः पश्य । अधाविति किम् ? हे स्वप् । योगविभाग उत्तरार्थः ।

६६. नुमि वा ।

नुमागमविषये धिवर्जिते थुटि परे अप्शब्दस्योपधाया दीर्घो वा भवति । स्वाम्पि[3], स्वम्पि । अत्याम्पि, अत्यम्पि । समासान्तविधेरनित्यत्वात् बह्वाम्पि, बह्वम्पि ।

---

१ महच्छब्दस्य नुमि कृते उपधाया स्वराऽभावात् दीर्घो न स्यात्, तेन परत्वाद् विधानसामर्थ्याद् वा नुमः प्रागेव दीर्घः ।

२ महदिति शुद्धो धातुः क्विबन्तो न संभवति, तत्साहचर्यादन्यस्यापि शुद्धधातोः क्विबन्तस्य न भवति । नामधातुस्तु महदपि क्विबन्तः संभवति । अतोऽन्यस्यापि नामधातोः क्विबन्तस्य भवति ।

३ नुमीति विषयसप्तमी, तेन नुम्विषय एव प्राग् दीर्घः पश्चान्नुम् । प्राग् नुमि कृते तु उपाधायां स्वराभावात् दीर्घो न स्यात् ।

६७. अत्वसोरभ्वादेः[1] सौ ।

भ्वादिवर्जितस्याऽत्वन्तस्याऽसन्तस्य चोपधाया दीर्घो भवति अधौ सौ परे। अतु—भवान्, कृतवान्, गोमान्, यवमान्, एतावान् । अस्—अप्सराः, अङ्गिराः, चन्द्रमाः, स्थूलशिराः, सुमनाः । अभ्वादेरिति किम् ? पिण्डं ग्रसते—पिण्डग्रः । चर्म वस्ते—चर्मवः । **अर्थवद्ग्रहणे नाऽनर्थकस्य** इत्येव सिद्धेऽभ्वादेरेव वचनं **अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति** इति न्यायज्ञापनार्थं, तेनाऽत्रापि भवति—खरणाः, खुरणाः । अधातोरित्यकृत्वा अभ्वादेरिति करणं गणस्थानामेव धातूनां वर्जनार्थं, तेनेह स्यात्—गोमन्तमिच्छति—गोमान् । नामधातोः क्विप् । अधाविति किम् ? हे भवन्, हे सुमनः । अतु इति उदित्करणादृदितो न भवति । पचन्, जरन् ।

६८. इन्हन्पूषन्नर्यम्णां शौ च ।

इन्, हन्, पूषन्, अर्यमन्—इत्येतेषामुपधाया दीर्घो भवति शौ चाऽधौ सौ परे । दण्डीनि, स्रग्वीणि, वाग्ग्मीनि कुलानि, भ्रूणहानि, बहुवृत्रहाणि, बहुपूषाणि, बह्वर्यमाणि । दण्डी, स्रग्वी, वाग्ग्मी, भ्रूणहा, वृत्रहा, पूषा, अर्यमा । **'नोपधाया नुटि चाधौ दीर्घः'** [१/४/६३] इत्यनेनैव सिद्धे नियमार्थं वचनम् । एषां शिस्योरेव दीर्घो नान्यत्र । दण्डिनौ, दण्डिनः, दण्डिनम् । वृत्रहणौ, वृत्रहणः, वृत्रहणम् । पूषणौ, पूषणः, पूषणम् । अर्यमणौ, अर्यमणः, अर्यमणम् । अधाविति किम् ? हे दण्डिन्, हे वृत्रहन्, हे पूषन्, हे अर्यमन् । **अर्थवद्ग्रहणे नानर्थकस्य** इति परिभाषया प्लीहानौ, प्लीहानः, प्लीहानमित्यत्र नियमो न भवति । वाग्ग्मिनौ, वाग्ग्मिनः—इत्यादौ तु **अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्तीति** परिभाषया नियमो भवत्येव ।

६९. अदेतोध्र्यमोर्लुप् ।

अकारान्तादेकारान्ताच्च परस्य धेस्तदादेशस्याऽमश्च लोपो भवति । हे श्रमण, हे वीर, हे देव । अम्—हे वन, हे धन, हे कुल, हे अतिहे, हे से । अदेत इति किम् ? हे गौः, हे नौः । धिसाहचर्याद् ध्यादेशस्यैवामो लोपो भवति, तेनेह न—कुलम्, वनम् तिष्ठति पश्य वा । ध्यादेशत्वेनैवाऽमोपि लोपे सिद्धे पृथग् वचनमन्यस्यादेशस्य लोपाऽभावार्थं, तेन हे कतरत् इत्यादौ लोपो न भवति ।

७०. एदोतो ङसिङसोरतः ।

एकारान्तादोकारान्ताच्च परस्य ङसिङसोरकारस्य लोपो भवति । मुनेः, मुनेः । साधोः, साधोः । गोः, गोः । द्योः, द्योः । परमश्चासाविश्च—परमेः, परमेः । नयतीति विच्—नेः, नेः । एवं लोः, लोः । एदोत इति किम् ? रायः, रायः । नावः, नावः । वचनभेदो यथासंख्यनिवृत्त्यर्थः ।

७१. समानादमः ।

अत इत्यनुवर्तते । समानात्परस्याऽमोऽकारस्य लोपो भवति । वीरम्, जिनम्, देवम् । गङ्गाम्, खट्वाम् । मुनिम्, हरिम् । साधुम्, भानुम् । बुद्धिम्, धेनुम्, नदीम्, वधूम् । पितरमित्यादिषु विशेषविधानात् प्रथममेवार् । समानादिति किम् ? रायम्, नावम् । अम इति किम् ? नद्यः । स्यादावित्यधिकारत्वान्नेह—अचिनवम् ।

७२. शसोऽता दीर्घः सश्च नः पुंसि ।

शसः संबन्धिनोऽकारेण सह समानस्य[2] दीर्घो भवति, तत्संनियोगे च पुंलिङ्गविषये शसः सकारस्य नकारादेशः

---

१. ननु अनिनस्मन् इत्यत्रातोरनिर्देशात् अनर्थकेन तदन्तविधेरप्रयोगे अर्थवद्ग्रहणन्यायात् कियान् इत्यत्रेव दीर्घः प्राप्नोति न गोमानित्यादौ । सत्यम्, अतुरनर्थकोऽपि तदन्तविधिं प्रयोजयति मत्वादीनामुकारानुबन्धकरणात् । अन्यथा तेषामपि शतृवत् ऋकारमेवानुबन्धं कुर्यात् ।

२. समानादिति पञ्चम्यन्तोऽपि दीर्घविधाननिर्देशात् षष्ठ्यन्तेन विपरिणतः समानस्येत्येवानुवर्तते ।

स्यात् । वीरान्, देवान्, मुनीन्, साधून्, वातप्रमीन्, पितॄन्, हूहून् । पुलिङ्गाऽभावे तु दीर्घ एव—गङ्गाः, बुद्धीः, नदीः, धेनूः, वधूः, मातॄः । चञ्चाः, खरकुटीः, यष्टीः, पुरुषान् पश्य—इत्यत्र तु चञ्चादयः शब्दाः पुरुषे वर्तमाना अपि स्त्रीलिङ्गत्वं न त्यजन्तीति नकारो न । यदा तु शब्दस्य पुंलिङ्गत्वं तदा स्त्रीत्वे नपुंसकत्वेऽपि नकारो भवत्येव—दारान् भ्रकुंसान् स्त्री पश्य । षण्ढान् पश्य । दीर्घसनियोगविधानान्नेह नकारः—एतान् गाः पश्य । समानस्येति किम् ? रायः, नावः पश्य । वनानि पश्य इत्यत्र तु परत्वाच्छिरेव ।

७३. नुटचऽतिसृचतस्रोः ।

तिसृचतसृशब्दौ वर्जयित्वा समानस्य दीर्घो भवति नुटि परे । वीराणाम्, श्रमणानाम्, देवानाम्, मुनीनाम्, साधूनाम्, बुद्धीनाम्, धेनूनाम्, वारीणाम्, त्रपूणाम्, पितॄणाम्, कर्तॄणाम् । अतिसृचतस्रोरिति किम् ? तिसृणाम्, चतसृणाम् ।

७४. नुर्वा ।

नृशब्दस्य दीर्घो वा भवति नुटि परे । नॄणाम्, नृणाम् । अतिनॄणाम्, अतिनृणाम् ।

७५. पथिन्मथिनृभुक्षामितोऽत् ।

पथिन्, मथिन्, ऋभुक्षिन्—इत्येतेषामिकारस्य अकारादेशो भवति घुटि परे । पन्थाः, पन्थानौ, पन्थानः, पन्थानम्, पन्थानौ । मन्थाः, मन्थानौ, मन्थानः, मन्थानम्, मन्थानौ । ऋभुक्षाः, ऋभुक्षाणौ, ऋभुक्षाणः, ऋभुक्षाणम्, ऋभुक्षाणौ । सुपन्थानि वनानि—**'स्वतिभ्यां पूजायामबहुव्रीहेः'** [८/३/४] इति समासान्तप्रतिषेधः । बहुमन्थानि कुलानि, अनृभुक्षाणि बलानि, सुपन्थानौ, परमपन्थानौ । नकारान्तनिर्देशादिकाराभावाच्चेह न भवति—पन्थानमिच्छति क्यचि क्विपि नलोपे च पथी । पथ्यौ, पथ्यः, पथ्यम्, पथ्यौ । घुटीति किम् ? सुपथी वने, पथिभ्याम् । सुमथी कुले, मथिभ्याम् ।

७६. थो नुट् ।

पथ्यादीनां थकारस्य नुडागमो भवति घुटि परे । पन्थाः, पन्थानौ, पन्थानः, पन्थानम्, पन्थानौ, सुपन्थानि वनानि इत्यादि । घुटीति किम् ? सुपथी, बहुपथी कुले, पथः पश्य ।

७७. आः सौ ।

पथ्यादीनामाकारोऽन्तादेशो भवति सौ परे । पन्थाः, मन्थाः, ऋभुक्षाः । हे पन्थाः, हे मन्थाः, हे ऋभुक्षाः । अपन्थाः, सुमन्थाः, बहुऋभुक्षाः । साविति किम् ? पन्थानौ । कथं हे सुपथिन्, हे सुपथि कुल, हे सुमथिन्, हे सुमथि कुल ? अत्र नित्यत्वान्नपुंसकलक्षणाया संलुकि सेरभावान्न भवति । **'नपुंसके वा'** [२/१/१२३] इति वा नकारलोपः । नान्तनिर्देशान्नेह—पन्थानमिच्छति क्यचि क्विपि नलोपे च पथीः । एवं मथी, ऋभुक्षी ।

७८. चतुर आम् ।

चतुर्शब्दस्य आमागमो भवति घुटि परे । चत्वारः, चत्वारि । प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः, प्रियचत्वारम्, प्रियचत्वारौ । घुटीति किम् ? चतुरः ।

७९. अनडुहः ।

अनडुह्शब्दस्य आमागमो भवति घुटि परे । योगविभाग उत्तरार्थः । अनड्वान्, अनड्वाहौ, अनड्वाहः, अनड्वाहम्, अनड्वाहौ । प्रियानड्वान्, स्वनड्वांहि । घुटीति किम् ? अनडुहः पश्य, प्रियानडुही कुले । केचित् स्त्रियां वेति मत्वा अनडुही, अनड्वाही इति रूपद्वयमाचक्षते । सूत्रकारमते तु गौरादिगणपाठाद् अनडुही, अनड्वाहीति शब्दद्वयं पृथगेव सिद्धम् ।

८०. सौ नुम् ।

अनडुह्शब्दस्य नुमागमो भवति सौ परे । अनड्वान्, प्रियानड्वान्, हे अनड्वन् । साविति किम् ? अनड्वाहौ ।

८१. उभयोर्वाऽम् ।

उभयोरिति चतुरनडुहोरमागमो भवति धौ परे। आमोऽपवादः। हे प्रियचत्वः, हे अनड्वन्। धाविति किम्? अनड्वान्।

८२. लोपो वोशनसो नश्च धौ ।

उशनस्शब्दस्य वा लोपो भवति वा नकारादेशश्च धौ परे। हे उशन, हे उशनन्, हे उशनः। धाविति किम्? उशना। अनुवर्तमानेऽपि धौ धुडऽधिकारभयात् पुनर्विधानम्।

८३. ओत औः ।

ओकारस्य औकारादेशो भवति धुटि परे। गौः, गावौ, गावः। द्यौः, द्यावौ, द्यावः। शोभनो गौः—सुगौः। एवमतिगौः, प्रियद्यावौ, अतिद्यावौ, हे गौः, किंगौः, अगौः, हे द्यौः। ओत इति किम्? चित्रा गौर्यस्य चित्रगुः। चित्रगू। धुटीति किम्? गवा, द्यवा।

८४. आ अम्शसोऽता ।

ओकारस्य अम्शसोऽकारेण सह आकारो भवति। गाम्, गाः। द्याम्, द्याः। सुगाम्, सुगाः। अतिद्याम्, अतिद्याः पश्य। स्यादिविषयत्वान्नेह—अचिनवम्।

८५. ऐः सख्युरितोऽशिधौ ।

इकारान्तस्य सखिशब्दस्य शिवर्जिते धिवर्जिते च धुटि परे ऐकारोऽन्तादेशो भवति। सखायौ, सखायः, सखायम्, सखायौ। हे सखायौ, हे सखायः। सुसखायौ, प्रियसखायौ। इत इति किम्? इमे सख्यौ। सखीयतीति क्वचि क्विपि सख्यौ। सख्यः। धुटीति किम्? सखीन्, सख्या। अशाविति किम्? अतिसखीनि, प्रियसखीनि। अधाविति किम्? हे सखे। इदमेवेद्ग्रहणं ज्ञापयति नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, एकदेशविकृतमनन्यवत् इति च।

८६. ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डाः ।

ऋदन्तात्, उशनस्, पुरुदंशस्, अनेहस्—इत्येतेभ्य इकारान्तात् सखिशब्दाच्च परस्य धिवर्जितस्य सेर्डा भवति। डित्त्वाट्टिलोपः। पिता, माता, भ्राता, कर्ता, अतिपिता। उशना, पुरुदंशा, अनेहा, सखा, अत्युशना, प्रियपुरुदशा, अत्यनेहा, किंसखा, सुसखा, प्रियसखा। सेरिति किम्? पितरौ, पितरः। उशनसौ, सखायौ। अधेरिति किम्? हे पितः, हे कर्तः। हे उशनः, हे पुरुदशः, हे अनेहः, हे सखे। सख्युरित इति किम्? इयं सखी। सखीयते क्विप्—सखी।

८७. क्रोष्टुस्तृज्वत्पुंस्यऽधौ ।

क्रोष्टुशब्दस्य तृच्प्रत्ययान्तवद्रूपं भवति धिवर्जिते धुटि परे पुंलिङ्गविषये। क्रोष्टा, क्रोष्टारौ, क्रोष्टारः, क्रोष्टारम्, क्रोष्टारौ। अतिक्रोष्टा, प्रियक्रोष्टा। बहुव्रीहौ असिद्धं बहिरङ्गमन्तरङ्गे इति ऋल्लक्षणः कप्प्रत्ययो न भवति। पुमीति किम्? कृशक्रोष्टूनि वनानि। धुटीति किम्? क्रोष्टून्। अधाविति किम्? हे क्रोष्टो। 'क्रोष्टोः क्रोष्टृ' इत्येव वक्तव्ये तृज्वत्करणं 'तृस्वसृ…' [१/४/५४] इत्यादिना आरर्थम्।

८८. टादौ स्वरे वा ।

टादौ स्वरादौ परे क्रोष्टुशब्दस्य तृज्वद्रूपं वा भवति पुंलिङ्गविषये। क्रोष्ट्रा, क्रोष्टुना। क्रोष्ट्रे, क्रोष्टवे। क्रोष्टुः, क्रोष्टोः। क्रोष्टुः, क्रोष्टोः। क्रोष्ट्रोः, क्रोष्ट्वोः। क्रोष्टरि, क्रोष्टौ। क्रोष्टूनामित्यत्र तु नित्यत्वात्पूर्वं नुडागमे स्वराभावान्न तृज्वद्भावः। कृताकृतप्रसङ्गी विधिर्नित्यः। टादाविति किम्? क्रोष्टून्। आमि शसि च तृज्वद्भावो वेति केचित्। क्रोष्ट्रणाम्, क्रोष्टूनाम्, क्रोष्टॄन्, क्रोष्टून्। स्वरे इति किम्? क्रोष्टुभ्याम्, क्रोष्टुभिः। पुंसीति किम्? कृशक्रोष्टुने वनाय।

८९. स्त्रियाम् ।

थुटीति न संबध्यते क्रोष्टुस्तृज्वत्पुस्त्रियोरधावित्येकयोगाऽकरणात् । स्त्रियां वर्तमानः क्रोष्टुशब्दस्तृज्वद् **भवति**। **निर्निमित्त** एवायं तृज्वद्भाव । क्रोष्ट्री—अत्र प्रागेव तृजादेशे ऋदन्तत्वादीप् । क्रोष्ट्र्यौ, क्रोष्ट्र्य , क्रोष्ट्रीम्, क्रोष्ट्र्या, क्रोष्ट्रीभ्याम्, हे क्रोष्ट्रि । पञ्चभि. क्रोष्ट्रीभि क्रीतमिति विग्रहे **'मूल्यैः क्रीते'** [७/२/१०५] इति इकण्, **'द्विगोः प्लुगद्विः'** [७/२/९६] इति प्रत्ययलुकि **'लुक् तद्धितलुक्यगोणीसूच्योः'** [२/३/११६] इति ईपो लुकि पञ्चक्रोष्टृभी रथैरिति सिद्धम् । अत्र निर्निमित्तस्य तृज्वद्भावस्य **निमित्ताभावे नैमित्तकस्याप्यभाव** इति ईब्निवृत्तावपि निवृत्तिर्न भवति ।

क्व पङ्गूनां शक्तिः क्व च गुरुगुहत्वं गिरिगुरोः,
क्व सूत्राणां सौक्ष्म्यं क्व च मम मतिः स्वल्पविभवा ।
तथापि श्रीकालोश्चरणकमलानां स्तुतिवशात्,
समालोकेऽध्यायं प्रथममिति पूर्णं कविरघुः ।।

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः

प्रथमश्चरणः

१. नपुंसकस्य स्यमोर्लुक् ।

नपुंसकलिङ्गसबन्धिनोः स्यमोर्लुग् भवति । दधि तिष्ठति, दधि पश्य । मधु, कर्तृ, पयः, उदश्वित् तिष्ठति पश्य वा । नपंसकस्येति किम् ? हरिः, भानुः । बुद्धिः, धेनुः । हरिम्, भानुम् । बुद्धिम्, धेनुम् । लोपमकृत्वा लुक्करणं स्यमोः स्थानिवद्भावेन यत् कार्यं प्राप्तं तस्य निषेधार्थं, तेन यद्, तद्, एतद्—इत्यत्र त्यदाद्यत्वं न भवति ।

२. जरसो वा ।

जरस् इत्यन्तस्य नपुसकस्य संबन्धिनो स्यमोर्लुग् वा भवति । अजरः, अजरसं कुलं तिष्ठति पश्य वा । अन्ये तु द्वितीयैकवचनस्यैवामो योऽमादेशस्तस्यैव लुग्विकल्पमिच्छन्ति । तन्मते अजरसं कुलं तिष्ठति इत्येकमेव रूपं भवति । केचिज्जरस स्यमोर्लुक नेच्छन्ति । तन्मते अजरस कुल तिष्ठति पश्य वा । केचिद् सिविभक्तौ अतोऽमित्यमादेशे कृते सन्निपात-परिभाषा समाश्रित्य जरसादेशं नेच्छन्ति । तन्मते अजरं कुलं तिष्ठति इत्येकमेव रूपं भवति ।

३. नामिनो लोपः ।

वेत्यनुवर्तते । नाम्यन्तस्य नपुंसकस्य संबन्धिनोः स्यमोर्लोपो वा भवति । लुकैव सिद्धे लोपवचनं स्थानिवद्-भावार्थम् । हे वारे, हे त्रपो, हे कर्तः । अत्र स्थानिवद्भावात् **'ह्रस्वस्य गुणो घिना'** [१/४/३९] इति गुणो भवति । प्रियास्तिस्रो यस्य तत् प्रियतिसृ कुल तिष्ठति पश्य वा । अत्र स्थानिवद्भावात् तिस्रादेशः । पक्षे लुक्—हे वारि, हे त्रपु, हे कर्तृ, हे प्रियत्रि । नामिन इति किम् ? यद्, तद्, प्रियचतुष्कुलम् । चतुःशब्दस्यापि लोपविकल्पमिच्छन्त्यन्ये । प्रियचतसृ प्रियचतुष्वा कुलम् ।

४. अतोऽम् ।

अकारान्तस्य नपुसकस्य संबन्धिनो स्यमोरमित्यादेशो भवति । कुण्डं तिष्ठति पश्य वा । कीलालपम्, ज्ञानम्, वनम्, धनम् । **'समानादमः'** [१/४/७१] इत्यकारलोपः । हे कुण्ड—अत्रामादेशे **'अवेतोध्यमोर्लोपः'** [१/४/६९] इत्यमो लोपः । नपुसकस्येति किम् ? प्रियकुण्ड पुमान् । अमोऽम्विधानं लुग्बाधनार्थम् । अमोऽकारोच्चारण जरस् इत्यादेशार्थं, तेन अतिजरस कुलं तिष्ठतीति सिद्धम् ।

५. दुशन्यादेरनेकतरस्य पञ्चकस्य ।

नपुंसकानामन्यादीनां सर्वाद्यन्तर्गतानां पञ्चपरिमाणानां संबन्धिनोः स्यमोः स्थाने दुश् इत्यादेशो भवति एकतर-शब्दं वर्जयित्वा । शकारः सर्वादेशार्थः । उकार उच्चारणार्थः । अन्यत्तिष्ठति । अन्यत् पश्य । एवमन्यतरत्, इतरत्, कतरत्, कतमत्, हे अन्यत्, हे अन्यतरत् । अनेकतरस्येति किम् ? एकतर तिष्ठति पश्य वा । पञ्चकस्येति किम् ? नेमं तिष्ठति पश्य वा । नपुसकस्येति किम् ? अन्यः पुरुषः, अन्या स्त्री । अन्याद्यसंबन्धत्वान्नेह—प्रियान्यं कुलम् । इह तु स्यादेव—परमान्यत् तिष्ठति पश्य वा ।

६. ईरौः ।

नपुंसकस्य संबन्धी औः ईर्भवति । कुण्डे तिष्ठतः । कुण्डे पश्य । एवं दधिनी, मधुनी, कर्तृणी, पयसी ।

अतत्संबन्धत्वान्नेह—प्रियकुण्डौ पुरुषौ । इह तु भवति—परमकुण्डे ।

७. जस्शसोः शिः ।

नपुंसकलिङ्गसंबन्धिनो जस्शसोः शिर्भवति । शकारः सर्वादिशार्थः । कुलानि तिष्ठन्ति पश्य वा । एवं कुण्डानि, ज्ञानानि, दधीनि, मधूनि, कर्तृणि, पयांसि, यशांसि । स्याद्यधिकारान्नेह—कुण्डशो ददाति । अतत्संबन्धत्वान्नेह—प्रियकुण्डाः पुरुषाः । प्रियकुण्डान् पुरुषान् ।

८. नुम्हझसातः शौ ।

हकारान्तस्य झसान्तस्य अकारान्तस्य च नपुंसकस्य नुमागमो भवति शौ परे । स्वनड्वांहि । यशांसि, पयांसि । कुलानि, ज्ञानानि तिष्ठन्ति पश्य वा । हझसात इति किम् ? चत्वारि, अहानि । शाविति किम् ? यशसा ।

९. रलाभ्यां झसस्य वाऽन्त्यात् प्राक् ।

रेफलकाराभ्यां परस्य झसान्तस्य नपुंसकस्य नुम् वा भवति शौ परे, स चाऽन्त्यात् प्रागेव । बर्हूञ्जि, बर्हूर्जि । सूर्ञ्जि, सूर्जि । सुवल्ङ्गि, सुवल्गि । रलाभ्यामिति किम् ? काष्ठतङ्क्षि । पूर्वेण नित्यमेव । झसस्येति किम् ? सुफुल्लि वनानि । शाविति किम् ? बहूर्जा कुलेन ।

१०. नामिनः स्वरेऽनामि ।

नाम्यन्तस्य नपुंसकस्य संबन्धिन्यामवर्जिते स्वरे परे नुमागमो भवति । वारिणी, वारिणी, वारीणि, वारीणि, वारिणा, वारिणे, वारिणः, वारिणः, वारिणोः, वारिणो , वारिणि । त्रपुणी, त्रपुणी, त्रपूणि, त्रपूणि, त्रपुणा, त्रपुणे, त्रपुणः, त्रपुणः, त्रपुणोः, त्रपुणो , त्रपुणि । कर्तृणी कुले, कर्तृणी कुले, कर्तॄणि कुलानि, कर्तॄणि कुलानि, कर्तृणा, कर्तृणे, कर्तृणः, कर्तृणः, कर्तृणो , कर्तृणोः, कर्तृणि । प्रियगुरुणे । प्रियतिसृणे—अत्र परत्वात्पूर्वं तिस्रादेशस्ततो नुम् । स्वरे इति किम् ? वारिभ्याम्, वारिभिः । अनामीति किम् ? वारीणाम्, त्रपूणाम् कर्तॄणाम् । एषु नुमागमाभावे 'ह्रस्वापश्च' [१/४/३७] इति नुट्, नुटि सति 'नुटचतिसृचतस्रोः' [१/४/७३] इति दीर्घः । स्याद्यधिकारान्नेह—तुम्बुरोरिदं—तौम्बुरव चूर्णम् । नपुंसकस्येति किम् ? मुनी, साधू । नामिन इति किम् ? कुले, ज्ञाने । अतत्संबन्धत्वान्नेह—प्रियवारये पुंसे । प्रियमधोः पुंसः ।

११. अस्थ्यऽस्थिदधिसक्थ्यक्ष्णां टादौ ।

तत्संबन्धिनामन्यसंबन्धिनां वा नाम्यन्तानां अस्थि, दधि, सक्थि, अक्षि—इत्येतेषां नुमागमो भवति टादौ स्वरे परे, इकारस्य च अकारादेशः । अस्थ्ना, अस्थ्ने, अस्थ्नः, अस्थ्नः, अस्थ्नोः, अस्थ्नोः, अस्थ्नाम्, अस्थ्नि, अस्थनि । दध्ना, दध्ने, दध्नः, दध्नः, दध्नोः, दध्नो । सक्थ्ना, सक्थ्ने, सक्थ्नि, सक्थनि । अक्ष्णा, अक्ष्णाम्, अक्ष्णि, अक्षणि । परमदध्ना, परमसक्थ्ना, परमाक्ष्णा, अत्यस्थ्ना, अतिदध्ना, अतिसक्थ्ना, अत्यक्ष्णा, प्रियदध्ना । समासान्तविधेरनित्यत्वात् कप्[१] न भवति । प्रियास्थ्ना शुना । दृढसक्थ्ना शकटेन, स्थूलाक्ष्णा इक्षुणा—अत्र अस्वाङ्गत्वात् 'बहुव्रीहौ सक्थ्यक्षिभ्यां स्वाङ्गे' [८/३/३७] इति समासान्तो न भवति । अतिदध्न्या स्त्रिया, प्रियास्थ्न्यै शुन्यै—अत्र नुमि कृते नान्तत्वादीप् । टादाविति किम् ? अस्थिनी, दधिनी । स्वर इति किम् ? अस्थिभ्याम्, दधिभ्याम् । अनपुंसकत्वान्नेह—दधातीत्येवंशील दधिः दधिनामा वा । दधिना, दधये ।

१२. भाषितपुंस्कं पुंवद् वा ।

भाषितं पुंस्कं—पुस्त्वं यस्य तद् भाषितपुंस्कम् । नाम्यन्तं भाषितपुंस्कं नपुंसकं पुंवद्वा भवति टादौ स्वरे परे।

---

१. 'उरःसर्पिर्दधि···' [८/३/१०४] इति अनेन प्राप्तः । 'अक्ष्णोऽप्राण्यङ्गे' [८/३/५६] इत्यपि अनित्यत्वान्न ।

यथा पुंसि नुमागमह्रस्वौ न भवतस्तथात्रापि न भवत इत्यर्थः। ग्रामण्या ग्रामणिना वा कुलेन। ग्रामण्ये, ग्रामणिने कुलाय। ग्रामण्यः, ग्रामणिन कुलात्। ग्रामण्यः, ग्रामणिनः कुलस्य। ग्रामण्योः, ग्रामणिनोः कुलयोः। ग्रामण्यां, ग्रामणीनां कुलानाम्। ग्रामण्यां, ग्रामणिनि कुले। एवं कर्त्रा, कर्तृणा, कर्तृणाम्, कर्तरि, कर्तृणि। शुचये, शुचिने, शुचेः, शुचिनः, शुचौ, शुचिनि। मृदवे, मृदुने, मृदोः, मृदुनः, मृद्वोः, मृदुनोः, मृदौ, मृदुनि। चित्रगवे, चित्रगुणे। अतिराया, अतिरिणा। अतिनावा, अतिनुना। भाषितपुंस्कमिति किम्? त्रपुणे, जतुने। इह कस्मान्न भवति—पीलुर्वृक्षः, पीलु फलम्, पीलुने फलाय इति? यस्मिन्नर्थे भाषितपुंस्कं भवति स एवार्थो ग्राह्य। अत्र तु वृक्षत्वे एव पुंस्त्वं न तु फलत्वे। टादाविति किम्? ग्रामणिनी, शुचिनी कुले। स्वरे इति किम्? ग्रामणिभ्यां कुलाभ्याम्। ग्रामणिभिः कुलैः। नामिन इति किम्? कीलालपेन कुलेन। नपुंसक इति किम्? कल्याण्यै ब्राह्मण्यै।

यन्निमित्तमुपादाय, पुंसि शब्दः प्रवर्तते।
नपुंसके तदेव स्यादुक्तपुंस्कं तदुच्यते॥

१३. धातोरिवर्णोवर्णयोरियुवौ स्वरे प्रत्यये।

धातुसबन्धिन इवर्णस्योवर्णस्य स्थाने यथासंख्यं इय्, उव्—इत्येतावादेशौ भवतः स्वरादौ प्रत्यये परे। नियौ, नियः। लुवौ, लुवः। अधीयाते, अधीयते। लुलुवतु, लुलुवुः। स्वमिच्छति क्यच्, क्विप्—स्वी। स्वियौ, स्वियः। एवं स्त्रियौ[1], स्त्रियः, अधीयन्। धातोरिति किम्? लक्ष्म्या। इवर्णोवर्णयोरिति किम्? म्लायति, वाचः। स्वरे इति किम्? नी, लूः। प्रत्यये इति किम्? न्यर्थः, ल्वर्थः। इयुवभ्यां गुणवृद्धी परत्वाद् भवतः। नयनम्, लवनम्, नायकः, लावकः।

१४. इणः।

इणो धातो[2] स्वरादौ प्रत्यये परे इय् इत्ययमादेशो भवति। यत्वापवादः। ईयतुः, ईयुः। कथं यन्ति, यन्तु? परत्वेन '**इणो योऽपिति**' [४/२/१५] इति यत्वस्यैव भावात्। अयनम्, आयकः—इत्यत्रापि परत्वाद् गुणवृद्धी एव।

१५. संयोगात्।

पूर्वेणैव सिद्धे बाधकबाधनार्थं वचनम्। धातुसंबन्धिन इवर्णस्य उवर्णस्य च धातुसंबन्धिन एव संयोगात् परस्य इय्, उव्,—इत्येतावादेशौ य्वोरपवादौ भवतः स्वरादौ प्रत्यये परे। यवक्रियौ, यवक्रियः। कटप्रुवौ, कटप्रुवः। शिश्रियतुः, शिश्रियुः। धातुना संयोगविशेषणादिह न—उन्न्यौ, उन्न्यः। सकृल्ल्वौ, सकृल्ल्वः।

१६. नुभ्रुवोः।

पूर्वमनुवर्तते। संयोगात्परस्य नु, भ्रू—इत्येतयोरुवर्णस्य उवादेशो भवति स्वरादौ प्रत्यये परे। आप्नुवन्ति, राध्नुवन्ति, तक्ष्णुवन्ति। भ्रुवौ, भ्रुवः। संयोगादिति किम्? सुन्वन्ति, चिन्वन्ति। स्वर इति किम्? आप्नुतः, भ्रूः। प्रत्यय इति किम्? भ्र्वग्रम्।

१७. स्त्रियाः।

स्त्रीशब्दसंबन्धिन इवर्णस्य इयादेशो भवति स्वरादौ प्रत्यये परे। स्त्रियौ, स्त्रियः, स्त्रिया, स्त्रियाम्। परमस्त्रियौ, अतिस्त्रियौ नरौ। शस्त्रीशब्दसबन्धिनस्त्वनर्थकत्वान्न भवति। स्वर इति किम्? स्त्रीभिः। प्रत्यय इति किम्? स्त्र्यर्थः। स्त्रीणामित्यत्र तु प्रागेव नुट्। एतच्च '**वेयुवोऽस्त्रियाः**' [१/४/३५] इत्यत्रोक्तम्। कथं अतिस्त्रयः, अतिस्त्रिणा, अतिस्त्रये, अतिस्त्रेः, अतिस्त्रेः, अतिस्त्रौ? '**इदुतोऽस्त्रेरीदूत्**' [१/४/४१] इत्यत्र स्त्रिशब्दवर्जनात् परोऽपीयादेशो बाध्यते। योगविभाग उत्तरार्थः।

---

१ ननु '**स्त्रियाः**' [२/१/१७] इत्यनेनाऽपि इय् सिद्धः, किमत्रोदाहरणेन? सत्यम्, तेन नाम्न इय् भवति अनेन तु धातोः। अत एव यत्र क्विबन्तः स्त्रीशब्दो भवति तत्रानेन '**वाम्शसि**' [२/१/१८] इति विकल्पो बाध्यते।

२ इणस्तु स्वयमेव धातुत्वात् धात्वनुवर्तनमुत्तरार्थम्।

१८. वाऽम्शसि ।

स्त्रीशब्दसंबन्धिन इवर्णस्य अमि शसि च परे इयादेशो वा भवति । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः । अतिस्त्रियम्, अतिस्त्रीम् नरम् । अतिस्त्रियः, अतिस्त्रीन् नरान् । क्यजाद्यन्तस्य तु धातुत्वात् '**धातोरिवर्णोवर्णयोरियुवौ**···' [२/१/१३] इत्यादिना नित्यमिय् । स्त्रीमिच्छति, स्त्रीवाचरति—स्त्री ब्राह्मणः । तं स्त्रियं, तान् स्त्रियः ।

१९. योऽनेकस्वरस्य ।

धातोरित्यनुवर्तते[१] । अनेकस्वरस्य धातोः संबन्धिनः प्रत्यासत्तेरिवर्णस्य स्थाने यकारादेशो भवति स्वरादौ प्रत्यये परे । निन्यतुः, निन्युः । चिच्यतुः, चिच्युः । सखायमिच्छति क्यच्, क्विप्—सखीः । सख्युः । एवं पत्युः, सख्यि, पत्यि । अनेकस्वरस्येति किम् ? नियौ, नियः । परमनियौ, परमनियः । इवर्णस्येति किम् ? लुलुवतुः, लुलुवुः ।

२०. स्यादौ वः ।

अनेकस्वरस्य धातोः सबन्धिनः प्रत्यासत्तेरुवर्णस्य स्थाने वकारादेशो भवति स्वरादौ स्यादौ प्रत्यये परे । वसुमिच्छति[२] क्यच्, क्विप्—वसूः । वस्वौ, वस्वः । स्यादाविति किम् ? लुलुवतुः, लुलुवुः ।

२१. क्विप्समासस्याऽसुधियस्तौ ।

क्विबन्तेनैव यः समासस्तत्संबन्धिनो धातोरिवर्णोवर्णस्य स्थाने यथासंख्य यकारवकारादेशौ भवत स्वरादौ स्यादौ प्रत्यये परे न तु सुधियः । उन्न्यौ, उन्न्यः । सुल्वौ, सुल्वः । तिरोन्यौ, तिरोन्यः । तिरोल्वौ, तिरोल्वः । ग्रामण्यौ, ग्रामण्यः । खलप्वौ, खलप्वः । एषु स्याद्युत्पत्तेः प्रागेव क्विबन्तेन समासः । एवं नयनशीलो नीः । सेनां नेता[३]—सेनानीः । सेनान्यौ, सेनान्यः । यद्वा नयतीति नीः, पश्चात्साधनेन योगः । परमस्य नेता—परमनीः । परमन्यौ, परमन्यः । क्विब्ग्रहणादिह न भवति—परमश्चासौ नीश्च परमनीः । परमनियौ, परमनियः । स्याद्यन्तेनात्र विशेषणसमासो न तु क्विबन्तेन[४] । समासग्रहणं किम् ? ब्राह्मणस्य नियौ । असुधिय इति किम् ? सुष्ठु ध्यायति दधाति वा सुधीः । सुधियौ, सुधियः । '**दिद्युत्**···' [५/३/६२] इत्यादिना क्विप् धीभावश्च । सुपूर्वस्यैव वर्जनादिह तु भवत्येव—प्रध्यौ, आध्यौ, उद्ध्यौ ।

२२. वर्षापुनर्दृन्काराद् भुवः ।

वर्षादिभ्यः परस्य भुव ऊकारस्य वकारो भवति स्वरादौ स्यादौ परे । वर्षायां भवति—वर्षाभूः, ओषधीविशेषो दर्दुरश्च । वर्षाभ्वौ, वर्षाभ्वः । पुनर्भूः—पुनरूढा स्त्री । पुनर्भ्वौ, पुनर्भ्वः । दृन् हिंसन् भवतीति दृन्भूः—सविषः कीटविशेषः । दृन्भ्वौ, दृन्भ्वः । कारे[५] कारेण वा भवति कारभूः । कारभ्वौ, कारभ्वः । करशब्देनापीच्छन्त्येके । करभ्वौ, करभ्वः । काराशब्देनाप्यन्ये । काराभ्वौ, काराभ्वः । वर्षादिभ्य इति किम् ? स्वयंभुवौ, प्रतिभुवौ, मित्रभुवौ, विभुवौ, आत्मभुवौ । पूर्वेणैव सिद्धे नियमार्थमिदं वर्षादिभ्यः परस्यैव भुवो वकारो नाऽन्येभ्यः ।

---

१. **मण्डूकप्लुतिः** इति न्यायेन धातोरनुवर्तनम् ।

२. देवमग्निं राजानं वेत्यर्थः । द्रव्यवृत्तिस्तु नपुंसकः ।

३. सेना नेता इति अर्थकथनम् । वस्तुतस्तु सेनाशब्दस्य षष्ठ्यन्तस्य **गतिकारक**··· इति न्यायेन नीशब्देन क्विबन्तेन समासः, अथवा नयतीति नीः, पश्चात् सेनया इति साधनेन योगे समासः । उभयत्रापि अर्थभेदाऽभावात् प्रक्रियाभेदमात्रमेतदुपदर्शितम् । परमार्थस्तु सोपपदादेव क्विपि ।

४ अत्र परमशब्दस्य अकारकत्वात् केवलेन क्विबन्तेन सह समासो न भवति । किंतु स्याद्यन्तेन विशेषणसमासस्तेन यत्वं न । परमस्य नेता—इत्यत्र तु नयतीति नीः, पश्चात् परमशब्देन कर्मषष्ठ्यन्तेन कारकत्वात् स्याद्युत्पत्तेः पूर्वं क्विबन्तेन समासस्तेन यत्वं भवत्येव ।

५. क्रियते इति कारः । राजलभ्यो भागः ।

२३. मासनिशासनस्य शसादौ वा लोपः ।

मास, निशा, आसन—इत्येतेषां लोपो[1] वा भवति शसादौ स्यादौ परे। मासः, मासान्। मासा, मासेन। माभ्याम्, मासाभ्याम्। मासि, मासे। निशः, निशा। निड्भ्याम्, निशाभ्याम्। निड्भिः, निशाभिः। केचित्तु 'शराज्भ्राज्यज्...' [२/१/११७] इति सूत्रे धातोरेव शस्य षत्वमाहुस्तन्मते निज्भ्याम्, निज्भिः, निच्छु। आस्ना, आसनेन। आसनि, आसने। केचिदास्यशब्दस्यैव आसन्नादेशमिच्छन्ति। शसादाविति किम्? मासौ, मासाः, मासरूप्यः।

२४. पादवन्तनासिकाहृदयाऽसृग्यूषोदकदोर्यकृच्छकृत्पृतनासानूनां पद्दन्नोहृदसन्यूषन्नुदन्दोषन्यकञ्शकन्पृत्स्नवः ।

पादादीनां शब्दानां यथासंख्यं पदादय आदेशा वा भवन्ति शसादौ स्यादौ परे। पादस्य पद्—पदः, पादान् पश्य। पदा, पादेन। पद्भ्याम्, पद्भ्याम्, पद्भ्याम्, पादाभ्याम्, पादाभ्याम्, पादाभ्याम्। पद्भिः, पादैः। पत्सु, पादेषु। दन्तस्य दत्—दतः, दन्तान्। दता, दन्तेन। नासिकाया नस्—नसः, नासिकाः। नसा, नासिकया। हृदयस्य हृद्—हृदि, हृदये। असृजः असन्—अस्ना, असृजा। यूषस्य यूषन्—यूष्णा, यूषेण। उदकस्य उदन्—उद्नः, उदकात्। दोषः दोषन्—दोष्ण, दोषः। यकृतः यकन्—यक्ना, यकृता। शकृतः शकन्—शक्ना, शकृता। पृतनायाः पृत्—पृता, पृतनया। सानोः स्नुः—स्नुना, सानुना। शसादाविति किम्? पादः, पादौ, पादाः, पादकल्पः। पदादयः पृथक् शब्दा इत्येके। पद्, पत्, पदौ, पदः इत्यादि।

२५. आतोऽनापो लोपः स्वरे ।

शसादावित्यनुवर्तते। आब्वर्जितस्य आकारस्य लोपो भवति शसादौ स्वरे परे। कीलालपः, कीलालपा, कीलालपे, कीलालपः, कीलालपः, कीलालपोः, कीलालपोः, कीलालपि। सोमपः, सोमपा, सोमपे, सोमपः, सोमपः, सोमपोः, सोमपोः सोमपि। शुभयः, शुभंया, शुभये। क्त्वः, क्त्वा। हाहे देहि। आत इति किम्? नदीः। अनाप इति किम्? खट्वाः, शालाः, मालाः पश्य। शसादाविति किम्? कीलालपास्तिष्ठन्ति। कीलालपां पश्य। स्वरे इति किम्? कीलालपाभ्याम्। **पाणिनीयास्तु** [६/४/१४०] धातोरेवाकारस्य लोपमिच्छन्तः हाहान्, हाहा, हाहै इत्यादि प्रत्युदाहरन्ति।

२६. श्वन्युवन्मघोनामीप्स्याद्यघुटि व उः ।

स्वर इत्यनुवर्तते। श्वन्, युवन्, मघवन्—इत्येतेषां सस्वरो वकार उर्भवति ईपि घुड्वर्जिते स्यादिस्वरे च परे। शुनी स्त्री। प्रियशुनी कुले। शुनः, शुना, शुने। अतियूनी स्त्री। प्रिययूनी कुले। यूनः, यूना, यूने। मघोनी स्त्री। प्रियमघोनी कुले। मघोनः, मघोना। ईप्स्याद्यघुटीति किम्? शौवनं मांसम्। यौवनं वयः। माघवनं धनुः। अघुडिति किम्? श्वानौ, युवानौ, मघवानौ। अतिश्वानि, अतियुवानि, अतिमघवानि कुलानि तिष्ठन्ति पश्य वा। स्वरे इति किम्? श्वभ्याम्। नकारान्तनिर्देशान्नेह—गोष्ठश्वेन। युवतीः पश्य। युवत्या। अर्थवद्ग्रहणादिह न—तत्वदृश्वना, मातरिश्वना।

२७. पथिन्मथिनृभुक्षां टेर्लोपः ।

पथ्यादीनां टेर्लोपो भवति ईपि घुड्वर्जिते स्यादिस्वरे च परे। सुपथी स्त्री कुले वा। पथः, पथा, पथे, पथः, पथः, पथोः, पथोः, पथाम्, पथि। एवं सुमथी स्त्री कुले वा। मथः, मथा। अनृभुक्षी सेना कुले वा। ऋभुक्षः, ऋभुक्षा। ईप्स्याद्यघुटीति किम्? सुपन्थानि वनानि। पन्थानौ, पन्थानः। नान्तनिर्देशान्नेह—पन्थानमिच्छति क्यचि, क्विपि—पथ्या, पथ्ये।

२८. अनोऽतोऽवमयुक्तात् ।

वकारमकारान्तसंयोगवर्जितात् परस्य अनोऽकारस्य लोपो भवति ईपि घुड्वर्जिते स्यादिस्वरे च परे। राज्ञी। राज्ञः, राज्ञा, राज्ञे, राज्ञः, राज्ञः, राज्ञोः, राज्ञोः, राज्ञाम्। तक्ष्णा, तक्ष्णे, तक्ष्णः, तक्ष्णः तक्ष्णोः, तक्ष्णोः, तक्ष्णाम्। ईप्स्याद्यघुटीति किम्? राजानौ, राजानः। सुराजानि कुलानि। राजभ्याम्, राजभिः। अवमयुक्तादिति किम्? यज्वना,

---

१. 'षढ्यान्त्यस्य' [८/४/१२३] इति सूत्रेण अन्त्यस्य लोप इति गम्यः।

यज्वने । आत्मना, आत्मने । युक्तादिति किम् ? प्रतिदीव्नः, प्रतिदीव्ना, साम्ना ।

२९. ईङ्योः ।

वकारमकारसंयोगवर्जितात् परस्य अनोऽकारस्य लोपो वा भवति ई, ङि— इत्येतयो परयो । साम्नी, सामनी । दाम्नी, दामनी । सुराज्ञी, सुराजनी कुले । राज्ञि, राजनि । दध्नि, दधनि । अवमयुक्तादिति किम् ? पर्वणी, कर्मणी । पर्वणि, कर्मणि ।

३०. षपूर्वहन्धृतराज्ञामऽणि ।

षकारपूर्वस्याऽनो हन्, धृतराजन्—इत्येतयोश्चानोऽकारस्य लोपो भवति अणि परे । औक्ष्ण , ताक्ष्ण । भ्रौणघ्न:, वार्त्रघ्न. । धार्तराज्ञः । षपूर्वादीनामिति किम् ? सामन., वैमन: । अणीति किम् ? ताक्षण्य[1] ।

३१. अदेतोरपदान्तेऽतः ।

अपदान्ते वर्तमानस्य अकारस्य लोपो भवति अकारे एकारे च परे । अनुवर्तमानेप्यति पुनरतो वचनमन इति निवृत्त्यर्थम् । युष्मभ्यम्, अस्मभ्यम्, पचन्ति, पठन्ति, पचे, यजे । अदेतोरिति किम् ? श्रमणे । अपदान्त इति किम् ? दण्डाग्रम् । अत इति किम् ? अदन्ति ।

३२. अचेः पूर्वदीर्घश्चाऽञिक्यघुटि यस्वरे ।

चादतो लोप इत्यनुवर्तते । अचेरिति लुप्तनकाराञ्चतेरुपलक्षणम् । लुप्तनकाराञ्चतेरकारस्य लोपो भवति पूर्वस्य च दीर्घः ञिक्यघुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे । प्राच्य[2], प्रतीच्य । प्राच , प्रतीच , प्राचा, प्रतीचा, दधीचे, मधूच., पितृचः । प्राची, प्रतीची स्त्री कुले वा । पूर्वस्वराऽभावान्नेह दीर्घ , लोपस्तु भवत्येव । दृषच्चा, दृषच्चे । अञिक्यघुटीति किम् ? दध्यञ्चमाचष्टे--दध्ययति । दध्यञ्चमिच्छति--दध्यच्यति । दध्यगिवाचरति--दध्यच्यते । दध्यञ्चौ, दध्यञ्च । दध्यञ्चि कुलानि । यस्वर इति किम् ? दध्यग्भ्याम्, दध्यक्काम्यति । लुप्तनकाराञ्चतेर्ग्रहणादिह न—साध्वञ्चः पश्य ।

३३. उद ईत् ।

उद परस्याऽचेरकारस्य ईकारो भवति ञिक्यघुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे । उदीच्य. । उदीच पश्य । उदीची स्त्री कुले वा । उदीचा, उदीचे । अञिक्यघुटीति किम् ? उदञ्चमाचष्टे—उदयति । उदञ्चमिच्छति—उदच्यति । उदगिवाचरति—उदच्यते । उदञ्चौ, उदञ्च. । उदञ्चि कुलानि । यस्वर इति किम् ? उदग्भ्याम्, उदक्काम्यति । लुप्तनकाराञ्चतेर्निर्देशान्नेह—उदञ्चा, उदञ्चे ।

३४. तिर्यचस्तिरश्चः ।

अकार उच्चारणार्थ. । तिर्यच्शब्दस्य तिरश्चादेशो भवति ञिक्यघुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे । 'सहसम्तिरसां···' [३/२/१३८] इत्यादिना तिरसस्तिरि । तिरश्च्य. । तिरश्चीन[3] । तिरश्ची स्त्री कुले वा । तिरश्च., तिरश्चा, तिरश्चे । अञिक्यघुटीति किम् ? तिर्यञ्चमाचष्टे—तिर्ययति । तिर्यञ्चमिच्छति—तिर्यच्यति । तिर्यगिवाचरति—तिर्यच्यते । तिर्यञ्चौ, तिर्यञ्च । तिर्यञ्चि कुलानि । यस्वरे इति किम् ? तिर्यग्भ्याम्, तिर्यग्भिः ।

---

१. अत्र 'कुर्वादेर्ञ्यः' [६/२/७८] इति सूत्रेण ञ्यप्रत्यय ।

२ 'द्युप्रागपागुदक्प्रतीचो यः' [६/४/४] इति य ।

३ 'अविकृस्त्रियां वाञ्चः' [७/३/१०८] इति वैकल्पिक ईनः प्रत्ययः ।

३५. पादः पद् ।

पादिति समासान्तस्य लुप्ताऽकारस्य पादशब्दस्य ग्रहणं, पादयते कृतञिलोपस्य वा । पादन्तस्य नाम्नः पदित्ययमादेशो भवति ञिक्यथुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे । निर्दिश्यमानस्यैव आदेशो भवतीति पादशब्दस्यैव भवति न तु तदन्तस्य सर्वस्य । व्याघ्रस्येव पादावस्य व्याघ्रपाद्, तस्याऽपत्यं—वैयाघ्रपद्यः[1] । द्वौ पादावस्य द्विपाद् । द्विपदः पश्य । द्विपदा, द्विपदे । त्रिपदी गाथा । व्याघ्रपदी स्त्री कुले वा । द्वौ द्वौ पादौ ददाति—द्विपदिकां[2] ददाति । द्विपदे हितं—द्विपदीयम् । पादमाचष्टे पद्यमानं प्रयुङ्क्ते वेति पादयते क्विपि—पाद् । पद पश्य । पदा, पदे । पदी कुले । अञिक्यथुटीति किम् ? पादमाचष्टे—पादयति । व्याघ्रपादमिच्छति स इवाचरतीति च—व्याघ्रपाद्यति, व्याघ्रपाद्यते । द्विपादौ, द्विपादः । द्विपान्दि कुलानि । यस्वरे इति किम् ? द्विपाद्भ्याम्, द्विपाद्भिः, द्विपात्काम्यति ।

३६. वाहो वौट् ।

वा इति लुप्तषष्ठ्यन्तं पदम् । वाहो वाशब्दस्य ऊट् भवति ञिक्यथुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे । विण्प्रत्ययान्तोऽयं वाह्शब्दः । टकारः 'ऊटि' [१/२/२५] इति विशेषणार्थः । भारौह्यः । भारौही स्त्री कुले वा । भारौहः, भारौहा, भारौहे । अञिक्यथुटीति किम् ? भारवाहमाचष्टे—भारवयति । भारवाहमिच्छति स इवाचरतीति च—भारवाह्यति, भारवाह्यते । भारवाहौ, भारवाहः । केचित् सहिवहिभ्यां विण्प्रत्ययं छन्दस्येव मन्यन्ते । तन्मते एतानि वैदिकान्येव रूपाणि । लोके वाह् इत्यभावादूटोऽप्यभावः ।

३७. क्वस उष् मतौ च ।

क्वसुप्रत्ययस्य उषादेशो भवति मतुप्रत्यये चकाराद् ञिक्यथुड्वर्जिते यकारादौ स्वरादौ च प्रत्यये परे । विदुष्मान्, पेचुष्मान् । विदुषि साधुः—विदुष्यः । पेचुषि साधुः—पेचुष्यः । विदुषः, विदुषा, विदुषे । विदुषी स्त्री कुले वा । विदुष इदं—वैदुषम् । मतौ चेति किम् ? विद्वयति, विद्वस्यति, विद्वस्यते, विद्वांसौ, विद्वांसः । विद्वांसि कुलानि । यस्वरे इति किम् ? विद्वद्भ्याम्, विद्वद्भिः ।

३८. हनो ह्लो घ्नः ।

हन्तेर्ह्ल इत्येवंरूपस्य घ्न इत्ययमादेशो भवति । भ्रूणघ्नी स्त्री कुले वा । भ्रूणघ्ना, भ्रूणघ्ने । घ्नन्, घ्नन्ति, अघ्नन् । हन इति किम् ? प्लीह्नः, अह्नः । ह्ल इति किम् ? वृत्रहणौ, वृत्रहयति ।

३९. दिव औः सौ ।

दिवो वकारस्य औकारो भवति सौ परे । द्यौः, प्रियद्यौः, हे द्यौः, अतिद्यौः । साविति किम् ? दिवं पश्य । द्यामिति तु द्योशब्दस्य **'आ अम्शसोता'** [१/४/८४] इत्याकारे रूपम् ।

४०. उत्पदान्तेऽनूत् ।

पदान्ते वर्तमानस्य दिव्शब्दस्य उकारादेशो भवति, स चानूत्—तस्योकारस्य दीर्घत्वं च न । द्युभ्याम्, द्युभिः, द्युभ्यः, द्युषु, अतिद्युभ्याम्, परमद्युभ्याम्, द्युगतः, द्युकामः, द्युहयः, द्युत्वम्, द्युकल्पः, विमलद्यु दिनम् । पदान्त इति किम् ? दिव्यम्, दिवौ, दिवि । अनूदिति किम् ? अद्यौर्द्यौर्भवति—द्युभवतीत्यत्र **'च्वियग्…'** [४/१/५१] इत्यादिना च्वौ दीर्घत्वं न भवति । दीर्घस्यैव प्रतिषेधो नान्यस्य, तेनेह वृद्धिः—द्युकामस्याऽपत्यं—द्यौकामिः । दिवाश्रयः, दिवौकसः इति तु पृषोदरादित्वादकारागमे[3][4] भविष्यति ।

---

१ **'गर्गादिभ्यो यञ्'** [६/२/५७] इति यञ् ।

२ **'संख्यादेः पादादिभ्यो दानदण्डे चाकल् लोपश्च'** [८/२/१४] इति अकल् ।

३. अन्तर्वर्तिनी विभक्तिमाश्रित्य पदत्वेऽनेनोत्वे कथं दिवाश्रय इति शङ्कायां जातायामाह ।

४ अकारागमे च अकारागमसामर्थ्यादेव उत्वं न ।

४१. युष्मदस्मदोर्लोपः स्यादौ ।

युष्मदस्मदोरन्तस्य लोपो भवति स्यादौ परे । युष्मभ्यम्, अस्मभ्यम्, अतियुष्मभ्यम्, अत्यस्मभ्यम् । त्वद्, मद्, अतित्वद्, अतिमद् । युष्मद्, अस्मद्, अतियुष्मद्, अत्यस्मद् । युष्माकम्, अस्माकम्, अतियुष्माकम्, अत्यस्माकम् । युष्मदस्मदलिङ्गकाः इति अन्तलोपे स्त्रियामाप् न भवति । स्यादावित्ति किम् ? युष्मदीयः, अस्मदीयः ।

४२. मोर्वा ।

मकारान्तयोर्युष्मदस्मदोर्मकारस्य लोपो वा भवति स्यादौ परे । युवां युष्मान् वा आवामस्मान् वा आचष्टे—णौ क्विपि तल्लोपे च युष्म्, अस्म् इति मान्तत्वम् । युषभ्यम्, युष्मभ्यम् । असभ्यम्, अस्मभ्यम् । युषद्, युष्मद् । असद्, अस्मद् । युषाकम्, युष्माकम् । असाकम्, अस्माकम् । **'आ अमृहसयोः'** [२/१/५४] इति परत्वान्मकारस्यात्वे—युषान्, असान् । युषाभिः, असाभिः । युषासु, असासु । **'टाङ्योसि यः'** [२/१/५५] इति यत्वे त्वमादिकार्ये च कृते—त्व्या, म्या । त्व्यि, म्यि । युव्योः, आव्योः । केचित् त्वमादेशौ नेच्छन्ति । तन्मते युष्या, अस्या । युष्यि, अस्यि । युष्योः, अस्योः । केपि च यत्वं नेच्छन्ति । तन्मते त्वेन, मेन । त्वे, मे । युवयोः, आवयोः । सर्वादेरसबन्धत्वात् ङे स्मिन्न भवति । अथ **विवक्षर्थ प्रकृतिरेवाह** इति न्यायेन सर्वादिसबन्धत्वात् त्वस्मिन्, मस्मिन्निति । सि-जस्-ङे-ङस्-प्रत्यये तु परत्वात् त्वमहमादय एवादेशा भवन्ति । त्वम्, अहम् । यूयम्, वयम् । तुभ्यम्, मह्यम् । तव, मम । एके तु मान्तयोर्युष्मदस्मदोरादेशा नेच्छन्ति ।

४३. मान्तयोर्युवावौ द्वित्वे ।

द्वित्वविशिष्टेऽर्थे वर्तमानयोर्मकारपर्यन्तयोर्युष्मदस्मदोर्यथासङ्ख्यं युव, आव—इत्येतावादेशौ भवतः स्यादौ परे । युवाम्, युवाम्, आवाम्, आवाम् । युवाभ्याम्, युवाभ्याम्, युवाभ्याम्, आवाभ्याम्, आवाभ्याम्, आवाभ्याम् । युवयोः, युवयोः, आवयोः, आवयोः । यदा समासे द्व्यर्थे युष्मदस्मदी भवतः समासार्थस्य अन्यसङ्ख्यत्वादेकवचनं बहुवचनं वा भवति तदापि द्व्यर्थयोर्युष्मदस्मदोर्युवावौ भवतः, यदि **'त्वमहं सिनाऽकः प्राक् च'** [२/१/४५] इत्येवमादिना आदेशा अन्तरेण न बाध्यन्ते । अतिक्रान्तौ युवामावां वा—अतियुवां, अत्यावा तिष्ठतः । अतिक्रान्त युवामावां वा—अतियुवाम्, अत्यावा पश्य । अतिक्रान्तौ युवामावां वा—अतियुवाम्, अत्यावां पश्य । एवमतियुवान्, अत्यावान् पश्य । अतियुवया, अत्यावया । अतियुवाभ्याम्, अतियुवाभ्याम्, अतियुवाभ्याम्, अत्यावाभ्याम्, अत्यावाभ्याम्, अत्यावाभ्याम् । अतियुवाभिः, अत्यावाभिः । अतियुवभ्यम्, अत्यावभ्यम् । अतियुवत्, अत्यावत् । अतियुवत्, अत्यावत् । अतियुवयोः, अतियुवयोः, अत्यावयोः, अत्यावयोः । अतियुवाकम्, अत्यावाकम् । अतियुवयि, अत्यावयि । अतियुवासु, अत्यावासु । सि-जस्-ङे-ङस् इत्येतेषु पुनः परत्वात्त्वमहमादयः । अतिक्रान्तः युवामावां वा—अतित्वम्, अत्यहम् । अतियूयम्, अतिवयम् । अतितुभ्यम्, अतिमह्यम् । अतितव, अतिमम । मान्तयोरिति किम् ? युवकाभ्याम्, आवकाभ्याम् । **तन्मध्यपतितस्तद्ग्रहणेन गृह्यते** इति साकस्य मा भूत् । युवयोरावयोरित्यत्र तु दकारस्य यत्वं सिद्धं, अन्यथा युव्योराव्योरित्यनिष्टं स्यात् । स्यादावित्ति किम् ? युवयोः पुत्रः—युष्मत्पुत्रः । आवयोः पुत्रः—अस्मत्पुत्रः । द्वित्वे इति किम् ? युष्मान्, अस्मान् । युष्माभिः, अस्माभिः । युष्मभ्यम्, अस्मभ्यम् । युष्मत्, अस्मत् । युष्माकम्, अस्माकम् । युष्मासु, अस्मासु । द्वित्वे इति युष्मदस्मदोर्विशेषणं किम् ? युष्मानस्मान् वातिक्रान्तौ—अतियुष्माम्, अत्यस्माम् । अतियुष्माभ्याम्, अत्यस्माभ्याम् । अतियुष्मयोः, अत्यस्मयोः । अत्र समास एव द्वित्वविशिष्टेऽर्थे वर्तते न तु युष्मदस्मदी इति युवावादेशौ न भवतः ।

४४. त्वमौ प्रत्ययोत्तरपदे चैकत्वे ।

एकत्वविशिष्टेऽर्थे वर्तमानयोर्मकारपर्यन्तयोर्युष्मदस्मदोर्यथासङ्ख्यं त्व, म—इत्येतावादेशौ भवतः स्यादौ परे प्रत्यये उत्तरपदे च परे । त्वाम्, माम् । त्वया, मया । त्वद्, मद्, । त्वयि, मयि । अत्रापि समासे पूर्ववद् विधानम् । अतिक्रान्तौ त्वां मां वा—अतित्वाम्, अतिमां तिष्ठतः । अतिक्रान्तं त्वां मां वा—अतित्वाम्, अतिमां पश्य । अतिक्रान्तौ त्वां मां वा—अतित्वाम्, अतिमां पश्य । एवमतित्वान्, अतिमान् पश्य । अतित्वया, अतिमया । अतित्वाभ्याम्, अतित्वाभ्याम्, अतित्वाभ्याम्, अतिमाभ्याम्, अतिमाभ्याम्, अतिमाभ्याम् । अतित्वाभिः, अतिमाभिः । अतित्वभ्यम्, अतिमभ्यम् । अतित्वत्, अतिमत् । अतित्वद्, अतिमद् । अतित्वयोः, अतित्वयोः, अतिमयोः, अतिमयोः । अतित्वाकम्, अतिमाकम् । अतित्वयि,

अतिमयि। अतित्वासु, अतिमासु। सि-जस्-ङे-ङस्-सु पुनः परत्वात्त्वमहमादयः। अतिक्रान्तः त्वां मां वा—अतित्वम्, अत्यहम्। अतियूयम्, । अतिवयम्। अतितुभ्यम्, अतिमह्यम्। अतितव, अतिमम। प्रत्यये—तवायं—त्वदीयः। मदीयः, त्वत्तरः, मत्तरः, त्वन्मयम्, मन्मयम्। उत्तरपदे—त्वया कृतं—त्वत्कृतम्। मत्कृतम्। तव पुत्रः—त्वत्पुत्रः। मत्पुत्रः। त्वद्धितम्, मद्धितम्, त्वत्प्रधानः, मत्प्रधानः। त्वां मां वा आचष्टे—त्वापयति, मापयति। पूर्वं टेर्लोपे त्वमादेशे चापुगागमः। क्विपि—त्वाप्, माप्। हैमस्तु [२/१/११] टेर्लोपात् प्रागेव त्वमादेशाविच्छति। तन्मते त्वदयति[1], मदयति। मान्तयोरिति किम्? त्वकं पिताऽस्य—त्वकत्पितृकः। अत्र अक्सहितस्य मा भूत्। एकत्वे इति किम्? युष्माकम्, अस्माकम्। युष्माकमिदं—युष्मदीयम्। अस्मदीयम्। एकत्वे इति युष्मदस्मदोर्विशेषण किम्? अतिक्रान्तं युष्मान् अस्मान् वा—अतियुष्माम्, अत्यस्माम्। अतियुष्मया, अत्यस्मया। अतियुष्मद्, अत्यस्मद्। अतियुष्मयि, अत्यस्मयि। प्रत्ययोत्तरपदे चेति किम्? त्वय्यधि—अधियुष्मद्। अध्यस्मद्। अन्तरङ्गत्वात्स्यादिद्वारेणैव त्वमादेशे सिद्धे प्रत्ययोत्तरपदग्रहणं बहिरङ्गोऽपि लुक् अन्तरङ्गान् विधीन् बाधते इति न्यायज्ञापनार्थम्, तेन यद्, तद्—इत्यादावन्तरङ्गमपि त्यदाद्यत्वादि न भवति। एके तु निमित्तनिरपेक्षमेकत्व-विशिष्टेऽर्थे वर्तमानयोस्त्वमादेशाविच्छन्ति। तन्मते अधित्वत्, अधिमत्।

४५. त्वमहं सिनाऽकः प्राक् च।

युष्मदस्मदो सिना सह यथासंख्यं त्वम्, अहम्—इत्येतावादेशौ भवतः, तौ चाक्प्रत्ययप्रसङ्गेऽकः प्रागेव भवतः। त्वम्, अहम्। अतिक्रान्तस्त्वाम्—अतित्वम्। अत्यहम्। अतिक्रान्तो युवाम्—अतित्वम्। अत्यहम्। अतिक्रान्तो युष्मान्—अतित्वम्। अत्यहम्। प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य स प्रियत्वम्। प्रियाहम्। एषु परत्वात् त्वमौ युवावौ च बाधित्वा त्वमहमावेव भवतः। सिनेति किम्? युष्माभिः, अस्माभिः। अकः प्राक् चेति किम्? साकोर्मा भूत्—त्वकम्, अहकम्। ननु त्वं पुत्रोऽस्य त्वत्पुत्रः, मत्पुत्रः—इत्यत्र कथं नादेशौ? लुकि स्थानिवदभावात् नेति विज्ञेयम्।

४६. यूयं वयं जसा।

युष्मदस्मदोर्जसा सह यथासंख्यं यूयं, वयं—इत्येतावादेशौ भवतः, तौ च अक्प्रत्ययात् प्रागेव। यूयम्, वयम्। परमयूयम्, परमवयम्। प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा येषां ते प्रिययूयम्। प्रियवयम्। अतिक्रान्तास्त्वां युवां युष्मान् वा—अतियूयम्। अतिवयम्। जसेति किम्? यूयं पुत्रा अस्य युष्मत्पुत्रः। अस्मत्पुत्रः। अकः प्राक् चेति किम्? यूयकम्, वयकम्।

४७. तुभ्यं मह्यं ङया।

युष्मदस्मदोर्ङया सह यथासंख्यं तुभ्यं मह्यमित्येतावादेशौ भवतः, तौ च अक्प्रत्ययात् प्रागेव। तुभ्यम्, मह्यम्। परमतुभ्यम्, परममह्यम्। प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य तस्मै प्रियतुभ्यम्। प्रियमह्यम्। अतिक्रान्तस्त्वां युवां युष्मान् वा तस्मै अतितुभ्यम्। अतिमह्यम्। ङयेति किम्? तुभ्यं हितं—त्वद्धितम्। मद्धितम्। अकः प्राक् चेति किम्? तुभ्यकम्, मह्यकम्।

४८. तव मम ङसा।

युष्मदस्मदोर्ङसा सह यथासंख्यं तव, मम—इत्येतावादेशौ भवतः, तौ च अक्प्रत्ययात् प्रागेव। तव, मम। परमतव, परममम। प्रियस्त्वं प्रियौ युवां प्रिया यूयं वा यस्य तस्य प्रियतव। प्रियमम। अतिक्रान्तस्त्वां युवां युष्मान् वा तस्य अतितव। अतिमम। ङसेति किम्? तव प्रियस्त्वत्प्रियः। मत्प्रियः। अकः प्राक् चेति किम्? तवक, ममक।

---

१. 'अत्र नित्यत्वात् टिलोपात् प्रागेव त्वमादेशौ, पश्चादपि टिलोपो न लोपात् स्वरादेशः इति न्यायात्। 'अवेतोरपवाल्लोऽन्तः' [२/१/३१] इत्येव प्रवर्तते। तस्मिन्नपि कृते न भवति 'नैकस्वरस्य' [८/४/८४] इति निषेधात्। 'उपधायाः' [४/२/२२] इत्यनेन वृद्धिरपि न अधातुत्वात्।

४९. आमौः ।

युष्मदस्मद्भ्यां पर औ. आम् भवति । युवाम्, आवाम् । अतियुवाम्, अत्यावाम् तिष्ठत पश्य वा ।

५०. शसो नश् ।

युष्मदस्मद्भ्यां परस्य शसः स्थाने नश् इत्यादेशो भवति । शकार. सर्वादेशार्थ । अकार उच्चारणार्थ । युष्मान्, अस्मान् । प्रिययुष्मान्, प्रियास्मान् । प्रियस्त्वं येषां तान् प्रियत्वान् । प्रियमान् । प्रियौ युवा येषा तान् प्रिययुवान् । प्रियावान् ।

५१. ङसिभ्यसोरद् ।

युष्मदस्मद्भ्यां परयोर्ङसिभ्यसोरद् भवति । त्वद्, मद् । युष्मद्, अस्मद् । त्वा युवा युष्मान् वाऽतिक्रान्ताद् अतित्वद् । अतिमद् । अतियुवद्, अत्यावद् । अतियुष्मद्, अत्यस्मद् । ङसिसाहचर्यात् पञ्चम्या एव भ्यस् गृह्यते ।

५२. भ्यसोऽभ्यम् ।

युष्मदस्मद्भ्यां परस्य भ्यस अभ्यमित्यादेशो भवति । युष्मभ्यम्, अस्मभ्यम् दीयते । प्रिययुष्मभ्यम्, प्रियास्मभ्यम् । त्वां युवां युष्मान् वाऽतिक्रान्तेभ्यः अतित्वभ्यम् । अतिमभ्यम् । अतियुवभ्यम्, अत्यावभ्यम् । अतियुष्मभ्यम्, अत्यस्मभ्यम् । अकारादिकरणमात्वबाधनार्थम् ।

५३. आम आकम् ।

युष्मदस्मद्भ्यां परस्य आम आकमित्यादेशो भवति । युष्माकम्, अस्माकम् । प्रिययुष्माकम्, प्रियास्माकम् । त्वां युवां युष्मान् वाऽतिक्रान्तानां—अतित्वाकम् । अतिमाकम् । अतियुवाकम्, अत्यावाकम् । अतियुष्माकम्, अत्यस्माकम् । आकमित्याकारो[1] ऽन्त्यार्थम् । युष्मानाचक्षाणाना—औ क्विपि युष्माकम् । अस्माकम् । केचित्तु तत्संबन्धिन एवाम आकमिच्छन्ति, तदभावे दकारस्य यत्व च । तन्मते प्रिया यूय येषां तेषा प्रिययुष्मयाम् । प्रियास्मयाम् । एवमतियुष्मयाम्, अत्यस्मयाम् ।

५४. आ अम्हसयोः ।

युष्मदस्मदोराकारोऽन्तादेशो भवति अमि हसादौ च स्यादौ परे । त्वाम्, माम् । अतित्वाम्, अतिमाम् । युष्मान्, अस्मान् । अतियुष्मान्, अत्यस्मान् । युष्माभिः, अस्माभिः । अतियुष्माभिः, अत्यस्माभि । युष्मासु, अस्मासु । अतियुष्मासु, अत्यस्मासु । अम्हसयोरिति किम् ? युष्मभ्यम्, अस्मभ्यम् ।

५५. टाङ्योसि यः ।

युष्मदस्मदोर्यकारोऽन्तादेशो भवति टा, ङि, ओस्—इत्येतेषु परेषु । त्वया, मया । अतित्वया, अतिमया । अतियुवया, अत्यावया । अतियुष्मया, अत्यस्मया । त्वयि, मयि । अतित्वयि, अतिमयि । प्रिययुवयि, प्रियावयि । प्रिययुष्मयि, प्रियास्मयि । युवयोः, आवयो । अतियुवयो, अत्यावयो । अतित्वयो, अतिमयो । अतियुष्मयो, अत्यस्मयो । टाङ्योसीति किम् ? त्वत्, मत् ।

५६. पदादेकवाक्ये द्वितीयाचतुर्थीषष्ठीभिर्वस्नसौ बहुत्वे वा ।

एकवाक्ये वर्तमानयोः पदात्परयोर्युष्मदस्मदोः द्वितीयाचतुर्थीषष्ठीविभक्तिसहितयोर्यथासंख्य वस्, नस्—इत्येतावादेशौ वा भवत बहुवचनविषये । द्वितीया—धर्मो वो रक्षतु । धर्मो नो रक्षतु । पक्षे—धर्मो युष्मान् रक्षतु । धर्मोऽस्मान् रक्षतु । चतुर्थी—ग्रामो वो दीयते । जनपदो नो दीयते । पक्षे—ग्रामो युष्मभ्यं दीयते । जनपदोऽस्मभ्यं दीयते ।

---

1. आम आकमिति कृते 'आ अम्हसयोः' [२/१/५४] इत्यात्वे कृते युष्माकमित्यादि सिध्यति, किमाकारकरणेनेत्याह ।

षष्ठी—ग्रामो वः स्वम् । जनपदो न स्वम् । पक्षे—ग्रामो युष्माक स्वम् । जनपदोऽस्माकं स्वम् । पदादिति किम् ? युष्मान् धर्मो रक्षतु । अस्मान् धर्मो रक्षतु । युष्मभ्यं ग्रामो दीयते । अस्मभ्यं जनपदो दीयते । युष्माकं ग्राम. । अस्माकं जनपदः । एकस्मिन् पदे निमित्तनिमित्तिनोर्भावे न भवति—अतियुष्मान् पश्यति । अत्यस्मान् पश्यति । एकवाक्ये इति किम् ? ओदनं पचत युष्माकं भविष्यति । पटं वयत अस्माकं भविष्यति । द्वितीयादिभिरिति किम् ? ग्रामे यूयं तिष्ठत । ज्ञाने वयं तिष्ठामः । ज्ञाने युष्माभिः स्थितम् । शीलेऽस्माभिः स्थितम् । ज्ञान युष्मदागतम् । शीलमस्मदागतम् । ज्ञानं युष्मासु तिष्ठति । शीलमस्मास्वायतते । बहुत्व इति किम् ? धर्मस्त्वां रक्षतु । धर्मो मां रक्षतु । धर्मो युवां रक्षतु । धर्म आवां रक्षतु ।

५७. वाम् नौ द्वित्वे ।

एकवाक्ये वर्तमानयो. पदात्परयोर्युष्मदस्मदोः द्वितीयाचतुर्थीषष्ठीविभक्तिसहितयोर्यथासंख्यं वाम्, नौ—इत्येतावादेशौ वा भवत. द्विवचनविषये । धर्मो वां रक्षतु । धर्मो नौ रक्षतु । धर्मो युवां रक्षतु । धर्म आवां रक्षतु । ग्रामो वां दीयते । जनपदो नौ दीयते । ग्रामो युवाभ्या दीयते । जनपद आवाभ्यां दीयते । ग्रामो वां स्वम् । जनपदो नौ स्वम् । ग्रामो युवयो. स्वम् । जनपद आवयोः स्वम् । पदादिति किम् ? युवां धर्मो रक्षतु । आवां धर्मो रक्षतु । एकवाक्ये इति किम् ? ओदनं पचत युवयोर्भविष्यति आवयोर्भविष्यति ।

५८. ते मे ङेङसा ।

एकवाक्ये वर्तमानयोः पदात्परयोर्युष्मदस्मदोर्ङे ङस् इत्येताभ्यां सह यथासंख्य ते, मे—इत्येतावादेशौ वा भवतः । ते मे इति लुप्तद्विवचनान्तं पदम् । ङेङसेत्येकवचनं स्थानिभ्यामादेशाभ्यां च यथासख्यनिवृत्त्यर्थम् । ग्रामस्ते दीयते । जनपदो मे दीयते । ग्रामस्तुभ्य दीयते । जनपदो मह्यं दीयते । ग्रामस्ते स्वम् । जनपदो मे स्वम् । ग्रामस्तव स्वम् । जनपदो मम स्वम् । एकवाक्य इति किम् ? ओदनं पच तव भविष्यति मम भविष्यति । पदादिति किम् ? तुभ्यं ग्रामो दीयते । मह्यं जनपदो दीयते । तव ग्राम· स्वम् । मम जनपद. स्वम् । ङेङसेति किम् ? पटस्त्वया क्रियते । धर्मो मया क्रियते । कथं 'न मे श्रुता नापि च दृष्टपूर्वा' ? न मे— न मयेति ह्यत्रार्थ. स्यादिप्रतिरूपकमव्ययमेतत् । असाधुरेवायमिति कश्चित् ।

५९. त्वामाऽमा ।

एकवाक्ये वर्तमानयोः पदात्परयोर्युष्मदस्मदोः अमा—द्वितीयैकवचनेन सह यथासंख्यं त्वा, मा—इत्येतावादेशौ वा भवत. । धर्मस्त्वा रक्षतु । धर्मो मा रक्षतु । धर्मस्त्वां रक्षतु । धर्मो मां रक्षतु । एकवाक्य इति किम् ? अतित्वां पश्यतु । अतिमां पश्यतु । पदादिति किम् ? त्वामीक्षते, मामीक्षते ।

६०. असद्वदामन्त्रितं पूर्वम् ।

युष्मदस्मद्भ्यां पूर्वमामन्त्रितं पदं असद्वद् भवति । सति तस्मिन् यत् कार्यं तन्न भवति असति यत्तद् भवतीत्यर्थः । श्रमणाः ! युष्मान् रक्षतु धर्मः । श्रमणाः ! अस्मान् रक्षतु धर्मः । श्रमणाः ! युष्मभ्यं दीयते । श्रमणाः ! अस्मभ्यं दीयते । श्रमणाः ! युष्माकं शीलम् । श्रमणाः ! अस्माकं शीलम् । श्रमणौ ! युवां रक्षतु धर्मः । श्रमणौ ! आवां रक्षतु धर्म. । श्रमणौ ! युवाभ्यां दीयते आवाभ्यां दीयते । श्रमणौ ! युवयोः स्वमावयोः स्वम् । श्रमण ! त्वा रक्षतु तपः मां रक्षतु तपः । श्रमण ! तुभ्य दीयते मह्यं दीयते । श्रमण ! तव शीलं मम शीलम् । एषु आमन्त्रितपदस्याऽसत्त्वाद् वस्नसादयो न भवन्ति । पूर्वमिति किम् ? निवेदितं मया पूर्वं यद्वो मुनिसत्तमाः । आमन्त्रितमिति किम् ? धर्मो वो रक्षतु । धर्मो नो रक्षतु । सर्वदा रक्ष देव ! न. इत्यत्र तु देव इत्यस्याऽसत्त्वेऽपि रक्ष इत्येतदाश्रित्यादेशो भवति ।

६१. न विशेष्याद् विशेषणम् ।

युष्मदस्मद्भ्यां पूर्वं विशेष्यात् परं विशेषणमामन्त्रितं पदं असद्वद् न भवति । साधो कृपालो ! त्वा शरणं प्रपद्ये । साधू कृपालू ! वां शरणं प्रपद्ये । साधो कृपालो ! मा रक्ष । साधू कृपालू ! नौ रक्षतम् । साधो कृपालो ! ते ज्ञानं दीयते, मे ज्ञानं दीयताम् । साधू कृपालू ! वां ज्ञानं दीयते, नौ ज्ञानं दीयताम् । साधो कृपालो ! ते शीलं स्वं, मे शीलं

स्वम् । साधू कृपालू ! वां शीलं स्व. नौ शीलं स्वम् । विशेषणमिति किम् ? कृपालो साधो ! त्वां शरणं प्रपद्ये, मां शरणं प्रपद्ये ।

६२. बहुत्वे वा ।

युष्मदस्मद्भ्यां पूर्वं बहुवचनान्तं विशेष्यात् परं विशेषणमामन्त्रितं पदं असद्वद् वा भवति । जिनाः शरण्या ! युष्मान् शरणं प्रपद्ये । जिना. शरण्या. ! व शरणं प्रपद्ये । जिना शरण्या ! अस्मान् रक्षत । जिनाः शरण्याः ! नो रक्षत । बहुत्व इति किम् ? साधो कृपालो ! न पाहि । विशेष्याद् विशेषणमिति किम् ? शरण्याः साधव. ! युष्मान् शरण प्रपद्ये । शरण्या साधव ! अस्मान् रक्षत ।

६३. न पादाद्योः ।

नियतपरिमाणमात्राक्षरपिण्डः पाद. । पदात् परयोर्युष्मदस्मदोर्ये प्रागुक्ता वस्नसादय आदेशास्ते पादस्यादिभूतयोर्न भवन्ति ।

वीरो विश्वेश्वरो देवो, युष्माकं भवतारकः ।
स एव नाथो भगवान्, अस्माकं पापनाशनः ॥

पादाद्योरिति द्विवचनं युष्मदस्मदोरभिसंबन्धार्थम् । पादादाविति हि उच्यमाने आमन्त्रितमभिसंबध्येत । पादाद्योरिति किम् ?

पातु वो देशनाकाले, जैनेन्द्रं वचनामृतम् ।

६४. चवाहाहैवयोगे ।

च, वा, ह, अह, एव—एभिर्योगे संबन्धे पदात्परयोर्युष्मदस्मदोर्ये प्रागुक्ता वस्नसादयस्ते न भवन्ति । ज्ञानं युष्मांश्च रक्षतु, अस्मांश्च रक्षतु । ज्ञानं युष्मान् वा रक्षतु, अस्मान् वा रक्षतु । ज्ञानं युष्मान् ह रक्षतु, अस्मान् ह रक्षतु । ज्ञानं युष्मानह रक्षतु, अस्मानह रक्षतु । ज्ञान युष्मानेव रक्षतु, अस्मानेव रक्षतु । ज्ञानं युष्मभ्य च दीयते, अस्मभ्यं च दीयते । ज्ञान युष्माक च स्व, अस्माक च स्वम् । ज्ञानं युवां च रक्षतु, आवां च रक्षतु । ज्ञानं युवाभ्यां च दीयते, आवाभ्यां च दीयते । ज्ञानं युवयोश्च स्व, आवयोश्च स्वम् । एवमेकत्रेऽपि योगग्रहणाद् युष्मदस्मदो साक्षात्संबन्धे एवायं निषेध., परंपरासंबन्धे तु भवत्येव—ज्ञान च शील च वो रक्षतु, नो रक्षतु । ज्ञानं च शील च वां दीयते, नौ दीयते । ज्ञान च शीलं च ते स्वं, मे स्वम् । नैतेषु चशब्देन युष्मदस्मदोर्योगोऽपि तु ज्ञानशीलयोः ।

६५. दृश्यर्थैरनालोकने ।

अनालोकनमचाक्षुषविषयः । दृशिना समानार्था दृश्यर्थाः । तैर्धातुभिर्योगेऽनालोकनार्थे युष्मदस्मदोर्ये प्रागुक्ता आदेशास्ते न भवन्ति । चेतसा त्वां समीक्षते । जनो मामपेक्षते । जनो युवां समीक्ष्यागतः । जन आवां समीक्ष्यागत. । जनो युष्मान् संदृश्य आगत । जनोऽस्मान् संदृश्य आगत । ज्ञानं तुभ्यं दीयमानं निध्यायति । ज्ञानं मह्यं दीयमानं निध्यायति । ज्ञानं युवाभ्यां दीयमान निरूपयति । ज्ञानमावाभ्यां दीयमान निरूपयति । ज्ञानं युष्मभ्यं दीयमानमुत्पश्यति । ज्ञानमस्मभ्यं दीयमानमुत्पश्यति । गुरुस्तव कार्यमालोचयति । गुरुर्मम कार्यमालोचयति । जनो युवयोः कार्यं संपश्यति । जन आवयोः कार्य संपश्यति । जनो युष्माकं चित्तमुपलक्षयति । जनोऽस्माकं चित्तमुपलक्षयति । सर्वत्र मनसा चिन्तितं दृश्यर्थानामर्थः । दृश्यर्थैरिति किम् ? जनो वो मन्यते । जनो नो मन्यते । अनालोकने इति किम् ? जनस्त्वालोकयति । जनो मालोकयति । जनो वामीक्षते । जनो नावीक्षते । जनो वः पश्यति । जनो नः पश्यति । सर्वत्र चक्षुषा पश्यतीत्यर्थः ।

६६. नित्यमन्वादेशे ।

कथितानुकथनमन्वादेशः । कस्यचिद् वस्तुन किञ्चित् क्रियादिकं विधातुं कथितस्य तेनाऽन्येन वा शब्देन

पुनरन्यद् विधातु कथनमित्यर्थः । अन्वादेशे पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्नित्यं भवति । यूयं विनीता अथो वो गुरवो मानयन्ति । वयं विनीता अथो नो गुरवो मानयन्ति । युवां शीलवन्तौ तद्वां गुरवो मानयन्ति । आवां शीलवन्तौ तन्नौ गुरवो मानयन्ति । त्वं विद्वानथो ते पूज्यैर्ज्ञानं दीयते । अहं विद्वानथो मे पूज्यैर्ज्ञानं दीयते । धनवांस्त्वमथो त्वा लोको मानयति । धनवानहमथो मा लोको मानयति ।

६७. सपूर्वात् प्रथमान्ताद् वा ।

विद्यमानपूर्वपदात्प्रथमान्तात् पदात्परयोर्युष्मदस्मदोरन्वादेशे वस्नसादय आदेशा वा भवन्ति । यूयं विनीतास्तद् गुरवो वो मानयन्ति, तद् गुरवो युष्मान्मानयन्ति । वय विनीतास्तद् गुरवो नो मानयन्ति, तद् गुरवोऽस्मान् मानयन्ति । युवां सुशीलौ तज्ज्ञान वां युवाभ्यां वा दीयते । आवा सुशीलौ तज्ज्ञान नौ आवाभ्यां वा दीयते । सुशीलस्त्वमथो क्षमाश्रमणास्ते तुभ्यं वा ज्ञानं प्रयच्छन्ति । सुशीलोऽहमथो क्षमाश्रमणा मे मह्यं वा ज्ञान प्रयच्छन्ति । धनवांस्त्वमथो ग्रामे कम्बलस्ते तव वा स्वम् । धनवानहमथो ग्रामे कम्बलो मे मम वा स्वम् । धनवांस्त्वं तल्लोकस्त्वा त्वां वा पूजयति । धनवानहं तल्लोको मा मां वा पूजयति । सपूर्वादिति किम् ? पटो युष्माकं स्वम् । अथो व कम्बल स्वम् । प्रथमान्तादिति किम् ? पटो नगरे युष्माकं स्वम् । अथो कम्बलो ग्रामे वः स्वम् । पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ।

६८. एनत्त्यदादेरेतदो द्वितीयाटौस्स्वऽसमासान्ते ।

अन्वादेश इत्यनुवर्तते । त्यदादिसबन्धिन एतच्छब्दस्य एनदादेशो भवति अन्वादेशे द्वितीयायां टायामोसि च परे, न चेदेतच्छब्द. समासस्याऽन्ते भवति । उद्दिष्टमेतदध्ययनमथो एनदनुजानीत । एतकं साधुमावश्यकमध्यापय अथ एनमेव सूत्राणि । साकोऽप्यादेशः । सुशीलावेतौ तदेनौ गुरवो मानयन्ति । सुस्थिता एते तदेनान् देवा अपि नमस्यन्ति । टा—एतेन रात्रिरधीता अथो एनेनाहरप्यधीतम् । ओस्—एतयो शोभन शीलमथो एनयोर्महती कीर्तिः । त्यदादेरिति किम् ? एतन्नामा कश्चित्, तत्र एतदं संगृहाण अथो एतदमध्यापय । संज्ञायामसर्वादित्वादत्यदादि । असमासान्ते इति किम् ? अथो परमैतं पश्य । अन्तग्रहणं किम् ? एनच्छ्रितकः—अत्र अर्थात् प्रकरणाद्वा समासोऽन्वादेशश्च । द्वितीयाटौस्स्विति किम् ? एते मेधाविनो विनीता अथो एते शास्त्रस्य पात्रम् । एतस्मै सूत्रं देहि अथो एतस्मै अनुयोगमपि देहि । अन्वादेशे इति किम् ? जिनदत्तमध्यापय एतं च यज्ञदत्तम् ।

६९. इदमः ।

पूर्वमनुवर्तते । योगविभाग उत्तरार्थः । त्यदादिसबन्धिन इदशब्दस्य एनदादेशो भवति अन्वादेशे द्वितीयायां टायामोसि च परे, न चेदिदंशब्द समासान्ते भवति । उद्दिष्टमिदमध्ययनमथो एनदनुजानीत । इमकं साधुमावश्यकमध्यापय अथो एनमेव सूत्राणि । साकोप्यादेश । एवं एनौ, एनान्, एनेन, एनयोः । असमासान्त इति किम् ? अथो परमेमं पश्य । द्वितीयाटौस्स्विति किम् ? मत्पुत्रकौ शीलवन्ताविमकौ तिष्ठत । अन्वादेश इति किम् ? चैत्रमध्यापय इमं च मैत्रम् ।

७०. हसेऽश् ।

त्यदादिसंबन्धिन इदंशब्दस्य अशादेशो भवति अन्वादेशे हसादौ स्यादौ परे असमासान्ते । शित्वात्सर्वस्य । 'अनकः' [२/१/७१] इति वक्ष्यमाणवचनादिह साक एवायं विधिः । इमकाभ्यां शैक्षकाभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम् । इमकैः शैक्षकै रात्रिरधीता अथो एभिरहरप्यधीतम् । एवमिमकस्मै अथो अस्मै । इमिकस्यै अथो अस्यै । इमकस्मादथो अस्मात् । इमकस्याऽथो अस्य । इमकेषामथो एषाम् । इमकस्मिनथो अस्मिन् । इमिकस्यामथो अस्याम् । इमकेषु अथो एषु । इमिकासु अथो आसु । सौ तु परत्वादयमाद्यादेशः—अथो अयं शीलवान् । केचिदेतदोपीच्छन्ति—एताभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम् । एवं एतैः, एभिः । एतस्मै, अस्मै इत्यादि । अन्वादेश इति किम् ? इमकस्मै देहि । असमासान्त इति किम् ? परमेमकाभ्यां रात्रिरधीता अथो परमेमकाभ्यामहरप्यधीतम् । हसे इति किम् ? अथो इमके तिष्ठन्ति ।

७१. अनकः ।

अन्वादेश इति निवृत्त पृथग्योगात् । त्यदादिसबन्धिन अग्रहितस्य इदशब्दस्य अशादेशो भवति हसादौ स्यादौ परे । आभ्याम् । एभिः, आभिः । अस्मै, अस्यै । अस्मात्, अस्याः । अस्य, अस्याः । एषाम्, आसाम् । अस्मिन्, अस्याम् । एषु, आसु । अनक इति किम् ? इमकाभ्याम्, इमकेभ्यः, इमकस्मै, इमिकस्यै, इमकेषाम् । तत्सबन्धिविज्ञानादिह न— अतीदंभ्याम्, अतीदंसु, प्रियेदसु । इह तु भवत्येव—परमैभिः, परमाभिः । परमास्मै, परमास्यै । परमास्मात्, परमास्याः ।

७२. अनष्टौसोः ।

त्यदादिसबन्धिन. अग्रहितस्य इदंशब्दस्य अनादेशो भवति टायामोसि च परे । अनेन, अनया । अनयो स्वम् । अनयोर्निधेहि । परमानयोः । त्यदादिसबन्धिविज्ञानादिह न —अतीदमा, अतीदमो , प्रियेदमा, प्रियेदमो । अनक इति किम् ? इमकेन, इमकयोः । इमिकया, इमिकयोः ।

७३. सावऽयं पुंसि ।

त्यदादिसबन्धिन इदशब्दस्य अयमित्यादेशो भवति सौ परे पुलिङ्गविषये । अय पुमान्, परमायम्, अनयम् । साविति किम् ? इमौ, इमे । त्यदादिसबन्धिविज्ञानादिह न—अतीद पुमान् । पुसीति किम् ? इय ब्राह्मणी । नपुसके तु नित्यत्वात्प्रथममेव सेर्लुकि इदमित्येव भवति । साकोऽप्ययमादेश । अयम् । अन्ये त्वादेशे कृते पश्चादकमिच्छन्ति । अयकम् ।

७४. इयं स्त्रियाम् ।

त्यदादिसंबन्धिन इदशब्दस्य इयमित्यादेशो भवति सौ परे स्त्रीलिङ्गविषये । इयं धेनुः, परमेयम्, अनियम् । साविति किम् ? इमे, इमाः । त्यदादिसंबन्धिविज्ञानादिह न—अतीद स्त्री । स्त्रियामिति किम् ? अय पुमान् । साकोऽप्यादेशः । इयम् । अन्ये त्वत्रापि पूर्ववदिच्छन्ति । इयकम् ।

७५. दो मः स्यादौ ।

त्यदादिसबन्धिन इदमो दकारस्य मकारादेशो भवति स्यादौ परे । इमौ, परमेमौ, इमे, इमम्, इमौ, इमान्, इमकौ, इमकेन, इमकाभ्याम् । त्यदादिसबन्धित्वान्नेह—अतीदमौ, प्रियेदमौ ।

७६. किमः कः ।

त्यदादिसंबन्धिन किमित्येतस्य क इत्ययमादेशो भवति स्यादौ परे । क , कौ, के । कम्, कौ, कान् । केन, काभ्याम्, कै । स्त्रियाम्—का, के, काः । काम्, के, काः । नपुसके—के, कानि । परमकः, परमकौ । अकः, अकौ । साकोऽपि—कः, कौ । कादेशविधानं साकोऽप्यादेशार्थम् । तत्सबन्धित्वान्नेह—प्रियकिम्, प्रियकिमौ, प्रियकिमः ।

७७. आ द्वेष्टेरः ।

द्विशब्दमभिव्याप्य तत्सबन्धिनां त्यदादीनां टेरकारादेशो भवति स्यादौ परे । स्यः, त्यौ, त्ये । सः, तौ, ते । यः, यौ, ये । अमू, अमी । इमौ, इमे । एष , एतौ, एते । एव द्वौ, त्यकौ, परमत्यौ । स्त्रियां—स्या, त्ये, त्याः । द्वे । नपुसके—त्ये, त्यानि । द्वे । तत्संबन्धित्वान्नेह—अतित्यद्, अतित्यदौ, अतित्यदः । प्रियतद्, प्रियतदौ, प्रियतदः । आ द्वेरिति किम् ? भवान् ।

७८. तः सौ सः ।

द्विशब्दमभिव्याप्य तत्संबन्धिनां त्यदादीनां तकारस्य सकारादेशो भवति सौ परे । स्यः, स्या, स्यकः, परमस्यः । सः, सा, सकः, परमसः । एष , एषा, एषकः, परमैष । हे स, हे परमस, हे परमैष । तत्संबन्धित्वान्नेह—प्रियत्यद् । साविति

किम् ? त्यौ, त्ये । तौ, ते । आ द्वेरिति किम् ? भवती ।

७९. अदसो दः सेस्तु डौः ।

अदसो दकारस्य सौ परे सकारादेशो भवति, सेस्तु डौर्भवति । डित्वाट्टिलोपः । असौ, असकौ पुमान् स्त्री वा । हे असौ, हे असकौ । तत्संबन्धित्वान्नेह—अत्यदाः पुमान् । डित्करणं टिलोपार्थं, तेन 'आपः' [१/४/२८] इत्यादि कार्यं न भवति ।

८०. असुको वाऽकि ।

सौ परे अदसोऽकि सति असुक इति वा निपात्यते । असुक असकौ वा पुमान् । असुका असकौ वा स्त्री । केचित्तु असुकसिति सान्तं सिना सह निपातयन्ति ।

८१. मावुवर्णोऽनु ।

अदसः संबन्धिनो मकारात्परस्य वर्णमात्रस्य उवर्ण आदेशो भवति, स च कार्यान्तरेभ्यः पश्चात् । आसन्नत्वात् मात्रिकस्य स्थाने मात्रिक । द्विमात्रस्य द्विमात्रः, त्रिमात्रस्य त्रिमात्र । अमुम्, अमू, अमू ३ इति । 'प्रश्ने च प्रतिपदम्' [८/४/११०] इति प्लुतः । अमुमुयङ्, अमुमुईचः, अदमुईच अदमुईचा । 'असंभिदस्सो मुमौ' [१/२/३५] इति संधि-प्रतिषेधः । अन्विति किम् ? अमुष्मै, अमुष्मात्, अमुष्य, अमुष्मिन्, अमूषाम्, अमुया, अमुयोः—इत्यादिषु स्मैप्रभृतिकार्येषु कृतेषूवर्णो यथा स्यादित्येवमर्थम् । पूर्वमुवर्णे कृते तदभावात् ।

८२. प्रागिनात् ।

अदसो मात्परस्य वर्णमात्रस्य इनादेशात् प्रागुवर्णो भवति । अन्वित्यस्यापवादोऽयम् । अमुना पुंसा कुलेन वा । इनादिति किम् ? अमुया स्त्रिया ।

८३. एरीर्बहुत्वे ।

अदसो मात्पर एकार ईकारो भवति बहुत्वविषये । अमी, अमीभिः, अमीभ्य , अमीभ्य , अमीषाम्, अमीषु । एरिति किम् ? अमूः कन्याः । अमून् नरान् । बहुत्व इति किम् ? अमू कन्ये । मादिति किम् ? अमुके, अमुकेभ्यः ।

८४. धो मोऽवर्णस्य ।

अवर्णान्तस्य अदसः संबन्धिनो दकारस्य मकारादेशो भवति । 'आ द्वेष्टेरः' [२/१/७७] इत्यवर्णान्तत्वम् । अमू नरौ, स्त्रियौ, कुले वा । अमी नराः । अमूः स्त्रियः । अमूनि कुलानि । अमुकौ नरौ । परमामुम् । अमूदृक्, अमूदृशः, अमूदृक्षः—अत्र 'अन्यत्यदादेराः' [३/२/१३४] इत्यात्वे सत्यवर्णान्तत्वम् । अवर्णस्येति किम् ? अदः कुलम्, अदस्यति ।

८५. अदद्र्यचो वा ।

अदद्र्यच्शब्दस्य दस्य मो वा भवति । द्वावत्र दकारौ तत्र विकल्पे सति चातूरूप्यं भवति । अदमुयङ्, अमुद्र्यङ्, अमुमुयङ्, अदद्र्यङ् । तदाह—

परतः केचिदिच्छन्ति, केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति, केचिदिच्छन्ति नोभयोः ॥

८६. अर्वणस्त्रसावनञः ।

नञ्वर्जस्यार्वणस्तृ इत्यन्तादेशो भवति सिवर्जिते प्रत्यये परे । ऋकारो नुमागमार्थः । अर्वन्तौ, अर्वन्तः । अर्वन्तम्, अर्वन्तौ, अर्वन्तः । अर्वता, अर्वद्भ्याम्, अर्वद्भिः । आर्वतम्, अर्वती इत्यादि । असाविति किम् ? अर्वा । अनञ इति किम् ?

अनर्वाणौ, अनर्वाण.। केचित् तृ इत्यादेशं नेच्छन्ति। अर्वा, अर्वाणौ, अर्वाणः इत्यादि।

८७. त्रिचतुरः स्त्रियां तिसृचतसृ स्यादौ।

स्त्रियां वर्तमानयोः त्रि चतुरित्येतयोर्यथासंख्य तिसृ, चतसृ—इत्येतावादेशौ भवतः स्यादौ परे। तिस्रस्तिष्ठन्ति। तिस्रः पश्य। चतस्रस्तिष्ठन्ति। चतस्रः पश्य। तिसृभि, चतसृभि.। तिसृभ्यः, चतसृभ्यः। तिसृणाम्, चतसृणाम्। तिसृषु, चतसृषु। स्त्रियामिति किम्? त्रयः, चत्वार। त्रीणि, चत्वारि। यदा स्त्रियां त्रिचतु शब्दौ समासेन लिङ्गान्तरे तथाप्यादेशौ भवत एव—प्रियास्तिस्रो ब्राह्मण्यो यस्य स प्रियतिसा। प्रियतिस्रौ, प्रियतिस्र। एवं प्रियचतसा, प्रियचतस्रौ, प्रियचतस्रः। प्रियतिसृ, प्रियतिसृणी, प्रियतिसृणि। प्रियचतसृ, प्रियचतसृणी, प्रियचतसृणि। यदा तु त्रिचतुःशब्दौ लिङ्गान्तरे समासेन स्त्रीत्वं नैतावादेशौ स्तः—प्रियास्त्रयो यस्या प्रियाणि त्रीणि वा यस्या सा प्रियत्रि। प्रियत्री, प्रियत्रय। एव प्रियचत्वा., प्रियचत्वारौ, प्रियचत्वारः। विभक्त्याश्रयत्वेन बहिरङ्गस्य तिसृचतस्रादेशस्य असिद्धत्वात्समासान्तो कप् न भवति। स्यादाविति किम्? प्रियत्रिकः, प्रियचतुष्कः। कथं तिसृका नाम ग्रामः? संज्ञाशब्दोऽयम्।

८८. ऋतो रः स्वरेऽनि।

तिसृ, चतसृ—इत्येतयो[1] ऋकारस्य रेफादेशो भवति स्यादौ स्वरे परे नकारविषयादन्यत्र। समानदीर्घत्वाङूनामऽपवादः[2]। तिस्रः, चतस्रस्तिष्ठन्ति पश्य वा। प्रियतिस्रौ, प्रियचतस्रौ। प्रियतिस्रम्, प्रियचतस्रम्। प्रियतिस्र, प्रियतिस्र., प्रियचतस्र., प्रियचतस्र.। प्रियतिस्रि, प्रियचतस्रि। स्वर इति किम्? तिसृभिः, चतसृभिः। अनीति किम्? प्रियतिसृणी, प्रियचतसृणी। प्रियतिसृणि, प्रियचतसृणि। तिसृणाम्, चतसृणाम्।

८९. जराया जरस्वा।

जराशब्दस्य जरस् इत्ययमादेशो वा भवति स्वरादौ स्यादौ परे। जरसौ, जरसः, जरसम्, जरसौ, जरसः, जरसा, जरसे, जरसः, जरस., जरसो, जरसो, जरसाम्, जरसि। पक्षे—जरे, जरा, जराम्, जरे, जरा, जरया, जरायै, जरायाः, जरायाः, जरयोः, जरयोः, जराणाम्, जरायाम्। **एकदेशविकृतमनन्यत्वात्** अतिजरसौ, अतिजरौ, अतिजरसः, अतिजरा, अतिजरसम्, अतिजरम्, अतिजरस, अतिजरान्, अतिजरसा, अतिजरेण, अतिजरसै, अतिजरैः, अतिजरसे, अतिजराय, अतिजरस, अतिजरात्, अतिजरस., अतिजरस्य, अतिजरसो, अतिजरयो, अतिजरसाम्, अतिजराणाम्, अतिजरसि, अतिजरे। नपुंसके स्यमोरम्भावे—अतिजरसम्, अतिजरम् तिष्ठति पश्य वा। अतिजरशब्दस्य स्त्रियामपि अतिजरा, तस्य तु विभक्तेरापा व्यवधानान्न जरसादेश इति। स्वर इति किम्? जराभ्याम्, जराभि। स्यादाविति किम्? जराग्रम्, जारेय।

९०. भि वऽपाम्।

अप्शब्दस्य स्यादौ भकारे परे दकारोऽन्तादेशो भवति। अद्भि, अद्भ्यः, स्वद्भ्याम्, अत्यद्भ्याम्। भीति किम्? अप्सु। स्यादाविति किम्? अब्भक्षः।

९१. णषमऽसिद्धं परे स्यादिविधौ च।

इतः सूत्रादारभ्य यत्परं कार्यं विधास्यते तस्मिन् पूर्वस्मिश्च स्याद्यधिकारविहिते विधौ कर्तव्ये णत्वं षत्व चाऽसिद्धं भवति। एतत्सूत्रनिर्दिष्टयोश्च[3] णत्वषत्वयो. परे षत्वे णत्वमसिद्धं भवति। णषशास्त्रं वा परे स्यादिविधौ च शास्त्रे

---

१. **अर्थवशाद् विभक्तिविपरिणामतः** तिसृ, चतसृ इत्येतयोः षष्ठ्यन्तयोरेवानुवर्त्तनम्।

२. **'शसोऽता दीर्घः …'** [१/४/७२] इति, **'अतो'** [१/४/५२] इति, **'वृद्धि'** [१/४/५३] इति, **'ऋतो डुः'** [१/४/५१] इति प्राप्तानाम्।

३. यदि तु द्वितीयाध्यायस्य द्वितीयचरणोक्तक्रमेण षण इति क्रियते तदाऽभिषुणोतीत्यादि न सिध्यति। **'उपसर्गात्सुगसुवसो…'** [२/२/३६] इत्यनेन विहितस्य षत्वस्य णत्वे परेऽसिद्धत्वात् **'एकपदे रषृवर्णान्नो…'** [२/२/६६] इत्यनेन षकाराद् विधीयमानं णत्वं न स्यात्।

प्रवर्तमानेऽसिद्धं भवति । पूषभ्याम्, तक्षभ्याम्—अत्र णत्वस्याऽसिद्धत्वात् **'नाम्नो नोऽनह्नः'** [२/१/१२१] इति **नकारलोपो** भवति । पिपठीः—अत्र षत्वस्याऽसिद्धत्वात् सकारस्य **'सुसजुषाम्'** [२/१/१०७] इति रेफस्तस्य **विसर्गो भवति ।** स्यादिविधौ च—अनर्बाणौ, सर्पींषि—अत्र णत्वषत्वयोरसिद्धत्वात् उपधादीर्घत्वं सिद्धम् । असिद्धं परे इत्यधिकारो **'रात्सः'** [२/१/१२०] इति यावत् । स्यादिविधौ चेति तु आ चरणपरिसमाप्ते: ।

९२. क्तादेशः ।

ककारेण उपलक्षितस्य तकारस्य स्थाने आदेशः परे कार्ये स्यादिविधौ च कर्तव्येऽसिद्धो भवति । क्षामस्याऽपत्यं—क्षामि, सोऽस्त्यस्य क्षामिमान् । अत्र **'क्षंशुषिपचिभ्यो मकवाः'** [५/३/८४]इति क्तादेशस्य मकारस्य असिद्धत्वात् **'मावर्णान्तोपधाद् वतुः'** [८/१/२] इति मतुबाधको वतुर्न भवति । शुष्किका—अत्र क्तादेशस्य ककारस्य असिद्धत्वात् **'यकावापोऽधातुस्यात्'** [२/३/१०२] इतीत्वविकल्पो न भवति । पक्वम्—अत्र क्तादेशस्य वत्वस्य असिद्धत्वात् **'चजोः कगौ'** [२/१/११६] इति कत्वं भवति । बुद्ध्वा दुग्ध्वा—अत्र क्तादेशस्य धकारस्य असिद्धत्वात् **'आदिडबानां झभान्तस्यैकस्वरस्य ढभाः स्ध्वोः प्रत्यययोश्च'** [२/१/१०६] इति ढभो न भवति । स्यादिविधौ च—लून्युः, पून्युः,—अत्र क्तादेशस्य नत्वस्य असिद्धत्वात् त्याश्रित उर्भवति । परे स्यादिविधौ चेति किम् ? लग्नः, मग्नः । अत्राऽस्यादिविधौ पूर्वसूत्रकार्ये **'लसे चपा झथानाम्'** [१/३/४०] इति चपत्वे नत्वस्य असिद्धत्वाभावात् चपो न भवति ।

९३. षढोः कः से ।

षकारढकारयो: स्थाने ककारादेशो भवति सकारे परे, स च परेऽसिद्धः । पिष्—पेक्ष्यति, पिपिक्षति । दृश्—अद्राक्षीत् । सृज्—अस्राक्षीत् । लिह्—लेक्ष्यति, लिलिक्षति । गुह्—निघोक्ष्यति । स इति किम् ? पिनष्टि । निघोक्ष्यतीत्यत्र ढस्थानस्य ककारस्य परेऽसिद्धत्वात् झभान्तलक्षण आदेर्ढभो भवति ।

९४. भ्वादेरिवुतोर्दीर्घो र्वोर्हसे ।

भ्वादेर्धातोरवयवभूतौ यौ रेफवकारौ तयो: परयोस्तस्यैव भ्वादेरिकारोकारयोर्दीर्घो भवति हसे, ताभ्यां चेत्परो हसो भवति । आस्तीर्णम्, विस्तीर्णम्, प्रस्तीर्णम्, चिकीर्षति, दीव्यति, सीव्यति, हूर्च्छा[1], हूर्च्छति, मूर्च्छा[2], मूर्च्छति, पूर्तम्, कूर्दते, बुभूर्षति । असिद्धाधिकारे स्वरादेशस्य लोपस्य स्थानिवद्भावप्रतिषेधात् प्रतिदीव्ना, प्रतिदीव्ने । भ्वादेरिति किम् ? चतुर्भिः, चतुर्थ । धातोरेव सिद्धे भ्वादिवचनं नामधातुनिवृत्त्यर्थम् । कुर्कुरमिच्छति—कुर्कुरीयति । इदुतोरिति किम् ? स्मर्यते, भव्यम् । र्वोरिति किम् ? बुध्यते । हसे इति किम् ? किरति । र्वोर्भ्वादिसंबन्धिविशेषणं किम् ? दीव्यतेः क्वनिपि वकारलोपे दिवन् । दिव्ना, दिव्ने । इदुतोर्भ्वादिसंबन्धिविशेषणं किम् ? दधिव्रज्या । प्रत्यासत्त्या तस्यैवेति विशेषणं किम् ? ग्रामणिव्रज्या ।

९५. पदान्ते ।

पदान्ते वर्तमानयोर्भ्वादिसंबन्धिनो रेफवकारयोः परयोस्तस्यैव भ्वादेरिकारोकारयोर्दीर्घो भवति । गीः[3], गीर्भ्याम्, गीर्षु । धूः[4], धूर्मान् । आशीः, आशीर्भ्याम् । सजूः, सजूःषु । पदान्त इति किम् ? गिरौ, गिरः । लुवौ, लुवः । इदुतोरिति किम् ? अजागः, अबिभः । र्वोरिति किम् ? मधुलिट् । भ्वादेरिति किम् ? हविर्भ्याम्, चतुर्भ्याम् । पदान्त इत्यधिक्रियते **'दधातेस्तथोश्च'** [२/१/११०] इत्यतः प्राक् ।

---

१. अवात् ।

२. भिदादित्वात् अः ।

३. गॄश् शब्दे, गॄज् निगरणे वा—गृणन्ति, उद्गिरन्तितामिति क्विप्, **'ऋतां क्ङितीर्'** [४/३/५३] इति इर् ।

४. धुर्वी हिंसायाम्—धूर्वति हिनस्तीति क्विप्, **'राल्लोपः'** [४/३/४०] इति वकारलोपः ।

९६. न कुरुच्छुरोः ।

कुरुच्छुरोः संबन्धिन उकारस्य रेफे परे दीर्घो न भवति । कुर्यात्, कुर्व , कुर्मः, छुर्यात्, छुर्यते । कुर्वित्युकारः किम् ? कुरज् शब्दे—कूर्यात्, कूर्यते । केचिदस्यापि प्रतिषेधमिच्छन्ति ।

९७. यि तद्धिते ।

यकारादौ तद्धिते परे यौ वौ तयोः परयोरिकारोकारयोर्दीर्घो न भवति । गिरि साधुः—गिर्यः । धुर वहति—धुर्यः । यीति किम् ? गीर्वत्, धूर्वत् । तद्धित इति किम् ? गिरमिच्छति—गीर्यति । धूर्यति । गीरिवाचरति—गीर्यते । धूर्यते, कीर्यते, गीर्यते, दीव्यति, सीव्यति, दीव्यात्, सीव्यात् । केचित् क्यच्क्यङोरपि प्रतिषेधमिच्छन्ति । तन्मते गिर्यति, गिर्यते, धुर्यति, धुर्यते इत्येव भवति । इह कस्मान्न भवति—पुर्याम्, गिर्योः, किर्योः ? बहिरङ्गलक्षणस्य यत्वस्यासिद्धत्वेन ह्रसाऽभावात् ।

९८. मो नो वमोश्च ।

भ्वादेर्धातोर्मकारस्य नकारोऽन्तादेशो भवति वमयोः परयोः पदान्ते च[1] । स च परेऽसिद्धः । प्रशान्, प्रतान्, प्रशान्भ्याम्, प्रतान्भ्याम् । नत्वस्य[2] परेऽसिद्धत्वान्नलोपाऽभावः । जंगन्वः, जंगन्मः, जंगन्मि, नंनन्वः, नंनन्मः, ननन्मि । वमोश्चेति किम् ? प्रशामौ, प्रशामः । प्रतामौ, प्रतामः । भ्वादेरिति किम् ? इदम्, किम् । म इति किम् ? छित्, भित् ।

९९. क्वस्स्रंस्ध्वंस्भ्रंसनडुहां दः ।

पदान्ते वर्तमानानां सान्तक्वसु, स्रंसु, ध्वंसु, भ्रंसु, अनडुह्—इत्येतेषां दकारोऽन्तादेशो भवति । क्वस्वन्तस्य—विद्वद्भ्याम्, विद्वद्भिः, विद्वत्सु । पपिवद्भ्याम्, पपिवद्भिः । विद्वद्, विद्वत् कुलम् । उखास्रद्भ्याम्, उखास्रद्भिः, उखास्रद् । पर्णध्वद्भ्याम्, पर्णध्वद्भिः, पर्णध्वद् । बुद्धिभ्रद्भ्याम्, बुद्धिभ्रद्भिः, बुद्धिभ्रद् । भ्रंसं नेच्छन्त्यन्ये । अनडुद्भ्याम्, अनडुद्भिः, स्वनडुद् । पदान्त इति किम् ? विद्वांसौ, विद्वांसः, उखास्रसौ, पर्णध्वसौ, बुद्धिभ्रसौ, अनड्वाहौ । क्वस्सिति द्विसकारपाठः किम्? सान्तस्यैव यथा स्यात्, तेनेह न—विद्वान्, हे विद्वन् । एवं तर्हि अनड्वान्, हे अनड्वन्—इत्यत्र नकारस्यापि प्राप्नोति तत्र विशेषणाऽभावात् । नैवम् । नकारविधानसामर्थ्यान्न भविष्यति ।

१००. दिश्दृश्स्पृश्मृश्दधृषुष्णिह्स्रज्ऋत्विजां गः ।

एषां पदान्ते वर्तमानानां गकारोऽन्तादेशो भवति । दिक्, दिग्, दिग्भ्याम्, दिग्भिः, दिक्षु । दृक्, दृग्, दृग्भ्याम्, दृक्षु । स्पृग्, स्पृग्भ्याम्, स्पृक्षु । मृग्, मृग्भ्याम्, मृक्षु । धृष्णोतीति दधृष्, अत एव निर्देशाद् द्वित्वम् । दधृग्, दधृग्भ्याम्, दधृक्षु । ऊर्ध्वं स्निह्यति नह्यति वा उष्णिह्, अत एव निर्देशात् उदो दकारस्य लोपे सस्य षत्व, नहेर्नकारस्य च ण्णिरादेशः । उष्णिग्, उष्णिग्भ्याम्, उष्णिक्षु । सृज्यते इति संपत्क्रुधादित्वात् क्विप्, अत एव निर्देशादृतो रत्वं च । सृ गताविल्यस्य वा कज्—स्रग्, स्रग्भ्याम्, स्रक्षु । ऋतुम् ऋतवे ऋतौ वा यजते—ऋत्विग्, ऋत्विग्भ्याम्, ऋत्विक्षु । पदान्त इति किम् ? दिशौ, दिशः । ऋत्विजौ, ऋत्विजः ।

१०१. नशो वा ।

पदान्ते नशो गत्वं वा भवति । जीवस्य नशनं—जीवनग्, जीवनक् । पक्षे—जीवनड्, जीवनट् । जीवनग्भ्याम्, जीवनड्भ्याम् । पदान्त इति किम् ? जीवनशौ, जीवनशः ।

---

१. पदान्त इत्यनुवर्तमानेन समुच्चयार्थश्चकारो न तु पदान्त इत्यस्यानुकर्षणार्थः ।

२. विधानसामर्थ्याल्लोपाभावो नाशङ्कनीयो वमयोर्विधानस्य चरितार्थत्वादित्याह ।

१०२. अञ्चयुजिक्रुञ्चां नो ङः।

एषां नकारस्य ङकारादेशो भवति पदान्ते। अञ्चतेरपूजायां नलोपे धुटि नुमागमे, पूजायां तु नलोपाऽभावे प्राङ्। प्राङ्भ्याम्, प्राङ्षु, प्राङ्क्षु। युनक्ते: क्विपि धुटि नुमागमे संयोगान्तलोपे युङ्। क्रुञ्चेरत एव निर्देशात् **'अनिदितो हसस्योपधाया नो लोपः क्ङिति'** [४/२/३६] इति नलोपाऽभावे क्रुङ्। क्रुङ्भ्याम्, क्रुङ्षु, क्रुङ्क्षु। पदान्त इति किम्? प्राञ्चौ, प्राञ्चः। युञ्जौ, युञ्जः। क्रुञ्चौ, क्रुञ्चः।

१०३. रोर्विसर्गः।

पदान्ते वर्तमानयोः सकाररेफयोर्विसर्गादेशो भवति। वीरः, जिनः, रामः, वृक्षः, मुनिः, साधुः, प्रातः, पुनः। पदान्त इति किम्? ईर्ते, अर्कः, मूर्खः, सर्पः। कथं नृकुट्यां भव —नार्कुटः, तवर्कारः, प्रार्च्छतीत्यादि? **असिद्धं बहिरङ्गमन्तरङ्गे** इति वृद्ध्यऽरारादेशाश्रयस्य रेफस्याऽसिद्धत्वाद् विसर्गो न।

१०४. न रः सुपि।

रेफान्तस्य जायमानो विसर्गः सुपि परे न भवति। चतुर्षु, गीर्षु, धूर्षु, वार्षु। प्रतिपदोक्तस्यैव ग्रहणादिह तु भवत्येव—पिपठीःषु, सजूःषु।

१०५. सोऽह्नः।

पदान्ते वर्तमानस्याऽहन्शब्दस्य सोऽन्तादेशो भवति, स चाऽसिद्धः परे स्यादिविधौ च। अहः, अहोभ्याम्, अहोभ्याम्, अहोभिः, अहोरात्र, अहो राजते। दीर्घाहा निदाघ —अत्र सकारस्याऽसिद्धत्वान्नान्तलक्षणो दीर्घो भवति। कश्चित्तु दीर्घत्वं नेच्छति। तन्मते दीर्घाहो निदाघः। अहन् शत्रुमित्यत्र तु अहन् शब्दस्य लाक्षणिकत्वान्न भवति।

१०६. रोऽरस्यादिभे।

अहन्शब्दस्य रेफोऽन्तादेशो भवति रेफवर्जिते स्यादिभवर्जिते च परे पदान्ते, स चाऽसिद्धः परे स्यादिविधौ च। अहर्गण[1], अहर्ददाति, अहर्भुङ्क्ते, अहरधीते, अहर्वान्, अहःकाम्यति। अरस्यादिभ इति किम्? अहोरात्रः, अहो राजते, अहोरूपम्, अहोभ्याम्, अहोभिः।

१०७. इसुस्सजुषाम्।

इसन्तस्य उसन्तस्य सजुष्शब्दस्य च रेफोऽन्तादेशो भवति पदान्ते। सुष्ठु पेसतीति सुपीः[2]। सुपीर्भ्याम्। तुस्—सुतूः। सुतूर्भ्याम्। सजूः, सजूर्भ्याम्, सजूर्वत्। सहपूर्वस्य जुषेः क्विपि सहस्य सभावे रूपमेतत्। पदान्त इति किम्? सुपिसौ, सुपिसः। सजुषौ, सजुषः। रेफविधानं दीर्घार्थम्।

१०८. झसा जबाः।

पदान्ते वर्तमाना झसा जबा भवन्ति। वाग्, वाग्भिः, अज्, अज्भि[3], षड्, षड्भिः, विद्युद्, विद्युद्भिः, ककुब्, ककुब्भिः। कश्चरति, कष्टीकते, कस्तरति—इत्यादिषु आदेशविधानसामर्थ्यान्न भवति। पदान्त इति किम्? वाचौ, पच्यते।

---

१ 'रोर्विसर्गः' [२/१/१०३] इति विसर्गे पश्चात् 'रः' [१/३/५६] इति रेफः।

२ ननु प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम् इति न्यायेन इसुसोः प्रत्यययोरेव ग्रहणं कथं न? उच्यते—एतेन रेफविधानं दीर्घार्थम्। प्रत्यययोस्तु भ्वाद्यभावात् दीर्घस्य प्राप्तिरेव नास्तीति धातोरेव इसुसौ गृह्येते।

३. अत्र सञ्ज्ञाशब्दत्वात् 'रषोः कर्णौ' [२/१/११६] इति णत्वं न भवति।

१०९. आदिडबानां झभान्तस्यैकस्वरस्य ढभाः स्ध्वोः प्रत्यययोश्च ।

एकस्वरस्य झभान्तस्य धातुरूपावयवस्यादिडबानां ढभा भवन्ति पदान्ते स्ध्वोश्च प्रत्यययो. परयो. । तुण्डिभ-माचष्टे[1] णौ क्विपि—तुण्ढिप् । तुण्ढिब्भ्याम्, तुण्ढिप्त्वम् । दुह्—गोधुक्, गोधुग्भ्याम्, गोधुक्त्वम्, धोक्ष्यते, अधुग्ध्वम् । गुह्—पर्णघुट्, पर्णघुड्भ्याम्, पर्णघुट्त्वम्, निघोक्ष्यते, न्यघूढ्वम्[2] । बुध्— अर्थभुद्, अर्थभुद्भ्याम्, अर्थभुत्त्वम्, भोत्स्यते, अभुद्ध्वम् । आदिडबानामिति किम् ? कृत्, क्रोत्स्यति । जभेर्यङ्लुकि—अजंजप् । झभान्तस्येति किम् ? सुगण्, दास्यति । एकस्वरस्येति किम् ? दाम लेढि क्विप्, 'दामलिहमिच्छति क्यच्, दाम लिह्यति क्विप्—दामलिट् । स्ध्वोश्चेति किम् ? धर्मबुधौ, बोद्धा । प्रत्यययोरिति किम् ? दद्ध्वः[3], दद्ध्वहे । वर्णविधित्वेन स्थानिवद्भावो नास्तीति अबुद्ध, अबुद्धाः—इत्यत्र सिज्लोपे न भवति ।

११०. दधातेस्तथोश्च ।

झभान्तस्य दधातेरादिडबानां ढभा भवन्ति तकारथकारयोश्चकारात् स्ध्वोश्च परत । धत्से, धत्त । धत्थः, धत्थ । धत्से, धन्स्व । धद्ध्वे, धद्ध्वम् । अत्र असिद्धाधिकारत्वाद् वचनसामर्थ्याद् धातो लोपस्य स्वरादेशत्वेऽपि स्थानिवद्-भावो न भवति । दधातीनि सिद्धरूपनिर्देशात् धयतेर्मा भूत् । धयतेर्यङ्लुकि—दात्त, दात्थः । दधातेरपि यङ्लुगन्तस्य मा भूत्—

अपातिपानुबन्धेन निर्दिष्टं यद् गणेन च ।
एकस्वरनिमित्तं च, पञ्चैतानि न यङ्लुकि ।।

इति न्यायात् दात्तः, दात्थ । केचित्तु यङ्लुगन्तस्याऽपि इच्छन्ति । धात्तः, धात्थः । तथोश्चेति किम् ? दध्वः, दध्मः । झभान्तस्येति किम् ? दधाति, दधासि ।

१११. झभात्तथोर्धोऽधः[4] ।

झभान्ताद्धातो परयोस्तकारथकारयो स्थाने धकारादेशो भवति दधातिं वर्जयित्वा । लब्धा, अलब्ध, अलब्धा । दोग्धा, अदुग्ध, अदुग्धा. । लेढा, लेढुम्, अलीढ, अलीढा । अध इति किम् ? धत्त , धत्थ. ।

११२. हो ढो झसपदान्तयोः ।

हकारस्य ढकारादेशो भवति झसे प्रत्यये परे पदान्ते च, स च परेऽसिद्धः । लेढा, लेक्ष्यति । वोढा, वक्ष्यति । सोढा, सोढुम्, सोढव्यम् । मधुलिट्, मधुलिड्भ्याम् । तुराषाट्, तुराषाड्भ्याम् । झसपदान्तयोरिति किम् ? मधुलिहौ, मधुलिहः । तुरासाहौ, तुरासाह. । अथ गुडलिण्मान्—इत्यत्र ढत्वडत्वयोरसिद्धत्वात् 'झपात्' [८/१/३] इति मतुबाधको वतुर्न भवति । ऊढमाख्यत्—औजढत् । अत्र ढत्वधत्वयोरसिद्धत्वाट्टेर्लोपस्य च द्वित्वे स्थानिवत्त्वादकारेण सह ह्तेति द्विर्वचनम् । केचित्तु टेर्लोपस्य स्थानित्वमनिच्छन्तो ह्तीति द्वित्वे ऊढमूढि वाख्यत् औजिढदिति मन्यन्ते ।

११३. भ्वादेर्दादेर्घः ।

भ्वादेर्धातोर्दकारादेर्हकारस्य घकारादेशो भवति झसे प्रत्यये परे पदान्ते च । ढस्याऽपवादः । दग्धा, दग्धुम्, दग्धव्यम्, धक्ष्यति, दोग्धा, दोग्धुम्, दोग्धव्यम्, घोक्ष्यति, अधाक्षीत् । पदान्ते—अधोग्, गोधुक्, काष्ठधक्, गोधुग्भ्याम्,

---

१ तुडिङ् तोडनेऽस्य 'इदितः' [४/३/३२] इति नुमागमे 'पक्षिपठिपचि स्थलि…' [उ० ३/१०७] इति इप्रत्यये तुण्डिः, साऽस्याऽस्तीति 'तुण्डिवलिवटेर्भः' [८/१/८७] इति भ. । धातुरूप तुण्डिभ्, तस्याऽवयवो डिभ् ।

२ णादेर्ध्वमि सकि 'दुहदिहलिह…' [३/४/६] इति तस्य लोपे अटि ढत्वे धत्वे 'ष्टुभिःष्टुः' [१/३/६] इति धस्य ढत्वे 'ढस्तड्डे' [१/३/३७] इति ढलोपे रूपमिदम् ।

३ अत्र धा-वस्-द्वित्वम् । 'नश्चातः' [३/४/७१] इत्याकारलोपे 'अघोषेप्रथमोऽशिटः' … [१/३/२७] इति धकारस्य द्विर्भावः ।

४. पूर्वसूत्रे निमित्तत्वेनोपादानात् इह तयोरित्यस्य पुनरुपादान कार्यित्वार्थम् ।

काष्ठधग्भ्याम्, गोधुक्षु, काष्ठधक्षु । भ्वादेरिति किम् ? दामलिहमिच्छति—दामलिट् । दृषद्घुट् । दादेरिति किम् ? लेढा, लिट् । ह इति किम् ? अदात् । झसपदान्तयोरिति किम् ? गोदुहौ, गोदुहः ।

११४. द्रुह्-मुह्-ष्णुह्-ष्णिहां वा ।

एषां हकारस्य घकारादेशो वा भवति झसे प्रत्यये परे पदान्ते च । पक्षे ढत्वम् । द्रुहः प्राप्तेऽन्येषामप्राप्ते विकल्पः । द्रोग्धा, द्रोढा । मित्रध्रुक्, मित्रध्रुट् । मित्रध्रुग्भ्याम्, मित्रध्रुड्भ्याम् । मोग्धा, मोढा । उन्मुक्, उन्मुट् । उन्मुग्भ्याम्, उन्मुड्भ्याम् । स्नोग्धा, स्नोढा । उत्स्नुक्, उत्स्नुट् । उत्स्नुग्भ्याम्, उत्स्नुड्भ्याम् । स्नेग्धा, स्नेढा । चेलस्निक्, चेलस्निट् । चेलस्निग्भ्याम्, चेलस्निड्भ्याम् । झसपदान्तयोरिति किम् ? मित्रद्रुहौ, मित्रद्रुहः ।

११५. नहो धः ।

नह् धातोर्हकारस्य धकारादेशो भवति झसे प्रत्यये परे पदान्ते च । नद्धम्, नद्धुम्, नद्धव्यम्, नद्धा, नत्स्यति, उपानत्, परीणत्[1], उपानद्भ्याम्, परीणद्भ्याम् । झसपदान्तयोरिति किम् ? उपानहौ, उपानहः ।

११६. चजोः कगौ ।

चकारजकारयोः ककारगकारादेशौ भवतः झसे प्रत्यये परे पदान्ते च, तौ च परेऽसिद्धौ । वक्ता, वक्तुम्, वक्ष्यति, ओदनपक्, त्वक्, वाक्, वाग्भिः, वाक्त्वम् । जस्य—त्यक्ता, त्यक्तुम्, त्यक्ष्यति, अर्थभाग्, स्वप्नग्[2], तृष्णक् । झसपदान्तयोरिति किम् ? वच्मि, वाचौ, वाचः । प्रत्यय इति किम् ? इच्छति, मज्जति । मांसं पिपक्षतीति मांसपिपक्, क्विप् । अत्र कत्वस्य परेऽसिद्धत्वात् **'स्कोःसंयोगाद्योर्लोपः'** [२/१/११८] इति न प्रवर्तते । उज्ज्वलावित्यत्र तु संज्ञाशब्दत्वान्न भवति ।

११७. शराज्भ्राज्यज्सृज्मृज्भ्रस्जव्रश्चपरिव्राजां षः ।

शकारान्तस्य राजादेश्च चजोः षकारोऽन्तादेशो भवति झसे प्रत्यये परे पदान्ते च । शान्त-लिश्—लेष्टा, लेष्टुम्, लिट्, लिड्, लिड्भ्याम् । आदेशोऽपि शकारो गृह्यते—प्रष्टा, प्रष्टुम्, शब्दप्राट्, शब्दप्राड्भ्याम् । **'छ्वोः शूटौ ञमे च'** [४/३/३८] इति छस्य शः । निश्—निड्भ्याम्, निड्भिः । केचित्तु राजादिसाहचर्यात् धातोरेव षत्वमाहुस्तन्मते—निज्भ्याम्, निज्भिः । राज्—राष्टिः, सम्राट्, सम्राड्भ्याम् । भ्राज्—भ्राष्टिः, विभ्राट्, विभ्राड्भ्याम् । राजिसहचरितस्य भ्राजेर्ग्रहणात् एजृङ्-भ्रेजृङ्-भ्राजृङ्—दीप्तौ इत्यत्र गत्वमेव । विभ्राग्, विभ्राग्भ्याम् । यज्—यष्टा, यष्टुम्, उपयड्, उपयड्भ्याम् । सृज्—स्रष्टा, स्रष्टुम्, तीर्थसृड्, तीर्थसृड्भ्याम् । मृज्—मार्ष्टा, मार्ष्टुम्, कंसपरिमृड्, कंसपरिमृड्भ्याम् । भ्रस्ज्—भ्रष्टा, भ्रष्टुम्, भर्ष्टा, भर्ष्टुम्, धानाभृड्, धानाभृड्भ्याम् । व्रश्च्—व्रष्टा, व्रष्टुम्, मूलवृड्, मूलवृड्भ्याम् । परिव्राज्—परिव्राड्, परिव्राड्भ्याम् । झसपदान्तयोरिति किम् ? सम्राजौ, सम्राजः । चजोर्व्याख्यानान्नेह—वृक्षवृश्चमाचष्टे णौ, विचि—वृक्षव् । अत्र वकारस्य मा भूत् ।

११८. स्कोः संयोगाद्योर्लोपः ।

संयोगाद्योः सकारककारयोर्लोपो भवति झसे प्रत्यये परे पदान्ते च । लस्जेः—लग्नः, लग्नवान्, साधुलग् । व्रश्च्—वृक्णः, वृक्णवान्, मूलवृट्, मूलवृड्भ्याम् । तक्ष्—तष्टः, तष्टवान्, काष्ठतड्, काष्ठतड्भ्याम् । अक्ष्—अष्टः, अष्टवान्, तृणाट् । स्कोरिति किम् ? नर्नर्ति[3] । संयोगग्रहणं किम् ? सातम्, कृतम् । आदिग्रहणं किम् ? शङ्केर्वङ्केश्च यङ्लुकि शाशङ्क्ति, वाङ्वक्ति । झसपदान्तयोरिति किम् ? काष्ठतक्षौ, काष्ठतक्षः । प्रत्यय इति किम् ? पृथक्स्थाता ।

---

१. **'गतिकारकाणां गहिवृतिवृधि···'** [३/२/८५] इति सूत्रेण दीर्घः ।

२. **'तृषिधृषिस्वपो नजिङ्'** [५/३/५९] ।

३. अत्र स्कोरभावात् **'झतानां झसे सवर्णे'** [१/३/६३] इति वैकल्पिको नृतस्तकारस्य लोपः न तु रेफस्य ।

११९. संयोगस्य ।

पदान्त इत्यनुवर्तते । झस इति तु निवृत्तम् । सयोगान्तस्य लोपो भवति पदान्ते, स च परे स्यादिविधौ च पूर्वस्मिन्नसिद्धो भवति । पुमान्, पुभ्याम्, पुभि:, पुंसु, पुंरूप्य, पुमय:, पुंजातीय । एवं गोमान्, अनड्वान्, महान्, भूयान्, कुर्वन्, श्रेयान्—इत्यादौ संयोगान्तलोपस्य परकार्येऽसिद्धे **'नाम्नो नोऽनह्नः'** [२/१/१२१] इति सूत्रेण नलोपो न भवति । स्यादिविधौ चाऽसिद्धत्वान्न्सन्ताविलक्षणो दीर्घो भवति । पदान्त इति किम् ? स्कन्त्वा, स्यन्त्वा । भवान् चुशेते इत्यादौ तु आगमविधानसामर्थ्यान्न भवति ।

१२०. रात्सः ।

पदान्ते वर्तमानस्य रेफात् परस्य सकारस्यैव लोपो भवति । चिकीर्षतीति क्विपि **'अतः'** [४/२/५४] इत्यकारलोपे षत्वस्य परेऽसिद्धत्वात् सकारस्यैव लोप:—चिकी: । चिकीर्भ्याम्, चिकीर्षु । एवं जिही, जिहीर्भ्याम्, जिहीर्षु । कटचिकी, पटजिही: । पूर्वेणैव सिद्धे नियमार्थं वचन, तेन रात्परस्य सयोगान्तस्य सस्यैव लोपो नान्यस्य । ऊर्क्, ऊर्ग्भ्याम्, अमार्ट् ।

१२१. नाम्नो नोऽनह्नः ।

पदान्ते वर्तमानस्य नाम्नो नकारस्य लोपो भवति न तु अहन्शब्दस्य, स च स्यादिविधावसिद्ध[१] । पर इति तु निवृत्तम् । राजा, वृत्रहा, राजपुरुष, राजकल्प:, राजकाम्यति । स्यादिविधावसिद्धत्वात् राजभ्याम्, राजभि, राजसु इत्यादौ आत्वैस्त्वैत्वानि अकारान्तत्वाऽभावान्न भवन्ति । अनह्न इति किम् ? अहरेति, अहरधीते, अहोरूपम् । दीर्घाहा निदाघ —अत्र परविधौ रेफसत्वयोरसिद्धत्वान्नलोप[२] प्राप्त:, स निषिद्ध । सावकाश[३] च तदुभयं[४] सबोधने[५] । हे अह:, हे दीर्घाह: । पदान्त इति किम् ? राजानौ, राजान । स्यादिविधावसिद्ध इति किम् ? राजायते, चर्मायते । अत्र क्यविधौ सिद्धत्वात् **'च्वियगयङ्क्यादि…'** [४/१/५१] इति अन्त्याकारदीर्घ सिद्ध । नाम्न इति किम् ? कुर्वीरन्, सर्वस्मिन्, वृक्षान् । वृत्रहभ्याम्, वृत्रहभिरित्यत्र तु **असिद्धं बहिरङ्गमन्तरङ्गे** इति नलोपस्याऽसिद्धत्वात् **ह्रस्वस्य पित्कृति तुक्** [४/४/४७] इति तुगागमो न भवति ।

१२२. न धौ ।

धिविषये वर्तमानस्य नाम्नो नकारस्य लोपो न भवति । हे राजन्, हे तक्षन्, हे सीमन्, हे बहुराजन् । एतदेव[५] प्रतिषेधवचनं ज्ञापक सिलोपस्य स्थानिवद्भावेन **'अर्थवदधातुविभक्ति…'** [१/१/३१] इति नामसंज्ञाप्रतिषेधो न भवतीति ।

१२३. नपुंसके वा ।

नपुसकलिङ्गे धिविषये वर्तमानस्य नाम्नो नकारस्य लोपो वा भवति । हे चर्म, हे चर्मन् । हे वर्म, हे वर्मन् । हे दाम, हे दामन् ।

---

१ नन्वत्र विशेषविधानात् **'रोऽरस्यादिभे'** [२/१/१०६] इति **'सोह्नः'** [२/१/१०५] इति च रेफसत्वे एव भविष्यत, किमहन्प्रतिषेधेनेत्याह ।

२. न च तयोरनवकाशतेत्याह ।

३. रेफसत्वलक्षणम् ।

४. **'न धौ'** [२/१/१२२] इति नलोपप्रतिषेधात् ।

५. ननु हे राजन् इत्यादौ सिलोपस्य स्थानिवद्भावेन **'अर्थवदधातुविभक्ति…'** [१/१/३१] इत्यनेन नामत्वाभावे पूर्वेण प्राप्तिरेव न, किं प्रतिषेधेनेत्याह ।

द्वितीयश्चरणः

१. नमस्पुरसो गतेर्विसर्गस्य सः कखपफेषु ।

गतिसञ्ज्ञकयोर्नमस्पुरस् इत्येतयोर्विसर्गस्य सकारादेशो भवति कखपफेषु परेषु। नमस्कृत्य[1], नमस्करोति, नमस्कर्ता, नमस्कर्तुम्, नमस्कर्तव्यम्। पुरस्खादः। पुरस्पानः, पुरस्पतनम्। पुरस्फक्कः, पुरस्फक्कनम्। गतेरिति किम्? नमः[2] कृत्वा, नमः करोति—नमःशब्दमुच्चारयतीत्यर्थः। नमःशब्दस्य कृन्योगे विकल्पेन गतिसञ्ज्ञाविधानाद्[3] वा। निम्नः पुरः करोति।

२. तिरसो वा।

गतिसञ्ज्ञकस्य तिरःशब्दस्य विसर्गस्य सकारादेशो वा भवति कखपफेषु परेषु। तिरस्कृत्य, तिरःकृत्य। तिरस्करोति, तिरःकरोति। तिरस्कर्ता, तिरःकर्ता। तिरस्कर्तुम्, तिरःकर्तुम्। गतेरिति किम्? तिरः कृत्वा काष्ठं गतः। अन्तर्द्धावपि '**कृञो वा**' [३/१/११] इति विकल्पेन गतिसञ्ज्ञाविधानात् तिरःकृत्वा। अगतेरप्यन्तर्द्धाविच्छन्त्यन्ये। तिरस्कृत्वा। कथं पराभवेऽपि तिरस्कारः? गतेरननुवर्तनाद् भविष्यति।

३. शिरोऽधसोः पदे समासैक्ये।

शिरस् अधस्—इत्येतयोः सबन्धिनो विसर्गस्य पदशब्दे परे सकारादेशो भवति समासैक्ये—तौ चेन्निमित्त-निमित्तिनावेकत्र समासे भवतः। शिरस्पदम्, अधस्पदम्, शिरस्पदी, अधस्पदी। समास इति किम्? शिरः पदम्, अधः पदम्[4]। ऐक्य इति किम्? परमशिरःपदम्, परमाधःपदम्। पद इति किम्? शिरःखण्डम्।

४. अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वऽनव्ययस्य।

अकारात् परस्य अनव्ययस्य विसर्गस्य कृकम्यादिस्थेषु कखपफेषु परेषु सकारो भवति, तौ चेन्निमित्तनिमित्ति-नावेकत्र समासे भवतः। कृ—अयस्कारः, अयस्कृतम्। कमि—पयस्कामः, यशस्कामः। कंस—अयस्कंसः, पयस्कंसः। कुम्भ—अयस्कुम्भः, पयस्कुम्भः। पात्र—अयस्पात्रम्, पयस्पात्रम्। **नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्** अयस्कुम्भी, पयस्पात्री। कुशा—अयस्कुशा, पयस्कुशा। कर्णी—अयस्कर्णी, पयस्कर्णी। अत इति किम्? भाःकरणम्, वाःपात्रम्, गीःकारः, धूःकारः। भास्कर इति तु कस्कादिगणे निपातनात्। कृकम्यादिष्विति किम्? अयःकीलः, पयःपानम्। अनव्ययस्येति किम्? ह्यःकारः, श्वःकारः, प्रातःकामः। समास इति किम्? यशः करोति, पयः करोति। ऐक्य इति किम्? उपपयःकारः, परमयशःकामः। अयसः कुम्भकपालम्—अयःकुम्भकपालम्। पयसः पात्रखण्डम्—पयःपात्रखण्डम्। अत्र हि निमित्त-निमित्तिनौ नैकसमासस्थौ। यदा त्वेवं समासः अयसः कुम्भोऽयस्कुम्भस्तस्य कपालं तदा भवत्येव अयस्कुम्भ-कपालमित्यादि। इह कृकम्योः केवलयोः समासो न भवतीति प्रत्ययान्तयोर्ग्रहणम्। **अथ क्विबन्ता धातुत्वं न जहतीति**

---

१ अनमो नमः करणं पूर्वं '**साक्षात्प्रभृतीनि च**' [३/१/१५] इति गतिसञ्ज्ञाया '**गतिः**' [३/१/८७] इति समासः।

२. अत्र नमः शब्दान्तरं न त्वव्ययम्।

३ साक्षादादित्वात्।

४. अत्र शिरः पद, अधः पदं उदाहरणद्वय शाब्दाः वृत्त्या निर्दिष्टं इति न कोऽपि दोषः।

क्विबन्तयोरेव कस्मान्न भवति? 'गतिकारकाणां…' [३/१/८५] इत्यादिसूत्रे क्विब्ग्रहणात्। न ह्यन्यप्रत्ययान्तानां धातूरूपदानामग्रहणे क्विब्ग्रहणमर्थवद् भवति। कमिग्रहणात् कामयतेर्न भवति। पयः कामयते—पयःकामा। 'शीलिकामिभक्ष्याचरि…' [५/२/२] इत्यादिना णः। कमेस्त्वणि पयस्कामीति भवति। कथं पयस्कामा? कमनं कामः, पयसि कामोऽस्या इति बहुव्रीहिणा भविष्यति। कमिग्रहणेनैव कंसे लब्धे पृथक्कंसग्रहणं ज्ञापकं उणादयोऽव्युत्पन्नानि नामानीति।

५. प्रत्यये।

अनव्ययस्य विसर्गस्य सकारो भवति प्रत्ययविषयेषु कखपफेषु परेषु। पाशकल्पकानामेव ग्रहणमन्येषामसंभवात् काम्ये विशेषविधानाच्च। पयस्पाशम्, यशस्पाशम्। पयस्कल्पम्, यशस्कल्पम्। पयस्कम्, यशस्कम्। अनव्ययस्येति किम्? प्रातःपाशम्, पुनःकल्पम्। प्रत्ययेष्विति किम्? पाशः बन्धः, पयःपाशः। कल्पः विधिः, पयःकल्पः। कं शिरः, पयःकम्[1]।

६. सः काम्ये।

पूर्वेणैव सिद्धे नियमार्थम्। अनव्ययसंबन्धिनः सकारस्यैव विसर्गस्य सकारो भवति काम्यप्रत्यये परे। पयस्काम्यति, यशस्काम्यति। सकारस्यैवेति नियमान्नेह—द्वाःकाम्यति, वाःकाम्यति, अहःकाम्यति। प्रत्यय इति किम्? पुरुषैः काम्यम्। अनव्ययस्येति किम्? अधःकाम्यति।

७. नामिनस्तयोः षः।

तयोरिति प्रत्ययसूत्रसगृहीताना पाशकल्पकानां 'सः काम्ये' [२/२/६] इति यथानिर्दिष्टकाम्यस्य च ग्रहणम्। अनव्ययस्य नामिनः परस्य विसर्गस्य षकारादेशो भवति तयोः पूर्वसूत्रस्थयोः कखपफयोः परयोः। सर्पिष्पाशम्, यजुष्पाशम्, धनुष्पाशम्, गीष्पाशा, धूष्पाशा। सर्पिष्कल्पम्, धनुष्कल्पम्, गीष्कल्पा। सर्पिष्कम्, सार्पिष्कः, धानुष्कः। सर्पिष्काम्यति, धनुष्काम्यति, नामिन इति किम्? अयस्कल्पम्। तयोरिति किम्? मुनिः करोति, साधुः पठति, भिन्द्युः पापानि। अनव्ययस्येति किम्? उच्चैःकः, उच्चैः काम्यति। 'सः काम्ये' [२/२/६] इति नियमान्नेह—गीःकाम्यति, धूःकाम्यति।

८. निर्दुर्बहिराविःप्रादुश्चतुराम्।

निरादीनां विसर्गस्य षकारो भवति कखपफेषु परेषु। निष्क्रान्तम्, निष्पीतम्। दुष्कृतम्, दुष्पीतम्। बहिष्कृतम्, बहिष्पीतम्। आविष्कृतम्, आविष्पीतम्। प्रादुष्कृतम्। चतुष्कण्टकम्, चतुष्पात्रम्, चतुष्फलम्। कथं निःकुलं, दुःपुरुषः, नैष्कुल्यम्, दौष्कुल्यम्? एकदेशविकृतस्याऽनन्यत्वात्।

९. सुचो वा।

सुच्प्रत्ययान्तानां विसर्गस्य षकारो वा भवति कखपफेषु परेषु। 'द्वित्रिचतुर्भ्यः सुच्' [८/१/१२८] द्विः करोति, द्विष्करोति। त्रिः करोति, त्रिष्करोति। चतुः पचति, चतुष्पचति। चतुः फलति, चतुष्फलति। 'रात्सः' [२/१/१२०] इति सुचसलोपः। षत्वाऽभावपक्षे विसर्गस्य जिह्वामूलीयोपध्मानीयावपि। द्वि≍करोति, त्रि≍खनति, चतु)(पचति, चतु)(फलति। कखपफेष्विति किम्? द्विश्चरति, त्रिस्तरति।

१०. इसुसोरऽपेक्षायाम्।

इस्उस्प्रत्ययान्तयोर्विसर्गस्य षकारो वा भवति कखपफेषु परेषु स्थानिनिमित्तपदे चेत् परस्परापेक्षे भवतः। सर्पिष्करोति, सर्पिष्खादति, सर्पिष्पिबति, सर्पिष्फेनायते। धनुष्करोति, धनुष्खण्डयति, धनुष्पतति, धनुष्फलति। परमसर्पिष्करोति, परमसर्पिष्पिबति। परमधनुष्करोति, परमधनुष्पठति। पक्षे—सर्पिः करोति, परमसर्पिः करोतीत्यादि। इसुसोरिति

---

१. पयसि कः इति विग्रहः कार्यः न तु षष्ठीसमासः।

किम् ? पयः करोति, पयः पिबति। इसुसोः प्रत्यययोर्ग्रहणादिह[1] न भवति। मुनिः करोति, नदीभिः क्रियते, मुहुः पठति, भिन्धुः पापानि। मुहुरित्यव्युत्पन्नमव्ययम्। इसा साहचर्यादुस औणादिकस्य ग्रहणम्, तेनेह न भवति—चक्षुः कुलानि। त्यायुस्यपीच्छत्यन्यः। अपेक्षायामिति किम् ? तिष्ठतु सर्पिः पिब त्वमुदकम्।

११. नाऽक्रिये तुल्यार्थे।

न विद्यते क्रिया प्रवृत्तिनिमित्तं यस्य तस्मिन् तुल्यार्थे समानाधिकरणे यत् कखपफं तस्मिन् परे इसुस्प्रत्ययान्तयोर्विसर्गस्य षकारो न भवति। **'इसुसोरपेक्षायाम्'** [२/२/१०] इत्यस्यायं प्रतिषेधो नान्यस्य, तद्विषय एवारम्भात्। सर्पिः कालकम्, यजुः पीतकम्। अक्रिये इति किम् ? सर्पिष्क्रियते, सर्पिः क्रियते। धनुष्प्राप्तम्, धनुः प्राप्तम्। तुल्यार्थे इति किम् ? सर्पिष्कुम्भे, सर्पिः कुम्भे। धनुष्पुरुषस्य, धनुः पुरुषस्य।

१२. समासेऽनुत्तरपदस्थस्य।

अनुत्तरपदस्थस्य इसुसोर्विसर्गस्य कखपफेषु परेषु षकारो भवति समासविषये। सर्पिष्कुम्भः। असर्पिः सर्पिः कृत्वा—सर्पिष्कृत्य। सर्पिष्खण्डम्, सर्पिष्पानम्, सर्पिष्फलम्, धनुष्कृत्य, धनुष्खण्डम्, धनुष्पृष्ठम्, धनुष्फलम्। समास इति किम् ? तिष्ठतु सर्पिः पिब त्वमुदकम्। अनुत्तरपदस्थस्येति किम् ? परमसर्पिःकुण्डम्, इन्द्रधनुःखण्डम्। पूर्वेणापि न भवति समासे सत्यपेक्षाया अभावात्। इदमेवाऽनुत्तरपदस्थस्येति वचनं ज्ञापकं **'प्रत्ययः प्रकृत्यादेः'** [८/४/१२७] इति नियम इसुसोर्न भवति, तेन परमसर्पिष्करोति, परमसर्पिः करोति—इत्यत्र **'इसुसोरपेक्षायाम्'** [२/२/१०] इत्यनेन अधिकस्याऽपि विकल्पो भवति। बहुसर्पिष्कुण्डम्, बहुसर्पिष्पात्रमित्यत्र तु बहुप्रत्ययादेरप्यनुत्तरपदस्थत्वात् अनेन नित्यं भवति।

१३. भ्रातुष्पुत्रकस्कादयः।

भ्रातुष्पुत्रादयः कस्कादयश्च शब्दाः कखपफेषु परेषु विसर्गस्य स्थाने यथासंख्यं कृतषत्वसत्वा निपात्यन्ते। भ्रातुष्पुत्रः[2], परमसर्पिष्कुण्डिका, परमधनुष्कपालम्, परमबर्हिष्पूलः, परमयजुष्पात्रम्। अत्र सर्पिष्कुण्डिकाधनुष्कपाल-बर्हिष्पूल-यजुष्पात्राणां पूर्वेण षत्वे सिद्धेऽपि उत्तरपदस्थार्थमिह पाठः। अन्ये त्वेषामुत्तरपदस्थानां षत्वं न मन्यन्ते। तन्मते तु परमसर्पिःकुण्डिकेत्यादिषु षत्वं न भवति। इति भ्रातुष्पुत्रादयः। कस्कादयो विहितलक्षणाः ज्ञेयाः। कस्कः। वीप्सायां द्विर्वचनम्। कुतः कुत आगतः कौतस्कुतः। शुनस्कर्णः[3]। सद्यस्कालः। बहुव्रीहिरसमासो वा। सद्य क्रयणं—सद्यस्क्रीः, तत्र भव साद्यस्क[4]। भास्करः, अहस्करः, अयस्काण्डः, तमस्काण्डः, अयस्कान्तः, अयस्कुण्डः, मेदस्पिण्डः, अयस्पिण्डः इति कस्कादयः। आकृतिगणाविमौ, तेन यथादर्शनमन्येऽपि भवन्ति। सर्वत्र नामिनः परस्य विसर्गस्य षत्वमन्यत्र सत्वं द्रष्टव्यम्।

१४. किवलादेकपदेऽपदान्ते कृतस्य सस्य।

कवर्गादिलप्रत्याहाराच्च परस्य अपदान्ते वर्तमानस्य कृतस्य सकारस्य षकारो भवति एकपदे। कृतः कोऽर्थः ? आदेशप्रत्ययाभ्यां कृतः। वाक्षु, त्वक्षु, यक्ष्यति, वक्ष्यति, कुङ्क्षु। अग्निषु, नदीषु, साधुषु, वधूषु, पितृषु, एषा, गोषु, सिषेव, सुष्वाप, लुलूषति, जेष्यति, गीर्षु, वार्षु, चिकीर्षति, हल्षु। किवलादिति किम् ? दास्यति, असौ। अपदान्त इति किम् ? मुनिस्तिष्ठति, हरिस्तत्र। कृतस्येति किम् ? सुपिसौ, सुपिसः। ननु बिसं[5] बिसं, मुसलं मुसलमित्यादौ द्वित्वे कृते सस्य षत्वं कथं न ? उच्यते—नात्र कृतसकारः, किंतु तत्संयुक्तः समुदायो द्विरुच्चार्यते। तिसृभिरित्यत्र तु विधानबलान्न भवति। पदे

---

१. इह प्रत्ययाप्रत्यययोः लक्षणप्रतिपदोक्तयो **अर्थवद्ग्रहणे नाऽनर्थकस्य** इत्यनेन च इसुसोः प्रत्यययोर्ग्रहणादिह न भवतीत्यर्थः।

२. **'ऋतो विद्यायोनिसंबन्धिनस्तस्मिन्'** [३/२/३७] इति षष्ठ्या अलुक्।

३ **'षष्ठ्याः क्षेपे'** [३/२/३०] इत्यलुक्।

४. सद्यस्क्रीशब्दादेव प्रत्यये साद्यस्कस्य सिद्धत्वात् पृथगुपादानं प्रत्ययान्तरनिवृत्त्यर्थं, तेन सद्यस्क्रियो भावः सद्यःक्रीता इत्यत्र न सत्वम्।

५ अव्युत्पन्नो ग्राह्यः। न तु **'पटिबीभ्यां टिसकिसौ'** [उ० ३/८०] इति। यदा बिसच् प्रेरणे—बिस्यति **'नाम्युपध...'** [५/१/६५] इति के बिसम्। यदा तु टिसकिसौ तदा विधानसामर्थ्यान्न भवति।

इत्यनेनैव एकपदे सिद्धे एकग्रहणं नियमार्थम्। तेन एकमेव यन्नित्यं तत्र यथा स्यात् यदेकं चानेकं च तत्र मा भूत्। दधिसेक्— अत्र समासत्वादेकपदेऽपि षत्वं न भवति। अधिकारोऽयमा षत्वपरिसमाप्तेः।

१५. नुम्विसर्गशसान्तरेऽपि।

अन्तरो व्यवधानम्। नुम्व्यवधानेऽपि विसर्गव्यवधानेऽपि शसव्यवधानेऽपि क्विलात्परस्य कृतस्य सस्य षो भवति। नुम्व्यवधाने—सर्पींषि, यजूंषि, हवींषि। विसर्गव्यवधाने—सर्पिःषु, यजुःषु, हविःषु। शसव्यवधाने—सर्पिष्षु, यजुष्षु, हविष्षु। नुमादिभिः प्रत्येकं व्यवधाने षत्वमिष्यते न तु समस्तैस्तेनेह न—निंस्से, निंस्स्व। णिसिङ्क् चुम्बने—इत्यस्य रूपद्वयमेतत्। अत्र हि नुमा शसेन च व्यवधानम्।

१६. घसिवसिशासीनाम्।

अकृतसकारार्थं वचनम्। क्विलात् परस्य घस्यादीनां सस्य षो भवति। जक्षतुः, जक्षुः, जक्षिवान्। ऊषतुः, ऊषुः, उषितः, उषितवान्। शिष्टः, शिष्टवान्। क्विलादिति किम्? जघास, उवास, शास्ति।

१७. ञिस्तोरेवाऽस्वदिस्विदिसहेः षणि।

क्विलात्परस्य स्वदिस्विदिसहिवर्जितानां ञ्यन्तानां स्तौतेरेव च सकारस्य षकारो भवति षभूते सनि परे नान्येषाम्। ञ्यन्तानाम्—सिषेवयिषति, सुष्वापयिषति, सिषेधयिषति, तुष्टूषति। स्वद्यादिपर्युदासः किम्? सिस्वादयिषति, सिस्वेदयिषति, सिसाहयिषति। स्तौतिसाहचर्यात् स्वद्यादिपर्युदासेन सदृशग्रहणाच्च ञ्यन्तानामपि षोपदेशानामेव ग्रहणम्। तथा च कृतत्वात् सकारस्य **'क्विला…'** [२/२/१४] इति सूत्रेणैव सिद्धे नियमार्थं वचनम्। षभूते सनि परे क्विलात्परस्य सस्य यदि षत्वं स्यात्तर्हि ञिस्तोरेव नान्यस्य, तेनेह न—सिसिक्षति, सुसूषति, सिसेविषति। एवकारः षण्येव ञिस्तोरिति विपरीतनियमनिवृत्त्यर्थः, तेनेहापि भवति—असीषिवत्, तुष्टाव। षणीति किम्? सिषेव, सुष्वाप। मूर्धन्यकरणं किम्? सभूते सनि भवत्येव—तिष्ठासति, सुषुप्सति। सकारः किम्? व्यतिसुषुप्सते। कथं प्रतीषिषति, अधीषिषति? उच्यते—षे निमित्ते धातोः षत्वमुक्तम्। इह तु सन्प्रत्ययस्यैव द्विरुक्तस्य षत्वं, न धातोः इति न प्रतिषेधः। सोषुपिषते, सेषिविषते— इत्यादौ तु यङि द्वित्वं पश्चात् सन् इति न प्रतिषेधः।

१८. सञ्जेर्वा।

इकारान्तनिर्देशादिह सञ्जधातुः ञ्यन्त एव गृह्यते। क्विलात्परस्य ञ्यन्तस्य सञ्जेः सस्य षो वा भवति षभूते सनि परे। सिषञ्जयिषति, सिसञ्जयिषति। नित्यं षत्वमिति **'पाणिनिः'** [८/३/६१]।

१९. समासेऽग्नेः स्तुतः।

अग्नेः परस्य स्तुतः सकारस्य षकारो भवति समासविषये। अग्निष्टुत्, अग्निष्टुतौ, अग्निष्टुतः। समास इति किम्? अग्नेः स्तुत्।

२०. ज्योतिरायुर्भ्यां च स्तोमस्य।

चकारादग्निरित्यनुवर्तते। ज्योतिस्, आयुस्, अग्नि—इत्येतेभ्यः परस्य स्तोमसबन्धिनः सकारस्य समासे षो भवति। ज्योतिष्टोमः, आयुष्टोमः, अग्निष्टोमः। समास इति किम्? ज्योतिः स्तोमं दर्शयति।

२१. मातृपितृभ्यां स्वसुः।

मातृपितृभ्यां परस्य स्वसृशब्दसंबन्धिनः सकारस्य समासे षो भवति। मातृष्वसा, पितृष्वसा। समास इति किम्? मातुः स्वसा, पितुः स्वसा।

२२. अलुकि वा।

मातृपितृशब्दाभ्यां परस्य स्वसृसकारस्याऽलुकि समासे षो वा भवति। मातुःष्वसा, मातुःस्वसा। पितुःष्वसा,

पितुःस्वसा। 'स्वसृपत्योर्वा' [३/२/३८] इति षष्ठ्या अलुक्। समास इति किम्? वाक्ये मा भूत्—मातुः स्वसा, पितुः स्वसा।

२३. निनदीभ्यां स्नातेः कौशले।

निनदीभ्या परस्य स्नातेः सकारस्य समासे षो भवति कौशले नैपुण्ये गम्यमाने। निष्णः कटकरणे, निष्णातः कटकरणे। नदीष्णः प्रतरणे, नदीष्णातः प्रतरणे। कुशल इत्यर्थः। कौशल इति किम्? निस्नातः, नदीस्न। यः स्रोतसा ह्रियते।

२४. प्रतेः स्नातस्य सूत्रे।

प्रतेः परस्य स्नातसकारस्य समासे षो भवति सूत्रेऽभिधेये। विशेषानुपादानाच्चोर्णादिसूत्रं व्याकरणादिसूत्रं च गृह्यते। प्रतिष्णात सूत्रम्। ऊर्णादिसूत्रं क्षालनेन शुद्धम्। व्याकरणादिसूत्रं त्वतिव्याप्त्यादिदोषाऽभावेन शुद्धमित्यर्थः। सूत्र इति किम्? प्रतिस्नातमन्यत्। प्रत्ययान्तोपादानं प्रत्ययान्तरनिवृत्त्यर्थम्। प्रतिस्नातृ सूत्रम्, प्रतिस्नायकं सूत्रम्।

२५. स्नानस्य संज्ञायाम्।

प्रतेः परस्य स्नानसकारस्य षकारो भवति समासे सूत्रविषयिन्यां संज्ञायां सत्याम्। प्रतिष्णानं सूत्रमित्यर्थः। संज्ञायामिति किम्? प्रतिस्नानमन्यत्।

२६. अभिनिष्टानो वर्णे।

अभि, निस्—इत्येतस्मात् परः ष्टानशब्दः समासे कृतषत्वो निपात्यते वर्णसंज्ञायां समुदायश्चेद् वर्णसंज्ञाविषयो भवति। अभिनिष्टानो[1] वर्णः। विसर्गस्यैवैषा संज्ञा इति केचित्। संज्ञायामिति किम्? अभिनिःस्तन्यते अभिनिस्तानो मृदङ्गः।

२७. वेः स्त्रः।

वे परस्य स्तृणाते सकारस्य समासे षो भवति संज्ञायां समुदायश्चेत्संज्ञाविषयो भवति। विष्टरो वृक्षः, विष्टरमासनम्, विष्टारपङ्क्तिश्छन्दः, विष्टारबृहती छन्दः। संज्ञायामिति किम्? विस्तरो वाक्यानाम्, विस्तारः पटस्य।

२८. गवियुधिभ्यां स्थिरस्य।

गवि, युधि—इत्येताभ्यां परस्य स्थिरसकारस्य समासे षो भवति संज्ञाया विषये। गविष्ठिरः। अस्मादेव निर्देशात् सप्तम्या अलुक्। युधिष्ठिरः।

२९. एत्यऽकः।

ककारवर्जितात् क्विलात्परस्य सकारस्य समासे षो भवति एकारे परे संज्ञायां विषये। हरिषेणः, वारिषेणः, श्रीषेणः, वायुषेणः, मातृषेणः। एतीति किम्? हरिसिंहः। अक इति किम्? विष्वक्सेनः, शतभिषक्सेनः। संज्ञायामिति किम्? मृद्वी सेना यस्य स मृदुसेनः। क्विलादिति किम्? महासेनः, सर्वसेनः।

३०. नक्षत्राद्वितो वा।

इकारान्तात् नक्षत्रवाचिनः शब्दात् परस्य सकारस्य समासे षो वा भवति एकारे परे संज्ञायां विषये। रोहिणिषेणः, रोहिणिसेनः। रेवतिषेणः, रेवतिसेनः। भरणिषेणः, भरणिसेनः। इत इति किम्? पुनर्वसुषेणः। अत्र पूर्वेण

---

१. अत्रोपलक्षणत्वान्निरोऽपि ग्रहणम्। 'खपरे लोपः' [१/३/४६] इति विसर्गलोपः।

नित्यमेव । शतभिषक्सेनः ।

३१. प्रष्ठोऽग्रगामिनि ।

संज्ञायामिति निवृत्तम् । प्रात् परस्य स्थसकारस्य षो निपात्यते अग्रगामिन्यभिधेये । प्रष्ठोऽग्रगामी । प्रस्थोऽन्यः ।

३२. विकुशमिपरिभ्यः स्थलस्य ।

विकुशमिपरिभ्य परस्य स्थलसकारस्य षकारो भवति समासे । विगतं वीना पक्षिणा वा स्थलं विष्ठलम् । कुत्सितं कोः पृथ्व्या वा स्थलं—कुष्ठलम् । शमीना स्थलं—शमिष्ठलम् । 'आबीपोः संज्ञायाम्' [२/३/१०६] इति शमिशब्दस्य ह्रस्वः । ह्रस्वविधानसामर्थ्याद् दीर्घान्न । शमीस्थलम् । दीर्घादप्येके । परिगतं स्थलं—परिष्ठलम् । एभ्य इति किम् ? भूमिस्थलम् ।

३३. कपेर्गोत्रे ।

कपिशब्दात्परस्य स्थलसकारस्य समासे षो भवति गोत्रेऽभिधेये । कपिष्ठलो नाम गोत्रस्य प्रवर्तयिता । यस्य कापिष्ठलिः पुत्रः । गोत्रे इति किम् ? कपीनां स्थलं—कपिस्थलम् ।

३४. अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थस्य ।

अम्बा, आम्ब, गो, भूमि, सव्य, अप, द्वि, त्रि, कु, शेकु, शङ्कु, अङ्गु, मञ्जि, पुञ्जि, परमे, बर्हिस्, दिवि, अग्नि—इत्येतेभ्य परस्य स्थसकारस्य समासे षो भवति । अम्बाष्ठ, 'आबीपोः संज्ञायाम्' [२/३/१०६] इति ह्रस्वत्वे अम्बष्ठः । श्लिष्टनिर्देशादुभाभ्यामपि भवति । आम्बष्ठ, गोष्ठ, भूमिष्ठ, सव्यष्ठ, अपष्ठ, द्विष्ठ, त्रिष्ठ, कुष्ठ, शेकुष्ठ, शङ्कुष्ठ, अङ्गुष्ठ, मञ्जिष्ठ, पुञ्जिष्ठ, परमेष्ठ, बर्हिष्ठ, दिविष्ठ, अग्निष्ठ । परमे, दिवि इति सूत्रे सप्तम्यन्तनिपातनादेव सप्तम्या अलुक् । 'तत्पुरुषे कृति' [३/२/२२] इति तु न भवति 'नेन्सिद्धसमस्थेषु' [३/२/२६] इति निषेधात् ।

३५. सुषामादयः ।

सुषामादय शब्दाः समासे कृतषत्वा निपात्यन्ते । शोभनं साम यस्य स सुषामा ब्राह्मणः । भीरूणा स्थानं—भीरुष्ठानम् । अङ्गुलीनां सङ्गः—अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । सुषामा, निःषामा, दुःषामा, सुषेध, निषेधः, निःषेध, दुःषेधः, सुषन्धिः, दुःषन्धि, निःषन्धि, भीरुष्ठान, अङ्गुलिषङ्ग, सव्यष्टृ, परमेष्ठिन्, अपष्ठु, वनिष्ठु, सुष्ठु, दुष्ठु, गौरिषक्थः, ऋतीषट् संज्ञायाम्, प्रतिष्णिका, जलाषाहम्, जलाषाडम्, नौषेचनम्, दुन्दुभिषेवणम्, दुन्दुभिषेचनम् इति सुषामादिराकृतिगणः । समास इति किम् ? भीरो स्थानमित्यादि ।

३६. ह्रस्वान्नाम्नस्ते ।

क्विलादित्यधिकारत्वेन नामिन एवायं विधिः । नाम्नो विहिते तकारादौ प्रत्यये परे ह्रस्वान्नामिनः परस्य सकारस्य षकारो भवति । तत्त्वतस्त्यतयतरतमा प्रयोजयन्ति । सर्पिष्टा, यजुष्टा । सर्पिष्ट्वम्, यजुष्ट्वम् । सर्पिष्ट, यजुष्ट । निष्ट्यः । चतुष्टयम् । सर्पिष्टरम्, वपुष्टरम् । सर्पिष्टमम्, वपुष्टमम् । असिद्धं बहिरङ्गमन्तरङ्गे इति प्लुतस्याऽसिद्धत्वादिहापि भवति—सर्पि३ष्ट्व, चतु३ष्टय । ह्रस्वादिति किम् ? गीस्तरा, धूस्तमा, गीस्त्वम्, धूस्त्वम्, उच्चैस्तराम्, उच्चैस्तमाम् । नामिन इति किम् ? तेजस्ता, तेजस्त्वम्, पयस्ता, पयस्त्वम्, तेजस्तराम्, तेजस्तमाम् । नाम्न इति किम् ? भिन्धुस्तराम् । विहितविशेषणं किम् ? सर्पिस्तरनि, सर्पिस्तरणम्, सर्पिस्तत्र । ते इति किम् ? सर्पिस्साद् भवति ।

३७. निसस्तपे सकृत् ।

निसः सकारस्य षकारो भवति तकारादौ तपतौ परे सकृदर्थे । निष्टपति सुवर्णम्—एकवारमग्निं स्पर्शयतीत्यर्थः ।

सकृदिति किम् ? निस्तपति सुवर्णं सुवर्णकारः—पुनः पुनस्तपतीत्यर्थ । तादाविति किम् ? निरतपत् । अपानिर्देशाद्यङ्लुकि न—निस्तातप्ति, निस्तातपीति ।

३८. सहेः साडः ।

साड्रूपस्य सहेः सकारस्य षकारो भवति । तुराषाट्, तुराषाड्, तुराषाड्भ्याम्, तुराषाट्सु । पृतनाषाट्, पृतनाषाड्, पृतनाषाड्भ्याम् । **'भजिसहिवहिभ्यो विण्'** [५/२/७३] इति विण्, **'सहेर्विणि च'** [३/२/८६] इति पूर्वपदस्य दीर्घः । साडिति किम् ? तुरासाहौ, तुरासाहः । पृतनासाहौ, पृतनासाहः ।

३९. उपसर्गात्सुनसुवसोस्तुस्तुभानामडन्तरेप्यद्वित्वे ।

उपसर्गस्थान्निमित्तात्परेषां सुनोति-सुवति-स्यति-स्तौति-स्तोभतीनां सकारस्य षकारो भवति अद्वित्वे अडन्तरेऽपि। अड्व्यवधानेऽपीत्यर्थः । सुन्—अभिषुणोति, परिषुणोति । नुम्विसर्गशसान्तरेऽपि—निःषुणोति, दुःषुणोति । अभिषुण्वन्तं प्रयुङ्क्ते—अभिषावयति । अत्रोपसर्गसंबन्धे सति पश्चाद् ञिः । ञ्यन्तानां[1] धातूनां पश्चादुपसर्गसंबन्धे न भवति । अभिसावयति, परिसावयति । अडन्तरे—अभ्यषुणोत्, पर्यषुणोत् । निन्निर्देशात् सौतिसवत्योर्मा[2] भूत् । अभिसौति, अभिसवति । सुव—अभिषुवति, परिषुवति, अभ्यषुवत्, पर्यषुवत् । तौदादिनिर्देशात् सूतिसूयत्योर्न[3] भवति । अभिसूते, अभिसूयते । सो—अभिष्यति, परिष्यति, अभ्यष्यत्, पर्यष्यत् । स्तु—अभिष्टौति, परिष्टौति, अभ्यष्टौत्, प्रत्यष्टौत् । स्तुभ्—अभिष्टोभते, परिष्टोभते, अभ्यष्टोभत, पर्यष्टोभत । उपसर्गादिति किम् ? दधि सुनोति, मधु सुनोति । नुम्विसर्गशसान्तरेपीत्यटा व्यवधाने न प्राप्नोतीति अडन्तरेपीति ग्रहणम् । अपिशब्दोऽभावार्थ । अन्यथा अडन्तरे एव स्यात् । अद्वित्वे इति किम् ? अभिसुसूषति, परिसुसूषति, अभ्यसुसूषत्, पर्यसुसूषत् । अत्र पूर्वसकारस्य षत्वमनेन निषिध्यते, परस्य तु **'जिस्तोरेव'**···' [२/२/१७] इति नियमेन निषिद्ध एव, सन्प्रत्ययस्य तु **'विचलात्'**···'[२/२/१४] इत्यादिना षत्वं भवत्येव । केचिदत्र अविशेषतः षत्व नेच्छन्ति । तन्मते परिसुसूसति, पर्यसुसूसत् । एकपदे इति नियमाद् प्राप्ते वचनम् ।

४०. स्थासेनिसेधिसिचसञ्जस्वञ्जां द्वित्वेऽपि ।

उपसर्गस्थान्निमित्तात्परेषां स्थादीनां सकारस्य षकारो भवति द्वित्वेऽपि अडन्तरेपि च । अभिष्ठास्यति, प्रतिष्ठास्यति, अभितष्ठौ, प्रतितष्ठौ, अभ्यष्ठात्, अभ्यष्ठात् । सेनि—अभिषेणयति, अभिषिषेणयिषति, अभ्यषेणयत् । सेधि—अभिषेधति, अभिषिषेधयिषति, अभ्यषेधत् । सिच्—अभिषिञ्चति, अभिषिषिक्षति, अभ्यषिञ्चत् । सञ्ज्—अभिषजति, अभिषषञ्ज, अभिषिषङ्क्षति, अभ्यषजत् । स्वञ्ज्—अभिष्वजते, अभिषस्वञ्जे[4], अभिषिष्वङ्क्षते, अभ्यष्वजत । ञ्यन्तानामपि भवति । प्रतितिष्ठन्तं प्रयुङ्क्ते—प्रतिष्ठापयति । एवं प्रतिषेधयति । उपसर्गादिति किम् ? अधिस्थास्यति । गतार्थत्वान्नायमुपसर्गः[5] । वृक्षं वृक्षं परि सिञ्चति । अत्र वीप्स्यसंबद्धस्य परेर्धातुना संबन्धाभावान्नोपसर्गत्वम् । निर्गताः सेचका अस्मान्निःसेचको देशः । अत्र **येन धातुना युक्ताः प्रादयस्तमेव प्रत्युपसर्गसंज्ञा** इति न भवति । सेनीति ञ्यन्तः सौत्रो धातुः । सेधीति कृतगुणत्वात् सिध्यतेर्न—अभिसिध्यति । इकारस्तूच्चारणार्थः । यङ्लुकि—प्रतिषेषिधीति । सेनेः अषोपदेशार्थं स्थासञ्जस्वञ्जामवर्णान्तव्यवधानेऽपि[6] विध्यर्थं सिच्सञ्जस्वञ्जसेधां षणि नियमबाधनार्थं सर्वेषामड्व्यवधानेऽनेकपदे च षत्वार्थं वचनम् ।

---

१. धात्वन्तरत्वादिति शेष ।

२. षुंक् प्रसवश्वर्ययो, सुं प्रसवैश्वर्ययो. इत्यनयो. ।

३ षूङ्क् प्राणिगर्भविमोचने, षूङ्च् प्राणिप्रसवे इत्यनयो ।

४. अत्र **'सस्विस्वञ्जयोः परस्य णवादौ'** [२/२/६४] इति परस्य षत्वं न ।

५. **'नाधिपरी गतार्थौ'** [१/१/४५] इत्यनेन उपसर्गसंज्ञाया निषेधोऽस्ति ।

६ उपसर्गस्थस्य नामिनोऽवर्णान्तेन द्विर्वचनेनेत्यर्थः ।

४१. सदेरप्रतेः ।

उपसर्गस्थान्निमित्तादप्रते. परस्य सदे सकारस्य षकारो भवति द्वित्वेऽपि अडन्तरेऽपि च । निषीदति, विषीदति, निषाषद्यते, विषाषद्यते, न्यषीदत्, व्यषीदत् । निषसाद, विषसाद—अत्र **'सविस्वञ्ज्योः परस्य णबादौ'** [२/२/६४] इति परस्य न षत्वम् । अप्रतेरिति किम् ? प्रतिसीदति, प्रत्यसीषदत्, प्रतिसिषत्सति । अत्र प्रतेः परस्याद्यसकारस्य षत्वं न भवति, प्रकृतिसकारस्य तु **'किवलात्'**···[२/२/१४] इत्यादिना भवत्येव ।

४२. स्तम्भेः ।

उपसर्गस्थान्निमित्तात्परस्य स्तम्भे सकारस्य षकारो भवति द्वित्वेऽपि अडन्तरेऽपि च । अभिष्टभ्नाति, प्रतिष्टभ्नाति, अभितष्टम्भ, प्रतितष्टम्भ, अभ्यष्टभ्नात्, प्रत्यष्टभ्नात् ।

४३. अवादौर्जित्यावलम्बनाविदूर्येषु ।

ऊर्जितस्य भावः—और्जित्यम् । अवलम्बन—आश्रयणम् । अविदूरस्य[1] भाव —आविदूर्यम् । अवात्परस्य स्तम्भे. सकारस्य षकारो भवति और्जित्यादिष्वर्थेषु गम्यमानेषु द्वित्वेऽपि अडन्तरेऽपि च । और्जित्ये—अहो वृषलस्यावष्टम्भ । अवष्टब्धो रिपु शूरेण । अवलम्बने—दुर्गमवष्टभ्नाति । दुर्गमवष्टभ्यास्ते । अवतष्टम्भ दुर्गम् । दुर्गमवाष्टभ्नात् । आविदूर्ये—अवष्टब्धा शरत् । अवष्टब्धे सेने । अवादिति किम् ? प्रस्तब्ध । और्जित्यादिष्विति किम् ? अवस्तब्धो वृषल शीतेन—जाड्यं प्राप्त इत्यर्थ ।

४४. उपाद् वा ।

उपात्परस्य स्तम्भे सकारस्य षकारो वा भवति और्जित्यादिष्वर्थेषु गम्यमानेषु । उपष्टम्भ , उपस्तम्भ । उपष्टम्भक', उपस्तम्भकः । उपष्टब्ध', उपस्तब्ध' । और्जित्यादिष्विति किम् ? उपस्तब्धो वृषल. शीतेन ।

४५. व्यवात्स्वनो भोजने ।

वेरवाच्चोपसर्गात्परस्य स्वनते सकारस्य षकारो भवति भोजनेऽर्थे द्वित्वेऽपि अडन्तरेऽपि च । विष्वणति, अवष्वणति—भुङ्क्ते इत्यर्थ । सशब्द भुङ्क्ते इत्यन्ये । भुञ्जान कश्चिच्छब्द करोतीत्यपरे । विषष्वाण, अवषष्वाण, व्यष्वणत्, अवाष्वणत् । व्यवादिति किम् ? अतिस्वनति, अत्यसिस्वनत् । भोजन इति किम् ? विस्वनति, अवस्वनति मृदङ्ग —विविध शब्दं करोतीत्यर्थ. ।

४६. निपरिविभ्यः सेवः ।

नि, परि, वि—इत्येतेभ्य परस्य सेवते सकारस्य षकारो भवति द्वित्वेऽपि अडन्तरेऽपि च । निषेवते, निषिषेवे, न्यषेवत । परिषेवते, परिषिषेवे, पर्यषेवत । विषेवते, विषिषेवे, व्यषेवत । एभ्य इति किम् ? अनुसेवते, प्रतिसिषेवे, प्रत्यसिषेवत् । अत्रोपसर्गाश्रित षत्व न भवति, धातोस्तु द्वित्वाश्रितं भवत्येव ।

४७. सयसितयोः ।

नि, परि, वि—इत्येतेभ्य परयो. सयसितयो सकारस्य षकारो भवति । निषयः, परिषयः, विषयः । निषितः, परिषित , विषित । सय इति सिनोतेरलन्तस्याजन्तस्य घान्तस्य वा सित इति क्तान्तस्य रूपम् । स्यतेर्वा नियमार्थं निपरिविपरस्यैव क्तान्तस्य स्यतेर्यथा स्यादिति । तेनोपसर्गान्तरपूर्वस्य **'उपसर्गात् सुनसुव'**···' [२/२/३६] इत्यादिनाऽपि न भवति, तेन प्रतिसित', नि सित. इत्यादि सिद्धम् । योगविभागात् द्वित्वेऽपि अडन्तरेऽपीति निवृत्तम्, तेन मा

---

१ अविदूरमनतिविप्रकृष्ट आसन्नमदूरामत्र च गृह्यते ।

विषसयदित्यत्र[1] द्वित्वे सति पूर्वेण व्यवधानादुत्तरस्य न भवति। पूर्वस्य तु अव्यवहितत्वात् भवत्येव। व्यसयीयत्[2], पर्यसितायत[3]। कथं मा परिषिषयत्? द्वित्वे सति उपसर्गात् परस्य पूर्वस्यानेन षत्वमुत्तरस्य तु 'क्विलात्...' [२/२/१४] इत्यादिनेति न दोषः।

४८. सिवुसहसुटाम्।

योगविभाग उत्तरार्थः। नि, परि, वि—इत्येतेभ्य परेषा सिवुसहसुटां सकारस्य षकारो भवति। निषीव्यति, परिषीव्यति, विषीव्यति, निषहते, परिषहते, विषहते, परिष्करोति। विष्किरः—शकुनिः। नेस्तु सुट् नास्तीति नोदाह्रियते। सिवोऽनुबन्धनिर्देशाद्यङ्लुकि न। परिसेषिवीति।

४९. स्वञ्जस्तोश्चाऽडन्तरे वा।

नि, परि, वि—इत्येतेभ्य परस्य स्वञ्ज्, स्तु इत्येतयो. सिवुसहसुटां च सकारस्य षकारो वा भवति अडन्तरे। न्यष्वजत, न्यस्वजत। पर्यष्वजत, पर्यस्वजत। व्यष्वजत, व्यस्वजत। न्यष्टौत्, न्यस्तौत्। पर्यष्टौत्, पर्यस्तौत्। व्यष्टौत्, व्यस्तौत्। न्यषीव्यत्, न्यसीव्यत्। पर्यषीव्यत्, पर्यसीव्यत्। व्यषीव्यत्, व्यसीव्यत्। न्यषहत, न्यसहत। पर्यषहत, पर्यसहत। व्यषहत, व्यसहत। पर्यष्करोत्, पर्यस्करोत्। स्वञ्जस्तोर्नित्ये[4] प्राप्ते सिवुसहसुटां चाऽप्राप्ते विभाषा।

५०. निरन्वभिभ्यश्च स्यन्दतेरप्राणिनि।

वेत्यनुवर्तते। निर्, अनु, अभि—इत्येतेभ्यश्चकारात् नि, परि, वि—इत्येतेभ्यश्च परस्य अप्राणिकर्तृकेऽर्थे वर्तमानस्य स्यन्दतेः सकारस्य षकारो वा भवति। निःष्यन्दते निःस्यन्दते वा तैलम्। अनुष्यन्दते, अनुस्यन्दते। अभिष्यन्दते, अभिस्यन्दते। निष्यन्दते, निस्यन्दते। परिष्यन्दते, परिस्यन्दते। विष्यन्दते, विस्यन्दते। तिपानिर्देशाद्यङ्लुकि न—अभिसास्यन्दीति तैलम्। निरन्वभिभ्यश्चेति किम्? अतिस्यन्दते तैलम्। अप्राणिनीति किम्? अनुस्यन्दते मत्स्यो जले। केचित्तु प्राण्यप्राणिविषयप्रपञ्च मुक्त्वैव विकल्पमिच्छन्ति।

५१. वेः स्कन्दोऽक्तयोः।

वे. परस्य स्कन्दे. सकारस्य षकारो वा भवति न तु क्तक्तवत्वो परयो.। अक्तयोरिति द्विवचनवचनेन उभयोरपि क्तक्तवत्वोर्ग्रहणम्। विष्कन्ता, विस्कन्ता। विष्कन्तुम्, विस्कन्तुम्। अक्तयोरिति किम्? विस्कन्नः, विस्कन्नवान्।

५२. परेः।

परे· परस्य स्कन्देः सकारस्य षकारो वा भवति। परिष्कन्ता, परिस्कन्ता। परिष्कन्द., परिस्कन्द.। योगविभागात् अक्तयोरिति नानुवर्तते। तेन क्तयोरपि विकल्पो भवति। परिष्कण्णः, परिस्कन्नः। परिष्कण्णवान्, परिस्कन्नवान्।

५३. निर्निभ्यां स्फुरस्फुलः।

निर्निभ्यां परयोः स्फुरतिस्फुलत्योः सकारस्य षो वा भवति। निःष्फुरति, निःस्फुरति। निष्फुरति, निस्फुरति। निःष्फुलति, निःस्फुलति। निष्फुलति, निस्फुलति। वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः।

---

१. विषयमाख्यत् 'लिप्यहुलं...' [४/१/३७]। अत्र द्वित्वे कर्तव्ये 'णषमऽसिद्धं षरे...' [२/१/६१] इत्यनेन षत्वनिवृत्तौ अन्यस्येति द्विर्वचनम्।

२. विषयमैच्छत्, क्यचि ईः।

३. परिषित इवाचरत्, क्यङ्, 'क्यिचयणोऽक्याकाषि...' [४/१/५१] इति दीर्घः।

४. 'स्थासेनिसेधि...' [२/२/४०], 'उपसर्गात्सुनुसुव...' [२/२/३६] इत्याभ्याम्।

५४. वेः ।

वेः परयोः स्फुरतिस्फुलत्योः सकारस्य षो वा भवति । विष्फुरति, विस्फुरति । विष्फुलति, विस्फुलति । योगविभाग उत्तरार्थः ।

५५. स्कभ्नः ।

वेः परस्य स्कभ्नातेः सकारस्य षो नित्यं भवति । योगविभागाद्वेति निवृत्तम् । अन्यथा वे स्कभ्नश्चेति क्रियेत । विष्कभ्नाति, विष्कम्भिता, विष्कम्भक, विष्कम्भयति । स्कभ्ननिर्देशान्नेह—विस्कभ्नोति । स्कम्भु सौत्रो धातुः अषोपदेशः ।

५६. सुविनिर्दुर्भ्यः समसूतेः ।

सु, वि, निर्, दुर्—इत्येतेभ्यः परस्य समसूतिसबन्धिनः सकारस्य षो भवति । सुषमः, विषमः, निःषमः, दुःषमः । सुषूतिः, विषूतिः, निःषूतिः, दुःषूतिः । समसूतीति नाम्नोर्ग्रहणाद् धातोर्वैरूप्ये च न भवति । सुसमति, विसमति, निःसमति, दुःसमति । सुसूतम्, विसूतम्, निःसूतम्, दुःसूतम् । अन्ये तु समसूत्योर्धात्वोरेवेच्छन्ति । तन्मते सुषमति, विषमति, निःषमति, दुःषमति, सुषूतम्, विषूतम्, निःषूतम्, दुःषूतमित्यादावेव भवति ।

५७. अवः स्वपः ।

सुविनिर्दुर्पूर्वस्य वकाररहितस्य स्वपेर्धातोः सकारस्य षो भवति । सुषुप्तः, विषुप्तः, निःषुप्तः, दुःषुप्तः । सुषुषुपतुः, विषुषुपतुः, निःषुषुपतुः, दुःषुषुपतुः । अव इति किम् ? सुस्वप्ता, सुसुस्वाप, सुस्वप्नः, दुःस्वप्नः ।

५८. अस्तेरुपसर्गप्रादुर्भ्यां यस्वरे ।

उपसर्गस्थान्निमित्तात् प्रादुःशब्दाच्च परस्याऽस्तेः सकारस्य यकारादौ स्वरादौ च प्रत्यये परे षो भवति । अभिष्यात्, विष्यात्, निष्यात्, प्रादुःष्यात् । अभिषन्ति, विषन्ति, निर्षन्ति, प्रादुःषन्ति । नुमादिव्यवधानेऽपि—निःष्यात्, निःषन्ति । उपसर्गप्रादुर्भ्यामिति किम् ? दधि स्यात्, मधूनि सन्ति । यस्वर इति किम् ? निस्तः, अनुस्तः, अनुस्मः, प्रादुःस्तः । अस्तेरिति किम् ? विसृतम्[1], अनुसृतम् । प्रादुःशब्दस्य तु कृभ्वस्तिष्वेव प्रयोगात् प्रत्युदाहरणं नास्ति ।

५९. न सिचो यङि ।

सिचः सकारस्य षकारो न भवति यङि परे । सेसिच्यते, अभिसेसिच्यते[2] । परत्वादुपसर्गलक्षणमपि षत्वं बाधते । एवमुत्तरत्रापि । यङीति किम् ? अभिषिषिक्षति । ङकारः किम् ? अभिषिच्यते ।

६०. सेधेर्गतौ ।

गत्यर्थे वर्तमानस्य सेधतेः सकारस्य षकारो न भवति । अभिसेधति[3], अनुसेधति गाः—अभिगच्छति, अनुगच्छति इत्यर्थः । अभिसेधयति, अनुसेधयति—गमयतीत्यर्थः । अभिसिसेधिषति, अनुसिसेधिषति—अभिजिगमिषति, अनुजिगमिषति इत्यर्थः । गताविति किम् ? अनाचारात् शिष्यं प्रतिषेधयति, निषेधयति—निवारयतीत्यर्थः ।

६१. प्रतिस्तब्धनिस्तब्धौ ।

प्रतिस्तब्ध, निस्तब्ध—इत्येतौ षकाराभावौ निपात्येते । प्रतिस्तब्धः, निस्तब्धः । 'स्तम्भेः' [२/२/४२] इति प्राप्तं षत्वमनेन निषिध्यते ।

---

१ विसरति, अनुसरतीति क्विपि तुगागमे **विवक्षिता धातुत्वं न जहति इति** न्यायात् विसृत् इत्येवरूपात् अम्विभक्तिरूपे स्वरादौ प्रत्यये परे विसृत् अम् इत्यवस्थायां प्राप्तिः ।

२-३. **'स्थासेनि'**··· [२/२/४०] इति प्राप्ते प्रतिषेधः ।

६२. सहेः सोढः ।

सहधातोः सोढरूपस्य सकारस्य षकारो न भवति। परिसोढः, परिसोढुम्, परिसोढव्यम् । निसोढः, निसोढुम्, निसोढव्यम् । **'सिवुसहसुटाम्'** [२/२/४८] इति प्राप्ते निषेधार्थं वचनम् ।

६३. सुनः स्यसनोः ।

सुनोतेः सकारस्य षकारो न भवति स्ये सनि च प्रत्यये परे। अभिसोष्यति[1], परिसोष्यति। अभ्यसोष्यत्, पर्यसोष्यत् । सनि सुसूषते क्विपि सुसू । सुसूषतीति नोदाह्रियते। तत्र **'स्थिस्तोरेव…'** [२/२/१७] इति नियमान्न भविष्यति। अभिसुसूषतीत्यपि नोदाह्रियते। तथापि **'उपसर्गात्सुनुसुव…'** [२/२/३६] इत्यादिना द्वित्वे सति न षत्वप्राप्तिः । स्यसनोरिति किम् ? सुषाव, अभिषुणोति।

६४. सदिस्वञ्ज्योः परस्य णबादौ ।

सदि, स्वञ्जि—इत्येतयोर्धात्वोर्णबादौ परे परस्य सकारस्य षकारो न भवति । अभिषसाद[2], निषसाद, विषसाद। अभिषस्वजे[3], अभिषस्वञ्जे, परिषस्वजे, परिषस्वञ्जे, प्रतिषस्वजे, प्रतिषस्वञ्जे।

६५. स्तम्भसिवुसहामड्युपसर्गाद् ।

स्तम्भ, सिवु, सह—इत्येतेषामुपसर्गनिमित्तात् प्राप्त सकारस्य षकारो न भवति अडि परे। पर्यतस्तभत्[4], पर्यसीषिवत्[5], पर्यसीषहत्। उपसर्गनिमित्तेनैव प्राप्तस्य निषेधस्तेन पर्यसीषिवदित्यादौ परसकारस्य तु पूर्वक्विलनिमित्तत्वेन षकारो भवत्येव।

६६. पूर्वात्सुटः ।

पूर्वसबन्धिनो निमित्तात्परस्य सुट सकारस्य प्राप्तं षत्वं न भवति । समचिस्करत्, समचिस्करताम्, समचिस्करन् । **'संपरिभ्यां कृञः सुट्'** [८/४/१] । पूर्वादिति किम् ? परिष्करोति।

६७. सात्सुगोः ।

सात्प्रत्ययस्य सुगागमस्य च सस्य प्राप्तं षत्वं न भवति । अग्निसात्, दधिसात्, मधुसात्, दधिस्यति, मधुस्यति ।

६८. द्विः ।

द्विरुक्तस्य सकारस्य षकारो न भवति। सुपिस्स्यते, सुतुस्स्यते। अत्र सुपूर्वस्य पिसेस्तुसेश्च सकारस्य क्ये प्रत्यये **'अदीर्घादविरामैकव्यञ्जने'** ... **'अदीर्घाद्वसानेकहसयोः'** [१/३/२७] इति द्विर्भावः । द्वित्वाऽभावपक्षेऽपि कृतसकाराऽभावान्न—सुपिस्यते, सुतुस्यते। इति षत्वविधि ।

६९. एकपदे रषृवर्णान्नो[6] णोऽपदान्ते ।

रेफषकाराभ्यामृवर्णाच्च परस्य अपदान्ते वर्तमानस्य नकारस्य णकारादेशो भवति एकपदे। आस्तीर्णम्, विस्तीर्णम्,

---

१ **'उपसर्गात्सुनुसुव…'** [२/२/३६] इति प्राप्ते निषेध ।

२ **'सदेरप्रतेः'** [२/२/४१] इति प्राप्ते प्रतिषेध. ।

३. **'स्थासेनि…'** [२/२/४०] इति प्राप्त निषिध्यते ।

४. **'स्तम्भेः'** [२/२/४२] इति प्राप्ते निषेध. ।

५. **'स्यन्दस्तोश्चाऽन्तरे वा'** [२/२/४६] इति प्राप्ते निषेधः ।

६ ननु ऋवर्णग्रहण किमर्थं, यत ऋवर्णादपि तन्मध्यव्यवस्थितरेफाश्रय णत्व भविष्यति। अत एव पाणिनिनापि रषाभ्यामित्येवोक्तम्। उच्यते—न हि वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते तद्भिन्नत्वाद् वर्णबुद्धेरनुत्पादनात् । तथाहि—मांसं न विक्रेयमिति सत्यपि निषेधे गावो विक्रीयन्ते। तत्र मांसबुद्धेरभावात्। **वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते** इति न्यायस्त्वनित्यत्वान्नाश्रीयते।

चतुर्णाम्। कुष्णाति, पुष्णाति, मुष्णाति। तिसृणाम्, चतसृणाम्, नृणाम्, नृणाम्। एकपदे इति किम्? अग्निर्नयति। रषृवर्णादिति किम्? जिनेन, देवेन, तेन। अपदान्ते इति किम्? पितॄन्। पद इत्यनेनैवैकपदे लब्धे एकग्रहणं नियमार्थम्। एकमेव यन्नित्य तत्र यथा स्यात् यदेकं चानेक च तत्र मा भूत्। चर्मनासिक', मेषनासिक.। अधिकारोऽयमा पादपरिसमाप्ते।

७०. अवकुप्वनुस्वारविसर्गजिह्वामूलीयोपध्मानीयैरन्तरेऽपि।

सूत्रे समासमकृत्वा बहुवचननिर्देशो व्यस्तानां समस्तानां च ग्रहणार्थम्। अवप्रत्याहार, कवर्ग, पवर्ग, अनुस्वारादि— इत्येतैर्व्यस्तै. समस्तैश्चान्तरे व्यवधानेऽपि रेफषकाराभ्यामृवर्णाच्च परस्य नकारस्य णकारादेशो भवति। अवान्तरे—करणम्, वृक्षाणाम्, करिणाम्, ऋषीणाम्, गुरुणा, गुरूणाम् करेण, अर्हेण, आर्येण, सर्वेण। कवर्गान्तरे –अर्केण, मूर्खेण, स्वर्गेण, अर्घेण। पवर्गान्तरे—दर्पेण, रेफेण, दर्भेण, धर्मेण। अनुस्वारान्तरे—बृंहणम्। विसर्गान्तरे—उरःकेण, उरःपेण। जिह्वामूलीयान्तरे—उर≍केण। उपध्मानीयान्तरे—उर)(पेण। ननु सकारस्य स्थानिवत्त्वात् कथं णत्वम्? उच्यते— वर्णमात्रेण विधौ तन्निषेधात्। अवादीनामिति नियम किम्? विरलेन, अर्चनम्, मूर्च्छनम्, अर्जनम्।

७१. पूर्वपदस्थात्संज्ञायामगः।

गकारान्तवर्जितात् पूर्वपदस्थान्निमित्तात् परस्य सामर्थ्यादुत्तरपदस्थस्य नकारस्य णकारो भवति संज्ञायां विषये। द्रुणसः, खुरणसः, खरणाः, खुरणा, शूर्पणखा, चन्द्रणखा। सज्ञायामिति किम्? चर्मनासिकः, मेषनासिकः। अग इति किम्? ऋगयनम् एकस्मिन्नेव पदे इति पूर्वसूत्रे विज्ञानादुत्तरपदस्थस्य समासे न प्राप्नोतीति वचनम्। खरपस्या- ऽपत्यं—खारपायण। मातृभोगाय हितो मातृभोगीण। गर्गभगोऽस्या अस्तीति गर्गभगिणीत्यादौ तु उत्तरपदसम्बन्धी नकारो न भवतीति एकपदत्वात् पूर्वेणैव णत्वम्। यदा तु गर्गाणां भगिनीति विग्रहस्तदैकपदत्वाभावात् गर्गभगिनीत्येव भवति।

७२. पुरगा-मिश्रका-सिध्रका-सारिका-कोटरेभ्यो वनस्य।

पुरगादिभ्यः पूर्वपदेभ्य परस्य वनशब्दस्य नकारस्य णकारो भवति संज्ञायां विषये। पुरगावणम्, मिश्रकावणम्, सिध्रकावणम्, सारिकावणम्, कोटरावणम्। पूर्वेणैव सिद्धे नियमार्थं वचनम्। एतेभ्य एव परस्य वननकारस्य णकारादेशो भवति नान्येभ्य इति। कुबेरवनम्, शतधारवनमित्यादि।

७३. प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्श्यखदिरपीयुक्षाऽग्रेभ्यः।

प्रादिभ्य पूर्वपदेभ्य परस्य वननकारस्य णकारादेशो भवति। सामान्यार्थं वचनम्। प्रवणम्, निर्वणम्, अन्तर्वणम्, शरवणम्, इक्षुवणम्, प्लक्षवणम्, आम्रवणम्, कार्श्यवणम्। वचनसामर्थ्याच्छकारव्यवधानेऽपि भवति। खदिरवणम्, पीयुक्षावणम्। पीयुक्षाशब्दोऽव्युत्पन्न आबन्त.। अग्रेवणम्। **'पारेमध्येऽग्रेऽन्तः षष्ठ्या वा'** [३/१/३०] इति अव्ययीभाव तत्सन्नियोगे च पूर्वपदस्यैत्वम्।

७४. द्वित्रिस्वरेभ्यो वृक्षौषधिभ्योऽनिरिकादिभ्यो वा।

द्विस्वरेभ्य. त्रिस्वरेभ्यश्च इरिकादिवर्जितेभ्यो वृक्षवाचिभ्य ओषधिवाचिभ्यश्च परस्य वननकारस्य णकारादेशो वा भवति। दारुवणम्, दारुवनम्। करीरवणम्, करीरवनम्। बदरीवणम्, बदरीवनम्। शिरीषवणम्, शिरीषवनम्। दूर्वावणम्, दूर्वावनम्। व्रीहिवणम्, व्रीहिवनम्। नीवारवणम्, नीवारवनम्।

ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः।
फली वनस्पतिर्ज्ञेयो वृक्षाः पुष्पफलोपगाः॥

इति यद्यपि वृक्षवनस्पतीनां भेदोऽस्ति तथाप्यतिबहुत्वार्थबहुवचनबलाद् वृक्षग्रहणे वनस्पतीनामपि ग्रहणं भवति। अत एव च यथासङ्ख्यमपि न भवति। तथा सञ्ज्ञायामसञ्ज्ञायां च भवति। द्वित्रिस्वरेभ्य इति किम्? देवदारुवनम्, भद्रदारुवनम्। वृक्षौषधिभ्य इति किम्? विदारीवनम्[1], पितृवनम्। अनिरिकादिभ्य इति किम्? इरिकावनम्, मिरिकावनम् तिमिरवनम्,

---

१. लताविशेषः।

चीरिकावनम्, तिरिकावनम्, कर्मारवनम्, क्षीरवनम्, हरिवनम्। आकृतिगणोऽयम्। इरिकादिवृक्षविशेषवर्जनाद् वृक्षविशेषाणामेवेह विधिः, तेनेह न भवति—द्रुमवनम्, वृक्षवनम्।

७५. नसस्य।

पूर्वपदस्थान्निमित्तात्परस्य नसनकारस्य णकारादेशो भवति। प्रगता प्रवृद्धा वा नासिका यस्य स प्रणसः। एवं निर्णसः। प्रणसं मुखं, निर्णसं मुखम्।

७६. ग्रामाग्रान्नियः।

ग्राम, अग्र—इत्येताभ्यां परस्य नियो नकारस्य णो भवति। ग्रामणीः, अग्रणीः। ग्रामाग्रादिति किम्? खरनीः, मेषनीः।

७७. अतोऽह्नस्य।

अदन्तपूर्वपदस्थान्निमित्तात्परस्याऽह्नशब्दसंबन्धिनो नकारस्य णो भवति। पूर्वाह्णः, अपराह्णः। अत इति किम्? निरह्नः, दुरह्नः। अह्न इत्यकारान्तनिर्देशादिह न—दीर्घाह्नी शरत्।

७८. त्रिचतुर्भ्यां हायनस्य वयसि।

त्रि, चतुर्—इत्येताभ्यां परस्य हायनस्य नस्य णो भवति वयसि गम्यमाने। त्रिहायणो वत्सः, त्रिहायणी वडवा। चतुर्हायणो वत्सः, चतुर्हायणी वडवा। त्रिचतुर्भ्यामिति किम्? सहस्रहायनः पुरुषः। वयसीति किम्? त्रिहायना शाला, चतुर्हायना शाला। कालकृता प्राणिनां शरीरावस्था बाल्ययौवनादि वयः। ईबपि वयस्येव भवति।

७९. वाह्याद् वाहनस्य।

वोढव्यं वाह्यम्। वाह्यवाचिनः पूर्वपदस्थान्निमित्तात्परस्य वाहनशब्दस्य नकारस्य णो भवति। इक्षुवाहणम्, शरवाहणम्, दर्भवाहणम्। वाह्यादिति किम्? सुरवाहनम्। सबन्धमात्रमत्र विवक्षितम्। नरवाहनः। नात्र वाह्यात्परं वाहनं किं तर्हि वाहनात्।

८०. पानस्य देशे।

पूर्वपदस्थान्निमित्तात्परस्य पानशब्दस्य नकारस्य णकारो भवति देशे, समुदायेन चेद्देशो गम्यते। पीयते इति पानम्। क्षीरपानं येषां ते क्षीरपाणा उशीनराः। सुरापाणाः प्राच्याः। सौवीरपाणा वाल्हीकाः। तात्स्थ्यान्मनुष्याभिधानेऽपि[१] देशो गम्यते। देशे इति किम्? दाक्षीणां पानं—दाक्षिपानम्। क्षीरपाना गोपालकाः।

८१. भावसाधनयोर्वा।

पूर्वपदस्थान्निमित्तात्परस्य भावे साधने च निष्पन्नस्य पानशब्दस्य नकारस्य णकारो वा भवति। क्षीरपाणं क्षीरपानं वा वर्तते। सौवीरपाणं सौवीरपानं वा वर्तते। साधने—क्षीरपाणं क्षीरपानं वा पात्रम्। सौवीरपाणं सौवीरपानं वा भाजनम्। भावसाधनयोरिति किम्? पीयतेऽस्मिन्निति पानम्। क्षीरपानं घोषगृहम्।

८२. गिरिनद्यादीनाम्।

गिरिनद्यादीनां शब्दानां नकारस्य णकारो वा भवति। गिरिणदी, गिरिनदी। गिरिनद्यादयो यथा—गिरिनदी,

---

१. अयमर्थः—उशीनरादयो हि शब्दाः संज्ञात्वेन पूर्वं देशेष्वेव प्रवृत्ताः पश्चात्तु तत्स्थानसम्बन्धान्मनुष्येषु, तेन मनुष्याभिधानेऽपि देशाभिधानं गम्यते।

गिरिनख, गिरिनद्ध, गिरिनितम्ब, वक्रनदी, वक्रनितम्बा, चक्रनदी, चक्रनितम्बा, तूर्यमान, माषोन, आर्गयन । इत्याकृतिगणोऽयम् ।

८३. नामान्तनुमस्यादेरयुवपक्वाह्नः ।

पूर्वपदस्थान्निमित्तात् परस्य नामान्तस्य नुमागमस्य स्यादेश्च नकारस्य णकारो वा भवति न चेत्स नकारो युवन्-पक्वाह्नशब्दसम्बन्धी भवति । नामान्ते— माषवापिणौ, माषवापिनौ । व्रीहिवापिणौ, व्रीहिवापिनौ । माषवापिणी माषवापिनी वा कुले । व्रीहिवापिणी व्रीहिवापिनी कुले । माषवापिण, माषवापिन । माषवापीणि, माषवापीनि कुलानि । माषवापिणा, माषवापिना । नुमि—माषवापाणि माषवापानि कुलानि । स्यादौ—माषवापेण, माषवापेन । माषवापाणाम्, माषवापानाम् । माषवापानित्यत्र तु अपदान्त इत्यधिकारान्न भवति । पूर्वपदात्परस्येति कथनेन नेह विकल्पः—**गर्गाणां भगो गर्गभगः**, सोऽस्याऽस्तीति समासादिन्, गर्गभगिणी । अत्रैकपदस्थत्वात् मातृभोगीण इत्यादिवन्नित्यमेव णत्वम् । ननु पुरुषश्च वारि च पुरुषवारिणी इत्यत्र कथं न विकल्पः ? उच्यते—**'एकपदे रषृवर्णात्…'** [२/२/६९] इत्यनेन अन्तरङ्गत्वात्परमपीमं विकल्पं बाधित्वा एकपदाश्रितं नित्यमेव णत्वम् । नामान्त इत्यन्तग्रहणं किम् ? गर्गाणां भगिनी—गर्गभगिनी । अत्र न नकारोऽन्तः, किन्तु ईप् प्रत्ययः । यद्येवं तर्हि माषवापिणी, माषवापिनी इत्यत्रापि विकल्पो न प्राप्नोति । उच्यते—**गतिकारकसप्तम्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समासः** इति न्यायात् स्त्रीप्रत्ययात् प्रागेव नकारान्तेन वापिन्शब्देन समासः, पश्चात् स्त्रीप्रत्ययः । विभक्त्यन्तत्वाभावेऽपि च रूढत्वादुत्तरपदत्वम् । ततश्चोत्तरपदस्यान्तो नकार इति णत्वविकल्पो भवति । अयुवपक्वाह्न इति किम् ? आर्ययूना, क्षत्रिययूना, प्रपक्वानि, प्रपक्वेन, परिपक्वानि, परिपक्वेन, प्रपक्वानाम्, परिपक्वानाम्, दीर्घाह्नी शरत्, दीर्घाह्ना निदाघेन, चतुरहनि । अवादिनियमान्नेह— गर्दभवाहिनौ, गर्दभवाहिन ।

८४. क्वेकस्वरवतः ।

नित्यार्थं वचनम् । पूर्वपदस्थान्निमित्तात्परस्य कवर्गवत एकस्वरवतश्चोत्तरपदस्य नामान्तस्य नुमागमस्य स्यादेश्च नकारस्य णकारो भवति न चेत्स नकारः पक्वशब्दसम्बन्धी[1] भवति । कवर्गवत —स्वर्गकामिणौ, मोक्षकामिणौ, स्वर्गगामिणौ, मोक्षगामिणौ, स्वर्गगामिणी, मोक्षगामिणी, स्वर्गकामाणि मोक्षकामाणि कुलानि, उरःकेण, उरःकेण, गुरुमुखेण, ऋषिमुखेण, क्षीरमेघाणाम्, पुष्पमेघाणाम् । एकस्वरवत —वृत्रहणौ, वृत्रहण, ब्रह्महणौ, ब्रह्महण, क्षीरपाणि, यूषपाणि, क्षीरपेण, यूषपेण, उरःपेण, उरःपेण, क्षीरपाणाम्, यूषपाणाम् । अपक्वस्येति किम् ? क्षीरपक्वानि, क्षीरपक्वेन, क्षीरपक्वानाम् । अवादिनियमान्नेह—माषत्यागिन, माषत्यागेन ।

८५. उपसर्गाण्णोपदेशस्य ।

उपदेश आद्योच्चारणम् । ण उपदेशे यस्य स णोपदेशः । उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नकारस्य णकारो भवति । प्रणमति, परिणमति । प्रणदति, परिणदति । प्रणयति, परिणयति । प्रणामकः, प्रणायकः । **'अन्तर्णस्त्वङकिषु'** [१/१/४३]—अन्तर्णयति । **'दुर्णत्वषत्वयोर्वा'** [१/१/४४]—दुर्णयः, दुर्नयः । **'हैमः'** [२/३/७७] त्वस्य णत्वं नेत्याह—दुर्नयः, दुर्नीतम् । उपसर्गादिति किम् ? प्रातर्नयति, पुनर्नयति । **येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञा भवन्तीतीह** न भवति । प्रगता नायका अस्माद्देशात् प्रनायको देशः । णोपदेशस्येति किम् ? प्रनर्दति, प्रनृत्यति, प्रनर्दकः ।

नादयो णोपदेशाः स्युः, नर्दि नन्दि च नाथतिम् ।
नाधि नाटिं तथा नक्कि, वर्जयित्वा च नृनृतौ ।।

केचिन्नाधतेर्नृनन्द्योश्च णोपदेशतामाहुः । अवादिनियमान्नेह—प्रनिनमति । अग्रे यत्र पूर्वपदं नास्ति तत्र उपसर्गादित्यनुवर्तनीयम् ।

---

१. सत्यपि नित्यानुवर्तने प्रतिषेधस्य प्राप्तिपूर्वकत्वात् पक्वशब्दस्यैव प्रतिषेध इति ।

८६. हिनुमीनानीनाम् ।

उपसर्गस्थान्निमित्तात् परस्य हिनु, मीना, आनि—इत्येतेषां नकारस्य णकारो भवति। प्रहिणोति, प्रहिणुतः। प्रमीणाति, प्रमीणीतः। हिनुमीनाग्रहणे विकृतस्यापि भवति। **एकदेशविकृतस्याऽनन्यत्वात्** । प्रयाणि, प्रवयाणि, प्रापयाणि। आनीत्यर्थवत एव ग्रहणादनर्थकस्य न भवति। प्रवृद्धा वपा येषां तानि प्रवपानि मांसानि। अवादिनियमान्नेह—प्रददानि।

८७. नेर्गद-नद-पद-पताऽपिद्दा-धा-मेङ्-माङ्-स्यति-वपति-वहति-हन्ति-याति-वाति-द्राति-प्साति-चिनोति-शाम्यति-देग्धिषु ।

उपसर्गस्थान्निमित्तात्परस्य नेर्नकारस्य णकारादेशो भवति गदादिषु धातुषु परेषु। प्रणिगदति, प्रणिनदति, प्रणिपद्यते, प्रणिपतति। अपिद्दाग्रहणाद् ददाति-दयति-यच्छति-द्यतीनां ग्रहणम्। प्रणिददाति, प्रणिदयते, प्रणियच्छति, प्रणिद्यति। धा—प्रणिदधाति, प्रणिधयति। ङकारोपलक्षितमेङ्माङोर्ग्रहण, माति-मीनाति-मिनोतीनां निवृत्त्यर्थम्। प्रणिमयते, प्रणिमिमीते। ङकारनिर्देशश्च नानुबन्धार्थं किंतु मात्यादिनिवृत्त्यर्थः, तेन यङ्लुक्यपि भवति—प्रणिमामेति, प्रणिमामातीत्यादि। प्रणिष्यति, प्रणिवपति, प्रणिवहति, प्रणिहन्ति, प्रणियाति, प्रणिवाति, प्रणिद्राति, प्रणिप्साति, प्रणिचिनोति, प्रणिशाम्यति, प्रणिदेग्धि। अडागमस्यधात्ववयवत्वेन व्यवधायकत्वाभावात् अडन्तरेऽपि नेर्गदादिषु णत्वमिष्यते। प्रण्यगदत्। सूत्रे यस्मिन् यस्मिन् धातावपा तिपा च निर्देशस्तत्र तत्र यङ्लुकि निवृत्तिः, तेन प्रनिजागदीति, प्रनिसासेति इत्यादौ णत्वं न। गदादिष्विति किम्? प्रनिमाति, प्रनिमीनाति, प्रनिमिनोति, प्रनिदायन्ते व्रीहयः, प्रनिदायन्ते पात्राणि।

८८. अकखाद्यऽषान्ते वोपदेशे ।

उपदेशे ककारखकारादिः षकारान्तश्च यो धातुस्ताभ्यामन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नकारस्य णकारो वा भवति। प्रणिपचति, प्रनिपचति। प्रणिभवति, प्रनिभवति। परिणिभिनत्ति, परिनिभिनत्ति। प्रणिपापच्यते, प्रनिपापच्यते। प्रणिपिपक्षति, प्रनिपिपक्षति। प्रण्यपीपचत्, प्रन्यपीपचत्। पूर्वसूत्रारम्भसामर्थ्यात् पूर्वसूत्रविभक्तोऽस्य विषयः, तेन प्रणिदयते, प्रणिमयते—इत्यादौ पूर्वेण नित्यमेव णत्वम्। अकखादीति किम्? प्रनिकरोति, प्रनिकिरति, प्रनिखनति, प्रनिखादति। अषान्ते इति किम्? प्रनिद्वेष्टि, प्रनिपिनष्टि। उपदेशे इति किम्? प्रनिचकार, प्रनिचखाद, प्रनिपेक्ष्यति—इह न भवति। इह च भवति—प्रणिवेष्टा[1], प्रनिवेष्टा। यङ्लुकि नेच्छन्त्येके—प्रनिपापचीति, प्रनिसासत्ति।

८९. अनितेर्द्वित्वेऽप्यऽन्तेऽपि ।

उपसर्गस्थान्निमित्तात्परस्य अनितेर्नकारस्य णकारो भवति द्वित्वे तथा अन्ते वर्तमानस्यापि भवति। प्राणिति, पराणिति। द्वित्वेपि—प्राणिणिषति, प्राणिणत्। अन्तेपि—हे प्राण्, हे पराण्। केचिदत्र विकल्पमनुवर्तयन्ति। प्राणिति, प्रानिति। **'हैमस्तु'** [२/३/८१] परिपूर्वकस्यैव विकल्पमाह—पर्यणिति, पर्यनिति। इह अपदान्ताधिकारेणाऽप्राप्तेऽन्तेऽपीति ग्रहणम्। अनितेरिति तिपा निर्देशो दैवादिकनिवृत्त्यर्थः न यङ्लुगनिवृत्त्यर्थः यङोऽसम्भवात्।

९०. हनः ।

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नकारस्य णकारो भवति। प्रहण्यते, पराहण्यते, निर्हण्यते, अन्तर्हण्यते। प्रहणनम्, पराहणनम्, अन्तर्हणनम्। प्रघ्नन्ति, प्राघानीत्यादौ तु **'हनो घेन'** [२/२/१०३] इति प्रतिषेधान्न भवति।

९१. वमोर्वा ।

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नकारस्य णकारादेशो वा भवति वमयोः परयोः। प्रहण्वः, प्रहन्वः। प्रहण्मः, प्रहन्मः। प्रहण्मि, प्रहन्मि। प्राहण्वहे, प्राहन्वहे। प्राहण्महे, प्राहन्महे। अन्तर्हण्वः, अन्तर्हन्वः। अन्तर्हण्मः, अन्तर्हन्मः।

---

१. विशंप्-प्रवेशने इत्यस्य रूपोयम्।

९२. निसनिक्षनिन्दां कृति ।

उपसर्गस्थान्निमित्तात्परेषां निसादीना धातूना नकारस्य णकारो वा भवति कृत्प्रत्यय परे । प्रणिसनम्, प्रनिसनम् । प्रणिक्षणम्, प्रनिक्षणम् । प्रणिन्दनम्, प्रनिन्दनम् । कृतीति किम् ? प्रणिंस्ते, परिणिंस्ते । प्रणिक्षति, परिणिक्षति । प्रणिन्दति, परिणिन्दति । णोपदेशत्वान्नित्यम् ।

९३. स्वरात् कृतः ।

उपसर्गस्थान्निमित्तात्परस्य स्वरात् परस्य कृत्प्रत्ययस्य नकारस्य णकारो भवति । प्रहाण., प्रहाणवान्, प्रहीण, प्रहीणवान्, प्रयाणम्, प्रमाणम्, प्रवपणम्, प्रयायमाणम्, प्रयायिणौ, अप्रयाणि, प्रयाणीयम्, प्रवहणीयम् । यथासंभवं क्त, क्तवतु, अन, आन, इन्, अनि, अनीय—इत्येते प्रत्यया प्रयोजयन्ति । स्वरादिति किम् ? प्रभुग्न, प्रभुग्नवान् । कृत इति किम् ? प्रवापेन ।

९४. हसादेर्नाम्युपधाद् वा ।

स्वरात् कृत इत्यनुवर्तते । उपसर्गस्थान्निमित्तात्परस्य नाम्युपधात् हसादेर्धातो परस्य स्वरात् परो यो कृत्प्रत्ययस्य नकारस्तस्य णकारो वा भवति । प्रमेहणम्, प्रमेहनम् । प्रकोपणम्, प्रकोपनम् । प्रगुप्यमाणम्, प्रगुप्यमानम् । प्रकोपिणौ, प्रकोपिनौ । अप्रकोपणि, अप्रकोपनि । प्रकोपणीयम्, प्रकोपनीयम् । हसादेरिति किम् ? प्रेहणम्, प्रोहणम् । नाम्युपधादिति किम् ? प्रवपणम्, प्रवहणम् । स्वरादिति किम् ? प्रभुग्न, परिभग्न । अवादिनियमान्नेह—प्रभेदनम्, प्रभोजनम् । पूर्वेण नित्ये प्राप्ते विकल्पार्थ वचनम् ।

९५. नाम्यादेर्नुमि ।

उपसर्गस्थान्निमित्तात्परस्य नुमागमे सति नाम्यादेरेव धातो परस्य स्वरादुत्तरस्य कृन्नकारस्य णकारो भवति । प्रेङ्खणम्, प्रेङ्खनम् । प्रेङ्खमाण, प्रेङ्खमाण—अत्र शान । प्रेङ्खिणौ, अप्रेङ्खणि, प्रेङ्खणीयम् । नाम्यादेरिति किम् ? प्रमङ्गनम्, प्रकम्पनम् । सिद्धे सति नियमार्थोऽयं नुमि सति नाम्यादेरेव नान्यस्य । हसान्तादेवायं विधि । ञ्यन्तात्तु 'ञेर्वा' [२/२/९७] इति परत्वाद् विकल्प एव । प्रमङ्गणा, प्रमङ्गना ।

९६. निर्विण्णः ।

निरपूर्वाद् विदे सत्तालाभविचारार्थात्[1] परस्य क्तनकारस्य णत्व निपात्यते । निर्विण्णोऽस्मि खलसगेन । निर्विण्ण. प्राव्राजीत् । निर्विण्णवान् इत्यपि कश्चित् ।

९७. ञेर्वा ।

उपसर्गस्थान्निमित्तात्परस्य ञ्यन्ताद्धातोर्विहितस्य स्वरादुत्तरस्य कृन्नकारस्य णकारो वा भवति । प्रमङ्गणा, प्रमङ्गना । प्रयापणम्, प्रयापनम् । प्रयापिणौ, प्रयापिनौ । अप्रयापणि., अप्रयापनि । प्रयापणीयम्, प्रयापनीयम् । प्रयाप्यमाणम्, प्रयाप्यमानम् । अवादिनियमान्नेह—प्रदापनम्, प्रनियापनम् । अनाम्यादिभ्यो धातुभ्यो नुमागमे सति 'नाम्यादेर्नुमि' [२/२/९५] इति नियमेनाऽप्राप्ते, शेषेष्वन्तु 'स्वरात् कृतः' [२/२/९३] इत्यनेन नित्यं प्राप्ते उभयत्र विभाषेयम् ।

९८. न ख्या-भा-भू-पून्-कमि-गमि-प्यायि-वेपोऽञेश्च ।

उपसर्गस्थान्निमित्तात्परेभ्य ख्यादिभ्यो धातुभ्यो ञ्यन्ताञ्यन्तेभ्य परस्य कृन्नकारस्य णकारो न भवति । प्रख्यानम्, प्रख्यायमानम्, प्रख्यायिनौ, अप्रख्यानि, प्रख्यानीयम् । भा—प्रभानम्, प्रभायमानम्, प्रभायिनौ, अप्रभानि., प्रभानीयम् । भू—प्रभवनम्, प्रभूयमानम्, प्रभाविनौ, अप्रभवनि, प्रभवनीयम् । पून्—प्रपवनम्, प्रपूयमानम्, प्रपाविनौ, अप्रपवनि, प्रपवनीयम् । कम्—प्रकमनम्, प्रकम्यमानम्, प्रकामिनौ, अप्रकमनि, प्रकमनीयम् । गम्—प्रगमनम्, प्रगम्यमानम्, प्रगामिनौ, अप्रगमनि, प्रगमनीयम् । प्याय्—प्रप्यान, प्रप्यानवान्, प्रप्यायनम्, प्रप्यायमानम्, प्रप्यायिनौ, अप्रप्यायनि, प्रप्यायनीयम् । वेप्—प्रवेपनम्, प्रवेपमानम्, प्रवेपिनौ, अप्रवेपनि, प्रवेपनीयम् । ञ्यन्तेभ्योऽपि—प्रख्यापनम्,

---

१ एते त्रयोऽपि धातूनामनेकार्थत्वाद् वैराग्ये वर्तन्ते । विद्क ज्ञाने—इत्यस्य सेट्त्वान्न ।

प्रभापनम्, प्रभावनम्, प्रपावनम्, प्रकामना, प्रगमना, प्रप्यायना, प्रवेपनम्। अन्त्यन्तेभ्यो नित्यं, वेपो[1] विकल्पेन, ष्यन्तेभ्यश्च विकल्पेन प्राप्ते प्रतिषेधः। पुनो नकार पवर्नेनिवृत्त्यर्थं, तेन प्रपवणम्, प्रपूयमाणम् इत्यादि। ख्यातेर्णत्वमिति कश्चित्। प्रख्याणम्, प्रख्यायमाणम्।

९९. अन्तरोऽयनहनो देशे।

अन्तर्शब्दात्परस्य अयनशब्दस्य हन्तेश्च नकारस्य देशेऽभिधेये णो न भवति। अन्तरय्यतेऽस्मिन्निति अन्तरयनो देशः। एवमन्तर्हननो देशः। देश इति किम्? अन्तरयण वर्तते। अन्तर्हणनम्, अन्तर्हण्यते। अन्तर्घणो देशे इति तु निपातनात्। अन्तर इति किम्? प्रायण प्रहणनो वा देशः। अयनहन इति किम्? अन्तर्णमनो देश।

१००. षात्पदे।

पदे परे यः षकारस्तस्मान्निमित्तात् परस्य नकारस्य णकारो न भवति। सर्पिष्पानम्, यजुष्पानम्—अत्र **'भावसाधनयोर्वा'** [२/२/८१] इति, दुष्पानम्, निष्पानम्—अत्र **'स्वरात्कृतः'** [२/२/८३] इति, निष्पायनमत्र **'ञेर्वा'** [२/२/९७] इति प्राप्ते प्रतिषेध। षादिति किम्? निर्णय, निर्याणम्। पद इति किम्? पुष्णाति, कुष्णाति।

१०१. नशेः षः।

नशेः षकारान्तस्य नकारस्य प्राप्तो णकारो न भवति। प्रनष्टः, परिनष्टः। ष इति किम्? प्रणश्यति, परिणश्यति। **'उपसर्गाण्णोपदेशस्य'** [२/२/८५] इति प्राप्ते नियमार्थं वचनम्।

१०२. पदेनाऽन्तरेऽनाङ्तद्धितेन।

आङन्त तद्धितान्त च वर्जयित्वाऽन्येन पदेनान्तरे—व्यवधाने सति प्राप्तो णकारो न भवति। पर्यवनीतम्, प्रावनद्धम् माषकुम्भवापेन, व्रीहिकुम्भवापेन, चतुरङ्गयोगेन, भर्तृबाहुयुग्मेन, रोषभीममुखेन। अत्र यदा माषकुम्भस्य वाप इति माषा कुम्भो वापोऽस्यति वा ममासस्तदा **'नामान्तनुम्...'** [२/२/८३] इत्यादिना विकल्पे प्राप्ते प्रतिषेधः। यदा माषस्य कुम्भवाप इति तदा **'क्वेकस्वरवतः'** [२/२/८४] इति नित्ये प्राप्ते प्रतिषेधः। शेषेष्वपि यथासंभव वाच्यम्। अनाङ्तद्धितेनेति किम्? प्राणद्धम्, पर्याणद्धम्। आर्द्रगोमयेण, शुष्कगोमयेण यूषयावकेण[2]।

१०३. हनो घेन।

हन्धातोर्नकारस्य घकारेणान्तरे प्राप्तो णकारो न भवति। वृत्रघ्ना, वृत्रघ्ने, वृत्रघ्नः, ब्रह्मघ्नः, शत्रुघ्न.— एषु सज्ञाया **'पूर्वपदस्थात् संज्ञायामगः'** [२/२/७१] इति, असज्ञाया तु **'क्वेकस्वरवतः'** [२/२/८४] इत्यादिना प्राप्तः। प्रघ्नन्ति, प्राघ्नन्, प्राघानि, प्रघानिष्यते—एषु **'हनः'** [२/२/९०] इति प्राप्त। हन इति किम्? अर्घेण, परिघेण। घेनेति किम्? वृत्रहणौ, प्रहणनम्।

१०४. नृतेर्यङि।

नृतेर्धातो प्राप्तनकारस्य यङि परे णकारो न भवति। नरीनृत्यते, नरिनर्ति, नर्नर्ति, नरीनृतीति। यङीति किम्? हरिरिव नृत्यतीति हरिणर्ती नाम कश्चित्, **'कर्तरि णिन्'** [५/२/८४] **'पूर्वपदस्थात्संज्ञाया...'** [२/२/७१] इति णत्वम्।

---

१. **'हृलावेर्वाम्युपधाद् वा'** [२/२/९४] इति।

२. यवानां विकारः यावः, याव एव यावकः **'यावादिभ्यः कः'** [८/२/७२]। यूषेण मुद्गादिरसेन मिश्रः यावकः यूषयावकस्तेन।

१०५. क्षुम्नादीनाम् ।

क्षुभ्नादीना नकारस्य प्राप्तो णकारो न भवति। क्षुभ्नाति, क्षुभ्नीत, क्षुभ्नन्ति। क्षुभ्नन्, क्षुभ्नान। तृप्नोति, तृप्नुत, तृप्नुवन्ति। तृप्नुवन्, तृप्नुवान। आचार्यस्य भार्या आचार्यानी। आचार्यस्य भोग आचार्यभोगस्तस्मै हित:—आचार्यभोगीन। एषु **'एकपदे रषृवर्णात्···'** [२/२/६६] इत्यादिना प्राप्ते, सर्वनाम, नृनमन, परिनृत्तम्, गुरुनृत्तम्, परिनर्तनम्, ग्रामनट, शरनद., शरनदी, गिरिनगरम्, परिनिवेश, श्रीनिवास, शबराग्नि, दर्भानूप, हरिनन्दी, हरिनन्दन, गिरिगहनम्—एषु **'पूर्वपदस्थात्···'** [२/२/७१] इत्यादिना प्राप्ते, परिनदनम्—अत्र **'उपसर्गाण्णोपदेशस्य'** [२/२/८५] इत्यादिना प्राप्ते, सुप्रख्येन—अत्र **'क्वेकस्वरवतः'** [२/२/८४] इति प्राप्ते प्रतिषेध.। क्षुभ्नादयो यथा—क्षुभ्ना, तृप्नु, आचार्यानी, आचार्यभोगीन, सर्वनामन्, नृनमन, नृत्त, नर्तन, नट, नद, नड, नदी, नगर, निवेश, निवास, अग्नि, अनूप, नन्दिन्, नन्दन, गहन, नदन, ख्यान्। इत्याकृतिगणोऽयम्।

तृतीयश्चरणः

१. आबऽतः स्त्रियाम् ।

अकारान्तान्नाम्नः स्त्रियां वर्तमानात् आप् प्रत्ययो भवति । पकारः सिलोपादिकार्यार्थः । खट्वा, सर्वा, या, सा । खट्वादीनामकारान्तत्वम् । अतिखट्वः, प्रियखट्वः । पञ्चभिः खट्वाभिः क्रीतः—पञ्चखट्वः इत्यादिप्रयोगदर्शनात् उपदेशाच्च[1] निश्चीयते । अत इति तपरकरणं किम् ? सोमपाः स्त्री । आबन्ताऽभावात्सिलोपो न ।

२. अजादेः ।

तत्संबन्धिभ्योऽजादिभ्यः शब्देभ्यः स्त्रिया वर्तमानेभ्य आप् प्रत्ययो भवति । बाधकबाधनार्थमनकारार्थं च वचनम् । अजा, एडका, अश्वा, चटका, मूषिका, कोकिला- एभ्यो जातिलक्षण ईप्प्राप्तः । बाला, होडा, पाका, वत्सा, मन्दा, विलाता, कन्या, मध्या, मुग्धा—एभ्यो वयोलक्षण ईप्प्राप्त । केचिद् विलातामत्र न पठन्ति । तन्मते विलाती । पूर्वापहाणा, अपरापहाणा, संप्रहाणा, परप्रहाणा—एषु टिल्लक्षण ईप्प्राप्तः । निपातनाण्णत्वम् । ज्येष्ठा, कनिष्ठा, मध्यमा—एषु **'भर्तृयोगात्…'** [२/३/५१] ईप्प्राप्त । क्रुञ्चा, उष्णिहा, देवविशा—एष्वकारान्तत्वाऽभावादप्राप्तेरजादिपाठः । कश्चिदेतेभ्यो विकल्पेनेच्छति । क्रुङ्, उष्णिग्, देवविट् । अन्ये तु क्रुञ्चानालभेत, उष्णिहककुभौ, देवविशश्च मनुष्य इति प्रयोगदर्शनादकारान्ता एवैते इति मन्यन्ते । त्रीणि फलानि समाहृतानि—त्रिफला । अत्र द्विगुलक्षण ईप्प्राप्तः । तत्संबन्धिनिर्देशान्नेह—पञ्चानामजाना समाहार. पञ्चाजी । दशाजी । अत्र समाहार समासार्थः स्त्री । नाऽसावऽजशब्दसंबन्धिनी । अत एव च ज्ञापकात् स्त्रीप्रकरणे तदन्तादपि भवति, तेन महांश्चासावजश्चेति सामान्येन विग्रहे स्त्रीविवक्षायां महाजा, परमाजेति सिद्धम् । एवमतिभवती, अतिमहती, अतिधीवरी, अतिपीवरी, परमशूद्रेत्यादि ।

३. ऋचि पादः ।

पादिति कृतसमासान्तः पादशब्दो गृह्यते । ऋचि वाच्यायां पादन्तान्नाम्नः स्त्रियामाप् प्रत्ययो भवति । द्विपदा[2] ऋक्, त्रिपदा ऋक् । पाद इति ईप्प्रत्ययस्याऽपवादः । ऋचीति किम् ? द्विपदी देवदत्ता । **'हैमस्तु'** [२/४/१७] द्विपाद् ऋक्, त्रिपाद् ऋक् इत्यपि मन्यते ।

४. मनो डाब् वा ।

मन्नन्तान्नाम्नः स्त्रियां डाप् प्रत्ययो वा भवति । डित्वाट्टिलोपः । पामा, पामे, पामाः । सीमा, सीमे, सीमाः । पक्षे—पामा, पामानौ, पामानः । सीमा, सीमानौ, सीमानः । **'ताभ्यां नेप्'** [२/३/६] इति ईप्प्रतिषेधः ।

५. अनो बहुव्रीहेः ।

अन्नन्ताद् बहुव्रीहेः स्त्रियां डाप् प्रत्ययो वा भवति । बहुराजा, बहुराजे, बहुराजाः । पक्षे—बहुराजा, बहुराजानौ, बहुराजानः । **'उपधालोपिनो वा'** [२/३/१४] इति । पक्षे ईबपि—बहुराज्ञी, बहुराज्ञ्यौ, बहुराज्ञ्यः । सुपर्वे, सुपर्वाः ।

---

१. यदि खट्वादि अकारान्तो न स्यात् ततो नाबन्त इति तन्न्यापद्वारेण ह्रस्वोऽपि न स्यादित्यर्थः ।

२. 'पादः पद्' [२/१/३५] इति पदादेशः ।

सुपर्वाणी, सुपर्वाणः । बहुव्रीहेरिति किम् ? अतिक्रान्ता राजानमतिराजी[1] ।

६. ताभ्यां नेप् ।

उत्तरेण प्राप्ते निषेधार्थं वचनम् । मन्नन्तान्नाम्नोऽनन्नन्ताच्च बहुव्रीहेः य ईप् प्राप्तः स न भवति । दामा, दामानौ, दामानः । सीमा, सीमानौ, सीमानः । **'मनो डाब् वा'** [२/३/४] इति डाबपि— दामा, दामे, दामाः । सीमा, सीमे, सीमाः । **अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति,** तेन महिमानमतिक्रान्ता अतिमहिमा इत्यादावपि ईप्-प्रतिषेधो भवति । **'अनो बहुव्रीहेः'** [२/३/५] तु इह अनुपधालोपिन एवोदाहरणम् । **'उपधालोपिनो…'** [२/३/१४] अग्रे विकल्पविधानात् सुपर्वा, सुपर्वाणौ, सुपर्वाणः । **'अनो बहुव्रीहेः'** [२/३/५] इति डाबपि—सुपर्वा, सुपर्वे, सुपर्वाः । अतोऽग्रे ईबेवाधिक्रियते न निषेधः प्राप्तेरभावात् ।

७. नृतोऽस्वस्रादेः ।

स्त्रियां वर्तमानान्नकारान्ताद् ऋकारान्ताच्च स्वस्रादिवर्जितान्नाम्न ईप् प्रत्ययो भवति । राज्ञी, अतिराज्ञी, तक्ष्णी, दण्डिनी, छत्रिणी, कर्त्री, हर्त्री । स्त्रियामिति किम् ? पञ्च, सप्त, दश नद्यः । नान्ताया संख्याया युष्मदस्मदोरिवाऽलिङ्गत्वान्नेप् । अत एव नकारलोपेऽपि **'आबतः स्त्रियाम्'** [२/३/१] इत्याबपि न भवति । अस्वस्रादेरिति किम् ? स्वसा, अतिस्वसा, परमस्वसा, दुहिता, ननान्दा, याता, माता, तिस्रः, चतस्रः । ननु तिसृचतस्रोर्विभक्तिनिमित्तत्वात् सन्निपातलक्षणेनैव विभक्तिविघात ईब् न भविष्यति, किं निषेधेन ? उच्यते—सन्निपातविधेरनित्यत्वज्ञापनार्थम्, तेन अतिदध्न्या कन्यया—इत्यादौ विभक्तिनिमित्ते नुमागमे सति ईप् सिद्धः । एवं या, सा इत्यादिषु अकारादेशे आबपि ।

८. उवृदितोऽधातोः ।

धातुवर्जितो य उदित् ऋदिच्च प्रत्ययोऽप्रत्ययो वा तदन्तान्नाम्नः स्त्रियामीप् प्रत्ययो भवति । उदित्—भवती, अतिभवती, गोमती, विदुषी । ऋदित्—पचन्ती, दीव्यन्ती, यजन्ती, महती[2] । अधातोरिति किम् ? उखास्रत्, पर्णध्वत् ब्राह्मणी ।

९. अञ्चः ।

अञ्चूत्तरपदेभ्यः स्त्रियामीप् प्रत्ययो भवति । प्राची, प्रतीची, अपाची, उदीची ।

१०. वाहः ।

वाहन्तात् स्त्रियामीप् प्रत्ययो भवति । भारौही[3], प्रष्ठौही ।

११. णस्वरखसाद् वनो रश्च ।

वन[4] इति वन्क्वनिप्ङ्वनिपामविशेषेण ग्रहणम् । णकारान्तात् स्वरान्तात् खसान्ताच्च विहितो यो वन्प्रत्ययः तदन्तान्नाम्नः स्त्रियामीप् प्रत्ययो भवति वनो रेफोन्तादेशश्च । ण—ओणृ—अवावरी[5] । स्वर—धा-क्वनिप्—धीवरी[6] ।

---

१. पूजितो राजा स्त्री चेदतिराज्ञी । **'स्वतिभ्यां पूजायामबहुव्रीहेः'** [८/३/४] इति समासान्तप्रतिषेधः । राजानमतिक्रान्तेति कृते तु समासान्तत्वादतिराजीत्येव भवति ।

२. उणादिकिदतृप्रत्ययान्तोऽयं महच्छब्दः ।

३. **'वाहो वौद्'** [२/१/३६] ।

४. ननु **निरनुबन्धग्रहणे न सानुबन्धकस्येति** क्वनिप्ङ्वनिपोर्ग्रहणं न प्राप्नोति । उच्यते—**निरनुबन्धग्रहणे क्वचित्सानुबन्धस्य ग्रहणमिति** न्यायान्न दोषः ।

५. **'वन्याद् अमस्य'** [४/३/५१] इति आत्वम् ।

६. **'ईर्व्यंसेऽपि विकरणस्येति'** [४/१/५७] ईत्वम् ।

पा—पीवरी। कृ—सहकृत्वरी। खस—दृश्—जिनदृश्वरी। णस्वरखसादिति किम्? युध्—सहयुध्वा। यज्वा स्त्री। विहितविशेषण किम्? शृणातीति शर्वरी। स्वराद् विहितत्वाद् गुणे कृते रेफाद् यथा स्यात्। वन इति किम्? श्वयते-'श्वन्-मातरिश्वन्…' [उ० ४/१५१] इत्यादिनाऽनि प्रत्यये अन्तलोपे च सति शुनी। नकारान्तादेवेपि सिद्धे तन्नियमार्थं रविधानार्थं च वचनम्।

१२. बहुव्रीहेर्वा।

पूर्वमनुवर्तते। णस्वरखसात् परो विहितो यो वन् तदन्तात् बहुव्रीहेः स्त्रियामीप् प्रत्ययो वा भवति रेफोऽन्तादेशश्च। प्रियावावरी, प्रियावावा स्त्री। बहुधीवरी, बहुधीवा। बहुजिनदृश्वरी, बहुजिनदृश्वा। णस्वरखसादिति किम्? प्रिययज्वा स्त्री।

१३. संज्ञायामनः।

बहुव्रीहेरित्यनुवर्तते। अग्रे विकल्पविधानान्नित्योऽयं विधिः। अन्नन्ताद् बहुव्रीहेः स्त्रियामीप् प्रत्ययो नित्यं भवति संज्ञायां विषये। अधिराज्ञी, सुराज्ञी नाम ग्राम। बहुराज्ञी, बहुसाम्नी नाम पुरी।

१४. उपधालोपिनो वा।

अन्नन्ताद् बहुव्रीहेरुपधालोपिनः स्त्रियामीप् प्रत्ययो वा भवति। पक्षे डाब् विकल्पोऽपि। विकल्पद्वये त्रैरूप्यम्। बहुराज्ञी, बहुराज्ञ्यौ, बहुराज्ञ्यः। बहुराजा, बहुराजे, बहुराजाः। बहुराजा, बहुराजानौ, बहुराजानः। बहुव्रीहौ मन्नन्तेऽपि अन्नन्तद्वारा ईब् भवत्येव। यथा—

'दातुं प्रदानोचित! भूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम्'

[किरातार्जुनीय महाकाव्यम् ३/२३]

उद्दाम्नी उद्दामां उद्दामानं वा वडवां पश्य। उपधालोपिन इति किम्? सुपर्वा, सुपर्वे, सुपर्वाः। सुपर्वा, सुपर्वाणौ, सुपर्वाणः।

१५. पादः।

बहुव्रीहिनिमित्तकपादशब्दान्तात् स्त्रियामीप् प्रत्ययो वा भवति। द्विपदी, द्विपाद्। त्रिपदी, त्रिपाद्। बहुव्रीहिनिमित्तकपाच्छब्दत्वान्नेह—पादमाचष्टे पाद्, त्रयः पादोऽस्यास्त्रिपाद् स्त्री।

१६. ऊधसः।

ऊधसन्तात् बहुव्रीहेः स्त्रियामीप् प्रत्ययो भवति। कुण्डोध्नी, महोध्नी, पीनोध्नी। बहुव्रीहेरिति किम्? प्राप्ता ऊधः—प्राप्तोधा[1]। **'स्त्रियामूधसो नः'** [८/३/८१] इति बहुव्रीहौ नान्तत्वात् **'उपधालोपिनो वा'** [२/३/१४] इति विकल्पे प्राप्ते वचनम्।

१७. अशिशोः।

अशिशुशब्दाद् बहुव्रीहेः स्त्रियामीप् प्रत्ययो भवति। अविद्यमानः शिशुरस्या अशिश्वी। बहुव्रीहेरिति किम्? न शिशुः—अशिशुः।

१८. संख्यादेर्दाम्नः।

संख्यादेर्दामन्नन्ताद् बहुव्रीहे स्त्रियामीप् प्रत्ययो भवति। **'अनो बहुव्रीहेः'** [२/३/५] इति डापः **'उपधालोपिनो**

१ **'प्राप्तापन्नौ तया…'** [३/१/४६] इति समासः।

वा' [२/३/१४] इति ईपश्च विकल्पे प्राप्ते वचनम् । द्विदाम्नी, त्रिदाम्नी । संख्यादेरिति किम् ? उद्दाम्नी उद्दामां उद्दामानं वा वडवां पश्य ।

१९. हायनाद् वयसि ।

संख्यादेरित्यनुवर्तते । संख्यादेर्हायनशब्दान्तान्नाम्नो बहुव्रीहे: स्त्रियामीप् प्रत्ययो भवति वयसि गम्यमाने । द्विहायनी गौ: । त्रिहायणी वडवा—**'त्रिचतुर्भ्यां हायनस्य वयसि'** [२/२/७८] इति णत्वम् । संख्यादेरिति किम् ? अतीतहायना । हायनादिति किम् ? द्विवर्षा कन्या । वयसीति किम् ? द्विहायना, त्रिहायना, चतुर्हायना शाला । वयोऽभावाण्णत्वमपि न ।

२०. मुख्यात्षिट्टिदणञ्नञ्स्नञेयेकणीकण्क्वरपः ।

मुख्यात् षाऽनुबन्धात्, टाऽनुबन्धात्, अण्, अञ्, नञ्, स्नञ्, एय, इकण्, ईकण्, क्वरप्—इत्येतत्प्रत्ययान्ताच्च स्त्रियामीप् प्रत्ययो भवति । षित्—वराकी, भिक्षाकी । टित्—कुरुचरी, मद्रचरी । प्रत्ययसाहचर्यादागमटितो न भवति । पठिता विद्या । शुनिंधयी, स्तनंधयीत्यादौ तु धातोष्टित्करणस्यानन्यार्थत्वादटितोपि भवति । अण्—उपगोरपत्यमौपगवी । तपोऽस्या अस्तीति तापसी[1] । कुम्भकारी, काण्डलावी । अञ्—बिदस्याऽपत्यं पौत्री बैदी । उत्सस्याऽपत्यमौत्सी । नञ्—स्त्रिया अपत्यमिय वा स्त्रैणी । स्नञ्—पुंसोऽपत्यमियं वा पौंस्नी । एयण्—सुपर्ण्या अपत्य सौपर्णेयी । वैनतेयी । एयच्—शिलाया-स्तुल्या शिलेयी । एयञ्—शैलेयी । **'शिलाया एयच्च'** [७/४/६] । निरनुबन्धनिर्देश. सामान्यग्रहणार्थ. । इकण्—अक्षै-र्दीव्यति आक्षिकी । वार्षिकी । ईकण्—शाक्तीकी, याष्टीकी । क्वरप्—सृत्वरी, जित्वरी । मुख्यादिति किम् ? बहुवराका, बहुकुरुचरा । षिट्टिदणञित्यादिपदस्य षष्ठ्यन्तस्याश्रयणेन पाणिनिना प्रोक्त पाणिनीयम्, तदधीते—इत्यण्, तस्य **'प्रोक्तात्'** [६/३/९८] इति लुकि पाणिनीया कन्या—इत्यत्र अणोऽकाराभावादीप् न भवति । मुख्यादित्यधिक्रियते आ पादपरि-समाप्तेः ।

२१. यञो डायनुक् च वा ।

यञ्प्रत्ययान्तात् स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे डायनुगागमश्च वा । गार्ग्यायणी । पक्षे—गार्गी । **'हसात्तद्धितस्य'** [८/४/७४] इति यलोपः । वात्स्यायनी, वात्सी ।

२२. लोहितादिशकलान्तात् ।

नित्यार्थं वचनम् । लोहितादिभ्यः शकलान्तेभ्यो यञन्तेभ्यः स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे नित्यं डायनुगागमश्च । लौहित्यायनी, कात्यायनी, सांशित्यायनी, शाकल्यायनी । लोहितादिशकलान्तोऽयमन्तर्गणो गर्गादिगणे-ऽनुसंधेयः ।

२३. षावटाद् वा ।

षकारान्तान्नाम्नोऽवटशब्दाच्च यञन्तात् स्त्रियामीप् प्रत्ययो वा भवति, तत्संनियोगे डायनुगागमश्च । पौतिमाष्यायणी, पौतिमाष्या । गौकक्ष्यायणी, गौकक्ष्या । आवट्यायणी, आवट्या ।

२४. कौरव्यासुरिमाण्डूकात् ।

कौरव्य, आसुरि, माण्डूक—इत्येतेभ्य. स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे डायनुगागमश्च । कौरव्यायणी, आसुरायणी, माण्डूकायनी । कथ कौरवी सेना ? तस्येदं विवक्षायामणि कृते भविष्यति ।

---

१. **'ज्योत्स्नादिभ्योऽण्'** [८/१/५५] ।

२५. वयस्यचरमेऽतः ।

अचरमेऽनन्त्ये वयसि वर्तमानादकारान्तान्नाम्न: स्त्रियामीप् प्रत्ययो भवति । कुमारी, किशोरी, कलभी, वधूटी, चिरिण्टी, बर्करी, तरुणी, तलुनी । अचरम इति किम् ? वृद्धा, स्थविरा । अत इति किम् ? शिशुः । कथं द्विवर्षा, त्रिवर्षा, उत्तानशय्या, लोहितपादिकेति ? नैता वयःश्रुतयोऽपि वासां वयो गम्यते । कन्या, बाला, वत्सा इत्यादयस्त्वजादि-गणे सिद्धाः । अतोऽग्रेऽत इत्यधिक्रियते ।

२६. केवल-मामक-भागधेय-पापापर-समानार्यकृत-सुमङ्गल-भेषज-पीनात्संज्ञायाम् ।

केवलादिभ्यः शब्देभ्यः स्त्रियामीप् प्रत्ययो भवति संज्ञायां विषये । केवली नाम ज्योतिः । मामकी मातुली । भागधेयी बलिः । पापी, अपरी—ओषध्यौ । समानीच्छन्दः । आर्यकृती क्रियाविशेषः । सुमङ्गलीच्छन्दः ओषधिर्वा । भेषजी ओषधिः । पीनी संज्ञाविशेषः । संज्ञायामिति किम् ? केवला । मामकशब्दादणन्तत्वेनैव सिद्धे संज्ञायामेवेप् इति नियम्यते, तेन मामिका बुद्धिरिति असंज्ञायामण्लक्षणोऽपि ईप् न भवति ।

२७. गौरादिभ्यः ।

गौरादिभ्य शब्देभ्य स्त्रियामीप् प्रत्ययो भवति । गौरी, शबली । गौरादयो यथा—गौर, शबल, कल्माष, सारङ्ग, पिशङ्ग, हरिण, पाण्डुर, अमर, सुन्दर, विकल, विष्कल, पुष्कल, निष्कल । गौरादीनां गुणवचनत्वेनाजातिवाचित्वादप्राप्ते पाठ । यस्तु विकलेति कालविशेषवाची आबन्तः, स विगता कलेति भविष्यति । दास, चेट, विट, भिक्षुक, बन्धक, पुत्र, गायत्र, आनन्द, टेट, कटेट, नट—एषामजातिवचनत्वादप्राप्ते पाठ । काव्य, शैव्य, मत्स्य, मनुष्य, मुकय, हय, गवय, ऋश्य, द्रुण, ओकण—एषां जातिवाचित्वेप्यष्टानां योपधत्वाद्, द्रुणौकणयोर्नित्यस्त्रीविषयत्वादप्राप्ते पाठः । भौरिकि, भौलिकि, मौलिङ्गि, औद्ग्राहमाति, आलम्बि, आलञ्चि, कालञ्चि, सौधर्म, आयस्थूण, आरट् । भौरिकिभौलिक्योः क्रौड्यादित्वात्, शेषाणां त्वणिञ्यन्तानां गुरूपधत्वान् श्ये प्राप्ते पाठः । कथ भौरिक्या, भौलिक्या ? क्रौड्यादिपाठात् ष्योपि । आपच्चिको राष्ट्रसरूपः क्षत्रियस्तस्यापत्यं स्त्री आपच्चिकीत्यत्र शकादित्वात् ञ्यलोपेपि जातिवाचित्वादीप् भवति । एवं दोटी, वरट, नाट, मूलाट, पाट, सृपाट, पेट, पट, पटल, पुट, कुट, फाण्टश, धातक, केतक, तर्कार, शर्कार, बदर, कुवल, लवण, बिल्व, आमलक, मालत, वेतस, अतस, आढक, कदर, कदल, गुडूच, बाकुच, नाच, माच, कुम्भ, कुसुम्भ, यूष, मेष, सूष, मूष, कटीर, सल्लक, वल्लक, मल्लक, मालक, मेथ, पिप्पल, हरीतक, कोशातक, शम, तम, सुषव, शृङ्ग, भृङ्ग, बिम्ब, बर्बर, पाण्ड, लोहाण्ड, शष्कण्ड, पिण्ड, मण्डर, मण्डल, यूप, सूप, सूर्प, सूर्म, मठ, पिठर, ऊर्द, गूर्द, सूर्द, खार, काकण, द्रोण, अरीहण, उकण, वृस, आसन्द, अलिन्द, कन्दल, सलन्द, देह, देहल, शष्कुल, शच, सूच, मञ्जर, अलज, गण्डज, वैजयन्त, शालूक, उपरतस, छेद—एषां नित्यस्त्रीविषयत्वादप्राप्ते पाठ. । क्रोष्टु, सरस्—अनयोरनकारान्तत्वादप्राप्ते पाठः । अनडुही, अनड्वाही—अत एव पाठादनडुहशब्दस्य ईप्युकारस्य पक्षे वाशब्दादेश., सौ नित्य नुमागमाभावश्च । प्रत्यवरोहिणी, पृथिवी, आग्रहायणी—सप्रत्ययपाठ. पुंवद्भावनिषेधार्थः । अनड्वाहीभार्यः, अनडुहीवृन्दारकेत्यादि । तद्धितलोपेपि लुगभावार्थश्च । पञ्चानड्वाहिः, दशानडुहिः, आश्मरथ्यः । गोत्रयञन्तात् डायनुग् मा भूत् ईबेव यथा स्यादित्यस्य पाठः । एहि, पर्येहि—अनयोरिदन्तत्वाद् विकल्पे प्राप्ते नित्यार्थः पाठः । आकृतिगणोयम् । तेन नद, मह, भष, प्लव, चर, गर, तर, गाह, देव, सूद, अराल, उदवड, चण्ड, उमाभङ्ग, हरीकण, वटर, अधिकार इत्यादयोप्यत्रैव द्रष्टव्याः । मुख्याधिकारान्नेह—बहुनदा भूमिः ।

२८. एषणात्साधने ।

साधनेऽर्थे वर्तमानादेषणशब्दात् स्त्रियामीप् प्रत्ययो भवति । इष्यते अन्विष्यते अनया दोष इति एषणी वैद्यशलाका । अन्यत्र एषणा ।

२९. रेवतरोहिणान्नक्षत्रे ।

नक्षत्रेऽर्थे वर्तमानाभ्यां रेवतरोहिणशब्दाभ्यां स्त्रियामीप् प्रत्ययो भवति । रेवती, रोहिणी । नक्षत्रे इति किम् ?

रेवता, रोहिणा । कथं रेवतीरमणो बल. ? रेवच्छब्दो' मत्वर्थीयस्तत उदिल्लक्षण ईप् । कथं रोहिणी, कटुरोहिणी ? रोहिणशब्दः प्रकृत्यन्तरमस्ति, तेन जातिलक्षण ईप् ।

३०. नीलात् प्राण्योषध्योः ।

प्राणिनि ओषधौ च वर्तमानान्नीलशब्दात् स्त्रियामीप् प्रत्ययो भवति । नीली गौ. । नीली ओषधि. । प्राण्योषध्योरिति किम् ? नीला शाटी ।

३१. क्ताच्च वा संज्ञायाम् ।

नीलशब्दात् क्तप्रत्ययान्ताच्च शब्दरूपात् स्त्रियामीप् प्रत्ययो वा भवति सञ्ज्ञाया विषये । नीली, नीला । प्रवृद्धा चासौ विलूना चेति प्रवृद्धविलूनी, प्रवृद्धविलूना ।

३२. श्येतैतहरितभरितरोहिताद् वर्णात्तो नश्च ।

वेत्यनुवर्तते । श्येतादिभ्यो वर्णवाचिभ्य स्त्रियामीप् प्रत्ययो वा भवति, तत्संनियोगे तकारस्य नकारादेशश्च । श्येनी, श्येता । एनी, एता । हरिणी, हरिता । भरिणी, भरिता । रोहिणी, रोहिता । लत्वे तु लोहिनी, लोहिता । वर्णादिति किम् ? श्येता, एता । चकारो नकारस्य ईप्संयोगार्थः ।

३३. क्नोऽसितपलितात् ।

त इति चानुवर्तते विकल्पश्च । असितपलिताभ्यां स्त्रियामीप् प्रत्ययो वा भवति, तद्योगे तकारस्य क्नादेशश्च । असिक्नी, असिता । पलिक्नी, पलिता ।

३४. शोणादेः ।

वेत्यनुवर्तते । शोणादिभ्य शब्देभ्य स्त्रियामीप् प्रत्ययो वा भवति । शोणी, शोणा । चण्डी, चण्डा । शोणादयो यथा—शोण, चण्ड, अराल, कमल, कृपण, विकट, विशाल, विशकट, भरुज, ध्वज, कल्याण, उदार, पुराण, बहु, बहुः, बह्वी । इति नामा कार्यवत् । गुणवचनात्तु 'उतो गुणात्…' [२/३/७८] इत्यनेन भविष्यति । हन्—वृत्रघ्नी, वृत्रहा इति ।

३५. चन्द्रभागादऽनद्याम् ।

नदीवर्जविषये वर्तमानाच्चन्द्रभागशब्दात् स्त्रियामीप् प्रत्ययो वा भवति । चन्द्रभागी चन्द्रभागा वा देवता । अनद्यामिति किम् ? चन्द्रभागा नदी । केचिदिह विपर्ययमिच्छन्ति । तन्मते चन्द्रभागी चन्द्रभागा वा नदी । देवता तु चन्द्रभागा । अण्णन्तान्नद्यामित्येके[२] । चान्द्रभागी चान्द्रभागा वा नदी ।

३६. जातेरऽयोपधनित्यस्त्रीशूद्रात् ।

विकल्पो निवृत्तः । जातिवाचिनोऽकारान्तान्नाम्न. स्त्रियामीप् प्रत्ययो भवति, न चेत्तद् योपधनित्यस्त्रीजातिवाचि शूद्रशब्दो वा भवति । तत्र जाति काचित् संस्थानव्यङ्ग्या । यथा गोत्वादि. । सकृदुपदेशव्यङ्ग्यत्वे सत्यऽत्रिलिङ्गान्या । यथा ब्राह्मणत्वादि । अत्रिलिङ्गत्वं देवदत्तादेरप्यस्तीति सकृदुपदेशव्यङ्ग्यत्वे सतीत्युक्तम् । गोत्रचरणलक्षणा च तृतीया । तथा चोक्तम्—

> आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् ।
> सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥

---

१ गीयते इति रेर्मेधा । रीङो ।वच् गुण , रेरस्याऽस्तीति वतु ।

२ चन्द्रभागाभ्यां गिरिभ्यां प्रभवति इति अण् ।

इति मृगी, हंसी, कुक्कुटी, सूकरी, तटी। तथा ब्राह्मणी, वृषली। तथा नाडायनी, चारायणी, कठी। जातेरिति किम्? मुण्डा, शुक्ला, देवदत्ता। अयोपधेति किम्? इभ्या, क्षत्रिया, वैश्या, आर्या। गवयी, हयी, मुकयी, मनुषी, मत्सी— इत्यादयस्तु गौरादिपाठाद् भविष्यन्ति। नित्यस्त्रीजातिवर्जनं किम्? मक्षिका, यूका। शूद्रवर्जनं किम्? शूद्रा। कथं महाशूद्री आभीरजातिः? नात्र शूद्रशब्दो जातिवाची, किं तर्हि महाशूद्रशब्द। यत्र तु शूद्र एव जातिवाची तत्र भवत्येवेब्-निषेधः। महती चासौ शूद्रा च महाशूद्रेति। जातिलक्षणस्यैवायं प्रतिषेधस्तेन भर्तृयोगे भवत्येव। शूद्रस्य भार्या—शूद्री। अत इति किम्? आखु, तित्तिरि। मुख्याधिकारान्नेह—बहुशूकरा भूमिः, बहुब्राह्मणा शाला। कथं सुपर्णी? सुपर्णशब्दस्यापि जातिवाचित्वात्तस्य च मुख्यत्वात्।

३७. पाककर्णपर्णवालान्तात्।

पाकाद्यन्तात् जातिवाचिन स्त्रियामीप् प्रत्ययो भवति। ओदनस्येव पाको यस्याः सा ओदनपाकी। क्षणपाकी, लम्बकर्णी, आखुकर्णी, मुद्गपर्णी, शालपर्णी, गोवाली, अश्ववाली—संज्ञा एता ओषधीजातीनाम्। जातेरिति किम्? बहुपाका यवागूः। आसां जातीनां नित्यस्त्रीरूपत्वाद् वचनम्। एवमुत्तरसूत्रत्रयेऽपि।

३८. असदञ्चकाण्डप्रान्तशतैकेभ्यः पुष्पात्।

सदादिपूर्ववर्जितात् पुष्पशब्दान्तात् जातिवाचिन स्त्रियामीप् प्रत्ययो भवति। शङ्खपुष्पी, सुवर्णपुष्पी, हिरण्य-पुष्पी। सदादिवर्जनं किम्? सत्पुष्पा, प्राक्पुष्पा[१], प्रत्यक्पुष्पा, काण्डपुष्पा, प्रान्तपुष्पा, शतपुष्पा, एकपुष्पा।

३९. असंभस्त्राजिनैकशणपिण्डेभ्यः फलात्।

समादिपूर्ववर्जितात् फलशब्दान्तात् जातिवाचिन स्त्रियामीप् प्रत्ययो भवति। दासीफली, पूगफली, दाडिमफली। समादिवर्जनं किम्? सफला, भस्त्राफला, अजिनफला, एकफला, शणफला, पिण्डफला। एकान्नेच्छन्त्यन्ये।

४०. अनञो मूलात्।

नञ्पूर्ववर्जितात् मूलशब्दान्तात् जातिवाचिन स्त्रियामीप् प्रत्ययो भवति। दर्भमूली, शीर्षमूली। अनञ इति किम्? अमूला।

४१. द्विगोः समाहारात्।

समाहारद्विगोरदन्तात् स्त्रियामीप् प्रत्ययो भवति। पञ्चपूली, पञ्चाजी, दशग्रामी, द्विकुडवी। कथं त्रिफला? अजादिपाठात्।

४२. तद्धितलुकि परिमाणाविस्ताचितकम्बल्यात्।

द्विगोरित्यनुवर्तते। परितः सर्वतो मानं परिमाणम्। तच्च रूढिवशात् प्रस्थादि। यदाहु.—

ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात्, संख्या बाह्या तु सर्वतः॥

विस्तादिभ्यो यदन्यत्परिमाणं तदन्ताद् द्विगोरदन्तात् स्त्रियामीप् प्रत्ययो भवति तद्धितलुकि सति। द्वाभ्यां कुडवाभ्यां क्रीता—द्विकुडवी। त्रिकुडवी, द्व्याढकी, त्र्याढकी। 'द्विगोः प्लुगनपत्ये' [७/२/९६] इति तद्धितलुक्। परिमाणादिति किम्? पञ्चभिरश्वैः क्रीता—पञ्चाश्वा। दशाश्वा, द्विशता, त्रिशता, द्विवर्षा, त्रिवर्षा। तद्धितलुकीति किम्? द्विपण्या[२]। विस्तादिवर्जनं किम्? द्वाभ्यां विस्ताभ्यां क्रीता—द्विविस्ता। द्विपरमविस्ता, द्व्याचिता, त्र्याचिता, द्विकम्बल्य,

१ अञ्चतिर्लुप्तघप्रत्ययान्तः। प्राक्, प्रत्यक् पुष्पं यस्याः।

२. 'पणपादमाषाद्यः' [७/२/१०१] इति य. प्रत्यय., तस्य च विधानसामर्थ्यादलुकि।

त्रिकम्बल्या ।

४३. काण्डात् प्रमाणादक्षेत्रे ।

प्रमाणवाचिकाण्डशब्दान्तादक्षेत्रविषयाद् द्विगोस्तद्धितलुकि सति स्त्रियामीप् प्रत्ययो भवति । आयामः—प्रमाणम् । द्वे काण्डे प्रमाणमस्या. द्विकाण्डी । त्रिकाण्डी रज्जुः । प्रमाणादिति किम् ? द्वाभ्यां काण्डाभ्यां क्रीता—द्विकाण्डा । त्रिकाण्डा शाटी । अक्षेत्रे इति किम्—द्वे काण्डे प्रमाणमस्याः द्विकाण्डा । त्रिकाण्डा क्षेत्रभक्तिः[1] । अप्रमाणादपीच्छन्त्यन्ये । तन्मते द्विकाण्डी, त्रिकाण्डी शाटी इत्यपि भवति ।

४४. पुरुषाद् वा ।

प्रमाणवाचिपुरुषशब्दान्ताद् द्विगोस्तद्धितलुकि स्त्रियामीप् प्रत्ययो वा भवति । द्वौ पुरुषौ प्रमाणमस्या. द्विपुरुषी, द्विपुरुषा । त्रिपुरुषी, त्रिपुरुषा परिखा । प्रमाणादिति किम् ? द्वाभ्यां पुरुषाभ्यां क्रीता—द्विपुरुषा । त्रिपुरुषा वडवा । तद्धितलुकीति किम् ? पञ्चपुरुषा रज्जुः । प्रमाणभूताः पञ्च पुरुषा. समाहृताः—पञ्चपुरुषी । **'द्विगोः समाहारात्'** [२/३/४१] इति नित्यमेवेप् ।

४५. असहनञ्विद्यमानपूर्वपदात्स्वाङ्गादक्रोडादिभ्यः ।

सहनञ्विद्यमानवर्जितपूर्वपद यत् स्वाङ्ग तदन्तात् क्रोडादिगणवर्जितादकारान्तान्नाम्न स्त्रियामीप् प्रत्ययो वा भवति । पीनस्तनी, पीनस्तना । अतिक्रान्ता केशानतिकेशी, अतिकेशा माला । निष्क्रान्ता केशेभ्यो निष्केशी, निष्केशा यूका । असहनञ्विद्यमानपूर्वपदादिति किम् ? सहकेशा. अकेशा, विद्यमानकेशा । स्वाङ्गादिति किम् ? बहुयवा । अक्रोडादिभ्य इति किम् ? कल्याणी क्रोडा अस्या. सा कल्याणक्रोडा । क्रोडशब्द. स्त्रीनपुंसकलिङ्ग. । कल्याणखुरा, पीनगुदा, एकशफा, दीर्घबाला, भव्यभाला, सुगला, सुभगा, कल्याणोखा. कल्याणगोखा, किशलयकरा, मृणालभुजा इत्याकृतिगणोऽयम् । अत इति किम् ? परमशिखा । स्वाङ्गलक्षण यथा—

अद्रवं मूर्तिमत्स्वाङ्गं, प्राणिस्थमविकारजम् ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ।।

अद्रवमिति किम् ? बहुस्वेदा । मूर्तिमदिति किम् ? सुज्ञाना । प्राणिस्थमिति किम् ? दीर्घमुखा शाला । अविकारजमिति किम् ? बहुशोफा । च्युतं च प्राणिनस्तदिति किमर्थम् ? अप्राणिस्थादपि पूर्वोक्ताद्यथा स्यात् । बहुकेशी, बहुकेशा रथ्या । तन्निभं च प्रतिमादिष्विति किमर्थम् ? प्राणिस्थसदृशादपि पूर्वोक्ताद्यथा स्यात् । पृथुमुखी, पृथुमुखा प्रतिमा ।

कथं कल्याण पाणिपादमस्या कल्याणपाणिपादेत्यत्र न भवति ? स्वाङ्गसमुदायो हि न स्वाङ्गम् । बहुस्वरत्वेन वक्ष्यमाणनियमबलाद्वा न भवतीति । द्विपादी, त्रिपादीत्यत्र तु **'द्विगोः समाहारात्'** [२/३/४१] इति विशेषविधानान्नित्यमेव ईप् भवति । अस्वाङ्गपूर्वपदादेवेच्छन्त्यन्ये । पाणी एव पादौ यस्या सा पाणिपादा । मुखमेव नासिका यस्या. सा मुखनासिका ।

४६. नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ।

पूर्वमनुवर्तते । असहनञ्विद्यमानपूर्वपदेभ्य एभ्यः स्वाङ्गेभ्य स्त्रियामीप् प्रत्ययो वा भवति । पूर्वेणैव सिद्धे नियमार्थमिदम्, तेन नासिकोदराभ्यामेव बहुस्वराभ्यां ओष्ठादिभ्य एव च सयोगोपधेभ्यो भवति नान्येभ्यः । सुनासिकी, सुनासिका । कृशोदरी, कृशोदरा । बिम्बोष्ठी, बिम्बोष्ठा । दीर्घजङ्घी, दीर्घजङ्घा । शुद्धदन्ती, शुद्धदन्ता । चारुकर्णी, चारुकर्णा । तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा । मृद्वङ्गी, मृद्वङ्गा । सुगात्री, सुगात्रा । स्निग्धकण्ठी, स्निग्धकण्ठा । असहनञ्विद्यमानपूर्वपदादिति किम् ? सहनासिका, अनासिका, विद्यमाननासिका, सोदरा, अनुदरा, विद्यमानोदरा इत्यादि ।

---

१. भक्तिग्रहणं तद्धितार्थस्य स्त्रीत्वार्थम् ।

नियमः किम्? पृथुजघना, सुललाटा, दृढहृदयेत्यादौ बहुस्वरान्न भवति। कल्याणगुल्फा, सुपार्श्वा इत्यादौ संयोगोपधान्न भवति। केचित्तु दीर्घजिह्वशब्दादपीच्छन्ति। दीर्घजिह्वी, दीर्घजिह्वा कन्येति।

४७. नखमुखादसंज्ञायाम्।

असहनञ्विद्यमानपूर्वपदाभ्यां स्वाङ्गाभ्यां नखमुखशब्दाभ्यां स्त्रियामीप् प्रत्ययो वा भवति असंज्ञायाम्। शूर्पनखी, शूर्पनखा। अतिनखी, अतिनखा। चन्द्रमुखी, चन्द्रमुखा। अतिमुखी, अतिमुखा। असंज्ञायामिति किम्? शूर्पणखा, चन्द्रणखा, व्याघ्रणखा, वज्रणखा, गौरमुखा, कालमुखा, श्लक्ष्णमुखा—संज्ञाशब्दा एते।

४८. पुच्छात्[१]।

असहनञ्विद्यमानपूर्वपदात् स्वाङ्गात् पुच्छशब्दात् स्त्रियामीप् प्रत्ययो वा भवति। दीर्घपुच्छी, दीर्घपुच्छा। सुपुच्छी, सुपुच्छा। अतिपुच्छी, अतिपुच्छा। असहनञ्विद्यमानपूर्वपदादिति किम्? सपुच्छा, अपुच्छा, विद्यमानपुच्छा।

४९. कबरमणिविषशरादेः।

पूर्वेण विकल्पे प्राप्ते नित्यार्थं वचनम्। कबरादिपूर्वात् स्वाङ्गात्पुच्छशब्दात् स्त्रियामीप् प्रत्ययो भवति। कबरपुच्छी, मणिपुच्छी। विषं पुच्छे अस्याः सा विषपुच्छी। शरपुच्छी।

५०. पक्षाच्चोपमानपूर्वात्।

उपमानपूर्वात् पक्षशब्दात्पुच्छशब्दाच्च स्त्रियामीप् प्रत्ययो भवति। उलूकस्येव[२] पक्षावस्या उलूकपक्षी शाला। उलूकस्येव पुच्छमस्या उलूकपुच्छी सेना।

५१. भर्तृयोगादऽपालकान्तात्।

भर्तृयोगादकारान्तात् स्त्रियामीप् प्रत्ययो भवति न तु पालकान्तात्। गणकस्य स्त्री—गणकी। प्रष्ठी, प्रवरी, गोपी, महामात्री। भर्तृयोगादिति किम्? प्रसूता, देवदत्ता, प्रजाता, परिसृष्टा। अपालकान्तादिति किम्? गोपालकस्य स्त्री—गोपालिका। पशुपालिका। अत इति किम्? सहिष्णोः स्त्री सहिष्णुः। कथं ज्येष्ठस्य स्त्री—ज्येष्ठा? एवं कनिष्ठा, मध्यमा? अजादिपाठात्।

५२. सूर्यादऽदेवतायाम्।

भर्तृयोगादित्यनुवर्तते। अदेवताविषयात् भर्तृयोगात् सूर्यशब्दात् स्त्रियामीप् प्रत्ययो भवति। सूर्यो नाम कश्चित्तस्य भार्या—सूरी। '**सूर्यागस्त्ययोरीये च**' [८/४/७५] इति यलोपः। अदेवतायामिति किम्? सूर्यो देवस्तस्य स्त्री—सूर्या। '**हैमस्तु**' [२/४/६४] सूर्याणी इत्यपि इच्छति।

५३. पूतक्रतुवृषाकप्यग्निकुसितकुसिदानामैच्च।

भर्तृयोगेभ्यः पूतक्रत्वादिभ्यः शब्देभ्यः स्त्रियामीप् प्रत्ययो भवति, तद्योगे चैषामैकारोऽन्तादेशश्च। पूतक्रतोः स्त्री—पूतक्रतायी। वृषाकपायी, अग्नायी, कुसितायी, कुसिदायी। भर्तृयोगादिति किम्? पूताः क्रतवो यया सा पूतक्रतुः। एवं वृषाकपिर्नाम काचित्।

---

१. नासिकादिनियमान्निवृत्तौ वचनम्। यद्येवं नासिकादिसूत्र एव कुतो न पठ्यते, किमर्थं पृथगुद्दिश्यत इति? उच्यते—पुच्छादित्यस्यैव उत्तरत्रानुवृत्त्यर्थम्।

२. अत्र उलूकशब्दः उलूकपक्षे उलूकपुच्छे च वर्तते, यथोष्ट्रमुखे उष्ट्रशब्द। अतश्चोलूकशब्द उपमानं भवतीत्युलूक इव पक्षावस्या इत्यादि-विग्रहः। उलूकस्येव पक्षावित्यादि त्वर्थकथनम्।

५४. मनोरौच्च वा ।

चकार ऐकारानुवर्तनार्थं । भर्तृयोगात् मनोर्नाम्न: स्त्रियामीप् प्रत्ययो वा भवति, तत्संनियोगे औकार ऐकारश्चान्तादेश । मनो: स्त्री—मनावी, मनायी, मनु: । भर्तृयोगादिति किम् ? मनुर्नाम काचित् ।

५५. इन्द्रवरुणभवशर्वरुद्रमृडानामानुक् च ।

भर्तृयोगेभ्य इन्द्रादिभ्य शब्देभ्य: स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे चैषामानुगागमश्च । इन्द्रस्य स्त्री—इन्द्राणी । वरुणानी, भवानी, शर्वाणी, रुद्राणी, मृडानी । कश्चिदाहिताग्ने: स्त्री आहिताग्न्यानी, प्रजापत्यानी, वणिजानी इत्यादावपीच्छति ।

५६. मातुलाचार्योपाध्यायाद् वा ।

भर्तृयोगेभ्यो मातुलाचार्योपाध्यायेभ्य: स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे आनुगागमश्च वा । मातुलस्य स्त्री—मातुलानी, मातुली । एवमाचार्यानी । क्षुभ्नादित्वात् णत्वाभाव । आचार्यी । आचार्यीति नेच्छन्त्यन्ये । उपाध्यायानी, उपाध्यायी । अन्ये तु मातुला, आचार्या, उपाध्याया इत्यपीच्छन्ति । तदर्थमीबपि विकल्पनीय ।

५७. हिमारण्यान्महत्त्वे ।

भर्तृयोगादिति निवृत्त अर्थविशेषोपादानात् । विकल्पोपि निवृत्त । हिम, अरण्य—इत्येताभ्यां महत्त्वेऽर्थे स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे आनुगागमश्च । महद्धिम हिमानी, महदरण्यमरण्यानी । अमहत्त्वे स्त्रीत्वाभावान्न प्रत्युदाह्रियते । संज्ञायां तु भवत्येव—हिमा, अरण्या नाम काचित् ।

५८. यवाद्दोषे ।

दोषे वर्तमानात् यवशब्दात् स्त्रियामीप् प्रत्ययो भवति, तत्संनियोगे आनुगागमश्च । दुष्टो यवो यवानी । यवानां दोषकारि सहचरित द्रव्यान्तरम् । इहापि अदोषे स्त्रीत्वाऽभाव । सज्ञायां तु भवत्येव—यवा नाम काचित् ।

५९. यवनाल्लिप्याम् ।

लिपावर्थे वर्तमानात् यवनशब्दात् स्त्रियामीप् प्रत्ययो भवति, तद्योगे आनुगागमश्च । यवनानामिय लिपि —यवनानी । उक्तार्थत्वात् **'तस्येदम्'** [७/१/११२] इति अण् न भवति । लिप्यामिति किम् ? यावनी वृत्ति: । यवनस्य भार्या—यवनी ।

६०. आर्यक्षत्रियाद् वा ।

आभ्यां ईप् प्रत्ययो वा भवति, तत्संनियोगे आनुगागमश्च । आर्याणी, आर्या । क्षत्रियाणी, क्षत्रिया । केचिदत्र अर्यशब्दमाचक्षते । तन्मते अर्याणी, अर्या । अभर्तृयोगेऽयं विधि । भर्तृयोगे तु विशेषविधानात् नित्यमीप् । आर्यस्य भार्या—आर्यी । एवं क्षत्रियी । भर्तृयोगे एवाय विधिरिति कश्चित् । तन्मते आर्यस्य भार्या आर्याणी, आर्या । एव क्षत्रियाणी, क्षत्रिया । भर्तृयोगादन्यत्र आर्या, क्षत्रिया इत्येव भवति ।

६१. क्रीतात् साधनादे: ।

आगमो निवृत्त: । साधनपूर्वात् क्रीतान्तादकारान्तान्नाम्न: स्त्रियामीप् प्रत्ययो भवति । अश्वेन क्रीयते स्म अश्वक्रीती । धनक्रीती, वस्त्रक्रीती । विभक्त्युत्पत्ते: पूर्वमेव कृदन्तेन समास: । मनसाक्रीती । अलुक् । कथं **'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसीति'** ? उच्यते—धन व सा क्रीता चेति कर्मधारयोऽयम् । साधनविवक्षायामपप्रयोग एव । साधनादेरिति किम् ? सुक्रीता, दुष्क्रीता । आदिग्रहणं किम् ? अश्वेन क्रीता । न ह्यत्र साधनं क्रीतान्तस्य नाम्न आदिरवयवो भवति एकपद्याऽभावात् ।

६२. क्तावल्पे।

साधनपूर्वात् क्तप्रत्ययान्तान्नाम्नोऽल्पेऽर्थे स्त्रियामीप् प्रत्ययो भवति । अभ्रविलिप्ती द्यौ , सूपविलिप्ती स्थाली — अल्पाभ्रा, अल्पसूपेत्यर्थः । अल्प इति किम् ? चन्दनानुलिप्ता ब्राह्मणी—अनल्पेन चन्दनेन लिप्तेत्यर्थः ।

६३. स्वाङ्गादेरकृतमितजातप्रतिपन्नाद् बहुव्रीहौ ।

क्तादित्यनुवर्तते । स्वाङ्गादेः कृतादिवर्जितात् क्तप्रत्ययान्तान्नाम्नः स्त्रियामीप् प्रत्ययो बहुव्रीहिसमासे भवति । शङ्खौ[1] भिन्नावस्या शङ्खभिन्नी । ऊरुभिन्नी, केशविलूनी, गलककृत्ती । कृतादिवर्जनं किम् ? दन्तकृता, दन्तमिता, दन्तजाता, दन्तप्रतिपन्ना । बहुव्रीहाविति किम् ? हस्ताभ्यां पतिता हस्तपतिता । पादपतिता ।

६४. जात्यादेरनाच्छादनाद् वा ।

आच्छादनवर्जिता या जातिस्तदादेः कृतादिवर्जितात् क्तप्रत्ययान्तान्नाम्नो बहुव्रीहिसमासे स्त्रियामीप् प्रत्ययो वा भवति । सुरापीती, सुरापीता । पलाण्डुभक्षिती, पलाण्डुभक्षिता । शाङ्गरजग्धी, शाङ्गरजग्धा । अनाच्छादनादिति किम् ? वस्त्रच्छन्ना, वसनच्छन्ना । जात्यादेरिति किम् ? मासयाता, संवत्सरयाता, बहुयाता, सुयाता, अयाता, सुखयाता, दुःखयाता । पूर्वेणापि न भवति अस्वाङ्गादित्वात् । कृतादिवर्जनं किम् ? कुम्भकृता, कुम्भमिता, पलाण्डुजाता, वृक्षप्रतिपन्ना । क्तादिति किम् ? शाङ्गरप्रिया ।

६५. पाणिगृहीतीत्यूढायाम् ।

इतिशब्दः प्रकारार्थः । पाणिगृहीतीति प्रकाराः शब्दा ऊढायां—परिणीतायां स्त्रियामीप् प्रत्ययान्ता निपात्यन्ते । पाणिर्गृहीतोऽस्या पाणौ वा गृहीता पाणिगृहीती । एवं करगृहीती, पाण्यात्ती, करात्ती । ऊढायामिति किम् ? यस्यास्तु कथंचित् पाणिर्गृहीतः सा पाणिगृहीता ।

६६. पत्युर्नश्च ।

ऊढायामित्यनुवर्तते । पतिशब्दादूढाया स्त्रिया विषये ईप् प्रत्ययो भवति, तत्संनियोगे नकारोऽन्तादेशश्च । पत्नी, यजमानस्य पत्नी, वृषलस्य पत्नी । ऊढायामिति किम् ? पतिरियं सगृहीता अभार्या चेत्यर्थः ।

६७. सादेर्वा ।

पूर्वमनुवर्तते । सपूर्वपदात् पतिशब्दात् स्त्रियामीप् प्रत्ययो वा भवति, तत्संनियोगे नोऽन्तादेशश्च । ग्रामस्य पतिः स्त्री —ग्रामपत्नी, ग्रामपतिः । आशापत्नी, आशापतिः । अधिपत्नी, अधिपतिः । ईषदूना पत्नी—बहुपत्नी, बहुपतिः । सादेरिति किम् ? पतिरियम्, ग्रामस्य पतिः इयम् । मुख्याधिकारान्नेह—अतिक्रान्ता पतिमतिपतिः । यदा तु पत्नीशब्दस्य षष्ठ्यन्तेन समासस्तदा राजपत्नी, शूद्रपत्नीत्याद्येव भवति ।

६८. बहुव्रीहौ ।

पूर्वमनुवर्तते । पत्यन्तान्नाम्नः स्त्रियामीप् प्रत्ययो वा भवति, तत्संनियोगे नोऽन्तादेशश्च बहुव्रीहिसमासे । वृद्धः पतिरस्याः सा वृद्धपत्नी, वृद्धपतिः । दृढपत्नी, दृढपतिः । स्थिरपत्नी, स्थिरपतिः । पूर्वेणैव सिद्धे पुनर्वचनं मुख्यादित्यधिकारे बहुव्रीहेर्गौणादपि तथा स्यात् । स बहुव्रीहिश्च मुख्य एव ग्राह्यस्तेनेह न—बहुस्थूलपतिः पुरी । स्थूलाः पतयो यासां ताः स्थूलपतयः, बहवः स्थूलपतयो यस्यामिति द्वितीयो बहुव्रीहिः । तथा स्थूलश्चासौ पतिश्चेति कर्मधारयेऽपि बहवः स्थूलपतयो यस्यामिति स्थूलपत्यन्तो बहुव्रीहिर्न तु पत्यन्तः ।

---

१. भालश्रवणान्तरस्थो भागः शङ्खः ।

६९. सपत्न्यादौ ।

पूर्वेणैव सिद्धे नित्यार्थं वचनम् । सपत्नी इत्येवमादिषु पतिशब्दात् स्त्रियामीप् प्रत्ययो भवति, तत्सन्नियोगे नोऽन्तादेशश्च । समानः पतिरस्याः समानस्य सभावश्च सपत्नी । एवमेकपत्नी, वीरपत्नी, पिण्डपत्नी, भ्रातृपत्नी, पुत्रपत्नी । एइते सपत्न्यादयः । सूत्रे समुदायनिपातनं समानस्य सभावार्थं[1] पुंवद्भावप्रतिषेधार्थं च । सपत्नीभार्यः । सपत्न्या अयं—सापत्नः ।

७०. अन्तर्वत्नी गर्भिण्याम् ।

गर्भिण्यां स्त्रिया विषये अन्तर्वच्छब्दादीप्प्रत्यये नुगागमे च कृते अन्तर्वत्नीति निपात्यते । निपातनादेव च आधारप्रधानादप्यन्तःशब्दादस्ति सामान्याधिकरण्याभावेऽप्राप्तोऽपि मत्वर्थीयो वतुर्भवति । अन्तर्वत्नी गर्भिणी स्त्री । गर्भिण्यामिति किम् ? अन्तरस्यां शालायामस्ति ।

७१. पतिवत्नी भार्यायाम् ।

भार्या – अविधवा स्त्री । भार्यायां स्त्रियां विषये पतिशब्दाद् वतौ ईपि नुगागमे च पतिवत्नीति निपात्यते । पतिवत्नी सधवा स्त्री । भार्यायामिति किम् ? पतिमती पृथ्वी ।

७२. कुण्ड-गोण-भाज-नाग-काल-स्थल-कुश-कामुक-कट-कबरादमत्रावपन-श्राण-स्थूल-वर्णाकृत्रिमाऽयोविकार-रिरंसु-श्रोणि-केशवेशे ।

कुण्डादिभ्यो दशभ्यो यथासंख्यममत्रादिषु दशस्वर्थेषु स्त्रियामीप् प्रत्ययो भवति । कुण्डी अमत्रं पात्रं चेत्, कुण्डाऽन्या । गोणी आवपनं चेत्, गोणाऽन्या । भाजी श्राणा पक्वा चेत्, भाजाऽन्या । नागी स्थूला चेत्, नागाऽन्या । काली[2] वर्णश्चेत्, कालाऽन्या । स्थली अकृत्रिमा चेत्, स्थलाऽन्या । कुशी अयोविकारश्चेत्, कुशाऽन्या । कामुकी रिरंसुर्मैथुनेच्छा चेत्, कामुकाऽन्या । कटी श्रोणी चेत्, कटाऽन्या । कबरी केशवेशश्चेत्, कबराऽन्या । जानपदशब्दादपि वृत्ताविच्छन्त्यन्ये । जानपदी वृत्तिः । वृत्तेरन्यत्र जानपदा मदिरा ।

७३. घटाच्छिल्पिकृतकालयोः ।

शिल्पिकृतेऽर्थे कालविशेषे च वाच्ये घटशब्दात् स्त्रियामीप् प्रत्ययो भवति । घटी—शिल्पिकृतं कालविज्ञापकादि-यन्त्रं अर्धमुहूर्त्तश्च । घटाऽन्या ।

७४. नारी सखी ।

नारी, सखी—इत्येतौ ईप्प्रत्ययान्तौ निपात्येते । नृनरयोरीपि नारादेशः । नारी । सखिशब्दात् सखशब्दाच्च बहुव्रीहेरीप् । सखी । सह खेन वर्तते या सापि सखी । निपातनसामर्थ्यात् भर्तृयोगेऽपि भवति । सख्युः स्त्री—सखी ।

७५. इतोऽक्त्यर्थाद् वा ।

क्तयर्थप्रत्ययान्तवर्जितादिदन्तान्नाम्नः स्त्रियामीप् प्रत्ययो वा भवति । आली, आलिः । आजी, आजिः । धूली, धूलिः । भूमी, भूमिः । धमनी, धमनिः । श्रोणी, श्रोणिः । राजी, राजिः । आवली, आवलिः । यष्टी, यष्टिः । शारी, शारिः । सरणी, सरणिः । अशनी, अशनिः । अरणी, अरणिः । शकृत्करी, शकृत्करिः । आत्मभरी, आत्मंभरिः । कपी, कपिः । अही, अहिः । तारी, तारिः । मुनी, मुनिः । अञ्चती, अञ्चतिः । अङ्कती, अङ्कतिः । शकटी, शकटिः । शस्त्री, शस्त्रिः । रजनी, रजनिः । धरणी, धरणिः । रात्री, रात्रिः । अक्त्यर्थादिति किम् ? कृतिः, हृतिः, अजननिः, अकरणिः, ज्यानिः, ग्लानिः ।

---

१. पक्षादिषु पत्नीशब्दस्य पाठाऽभावात् ।

२. कृष्णवर्णविशिष्टा चेदित्यर्थः ।

कथ साती, सातिः ? तिगन्ताद् भविष्यति। अन्ये तु अञ्चति, अङ्कति, अहति, शकटि, शस्त्रि, शारि, तारि, अहि, कपि, मुनि, रात्रि, यष्टि—इत्येतेभ्य., कटिश्रोणिप्रभृतिप्राण्यङ्गवाचिभ्य', क्तिवर्जितकृदन्तेभ्यश्चेकारान्तेभ्य इच्छन्ति नान्येभ्यः। तन्मते शोभनो गन्धो यस्याः सा सुगन्धि, सुरभिगन्धि, निर्गता कौशाम्ब्याः निष्कौशाम्बिः, अणिः, शणिः—इत्यादिष्वीब् न भवति। क्तिमात्रवर्जनाच्च अकरणि-अजननि-ज्यानि-ग्लानिप्रभृतिषु न प्रतिषेधः।

७६. पद्धतेः।

क्तयर्थोऽयं विधीयते। पद्धतिशब्दात् स्त्रियामीप् प्रत्ययो वा भवति। पद्धती, पद्धतिः।

७७. शक्तेः शस्त्रे।

शस्त्रेऽर्थे वर्तमानात् शक्तिशब्दात् स्त्रियामीप् प्रत्ययो वा भवति। शक्ती, शक्तिः। शस्त्र इति किम् ? शक्तिः सामर्थ्यम्।

७८. उतो गुणादस्खरुसंयोगोपधात्।

खरुशब्दवर्जितात् सयोगोपधवर्जिताच्च उकारान्ताद् गुणवाचिनो नाम्नः स्त्रियामीप् प्रत्ययो वा भवति। मृद्वी, मृदुः। पट्वी, पटुः। बह्वी, बहुः। साध्वी, साधुः। तन्वी, तनुः। लघ्वी, लघुः। विभ्वी, विभुः। उत इति किम् ? श्वेता शाटी। गुणादिति किम् ? आखुः स्त्री। अखरुसयोगोपधादिति किम्? खरुरियं[1] ब्राह्मणी, पाण्डुरियं भूमिः। गुणलक्षणं यथा—

सत्त्वे निविशतेऽपैति, पृथग्जातिषु दृश्यते।
आधेयश्चाऽक्रियाजश्च, सोऽसत्त्वप्रकृतिर्गुणः॥

सत्त्वं द्रव्यं, तत्रैव निविशते—तदेवाश्रयति यः स गुण इति सम्बन्धः। द्रव्यादपैत्यपगच्छति, यथा—आम्रान्नीलता पीततायामुपजातायाम्। पृथग्जातिषु भिन्नजातीयेषु दृश्यते, यथा—सैव नीलता आम्रे दृष्टा, तरुणतृणेषु दृश्यते। एतेन सर्वेण जातिर्गुणो न भवतीत्युक्तम्। आधेय—उपाद्यो, यथा—कुसुमयोगाद् गन्धो वस्त्रे, यथा वाग्निसंयोगाद् घटे रक्तता। अक्रियाजो नित्यस्तद्यथा—आकाशादिषु महत्त्वादि। तदेवं गुणस्योत्पाद्यत्वाऽनुत्पाद्यत्वप्रकारद्वयम्। असत्त्वप्रकृतिः—द्रव्यस्वभावरहितः।

७९. इञ इतः।

इञ्प्रत्ययान्तादिकारान्तान्नाम्नः[2] स्त्रियामीप् प्रत्ययो भवति। सुतंगमेन निर्वृत्तेति इञि सौतंगमी। एवं मौनिचित्ती। इत इति किम् ? इञादेशात् ष्यान्मा भूत्। वराहस्याऽपत्यं वाराह्या। एवं बालाक्या, कारीषगन्ध्या, कौमुदगन्ध्या।

८०. मनुष्यजातेः।

इत इत्यनुवर्तते। मनुष्यजातिवाचिन इदन्तान्नाम्नः स्त्रियामीप् प्रत्ययो भवति। अवन्तेः कुन्तेश्चाऽपत्यमिह 'दुनादिकुर्वाजनपदादयः ...' [६/२/१२७] इति ञ्ये प्रत्यये 'स्त्रियां कुन्त्यवन्तिभ्याम्' [६/२/१३१] इति तल्लुकि च ईवनेन विधीयते। अवन्ती, कुन्ती। एवं दाक्षी, प्लाक्षी, तैकायनी, ग्लुचुकायनी। इत इति किम् ? विशोऽपत्यमित्यञ् तस्य च लोपे विट्। एवं दरद्। मनुष्यग्रहणं किम् ? तित्तिरिः। जातेरिति किम् ? निष्कौशाम्बिः कन्या।

---

१. क्रूरा मूर्खा वर्षिष्टा श्वेता वा ब्राह्मणी।
२. अपत्येऽन्तस्य मनुष्यजातिवचनत्वादुत्तरेणैव सिद्धेऽजात्यर्थोऽयमारम्भः।

८१. उत ऊङ्ऽयोः ।

पूर्वमनुवर्तते । उकारान्तान्मनुष्यजातिवाचिनो नाम्नः स्त्रियामूङ् प्रत्ययो भवति युशब्दान्तं वर्जयित्वा । कुरूः, इक्ष्वाकूः, ब्रह्मबन्धूः । ब्रह्मा बन्धुरस्या इत्यत्रोङ्. पूर्वं **'शेषाद् वा'** [८/३/११०] इति कप् प्रत्ययः परोऽपि न भवति, तत्र बहुलाधिकारात् । उत इति किम् ? विट् । अयोरिति किम् ? अध्वर्युः स्त्री । ङकारः **'ऊङ'** [३/२/६८] इत्यत्र विशेषणार्थः ।

८२. अप्राणिनोऽरज्ज्वादिभ्यः ।

उत इत्यनुवर्तते जातेश्च । अप्राणिजातिवाचिन उकारान्तान्नाम्नः स्त्रियामूङ् प्रत्ययो भवति रज्ज्वादीश्च वर्जयित्वा । अलाबूः, कर्कन्धूः । अप्राणिन इति किम् ? आखुः, कृकवाकुः । जातेरिति किम् ? पटुः । अरज्ज्वादिभ्य इति किम् ? रज्जुः, हनुः । आकृतिगणोऽयम् । कथं **'न हि भीरु ! गतं निवर्तते इति'** [षड्दर्शनसमुच्चय, श्लोक ८२] ? भीरु-शब्दस्य हि क्रियावाचित्वात् जातिलक्षणस्योङोऽभावे सबोधने ओत्वं प्राप्नोति । नैवम् । ताच्छीलिकानां संज्ञाप्रकारत्वान्मनुष्य-जातिवचनत्वम्, तेन ऊङि सति सबोधने ह्रस्वः । केचिज्जातिवचनत्वमनिच्छन्त ऊङं न विदधति, **'असूर्यंपश्यरूपा त्वं किमभीरुररार्यसे'** [भट्टिकाव्य, ४/२१] इति च प्रयोगं निदर्शयन्ति ।

८३. बाह्वन्तकद्रुकमण्डलुभ्यः संज्ञायाम् ।

बाहुशब्दान्तान्नाम्नः कद्रुकमण्डलुभ्यां च स्त्रियामूङ्प्रत्ययो भवति संज्ञायां विषये । मद्रबाहूः, भद्रबाहूः, जम्लबाहूः, कद्रूः, कमण्डलूः —संज्ञा एताः । संज्ञायामिति किम् ? वृत्तौ बाहू अस्याः सा वृत्तबाहुः स्त्री ।

८४. पङ्गुश्वश्रूः ।

पङ्गूः, श्वश्रूः—इत्येतौ शब्दौ स्त्रियामूङ्प्रत्ययान्तौ निपात्येते । पङ्गुशब्दात् अजातावूङ् । पङ्गूः । श्वशुरशब्दाच्च जातिलक्षणे भर्तृयोगलक्षणे च ईप्प्रत्यये प्राप्ते ऊङ् उकाराकारयोर्लोपश्च । श्वश्रूः ।

८५. ऊरोरुपमानसहितसंहितसहशफलक्ष्मणवामादेः ।

उपमानादिपूर्वपदादूरुशब्दात् स्त्रियामूङ् प्रत्ययो भवति । करभ इव ऊरू यस्याः सा करभोरूः । एवं नागनासोरूः, कदलीस्तम्भोरूः, सहितोरूः, संहितोरूः, सहोरूः, शफोरूः, लक्ष्मणोरूः, वामोरूः । उपमानाद्यादेरिति किम् ? वृत्तोरुः, पीनोरुः । कथं स्वामिन ऊरू स्वाम्यूरू, हस्तिन इव स्वाम्यूरू यस्याः सा हस्तिस्वाम्यूरूः वडवा ? एवं करभमात्रूरुः ? नात्रोरुशब्द उपमानादिपूर्वः, किंतु स्वाम्यूरुमात्रूरुशब्दौ ।

८६. यूनस्तिः ।

युवन्शब्दात् स्त्रियां ति प्रत्ययो भवति । नकारान्तत्वादीप्प्रत्यये प्राप्ते तदपवादो योगः । युवतिः । यूनीत्यपि कश्चित् । न तच्छिष्टसमतम् । कथं युवती ? यौतेरौणादिककिदतिप्रत्ययान्तात् **'इतोक्त्यर्थाद् वा'** [२/३/७५] इति ईप् भविष्यति । मुख्याधिकारान्नेह—अतियूनी, निर्यूनी ।

८७. अनार्षे पौत्रादावणिञो बहुस्वरगुरूपधस्याऽन्त्यस्य ष्यः ।

अनार्षे पौत्रादौ विहितौ यावणिञौ प्रत्ययौ तदन्तस्य बहुस्वरस्य गुरूपधस्य नाम्नोऽन्त्यस्य स्त्रियां ष्य इत्यादेशो भवति । गुरुग्रहणादनेकहसव्यवधानेऽपि भवति । गुरुग्रहणं हि दीर्घपरिग्रहणार्थं संयोगपरपरिग्रहार्थं च । अन्यथा दीर्घोपधस्य इत्युच्येत । करीषस्येव गन्धोऽस्य करीषगन्धिः, तस्यापत्यं पौत्रादि स्त्री इत्यण्, तस्य ष्यादेशः । कारीषगन्ध्या । कौमुदगन्ध्या । देवदत्तस्यापत्यं पौत्रादि स्त्री इतीञ्, तस्य ष्यादेशः । दैवदत्त्या । एवं वाराह्या, बालाक्या । अनार्ष इति किम् ? वासिष्ठी, वैश्वामित्री । पौत्रादाविति किम् ? वराहस्य प्रथमापत्यं स्त्री वाराही । अहिच्छत्रे जाता आहिच्छत्री । एवं कान्यकुब्जी । अणिञ इति किम् ? ऋतभागस्यापत्यमिनि बिदादित्वादञ् । आर्तभागी । एवमार्ष्टिषेणी । बहुस्वरेति किम् ? दाक्षी, प्लाक्षी ।

गुरूपधस्येति किम् ? औपगवी, कापटवी। अणिञन्तस्य सतो बहुस्वरादिति विशेषणं किम् ? द्वारस्याऽपत्यं पौत्रादि स्त्री इति इञि दौवार्या । तथा उडुलोम्नोऽपत्यमितीञि औडुलोम्या । सारलोम्या । अत्रेञ पूर्वमबहुस्वरत्वेऽगुरूपधत्वे च सत्यपीञि सति बहुस्वरत्वाद् गुरूपधत्वाच्च यथा स्यात्। स्त्रियामिति किम् ? कारीषगन्धः वाराहिः पुमान्। मुख्याधिकार-त्वान्नेह—बहवः कारीषगन्धा यस्या सा बहुकारीषगन्धा। निर्वाराहि। कथं मौधर्मी, आयस्थूणी, भौलिङ्गी, आलम्बी, आलच्ची, कालच्ची, औदुग्राहमाती ? गौरादिपाठात्। अन्त्यस्येति किम् ? 'शिदनेकवर्णः सर्वस्य' [८/४/१२४] इति सर्वस्य मा भूत्। शित्करणं 'ष्या पुत्रपत्योः···' [२/३/९२] इत्यत्र विशेषणार्थम्।

८८. कुलाख्यानाम्।

पुणिकभुणिकमुखरप्रभृतयः कुलाख्याः कुलमाख्यायते आभिरिति कृत्वा। तासामनार्षे पौत्रादावणिञन्तानामन्तस्य स्त्रियां ष्यो भवति। अबहुस्वराऽगुरूपधार्थं वचनम्। पुणिकस्याऽपत्यं पौत्रादि स्त्री पौणिक्या। भौणिक्या, मौखर्या, गौप्त्या। पौत्रादाविति किम् ? पौणिकी, भौणिकी। अत्र प्रथमापत्ये इञ्। अनार्ष इति किम् ? गौतमी। गौरादित्वात्तु भौरिकी, भौलिकी।

८९. क्रौड्यादीनाम्।

अबहुस्वराऽगुरूपधार्थोऽनन्तरापत्यार्थश्चारम्भः। क्रौडि इत्येवमादीनामणिञन्तानामन्तस्य स्त्रियां ष्यादेशो भवति। क्रोडस्याऽपत्यं क्रौडिः, स्त्री क्रौड्या। लाड्या। क्रौड्यादयो यथा—क्रौडि, लाडि, व्याडि, आपिशलि, गौधातकि, भौरिकि, भौलिकि, शाल्मलि, शालास्थलि, कापिष्ठलि, गौढि, दैवदत्ति, याज्ञदत्ति इत्यादय इञन्ताः। चौपयत, चैकयत, चैटयत, बैल्वयत, सैकयत—एतेऽणन्ताः। ष्यस्यादेशत्वात् क्रौड्येयः, चौपयतेयः इत्यादिषु आपत्यस्य यस्य लोपः[1] सिद्धः। अन्ये त्वत्र ष्यस्य प्रत्ययत्वमिच्छन्तो यलोपं नेच्छन्ति। क्रौड्येयः, चौपयत्येयः। आकृतिगणोऽयम्।

९०. भोजसूतयोः क्षत्रियायुवत्योः।

भोजसूतशब्दयोरन्तस्य क्षत्रियायुवत्योरभिधेययोः स्त्रियां ष्यादेशो भवति। भोज्या—भोजवंशजा क्षत्रिया। सूत्या—प्राप्तयौवना मानुषीत्यर्थः। अन्ये सूतसंबन्धिनी युवतिः सूत्या न सर्वेत्याहुः। क्षत्रियायुवत्योरिति किम् ? भोजा, सूता।

९१. दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धीनां वा।

एषामिञन्तानां स्त्रियामन्तस्य ष्यादेशो वा भवति। इञन्तमात्रनिर्देशात् पौत्रादौ प्राप्ते प्रथमाऽपत्ये त्वप्राप्ते विभाषा। दैवयज्ञ्या, दैवयज्ञी। शौचिवृक्ष्या, शौचिवृक्षी। सात्यमुग्र्या, सात्यमुग्री। काण्ठेविद्ध्या, काण्ठेविद्धी।

९२. ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे।

मुख्य आबन्तः ष्यः पुत्रपतिशब्दयोः केवलयोः परयोस्तत्पुरुषे समासे ईच् भवति। चकारः 'ईदूतोऽत्स्वरे···' [२/३/१०५] इत्यादौ विशेषणार्थः। कारीषगन्ध्यायाः पुत्रः कारीषगन्धीपुत्रः। एवं कारीषगन्धीपतिः। कौमुदगन्धीपुत्रः, कौमुदगन्धीपतिः। परमकारीषगन्धीपुत्रः, परमकारीषगन्धीपतिः। ष्येति किम् ? गौकक्ष्यापुत्रः, इभ्यापुत्रः, क्षत्रियापुत्रः। पुत्रपत्योरिति किम् ? कारीषगन्ध्याकुलम्। केवलयोरिति किम् ? कारीषगन्ध्यापुत्रकुलम्। कारीषगन्धीपुत्रस्य कुलमिति विग्रहे तु कारीषगन्धीपुत्रकुलमित्यपि भवति। तत्पुरुष इति किम् ? कारीषगन्ध्यापतिरस्य कारीषगन्ध्यापतिरयं ग्रामः। मुख्याधिकारान्नेह—अतिक्रान्ता कारीषगन्ध्यामतिकारीषगन्ध्या, तस्याः पुत्रोऽतिकारीषगन्ध्यापुत्रः।

९३. बन्धौ बहुव्रीहौ।

मुख्य आबन्तः ष्यो बन्धुशब्दे केवले परतो बहुव्रीहिसमासे ईच् भवति। कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः।

---

१. 'तद्धितेऽनातियस्वरे' [८/४/७८] इति।

कौमुदगन्धीबन्धुः, परमकारीषगन्धीबन्धुः, परमकौमुदगन्धीबन्धुः । बन्धाविति किम् ? कारीषगन्ध्यापतिर्ग्रामः । केवल इति किम् ?कारीषगन्ध्याबन्धुकुलः । कारीषगन्धीबन्धुकुल इत्यत्र तु कारीषगन्धीबन्धु कुलमस्येति विग्रहः । बहुव्रीहाविति किम् ? कारीषगन्ध्याया बन्धुः कारीषगन्ध्याबन्धुः । मुख्यादिकारान्नेह—अतिकारीषगन्ध्या बन्धुरस्य अतिकारीषगन्ध्याबन्धुः ।

९४. मातमातृमातृकेषु वा ।

मुख्य आवन्त ष्यो मातादिषु केवलेषु परेषु बहुव्रीहिसमासे ईच् वा भवति । कारीषगन्ध्या माता यस्य स कारीषगन्धीमातः, कारीषगन्ध्यामातः । परमकारीषगन्धीमातः, परमकारीषगन्ध्यामातः । कारीषगन्ध्या माता यस्य स कारीषगन्धीमाता, कारीषगन्ध्यामाता । कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः । मातेति निर्देशान्मातृशब्दस्य पुत्रप्रशसामन्त्रणमन्तरेणापि मातादेशः । अन्यथा मातृशब्देनैव गतत्वान्मातशब्दोपादानमनर्थकं स्यात् । मातृमातृकशब्दयोश्च भेदेनोपादानादृदन्तलक्षणः कप् प्रत्ययोऽपि विकल्प्यते ।

९५. अत इदनित्काप्यऽयत्तक्षिपकादीनाम् ।

आबेव परो यस्मात् ककारान्न विभक्तिः स काप् । यत्तत्क्षिपकादिवर्जितस्य नाम्न अकारस्य इकारो भवति अनकारानुबन्धस्य प्रत्ययस्यावयवभूते ककारे आपि परे । कारिका, पाचिका, पाठिका, सर्विका, मद्रिका, मुण्डिका, जटिलिका, बधिरिका । अत इति किम् ? गोका, नौका । अनिदिति किम् ? जीवका, नन्दका, 'आशिष्यकन्' [५/१/८३] । कापीति किम् ? कारक, हारक, पाचक, पाठक, । आबेव परो यस्मात् ककारान्न विभक्ति । स कापिति किम् ? बहुपरिव्राजका मथुरा । विभक्त्यन्तादयमाबिति प्रतिषेधः । यत्तत्क्षिपकादिवर्जनं किम् ? यका, सका, क्षिपका । क्षिपकादयो यथा— क्षिपका, ध्रुवका, धुवका, लहका, चरका, चटका, इष्टका, एडका, एरका, करका, अवका, अलका, दण्डका, पिप्पका, कन्यका, मेनका, उपत्यका, अधित्यका, द्वारका, रेवका, सेवका, धारकेत्यादि । आकृतिगणोऽयम् ।

९६. मामिकानरिके ।

मामकशब्दस्य नरकशब्दस्य च कापि परेऽकारस्येत्वं निपात्यते । ममेयं—मामिका । अत्र ममकादेशः । 'केवलमामक···' [२/३/२६] इत्यादिना सज्ञायामीप्प्रत्ययस्य नियमादाप् । नरान् कायतीति नरिका । 'आतो डोऽह्वावामः' [५/२/५] । ककारस्याप्रत्ययसबन्धित्वात् पूर्वेणाऽप्राप्ते वचनम् ।

९७. तारका ज्योतिषि ।

ज्योतिष्यर्थे तारका इति इकाराभावे निपात्यते । तरतेर्णकः तारका ज्योतिः । नक्षत्रमेत्यन्ये । अन्यत्र तारिका ।

९८. वर्णका तान्तवे ।

तान्तवेऽर्थे वर्णका इतीकाराभावे निपात्यते । वर्णयतीति णके वर्णका तान्तवः—प्रावरणविशेषः । अन्यत्र वर्णिका भागुरी[1]—लोकायतस्य[2] व्याख्यात्रीत्यर्थः ।

९९. अष्टका पितृदेवत्ये ।

पितृदेवत्येऽर्थेऽश्नोतेरौणादिकं तकंकि अष्टका इतीकाराभावे निपात्यते । अष्टका —पितृदेवत्यं कर्म । अन्यत्राष्टौ द्रोणा परिमाणमस्या खार्या इति अष्टिका खारी । पितृदेवतार्थं कर्मेति 'देवतान्तात्तदर्थे' [७/३/२२] इति ये पितृदेवत्यमिति सिद्धम् ।

---

१. भागुरिराचार्य, बाहुलकात् स्त्रीलिङ्गः ।

२. लोके आयतं लोकायतं नास्तिकशास्त्रम् ।

१००. वर्तिका शकुनौ वा ।

वर्तिका इति वा निपात्यते शकुनौ वाच्ये । वर्तिका वर्तका वा शकुनिः । अन्यत्र वर्तिका भागुरी—लोकायतस्य व्याख्यात्रीत्यर्थः ।

१०१. द्व्येषसूतपुत्रवृन्दारकाणाम् ।

द्वि, एष, सूत, पुत्र, वृन्दारक—इत्येतेषामन्तस्य इकारादेशो वा भवति अनित्प्रत्ययावयवभूते ककारे आपि परे । द्विके, द्वके । एषिका, एषका । सर्वादित्वादक् । केवलयोरेवानयोर्विकल्पेनेकारः । यदा तु न द्वे, न एषा, न द्वके, न एषका इत्यादि विग्रहे कृते विभक्तेर्लुकि गति पुन समासाद् विभक्तौ तामाश्रित्य त्यदाद्यत्वं, तत आप् स च स्थानिवद्भावेन विग्रह-कालभाविन्या विभक्ते परो न तु कात् तदा अद्वके, अनेषका इत्यत्रेकारो न भवति । सूतिका, सूतका । पुत्रिका, पुत्रका । वृन्दारिका, वृन्दारका । द्विशब्दसाहचर्यादेषेति सर्वादेरेतदो निर्देशस्तेन णकप्रत्ययान्तस्य इषेर्न विकल्प । इच्छतीति एषिका ।

१०२. यकादापोऽधातुत्यात् ।

धातुवर्जाभ्यां त्यप्रत्ययान्तवर्जाभ्यां च यकारककाराभ्यां परस्य आप आकारस्य इकारो वा भवति अनित्प्रत्ययावयवभूते ककारे आपि परे । आर्यिका, आर्यका[1] । क्षत्रियिका, क्षत्रियका । चटकिका, चटकका । मूषकिका, मूषकका । आप इति किम् ? साकाशे भवा अकञि साकाश्यिका । धातुवर्जन किम् ? सुनयिका, सुशयिका, अशोकिका, सुपाकिका । त्यवर्जन किम् ? दाक्षिणात्यिका, पाश्चात्यिका, इहत्यिका, अमात्यिका । कथ बह्वपत्यिका, बह्वपत्यका ? नात्र त्य प्रत्यय । **प्रत्ययाप्रत्यययोश्च प्रत्ययस्यैव ग्रहणम्** । अथ शुष्किकेत्यत्र कथं न विकल्प ? क्तादेशस्याऽसिद्धत्वात् ।

१०३ भस्त्राजाज्ञास्वानाम् ।

भस्त्रादीनामपि आकारस्य इकारो वा भवति अनित्प्रत्ययावयवभूते ककारे आपि परे । भस्त्रग्रहणं स्त्रीपुंस-साधारणवृत्तेर्ग्रहणार्थम् । अविद्यमाना भस्त्रा यस्याः सा अभस्त्रा, सैवाल्पा अभस्त्रिका, अभस्त्रका । निर्भस्त्रिका, निर्भस्त्रका । अत्र भस्त्राशब्दात् 'अन्यार्थे···' [२/३/११५] इति ह्रस्वत्वे भाषितपुंस्कादाप् । अभाषितपुंस्काद् भस्त्राशब्दात्तु वक्ष्यमाण-सूत्रेण त्रैरूप्यमेव । भस्त्रिका, भस्त्रका, भस्त्राका । न भस्त्रा -अभस्त्रा, साल्पा चेत् अभस्त्रिका, अभस्त्रका, अभस्त्राका । अजिका, अजका, बह्वजिका, बह्वजका । ज्ञिका, ज्ञका, निर्ज्ञिका, निर्ज्ञका । कुत्सिता स्वा ज्ञाति—स्विका, स्वका । नि स्विका, नि स्वका, बहुस्विका, बहुस्वका । ज्ञातिधनाख्यायामसर्वादित्वादकाभावे कप्रत्ययान्त स्वकशब्द ।

१०४. ह्रस्वश्चाऽभाषितपुंस्कात् ।

चकार इदनुकर्षणार्थ । अभाषितपुंस्कशब्दात्परस्यापि इकारो ह्रस्वश्च वा भवति अनित्प्रत्ययावयवभूते ककारे आपि परे । अल्पा खट्वा—खट्विका, खट्वका, खट्वाका । परमखट्विका, परमखट्वका, परमखट्वाका । प्रिया खट्वा यस्या सा प्रियखट्विका, प्रियखट्वका, प्रियखट्वाका । विकल्पद्वये त्रैरूप्यं सिद्धम् । एव गङ्गिका, गङ्गका, गङ्गाका । परमगङ्गिका, परमगङ्गका, परमगङ्गाका । न विद्यते खट्वा अस्या इति 'अन्यार्थे स्त्री···' [२/३/११५] इत्यादिना ह्रस्वत्वे स्त्रीपुंससाधारणात्पुनरपि अखट्वा, सैवाल्पा अखट्विका । तथा खट्वामतिक्रान्ता—अतिखट्वा, सैवाल्पा अतिखट्विका । अत्राऽभाषितपुंस्काद् विहित आप् न भवतीति त्रैरूप्यं न भवति । **'ईबावीवूतां के'** [२/३/१०९] इत्यनेन तु ह्रस्वे कृते **'अत इवनित्कापि···'** [२/३/९५] इत्यादिनेत्वमेव भवति । कपि त्वभाषितपुंस्काद् विहित आबस्तीति भवत्येव रूपत्रयम् । न विद्यते खट्वा यस्या सा अखट्विका, अखट्वका, अखट्वाका । अभाषितपुंस्कादिति किम् ? सर्विका[2] । आप इति किम् ?

१, **'ईबावीवूतां के'** [२/३/१०९] इति ह्रस्व ।

२ सर्वा नाम काचित्, तत स्वार्थे **'यावादिभ्यः कः'** [८/२/७३] । **'ईबावीवूतां के'** [२/३/१०९] इति ह्रस्वत्वे **'अत इवनित्काप्ययत्तद्···'** [२/३/९५] इति इकार । सर्वादि सर्वशब्दस्य तु **'स्यादिसर्वादि···'** [८/२/६३] इत्यनेन टे प्रागकि सर्विकेति । अत्राप स्थानित्वमपि न स्यात् ।

मातृका । अनिदिति किम् ? अनुकम्पिता दुर्गा देवीति कनि दुर्गका । **'ईबादीदूतां के'** [२/३/१०६] इत्यनेन ह्रस्व एव भवति । कापीति किम् ? प्रियखट्वाकः पुरुषः । आबेव परो यस्मात्ककारान्त विभक्ति स काबिति विग्रहेन नेह—प्रियखट्वाक-मतिक्रान्तातिप्रियखट्वाका । अत्र हि प्रथम द्वितीया पञ्चादाप् ।

१०५. ईदूतोरुत्तरपदेऽनव्ययेयुवीबीचसंप्रसारणस्य बहुलम् ।

ईकारोकारयोरुत्तरपदे परे बहुल ह्रस्वो भवति न चेत्तावव्ययौ इयुवस्थानिनौ ईब्रूपौ ईच्रूपौ सप्रसारणरूपौ च भवत । ग्रामणिपुत्रः, ग्रामणीपुत्र । लक्ष्मिपुत्र, लक्ष्मीपुत्र । यवलुपुत्र, यवलूपुत्र । खलपुपुत्र, खलपूपुत्र । ब्रह्मबन्धुपुत्र, ब्रह्मबन्धूपुत्र । बहुलग्रहणात् क्वचिन्नित्य ह्रस्वो भवति । अलाबुफलम्, कर्कन्धुफलम्, दृन्भुफलम् । क्वचिद् ह्रस्वो न—कमण्डलूपुत्र । ईदूतोरिति किम् ? खट्वापाद, गोकुलम् । अव्ययादिवर्जनं किम् ? अव्यय—ऊरीकृतम्, उररीकृतम्, काण्डीभूतम्, वृषलीभूतम् । इयुव्—श्रीपति, श्रीकुलम्, भ्रूशोभा, भ्रूकुलम्, यवक्रीकुलम्, कटप्रूकुलम् । ईप्—ब्राह्मणीपुत्र, गौरीपुत्र । ईच्—कारीषगन्धीपुत्र, कौमुदगन्धीपति । सप्रसारणम्—मित्रहूपुत्र । उत्तरपद इति किम् ? अग्नी पश्य, पटू पश्य ।

१०६. आबीपोः संज्ञायाम् ।

आबन्तस्येबन्तस्य चोत्तरपदे परे बहुलं ह्रस्वो भवति सज्ञायां विषये । गङ्गमह, गङ्गामह । गङ्गदेवी, गङ्गादेवी । कालिदास, कालीदास । बहुलग्रहणात् क्वचिन्नित्य ह्रस्व । शिलवहम्, शिलप्रस्थम्, भरणिगुप्त, रेवतिमित्र, रोहिणिपुत्र, महिदात, महिदत्त । क्वचिन्न—लोमकागृहम्, लोमकाखण्ड, गङ्गाद्वारम्, फल्गुनीमित्र, नान्दीमुखम्, महीफलम्, महीकर, महीविशाल । आबीपोरिति किम् ? विष्टापुरम्, श्रीपुरम् । उत्तरपद इति किम् ? भरिण्या, रोहिण्या । सज्ञायामिति किम् ? खट्वापाद, नदीस्रोत ।

१०७. त्वे वा ।

आबीबन्तयोस्त्वे परे ह्रस्वो वा भवति । अजत्वम्, अजात्वम् । रोहिणित्वम्, रोहिणीत्वम् ।

१०८. कुंसकुटघोर्भ्रुवो भृभ्रौ च ।

चात् ह्रस्वो वेत्यनुवर्तते । भ्रूशब्दस्य ह्रस्व भृ भ्र—इत्येतावादेशौ च वा भवत कुसकुटीत्येतयो परयो । भ्रुकुस, भृकुस, भ्रकुस, भ्रूकुस । भ्रुकुटि, भृकुटि, भ्रकुटि, भ्रूकुटि ।

१०९. ईबादीदूतां के ।

ईप्प्रत्ययस्य आकार-ईकार-ऊकाराणा च के प्रत्यये परे ह्रस्वो भवति । कुमारिका, पटिवका । सोमपक, कीलालपक । सोमपिका, कीलालपिका, लक्ष्मिका, तन्त्रिका । वधुका, यवागुका, ब्रह्मबन्धुका । ईब्ग्रहण **'मानिबयङ्कच्'''** [३/२/४६] इत्यादिना पुवद्भावबाधनार्थम् । काक, पाक—इत्यादौ तु **प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति** न्यायान्न भवति[1] ।

११०. न कपि ।

कपि प्रत्यये परे ईबादीदूता ह्रस्वो न भवति । बहुकुमारीक, बहुकीलालपाक, बहुलक्ष्मीक, बहुवधूक । न कपीति प्रतिषेध पूर्वसूत्रे **निरनुबन्धग्रहणे न सानुबन्धकस्य** इति न्यायस्याभावज्ञापनार्थस्तेन निषादकर्ष्वी जातो नैषादकर्षुक. । एव शाबरजम्बुक इत्यादावकिणि ह्रस्व सिद्ध ।

---

१ ककतेरचि पृषोदरादित्वादात्वे काक । पचतेश्च घञि कत्वे पाक । ननु कायते पिबतेश्च **'मीणशलिबलि'''** [उ० १/२१] इति यदा औणादिक क प्रत्ययस्तदा ह्रस्व कस्मान्न भवतीति ? उच्यते—उणादीनामव्युत्पन्नत्वात् । व्युत्पत्तिपक्षे तु बहुलवचनान्न भवति ।

१११. आपो वा।

कपि प्रत्यये परे आबन्तस्य ह्रस्वो वा भवति। बहुमालकः, बहुमालाकः। बहुखट्वकः, बहुखट्वाकः। पूर्वेण प्रतिषेधे प्राप्ते पक्षे ह्रस्वार्थमिदम्।

११२. इष्टकेषीकामालानामन्तेऽपि चिततूलभारिषु।

इष्टकादीनां केवलानामन्ते च वर्तमानानां यथासंख्यं चिततूलभारिन्शब्देषूत्तरपदेषु परेषु ह्रस्वो भवति। इष्टकचितम्, पक्वेष्टकचितम्। इषीकतूलम्, मुञ्जेषीकतूलम्। मालां बिभर्ति इत्येवंशीलो मालभारी। उत्पलमालभारी, मालभारिणी, उत्पलमालभारिणी। इदमेवान्तग्रहणं ज्ञापकम् **ग्रहणवता नाम्ना न तदन्तविधिरिति,** तेन सौत्रनाडिः, दिग्धपादोपहतः—इत्यादौ आयनण्[1]पदादेशादयो[2] न भवन्ति।

११३. नपुंसके।

नपुंसकलिङ्गे वर्तमानस्य नाम्नो ह्रस्वो भवति। कीलालपं, ग्रामणि, नतभ्रु। संध्यक्षराणां स्थानसाम्यादिदुतौ—अतिहि, अतिरि, अतिद्यु, अतिनु कुलम्। नपुंसके इति किम्? ग्रामणीः। काण्डीभूतं, शुक्लीभूतमित्यादावव्ययानामलिङ्गत्वात् ह्रस्वत्वं न भवति।

११४. गोण्या मेये।

गोणीशब्दस्य मानवाचिन उपचारान्मेये वर्तमानस्य ह्रस्वो भवति। गोण्या मितो गोणिः। मेय इति किम्? गोणी।

११५. अन्यार्थे स्त्रीप्रत्ययगोरन्त्यस्याऽक्विपोऽनंशिसमासेयोबहुव्रीहौ।

अन्यार्थे वर्तमानस्य अन्त्यस्य स्त्रीप्रत्ययस्य गोशब्दस्य च ह्रस्वो भवति न तु क्विबन्तस्य न चेदसाऽवंशिसमासान्त ईयस्वन्तबहुव्रीह्यन्तो वा भवति। मालामतिक्रान्तः—अतिमालः। अतिगङ्गः, अतिखट्वः। निर्गतः कौशाम्ब्याः—निष्कौशाम्बि। निर्वाराणसि, निःश्रेयसिः। चित्रा गावो यस्य स चित्रगुः। पञ्चभिर्गोभिः क्रीतः—पञ्चगुः। अन्यार्थे इति किम्? नक्षत्राणां माला—नक्षत्रमाला। राजकुमारी, सुगौः, किगौः। स्त्रीप्रत्ययगोरिति किम्? अतितन्त्रीः, अतिलक्ष्मीः, अतिभ्रूः। अन्त्यस्येति किम्? कुमारीप्रियः, गोकुलम्। अत्र ईबन्तस्य गोशब्दस्य च समासार्थे मुख्यत्वं न। अक्विप इति किम्? कुमारीमिच्छतीति क्यच्, क्विप्—कुमारी, ततः प्रियकुमारी चैत्रः। एवं प्रियगौर्मैत्रः। अनंशिसमासेयोबहुव्रीहाविति किम्? अर्धं पिप्पल्याः—अर्धपिप्पली। एवं तूर्यभिक्षा। बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी पुरुषः। एवं प्रियश्रेयसी।

११६. लुक् तद्धितलुक्यऽगोणीसूच्योः।

अन्यार्थे वर्तमानस्याऽक्विबन्तस्य स्त्रीप्रत्ययस्य तद्धितलुकि सति लुग् भवति न तु गोणीसूचीसंबन्धिनः। सप्त कुमार्यो देवताऽस्य सप्तकुमारः। पञ्चभिर्धीवरीभिः क्रीतः पञ्चधीवा। पञ्चेन्द्राण्यो देवताऽस्य पञ्चेन्द्रः। एवं पञ्चाग्निः। एषु ईब्निवृत्तौ तत्सनियोगशिष्टयोरागमादेशयोरपि निवृत्तिः। स्त्रीप्रत्ययस्येति किम्? पञ्चभिः प्रेयोभिः क्रीतः पञ्चप्रेयान्। अन्यार्थे इति किम्? अवन्ती, कुन्ती। अक्विप इति किम्? कुमारीमिच्छति क्यच्, क्विप्—कुमारी, ततः पञ्च कुमार्यो देवता अस्येति पञ्चकुमारी। पञ्चेन्द्राणी। तद्धितलुकीति किम्? औपगवीत्वम्। कथं हरीतक्याः फलं विकारोऽवयवो वा हरीतकी? एवं कोशातकीत्यादि? अत्र लुगन्तस्य स्त्रीत्वात् पुनर्गौरादिलक्षणः ङीप्। अगोणीसूच्योरिति किम्? पञ्चभिर्गोणीभिः क्रीतः पञ्चगोणिः। दशसूचिः।

---

१. 'नडादिभ्य आयनण्' [६/२/६८] इति।

२. 'पदः पादस्याज्यातिगोपहतेषु' [३/२/११०] इति।

चतुर्थश्चरणः

१. क्रियानिमित्तं कारकम् ।

निमित्तं हेतु । क्रियाया निमित्तं कर्त्रादि कारकसंज्ञं भवति । तच्च द्रव्याणां स्वपराश्रयसमवेतक्रियानिर्वर्तकं सामर्थ्यं शक्तिरित्याचक्षते । शक्तिश्च सहभूर्यावद् द्रव्यभाविनी च क्रियाकाल एवाभिव्यज्यते । करोतीति कारकमिति अन्वर्थसंज्ञासमाश्रयणाच्चानाश्रितव्यापारस्य निमित्तत्वमात्रेण हेत्वादे कारकसंज्ञा न भवति । कारकसंज्ञाप्रयोजनं तु **'अव्ययं कारक···'** [३/१/२३] इत्यादि ।

२. स्वतन्त्रः कर्ता ।

क्रियानिमित्तभूतो य. क्रियासिद्धौ प्राधान्येन विवक्ष्यते स कारकविशेषः कर्तृसंज्ञको भवति । देवदत्त. पचति । अस्य च कर्तुरधिश्रयणादय पचिक्रियायामवान्तरव्यापारा भवन्ति, एतान् कुर्वन् देवदत्त पचतीत्युच्यते । जिनदत्तेन कृतम् । स्थाली पचति । चौरस्य रुजति रोग । प्रयोजकोऽपि कर्त्रैव—पचन्त देवदत्त प्रयुङ्क्ते इति देवदत्तेन पाचयति चैत्र । अत्र स्वशब्द आत्मवचन. । तन्त्रशब्द प्रधानार्थ. । स्वं तन्त्रमस्य स्वतन्त्र.- -आत्मप्रधान. । कि पुन कारकान्तरेभ्य कर्तुः प्राधान्यम् । यत् साधनादीनि प्रयुङ्क्ते, न तै प्रयुज्यते । तानि न्यक्करोति, न तैर्न्यक्क्रियते । तानि निवर्तयति, न तैर्निवर्त्यते । तानि प्रतिनिधत्ते, न तै प्रतिनिधीयते । तेभ्य स प्रथममात्मलाभं लभते, न तानि तस्मात् । स तैर्विनापि दृश्यते, न तानि तेन विना । कर्तृसंज्ञाप्रयोजनं तु **'कर्तृकर्मणोः कृति'** [२/४/८६] इत्यादि ।

३. कर्तुर्व्याप्यं कर्म ।

कर्त्रा क्रियया यद्विशेषेण आप्तुमिष्यते तद् व्याप्यं तत्कारकं कर्मसंज्ञ भवति । तत् त्रिविधम्—१. निर्वर्त्यं २. विकार्यं ३. प्राप्यं च । यदऽसज्जायते जन्मना वा प्रकाश्यते तन्निर्वर्त्यम् । कटं करोति, पुत्र प्रसूते । प्रकृतिनाशेन गुणान्तराधानेन वा यद् विकारमापद्यते तद् विकार्यम् । काष्ठ दहति, काण्ड लुनाति । यत्र तु क्रियाकृतो विशेषो नास्ति तत्प्राप्यम् । आदित्यं पश्यति, ग्राम गच्छति । अस्य तु त्रिविधस्यापि यथाक्रममवान्तरव्यापारा —निर्वर्तते, विकुरुते, आभासमुपगच्छतीत्यादयः । त्रिविधमप्येतन् पुनस्त्रिविधम्—१. इष्ट २. अनिष्ट ३. अनुभय च । यत्प्राप्तुं क्रियारभ्यते तदिष्टम्—कटादि । यद् द्विष्टं प्राप्यते तदनिष्टम्—अहिं लङ्घयति, विषं भक्षयति, चौरान् पश्यति । यत्र नेच्छा न च द्वेषस्तदनुभयम्—ग्रामं गच्छन् वृक्षमूलान्युपसर्पति, वृक्षच्छायां लङ्घयति । पुनस्तत्कर्म द्विविधं प्रधानगौणभेदात् । तच्च द्विकर्मकत्वे विज्ञेयम् । यथा—गां पयो दोग्धि । यदर्थं क्रियारभ्यते तत्प्रधानमिति पयस प्राधान्यं, तत्सिद्धये च यदन्यत् क्रियया संबद्धयते तद् गौणमिति गोश्च गौणत्वम् । यदा तु पयोर्थी प्रवृत्तिरविवक्षिता तदा प्राधान्यस्यासन्निधानाद् गोरेव प्राधान्यम् । यथा—आश्चर्यो गवां दोह । तत्र—

गौणे कर्मणि दुह्यादेः, प्रधाने नीहृकृष्वहाम् ।
आहारबोधशब्दार्थञिन्नन्तानां निजेच्छया ॥१॥
गत्यर्थाकर्मकाणां तु, प्रधाने हृकृनोस्तथा ।
कर्मजाः प्रत्ययाः प्रोक्ताश्चात्मनेऽभिवदेर्दृशेः ॥२॥

दुहादीनां गौणे कर्मणि प्रत्ययः—गौर्दुह्यते दुग्धा दोह्या वा पयो मैत्रेण। पृच्छयते धर्ममाचार्यः इत्यादि। न्यादीना प्राधान्ये कर्मणि प्रत्ययः—नीयते ग्राममजा। ह्रियते कुम्भो ग्रामम्। कृष्यते ग्राम शाखा। उह्यते भारो ग्रामम्। णिजन्तानामाहारबोधशब्दार्थानां तु निजेच्छया—भोजयत्यतिथिमोदनम्, भोज्यतेऽतिथिरोदनम्, भोज्यतेऽतिथिमोदन इति वा। बोधयति शिष्यं धर्मम्, बोध्यते शिष्यो धर्मम्, बोध्यते शिष्यं धर्म इति वा। पाठयति शिष्यं ग्रन्थम्, पाठयते शिष्यो ग्रन्थम्, पाठयते शिष्यं ग्रन्थ इति वा। गत्यर्थादीनां तु णिजन्तानां प्रधानकर्मण्येव—गमयति मैत्रं ग्रामम्। गम्यते गमितो गम्यो वा मैत्रो ग्रामं चैत्रेण। आसयति मासं मैत्रम्। आस्यते मास मैत्रश्चैत्रेण। हारयति भारं भृत्यं भृत्येन वा। हार्यते भारो भृत्यं भृत्येन वा। कारयति कटं चैत्रं चैत्रेण वा। कार्यते कटश्चैत्रं चैत्रेण वा। अभिवादयते गुरु शिष्यं शिष्येण वा। अभिवाद्यते गुरुः शिष्यं शिष्येण वा। दर्शयते राजानं भृत्यान् भृत्यैर्वा। दर्श्यते राजा भृत्यान् भृत्यैर्वा। अन्ये त्वप्रधानेऽपीच्छन्ति। सर्वत्र चोक्ते कर्मणि द्वितीया न भवतीति वक्ष्यते। कर्तुरिति किम्? माषेष्वश्वं बध्नाति। अत्राऽश्वेन कर्मणा भक्षणक्रियया स्पर्शनक्रियया वा माषाणा व्याप्यानां कर्मसंज्ञा मा भूत्। वीति किम्? पयसा ओदनं भुङ्क्ते। अत्र साधनस्य मा भूत्। कर्मसंज्ञाप्रयोजनं तु **'कर्मणि द्वितीया'** [२/४/४७] इत्यादि।

४. स्मृत्यर्थदयेशां वा।

व्याप्यमित्यनुवर्तते। स्मृत्यर्थ, दय्, ईश्—इत्येतेषां व्याप्यं कर्मसंज्ञं वा भवति। पक्षे षष्ठी। मातरं स्मरति, मातु स्मरति। माता स्मर्यते, मातुः स्मर्यते। माता स्मर्तव्या, मातुः स्मर्तव्यम्। माता स्मृता, मातुः स्मृतम्। माता सुस्मरा, मातुः सुस्मरम्। माता स्मृता पुत्रेण, मातु स्मृतः पुत्र.। एव मातरमध्येति, मातुरध्येति। मातरं ध्यायति, मातुर्ध्यायति। मातरमुत्कण्ठते, मातुरुत्कण्ठते इत्यादि। सर्पिर्दयते, सर्पिषो दयते। लोकानीष्टे, लोकानामीष्टे। व्याप्यमिति किम्? मातुर्गुणैः स्मरति। ननु कर्माऽविवक्षाया पक्षे माषाणामश्नीयादित्यादिवत् शेषषष्ठी सिद्धैव तत् किमनेन? सत्यम्, किंतु **'षष्ठ्यत्नाच्छेषे'** [३/१/६३] इत्ययत्नजे शेषे षष्ठीसमासो वक्ष्यते, ततो मातुः स्मृतमित्यादौ समासो मा भूदित्यनेन प्रकारेण यत्नाच्छेषो विधीयते नियमार्थं च। तेनैषां धातूनां कर्मैव शेषरूपेण विवक्ष्यते न कारकान्तरं, तेन मात्रा स्मृतं, मनसा स्मृतमित्यादौ कर्तृसाधनयोः शेषविवक्षाऽभावात् षष्ठी न भवति।

५. कृञः प्रतियत्ने।

पुनर्यत्न—प्रतियत्न। सतो गुणाधानायाऽपायपरिहाराय वा समीहा। प्रतियत्ने गम्ये करोतेर्व्याप्यं कर्मसंज्ञं वा भवति। एधोदकमुपस्कुरुते, एधोदकस्योपस्कुरुते। शस्त्रपत्रमुपस्कुरुते, शस्त्रपत्रस्योपस्कुरुते। प्रतियत्न इति किम्? कटं करोति। व्याप्यमिति किम्? एधोदकस्योपस्कुरुते बुद्धया। अत्र साधनस्य मा भूत्।

६. रुजार्थानां भावकर्तृकाणामज्वरिसंताप्योः।

भावकर्तृकाणा रुजार्थानां धातूनां ज्वरिसंतापिवर्जितानां व्याप्यं कर्मसंज्ञं वा भवति। चौरस्य चौरं वा रुजति रोग.। अपथ्याशिनां रुज्यते रोगेण। अपथ्याशिनो रुज्यन्ते रोगेण। चौरस्य चौरं वा आमयति रोगः। चौरस्य चौरं वा व्यथयति रोगः। चौरस्य चौरं वा पीडयति रोगः। रुजार्थानामिति किम्? एति जीवन्तमानन्दः। भावकर्तृकाणामिति किम्? मैत्र रुजति श्लेष्मा। अत्र श्लेष्मा द्रव्य, न भाव। अज्वरिसंताप्योरिति किम्? चौरं ज्वरयति ज्वरः। चौरं संतापयति ताप। रोगो, व्याधिरामय., शिरोऽर्त्तिरित्यादयो भावरूपा. कर्तार इति।

७. जासनाटक्राथपिषां हिंसायाम्।

एषां हिंसायां वर्तमानानां व्याप्यं कर्मसंज्ञं वा भवति। ज्ञस-पिस-जमु-बर्हण्—हिंसायाम्, जसुण्—ताडने इति चुरादौ पठ्यते। तयोरिदं ग्रहणं, न तु जसुच्—मोक्षणे इत्यस्य दैवादिकस्य तस्याऽहिंसार्थत्वात्। चौरस्य चौरं वा उज्जासयति। चौरस्य चौरं वा उन्नाटयति। अयमपि नटण् अवस्यन्दने इति चुरादिः, न तु णट नृत्ताविति भ्वादिः। एवं क्राथिर्घटादिः। चौरस्योत्क्राथयति, चौरमुत्क्राथयति। चौरस्य पिनष्टि, चौरं पिनष्टि। जासनाटक्राथानामाकारोपधनिर्देशाद्यत्राकारश्रुतिस्तत्रैव यथा स्यादिति तेनेह न—चौरमुदजीजसत्, चौरमनीनटत्, चौरमुदचिक्रथत्। आकारोपधनिर्देशादेव

क्राथे: कर्मसंज्ञाप्रतिषेधपक्षे ह्रस्वत्वाऽभाव.। कर्मत्वे तु ह्रस्वत्वमेव। हिंसायामिति किम् ? चौरं बन्धनाज्जासयति—मोचयतीत्यर्थ.। नटं नाटयति—नर्तयतीत्यर्थ.। पूर्वेणैव सिद्धेऽभावकर्तृकार्थं वचनम्।

८. निप्रेभ्यो हनः।

हिंसायामित्यनुवर्तते। निप्राभ्यां परस्य हिंसायां वर्तमानस्य हन्तेर्व्याप्यं कर्मसंज्ञं वा भवति। सूत्रे बहुवचनं समस्तव्यस्तविपर्यस्तसंग्रहार्थम्। चौरस्य चौरं वा निप्रहन्ति। चौरस्य चौरं वा निहन्ति। चौरस्य चौरं वा प्रहन्ति। चौरस्य चौरं वा प्रणिहन्ति। निप्रेभ्य इति किम् ? चौरं हन्ति। हिंसायामिति किम् ? रागादीन् निहन्ति।

९. आशिषि नाथः।

आशिष्यर्थे वर्तमानस्य नाथतेर्व्याप्यं कर्मसंज्ञं वा भवति। सर्पिषः सर्पिर्वा नाथते—सर्पिर्मे भूयादित्याशास्ते इत्यर्थ.। सर्पिषः सर्पिर्वा नाथमानः। सर्पिषः सर्पिर्वा नाथ्यते। आशिषीति किम् ? पुत्रमुपनाथति पाठाय—उपयाचते इत्यर्थ.।

१०. व्यवहृपणोर्व्यवहारद्यूतपणे।

व्यवहार:—क्रयविक्रयोर्थ.। द्यूतपणः—द्यूतजेयम्। व्यवपूर्वस्य हरतेः पणतेश्च व्याप्यं कर्मसंज्ञं वा भवति व्यवहार, द्यूतपण—इत्येतयोरर्थयोः। शतस्य शतं वा व्यवहरति, सहस्रस्य सहस्रं वा व्यवहरति—व्यवहारे द्यूतपणत्वे वा तद्विनियुङ्क्ते इत्यर्थः। एवं दशानां दश वा पणायति। शतस्य शतं वा पणायति। व्यवहारद्यूतपण इति किम् ? शलाकां व्यवहरति—विक्षिपतीत्यर्थः। मुनीन् पणायति—स्तौतीत्यर्थ.। सूत्रे वचनभेदो यथासंख्यनिवृत्त्यर्थ.।

११. उपसर्गाद्दिवः।

उपसर्गात्परस्य दिवः व्याप्यं कर्मसंज्ञं वा भवति व्यवहार, द्यूतपण—इत्येतयोरर्थयोः। शतस्य शतं वा प्रदीव्यति। शतस्य शतं वा प्रदीव्यते। शतस्य शतं वा प्रद्यूतम्। शतस्य शतं वा प्रदेवितव्यम्। शतस्य शतं वा सुप्रदेवम्। व्यवहारद्यूतपण इति किम् ? शलाका प्रतिदीव्यति—अपहरतीत्यर्थ.। उपसर्गादिति किम् ? शतस्य दीव्यति।

१२. न।

व्यवहार, द्यूतपण—इत्येतयोरर्थयोर्दिवो व्याप्यं कर्मसंज्ञं न भवति। पूर्वसूत्रे उपसर्गपूर्वस्य विकल्पविधानादनुपसर्गस्यैवाय प्रतिषेध.। शतस्य दीव्यति। सहस्रस्य दीव्यति। निषिद्धे च कर्मणि षष्ठ्येव भवति। शतस्य दीव्यते, शतस्य द्यूतम्, शतस्य देवितव्यम्, शतस्य सुदेवम्—इत्यादौ भावे आत्मनेपदक्तकृत्यखल सिद्धा.। शतस्य द्यूतो मैत्र. इत्यत्र च कर्तरि क्तः। व्यवहारद्यूतपणयोरिति किम् ? जिनं दीव्यति—स्तौतीत्यर्थ.। भूमिं दीव्यति—सधिना विजिगीषते इत्यर्थः। संधिपणोऽत्र न द्यूतपण.।

१३. साधनं च।

दिवः साधनं कर्मसंज्ञं चकारात्साधनसंज्ञं च भवति। कर्मसाधनसंज्ञे युगपद् भजतीत्यर्थः। अक्षान् दीव्यति, अक्षाणां देवनम्, अक्षा दीव्यन्ते, अक्षा देवितव्या., अक्षा. सुदेवाः, अक्षदेव., अक्षा द्यूताश्चैत्रेण—एषु कर्मत्वे द्वितीयाषष्ठ्यात्मनेपदतव्यखलञ्क्तप्रत्ययास्तन्निमित्ता सिद्धा। अक्षैर्दीव्यति, अक्षैर्देवनम्, अक्षैर्दीव्यते, अक्षैर्देवितव्यम्, अक्षैः सुदेवं मैत्रेण, अक्षैर्द्यूतं चैत्रेण, अक्षा देवनाः—एषु साधनत्वे तृतीयानटौ भावे आत्मनेपदादयश्च सिद्धा.। साधनं वेत्येव सिद्धे चकार. संज्ञाद्वयसमावेशार्थं, तेन अक्षैर्देवयते मैत्रश्चैत्रेणेत्यत्र साधनत्वात् तृतीया, कर्मत्वाच्च **'गतिबोधा···'** [२/४/२१] इति सूत्रेण नित्याऽकर्मलक्षणमणिन्कर्तुः कर्मत्वं न, देवयतेश्च **'अणिग्यऽकर्मकप्राणिकर्तृकात्···'** [३/३/१०२] इति अकर्मलक्षणं परस्मैपदमपि न भवति। दिव इति किम् ? दात्रेण लुनाति। साधनमिति किम् ? गृहे दीव्यति।

१४. अधेः शीङ्स्थासामाधारः ।

अधे. परेषां शीङ्, स्था, आस्—इत्येतेषामाधार· कर्मसंज्ञो भवति। ग्राममधिशेते । ग्रामस्याऽधिशयनम् । ग्रामोऽधिशय्यते । ग्रामोऽधिशयित. । एवं गुरुकुलमधितिष्ठति शिष्यः । पर्वतमध्यास्ते मर्कट. । अधेरिति किम् ? शयने शेते, गृहे तिष्ठति, कटे आस्ते । आधार इति किम् ? ग्रामोधिशयितो मैत्रेण। पौरुषेणाधितिष्ठति । अत्र कर्तृसाधने न भवत. । अकर्मका अपि हि धातव. सोपसर्गाः सकर्मका भवन्तीति सिद्ध सकर्मकत्वम् । आधारबाधनार्थं तु वचनम् ।

१५. अन्वध्याङ्भ्यो वसः ।

अनु, अधि, आङ्—इत्येवपूर्वस्य वसतेराधारः कर्मसंज्ञो भवति । ग्राममनुवसति । ग्रामस्यानुवसनम् । ग्राम अनूष्यते। ग्राममनूषितः। एवं ग्राममधिवसति। ग्राममावसति सेना। अन्वध्याङ्भ्य इति किम् ? ग्रामे निवसति। **अदादनवाद्योरनदादेरेव ग्रहणमिति** वस्तेर्न भवति ।

१६. उपान्निवासे ।

उपात्परस्य वसतेराधार· कर्मसंज्ञो भवति निवासेऽर्थे। ग्राममुपवसति—ग्रामे निवासं करोतीत्यर्थ । ग्रामस्योपवसनम् । ग्राम उपोष्यते । ग्राममुपोषित । निवासे इति किम् ? ग्रामे उपवसति—उपवासं करोतीत्यर्थ. ।

१७. वाभिनिविशः ।

अभिनिनोपसर्गसमुदायेन विशिष्टस्य विशतेराधार कर्मसंज्ञो वा भवति। ग्राममभिनिविशते। पर्वतमभिनिविशते । ग्रामोऽभिनिविश्यते । ग्रामोऽभिनिविष्टः । व्यवस्थितविभाषेयं[1], तेन क्वचित् कर्मसंज्ञैव क्वचिदाधारसंज्ञैव भवति। कल्याणेऽभिनिविशते । पापेऽभिनिविशते। या या संज्ञा यस्मिन् यस्मिन् संज्ञिन्यभिनिविशते। एतेषां शब्दानामेतेष्वर्थेष्वभिनिविष्टानाम् । अर्थेऽभिनिविष्ट· ।

१८. कालाऽध्वभावदेशमऽकर्म चाऽकर्मणाम् ।

काल —मुहूर्त्तादि ।अध्वा—गन्तव्य क्षेत्र क्रोशादि । भाव [2]—क्रिया गोदोहादिः । देशः—जनपदग्रामनदीपर्वतादि[3] । अकर्मणा धातूनां योगे कालादिराधार· कर्मसंज्ञो वा भवति अकर्म च—यत्राऽपि पक्षे कर्मसंज्ञा तत्राऽकर्मसंज्ञाऽपि वा भवतीत्यर्थ. । कालः—मासमास्ते, मास आस्यते। संवत्सरं स्वपिति, सवत्सर सुप्यते। दिवसं शेते, दिवस शय्यते। अध्वा—क्रोशं स्वपिति, क्रोश सुप्यते । योजनमास्ते, योजनमास्यते । भावः—गोदोहमास्ते[4], गोदोह आस्यते । ओदनपाक शेते, ओदनपाक शय्यते। देश —कुरून् आस्ते, कुरव आस्यन्ते। ग्राम वसति, ग्राम उष्यते। अविवक्षितकर्मणः सकर्मका अप्यकर्मका —मास पचति, मास पच्यते। क्रोशमधीते, क्रोशोऽधीयते। ओदनपाकं पठति, ओदनपाक पठ्यते। कुरून् पठति, कुरव. पठ्यन्ते। पक्षे—रात्रौ सुप्यते। रात्रौ नृत्त च द्रक्ष्यमि। क्रोशे सुप्यते। गोदोहे आस्ते। ओदनपाके स्वपिति। पञ्चालेषु वसति। ग्रामे वसति। ग्रामे वास । ग्रामे वासी। तथा रात्रावधीतम्। दिवसे भुक्तम्। कालाध्वभावदेशमिति किम् ? प्रासादे आस्ते। शय्यायां शेते । अकर्म चेति किम् ? मासमास्यते, क्रोशं सुप्यते, गोदोहमासित., इदं[5] गोदोहमासितम्, गोदोहमास्यते, कुरून् सुप्यते—एषु **'सकर्मकाऽकर्मकाभ्यां कर्मभावयोः'** [३/३/१८], **'गत्यर्थाऽकर्मकपिबभुजेः'** [५/१/११], **'आहारार्थाच्चाधारे'** [५/१/१२] इति भावे कर्तर्याधारे च यथायथमात्मनेपदक्तौ सिद्धौ। अकर्मणामिति किम् ? संवत्सरे

---

१. नात्र वाशब्दो विकल्पार्थो येन ममकक्षनया द्वितीयासप्तम्यौ, किं तर्हि प्रयोगव्यवस्थयेति ?

२ क्रिया घञादिवाच्या सिद्धताख्या न तु साध्यमानेत्यर्थ. ।

३ आदिशब्दात् खेटकर्वटमडबादि गृह्यते ।

४. अत्र सामीप्यक आधार. । यदा तु गोदोहविशिष्ट. कालो विवक्ष्यते तदा नैमित्तिकोऽपि । एवमोदनपाक इत्यत्रापि ।

५ अत्र बाहुलकात् षष्ठीप्राप्ति प्रति न कर्मता, तेन **'कर्तृकर्मणोः कृति'** [२/४/८६] इति न षष्ठी। इद सक्तूनां पीतमितिवत् अत्राधारे क्तः प्रत्ययः ।

दशवैकालिकं पठति । कथं पचत्योदनं[1] मासम्, भक्षयति धानाः क्रोशम्, पिबति पयो गोदोहम्, भजति सुखं कुरून् ? उच्यते—इह द्विकर्मकत्वान्मासादिकं कर्मैव ।

१९. दुहाद्यर्थानामविवक्षितम् ।

दुहादीनां तदर्थानां च धातूनां योगे अविवक्षितं कारकं संबन्धो वा कर्मसंज्ञं भवति । गां दोग्धि पयः, गां स्रावयति पयः, गां क्षारयति पयः । तण्डुलानोदनं पचति । पौरवं गां याचते, पौरवं[2] गां भिक्षते, चैत्रं शतं मृगयते, चैत्रं शतं प्रार्थयते । एवं गामवरुणद्धि व्रजम् । गर्गान् शतं दण्डयति । ग्रहेर्दण्डार्थत्वात्—चैत्रं शतं गृह्णाति । छात्रं पन्थानं पृच्छति । अमृतमम्बुनिधिं मथ्नाति । शिष्यं धर्मं ब्रूते, माणवकं धर्मं भाषते, अभिधत्ते, वक्ति वा । वृक्षमवचिनोति फलानि । गर्गान् शतं जयति । शिष्यं धर्ममनुशास्ति । चैत्रं शतं मुष्णाति । अजां ग्रामं नयति । ग्रामं शाखां कर्षति । ग्रामं भारं वहति । ग्रामं भारं हरति । नयनार्थत्वाद् वहनार्थो विलक्षण इति उभयोरपि नीवह्योः पाठः । उक्तं च —

> दुहिः पचिर्याचिरुधी च दण्डिः,
> पृच्छिर्मथिब्रूचिजिशास्मुषश्च ।
> नीकृष्वहिहृ न्निति चाप्यमीषा-
> मर्थे गताः स्युर्युगकर्मयुक्ताः ॥

२०. अविवक्षितकर्मणामञिन्कर्ता ञौ वा ।

अविवक्षितकर्मणामञिन्नवस्थायां यः कर्ता स ञौ—ञिनि सति कर्मसंज्ञो वा भवति । पचति चैत्रः, पाचयति मैत्रः चैत्रं चैत्रेण वा । लिखति मैत्रः, लेखयति चैत्रः मैत्रं मैत्रेण वा । गत्यर्थादीनां तु परत्वान्नित्य एव विधिः । गच्छति चैत्रः, गमयति चैत्रं मैत्रः । किं करोतीति व्यापारमात्रविवक्षायां सकर्मका अविवक्षितकर्माणो भवन्ति । अविवक्षित-कर्मणामिति किम् ? चैत्रः ओदनं पचति, मैत्रः चैत्रेण ओदनं पाचयति ।

२१. गतिबोधाहारशब्दार्थाऽकर्मणाम् ।

गतिः—देशान्तरप्राप्तिः । बोधः—ज्ञानमात्रं तद्विशेषश्च । गत्यर्थानां बोधार्थानामाहारार्थानां शब्दार्थाना-मकर्मणां च धातूनामञिन्नवस्थायां यः कर्ता स ञौ सति कर्मसंज्ञो नित्यं भवति । गत्यर्थ—गच्छति मैत्रो ग्रामम्, गमयति मैत्रं ग्रामम् । याति मैत्रो ग्रामम्, यापयति मैत्रं ग्रामम् । देशान्तरप्राप्तेरन्यत्र न—चैत्रः मैत्रेण स्त्रियं गमयति । भजनार्थोऽत्र गमिः । सामान्यबोधार्थ—बुध्यते शिष्यो धर्मम्, बोधयति गुरुः शिष्यं धर्मम् । जानाति शिष्यो धर्मम्, ज्ञापयति गुरुः शिष्यं धर्मम् । एवमुपलम्भयति, अवगमयतीत्यादि । विशेषबोधार्थ—पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणं वणिक् । एवं घ्रापयति मैत्रमुत्पलम् । स्पर्शयति मैत्रं वस्त्रम् । श्रावयति शब्दं चैत्रं मैत्रः । श्रावयति शिष्यं धर्मम् । स्मारयति शिष्यं धर्मम् । अध्यापयति शिष्यं शास्त्रम् । अन्ये तु बोधविशेषार्थस्य दृशेरेवेच्छन्ति नान्येषाम् । तन्मते जिघ्रत्युत्पलं चैत्रः, घ्रापयत्युत्पलं चैत्रेण मैत्रः । एवं स्पर्शयति चैत्रेण वस्त्रं, श्रावयति धर्मं शिष्येणेत्यादौ प्रयोज्यकर्तरि तृतीयैव भवति । आहारार्थ—भुङ्क्ते बटुरोदनम्, भोजयति बटुमोदनम् । अश्नाति बटुर्भक्तम्, आशयति बटुं भक्तम् । शब्दार्थ—जल्पति मैत्रो द्रव्यम्, जल्पयति मैत्रं द्रव्यम् । एवमालापयति मित्रं मैत्रम् । सभाषयति मैत्रं भार्याम् । अध्यापयति शास्त्रं शिष्यम् । अकर्मक—आस्ते मैत्रः, आसयति मैत्रं चैत्रः । शेते मैत्रः, शाययति मैत्रं चैत्रः । पूर्वसूत्रे अविवक्षितकर्मवचनादिह नित्याऽकर्मका एव गृह्यन्ते । गत्यर्थादीनामिति किम् ? चैत्र ओदनं पचति, मैत्रश्चैत्रेण ओदनं पाचयति । अञिन्कर्तेति किम् ? गमयति चैत्रो मैत्रं ग्रामम्, तमपरः प्रयुङ्क्ते—गमयति चैत्रेण मैत्रं ग्रामं देवदत्तः । प्रेषणाऽध्येषणादिना प्रयोजकव्यापारेण ञिन्नन्तवाच्येनाऽञिन्कर्तुर्व्याप्यत्वात् कर्मसंज्ञा सिद्धैव नियमार्थं तु वचनम् । प्रयोजकव्यापारेण व्याप्यमानस्य एषामेव प्रयोज्यस्य कर्तुः कर्मसंज्ञा भवति, अन्येषां तु कर्तृत्वमेव ।

---

१. एषां धातूनां स्वभावेन द्विकर्मकत्वं, अथवा प्राप्य इत्यस्याऽध्याहारः । मासं प्राप्येत्यादि ।

२. अस्ति राजा पुरुर्नाम । तदपत्यं—पौरवः ।

२२. वहेः प्रवेयः।

प्रवीयते प्राजतिक्रियया व्याप्यते य स प्रवेयो बलीवर्दादिः । वहेरणिनि यः प्रवेयः कर्ता स णौ कर्मसंज्ञो भवति। वहन्ति बलीवर्दा भारम्, तान् प्रयुङ्क्ते नियोक्ता—वाहयति भारं बलीवर्दान्। वाहयिता भारस्य बलीवर्दान् । वाहयिता बलीवर्दानां भारम् । वाह्यन्ते भारं बलीवर्दाः । प्रवेय इति किम् ? वाहयति भारं चैत्रेण । नात्र चैत्रो बलीवर्दादिवत् प्रवेयः। गत्यर्थत्वादेव सिद्धे नियमार्थं वचनम् ।

२३. भक्षेर्हिंसायाम्।

भक्षेः स्वार्थिकण्यन्तस्य हिंसार्थस्य अणिनि यः कर्ता स णौ कर्मसंज्ञो भवति। भक्षयन्ति सस्यं बलीवर्दाः, तान् प्रयुङ्क्ते—भक्षयति सस्यं बलीवर्दान् मैत्रः । उक्ते च कर्मणि—भक्ष्यन्ते यवं बलीवर्दाः, भक्ष्यते यवो बलीवर्दान् मैत्रेणेति वा। वनस्पतीनां प्रसवप्ररोहवृद्ध्यादिमत्त्वेन चेतनत्वात् तद्विशेषस्य सस्यस्य प्राणवियोगस्तद्भक्षणात् स्वाम्युपघातो वाऽत्र हिंसा। हिंसायामिति किम् ? भक्षयति मोदकं पुत्रः, तं प्रयुङ्क्ते—भक्षयति मोदकं पुत्रेण । आहारार्थत्वात्प्राप्ते नियमार्थं वचनम्।

२४. हृक्रोर्वा।

हरतेः करोतेश्चाऽणिन्कर्ता स णौ कर्मसंज्ञो वा भवति। प्राप्ते चाऽप्राप्ते चाऽयं विकल्पः । प्राप्ते—विहरति देशमाचार्य, विहारयति देशमाचार्यमाचार्येण वा। एवमाहारयत्योदनं बालकं बालकेन वा। विकुरुते स्वरं क्रोष्टा, विकारयति स्वरं क्रोष्टारं क्रोष्ट्रा वा। विकुर्वते सैन्धवा, विकारयति सैन्धवान् सैन्धवैर्वा। अत्र गत्यर्थाहारार्थ-शब्दार्थाऽकर्मकत्वेन यथासङ्ख्यं प्राप्तिः । अप्राप्ते—हरति द्रव्यं मैत्रः, हारयति द्रव्यं मैत्रं मैत्रेण वा। करोति कटं चैत्रः, कारयति कटं चैत्रं चैत्रेण वा। अत्र हरतिश्चौर्यार्थो न प्रापणार्थ इत्यप्राप्तिः ।

२५. दृश्यभिवदोरात्मने।

वेत्यनुवर्तते। दृशेरभिपूर्वस्य वदतेश्चात्मनेपदविषये अणिन्कर्ता स णौ कर्मसंज्ञो वा भवति। साधुः पूज्यं पश्यति, तं पूज्य एवाऽनुकूलाचरणेन प्रयुङ्क्ते—दर्शयते पूज्य साधुं साधुना वा। अभिवदति गुरुं शिष्यः, अभिवादयते गुरुः शिष्यं शिष्येण वा। अथवा अभिवदति गुरुं शिष्यः, तं मैत्रः प्रयुङ्क्ते—अभिवादयते गुरुं शिष्यं शिष्येण वा मैत्रः। आत्मने इति किम् ? पश्यति रूपतर्कः कार्षापणम्, दर्शयति रूपतर्कं कार्षापणम्। अभिवदति गुरुं शिष्यः, अभिवादयति गुरुं शिष्येण। दृशेर्बोधार्थत्वेन नित्यं प्राप्ते अभिवदेस्तु नित्यमप्राप्ते विकल्पः । यदा तु अभिवदिर्न प्रणामार्थः, किंतु शब्दार्थस्तदा अभिवादयते गुरुं शिष्यं मैत्रः इति नित्यं प्राप्ते विभाषेति।

२६. न नीखाद्यदिह्वाशब्दायक्रन्दाम्।

नी, खादि, अदि, ह्वेञ्, शब्दाय, क्रन्द—एषां धातूनामणिनि यः कर्ता स णौ कर्मसंज्ञो न भवति। भृत्यः भारं नयति, राजा भृत्येन भारं नाययति। एवं खादयति अन्नं मैत्रेण। आदयति अपूपं पुत्रेण। ह्वाययति मैत्रं चैत्रेण। शब्दाययति चैत्रं मैत्रेण। क्रन्दयति मित्रं मैत्रेण। कर्मसंज्ञाप्रतिषेधात् स्वव्यापाराश्रयं कर्तृत्वमेव। नयतेः प्रापणोपसर्जन-प्राप्यर्थत्वेन गत्यर्थत्वात् खाद्यद्योराहारार्थत्वात् ह्वाशब्दायक्रन्दां च शब्दार्थत्वात् कर्मत्वे प्राप्ते प्रतिषेधार्थं वचनम्।

२७. साधकतमं साधनम्।

क्रियासिद्धौ यत्प्रकृष्टोपकारकत्वेनाऽव्यवधानेन विवक्षितं तत्साधकतमं कारकं साधनसंज्ञं भवति। काष्ठैः स्थाल्यां पचति। दात्रेण लुनाति। दानेन भोगानाप्नोति। अस्य पाकादिक्रियासु ज्वलनादयोऽवान्तरव्यापाराः। विवक्षया च प्रकृष्टोपकारकत्वात्साधकतमत्वम्। तमग्रहणमपादानादिसंज्ञाविधौ तरतमयोगो नाऽस्तीति ज्ञापनार्थं, तेन कुसूलात् पचति, गङ्गायां घोषः प्रतिवसतीति व्यवहितोपचरितयोरपि अपादानत्वमाधारत्वं च भवति। अस्य च कारकान्तरापेक्षया

प्रकर्षो न स्वकक्षायाम्। तेनैकस्यां क्रियायामनेकमपि साधनं भवति। नावा नदीस्रोतसा व्रजति। रथेन पथा दीपिकया याति। सूपेन सर्पिषा लवणेन पाणिनौदनं भुङ्क्ते। साधन संज्ञाप्रयोजन तु **'कर्तृसाधनहेत्वित्थंभूतलक्षणेषु'** [२/४/५८] इत्यादि।

२८. समो दामो दानपात्रमधर्म्ये आत्मने च।

अधर्म्य—अशिष्टव्यवहार। संपूर्वकस्य दामो दानपात्रमधर्म्यविषये साधनसंज्ञं भवति, तत्संनियोगे दाम आत्मनेपदं च भवति। दास्या संप्रयच्छते कामुक.। वृषल्या संप्रयच्छते कामुक। कामुक सन् द्रव्यं दास्यै ददातीत्यर्थ.। इह सपूर्वस्य दाम प्रशब्दव्यवधानमन्तरेण प्रयोगाभावात् तद्व्यवधानेऽपि भवति। सम इति किम्? दास्यै प्रयच्छति कामुक.। दाम इति किम्? दास्यै संददाति कामुक। अधर्म्य इति किम्? पत्न्यै संप्रयच्छति। साधनाऽभावे आत्मनेपदमपि न।

२९. प्रकृत्यादय आख्यायाम्।

प्रकृत्यादय शब्दा. साधनसंज्ञका भवन्ति, यदैतैः काचिदाख्या निर्दिश्येत। प्रकृत्या चारु, प्रायेणाऽलभ्य, गोत्रेण गार्ग्यः, नाम्ना जिनदत्तः, जात्या क्षत्रियः, जनुषान्धः, पुंसानुजः, आत्मना षष्ठ, स्वभावेनोदारः, वर्णेन गौर, बाहुभ्यां दृढः, निसर्गेण प्राज्ञ, स्पर्शेन शीत., वचनेन मृदु, रसेन स्वादुः, मुखेन सुरूपः, उरसा विशाल। आकृतिगणोऽयम्। आख्या प्रसिद्धिस्तेनेह न—जातौ मुख्य। कृतभवत्यादिक्रियाध्याहारेण कर्तृसाधनयोस्तृतीया सिद्धैव संबन्धषष्ठीबाधनार्थ वचनम्।

३०. न्यक्षादयः क्रियाविशेषणं वा।

न्यक्षादिक्रियाविशेषणं साधनसंज्ञं वा भवति। न्यक्षं न्यक्षेण वा याति। कात्स्न्र्यं कात्स्न्र्येन वा करोति। साकल्यं साकल्येन वा गच्छति। सुखं सुखेन वा तिष्ठति। दु.खं दु.खेन वा याति। कष्टं कष्टेन वा क्रामति। अनायासं अनायासेन वा करोति। समं समेन वा तिष्ठति। विषम विषमेन वा धावति। आधारविवक्षाया तु सप्तम्येव - समे विषमे वा धावति। आदिशब्दाद्यथादर्शनं विज्ञेयम्।

३१. संज्ञोऽस्मृतौ कर्म।

अस्मृतौ गम्यमानाया सपूर्वस्य जानाते. कर्म साधनसंज्ञ वा भवति। पितरं पित्रा वा संजानीते। पितु संज्ञाता— इह तु कृद्योगे परत्वात्षष्ठ्येव। संग्रहणान्नेह—मातरं जानाति। ज्ञग्रहणान्नेह—मातरं संवेत्ति। अस्मृताविति किम्? मातरं संजानाति, मातु संजानाति—स्मरतीत्यर्थ.। कर्म इति किम्? मातर स्वरेण संजानीते। अत्र साधने विकल्पो न भवति।

३२. कर्मक्रियाऽभिप्रेयो[1] दानपात्रम्।

कर्मणा क्रियया वा यमभिप्रेयते श्रद्धोपकारकीर्त्यादिकामनया यमभिसंबध्नाति स कर्मक्रियाभिप्रेय कारकं दानपात्रसंज्ञं भवति। कर्माभिप्रेयस्तावत् - देवाय बलिं ददाति। द्विजाय गामुत्सृजति। याचकाय धन प्रयच्छति। शिष्याय धर्ममुपदिशति। राज्ञे कार्यमावेदयति। क्रियाभिप्रेयस्तावत्—पत्ये शेते। युद्धाय संनह्यते। देवेभ्यो नमति। प्रणम्य शितिकण्ठाय। निवेद्यता महाराजाय सुग्रीवाय। अभिरभिमतार्थस्तत श्रद्धादीना ग्रहणं, तेनाभिग्रहणादिह न—घ्नत. पृष्ठं ददाति। रजकस्य वस्त्रं ददाति। राज्ञो दण्डं ददाति। ननु कथं छात्राय चपेटा ददातीति? उच्यते—अत्राप्युपकार एव, गुरोस्ताडनया छात्रो विद्यां ग्रहीष्यतीति। यद्यप्यत्र दानपात्र कर्म न प्राप्नोति, किंतु कर्मजनितं फलम्। ननु कथं वाताय चक्षुर्ददाति इति? उच्यते—अत्र चक्षुर्दाने नाभिमतत्वं तथापि अभिमतानुकरणम्। दानपात्रसंज्ञाप्रयोजन तु **'दानपात्रे चतुर्थी'** [२/४/६३] इत्यादि।

---

१. ईङ्च्—**'स्वराद्य एकधातः'** [५/१/२६] इति ये गुणे च **'एवोतोऽपसर्गस्य लोपः'** [१/२/२६] इत्यल्लोपे अभिप्रेयः। कर्मक्रियाभ्यामभिप्रेयः **'कर्तृसाधने कृता'** [३/१/५२] इति समासः। वृत्तौ तु यमभिप्रेयते इत्यर्थकथनमेव।

३३. रुच्यर्थानां प्रीयमाणः ।

रुचिः—अभिलाषः। रुचिरर्थो येषां ते रुच्यर्थाः। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योऽर्थस्तत्कारकं दानपात्रसंज्ञं भवति। देवदत्ताय रोचते मोदकः। जिनदासाय रोचते जिनभक्तिः। यज्ञदत्ताय स्वदते दधि। तस्याऽभिलाषमुत्पादयतीत्यर्थः। ननु कथं तत्र न रोचतेऽस्माकम्, रोचते मम घृतं सह मुद्गैः शालयश्च? संबन्धमात्रविवक्षायां षष्ठ्येव भविष्यति। प्रीयमाणसबन्धादभिलाषकरणार्थस्य रुचेर्ग्रहणं, तेनेह न—आदित्यो रोचते दिक्षु। प्रीयमाण इति किम्? मोदको रोचते पथि। इह पथ अप्रीयमाणत्वान्न दानपात्रत्वम्।

३४. श्लाघह्नुस्थाशपां ज्ञीप्स्यमानः ।

ज्ञीप्स्यमानो ज्ञापयितुमिष्यमाणः। श्लाघ, ह्नु, स्था, शप—इत्येतेषां ज्ञीप्स्यमानो योऽर्थस्तत्कारकं दानपात्रसंज्ञं भवति। मैत्राय श्लाघते। मैत्राय ह्नुते। मैत्राय तिष्ठते[1]। मैत्राय शपते[2]। श्लाघाह्नवस्थानशपथान् कुर्वाणः मैत्रं ज्ञापयतीत्यर्थः। ज्ञीप्स्यमान इति किम्? मैत्राय श्लाघते पथि। इह ज्ञीप्स्यमानो मैत्रो न तु पन्थाः।

३५. धारेरुत्तमर्णः ।

उत्तमर्णो धनिकः। धारयतेः प्रयोगे उत्तमर्णो योऽर्थस्तत्कारकं दानपात्रसंज्ञं भवति। चैत्राय शतं धारयति मैत्रः। षष्ठ्यर्थे चतुर्थी। इह चैत्रः उत्तमर्णः, मैत्रोऽधमर्णः। **'अधमर्णो ग्राहकः स्यादुत्तमर्णस्तु दायकः'** इति **'हैमः'** [अभि० ३/५४६]। उत्तमर्ण इति किम्? चैत्राय शतं धारयति ग्रामे। अत्र ग्रामे नोत्तमर्णत्वम्।

३६. स्पृहेरीप्सितो वा ।

स्पृहयतेर्धातोरीप्सितो योऽर्थस्तत्कारकं दानपात्रसंज्ञं वा भवति। मुनये मुनिं वा स्पृहयति। पुष्पेभ्यः पुष्पाणि वा स्पृहयति। ईप्सित इति किम्? पुष्पेभ्यः पुष्पाणि वा वने स्पृहयति। इह वनस्य नेप्सितत्वम्। कर्मणः स्थानेऽपि दानपात्रसंज्ञा विहिता, तेन दानपात्रपक्षे धातोरकर्मकत्वं सिद्धम्। तेन पुष्पेभ्यः स्पृह्यते मैत्रेण, पुष्पेभ्यः स्पृहयितव्यम्, पुष्पेभ्यः सुस्पृहम्, पुष्पेभ्यः स्पृहितो मैत्रः—एषु भावे आत्मनेपदतव्यखल कर्तरि च क्तः सिद्धाः।

३७. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ।

क्रोधः—अमर्षः। द्रोहः—अपकारः। ईर्ष्या—परसंपत्तौ चेतसो व्यारोषः। गुणेषु दोषाविष्करणमसूया। क्रुधाद्यर्थानां धातूनां प्रयोगे यं प्रति कोपस्तत्कारकं दानपात्रसंज्ञं भवति। क्रोधस्तावत् कोप एव, द्रोहादयोऽपि कोपप्रभावा एव गृह्यन्ते। तस्मात् सामान्येनैव यं प्रति कोप इत्युक्तम्। मैत्राय क्रुध्यति, मैत्राय रुष्यति। मैत्राय द्रुह्यति, मैत्रायापकरोति। मैत्राय ईर्ष्यति, मैत्राय ईर्क्ष्यति, मैत्राय सूर्क्ष्यति। चैत्रायासूयति। यं प्रति इति किम्? मनसा क्रुध्यति। मनसा द्रुह्यति। मनसेर्ष्यति। मनसाऽसूयति। अत्र साधनस्य मा भूत्। प्रतिग्रहणं किम्? यस्मिन्निन्युच्यमाने कर्तुरपि स्यात्। मैत्रेण क्रुध्यते। कोप इति किम्? शिष्यस्य[3] कुप्यति विनयार्थम्। धनिनो[4] द्रुह्यति धनार्थी। भार्यामीर्ष्यति[5] मैनामन्योऽद्राक्षीदिति। चैत्रमसूयति लिप्सया। दानपात्रसंज्ञया कर्मसंज्ञाया बाधितत्वात् भावे आत्मनेपदादयः कर्तरि च क्तः सिद्धाः। मैत्रायेर्ष्यते, मैत्रायासूय्यते, मैत्रायेर्ष्यितव्यम्, मैत्रायासूयितव्यम्, मैत्राय दुरीर्ष्यम्, मैत्राय दुरसूयम्, मैत्राय ईर्ष्यितः चैत्रः, मैत्रायासूयितः। कथं चौरस्य द्विषन्, योऽस्मान् द्वेष्टि यं च वयं द्विष्म इति? द्विषेरप्रीत्यर्थत्वान्न भविष्यति।

---

१. **'प्रतिज्ञा स्थेय…'** [३/३/३३] इति आत्मनेपदम्। स्थानेनात्मानं ज्ञापयतीत्यर्थः।

२. **'शप उपालम्भे'** [३/३/३२] इति सूत्रेण आत्मनेपदम्। वाचा मात्रादिशरीरस्पर्शनेन नाहं जाने न मया कृतमिति मैत्रं ज्ञापयतीत्यर्थः।

३. शिष्यसंबन्धिनोऽविनयस्योपरि कोपो न तु शिष्यस्य।

४. अत्र धनस्योपरि द्रोहो न तु प्राणानाम्।

५. अन्येन अवलोक्यमानां न सहते। वृत्तौ मैनामिति तात्पर्यार्थोऽकथि।

३८. नोपसर्गात् क्रुधद्रुहो ।

उपसर्गपूर्वयोः क्रुधद्रुहोर्यं प्रति कोपस्तत्कारकं दानपात्रसञ्ज्ञं न भवति। मैत्रमभिक्रुध्यति । मैत्रमभिद्रुह्यति । क्रुधिद्रुही सोपसर्गौ सकर्मकाविति द्वितीया । उपसर्गादिति किम् ? मैत्राय क्रुध्यति । मैत्राय द्रुह्यति ।

३९. राधीक्ष्योर्यस्य विप्रश्नः ।

विविधः प्रश्नः शुभाशुभरूपः क्रियते स विप्रश्नः । राधेरीक्षेश्च योगे यस्य विप्रश्नस्तत्कारकं दानपात्रसञ्ज्ञं भवति । मैत्राय राध्यति, मैत्रायेक्षते—नैमित्तिकः पृष्टः सन् तस्य दैवं पर्यालोचयतीत्यर्थः । राधीक्ष्यर्थधातुयोगेऽपीच्छन्त्यन्ये - मैत्राय राधयति, साधयति, पश्यति, जानीते इति वा । यस्येति किम् ? मैत्रस्य शुभाशुभमीक्षते । शुभाशुभान्मा भूत् । मैत्रादपि धातुयोगाभावे न भवति । धातुयुक्तं शुभाशुभं न तु मैत्रः । विप्रश्न इति किम् ? मैत्रमीक्षते—पश्यतीत्यर्थः ।

४०. प्रत्याङ्भ्यां श्रुवः पूर्वकर्ता ।

पूर्वस्याः क्रियाया कर्ता पूर्वकर्ता। प्रत्याङ्भ्यां परस्य शृणोतेः प्रयोगे यः पूर्वकर्ता तत्कारकं दानपात्रसञ्ज्ञं भवति । प्रतिपूर्वः आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने च वर्तते, स चाऽभ्युपगमः परेण प्रयुक्तस्य सतो भवति । पूर्वं मैत्रो विद्यां याचते इति मैत्राय विद्यां प्रतिशृणोति आचार्यः । द्विजाय गामाशृणोति चैत्रः । याचितोऽयाचितो वा प्रतिजानीते इत्यर्थः । प्रत्याङ्भ्यामिति किम् ? चैत्रस्य शृणोति विद्वान् ।

४१. अनुप्रतिभ्यां गृणः ।

पूर्वकर्तेत्यनुवर्तते । अनुप्रतिपूर्वस्य गृणातेः प्रयोगे यः पूर्वकर्ता तत्कारकं दानपात्रसञ्ज्ञं भवति । आचार्याय अनुगृणाति, आचार्याय प्रतिगृणाति—आचार्योक्तमनुवदति, प्रशंसन्तं वा प्रोत्साहयतीत्यर्थः । अनुगरः, प्रतिगरः इति हि प्रशंसितुः प्रोत्साहने प्रवर्तेते । अनुप्रतिभ्यामिति किम् ? आचार्यं गृणाति—आचष्टे इत्यर्थः ।

४२. अपायेऽवधिरपादानम् ।

सावधिकं गमनमपायः[1] । तत्र यदवधिभूतमपायेनानधिष्ठितं कारकमपादानसञ्ज्ञं भवति । ग्रामादागच्छति । पर्वतादवरोहति । सार्थाद्धीनः । वृक्षात् पर्णं पतति । धावतोऽश्वात् पतितः । पततो देवदत्तात् धावत्यश्वः । मेषान्मेषोऽपसर्पति । तदेतत् त्रिविधम्—निर्दिष्टविषयं, उपात्तविषयं[2], अपेक्षितक्रियं च । यत्र धातुना अपायलक्षणो विषयो निर्दिष्टस्तन्निर्दिष्टविषयम् । यथा—ग्रामादागच्छति । यत्र तु धातुर्धात्वन्तरार्थाङ्गं[3] स्वार्थमाह तदुपात्तविषयम् । यथा—बलाहकाद् विद्योतते विद्युत् । अत्र हि निःसरणाङ्गे[4] विद्योतने विद्युतिर्वर्तते । यथा वा कुसूलात् पचति । अत्रापि आदानाङ्गे पाके पचिर्वर्तते इति । यत्र तु क्रियावाचि पदं न श्रूयते केवलं क्रिया प्रतीयते तदपेक्षितक्रियम् । यथा—साकाश्यकेभ्यः[5] पाटलिपुत्रका अभिरूपतरा इति । अपायश्च[6] कायसंसर्गपूर्वको बुद्धिसंसर्गपूर्वको वा विभाग उच्यते, तेन बुद्ध्या समीहितैकत्वान् पाटलिपुत्रकान्

---

१. अपायहेतुत्वात् गमनमप्यपायः । उपलक्षणं चेदं, तेन परमार्थतो विभागोऽपाय इति सिद्धम् ।

२. उप—समीपे धातुना धात्वन्तरस्य आत्त—स्वीकृतो विषयोऽर्थो यत्र तत् ।

३. धात्वन्तरार्थोऽङ्गं विशेषणं यस्य धात्वन्तरार्थस्य वाऽङ्गम् ।

४. निस्सरणं चाऽपायरूपमिति भावः । यदा तु बलाहकान्निःसृत्य कुसूलादादायेति च निःसृत्यादायशब्दवन्तौ प्रयोगौ क्रियेते तदा विद्युतिपचिधातू केवले स्वार्थे विद्योतने विक्लेदने च वर्तेते । निःसरति आददाति क्रियापेक्षया तु बलाहककुसूलयोर्निर्दिष्टविषयमपादानत्वम् ।

५. सकाशेन निर्वृत्त '**सुपन्थ्यादेर्ञ्यः**' [६/३/१२६] । तत्र भवा '**प्रस्थवहपुरान्त**···' [६/४/४३] इति अकञ् । अत्र निर्धार्यन्ते इति क्रिया प्रतीयते ।

६. ननु कायसंसर्गपूर्वको विभागो मुख्यो बुद्धिपरिकल्पितस्तु गौणस्ततश्च गौणमुख्ययोर्मुख्यस्यैव परिग्रहात् सांकाश्यकेभ्य इत्यादौ कारकशेषत्वात् षष्ठी प्राप्नोति । नैवम् । '**साधकतमं साधनम्**' [२/४/२७] इत्यत्र तमग्रहणेन गौणग्रहणस्यापि ज्ञापितत्वादुभयरूपस्यापि अपायस्य परिग्रह इति ।

साकाङ्क्ष्यैर्यदा बुद्ध्या विभजते वक्ता तदापायः प्रतीयत इति अत्रापादानत्वं भवति। एवं अधर्मात् जुगुप्सते। अधर्माद् विरमति। धर्मात् प्रमाद्यति। अत्र यः प्रेक्षापूर्वकारी भवति स दुःखहेतुमधर्मं बुद्ध्या प्राप्य नानेन कृत्यमस्तीति ततो निवर्तते। नास्तिकस्तु बुद्ध्या धर्मं प्राप्य नैनं करिष्यामीति ततो निवर्तते इति। निवृत्त्यङ्गेषु जुगुप्साविरामप्रमादेष्वेते धातवो वर्तन्ते इति बुद्धिसंसर्गपूर्वकोऽपाय। तथा चौरेभ्यो बिभेति। चौरेभ्य उद्विजते। चौरेभ्यस्त्रायते। चौरेभ्यो रक्षति। अत्र बुद्धिमान् वधबन्धनपरिक्लेशकारिणश्चौरान् बुद्ध्या प्राप्य तेभ्यो निवर्तते। चौरेभ्यस्त्रायते इत्यत्रापि कश्चित् सुहृद्यदीमं चौरा पश्येयुर्नूनं अस्य धनमपहरेयुरिति बुद्ध्या तं चौरैः संयोज्य तेभ्यो निवर्तयतीत्यपाय एव। अध्ययनात् पराजयते। भोजनात् पराजयते। अत्रापि अध्ययनं भोजनं वाऽसहमानस्ततो निवर्तते इत्यपाय एव। यवेभ्यो गां रक्षति। यवेभ्यो गां निषेधयति। कूपादन्धं वारयति। इहापि गवादेर्यवादिसंपर्कं बुद्ध्या समीक्ष्याऽन्यतरस्य विनाशं पश्यन् गवादीन् यवादिभ्यो निवर्तयतीत्यपाय एव। उपाध्यायादन्तर्धत्ते। उपाध्यायान्निलीयते। मा मामुपाध्यायोऽद्राक्षीदिति तिरोभवतीत्यत्राप्यपायः। शृङ्गाच्छरो जायते। गोमयात् वृश्चिको जायते। गोलोमाविलोमभ्यो दूर्वा जायते। बीजादङ्कुरो जायते। अत्र शृङ्गादिभ्यः शरादयो निष्क्रामन्तीति स्फुट एवापायः[1]। हिमवतो गङ्गा प्रभवति। महाहिमवतो रोहिता प्रभवति। अत्राप्यपाय सङ्क्रामन्तीत्यपायोऽस्ति। वलभ्याः शत्रुञ्जयं षड् योजनानि षट्सु वा योजनेषु भवति। अत्र वलभ्याः निःसृत्य गतानि योजनानि गतेषु वा तेषु भवतीत्यर्थः। कार्त्तिक्या आग्रहायणी मासे। ततः प्रभृति मासे गते भवतीत्यर्थः। उभयत्राऽपाय प्रतीयते। चैत्रान्मैत्रः पटुः। अयमस्मादधिकः। अयमस्मादूनः। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। अत्र मैत्रादयः पुंस्त्वादिना संसृष्टाः पटुत्वादिधर्मेण ततो विभक्ताः प्रतीयन्ते इति सर्वत्राप्यपायविवक्षा। विवक्षान्तरे त्वपादानत्वाऽभावे यथायोगं विभक्तयो भवन्ति। बलाहके विद्योतते। बलाहकः[2] विद्योतते। अधर्मं जुगुप्सते। अधर्मेण जुगुप्सते। मौर्ख्येण प्रमाद्यति। चौरैर्भयम्। चौरैर्बिभेति। चौरेषु बिभेति। चोराणां बिभेति। भोजनेन पराजयते। यवेषु गां वारयति। शृङ्गे शरो जायते इति। अपादानसंज्ञाप्रयोजनं तु **'पञ्चम्यपादाने'** [२/४/७५] इत्यादि।

४३. क्रियाश्रयस्याधिकरणमाधारः।

यत् क्रियाश्रययोः कर्तृकर्मणोराधिकरणं स आधारसंज्ञको भवति। कटे आस्ते। स्थाल्यां पचति। चैत्रसमवायिन्यामासिक्रियायां तदाश्रयं चैत्रं धारयन् कटादिर्निमित्तत्वं प्रतिपद्यते। तण्डुलसमवायिन्यां च विक्लेदनक्रियायां तदाश्रयांस्तण्डुलान् धारयन्ती स्थालीनिमित्तत्वं प्रतिपद्यते इत्युभयत्र कारकत्वम्। स च षोढा—वैषयिकः, औपश्लेषिकः, अभिव्यापकः, सामीप्यकः, नैमित्तिकः, औपचारिकः। तत्र अनन्यत्र भावो विषयस्तस्मै प्रभवति वैषयिकः। दिवि देवाः। नभसि तारकाः। भुवि मनुष्याः। पाताले पन्नगाः। एकदेशमात्रसंयोग उपश्लेषस्तत्र भव औपश्लेषिकः। कटे आस्ते। पर्यङ्के शेते। शाखायां लम्बते। गेहे तिष्ठति। यस्याधेयेन समस्ताऽवयवसंयोगः सोऽभिव्यापकः। तिलेषु तैलम्। दधिनि सर्पिः। गवि गोत्वम्। तन्तुषु पटः। यदाधेयसंनिधिमात्रेण क्रियाहेतुः स सामीप्यकः। गङ्गायां घोषः। वटे गावः। बन्धुष्वास्ते। गुरौ वसति। निमित्तमेव नैमित्तिकः। युद्धे संनह्यते। शरदि पुष्प्यन्ति सप्तच्छदाः। आतपे क्लाम्यति। छायायामाश्वसिति। उपचारे भव औपचारिकः। अङ्गुल्यग्रे करिशतमास्ते। स मे मुष्टिमध्ये तिष्ठति। स मे हृदये वसति। आधारसंज्ञाप्रयोजनं तु **'आधारे सप्तमी'** [२/४/१०२] इत्यादि।

४४. नाम्नः प्रथमा।

नाम्नः प्रथमा विभक्तिर्भवति। कर्मादिषु द्वितीयादीनां विधास्यमानत्वादिह विशेषाऽनभिधानात् चार्थमात्रे प्रथमेति विज्ञायते। तत्र द्वितीयादिविनिर्मुक्तः स्वार्थद्रव्यलिङ्गसंख्याशक्तिलक्षणोऽसमग्रः समग्रो वा पञ्चको नामार्थोऽर्थमात्रम्। तत्र स्वार्थः—त्वतलादिप्रत्ययाऽभिधेयरूपो गुणः। उच्चैः[3], नीचैः, गौः, अश्वः, शुक्लः, कृष्णः, कारकः, पाचकः,

---

1. यद्यपि शरादीनां सततमेव अन्योऽन्यस्य अन्वनु जायमानत्वात् सर्वरूपेण न निष्क्रमणं तथापि जात्या एकदेशेन निष्क्रमणत्वादपाय एव।
2. तं प्राप्य अन्तर्भूतो ण्यर्थो वा।
3. प्रथमान्तत्वात् सग्राम उच्चैस्तव, सग्राम उच्चैस्ते—इत्यत्र **'सपूर्वात् प्रथमान्ताद् वा'** [२/१/६७] इति सूत्रेण ते मे आदेशयोर्विकल्पसिद्धिः।

दण्डी, विषाणी, राजपुरुषः । द्रव्यं— सर्वादि व्यपदेश्य सत्त्वभूत विशेऽयमिति यावत् । इद कर्म, इय जातिः, अय गुण । लिङ्ग—स्त्री, पुमान्, नपुंसकम् । कुमारी, वृक्षः, कुलम् । यस्यामेकद्विबहुवचनानि भवन्ति सा भेदप्रतिपत्तिहेतुरेकत्वादिका **सख्या—एकः, द्वौ, बहव** । वृक्षः, वृक्षौ, वृक्षा । यस्यां त्यादिभिरनुक्तायां द्वितीयाद्या व्यतिरेकविभक्तय षष्ठी च भवति सा स्वपराश्रयाश्रितक्रियोत्पत्तिहेतु कारकरूपा तत्पूर्वकसंबन्धरूपा च शक्ति., सा च त्यादिकृतद्धितसमासनिपातैरुक्तार्थमात्रम् । तत्र त्यादिना तावत्—मुनि करोति । घट क्रियते । कृता तावत्—कृष्ण. कसं हतवान् । कृष्णेन कसो हत. । पच्यतेऽनेन—पचनोग्निः । पच्यतेऽस्या—पचनी स्थाली । दीयतेऽस्मै—दानीयो विप्र । आहरन्ति यस्मात् स आहार. । तद्धितेन तावत्—कुङ्कुमेन रक्त—कौङ्कुमम् । मथुराया आगत —माथुर । धनमस्यास्तीति धनवान् । समासेन तावत्—आरूढो वानरो यं स आरूढवानरः । ऊढो रथो येन स ऊढरथ । निपातेन तावत्—**'विषवृक्षोऽपि संवर्द्ध्य, स्वयं छेत्तुमसाम्प्रतम्'** [कुमारसंभवं महा० २/५५], **'क्षमावमुं नारद इत्यबोधि सः'** [शिशुपालवधमहा० १/३] इत्यादि । नामार्थेन नामार्थोपचारोऽपि गृह्यते । यथा साहचर्यात्—छत्रिणो गच्छन्ति, छत्रिसाहचर्यादछत्रिणोऽपि छत्रिणो गीयन्ते । स्थानात्—गिरिर्दह्यते । तादर्थ्यात्—इन्द्रःस्थूणा । आचरणात् —कुबेरोऽय राजा । यमोऽय राजा । मानात्—प्रस्थो व्रीहिः । धरणात्—तुला चन्दनम् । सामीप्यात्—गङ्गातटं गङ्गा । योगात्—रक्त कम्बल । साधनात्—अन्न प्राणा. । आधिपत्यात्—ग्रामाधिपतिर्ग्राम । ननु कृतं पश्य, भीमेन क्रियते, दानीयाय देहि—इत्यादिषु कृतोक्तेऽपि कथ द्वितीयादय ? उच्यते—इह अन्तर्भूतेन कृता नामार्थ. सिद्धस्ततः उत्पन्नाया च क्रियान्तराया कर्मादिशक्ति द्योतयितु द्वितीयादयो भवन्ति । तदय वस्तुसक्षेपस्त्याद्यन्तपदसामानाधिकरण्ये प्रथमेति । यत्रापि त्याद्यन्तं पद न श्रूयते, वृक्ष. प्लक्ष. इति तत्रापि गम्यते । यदाह—**यत्रान्यत् क्रियापदं न श्रूयते तत्राऽस्तिर्भवतिपरः प्रयुज्यते इति** । नाम्न इति किम् ? निरर्थकाद् वर्णाद् धातुवाक्याभ्या च मा भूत् ।

४५. आमन्त्रणे ।

प्रसिद्धतत्सबन्धस्य[1] किमप्याख्यातुमभिमुखीकरणमामन्त्रणम् । आमन्त्रणेर्थे वर्तमानान्नाम्न. प्रथमा विभक्तिर्भवति । हे देवदत्त, हे देवदत्तौ, हे देवदत्ता. । हे पचन्, हे पचमान । आमन्त्रणे इति किम् ? राजा भव । अत्र राजेति नामन्त्रणे वर्तते किंतु स एव विधीयते इति पूर्वेणैव प्रथमा । षष्ठीप्राप्तौ वचनम् ।

४६. गौणात् ।

गौणादित्यधिक्रियते । त्यादिभिरनुक्ता शक्तिर्गौणः । इत ऊर्ध्व या द्वितीयादयो विभक्तयो विधास्यन्ते ता गौणान्नाम्न एव भवन्तीति वेदितव्यम् । अधिकारोऽयमा पादपरिसमाप्ते. ।

४७. कर्मणि द्वितीया ।

गौणान्नाम्न कर्मणि कारके द्वितीया विभक्तिर्भवति । कटं करोति । ग्राम गच्छति । ओदन पचति । आदित्यं पश्यति । अहिं लङ्घयति । अजां ग्राम नयति । गां पयो दोग्धि । गौणादिति किम् ? क्रियते कटः, ग्रामो गम्यते इत्यादि ।

४८. क्रियाविशेषणात् ।

क्रियाविशेषणाद् गौणान्नाम्नो द्वितीया विभक्तिर्भवति । मृदु पचति । स्तोकं पचति । मन्दं गच्छति । अथो पचति शोभन ते भार्या—अत्र **'सपूर्वात्प्रथमान्ताद् वा'** [२/१/६७] इति विकल्पो न । द्वितीयार्थं वचन न तु कर्मसंज्ञार्थं, तेन कृद्योगे कर्मनिमित्ता षष्ठी न भवति । ओदनस्य शोभनं पक्ता । सुखं स्थाता । चिरमासिता ।

४९. निकषासमयाहाधिगन्तरान्तरेणातियेनतेनैः ।

निकषा, समया, हा, धिग्, अन्तरा, अन्तरेण, अति, येन, तेन—इत्येतैर्युक्ताद् गौणान्नाम्नो द्वितीया विभक्ति-

१. सबन्धो वाच्यवाचकभावलक्षण. ।

भवति । षष्ठ्यपवादः । निकषा पर्वतं नदी । समया पर्वतं वनम् । हा देवदत्त वर्धते व्याधिः । धिग् जाल्मम् । अन्तरा निषधं नीलवन्तं च विदेहाः । अन्तरेण गन्धमादनं माल्यवन्तं चोत्तराः कुरवः । अन्तरेण धर्मं सुखं न । अति कुरून् पाण्डुसेना वृद्धा—कुरूणामतिक्रमेणेत्यर्थः । येन[1] तेन वा पश्चिमां गतः । अन्तराऽन्तरेणशब्दौ साहचर्यात्[2] निपातावेव, तेनेह न—अन्तरायां पुरि वसति । किं केशवार्जुनयोरन्तरेण गतेनेति ? निकषा, समया इत्येतावव्ययौ समीपवाचिनौ । हा तात !, धिग् जाल्म !, हा सुभ्रु !—इत्यादावामन्त्रणतया विवक्षा, न हादियुक्तत्वेनेति न भवति ।

५०. सर्वोभयाभिपरिभिस्तसन्तैः ।

तसप्रत्ययान्तैः सर्व, उभय, अभि, परि—इत्येतैर्योगे गौणान्नाम्नो द्वितीया विभक्तिर्भवति । सर्वतो ग्रामं वनानि । उभयतो ग्रामं वनानि । अभितो ग्रामं क्षेत्राणि । परितो ग्रामं क्षेत्राणि ।

५१. उपर्यधोधिभिर्द्वित्वे ।

उपरि, अधस्, अधि—इत्येतैर्द्विरुक्तैर्योगे गौणान्नाम्नो द्वितीया विभक्तिर्भवति । उपर्युपरि ग्रामं मेघो याति । अधोऽधो ग्रामं निधानानि सन्ति । अध्यधि ग्रामं क्षेत्राणि सन्ति । द्वित्वे इति किम् ? हर्म्यस्योपरि प्रासादः । अधः प्रासादस्य ।

५२. लक्षणवीप्सेत्थंभूतेष्वऽभिना ।

लक्ष्यते—दर्श्यते येन तल्लक्षणम् । अवयवशः समुदायस्य क्रियादिना साकल्येन प्राप्तीच्छा वीप्सा । इमं[3] कञ्चित्[4] प्रकारं[5] भूत आपन्नः[6] इत्थंभूतः[7] । लक्षण, वीप्सा, इत्थंभूत—इत्येतेषु वर्तमानादभिना युक्ताद् गौणान्नाम्नो द्वितीया विभक्तिर्भवति । लक्षणे—वृक्षमभि विद्योतते विद्युत् । अत्र वृक्षो लक्षणम्, विद्योतमाना विद्युल्लक्ष्यम् । अनयोश्च लक्ष्यलक्षणभावः सबन्धोऽभिना द्योत्यते । वीप्सायाम्—वृक्षं वृक्षमभि सेकः—एकैकस्य वृक्षस्य सेक इत्यर्थः । इत्थंभूते—साधुर्मैत्रो मातरमभि—मातृविषये साधुत्वप्रकारं प्राप्त इत्यर्थः । लक्षणादिष्विति किम् ? यदत्र ममाभि स्यात्तद्दीयताम् । अत्राभिना भागसंबन्धो द्योत्यते । योऽत्र मम भागः स्यादित्यर्थः ।

५३. प्रतिपर्यनुभिर्भागिनि च ।

चकारात्पूर्वमनुवर्तते । स्वीक्रियमाणः अंशो भागस्तत्स्वामी भागी, तत्र चकारात् लक्षण, वीप्सा, इत्थंभूत—इत्येतेषु चार्थेषु वर्तमानात् प्रति, परि, अनु—इत्येतैर्युक्ताद् गौणान्नाम्नो द्वितीया विभक्तिर्भवति । भागिनि—यदत्र मां प्रति मां परि मामनु वा स्यात्तद्दीयताम् । योऽत्र मम भाग आभवति स दीयतामित्यर्थः । लक्षणे—वृक्षं प्रति परि अनु वा विद्योतते विद्युत् । वीप्सायाम्—वृक्षं वृक्षं प्रति परि अनु वा सेचनम् । इत्थंभूते—साधुर्मैत्रो मातरं प्रति परि अनु वा । एतेष्विति किम् ? अनु वनस्याऽशनिर्गता—समीप इत्यर्थः ।

---

१. अत्र येनतेनौ लक्ष्यलक्षणभावं द्योतयतः । पश्चिमां प्रति लक्ष्यीकृत्य गत इत्यर्थः । अयं गतः, कां प्रति ? पश्चिमां । पश्चिमया लक्षणेन देवदत्तस्याऽप्रसिद्धं गमनं लक्ष्यते ।

२. निकषादिभिर्निपातैः सहैकवाक्योपात्तत्वादेतावपि निपाताविल्यर्थः ।

३. प्रत्यक्षम् ।

४. विवक्षितम् ।

५. थम्प्रत्ययार्थः ।

६. भूतार्थः । भूकः प्राप्त्यर्थस्य प्रयोगात् ।

७. अनेन साधुत्वादिना प्रकारेण (प्रकारः सामान्यस्य भेदको धर्मो विशेष इत्यर्थः) इत्थं भवन नपुंसके क्तः ।

५४. हेतुसहार्थेऽनुना ।

हेतुर्जनकः[1] । सहार्थस्तुल्ययोगो विद्यमानता च, तद्विषयोऽपि[2] सहार्थे उपचारात् । हेतौ सहार्थे च वर्तमानादनुना युक्ताद् गौणान्नाम्नो द्वितीया विभक्तिर्भवति । जिनजन्मोत्सवमन्वागच्छन् सुराः । देवेन्द्रोपपाताध्ययनमन्वागच्छद्देवेन्द्रः । तेन हेतुनेत्यर्थः । नदीमन्ववसिता[3] सेना । पर्वतमन्ववसिता पुरी । नदीपर्वताभ्यां सह संबद्धेत्यर्थः । विद्यमानतायाः—अनु कर्माणि संसारी । अत्र कर्मणां विद्यमानतैव न तु संसारिणा सह नदीपर्वतसम प्रत्यक्षत संबद्धानि । तृतीयापवादो योगः ।

५५. उपेन चोत्कृष्टे[4] ।

चकारादनु इत्यनुवर्तते । उत्कृष्टेऽर्थे वर्तमानाद् उपेन अनुना च युक्ताद् गौणान्नाम्नो द्वितीया विभक्तिर्भवति । उप सिद्धसेन कवयः, उप श्रीजिन सुराः । अन्वर्जुन योद्धारः, अनु सर्वज्ञ देवाः । तस्मादन्ये हीना इत्यर्थः ।

५६. कालाध्वनोरत्यन्तसंयोगे ।

क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबन्धोऽत्यन्तसंयोगः । काले अध्वनि च वर्तमानाद् गौणान्नाम्नो द्वितीया विभक्तिर्भवति अत्यन्तसंयोगे गम्यमाने । मासमधीते, मासं कल्याणी, मासं गुडधानाः । क्रोशमधीते, क्रोशं कुटिला नदी, क्रोशं पर्वतः । कालाध्वनोरिति किम् ? स्थाल्यां पचति । अत्यन्तसंयोग इति किम् ? मासस्य मासे वा द्विरधीते । क्रोशस्य क्रोशे वा एकदेशे पर्वतः । षष्ठ्याः सप्तम्या वाऽपवादः । भावादपीच्छन्त्यन्ये—गोदोहं वक्रः । गोदोहं बुद्बुदाः ।

५७. अपवर्गे तृतीया ।

अपवर्गः—फलप्राप्तिः । तस्मिन् द्योत्ये कालाध्वनोरत्यन्तसंयोगे गम्यमाने गौणान्नाम्नस्तृतीया विभक्तिर्भवति । मासेन मासाभ्यां मासैर्वाविश्यकमधीतम् । क्रोशेन क्रोशाभ्यां क्रोशैर्वाचारोऽधीतः । अपवर्ग इति किम् ? मासमधीत आचारो नानेन गृहीतः । भावादपीच्छन्त्यन्ये—गोदोहेन कृतः कटः । द्वितीयापवादः ।

५८. कर्तृसाधनहेत्वित्थंभूतलक्षणेषु ।

कर्त्रादिष्वर्थेषु वर्तमानाद् गौणान्नाम्नस्तृतीया विभक्तिर्भवति । चैत्रेण कृतम्, मैत्रेण भुज्यते । साधने - दात्रेण लुनाति, मनसा मेरुं गच्छति । फलसाधनयोग्यः पदार्थो हेतुः । धनेन कुलम्, विद्यया यशः, दानेन कीर्त्तिः, कन्यया शोकः । इत्थंभूतलक्षणे—अपि भवान् कमण्डलुना छात्रमद्राक्षीत्, चूलया परिव्राजकमद्राक्षीत् । छात्रत्वादि प्रकारमापन्नस्य मनुष्यस्य कमण्डल्वादि लक्षणम् । इत्थंभूतग्रहणं किम् ? वृक्षं प्रति विद्योतनम । अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदित्यत्र तु लक्ष्यप्रधानो निर्देशो न लक्षणप्रधान इति न भवति । 'सहार्थे' [२/८/५६] इत्येव तृतीया सिध्यति, लक्ष्यलक्षणभावे तु षष्ठी मा भूदितीत्थंभूतलक्षणग्रहणम् । तथा धान्येनार्थः, धान्येनार्थी, मासेन पूर्वः, मासेनावरः, असिना कलहः, वाचा निपुणः, गुडेन मिश्रः, आचारेण श्लक्ष्णः, माषेणोनः, माषेण न्यूनः, मासेन विकलः, शष्कुलया खण्डः—इत्यादौ कृतभवत्यादि-गम्यमानक्रियापेक्षया कर्तरि साधने वा तृतीयेति ।

---

१ हेतुर्द्विविधः—जनको ज्ञापकश्च । तत्र ज्ञापकस्य लक्षणत्वात् 'प्रतिपर्यनुभिः...' [२/४/५३] इति सूत्रेण द्वितीया सिद्धेति जनक एवेह गृह्यते ।

२ ननु तुल्ययोगाद्यर्थे सहादयः शब्दा एव वर्तन्ते न नद्यादिशब्दा इति कथं ततो द्वितीयेत्याह ।

३ अवसिनोति स्म कर्मकर्तरि वावसीयते स्म 'गत्यर्थाऽकर्मक...' [५/१/११] इति क्तः ।

४. स्वयमेव उत्कृष्यते स्म कर्मकर्तरि क्तः । उत्कृष्टशब्दो हीनापेक्षस्तेन हीनोत्कृष्टसंबन्धे उपानुभ्यां द्योत्ये द्वितीयानेन विधीयते ।

५९. सहार्थे।

सहार्थस्तुल्ययोगो[1] विद्यमानता[2] च। तस्मिन् शब्दादर्थाद् वा गम्यमाने **गौणान्नाम्नस्तृतीया विभक्तिर्भवति।** पुत्रेण सहागतः। पुत्रेण सह स्थूलः। पुत्रेण सह गोमान्। शिष्येण सह ब्राह्मणः। तिलैः सह माषान् वपति। **'सहैव दशभिः पुत्रैर्भारं वहति गर्दभी'**। अर्थग्रहणात्—पुत्रेण साकम्, पुत्रेण समम्, पुत्रेण सार्धम्, पुत्रेणामा, पुत्रेण युगपद्। **अर्थाद्** गम्यमानेऽपि—पुत्रेणागतः, वृद्धो यूना इत्यादि।

६०. येनाऽङ्गिविकारः।

अङ्गानि सन्ति यस्मिन्नित्यङ्गी। येन विकृतेन अङ्गेन अङ्गिनो विकारो लक्ष्यते ततो **गौणान्नाम्नस्तृतीया विभक्तिर्भवति।** अक्ष्णा काणः, पादेन खञ्जः, शिरसा खल्वाटः। अङ्गीति ग्रहणं किम्? अक्षि काणं पश्य। **अङ्गमेवात्र** विकृतं लक्ष्यते न त्वङ्गी। विकारग्रहणं किम्? अक्ष्णा दीर्घः इत्याद्यप्रयोगो मा भूत्। ननु कथमुरसा विशालः, बाहुभ्यां दृढः—इत्यादावविकारेऽपि तृतीया? उच्यते—'**प्रकृत्यादय आख्यायाम्**' [२/४/२६] इत्यनेन भविष्यति।

६१. निषेधार्थकृताद्यैः।

कृत इत्येवप्रकारैर्निषेधार्थैर्युक्ताद् गौणान्नाम्नस्तृतीया विभक्तिर्भवति। कृतं तेन, भवतु तेन, अलं अतिप्रसङ्गेन, किं गतेन। कृत, भवतु, अलं, पूर्ण, पर्याप्त, किम् एवंप्रकाराः कृतादयः। निषेधार्थ इति किम्? अलं मल्लो मल्लाय।

६२. द्विद्रोणादिभ्यो वीप्सायां वा।

वीप्सायां गम्यमानायां द्विद्रोणादिभ्यो गौणेभ्यो नामभ्यस्तृतीया विभक्तिर्वा भवति। द्विद्रोणेन धान्यं क्रीणाति, द्विद्रोणं द्विद्रोणं क्रीणाति। तृतीया वीप्सायां विहिता इति तृतीयान्तस्य पदस्य द्वित्वं न। द्वितीया तु कर्मणि विहिता न वीप्सायामतस्तदन्तस्य द्वित्वम्। एवं पञ्चकेन[3] पशून् क्रीणाति, पञ्चकं पञ्चकं क्रीणाति। सहस्रेणाऽश्वान् क्रीणाति, सहस्रं सहस्रं क्रीणाति। द्विद्रोणादयः[4] प्रयोगगम्याः।

६३. दानपात्रे चतुर्थी।

दानपात्रे वर्तमानाद् गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति। द्विजाय गां ददाति। शिष्याभ्यां धर्ममुपदिशति। मुनिभ्यो भिक्षां ददाति। पत्ये शेते। राज्ञे विज्ञपयति। दानपात्रे इति किम्? अजां नयति ग्रामम्।

६४. तादर्थ्ये।

किञ्चिद् वस्तु सम्पादयितुं यत्प्रवृत्तं तत्तदर्थम्। तस्य भावे तादर्थ्ये संबन्धविशेषे द्योत्ये **गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति।** षष्ठ्यपवादः। यूपाय दारु, कुण्डलाय हिरण्यम्, संयमाय श्रुतम्, धर्माय संयमम्, मोक्षाय धर्मम्, दानाय धनम्।

---

१. तुल्यः साधारणोऽप्रधानस्य प्रधानेन क्रियादिना यः सम्बन्धः सः तुल्ययोगः।

२. ननु च विद्यमानतायामपि तुल्ययोगोस्त्येव सत्तया सहोभयोः सम्बन्धात्। तथाहि—**सहैव दशभिः पुत्रैर्भारं वहति गर्दभी इति सहैव** दशभिः पुत्रैः सतीति शक्यं प्रतिपत्तुम्। तत्र विद्यमानता चेति तुल्ययोगात् किं पृथग् निर्दिश्यते? उच्यते—विवक्षितयोगाभावात्। सहैव दशभिरित्यत्र वहनमात्रविवक्षितं तद्गर्दभ्या एव न तत्पुत्राणां, यथा—पुत्रेण सहागत इत्यागमनमुभयोरपीति तुल्ययोगाद् विद्यमानता भिन्ना।

३. पञ्चेति संख्या मानमस्य '**संख्यायाः संघसूत्र**···' [७/२/११९] इति यथा विहितः '**संख्याडतेः**···' [७/२/६२] इति कः। पञ्चकं पञ्चकं संघं पशून् क्रीणातीत्यर्थः। पञ्चकं पञ्चकमित्यत्र पशुसामानाधिकरण्येऽपि पञ्चकशब्दाद् ब्राह्मणाः संघ इतिवत् एकवचनम्।

४. आदिशब्दस्य प्रकारार्थत्वात् येभ्यो वीप्सायां प्रयोगे तृतीया दृश्यते ते द्विद्रोणादयः, न तु गर्गादिवत् सन्निविष्टा इति।

६५. कृप्यर्थानां विकारे।

कृप्यर्थानां धातूनां प्रयोगे विकारे वर्तमानाद् गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति। मूत्राय कल्पते यवागूः। उच्चाराय कल्पते यवान्नम्। श्लेष्मणे कल्पते दधि। अर्थग्रहणात् संपद्यते जायते इत्यादि। विकार इति किम्? चैत्रस्य कल्पन्ते धनानि। संपद्यन्ते शालयः। अपायविवक्षायां तु पञ्चम्येव। मूत्रं संपद्यते यवाग्वा। शृङ्गाच्छरो जायते। गोमयाद् वृश्चिकः प्रभवति।

६६. उत्पातेन ज्ञाप्यमाने।

उत्पातः आकस्मिकं निमित्तम्। उत्पातेन ज्ञाप्यमानेऽर्थे वर्तमानाद् गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति।

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया, दुर्भिक्षाय सिता भवेत्॥

वातादय स्वकारणेभ्य एवोत्पद्यन्ते, विद्युता तु ज्ञाप्यन्त इति तादर्थ्यं नास्ति। उत्पातेनेति किम्? राज्ञ इदं छत्रमायात विद्धि राजानम्। षष्ठ्यपवादो योग.।

६७. समर्थार्थनमःस्वस्तिस्वाहास्वधावषड्भिः।

समर्थार्थ, नमस्, स्वस्ति, स्वाहा, स्वधा, वषट्—इत्येतैर्योगे गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति। समर्थोऽल, शक्त, क्षम, प्रभुर्वा मल्लो मल्लाय। नमोऽर्हद्भ्यः, नमः सिद्धेभ्य। स्वस्ति प्रजाभ्य, स्वस्ति संघाय। इन्द्राय स्वाहा, अग्नये स्वाहा। पितृभ्य स्वधा। वषडग्नये, वषडिन्द्राय। **उपपदविभक्तेः कारकविभक्तिर्बलीयसीति** न्यायान्नेह—नमस्कृत्य महावीरम्। ननु कथ जिनाय नमस्कुर्म इति? उच्यते—जिनमनुकूलयितु नमस्कुर्म इति व्युत्पत्त्या **'गम्यस्य कर्मणि'** [२/४/६६] इति चतुर्थी। समर्थार्थेति वचनान्नेह—**'अलं महीपाल! तव श्रमेण'** [रघुवंशमहा०,२/३४]। वारणार्थोऽयमलशब्द न तु समर्थार्थ.। **'निषेधार्थकृतार्थैः'** [२/४/६१] इति तृतीया।

६८. तुमोऽर्थे भाववाचिनः।

तुमोर्थे वर्तमानभाववाचिप्रत्ययान्ताद् गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति। **'भाववाचिनः'** [५/४/५] इति वक्ष्यति, तस्येदं ग्रहणम्। पाकाय व्रजति[1], पक्तये व्रजति, पचनाय व्रजति, इज्यायै व्रजति -पक्तु यष्टु वा व्रजतीत्यर्थ। तादर्थ्याभावाच्चतुर्थी न प्राप्नोति इति शेषषष्ठी हेतुहेतुमद्भावविवक्षाया वा हेतुतृतीया स्यादिति चतुर्थ्यर्थं वचनम्। तुमोर्थे इति किम्? पाकस्य, त्यागस्य, रागस्य। भाववाचिन इति किम्? कारको व्रजति। तुम इति व्यस्तनिर्देश उत्तरार्थं।

६९. गम्यस्य कर्मणि।

तुम इत्यनुवर्तते। यस्यार्थो गम्यते न च शब्दः प्रयुज्यते स गम्य.। गम्यस्य तुमो यत्कर्म तत्र वर्तमानाद् गौणान्नाम्नश्चतुर्थी विभक्तिर्भवति। द्वितीयापवाद। एधेभ्यो व्रजति, फलेभ्यो व्रजति—एधान् फलानि वा आहर्तुं व्रजतीत्यर्थः। गम्यस्येति किम्? एधानाहर्तुं व्रजति। कर्मणीति किम्? एधेभ्यो व्रजति शकटेन। अत्र साधनान्मा भूत्। तुम इति किम्? प्रविश पिण्डी द्वारम्। अत्र भक्षय पिधेहि इति च गम्यम्।

७०. गतेरप्राप्ते वा।

कर्मणीत्यनुवर्तते। गतिः पादविहरणम्। न प्राप्तमित्यप्राप्तम्। गतेरप्राप्ते कर्मणि वर्तमानाद् गौणान्नाम्नश्चतुर्थी विभक्तिर्वा भवति। ग्राम ग्रामाय वा गच्छति। नगरं नगराय वा व्रजति। (प्रनष्ट पन्थानं पथे वा गच्छति। उत्पथेन

---

१ पक्तुं पच्यते इति वा वाक्ये **'भाववाचिनः'** [५/४/५] इति घञादय।

पन्थानं पथे वा गच्छति । ग्रामादिक कर्म प्राप्तं न, किंतु प्रापणीयमिति भावः । गतेरिति किम् ? आदित्यं पश्यति । मेरुं शृणोति । स्त्रिय गच्छति[1] । मनसा मेरु गच्छतीत्यत्र ज्ञानार्थो गमि. । कर्मणीति किम् ? ग्रामादागच्छति । अप्राप्त इति किम् ? पन्थानं गच्छति[2] । कृद्योगे तु परत्वात् षष्ठ्येव—ग्रामस्य गन्ता । द्वितीयैवेत्यन्ये—ग्रामं गन्ता । चतुर्थी चेत्यन्ये—ग्राम ग्रामाय वा गन्ता ।

७१. मन्यस्याऽनादरेऽनावादिभ्यः ।

वेत्यनुवर्तते । अनाद्रियतेऽनेनेति अनादर । अनादरे मन्यतेः कर्मणि वर्तमानान्नावादिवर्जिताद् गौणान्नाम्नश्चतुर्थी विभक्तिर्वा भवति । न त्वा तृणाय तृणं वा मन्ये । न त्वां बुसाय बुसं वा मन्ये । न त्वां लोष्टाय लोष्टं वा मन्ये । न त्वां शुने श्वानं वा मन्ये । अहं त्वा तृणादेरपि निकृष्ट मन्ये इति भावार्थः । मन्यस्येति किम् ? न त्वा तृणं चिन्तयामि । यन्निर्देशः किम् ? न त्वा तृण मन्वे । अनादरे इति किम् ? न त्वां रत्न मन्ये । न ते मुखं चन्द्रं मन्ये । न ते मुखं पद्म मन्ये । रत्नादिभ्योऽपि त्वामधिक मन्ये इति भावः । उक्त च—

अश्मानं दृषदं मन्ये, मन्ये काष्ठमुलूखलम् ।
अन्धायास्तं सुतं मन्ये, यस्य माता न पश्यति ।।

अनावादिभ्य इति किम् ? न त्वा नावं मन्ये । न त्वामऽन्न मन्ये । न त्वां शुकं, शृगालं, काकं वा मन्ये । कृद्योगे परत्वात्षष्ठी । न त्वा तृणस्य मन्ता[3] । चतुर्थ्यपीति कश्चित्—न त्वां तृणाय तृणस्य वा मन्ता । उक्ते कर्मणि तु प्रथमैव—न त्व मया श्वा मन्यसे । नावादय प्रयोगगम्याः ।

७२. हितसुखाभ्याम् ।

हित, सुख—इत्येताभ्यां योगे गौणान्नाम्नश्चतुर्थी विभक्तिर्वा भवति । ग्रामाय ग्रामस्य वा हितम् । चैत्राय चैत्रस्य वा सुखम् ।

७३. तदायुष्यकुशलार्थार्थैराशिषि ।

तदिति हितसुखयो. परामर्श । अर्थशब्दः प्रत्येकमभिसबध्यते । हितार्थ, सुखार्थ, आयुष्यार्थ, कुशलार्थ, अर्थार्थ—इत्येतैर्योगे गौणान्नाम्नश्चतुर्थी विभक्तिर्वा भवति आशिषि गम्यमानायाम् । हितार्थे—हितं पथ्यं वा जीवेभ्यो जीवाना वा भूयात् । सुखार्थे—सुख श शर्म वा भव्येभ्यो भव्यानां वा भवतात् । आयुष्यार्थे—आयुष्य भूयात् चैत्राय चैत्रस्य वा । दीर्घमायु चिरजीवित वा अस्तु मैत्राय मैत्रस्य वा । कुशलार्थे—कुशलं क्षेम कल्याण मद्र भद्र वा भूयात् सघाय सघस्य वा । अर्थार्थे—अर्थ प्रयोजनं कार्य वा भूयात् चैत्राय चैत्रस्य वा । आशिषीति किम् ? आयुष्यं मुनेस्तपः । तत्त्वाख्याने न भवति । हितसुखशब्दाभ्या पूर्वेणैव सिद्धे इहाऽनुवर्तनं तदर्थार्थम् ।

७४. परिक्रयणे साधने ।

नियतकालं वेतनादिना गृहादीनां स्वीकरण परिक्रयणम् । परिक्रयणेऽर्थे वर्तमानाद् गौणान्नाम्नः साधने चतुर्थी विभक्तिर्वा भवति । शताय शतेन वा परिक्रीत गृहम् । परीति किम् ? शतेन क्रीणाति । आत्यन्तिकः क्रय एषः । साधने इति

१ भजनार्थोऽत्र गमिः न गत्यर्थ इति न चतुर्थी ।

२ अप्राप्ते कर्मणि चतुर्थी भवति, पन्थास्तु प्राप्त एव इति चतुर्थ्यभावः ।

३. 'कर्तृकर्मणोः कृति' [२/४/८६] इत्यनेन तृणशब्दात् नित्य षष्ठी । युष्मच्छब्दात् तु 'वैकत्र द्वयोः कर्मणोः' [२/४/९२] इति षष्ठी-विकल्पाद् द्वितीया ।

किम् ? शताय परिक्रीतो[1] मासम् । इह मासान्मा भूत् ।

७५. पञ्चम्यपादाने ।

अपादाने कारके वर्तमानाद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति । ग्रामादागच्छति । पर्वतादवरोहति । यवेभ्यो गा वारयति । कुसूलात् पचति । बलाहकाद् विद्योतते विद्युत् । चौराद् बिभेति ।

७६. पर्यपाभ्यां वर्जने ।

वर्जनेऽर्थे वर्तमानात्पर्यपाभ्यां युक्ताद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति । परि पाटलिपुत्राद् वृष्टो मेघः, परि परि पाटलिपुत्राद् वृष्टो मेघः, अप पाटलिपुत्राद् वृष्टो देवः—पाटलिपुत्रं वर्जयित्वेत्यर्थः । वर्जने इति किम् ? अपशब्दो मैत्रस्य ।

७७. आङावधौ ।

अवधिर्मर्यादा । अभिविधिरपि तद्विशेष एवेति तस्याऽपि ग्रहणम् । अवधौ वर्तमानादाङा युक्ताद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति । आ पाटलिपुत्राद् वृष्टो मेघः—पाटलिपुत्रमधिकृत्य तद्व्याप्याऽव्याप्य वा वृष्ट इत्यर्थः । आ कुमारेभ्यो यशो गतं गौतमस्य ।

७८. आख्यातर्युपयोगे ।

आख्याता—प्रतिपादयिता । तत्र वर्तमानाद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति उपयोगे—नियमपूर्वक-विद्याग्रहणविषये । उपाध्यायादधीते । आचार्यादागमयति । साधोः शृणोति । प्रत्येकबुद्धादधिगच्छति । आख्यातरीति किम् ? उपाध्यायात् शास्त्रमागमयति । अत्र शास्त्रान्मा भूत् । उपयोग इति किम् ? नटस्य शृणोति । उपयोगविवक्षायां त्वत्रापि भवति—नटाद् भारतं शृणोति । अपादानत्वेनैव सिद्धे उपयोगे एवेति नियमार्थम् ।

७९. यतः प्रतिनिधिप्रतिदाने प्रतिना ।

प्रतिनिधीयत इति प्रतिनिधिर्मुख्यसदृशोऽर्थः । प्रतिदानं गृहीतस्य प्रत्यर्पणम् । प्रतिना योगे यतः प्रतिनिधिर्यतश्च प्रतिदानं तद्वाचिनो गौणान्नाम्नः पञ्चमी विभक्तिर्भवति । प्रद्युम्नो वासुदेवात् प्रति, अभयकुमारः श्रेणिकतः प्रति—सदृश इत्यर्थः । तिलेभ्यः प्रति माषानस्मै प्रयच्छति—तिलान् गृहीत्वा माषान् ददातीत्यर्थः । एवं सर्पिषोऽस्मै तैलं प्रति सिञ्चति । सर्पिषोऽस्मै तैलं प्रति सिक्त्वा व्रजति । यत इति किम् ? तिलेभ्यः प्रति माषान् प्रयच्छति । अत्र माषशब्दान्मा भूत् । प्रतिनिधिप्रतिदान इति किम् ? वृक्षं प्रति विद्योतते विद्युत् ।

८०. गम्ययपः कर्माधारयोः ।

गम्यस्याऽप्रयुज्यमानस्य यबन्तस्य कर्मणि आधारे च वर्तमानाद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति । द्वितीया-सप्तम्योरपवादः । प्रासादात् प्रेक्षते, आसनात् प्रेक्षते—प्रासादमारुह्य आसने चोपविश्य प्रेक्षते इत्यर्थः । गम्यग्रहणं किम् ? प्रासादमारुह्य शेते । आसने उपविश्य भुङ्क्ते । यब्ग्रहणं किम् ? प्रविश पिण्डीम्, प्रविश तर्पणम्, वृक्षे शाखा, ग्रामे चैत्रः । अत्र हि भक्षय-कुरु-आस्ते-वसतीनां गम्यता न तु यपः । ननु यथा कुसूलादादाय पचति, कुसूलात्पचति इत्यत्रादानाङ्गे पाके पचेर्वर्तनादुपात्तविषयमेतदपादानमिति पञ्चमी भवति । एवमिहापि अपक्रमणाङ्गे दर्शने दृशेर्वर्तनाद् भविष्यतीति किमनेन ?

---

1 क्रीत इति रूपं कर्मणि कर्तरि वा । तथाहि—परिक्रीयते स्म परिक्रीतः । कः ? कर्मतापन्नश्चैत्रः । क ? मासम् । कोऽर्थः ? मासे । यद्वा परिक्रीणीते स्म कर्तरि क्तः कर्मणोऽविवक्षितत्वात् । अथात्र मासमिति कर्म विद्यते, तत्कथं कर्तरि क्तः ? उच्यते—मासमित्यत्र 'कालाध्वभाव···' [२/४/५८] इत्यनेन आधारस्य युगपत् कर्मसंज्ञाऽकर्मसंज्ञा च । तत्र कर्मसंज्ञायां कर्मणि द्वितीया, अकर्मसंज्ञायां तु कर्तरि क्तः ।

सत्यम्, किंतु आरुह्य उपविश्येति यबन्तार्थोऽपि गम्यते। ततो यथा यबन्ते प्रयुज्यमाने कर्माधारयोर्द्वितीयासप्तम्यौ भवतः तद्वदप्रयुज्यमानेऽपि तदर्थप्रतीतेस्ते प्रसज्जेयातामिति सूत्रमारभ्यते।

८१. प्रभृत्यन्यार्थाराद्दिक्शब्दैः।

प्रभृत्यर्था, अन्यार्था, आरात्, दिक्शब्द—इत्येतैर्युक्ताद् गौणान्नाम्नः पञ्चमी विभक्तिर्भवति। प्रभृत्यर्थः—ततः प्रभृति, कार्त्तिक्याः प्रभृति, आरभ्य ग्रीष्मात्, आरभ्य बाल्यात्। अन्यार्थः—अन्यो मैत्रात्, भिन्नश्चैत्रात्, व्यतिरिक्तः पटात्, *विलक्षणोऽश्वात्, पृथग्गजात्, इतरश्चैत्रात्, हिरुक् गार्ग्यात्। आरादित्यव्ययं दूरसमीपयोर्वाचकं, तेन तद्योगे* वक्ष्यमाणस्य **'दूरान्तिकार्थैर्बहिर्भिः'** [२/४/८४] इत्यस्यापवादोऽयम्। आराद् ग्रामात् क्षेत्रम्, आरान्मैत्रात्पीठम्। **दिक्शब्दः**—ग्रामात्पूर्वस्यां दिशि वसति, ग्रामादुत्तरस्यां दिशि वसति। दिशि दृष्टा शब्दाः दिक्शब्दा इति देशकालादिवृत्तिनाऽपि भवति। पूर्वं उज्जयिन्या गोनर्दः, उत्तरो विन्ध्यात्पारियात्रः, पूर्वो ग्रीष्माद् वसन्तः, पश्चिमो रामाद्युधिष्ठिरः, प्राग्ग्रामात्, प्रत्यग्ग्रामात्, उदग्ग्रामात्, प्राचीनं ग्रामादाम्राः, दक्षिणाहि ग्रामात्, उत्तराहि ग्रामात्, दक्षिणा ग्रामात्, उत्तरा ग्रामात्।

८२. ऋणाद्धेतोः।

फलसाधनयोग्यः पदार्थो हेतुः। हेतुभूतं यदृणं तद्वाचिनो गौणान्नाम्नः पञ्चमी विभक्तिर्भवति। [illegible]। शताद् बद्धः, सहस्राद् बद्धः। हेतोरिति किम्? शतेन बद्धः, शतेन बन्धितः, शतेन चैत्रेण बन्धितः। कर्तरि प्रयोज्ये प्रयोजके च कर्तृलक्षणा तृतीया भवति। हेतुर्हि फलसाधनयोग्यः पदार्थः कर्त्रादिभ्योऽन्य उच्यते इति कर्तुर्हेतुत्वं न।

८३. गुणादस्त्रियां वा।

हेतोरित्यनुवर्तते। अस्त्रियां वर्तमानाद् हेतुभूतगुणवाचिनो गौणान्नाम्नः पञ्चमी विभक्तिर्वा भवति। पक्षे हेतुलक्षणा तृतीया। जाड्यात् जाड्येन वा बद्धः। मोहात् मोहेन वा बद्धः। पाण्डित्यात् पाण्डित्येन वा मुक्तः। ज्ञानात् ज्ञानेन वा मुक्तः। गुणादिति किम्? धनेन कुलम्। अस्त्रियामिति किम्? बुद्ध्या मुक्तः, प्रज्ञया मुक्तः, विद्यया यशः।

८४. दूरान्तिकार्थबहिर्भिः।

दूरार्थैरन्तिकार्थैः बहिःशब्देन च योगे गौणान्नाम्नः पञ्चमी विभक्तिर्वा भवति। पक्षे कारकशेषत्वात् षष्ठी। दूरं ग्रामात् ग्रामस्य वा, विप्रकृष्टं ग्रामात् ग्रामस्य वा। अन्तिकं ग्रामात् ग्रामस्य वा, अभ्याशं ग्रामात् ग्रामस्य वा, सन्निकृष्टं ग्रामात् ग्रामस्य वा। आराच्छब्दयोगे तु **'प्रभृत्यन्यार्था…'** [२/४/८१] इति सूत्रेण नित्यमेव पञ्चमी। [illegible] दूरं हितं ग्रामात् ग्रामस्य वा भूयादित्यादौ हितादियोगे पञ्चम्यभावपक्षे **'हितसुखाभ्याम्'** [२/४/३२] [illegible] चतुर्थी कस्मान्न भवति? उच्यते—हितसुखादियोगे सा चतुर्थी। इह तु दूरान्तिकादिनैव योगो न तु हितादिनेति न भवति। यदा तु हितादिना विशेष्यतया योगस्तदा चतुर्थी भवत्येव। बहिर्ग्रामात् ग्रामस्य वा।

८५. असत्त्वे स्तोकाल्पकृच्छ्रकतिपयेभ्यः साधने।

असत्त्वं—अद्रव्यम्। असत्त्वे वर्तमानेभ्यः स्तोकादिभ्यो नामभ्यः साधने पञ्चमी विभक्तिर्वा भवति। स्तोकान्मुक्तः, स्तोकेन मुक्तः। अल्पान्मुक्तः, अल्पेन मुक्तः। कृच्छ्रान्मुक्तः, कृच्छ्रेण मुक्तः। कतिपयान्मुक्तः, कतिपयेन मुक्तः। असत्त्वे इति किम्? स्तोकेन विषेण हतः। अल्पेन मधुना मत्तः। साधने इति किम्? स्तोकं चलति। अत्र क्रियाविशेषणे मा भूत्। इह च स्तोकादीनामसत्त्ववाचित्वात् द्वित्वबहुत्वासंभवे एकवचनमेव।

८६. अज्ञाने ज्ञः षष्ठी।

अज्ञानार्थे वर्तमानस्य जानातेः साधने वर्तमानाद् गौणान्नाम्नः षष्ठी विभक्तिर्भवति। [illegible] भिन्नविभक्तिविधानात्। सर्पिषो जानीते—सर्पिषा साधनभूतेन प्रवर्तते इत्यर्थः। प्रवृत्तिरत्र जानातेः [illegible] जानीते,

सर्पिषां जानीते। अथवा सर्पिषि रक्तो विरक्तो वा चित्तभ्रान्त्या सर्वमेवोदकादि सर्पीरूपेण प्रतिपद्यते इति मिथ्याज्ञानवचनोऽत्र जानाति। मिथ्याज्ञानं चाऽज्ञानमेव भवति। अज्ञाने इति किम्? स्वरेण पुत्रं जानाति। साधने इति किम्? तैलं सर्पिषो जानाति—तैलं सर्पीरूपेण प्रतिपद्यते इत्यर्थः। अत्र तैलात् कर्मणो मा भूत्। तृतीयापवादो योगः।

८७. शषे।

कर्मादिभ्योऽन्य.[1] कर्माद्यविवक्षालक्षणोऽश्रूयमाणक्रिय श्रूयमाणक्रियो वाऽस्येदंभावरूप स्वस्वामिभावादि संबन्धविशेष शेष.। तत्र वर्तमानाद् गौणान्नाम्न षष्ठी विभक्तिर्भवति। राज्ञ पुरुष, उपगोरपत्यम्, पशो पाद, वृक्षस्य शाखा, क्षीरस्य विकार., गवां समूह, कुम्भस्य समीपम्, पृथिव्या स्वामी, न माषाणामश्नीयात्, सुभाषितस्य शिक्षते, न ते सुखस्य जानते, न तस्य सायमश्नीयात्, अन्नस्य नो देहि, अक्षाणां दीव्यति, घ्नत. पृष्ठ ददाति, नटस्य श्रृणोति, वृक्षस्य पर्णं पतति, महतां विभाषते इत्यादि[2]। कथं पुनः कर्मादीना विद्यमानानामप्यविवक्षा? उच्यते—यथा सूक्ष्मोदरा कन्या अनुदरा गीयते, अल्पलोमिका एडका अलोमिका कथ्यते तथैव विद्यमानापि कर्मादिशक्ति अविवक्षावशाद् अविद्यमानवद् भवति। प्रथमापवादो योगः।

८८. रिरिष्टात्स्तावस्तावतसावसन्तै।

रि, रिष्टात्, स्तात्, अस्तात्, अतस्, आत्, अस्—इत्येतैः प्रत्ययान्तैर्युक्ताद् गौणान्नाम्न षष्ठी विभक्तिर्भवति। रि—उपरि ग्रामस्य। रिष्टात्—उपरिष्टात् ग्रामस्य। स्तात्—परस्तात् ग्रामस्य। अस्तात्—पुरस्तात् ग्रामस्य। अतस्—दक्षिणतो ग्रामस्य। आत्—पश्चाद् ग्रामस्य। अस्—पुरो ग्रामस्य, अधो ग्रामस्य। पञ्चम्यपवादो योग।

८९. कर्तृकर्मणोः कृति।

कृत्प्रत्ययप्रयोगे कर्तरि कर्मणि च गौणान्नाम्न. षष्ठी विभक्तिर्भवति। कर्तरि—भवतः शायिका, भवत आसिका, भवतः स्वापः, भवत आसना। कर्मणि—विश्वस्य ज्ञाता, तीर्थस्य कर्ता, अपां स्रष्टा, पुरां भेत्ता, पौत्राणां दर्शकः, यवानां लावक, ओदनस्य भोजक, ग्रामस्य गमनम्। कर्तृकर्मणोरिति किम्? शरेण भेत्ता। क्रियाविशेषणस्याऽपि कर्मत्वाऽभावान्न भवति। साधु पक्ता, स्तोक पक्ता। कृतीति किम्? कट करोति, कृतपूर्वी कटम्, भुक्तपूर्वी ओदनम्। अत्र त्यादितद्धितयो कर्मणि मा भूत्।

९०. उभयप्राप्तौ कर्तरि वा।

उभयो. कर्तृकर्मणो. प्राप्तिर्यस्मिन् कृति तत्र कर्तरि गौणान्नाम्न षष्ठी विभक्तिर्वा भवति। पूर्वेण नित्य प्राप्ते कर्तरि विकल्पार्थं वचनम्। आश्चर्यो गवा दोहोऽगोपालकेन अगोपालकस्य वा। साधु खलु पयस पान यज्ञदत्तेन यज्ञदत्तस्य वा। विचित्रा सूत्राणां कृति सरस्वत्या. सरस्वत्या वा। शब्दानामनुशासनमाचार्येण आचार्यस्य वा। कर्तरीति किम्? शब्दानामनुशासनमाचार्येण आचार्यस्य वा इत्यत्र शब्दशब्दात्कर्मणि विकल्पो न भवति। अन्ये तु घञलप्रत्यययोरुभयप्राप्तौ कर्मण्येव षष्ठीमिच्छन्ति, न कर्तरि। आश्चर्यो गवा दोहोऽगोपालकेन। आश्चर्य इन्द्रियाणां जयो यूना।

९१. नस्त्र्यऽणकयोः।

स्त्रीप्रत्यययो अ, णक—इत्येतयो प्रयोगे **'उभयप्राप्तौ कर्तरि वा'** [२/४/९०] यदुक्तं तन्न भवति। चिकीर्षा

---

१ समस्तेभ्यः कारकेभ्य।

२. राज्ञ पुरुष इत्यादिषु यथाक्रम सबन्ध कथ्यते—स्वस्वामिभावसंबन्ध, जन्यजनकसबन्ध, अवयवावयविसंबन्ध, आधाराधेयसबन्ध, प्रकृतिविकारभावसबन्ध, समूहसमूहिभावसबन्ध, समीपसमीपिभावसबन्ध, पाल्यपालकभावसबन्ध, आश्याशनभावसंबन्ध, शिक्षणीयशिक्षणभावसबन्ध, ज्ञानज्ञेयभावसबन्ध, आप्याशनभावसबन्ध, भक्ष्यभक्षणभावसबन्ध, देवनद्यूतभावसंबन्ध, दानदानिविषयसबन्ध, श्रवणश्रवणावधिभावसबन्ध, पतनपतनावधिभावसबन्ध, विभाष्यविभाषणभावसंबन्ध इत्यादि।

मैत्रस्य काष्ठानाम् । 'शंसिप्रत्ययात्' [५/४/१०१] इति अः प्रत्ययः । भेदिका चैत्रस्य काष्ठानाम् । ण्यन्तभिदेस्तु भेदिका चैत्रस्य मैत्रस्य काष्ठानाम् । भावे णकः ।

९२. वैकत्र द्वयोः कर्मणोः ।

द्विकर्मकेषु धातुषु द्वयो कर्मणोरेकत्र—एकतरस्मिन् कर्मणि षष्ठी विभक्तिर्वा भवति । अजाया नेता स्रुघ्नं स्रुघ्नस्य वा । अथवा अजामजाया वा नेता स्रुघ्नस्य । पयसो दोहको गां गोर्वा । यदि वा पयः पयसो वा दोहको गोः । अन्ये तु नीवह्यादीनां द्विकर्मकाणा गौणे कर्मणि, दुहादीनां तु प्रधाने विकल्पमिच्छन्ति । उभयत्रापि नित्यमेवेत्यन्ये ।

९३. कृत्यानां कर्त्तरि ।

वेत्यनुवर्तते । कर्तृकर्मणोरिति नित्यं षष्ठी प्राप्ता कर्तरि विकल्प्यते । कृत्यसंज्ञकानां प्रत्ययाना प्रयोगे कर्तरि गौणान्नाम्न षष्ठी विभक्तिर्वा भवति । पक्षे तृतीया । भवत कार्य कटः, भवता कार्य कट । कर्तव्य, करणीय, देय, कृत्यो वा कट । कर्तरीति किम् ? गेयो माणवको गाथानाम्[१] ।

९४. न द्वयोरुभयप्राप्तौ[२] ।

उभयप्राप्तौ कृत्ये द्वयो कर्तृकर्मणो षष्ठी विभक्तिर्न भवति । नेतव्या ग्राममजा चैत्रेण । कष्टव्या ग्राम शाखा मैत्रेण । जेतव्य शत मैत्रश्चैत्रेण । उभयप्राप्ताविति किम् ? एकैकप्राप्तौ भवत्येव—उपस्थानीय पुत्र पितु । उपस्थानीयः पिता पुत्रस्य । पूर्वप्रयोगे उपतिष्ठते इति कर्तर्यनीय, पितृशब्दात् कर्मणि षष्ठी । द्वितीये तु उपस्थीयते कर्मण्यनीय, पुत्रशब्दात् कर्त्तरि षष्ठी ।

९५. तृन्नुदन्ताव्ययक्वस्वानशतृक्तवतुकिखलर्थानाम् ।

नेत्यनुवर्तते । तृन्नादिसबन्धिनो कर्तृकर्मणो प्राप्ता षष्ठी न भवति । तृन्—वदिता जनापवादान् । उदन्त—कन्यामलंकरिष्णु, शरान् क्षिप्णु, ओदन बुभुक्षु, देवान् वन्दारु, धारुर्वत्सो मातरम्, श्रद्धालुस्तत्त्वम् । अव्यय—कटं कृत्वा, पय पाय पाय व्रजति, ओदन भोक्तुं व्रजति । क्वसु—ओदन पेचिवान्, तत्त्व विद्वान् । आनेति उत्सृष्टानुबन्धनिर्देशात् कानशानानशां ग्रहणम् । कान - कट चक्राण, वचनमनूचान । शान—ओदन पचमान । आनश्—मलय पवमानः । शतृ—कट कुर्वन् । क्तवतु—कटं कृतवान् । कि—परिषहान् सासहि, कट चक्रि । खलर्थ—ईषत्कर कटो भवता, सुज्ञान तत्त्व भवता ।

९६. अकमेरुकस्य ।

कमिवर्जितस्य उकप्रत्ययान्तस्य योगे कर्मणि षष्ठी विभक्तिर्न भवति । भोगानभिलाषुक । अकमेरिति किम् ? लक्ष्म्या कामुको हरि ।

९७. णकस्य भविष्यति ।

भविष्यत्यर्थे वर्तमानस्य णकप्रत्ययान्तस्य कर्मणि षष्ठी विभक्तिर्न भवति । साधून् पालकोऽवतरति । ओदनं भोजको व्रजति । भविष्यतीति किम् ? यवाना लावक, काव्यस्य कारकः । 'णकतृचौ' [५/१/५९] इति सामान्यो णकः ।

९८. इन आधमर्ण्ये च ।

चकाराद् भविष्यतीत्यनुवर्तते । आधमर्ण्ये भविष्यति च वर्तमानस्य इन्प्रत्ययान्तस्य कर्मणि षष्ठी विभक्तिर्न

---

१. अत्र व्यावृत्तेः गाथानामित्यत्र कर्मणि साफल्यं माणवकात् तु अगौणत्वात्प्राप्तिरेव नास्ति ।

२. ननु द्विकर्मकेषु धातुषु तावदय प्रतिषेधः, तत्रैवोभयप्राप्तिसंभवात् ।

भवति। इन इति इन्णिनोर्ग्रहणम्। शत दायी, सहस्रं दायी—आधमर्ण्ये णिन्। ग्राम गमी—औणादिक इन्। ग्राममागामी—औणादिको णिन्। आधमर्ण्ये चेति किम्? अवश्यकारी कटस्य, साधुदायी वित्तस्य।

९९. द्विषः शतुर्वा।

शतृप्रत्ययान्तस्य द्विष्धातो. कर्मणि गौणान्नाम्न षष्ठी विभक्तिर्वा भवति। चौरस्य चौर वा द्विषन्। **'तृन्नुदन्ता'**··· [२/४/६५] इति निषेधे प्राप्ते विकल्पोऽयम्।

१००. क्तस्य वर्तमानाधारयोः।

वर्तमाने आधारे च वर्तमानस्य क्तप्रत्ययस्य कर्तृकर्मणोः गौणान्नाम्न षष्ठी विभक्तिर्भवति। राज्ञामिष्टः, राज्ञा बुद्ध, राज्ञा मत., राज्ञा पूजित.। **'ञीविच्छाबोध'**··· [५/३/७१] इत्यादिना क्त। आधारे—इदमोदनस्य भुक्तम्, इदं सक्तूना पीतम्, इदमेषा शयितं हसितं वा। **'आहारार्थाच्चाधारे'** [५/१/१२] इति क्त। वर्तमानाधारयोरिति किम्? कटः कृतो मैत्रेण। ग्रामं गतो मैत्र.। ननु कथं शीलितो मैत्रेण, रक्षितश्चैत्रेण? उच्यते—नाय वर्तमानकाल किंतु वर्तमानता-प्रतीतिमूत.। **'कर्तृकर्मणोः कृति'** [२/४/८९] इत्येव सिद्धे नियमार्थ वचनम्।

१०१. भावे वा।

भावे विहितो यः क्तस्तस्य कर्तरि षष्ठी विभक्तिर्वा भवति। छात्रस्य हसितम्, छात्रेण हसितम्। मयूरस्य नृत्तम्, मयूरेण नृत्तम्। भावे इति किम्? चैत्रेण कृतम्।

१०२. आधारे सप्तमी।

आधारे वर्तमानाद् गौणान्नाम्न सप्तमी विभक्तिर्भवति। दिवि देवा., पर्यङ्के आस्ते, तिलेषु तैलम्, गुरौ वसति, युद्धे संनह्यते, अङ्गुल्यग्रे करिशतम्।

१०३. इष्टादीनः कर्मणि।

इष्टादिभ्यो विहितो य इन् तदन्तस्य कर्मणि वर्तमानाद् गौणान्नाम्न सप्तमी विभक्तिर्भवति। इष्टादिभ्य क्तान्तेभ्य इष्टमनेनेत्याद्यर्थे तद्धित इन् वक्ष्यते। इष्टी यज्ञोऽनेन—इष्टी यज्ञे। अधीत व्याकरणमनेन—अधीती व्याकरणे। आम्नात द्वादशाङ्गमनेन—आम्नाती द्वादशाङ्गे। परिगणित ज्योतिरनेन—परिगणिती ज्योतिषि। इष्टादीन इति किम्? कृतपूर्वी कटम्। भुक्तपूर्वी ओदनम्। कर्मणीति किम्? मासमधीती व्याकरणे। अत्र मासान्मा भूत्। मासस्येह न कर्मत्व, द्वितीया तु **'कालाध्वनो'**··· [२/४/५६] इत्यादिना।

१०४. साधुनिपुणाभ्यामर्चायामप्रत्यादौ।

प्रत्यादिप्रयोगाऽभावे साधु, निपुण—इत्येताभ्यां योगे गौणान्नाम्नः सप्तमी विभक्तिर्भवति अर्चाया गम्यमानायाम्। मातरि साधु, पितरि निपुण। अर्चायामिति किम्? साधुर्मैत्रः पितु—पितैव साधुमेन मन्यते इत्यनर्चा। अप्रत्यादाविति किम्? साधुर्मैत्रो मातरं प्रति, मातर परि, मातरमनु, मातरमभि। षष्ठ्यपवाद.।

१०५. साध्वसाधुभ्याम्।

अर्चायामेव सिद्धे साधुग्रहणं तत्त्वाख्यानार्थम्। प्रत्यादि वर्जयित्वा साधोरसाधोश्च प्रयोगे गौणान्नाम्न. सप्तमी विभक्तिर्भवति। साधुर्मैत्रो मातरि, असाधुर्मातुले। कथं तर्हि साधुर्भृत्यो राज्ञ इति? भृत्यापेक्षात्र षष्ठी न साध्वपेक्षा। साध्वपेक्षायां तु सप्तम्येव भवति। अप्रत्यादाविति किम्? साधुरसाधुर्वा मैत्रो मातरं प्रति, परि, अनु, अभि वा।

१०६. उपेनाऽधिकिनि[1] ।

उपेन युक्तादधिकिनि वर्तमानाद् गौणान्नाम्नः सप्तमी विभक्तिर्भवति । उपेत्यधिकाधिकिसंबन्धं द्योतयति । उप खार्यां द्रोणः—द्रोणोऽधिकः खार्या इत्यर्थः । उप निष्के कार्षापणः—कार्षापणोऽधिको निष्कस्येत्यर्थः[2] । उपेनेति किम् ? खार्या उपरि द्रोणः । अधिकिनीति किम् ? अधिके मा भूत् । तेनोप द्रोणे खारीति न भवति ।

१०७. स्वस्वामिनोरऽधिना ।

स्वे स्वामिनि च वर्तमानादधिना युक्ताद् गौणान्नाम्नः सप्तमी विभक्तिर्भवति । अधिः स्वस्वामिसंबन्धं द्योतयति । स्वे—अधि मगधेषु श्रेणिकः । अधि पञ्चालेषु ब्रह्मदत्तः । स्वामिनि—अधि श्रेणिके मगधाः । अधि ब्रह्मदत्ते पञ्चालाः । षष्ठीबाधनार्थो योगः ।

१०८. निमित्तात्कर्मसंयुक्तात् ।

कर्मसंयुक्तान्निमित्ताद् गौणान्नाम्नः सप्तमी विभक्तिर्भवति ।

> चर्मणि द्वीपिनं हन्ति, दन्तयोर्हन्ति कुञ्जरम् ।
> केशेषु चमरीं हन्ति, सीम्नि पुष्कलको हतः ।।

हेतौ प्राप्तायास्तृतीयाया अपवादः । सीमा—अंडकोशः । पुष्कलकः[3]—गन्धमृगः । कर्मसंयुक्तादिति किम् ? वेतनेन धान्यं लुनाति । नात्र वेतनं धान्येन संयुक्तम् ।

१०९. यस्य भावेन भावलक्षणम् ।

भावः—क्रिया । प्रसिद्धं लक्षणमप्रसिद्धं लक्ष्यम् । यस्य संबन्धिना भावेन क्रियया भावोऽपरक्रिया लक्ष्यते तस्मिन् वर्तमानाद् गौणान्नाम्नः सप्तमी विभक्तिर्भवति । गोषु दुह्यमानासु गतः, दुग्धास्वागतः । अत्र कालतः प्रसिद्धेन गवां दोहेन भावेनान्यस्य गमनमप्रसिद्धं लक्ष्यते । गम्यमानेनापि भावेन भावलक्षणो भवति । आम्रेषु कलायमात्रेषु[4] गतः, पक्वेष्वागतः । अत्र जातेष्विति गम्यते । गम्यमानमपि हि विभक्तेर्निमित्तं भवति । यथा—वृक्षे शाखा, ग्रामे चैत्रः । अत्र भवति वसति चेत्याधारनिमित्तं गम्यते । यत्र क्रियार्हाणां कारकत्वं तद्विपर्ययो वा, यथा—ऋद्धेषु भुञ्जानेषु दरिद्रा आसते, ऋद्धेषु आसीनेषु दरिद्रा भुञ्जते । यत्र क्रियानर्हाणामकारकत्वं तद्विपर्ययो वा, यथा—दरिद्रेष्वासीनेषु ऋद्धा भुञ्जते, दरिद्रेषु भुञ्जानेषु ऋद्धा आसते । तत्रापि भावो भावस्य लक्षणं भवतीत्यनेनैव सप्तमी । भावेनेति किम् ? यो जटाभिः स भुङ्क्ते । भावलक्षणमिति किम् ? यो भुङ्क्ते स देवदत्तः । इत्थंभूतलक्षणायास्तृतीयाया अपवादः ।

११०. गते गम्येऽध्वनोऽन्तेनैकार्थ्यं वा ।

कुतश्चिदवधेर्विवक्षितस्याऽध्वनोऽवसानमन्तः । यस्य भावेन भावलक्षणं तस्याऽध्वनोऽध्ववाचिशब्दस्याऽध्वन एवान्तेनान्तवाचिना सहैकार्थ्यं सामानाधिकरण्यं वा भवति । तद्विभक्तिस्तस्माद् भवतीत्यर्थः । गते गम्ये, गतशब्देऽप्रयुज्यमाने इत्यर्थः । गवीधुमतः सांकाश्यं चत्वारि योजनानि—चतुर्षु योजनेषु गतेषु भवतीत्यर्थः । एवं लोकमध्यात् लोकान्तमुपर्यधश्च सप्त रज्जूनामनन्ति । पक्षे पूर्वेण सप्तमी । गवीधुमतः सांकाश्यं चतुर्षु योजनेषु । गतेष्विति गम्यते । गते इति किम् ? दग्धेषु लुप्तेष्विति वा प्रतीतौ मा भूत् । गम्ये इति किम् ? गतशब्दप्रयोगे मा भूत् । गवीधुमतः सांकाश्यं चतुर्षु योजनेषु

---

१. अत्र यदधिकं तदधिकिन्यारूढमित्याधारविवक्षायां सप्तमी सिद्धैव विभक्त्यन्तरबाधनार्थं वचनम् ।

२. साधुर्भृत्यो राज्ञ इतिवन्निष्कशब्दस्याधिकशब्देन सह संबन्धाभावात् 'भूयसोऽधिकेन' [२/४/११७] इत्यनेन निष्कशब्दान्न पञ्चमी ।

३. अथवा पुष्कलकः सीमादिकार्थं निक्षिप्तः पाषाणः, स केनचित् सीमास्वामिना हतः—भिन्नः ।

४. कलायो मालवकप्रसिद्धोऽधमधान्यविशेषो मानमेषां स्यात् । 'मात्रट्' [७/४/३८] इत्यनेन मात्रट् ।

गतेषु भवति। अत्रकार्थ्यं न भवति। सप्तमी तु पूर्वेण नित्यमेव। अध्वन इति किम् ? कार्तिक्या आग्रहायणी मासे। अत्राप्यैकार्थ्याभावे पूर्वेण नित्य सप्तमी। अन्तेनेति किम् ? अद्य नद्यश्चतुर्षु गव्यूतेषु भोजनम्। भोजन हि भोक्तृधर्मो नाऽध्वनोऽन्त इति पूर्ववत् सप्तम्येव। नन्वन्तेन सहाऽध्वनोऽभेदोपचारात् सिद्धमेवैकार्थ्यं किमनेन ? सत्यम्, कालेप्येवं मा भूदिति वचनम्।

१११. षष्ठ्यनादरे।

वेत्यनुवर्तते। यस्य भावेन भावलक्षणं तस्मिन् भाववति वर्तमानाद् गौणान्नाम्नोऽनादरे गम्यमाने षष्ठी विभक्तिर्वा भवति। पक्षे पूर्वेण सप्तमी। रुदत्याः मातुः पुत्रः प्रव्रजति, रुदत्यां मातरि पुत्रः प्रव्रजति। क्रोशतो बन्धुवर्गस्य प्राव्राजीत्, क्रोशति बन्धुवर्गे प्राव्राजीत्। रुदन्तं क्रोशन्तं वाऽनादृत्य इत्यर्थः।

११२. निर्धारणेऽविभागे सप्तमी च।

जातिगुणक्रियादिभिः समुदायादेकदेशस्य बुद्ध्या पृथक्करणं निर्धारणम्। निर्धारणेऽर्थे वर्तमानाद् गौणान्नाम्नः षष्ठीसप्तम्यौ विभक्ती भवतः अविभागे—निर्धार्यमाणस्यैकदेशस्य समुदायेन सह कथंचिदैक्ये शब्दाद् गम्यमाने। क्षत्रियः पुरुषाणां पुरुषेषु वा शूरतमः। शालयः शूकधान्यानां शूकधान्येषु वा पथ्यतमाः। कृष्णा गवां गोषु वा सपन्नक्षीरतमा। धावन्तो गच्छतां गच्छत्सु वा शीघ्रतमाः। युधिष्ठिरः कुरूणां कुरुषु वा श्रेष्ठतमः। अविभागे इति किम् ? माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। पञ्चालाः कुरुभ्यः संपन्नतराः। मैत्रश्चैत्रात् पटुः। अयमस्मादधिकः। अत्र हि शब्दाद् भेद एव प्रतीयते न तु कथंचिदैक्यमिति न भवति। पञ्चमीबाधनार्थं वचनम्। अन्ये तु पञ्चमीमपीच्छन्ति। गोभ्यः कृष्णा सपन्नक्षीरतमा।

११३. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैर्वा।

स्वाम्यादिभिर्युक्ताद् गौणान्नाम्नः सप्तमी विभक्तिर्वा भवति। पक्षे शेषषष्ठी। गवां गोषु वा स्वामी। गवां गोषु वा ईश्वरः। गवां गोषु वा अधिपतिः। गवां गोषु वा दायादः। गवां गोषु वा साक्षी। गवां गोषु वा प्रतिभूः। गवां गोषु वा प्रसूतः। स्वामीश्वराधिपतीति पर्यायग्रहणान्नेह—ग्रामस्य राजा, ग्रामस्य पतिः।

११४. कृत्वोर्थैः कालादाधारे।

कृत्वोऽर्थानां प्रत्ययानां प्रयोगे आधारे वर्तमानात् कालवाचिनो गौणान्नाम्नः सप्तमी विभक्तिर्वा भवति। पक्षे शेषषष्ठी। पञ्चकृत्वोऽहनि भुङ्क्ते, पञ्चकृत्वोऽह्नो भुङ्क्ते। द्विरह्नि पठति, द्विरह्नः पठति। कृत्वोर्थैरिति किम् ? अह्नि शेते, रात्रौ शेते। कालादिति किम् ? द्विः कांस्यपात्र्यां[1] भुङ्क्ते। आधारे इति किम् ? द्विरह्नो भुङ्क्ते। आधारस्याधारत्वाविवक्षायां पक्षे शैषिकी षष्ठी सिद्धैव। नियमार्थं तु वचनम्। तेन प्रत्युदाहरणेषु शेषे षष्ठी न भवत्येव।

११५. आयुक्तकुशलाभ्यामासेवायाम्।

आसेवा—तत्परता। आयुक्त, कुशल,—इत्येताभ्यां योगे आधारे वर्तमानाद् गौणान्नाम्नः सप्तमी विभक्तिर्वा भवति आसेवायां गम्यमानायाम्। पक्षे शेषषष्ठी। आयुक्तः कटकरणे कटकरणस्य वा। कुशलो विद्याग्रहणे विद्याग्रहणस्य वा। आसेवायामिति किम् ? आयुक्तो गौः शकटे। आकृष्य युक्तो न तु तत्परः। कुशलश्चित्रकर्मणि न तु करोति।

११६. कालाऽध्वनि सप्तमीपञ्चम्यौ क्रियामध्ये।

क्रिययोर्मध्यं क्रियामध्यम्। क्रियामध्ये स्थितौ कालाऽध्वानौ तत्र वर्तमानाद् गौणान्नाम्नः सप्तमीपञ्चम्यौ विभक्ती भवतः। अद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद् वा भोक्ता। इह द्वयोर्भुक्तिक्रिययोर्मध्ये द्व्यहः कालः। इहस्थोयमिष्वासः क्रोशे क्रोशात् वा लक्ष्यं विध्यति। अत्र धानुष्कावस्थानमिषुमोक्षो वा एका क्रिया, लक्ष्यव्यधश्च द्वितीया, तन्मध्ये क्रोशोऽध्वा। कालाध्वनीत्येक-

1. कसायेद कसीय 'तस्यं विकारः प्रकृतौ' [७/३/४५] इतीय। ततः कंसीयस्य विकार इति विग्रहे 'कंसीयपरशव्याभ्यां ..' [६/३/४३] इति ञ्यो यलुक् च।

वचनं सप्तमीपञ्चम्याविति द्विवचनं यथासंख्यनिवृत्त्यर्थम् । ननु च द्व्यहे पूर्णे भुङ्क्ते, क्रोशे स्थितं लक्ष्यं विध्यति इत्याधार एव सप्तमी । द्व्यहमतिक्रम्य अनुभुङ्क्ते, क्रोशान्निःसृत्य स्थित लक्ष्यं विध्यति इति **'गम्ययपः कर्माधारयोः'** [२/४/८०] अपादाने च पञ्चमी सिद्धैव । सत्यम्, यदा त्वस्यैव क्रियाकारकसंबन्धस्य फलभूता शेषसंबन्धलक्षणोत्तरावस्था विवक्ष्यते, यथा—द्विरह्नो भुङ्क्ते, योजनस्य शृणोतीति तदापि क्रियामध्ये षष्ठी मा भूदिति वचनम् ।

११७. भूयसोऽधिकेन ।

अधिरूढ इत्यर्थे अधिकशब्दो निपात्यते । अधिरूढ इति कर्तरि कर्मणि च क्तो भवति । तत्र यदा कर्तरि तदा अधिक इत्यनेनाऽल्पीयानुच्यते । यदा तु कर्मणि तदा भूयान् । तत्र सामर्थ्यादल्पीयोवाचिना अधिकेन युक्ताद् भूयोवाचिनो गौणान्नाम्न सप्तमीपञ्चम्यौ विभक्ती भवत. । अधिको[1] द्रोण. खार्यां खार्या वा ।

११८. तृतीयाऽल्पीयसः ।

अधिकशब्देन सामर्थ्याद् भूयोवाचिना युक्तादल्पीयोवाचकाद् गौणान्नाम्नस्तृतीया विभक्तिर्भवति । अधिका खारी द्रोणेन ।

११९. प्रसितोत्सुकावबद्धैराधारे वा ।

प्रसित, उत्सुक, अवबद्ध—इत्येतैर्योगे आधारेऽर्थे गौणान्नाम्नस्तृतीया विभक्तिर्वा भवति । प्रकर्षेण सितो बद्ध—प्रसित. । केशै केशेषु वा प्रसित·—नित्यप्रसक्त इत्यर्थः । गृहेण गृहे वा उत्सुकः । केशै. केशेषु वा अवबद्धः । आधारे इति किम् ? मनसा प्रसित , मनसोत्सुक., मनसाऽवबद्ध । साधनतृतीयाया विकल्पो मा भूत् । अवबद्धोत्सुकशब्द-साहचर्यात्[2] तदर्थ एव प्रसितशब्दोऽत्र गृह्यते । स्थाल्या पच्यते इत्यादिवदाधारस्य साधनविवक्षायां तृतीया सिध्यति संबन्ध-विवक्षायां तु षष्ठी मा भूदिति वचनम् ।

१२०. नक्षत्रात् काले ।

काले वर्तमानान्नक्षत्रवाचिनो गौणान्नाम्न आधारे तृतीया विभक्तिर्वा भवति । पुष्येण पायसमश्नीयात्, पुष्ये पायसमश्नीयात् । मघाभिर्घृतौदनम्, मघासु घृतौदनम् । काले इति किम् ? पुष्येऽर्कः, मघासु ग्रह । अध्वनि[3] मा भूत् । चित्रासु[4] जाता चित्रा माणविका तस्या चित्रायामास्ते । अत्र माणविकायां मा भूत् । नक्षत्रादिति किम् ? **'तिलपुष्पेषु यत् क्षीरं, तिलच्छेदेषु यद्दधि'** । अत्र तिलपुष्पतिलच्छेदशब्दौ स्वावच्छिन्ने[5] काले वर्तेते इति प्राप्नोति । आधारे इति किम् ? अद्य पुष्य विद्धि । पूर्ववत् षष्ठीबाधनार्थं वचनम् ।

१२१. पृथग्नानाभ्याम् ।

वेत्यनुवर्तते । पृथग्, नाना—इत्येताभ्यां युक्ताद् गौणान्नाम्नस्तृतीया विभक्तिर्वा भवति । पक्षे अन्यार्थत्वात् **'प्रभृत्यन्यार्थ···'** [२/४/८१] इत्यादिना पञ्चमी । पृथग् मैत्रेण मैत्राद् वा । नाना चैत्रेण चैत्राद् वा ।

१२२. तुल्यार्थैस्तृतीयाषष्ठ्यौ ।

तुल्यार्थैर्योगे गौणान्नाम्नस्तृतीयाषष्ठ्यौ विभक्ती भवतः । कृष्णेन तुल्यः, कृष्णस्य तुल्यः । रामेण समानः,

---

१. न्यूनार्थोऽयं अत्र अधिकशब्दः ।

२ ननु प्रसितशब्दस्य शुक्लगुणवचनस्य क्रियार्थस्य च संभवात् उभयार्थस्यापि ग्रहणप्रसङ्गः इत्याह ।

३. अत्र विशिष्टतारकावच्छिन्ने क्षेत्रे पुष्यमघाशब्दौ वर्तेते न काले इति ।

४. यद्यपि चित्राशब्दो माणविकाया वर्तमानः कालमप्युपाश्रित्वेनोपादत्ते । यतश्चित्रासु जाता या सा चित्रा इति विशेषणत्वेन प्रतीयमानत्वात् कालेऽपि वृत्तिः संभाव्यते । तथापि तत्र कालस्य गौणत्वात् गौणमुख्ययोश्च मुख्ये कार्यसंप्रत्ययाच्च भवति ।

५. स्वेनात्मना अवच्छिद्यते यस्तिलच्छेदतिलपुष्पविशिष्ट. कालः । कोऽर्थः ? यत्र काले तिला. पुष्प्यन्ति तिलानां छेदश्च भवतीत्यर्थः ।

रामस्य समानः । गुरुणा समः, गुरोः समः । चैत्रेण सदृशः, चैत्रस्य सदृशः । अर्थग्रहणं पर्यायार्थम् । उपमा नास्ति कृष्णस्य, तुला नास्ति सनत्कुमारस्य इत्यादौ उपमादयो न तुल्यार्था इति न भवति । गौणाधिकाराच्च गौरिव गवयः, यथा गौस्तथा गवयः इत्यादौ न भवति । अनुवर्तमानेऽपि तृतीयाविकल्पे षष्ठीविधानं सप्तमीबाधनार्थम्, तेन गवां तुल्यः स्वामी, गोभिस्तुल्यः स्वामीत्यत्र **'स्वामीश्वराधिपति···'** [२/४/११३] इत्यादिना सप्तमी न भवति ।

१२३. एनेनाऽनञ्चेर्द्वितीयाषष्ठ्यौ ।

एनप्रत्ययान्तेन युक्ताद् गौणान्नाम्नो द्वितीयाषष्ठ्यौ विभक्ती भवतो न चेत्सोऽञ्चेः परो विहितो भवति । पूर्वेण ग्रामं ग्रामस्य वा । अपरेण ग्रामं ग्रामस्य वा । दक्षिणेन विजयार्धं विजयार्धस्य वा । उत्तरेण हिमवन्तं हिमवतो वा । अनञ्चेरिति किम् ? प्राग्ग्रामात्, प्रत्यग्ग्रामात्, उदग्ग्रामात् ।

१२४. ऋते द्वितीयापञ्चम्यौ ।

ऋते इत्येतदव्ययं वर्जनार्थम् । तेन युक्ताद् गौणान्नाम्नो द्वितीयापञ्चम्यौ विभक्ती भवतः । ऋते ज्ञानं ज्ञानाद् वा न मुक्तिः । ऋते धर्मं धर्माद् वा कुतः सुखम् ।

१२५. विना तृतीया च ।

विनाशब्देन युक्ताद् गौणान्नाम्नस्तृतीया चाद् द्वितीयापञ्चम्यौ च विभक्ती भवतः । विना पापेन पापं पापाद् वा सर्वं फलति ।

१२६. दूरान्तिकार्थादसत्त्वात्सप्तमी ताश्च ।

ताश्चेति बहुवचनात् द्वितीयातृतीयापञ्चम्योऽनुवर्तन्ते । सत्त्वं—द्रव्यं ततोऽन्यदसत्त्वम् । असत्त्ववाचिनो दूरार्थादन्तिकार्थाच्च गौणान्नाम्नो द्वितीया-तृतीया-पञ्चमी-सप्तमी-विभक्तयो भवन्ति । दूरं, दूरेण, दूरात्, दूरे वा ग्रामात् ग्रामस्य वा वसति । एवं विप्रकृष्टं, विप्रकृष्टेन, विप्रकृष्टात्, विप्रकृष्टे वा ग्रामात् ग्रामस्य वा तिष्ठति । अन्तिकार्थः—अन्तिकं, अन्तिकेन, अन्तिकात्, अन्तिके वा ग्रामात् ग्रामस्य वा वसति । एवमभ्याशं, अभ्याशेन, अभ्याशात्, अभ्याशे वा ग्रामात् ग्रामस्य वा तिष्ठति । केचिद् दूरान्तिकार्थैः पञ्चम्यन्तैर्युक्तात् पञ्चमी नेच्छन्ति । तन्मते दूराद् ग्रामस्य, अन्तिकाद् ग्रामस्येत्येव भवति । न तत्सर्वसमतम् । पञ्चम्या अपि दर्शनात्—

दूरादावसथान्मूत्रं, दूरात्पादावसेचनम् ।
दूराच्च भाव्यं दस्युभ्यो दूराच्च कुपिताद् गुरोः ॥

असत्त्वादिति किम् ? दूरः पन्थाः, अन्तिकः पन्थाः, दूराय पथे देहि, अन्तिकाय पथे देहि, दूरस्य पथः स्वम्, अन्तिकस्य पथः स्वम् । कथं चिरं, चिरेण, चिराय, चिरात्, चिरस्येति ? विभक्तिप्रतिरूपका निपाता एते । यथा—परस्परं, परस्परेण, परस्परस्येत्यादयः ।

१२७. हेत्वर्थैस्तृतीयाद्याः ।

हेतुर्निमित्तं कारणमिति पर्यायाः । एतदर्थैः शब्दैर्युक्तात् प्रत्यासत्तेस्तैरेव[1] समानाधिकरणात् गौणान्नाम्नस्तृतीयाद्यास्तृतीयाचतुर्थीपञ्चमीषष्ठीसप्तम्यो भवन्ति । धनेन हेतुना, धनाय हेतवे, धनाद्धेतोः, धनस्य हेतोः, धने हेतौ वा वसति । एवं धनेन निमित्तेन, धनेन कारणेन, धनेनापदेशेन, धनेन प्रयोजनेनेत्यादयोऽपि । तत्सामानाधिकरण्याच्च हेत्वर्थेभ्योऽपि ता एव भवन्ति । प्रत्यासत्तेस्तैरेव समानाधिकरणादिति किम् ? अन्नस्य हेतुः । असर्वार्थमिदम् ।

---

१. हेत्वर्थैस्तु व्यधिकरणाद्धेतुसंबन्धे षष्ठ्येवास्ति । न तत्र तृतीयाद्या इति सामर्थ्याद्धेत्वर्थैः समानाधिकरणाद्धेतोरेव तृतीयाद्या भवन्तीति ।

१२८. सर्वविश्च सर्वाः ।

चकाराद् हेत्वर्थैरित्यनुवर्तते । हेत्वर्थैः शब्दैर्युक्तात् प्रत्यासत्तेस्तत्समानाधिकरणात् सर्वादिगौणान्नाम्नः सर्वा विभक्तयो भवन्ति । को हेतुर्वसति चैत्रः, कं हेतुं वसति, केन हेतुना, कस्मै हेतवे, कस्माद्धेतोः, कस्य हेतोः, कस्मिन् हेतौ । एवं यो हेतुः, यं हेतुम्, येन हेतुना, यस्मै हेतवे, यस्माद्धेतोः, यस्य हेतोः, यस्मिन् हेतौ । स हेतुः, तं हेतुम्, तेन हेतुना, तस्मै हेतवे, तस्माद्धेतोः, तस्य हेतोः, तस्मिन् हेतौ । सर्वो हेतुः, सर्वं हेतुम् । भवान् हेतुः, भवन्तं हेतुम्, भवता हेतुना इत्यादि । एवं किं कारणं, किं निमित्तं, किं प्रयोजनमित्यादि । तत्समानाधिकरणादिति किम्? कस्य हेतुः । प्रथमां नेच्छन्त्येके, द्वितीयामपरे ।

यथाऽपारं सिन्धुं तरति तरसा नाविकजनो,
विचित्रैः सद्यन्त्रैरुपजटितनावाऽतिविततम् ।
तथा श्रीमत्कालोर्विमलचरणानां करुणया,
द्वितीयं चाऽध्यायं कविरघुरिमं भावगहनम् ॥

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्लविरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः

प्रथमश्चरणः

१. ऊर्यादिच्व्यनुकरणोपसर्गच्विडाचो गतिर्धातोः प्राक् च ।

ऊर्यादयः, अनुकरणानि, उपसर्गसंज्ञकाश्च्व्यन्ताः, डाजन्ताश्च शब्दाः धातोः संबन्धिनो गतिसंज्ञका भवन्ति धातोश्च प्रागेव प्रयुज्यन्ते । ऊर्यादि —ऊरीकृत्य, उररीकृत्य, ऊरीकृतम्, उररीकृतम् । अनुकरणम्—खाट्कृत्य, फूत्कृत्य । कथं खाडिति[1] कृत्वा निरष्ठीवदिति ? इतिशब्देन व्यवधानान्न भवति । उपसर्गः—प्रकृत्य, पराकृत्य, प्रकृतम्, पराकृतम्, श्रत्कृत्य, श्रत्कृतम् । च्व्यन्ता.—शुक्लीकृत्य, घटीकृत्य । डाजन्ता.—पटपटाकृत्य, पटपटाकृतम् । अथ किं धातु. पूर्वं क्रियाविशेषकेणोपसर्गेण युज्यते अथवा प्रत्ययेनेति ? पूर्वं प्रत्ययेनैव युज्यते इति केचित् । प्रत्ययो हि क्रियां साधयति, तामुपसर्गो विशिनष्टि । सप्रत्ययस्यैव धातोरुपसर्गेण विशेषो वक्तुं शक्यो नाऽप्रत्ययस्य, तदयुक्तम् । यो हि धातूपसर्गयोरभिसबन्धस्त बुद्ध्याऽभ्यन्तरीकृत्य धातु प्रत्ययेन युज्यते । यस्माद्[2] विशिष्टैव क्रिया प्रत्ययेन साध्यते न तु प्रत्ययाल्लब्धस्वरूपा, पश्चादुपसर्गेण विशेष्यते । तस्मात्पूर्वमुपसर्गेण युज्यते इति युक्तम् । ततश्च समस्करोत्, संचस्कार—इत्यत्रान्तरङ्गत्वात् सुटि कृते प्रत्ययनिमित्ते अडागमद्विर्वचने भवत । पूर्वं प्रत्ययेन संबन्धे अकरोत् इति जाते सुटि संसकरोदित्यादि विरुद्धरूपता स्यात् । अपि च पूर्वं हि धातोः प्रत्ययेन संबन्धे आस्यते गुरुणा इति अकर्मकः, उपास्यते गुरुरिति सकर्मको धातु. केन स्यात् ? प्रत्ययसबन्ध विना क्रियाविशेषस्याऽनभिव्यक्तित्वाद् हेतो. धातो. पूर्वमुपसर्गो न युज्यतामिति न वक्तव्यम् । उक्त च—

> वीजकालेषु संबद्धा, यथा लाक्षारसादयः ।
> वर्णादिपरिणामेन, फलानामुपकुर्वते ॥१॥
> बुद्धिस्थादभिसंबन्धात् तथा धातूपसर्गयोः ।
> अभ्यन्तरीकृतो भेदः पदकाले प्रकाश्यते ॥२॥

यद्येवं तर्हि उपेत्य, अधीत्य—इत्यादावेत्वदीर्घत्वयोः कृतयोर्ह्रस्वाऽभावात् तुक् न प्राप्नोति । उच्यते—**असिद्धं बहिरङ्गमन्तरङ्गे** इति तुग्दृष्टौ एत्वदीर्घत्वेऽसिद्धे भविष्यतः । गतिसंज्ञाप्रयोजन तु 'गतिः' [१/१/५२, ३/१/८७] इत्यादि । धातोरिति प्राक् चेति चाधिकारो गतिसज्ञां यावत् । ऊर्यादयो यथा—ऊरी, उररी—अङ्गीकरणविस्तारयोः । उरुरी—अङ्गीकारे । एते त्रयो भृशार्थप्रशंसयोरपि । पाम्पी—विध्वंसमाधुर्यकरुणविलापेषु । ताली, आताली—वर्णोत्तमार्थयोः । धूशी—कान्तिकाङ्क्षयो. । पाम्प्यादयो विस्तारेऽपि । शकला, संशकला, ध्वंशकला, भ्रंशकला, आलम्बी, केवाशी, शेवाली, पार्दाली, मस्मसा, मसमसा—एते हिंसायाम् । आद्याश्चत्वारः परिभवेऽपि । ततः परे चत्वारश्चाविष्कारेऽपि । अन्त्यौ च द्वौ चूर्णसंवरणयोरपि । पार्दाली शब्दार्थेऽपि । मस्मसा, मसमसा—अनुकरणेऽपि । केचित् तु मस्मसा इत्यत्र ऋकारौ निपात्य मृस्मृसा इति पठन्ति । केचिदालम्बीस्थाने आलोष्ठीति पठन्ति । गुलुगुधा—क्रीडापीडयोः । सजूः—सहार्थे । फलू, फली, विक्ली, आक्ली—एते विकारे । आद्यौ क्रियासंपत्तिकर्मसिद्ध्यकण्टकेष्वपि । अन्त्यौ तु विचारविभागयोरपि । श्रौषट्, वौषट्, वषट्, स्वाहा, स्वधा—देवतासप्रदानदानमात्रयो. । वषट् पूजायामपि । स्वधा—तृप्तिप्रीतिप्रत्यभिवादनेष्वपि । श्रत्—

---

१. कृत्वेत्यस्य इतिना संबन्धः, इतेश्च खाट् इत्यनेन । अतो धातोः खाटश्च परस्परं न संबन्ध ।

२. क्रियाया क्षणिकत्वात् सामान्यक्रियाया उत्पत्त्यनन्तरमेव विनाशाद् उपसर्गयोगे न स्याद् विशिष्टत्वमित्यर्थः ।

श्रद्धाशीघ्रयोः। प्रादुस्, आविस्—प्राकाश्ये। पशू, केवाली—हिंसायाम्। वेताली—विस्तारे। केचित् तु धूली, वर्षाली, पम्पाली, विचाली शब्दानप्यधीयते। इत्यूर्यादयः। एषां च्विडाच्साहचर्यात् कृभ्वस्तिभिरेव योगे गतिसंज्ञा। प्रादुराविःशब्दौ कृन्योगे विकल्पार्थं साक्षादादावपि पठ्येते।

२. कारिका स्थित्यादौ।

कारिकाशब्दः स्थित्यादावर्थे धातोः संबन्धी गतिसंज्ञको भवति धातोश्च प्रागेव प्रयुज्यते। स्थितिः—मर्यादा वृत्तिर्वा। आदिशब्दाद् यत्नधात्वर्थनिर्देशौ गृह्येते। कारिकाकृत्य—स्थितिं, यत्नं, क्रियां वा कृत्वेत्यर्थः। स्थित्यादाविति किम्? कारिकां कृत्वा—कर्त्रीं कृत्वेत्यर्थः।

३. आदरानादरयोः सदसती।

आदरानादरयोरर्थयोर्यथाक्रमं सत्, असत्—इत्येतौ शब्दौ धातोः संबन्धिनौ गतिसंज्ञौ भवतः धातोश्च प्रागेव प्रयुज्येते। सत्कृत्य, सत्कृतम्। असत्कृत्य, असत्कृतम्। आदरानादरयोरिति किम्? सत्कृत्वा—विद्यमानं कृत्वेत्यर्थः। असत्कृत्वा—अविद्यमानं कृत्वेत्यर्थः।

४. भूषणेऽलम्।

भूषणेऽर्थेऽलंशब्दः धातोः संबन्धी गतिसंज्ञो भवति धातोश्च प्रागेव प्रयुज्यते। अलंकृत्य, अलंकृतम्। भूषणे इति किम्? अलं कृत्वा—मा कारीत्यर्थः।

५. अन्तरऽग्रहणे।

अग्रहणं—अस्वीकारः। अग्रहणेऽर्थे अन्तर्शब्दः धातोः संबन्धी गतिसंज्ञो भवति धातोश्च प्रागेव प्रयुज्यते। अन्तर्हत्य—मध्ये[1] हिंसित्वा शत्रून् गत इत्यर्थः। अग्रहण इति किम्? अन्तर्हत्वा मूषिका श्येनो गतः—गृहीत्वा गत इत्यर्थः।

६. कणेमनसी[2] तृप्तौ।

तृप्तिः—श्रद्धोच्छेदः। तृप्तावर्थे कणे, मनस्—इत्येते अव्यये[3] धातोः संबन्धिनी गतिसंज्ञे भवतः धातोश्च प्रागेव प्रयुज्येते। कणेहत्य पयः पिबति, मनोहत्य पयः पिबति—तावत् पिबति यावत् तृप्त इत्यर्थः। तृप्ताविति किम्? तण्डुलावयवे कणे हत्वा गतः, मनो हत्वा गतः—चेतो हत्वेत्यर्थः।

७. पुरोऽस्तमऽव्ययम्।

पुरस्, अस्तम्—इत्येते अव्यये धातोः संबन्धिनी गतिसंज्ञे भवतः धातोश्च प्रागेव प्रयुज्येते। पूर्वपर्यायः पुरःशब्दः। अनुपलब्ध्यर्थोऽस्तशब्दः। पुरस्कृत्य, पुरस्कृतम्। अस्तंगत्य पुनरुदेति सविता। अस्तंगतानि दुःखानि। अव्ययमिति किम्? पुरः[4] कृत्वा—नगरीरित्यर्थः। गतिसंज्ञाऽभावात् सकारोऽपि न भवति। अस्तं कृत्वा काण्डं गतः—क्षिप्तमित्यर्थः।

८. अच्छो गत्यर्थवदः।

अच्छेत्यव्ययमभिशब्दार्थे[5] दृढार्थे च वर्तते। अच्छेत्यव्ययं गत्यर्थधातूनां वदधातोश्च संबन्धि गतिसंज्ञं भवति

---

१. अन्तःशब्दो मध्येऽधिकरणभूते वर्तते परिग्रहे च, तत्र परिग्रहे प्रतिषेधात् इतरत्र गतिसंज्ञा विज्ञायते इति दर्शयति।

२. कणतेरचि सप्तम्या कणे इति सप्तमीप्रतिरूपकमव्ययमऽश्रद्धायां वर्तते।

३. अव्यये सन् तृप्तिं वक्ति। अत एव वृत्तौ अव्ययमिति समवद् विशेषणं सूत्रेऽव्ययमित्यस्याकरणात्।

४. अत्र पुर्शब्दः शसि सकारान्तोऽस्त्येवेति न द्वयक्षवैकल्यम्।

५. अच्छ इति अभ्यादावर्थेऽव्ययं निर्मलादावनव्ययम्।

धातोश्च प्रागेव प्रयुज्यते। अच्छगत्य, अच्छव्रज्य, अच्छोद्य। गत्यर्थवद इति किम्? अच्छ कृत्वा गतः। अव्ययमिति किम्? उदकमच्छ गत्वा।

९. अदोऽनुपदेशे।

स्वय परामर्शोऽनुपदेशो विशेषानाख्यानं वा। अनुपदेशेऽर्थे अदस् इत्यव्ययं धातो संबन्धि गतिसंज्ञं भवति धातोश्च प्रागेव प्रयुज्यते। अदःकृत्यैतत्करिष्यतीति चिन्तयति। अव्ययत्वात् 'अतः कृकमि···' [२/२/४] इत्यादिना सत्वं न। अनुपदेशे इति किम्? अदः कृत्वा गतः इति परस्य कथयति।

१०. तिरोऽन्तर्द्धौ।

अन्तर्धिर्व्यवधानम्। अन्तर्धावर्थे तिरस् इत्यव्ययं धातोः संबन्धि गतिसंज्ञ भवति धातोश्च प्रागेव प्रयुज्यते। तिरोभूय, तिरोधाय। अन्तर्धाविति किम्? तिरो भूत्वा स्थितः—तिर्यग्भूत्वेत्यर्थः।

११. कृञो वा।

अन्तर्धावर्थे तिरस् इत्यव्ययं कृञ्धातोः संबन्धि गतिसंज्ञं वा भवति धातोश्च प्रागेव प्रयुज्यते। तिरस्कृत्य, तिरःकृत्य। तिरस्करोति, तिरः करोति। पक्षे—तिरः कृत्वा। अन्तर्धाविति किम्? तिरः कृत्वा काष्ठं गतः—तिर्यक् कृत्वेत्यर्थः।

१२. उपाजेऽन्वाजे।

सप्तम्येकवचनान्तप्रतिरूपके एते अव्यये स्वभावाद् दुर्बलस्य भग्नस्य[1] वा बलाधाने वर्तमाने कृञ्धातोः संबन्धिनी गतिसंज्ञे वा भवतः धातोश्च प्रागेव प्रयुज्येते। उपाजेकृत्य, उपाजे कृत्वा। अन्वाजेकृत्य, अन्वाजे कृत्वा। दुर्बलस्य भग्नस्य वा बलाधानं कृत्वेत्यर्थः।

१३. उरसिमनसिमध्येपदेनिवचनेऽनत्याधाने।

अत्याधानं—उपश्लेषणमाश्चर्यं वा। न अत्याधानं—अनत्याधानम्। एतानि सप्तम्येकवचनान्तप्रतिरूपकाणि अव्ययानि अनत्याधानेऽर्थे वर्तमानानि कृञ्धातोः संबन्धीनि गतिसंज्ञकानि वा भवन्ति धातोश्च प्रागेव प्रयुज्यन्ते। उरसिकृत्य, उरसि कृत्वा। मनसिकृत्य, मनसि कृत्वा। मध्येकृत्य, मध्ये कृत्वा। पदेकृत्य, पदे कृत्वा। निवचनेकृत्य, निवचने कृत्वा। निवचने वचनाऽभावः—वाचं नियम्येत्यर्थः। अनत्याधान इति किम्? उरसि कृत्वा पाणिं शेते। मनसि कृत्वा सुखं गतः। पदे कृत्वा शिरः शेते। अव्ययमिति किम्? मध्ये कृत्वा वाचं तिष्ठति।

१४. स्वाम्येऽधिः।

अधीत्येतदव्ययं स्वामित्वे गम्यमाने कृञ्धातोः संबन्धि गतिसंज्ञं वा भवति धातोश्च प्रागेव प्रयुज्यते। चैत्रं ग्रामेऽधिकृत्य अधि कृत्वा वा गतः—स्वामिनं कृत्वेत्यर्थः। स्वाम्य इति किम्? चिन्तया ग्राममधिकृत्य—उद्दिश्येत्यर्थः। उपसर्गसंज्ञकत्वान्नित्यं प्राप्ते पक्षे प्रतिषेधार्थं वचनम्।

१५. साक्षादादिश्च्व्यर्थे।

साक्षादादयः शब्दाश्च्व्यर्थे वर्तमानाः कृञ्धातोः संबन्धिनो गतिसंज्ञका वा भवन्ति धातोश्च प्रागेव प्रयुज्यन्ते। साक्षात्कृत्य, साक्षात्कृत्वा—असाक्षाद्भूतं साक्षाद्भूतं कृत्वेत्यर्थः। एवं मिथ्याकृत्य, मिथ्या कृत्वा। च्व्यर्थ इति किम्? यदा

---

1. शकटस्य धुरोऽक्षस्य वा भग्नस्य यत्काष्ठमुपधीयते तदुपाजे अन्वाजे इति चोच्यते।

साक्षाद्भूतमेव किञ्चित्करोति तदा साक्षात्कृत्वेत्येव भवति। च्व्यन्तानां[1] तु **'ऊर्याद्यनुकरणोपसर्ग..'** [३/१/१] इत्यादिना नित्यमेव गतिसंज्ञा। लवणीकृत्य, उष्णीकृत्य। साक्षादादयो यथा—साक्षात्, मिथ्या, चिन्ता, भद्रा, रोचना, लोचना, अमा, आस्था, अद्धा, प्राजर्या, प्राजुरा, प्राजरुहा, बीजर्या, बीजरुहा, ससर्पा, अर्थे, अग्नौ, वशे, विकपने, प्रकपने, विसहने, प्रसहने, प्रतपने। अर्थेप्रभृतयः सप्तम्येकवचनान्तप्रतिरूपकाः स्वभावात् निपातनाद् वा। लवणम्, उष्णम्, शीतम्, उदकम्, आर्द्रम्। लवणादीनामेतत्सूत्रविहितगतिसंज्ञासंनियोग एव मान्तत्वं[2] निपात्यते। प्रादुस्, आविस्, नमस् इति साक्षादादि।

१६. नित्यं हस्तेपाणावुद्वाहे।

हस्ते, पाणौ—इत्येतौ सप्तम्येकवचनान्तप्रतिरूपकावव्ययौ। उद्वाहे—दारकर्मण्यर्थे गम्यमाने कृन्धातोः संबन्धिनौ गतिसंज्ञकौ नित्यं भवतः धातोश्च प्रागेव प्रयुज्येते। हस्तेकृत्य, पाणौकृत्य—भार्यां कृत्वेत्यर्थः। उद्वाहे इति किम्? हस्ते कृत्वा कार्षापणं गतः।

१७. प्राध्वं बन्धे।

प्राध्वमित्येतन्मकारान्तमव्ययमानुकूल्ये वर्तते। तच्चानुकूल्यं यदा बन्धहेतुकं[3] भवति तदा बन्ध इत्युच्यते। अनेकार्थत्वाद् वा निपातानां मुख्य एवास्य बन्धोऽर्थः। बन्धेऽर्थे वर्तमानः प्राध्वशब्दः कृन्धातोः सबन्धी गतिसंज्ञो नित्यं भवति धातोश्च प्रागेव प्रयुज्यते। प्राध्वकृत्य—बन्धनेनानुकूल्यं कृत्वेत्यर्थः। बन्ध इति किम्? प्राध्वं कृत्वा शकटं गतः।

१८. जीविकोपनिषदावौपम्ये।

जीविकोपनिषच्छब्दौ औपम्ये गम्यमाने कृन्धातोः सबन्धिनौ गतिसंज्ञौ नित्यं भवतः धातोश्च प्रागेव प्रयुज्येते। जीविकाकृत्य, उपनिषत्कृत्य—जीविकामिव, उपनिषदमिव कृत्वेत्यर्थः। औपम्ये इति किम्? जीविकां कृत्वा गतः। उपनिषदं कृत्वा गतः।

१९. नाम नाम्नैकार्थ्ये समासो बहुलम्।

नाम[4] नाम्ना सह ऐकार्थ्ये—एकार्थीभावे सति समाससंज्ञं बहुलं भवति। ऐकार्थ्यं च सामर्थ्यविशेषः। स च पृथगर्थानां पदानां क्वचित् परस्परव्यपेक्षालक्षणं सामर्थ्यमनुभूय भवति। यथा—राज्ञः पुरुषो राजपुरुषः। नीलं च तदुत्पलं च नीलोत्पलम्। क्वचिदननुभूयैव भवति। यथा—उपकुम्भं, कुम्भकारः। वाक्यान्तरेण त्वर्थः प्रदर्श्यते। कुम्भस्य समीपं, कुम्भं करोतीति। क्वचिन्न भवत्येव। यथा—छात्राणां पञ्चमः। रामो जामदग्न्य इति। लक्षणं चेदमधिकारश्च, तेन अव्ययीभावादिविशेषसंज्ञाऽभावे यत्रैकार्थता दृश्यते तत्राऽनेनैव समाससंज्ञा भवति। विस्पष्टं पटु—विस्पष्टपटु, विचित्रं कटुकः—विचित्रकटुकः, निपुणपण्डितः—इत्यादिषु गुणविशेषणस्य गुणवचनेन समासः। दारुणमध्यायकः—दारुणाध्यायकः, घोराध्यायकः—इत्यादिषु क्रियाविशेषणस्य क्रियावता समासः। सर्वैश्चर्मणा कृतः—सर्वचर्मीणो रथः, कृतः पूर्वं कटोऽनेन—कृतपूर्वी कटम्, भुक्तपूर्वी ओदनम्—इत्यादिषु तद्धितार्थे समासः। भूतः पूर्वः—भूतपूर्वः, दृष्टपूर्वः, श्रुतपूर्वः—सर्वेषु चैषु विशेषसंज्ञाऽप्राप्तौ अनेनैव समासः। ऐकपद्यं च समासफलम्। बहुलमिति शिष्टप्रयोगानुसरणार्थम्। नामेति किम्? चरन्ति गावो धनमस्य। नाम्नेति किम्? चैत्रः पचति। बहुलवचनादेव क्वचिदनामापि समस्यते। भात्यर्कोऽत्रेति भात्यर्कं नभः। नभसा सामानाधिकरण्यं समासफलम्। समाससंज्ञाप्रयोजनं तु **'ओष्ठौत्वोः समासे वा'** [१/२/३१] इत्यादयः।

२०. प्रतिनाऽल्पेऽव्ययीभावः।

अल्पेऽर्थे वर्तमानेन प्रतिना सह नाम समस्यते, सोऽव्ययीभावसंज्ञकः समासो भवति। शाकस्याऽल्पत्वं—शाकप्रति।

---

१ अर्थग्रहणात् च्व्यन्तानां विकल्पो न भवति।

२ तेन लवणीकृत्येत्यादौ पूर्वसूत्रविहितगतिसंज्ञासंनियोगे न भवति।

३ बन्धजनितमित्यर्थः। दुष्टाश्वादिर्हि बन्धनेन आनुकूल्ये व्यवस्थाप्यते।

४ यद्यपि विभक्तिरहितमेव नाम तथाप्यत्र सविभक्तिकमेव नाम गृह्यते, **'समासप्रत्यययोः'** [३/२/६] इति विभक्तिलुको विधाननिर्देशात्।

एव सूपप्रति । अल्पे इति किम् ? वृक्ष प्रति विद्योतते विद्युत् । अव्ययीभावसञ्ज्ञाप्रयोजनं तु 'अव्ययीभावस्याऽतोऽमपञ्चम्याः' [३/२/२] इत्यादि ।

२१. अक्षशलाकासंख्याः परिणा द्यूतेऽन्यथावृत्तौ ।

अक्षशलाके सख्यावाचिशब्दाश्च परिणा सह समस्यन्ते द्यूतविषये । यथा पूर्वं ततोऽन्यथावृत्तौ गम्यमानायां सोऽव्ययीभावसञ्ज्ञकः समासो भवति । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति । तत्र यदा सर्वे उत्ताना अवाञ्चो वा पतन्ति तदा पातयितुर्जय, अन्यथापाते पराजयः । अक्षेण शलाकया वा नेदं तथा वृत्तं यथा पूर्वं जये अक्षपरि, शलाकापरि । एकेनाक्षेण शलाकया वा नेद तथा वृत्त यथा पूर्वं जये एकपरि । एवं द्विपरि, त्रिपरि, परमेण चतुष्परि । पञ्चसु त्वेकरूपेषु जय एव भवति । अक्षादय इति किम् ? पाशकेन न तथा वृत्तम् । परिणेति किम् ? अक्षेण परिवृत्तम् । द्यूत इति किम् ? रथस्याऽक्षेण न तथा वृत्तम् । अन्यथावृत्तौ इति किम् ? पञ्चपरीति मा भूत् ।

२२. तिष्ठद्ग्वित्यादयः ।

तिष्ठद्गुप्रभृतयः समासशब्दा अव्ययीभावसञ्ज्ञका भवन्ति यथायोगमन्यपदार्थे पूर्वपदार्थे चाऽभिधेये । तिष्ठन्ति गावो यस्मिन् काले दोहनाय गर्भग्रहणाय वाहाय वत्सेभ्यो निवासाय वा स कालस्तिष्ठद्गु । वहन्ति गावो यस्मिन् काले स वहद्गु । आयन्ति गावो यस्मिन् काले स आयतीगवम् । इह पूर्वपदस्य पुवद्भावाऽभावः समासान्तश्च निपातनात् । एतेऽन्यपदार्थे काले । तथा लूना यवा यस्मिन् काले स लूनयव काल. । एव लूयमानयवम्, पूतयवम्, पूयमानयवम् । खले बुसानि यस्मिन् काले स खलेबुसम् । खलेयवम् । निपातनात्सप्तम्या अलुक् । संहृतबुसम्, सहृतयवम्, सह्रियमाणबुसम्, सह्रियमाणयवम् । एते प्रथमैकवचनान्ता एवान्यपदार्थे काले । देशेऽपीत्यन्ये । लूनयव पश्य, लूनयवेन कृत इत्यादि द्वितीयाद्यन्तप्रयोगा अपीच्छन्त्यन्ये । शोभना समा यस्मिन् काले सुषमम् । एव विषमम्, निष्षमम्, दुष्षमम्, अपरसमम्, आयतीसमम्, पापसमम्, पुण्यसमम् । एतेऽन्यपदार्थे काले । उत्तरपदप्राधान्ये तु तत्पुरुष एव—शोभना. समा. सुषमा । समा भूमिरस्मिन् काले समभूमि । समपदाति । पूर्वपदस्य मान्तत्व निपातनात् । एतौ देशकालभावेषु अन्यपदार्थेषु इति अन्ये । उत्तरपदार्थप्राधान्ये तु समा भूमि समभूमिः । समपदातिः । 'हेमस्तु' [३/१/३६] पूर्वपदार्थप्रधानं मान्तत्वविकल्पं चेच्छति । समत्वं भूमे —समभूमि । समपदाति । प्रक्रान्त अहर्यस्मिन् काले प्राह्णम् । निपातनात् अहन्शब्दस्य अह्नादेशः । प्रगतो रथो यस्मिन् प्ररथम् । प्रगता मृगा यस्मिन् प्रमृगम् । प्रगता दक्षिणा यस्मिन् प्रदक्षिणम् । एते देशभावयोरपीत्यन्ये । उत्तरपदार्थप्राधान्ये तु तत्पुरुष एव । प्राह्णः, प्ररथः, प्रमृगः, प्रदक्षिणा । सप्रत्यसप्रत्यप्रदक्षिणानि यथासंख्यं वर्तमानाऽवर्तमानवामेषु । सप्रति—वर्तमानं, असंप्रति—अवर्तमानं, अप्रदक्षिण—वामता । एकत्वमन्तस्य एकोन्त इति वा एकान्तम् । नाभेरधः अधोनाभम् । निपातनादत्समासान्तः । एवं प्रान्तम्, समपक्षम्, समानतीर्थम्, समानतीरम् । युद्धे इजन्तं च—केशाकेशि, दण्डादण्डि, द्विदण्डि, द्विमुसलि । तिष्ठद्गु इत्यत्रेतिशब्द. स्वरूपपरिग्रहार्थस्तेनेह समासान्तरं न भवति ? परम तिष्ठद्गु, तिष्ठद्गु प्रियमस्येति वाक्यमेव भवति । अत एव च संप्रतिप्रदक्षिणाभ्यां सह नञ्समासेन सिद्धौ असप्रत्यऽप्रदक्षिणयो. पाठः । इजन्तस्य च तिष्ठद्ग्वादिषु पाठ 'इच् युद्धे' [८/३/६७] इत्यनेन इजन्तस्य समासान्तरप्रतिषेधार्थं, द्विदण्डचादेरव्ययीभावार्थश्च । तिष्ठद्ग्वादिराकृतिगणः, तेन प्रसव्यम्, अपसव्यम्, यत्प्रभृति, तत्प्रभृति, इतः प्रभृति इत्यादि सिद्धम् ।

२३. अव्ययं कारक-समीप-समृद्धचसंप्रत्यर्थाभावाऽत्ययाऽसंपत्ति-ख्याति-पश्चाद्योग्यता-वीप्सा-पदार्थानतिवृत्ति-सादृश्य-सदृश-यौगपद्यानुपूर्व्य-संपत्ति-साकल्यान्तेषु पूर्वार्थे ।

कारकादिष्वर्थेषु वर्तमानमव्ययं नाम नाम्ना सह ऐकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्यते, सोऽव्ययीभावसंज्ञकः समासो भवति । कारकार्थो विभक्त्यर्थ. । अधिस्त्रि[1] निधेहि—स्त्रीषु निधेहीत्यर्थ. । एवमधिकुमारि । समीपे—उपकुम्भं —कुम्भस्य समीप इत्यर्थः । एवमुपाग्नि । ऋद्धेराधिक्यं समृद्धिः । सुमद्रं—मद्राणां समृद्धिरित्यर्थः । एव सुमगधम् । असंप्रति वर्तमानकाले उपभोगादेः प्रतिषेधः । अतिकम्बलं—कम्बलस्योपभोगं प्रति नायं काल इत्यर्थः । एवमत्याम्रम् । अर्थाभावो वस्तुनोऽभावः । निर्मक्षिकम्—मक्षिकाणामभाव इत्यर्थः । एवमुन्मशकम् । अत्ययोऽतीतत्वम् । निर्हिमं—अतीतानि हिमानीत्यर्थः ।

---

१. यद्यप्यत्र सप्तम्यर्थद्योतकोऽधिस्तथापि सिद्धिविग्रहविषये स्त्रीषु अधि इति सविभक्तिकानामेव समासविधानसामर्थ्यात् सप्तमी ।

एवमतितृणम् । ऋद्धेरभावोऽसपत्तिर्व्यृद्धिरित्यर्थः । दुर्यवन—यवनानामृद्ध्यभाव इत्यर्थ । एव दुर्भिक्षम् । ख्याति: प्रसिद्धता । इतिभद्रबाहु—भद्रबाहो ख्यातिरित्यर्थ । एवमहोभद्रबाहु । पश्चादर्थे—अनुरथ याति—रथस्य पश्चादित्यर्थः । एवमनुगृहम् । योग्यताया—अनुरूपं चेष्टते—रूपस्य योग्यां चेष्टा कुरुते इत्यर्थ । वीप्साया—प्रत्यर्थ शब्दा अभिनिविशन्ते । अर्थमर्थं प्रतीत्यर्थः । पदार्थानतिवृत्तिः पदार्थाऽनतिक्रम । यथाशक्ति पठ—शक्तेरनतिक्रमेणेत्यर्थ । सादृश्ये—सशीलमनयोः—शीलस्य सादृश्यमित्यर्थः । सदृशार्थे—समुनि—मुने सदृश इत्यर्थः । सादृश्यशब्दो धर्मवाची, सदृशस्तु धर्मिवाचीत्यनयोर्भेद । यौगपद्यमेककालता । सचक्रं धेहि—युगपच्चक्राणि धेहीत्यर्थः । अव्ययीभावे सहस्य सभाव । आनुपूर्व्यमनुक्रम । अनुज्येष्ठ प्रविशन्तु—ज्येष्ठानुक्रमेणेत्यर्थः । एवमनुवृद्ध साधूनर्चय । सपत्ति: सिद्धि । सब्रह्म साधूनाम्—सपन्न ब्रह्मेत्यर्थः । एव सक्षत्रमिक्ष्वाकूणाम् । सपत्तिरात्मभावनिष्पत्तिः, समृद्धिस्त्वन्यभावनिष्पत्तिरिति तयोर्भेद । साकल्यमशेषता । सतृणमभ्यव-हरति—न किञ्चित्त्यजतीत्यर्थ । एवं सतुषम् । अन्त: समाप्तिः । सपिण्डैषणमधीते—पिण्डैषणापर्यन्तमधीते इत्यर्थः । एवं सषड्जीवनिकायमधीते । अव्ययमिति किम् ? समीप कुम्भस्य । पूर्वार्थे इति किम् ? समृद्धा मद्राः सुमद्राः ।

२४. यथाऽसादृश्ये ।

पूर्वेणैव सिद्धे सादृश्ये प्रतिषेधार्थं[1] वचनम् । असादृश्येऽर्थे यथा इत्यव्यय नाम नाम्ना सहैकार्थ्ये सति पूर्व-पदार्थेऽभिधेये समस्यते, सोऽव्ययीभावसञ्ज्ञक समासो भवति । यथारूप चेष्टते—रूपानुरूपमित्यर्थ । यथावृद्धमर्चय—ये[2] ये वृद्धास्तानित्यर्थः । यथासूत्रमनुतिष्ठति—सूत्रानतिवृत्त्येत्यर्थः । असादृश्य इति किम् ? यथा श्रीऋषभस्तथा श्रीवीर ।

२५. यावदियत्त्वे ।

इयत्त्व—अवधारणम् । इयत्त्वे गम्यमाने यावदिति नाम नाम्ना सहैकार्थ्ये सति पूर्वपदार्थेऽभिधेये समस्यते, सोऽव्ययीभावसञ्ज्ञकः समासो भवति । यावत्पात्र ब्राह्मणानामन्त्रयस्व । यावन्ति पात्राणि सभवन्ति पञ्च षड् वा तावत एव ब्राह्मणानामन्त्रयस्वेत्यर्थ । इयत्त्व इति किम् ? यावद्दत्त तावद् भुक्तम् । कियद् भुक्तमिति नावधारयामि । यावत् इति अव्ययमनव्ययं चेह गृह्यते । अव्ययमेवेत्यन्ये ।

२६. पर्यपाङ्बहिरञ्चवः पञ्चम्या वा ।

परि, अप, आङ्, बहिस्, अञ्चु—इत्येतानि नामानि पञ्चम्यन्तेन सहैकार्थ्ये पूर्वपदार्थेऽभिधेये वा समस्यन्ते, सोऽव्ययीभावसञ्ज्ञक. समासो भवति । नित्यसमासनात् प्रागेष विकल्पोऽधिक्रियते । परि त्रिगर्तेभ्य—परित्रिगर्तम् । अप त्रिगर्तेभ्यः—अपत्रिगर्तम् । आ ग्रामात्—आग्रामम् । बहिर्ग्रामात्—बहिर्ग्रामम् । प्राग्ग्रामात्— प्राग्ग्रामम् । प्रत्यग्ग्रामात्—प्रत्यग्ग्रामम् । अपाग्ग्रामात्—अपाग्ग्रामम् । उदग्ग्रामात्—उदग्ग्रामं वृष्टो मेघ । पर्यादिसाहचर्यादञ्चतिर्धेनलुगन्तोऽव्यय गृह्यते, तेनेह न—प्राङ् ग्रामात् चैत्र । प्रतिपदविहितायाश्च पञ्चम्या ग्रहणादिहाऽव्ययीभावो न भवति । अपगत शाखाया:—अपशाख: । पञ्चम्येति किम् ? परि वृक्ष विद्योतते विद्युत् ।

२७. लक्षणेनाऽभिप्रती आभिमुख्ये ।

वेत्यनुवर्तते । लक्षणं—चिह्नम् । अभि, प्रति—इत्येतौ आभिमुख्ये वर्तमानौ लक्षणवाचिनाम्ना सहैकार्थ्ये पूर्व-पदार्थेऽभिधेये वा समस्येते, सोऽव्ययीभावसञ्ज्ञक समासो भवति । अभि अग्नि—अभ्यग्नि । प्रत्यग्नि—प्रत्यग्नि शलभा पतन्ति । अग्नि लक्ष्यीकृत्याभिमुख पतन्तीत्यर्थः । लक्षणेनेति किम् ? स्रुघ्न प्रति गत । प्रतिनिवृत्य पुनः व्यामोहात्

---

१. योग्यतावीप्सापदार्थानतिवृत्तिसादृश्येषु इति चत्वारो यथार्थाः । तत्रैक सादृश्यमर्थं विहाय अन्येषु योग्यतादिषु त्रिष्वेवार्थेषु यथा समस्यते इति सूत्राभिप्राय: ।

२. अत्रानुपूर्व्यमपि प्रतीयते, तत्कथमुक्त ये ये वृद्धा इत्यादि ? उच्यते—प्रतीयतामानुपूर्व्यं, वीप्सापि प्रतीयते । न ह्येकोऽनेकार्थो न भवतीति ।

स्रुघ्नमेवाभिमुखं गतः न तु स्रुघ्नमेवोद्दिश्य गत इत्यर्थः। अभिप्रती इति किम् ? येनाग्निर्गतः[1], तेनाग्निर्गतः। येनतेनौ प्रत्ययौ। आभिमुख्य इति किम् ? वृक्षमभि विद्योतते विद्युत्। पूर्वपदार्थे इति किम् ? अभिमुखोऽङ्को यासां ता अभ्यङ्का गावः।

२८. अनुर्यत्समया।

लक्षणेनेत्यनुवर्तते। अनु इत्येतन्नाम आयामे—दैर्घ्यविषये वर्तमानं यल्लक्षणं तद्वाचिनाम्ना सहैकार्थ्ये पूर्वपदार्थेऽभिधेये वा समस्यते, सोऽव्ययीभावसंज्ञकः समासो भवति। अनु गङ्गां दीर्घा—अनुगङ्गं वाराणसी। गङ्गाया लक्षणभूताया आयामेन वाराणस्या आयामो लक्ष्यते। एवमनुयमुनं मथुरा। आयामे इति किम् ? वृक्षमनु विद्योतते विद्युत्। लक्षणेनेति किम् ? लक्ष्येण वाराणस्यादिना मा भूत्।

२९. समीपे।

अनु इत्येतन्नाम समीपेऽर्थे वर्तमानमर्थात् समीपवाचिना सहैकार्थ्ये पूर्वपदार्थेऽभिधेये वा समस्यते, सोऽव्ययीभावसंज्ञकः समासो भवति। अनु वनस्य—अनुवनमशनिर्गतः। अनुनृपं पिशुनाः। अनोरव्ययत्वात् **'अव्ययं कारकसमीप···'** [३/१/२३] इत्यादिनैव सिद्धे पुनर्वचनं विकल्पार्थम्, तेन वाक्यमपि भवति। योगविभागस्तु लक्षणेनेत्यस्य निवृत्त्यर्थः।

३०. पारेमध्येऽग्रेऽन्तः षष्ठ्या वा।

पारेप्रभृतीनि नामानि षष्ठ्यन्तेन नाम्ना सहैकार्थ्ये पूर्वपदार्थेऽभिधेये वा समस्यन्ते, सोऽव्ययीभावसंज्ञकः समासो भवति। तत्संनियोगे चाद्यानां त्रयाणामेकारान्तता निपात्यते। पारं गङ्गायाः—पारेगङ्गम्। पारेसमुद्रम्। मध्यं गङ्गायाः—मध्येगङ्गम्। मध्येसमुद्रम्। अग्रं वनस्य—अग्रेवणम्। अग्रेसेनम्। अन्तर्गिरेः—अन्तर्गिरि। अन्तर्वणम्। विकल्पाधिकारेऽपि पुनर्वाग्रहणात् तत्पुरुषोऽपि। गङ्गायाः पारम्—गङ्गापारम्। गङ्गामध्यम्, वनाग्रम्, वनान्तः। विकल्पाधिकारत्वाद् वाक्यमपि—गङ्गायाः पारमित्यादि। षष्ठ्येति किम् ? पारं शोभनम्।

३१. संख्या वंश्येन।

विद्यया जन्मना वा प्राणिनामेकलक्षणः संतानो वंशः, तत्र भवो वंश्यः। स इहाद्यः कारणपुरुषो गृह्यते। वंश्यवाचिना नाम्ना सहैकार्थ्ये पूर्वपदार्थेऽभिधेये संख्यावाचि नाम वा समस्यते, सोऽव्ययीभावसंज्ञकः समासो भवति। एको मुनिर्वंश्यो व्याकरणस्य—एकमुनि व्याकरणस्य। त्रिमुनि व्याकरणस्य। यदा तु विद्यया तद्वतामभेदविवक्षा तदैकमुनि व्याकरणं, द्विमुनि व्याकरणमित्यादि सामानाधिकरण्यमेव भवति। जन्मना—सप्त काशयो वंश्या राज्यस्य—सप्तकाशि राज्यस्य। एवं त्रिकोशलं राज्यस्य, एकविंशतिभारद्वाजं कोशलस्य। पूर्वार्थे इति किम् ? द्वौ मुनी वंश्यावस्य द्विमुनि, द्विमुनिकं व्याकरणम्। द्विमुनिरागतः। अन्यपदार्थे बहुव्रीहिरेव। अन्ये तु पूर्वार्थ इति विशेषं नेच्छन्ति। तन्मते एकश्चासौ मुनिश्चेति कर्मधारयप्रसङ्गे, द्वौ मुनी समाहृताविति द्विगुप्रसङ्गे, एको मुनिर्वंश्योऽस्येति बहुव्रीहिप्रसङ्गे चाऽव्ययीभाव एव समासो भवति।

३२. नदीभिः समाहारे।

संख्येत्यनुवर्तते। समाहारे गम्यमाने नदीवाचिभिर्नामभिः सह संख्यावाचि नाम वा समस्यते, सोऽव्ययीभावसंज्ञकः समासो भवति। द्वयोर्यमुनयोः समाहारो द्वियमुनम्। एवं त्रियमुनम्, पञ्चनदम्, सप्तगोदावरम्। अत्राऽव्ययीभावत्वे समासान्तष्टः। समाहार इति किम् ? एका नदी एकनदी। द्वीरावतीको देशः। द्विगुबाधनार्थं वचनम्।

३३. अन्यार्थे संज्ञायाम्।

नदीभिरित्यनुवर्तते। नदीवाचिभिर्नामभिः सह नाम समस्यते अन्यपदार्थे संज्ञायां विषये, सोऽव्ययीभावसंज्ञकः

---

१. गमनस्याऽग्निर्लक्षणम्। आभिमुख्यमप्यस्तीति येनतेनशब्दयोरग्निशब्देन समासः स्यात्, स न भवति।

समासो भवति । विकल्पाऽधिकारेऽपि नित्योऽयं समासः । न हि वाक्येन संज्ञा गम्यते इति हेतोः । उन्मत्ता गङ्गा यस्मिन् देशे स उन्मत्तगङ्गः देशः । एवं लोहितगङ्गम्, तूष्णीगङ्गम्, शनैर्गङ्गम् । इमानि देशनामानि । अन्यार्थे इति किम् ? कृष्णा चासौ वेण्णा च कृष्णवेण्णा । एवं शुष्कतापी । संज्ञायामिति किम् ? शीघ्रगङ्गो देशः ।

३४. नञ्[1] तत्पुरुषः ।

नञ् इत्येतन्नाम नाम्ना सह वा समस्यते स च समासस्तत्पुरुषसंज्ञको भवति । न गौः—अगौः[2] । अनुच्चैः, असः । नञ्समासे निवृत्तिविशिष्टस्य उत्तरपदस्यैव प्राधान्यम् । पर्युदासे नञ्समासार्थः । स चाऽयं षोढा । उक्तं च —

तत्सादृश्यमभावश्च, तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्च, नञर्थाः षट् प्रकीर्तिताः ॥

यथा—अब्राह्मणः, अशुक्लः इति तत्सदृशः क्षत्रियादिः पीतादिश्च प्रतीयते । अवचनम्, अवीक्षणमिति वचनवीक्षणाऽभावः प्रतीयते । अनग्निः, अवायुः इति अग्निवायुभ्यामन्यः प्रतीयते । अनुदरा कन्या, अलोमिका एडका इति उदरस्य लोम्ना चाऽल्पता प्रतीयते । अपशवः, अपक्षिणः इति पशुपक्षिणामप्राशस्त्यं प्रतीयते । अधर्मः, असितः इति तद्विरोधी पाप्मा कृष्णश्च प्रतीयते । प्रसज्यप्रतिषेधे तु नञ् पदान्तरेण सम्बध्यते इति उत्तरपदं स्वार्थ एव वर्तते । तत्राऽसामर्थ्येऽपि बाहुलकात् समासः । सूर्यमपि न पश्यन्ति असूर्यम्पश्या राजदाराः । पुनर्न गीयन्ते अपुनर्गेयाः श्लोकाः । श्राद्धं न भुङ्क्ते अश्राद्धभोजी भिक्षुः । वत्सेभ्यो न हितोऽवत्सीयो गोधुक् । नन्वस्योत्तरपदार्थप्राधान्येन तल्लिङ्गसंख्यत्वे सति कथं **'भवन्त्यनेके जलधेरिवोर्मयः'** [किरातार्जुनीय महा० १४/६१] इत्यादौ अनेके इति बहुवचनम् ? उच्यते—एकत्वविशिष्टबहुवाच्ययमेकशब्दः । तत्पुरुषसंज्ञाप्रयोजनं तु **'तत्पुरुषे कृति'** [३/२/२२] इत्यादि ।

३५. पूर्वापराधरोत्तरमऽभिन्नेनांशिना ।

अंश एकदेश, सोऽस्यास्तीति अंशी । भिन्नेन न भवतीति अभिन्नः । पूर्वादयः शब्दाः सामर्थ्यादंशवाचिनोऽभिन्नेनांशिना सह वा समस्यन्ते, स तत्पुरुषसंज्ञकः समासो भवति । पूर्वं कायस्य—पूर्वकायः । एवमपरकायः, अधरकायः, उत्तरकायः । पूर्वादिग्रहणं किम् ? दक्षिणं कायस्य । अभिन्नेनेति किम् ? पूर्वं छात्राणामामन्त्रयस्व । भिन्नेन न भवतीति प्रसज्यप्रतिषेधः[3] किम् ? पूर्वं पाणिपादस्य । अत्र हि समाहारस्यैकत्वेऽपि पाणिः पाद इति भेदप्रतीतिर्न भवति । पूर्वग्राम इत्यादौ तु न ग्रामशब्दात्प्रासादादिभेदप्रतीतिः । अंशिनेति किम् ? पूर्वो नाभेः कायस्य ।

३६. सायाह्नादयः ।

सायाह्नादयः शब्दा अंशिना तत्पुरुषेण निपातनात्साधवो भवन्ति । सायमह्नः[4]—सायाह्नः । मध्यमह्नः—मध्याह्नः । मध्यं दिनस्य—मध्यंदिनम् । मध्यं रात्रेः—मध्यरात्रः । **'उपारताः पश्चिमरात्रगोचरात्'** [किरातार्जुनीय महा० ४/१०] इत्यादयः । आकृतिगणोऽयम् । पूर्वे पञ्चालाः, उत्तरे पञ्चालाः इतिवत्समुदायवाचिनामंशेऽपि **प्रवृत्तिदर्शनात्सामानाधिकरण्ये सति कर्मधारयेणैव सिद्धम्** । पूर्वश्चासौ कायश्च पूर्वकायः । सायं च तदहश्च सायाह्न इति ।

---

१ ननु न इत्येव निरनुबन्धः पठ्यताम्, किं सानुबन्धेन नञित्युपादानेन ? सत्यम् । चादिषु अकारोपदेशः स्मारयतु अकारो निर्दिश्यते प्रतिषेधशङ्काव्युदासार्थं च । नेत्युक्ते हि समासस्य प्रतिषेधः सम्भाव्यते ।

२. नञा विशेषितं आरोपितगवादिस्वरूपो गवयादिरित्यर्थः ।

३. यद्यत्राभिन्नेन भवतीति पर्युदासः स्यात्तदा समाहारस्यैकत्वात् अत्रापि समासः स्यात् । भिन्नेन न भवतीति प्रसज्यप्रतिषेधे तु विज्ञायमाने समाहारद्वन्द्वस्य भेदपूर्वकत्वाद् भेदनिमित्तः प्रतिषेधोऽपीति समासाभावः ।

४ ननु सायशब्देनाऽहरन्त उच्यते इत्युक्तार्थत्वात् सायमह्नः इति विग्रहेऽहन्शब्दस्य प्रयोगो न प्राप्नोति । सत्यम् । दिनान्ते यानि कार्याणि क्रियन्ते तान्यपि उपचारात्सायंशब्देनोच्यन्ते । ततः संदेहः किं कार्याणि अभिधीयन्ते उत दिनान्तः इत्यहन्शब्दः प्रयुज्यते । सूत्रसामर्थ्याद् वा तस्मात् तु अदिनान्त एव लभ्यते ।

तत्पुरुषविधान त्विह पूर्वत्र चाह्नः सायं, कायस्य पूर्वमिति षष्ठीसमासबाधनार्थम्[1]।

३७. अर्धं नपुंसकम् ।

अर्धमित्येतत्समेऽशे वर्तमानमंशिना अभिन्नेन सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। अर्धंपिप्पल्याः—अर्धपिप्पली। पक्षे—पिप्पल्यर्धम्। एवं अर्धकोशातकी, कोशातक्यर्धम्। अर्धपणः, पणार्धम्। अर्धस्वरः, स्वरार्धम्। समेंऽशे इति किम्? ग्रामार्धः, नगरार्धः। अर्धं च सा पिप्पली चेति कर्मधारयेणैव सिद्धे भेदविवक्षायां पक्षे षष्ठीसमासबाधनार्थं[2], असमांशे चाऽर्धश्चासौ ग्रामश्चेति कर्मधारयनिषेधार्थं वचनम्। अंशिनेति किम्? पिप्पल्या अर्धं चैत्रस्य। अत्र चैत्रेण समासो न भवति। अभिन्नेनेति किम्? अर्धं पिप्पलीनाम्। कथं अर्धपिप्पल्यः? अर्धं पिप्पल्या इत्यभिन्नेन समासे सत्येकशेषात्। अर्धराशिरित्यत्र राशेरभेदप्रतिभासाद् भविष्यति। अत्र समेऽशे वर्तमानोऽर्धशब्द आविष्टलिङ्गी नपुंसकः[3]। असमांशे तु पुलिङ्गः। अधिकारेणैव विकल्पे सिद्धे पुनर्विकल्पोपादानं पक्षे षष्ठीसमासार्थम्। अधिकारविकल्पयोगात्पक्षे वाक्यमपि।

३८. जरत्यादिभिः ।

असमांशार्थं आरम्भः। अर्धशब्दो जरत्यादिभिरंशिभिरभिन्नैः सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। अर्धो जरत्याः—अर्धजरती। अर्धवैशसम्[4], अर्धोक्तं, अर्धविलोकितम्। पक्षे—जरत्यर्धं इत्याद्यपि भवति। अधिकारविकल्पयोगात् पक्षे वाक्यमपि। आकृतिगणोऽयम्। इदमपि षष्ठीसमासबाधनार्थम्।

३९. द्वित्रिचतुष्पूरणाग्रादयः ।

द्वि, त्रि, चतुर्—इत्येते पूरणप्रत्ययान्ता अग्र इत्यादयश्च शब्दा अंशवाचिनोंऽशिनाऽभिन्नेन सह वा समस्यन्ते, स तत्पुरुषसंज्ञकः समासो भवति। द्वितीयं भिक्षायाः—द्वितीयभिक्षा। एवं तृतीयभिक्षा, चतुर्थभिक्षा, तुर्यभिक्षा, तुरीयभिक्षा। अग्रं हस्तस्य—अग्रहस्तः। एवं तलपादः, ऊर्ध्वकायः इत्यादि। पक्षे—भिक्षाद्वितीयं, भिक्षातृतीयं, भिक्षाचतुर्थं, भिक्षातुर्यं, भिक्षातुरीयम्, हस्ताग्रं, पादतलं, कायोर्ध्वमित्यादि। अधिकारविकल्पेनैव पक्षे वाक्यस्य सिद्धत्वात् वानुवर्तनं पक्षे षष्ठीसमासार्थम्, तेन पूरणेन निषिद्धोऽपि षष्ठीसमासो भवति। द्व्यादिग्रहणं किम्? पञ्चमं भिक्षायाः। पूरणेति किम्? द्वौ भिक्षायाः। अंशिनेति किम्? भिक्षाया द्वितीयं भिक्षुकस्य। अत्र भिक्षुकेण समासो न भवति। अभिन्नेनेति किम्? द्वितीयं भिक्षाणाम्। अग्रादिराकृतिगणः।

४०. कालो द्विगौ च परिमाणिभिः ।

पूर्वप्रपञ्चो निवृत्तः। परिमाणिभिरित्यत्र बहुवचनं काल इत्यत्रैकवचनं कालशब्दस्यैकवचनान्तस्यैव ग्रहणार्थम्। एकवचनान्तं कालवाचि नाम द्विगौ च विषये वर्तमानं परिमाणिवाचिना सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। मासो जातस्य—मासजातः। मासजातौ, मासजाताः। मासजाता स्त्री। एवं संवत्सरजातः, मासमृतः, संवत्सरमृतः। द्विगौ—एको मासो जातस्य—एकमासजातः। द्वे अहनी सुप्तस्य—द्व्यहसुप्तः। त्र्यहाध्यापितः। कथं द्व्यहजातः, त्र्यहजातः? समाहारद्विगौ कृते पश्चादनेन भविष्यति। इह च यद्यपि विग्रहे जातादि कालस्य विशेषणं तथापि शब्दशक्तिस्वाभाव्यात्[5] समासो जातादिप्रधानस्तेन समासे लिङ्गं संख्या च तदीयतदीयमेव भवति। काल इति किम्? द्रोणो

---

१ ननु सायमोऽव्ययत्वात् 'पूरणगुणसुहितार्थसदव्यय...' [३/१/७४] इत्यादिना षष्ठीसमासस्य निषेधेन प्राप्तिरेव नास्ति, किमुच्यते षष्ठीसमासबाधनार्थमिति? उच्यते—यदा अकारान्तः सायशब्दो न त्वव्ययं नपुंसकलिङ्गस्तदा प्राप्नोति।

२ अयमर्थः—सूत्राभावे भेदाऽभेदविवक्षायां प्रयोगद्वयं सिद्ध्यति। सूत्रकृतौ तु भेदविवक्षायामेव पक्षे षष्ठीसमासं बाधित्वा प्रयोगद्वयं सिद्धम्। अन्यथा भेदे षष्ठीसमास एव स्यात्।

३. आविष्टं—आगृहीतं अपरित्यक्तं स्वं लिङ्गं यैः। लिङ्गान्तरसंबन्धेऽपि न विशेष्यलिङ्गमुपाददते।

४ शसु—हिंसायाम्। 'संपदादिभ्यः क्विप्' [५/४/११४], विशसैव प्रज्ञाद्यण्। अर्धो वैशसस्य अर्धमरणमित्यर्थः।

५. अन्यथा मासो जाताया इति स्त्रीत्वविवक्षायां मासजाता इत्यत्र ह्रस्वत्वं स्यात्। पूर्वपदप्राधान्याच्च पश्चादाप् न स्यात्।

भक्षितस्य। काल इति चैकवचन द्विगोरन्यत्र प्रयोजकम्, तेन मासौ मासा वा जातस्य इत्यत्र न भवति। द्विगौ तु द्वौ त्रयो वा मासा जातस्य द्विमासजातः, त्रिमासजात इत्यपि भवति। द्विगुग्रहण त्रिपदसमासार्थम्। अन्यथा नाम नाम्नेत्यनुवृत्ते-र्द्वयोरेव स्यात्। चकारो द्विगुरहितकालपरिग्रहार्थ.। परिमाणिभिरिति किम्? मासो दत्तस्य[1]। दत्तनामा कश्चित्। जातादेरेव हि परिमाणित्व जन्मादे प्रभृति जातादिसबन्धित्वेनैवादित्यगतेः परिच्छेदात्, न द्रव्यमात्रस्य। क्तप्रत्ययान्तेनैव परिमाणिना प्रायेणाय समास इष्यते, तेनेह न—मासो गच्छत, वर्षमधीयानस्य, मासो गन्तुं वर्तते इत्यादि। अयमपि षष्ठीसमासबाधनार्थो योग.।

४१. स्वयंसामी क्तेन।

स्वय, सामि—इत्येते अव्यये क्तान्तेन नाम्ना सह वा समस्येते, स तत्पुरुषसंज्ञक समासो भवति। स्वयधौतौ पादौ, स्वयविलीनमाज्यम्। आत्मनेत्यर्थः। सामिकृत, सामिभुक्तम्। अर्धमित्यर्थ.। समासे सत्यैकपद्यादेकविभक्तिः तद्धिताद्युत्पत्तिश्च भवति। स्वायधौतिः, सामिकृतायनि. इत्यादि। क्तेनेति किम्? स्वयं कृत्वा, सामि भुक्त्वा।

४२. द्वितीया खट्वा क्षेपे।

क्तेनेत्यनुवर्तते। क्षेप.—निन्दा। द्वितीयान्त खट्वाशब्द. क्तान्तेन सह समस्यते, स तत्पुरुषसंज्ञक समासो भवति क्षेपे गम्यमाने। विकल्पाधिकारेऽपि नित्यसमासोऽय न हि वाक्येन क्षेपो गम्यते इति हेतो। खट्वारूढो जाल्म, खट्वाप्लुतो धूर्त। अविनीतोऽय खट्वायामाचार्यासने स्थित इति निन्दा। अधीत्य गुरुभिरनुज्ञातेन हि खट्वारोढव्या यस्त्वन्यथा खट्वारोहणं तदुत्पथप्रस्थानम्। उपलक्षण चेद, तेन उन्मार्गगाम्यपि खट्वारूढ इत्याद्युच्यते। क्षेप इति किम्? खट्वामारूढ उपाध्यायोऽध्यापयति।

४३. कालः।

द्वितीयान्त कालवाचि नाम क्तान्तेन सह वा समस्यते, स तत्पुरुषसंज्ञक. समासो भवति। मास प्रमितो मासप्रमित प्रतिपच्चन्द्र। मास प्रमातुमारब्ध इत्यर्थः। रात्रिमतिसृताः—रात्र्यतिसृता। एव रात्र्यारूढा, रात्रिसक्रान्ता.। अहरतिसृता षड् मुहूर्ताश्चराचरा.। ते हि दक्षिणायने रात्रिं गच्छन्ति उत्तरायणे त्वहरिति।

४४. अत्यन्तसंयोगे।

क्तेनेति निवृत्त योगविभागात्। अत्यन्तसयोगो गुणक्रियाद्रव्यैर्भवति। अत्यन्तसंयोगे गम्यमाने द्वितीयान्त कालवाचि नाम नाम्ना सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। मुहूर्तं सुख—मुहूर्तसुख। मुहूर्तरमणीय., सर्वरात्रकल्याणी, सर्वरात्रशोभना, मुहूर्ताध्ययन, मुहूर्तगुरु.। अत्यन्तसयोग इति किम्? मास पूरको व्रजति। तुमर्थे णक.। काल इति किम्? क्रोश कुटिला नदी।

४५. श्रितादिभिः।

द्वितीयान्त नाम श्रितादिभि सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। धर्म[2] श्रित —धर्मश्रित.। कान्तारातीतः, नरकपतित, ग्रामगत.। श्रितादयो यथा—श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त, आपन्न, गमिन्, गामिन्, आगमिन्, आगामिन्। आकृतिगणोऽयम्। तेन ओदनबुभुक्षुः, हिताशंसुः, तत्त्वबुभुत्सुः, सुखेच्छु. इत्यादि सिद्धम्।

---

१. अत्र न मासो दत्तस्य परिच्छेदकत्वेन सबन्धी किंतूत्सवास्पदेनान्येन वा प्रकारेणेति।

२. प्राप्त्यर्थत्वात् 'गत्यर्थाऽकर्मक···' [५/१/११] इति क्त प्राप्त इत्यर्थः। यद्यपि बहुव्रीहिणैव धर्मश्रित इत्यादीनि सिध्यन्ति तथापि यत्तत्पुरुष शास्ति तत् ज्ञापयति यत्र समासेऽर्थे विग्रहभेदात् तत्पुरुषबहुव्रीही प्राप्नुतस्तत्र तत्पुरुष एव। तेन राजसख इत्यादौ न बहुव्रीहि.। किञ्च बहुव्रीहौ कप् स्यात्।

४६. प्राप्तापन्नौ¹ तया पुंवच्च ।

प्राप्त, आपन्न—इत्येतौ सामर्थ्यात् प्रथमान्तौ तया द्वितीयया सह वा समस्येते, स तत्पुरुषसंज्ञकः समासो भवति। तत्संनियोगे चानयो पुंवत्। प्राप्तो जीविकां—प्राप्तजीविकः। आपन्नजीविकः। एव प्राप्तगवः, आपन्नगवः। पुंवत्करण स्त्र्यर्थम्। प्राप्ता जीविकां—प्राप्तजीविका। आपन्नजीविका। प्राप्तगवी, आपन्नगवी। प्राप्तापन्नयोः प्रथमोक्तत्वात्पूर्वनिपातार्थं वचनम्। श्रितादित्वाच्चानयोर्द्वितीयाया अपि प्रथमोक्तत्वेन प्रागनिपातः, तेन जीविकाप्राप्तः, जीविकापन्न इत्यपि भवति।

४७. ईषद् गुणवचनेन ।

यो गुणे वर्तित्वा तद्योगे गुणिनि वर्तते स गुणमुक्तवान् गुणवचनः। ईषदित्येतदव्यय गुणवचनेन सह वा समस्यते, स तत्पुरुषसंज्ञक समासो भवति। ईषदल्पं पिङ्गलः—ईषत्पिङ्गल। एवं ईषत्कडारः, ईषद्विकटः, ईषदुन्नत, ईषद्रक्त। गुणवचनेनेति किम्? ईषत्कारक। ईषद्गार्ग्य—गुणैः क्रियया वा हीनो गार्ग्य एवमुच्यते। समासे तद्धितकाम्य-समासान्तराणि च वसाद्यादेशाभावादयश्च प्रयोजनम्। ईषत्पिङ्गलस्येद —ऐषत्पिङ्गलम्। ऐषत्पिङ्गलकाम्यत्, कोपेन ईषद्रक्तः²—कोपेषद्रक्तः। ईषत्पिङ्गलयुष्माकमथो पुत्र इति।

४८. तृतीया तत्कृतेन ।

गुणवचनेनेत्यनुवर्तते। तत्कृतेन तृतीयान्तकृतेनेति यावत्। तृतीयान्तं नाम तत्कृतेन गुणवचनेन सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। कुसुमेन कृत सुरभिः—कुसुमसुरभि पुमान्। एव क्षारशुक्ल वस्त्र, शङ्कुलाखण्डश्चैत्र। कृतार्थो वृत्तावन्तर्भूत इति कृतशब्दो न प्रयुज्यते। तत्कृतेनेति किम्? अक्ष्णा काणः, पादेन खञ्जः। काणत्वादि ह्यत्र काण्डादिना कृतं न त्वक्ष्यादिना। गुणवचनेनेति किम्? गोभिर्वपावान्, दध्ना पटु। पाटवमित्यर्थः। न ह्येतौ पूर्वं गुणमुक्त्वा सांप्रत द्रव्ये वर्तेते इति गुणवचनौ न भवतः। अत एव शुद्धगुणवाचिनाऽपि समासो न भवति। घृतेन पाटवं, विद्यया धाष्टर्थम्। अत्रापि समासो भवतीति कश्चित्। केचित्तु गुणमात्रवृत्तिभिरपि समासमिच्छन्ति। शङ्कुलाखण्डश्चैत्रस्येत्यादि।

४९. अर्धं चतस्रा ।

तृतीयान्तोऽर्धशब्दस्तत्कृतेन चतसृशब्देन सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। अर्धेन कृताश्चतस्रो-ऽर्धचतस्रो मात्राः। एवमर्धचतस्र खार्यः। चतस्रा इति किम्? अर्धेन कृताश्चत्वारो द्रोणाः।

५०. ऊनार्थपूर्वादिभिः ।

तृतीयान्त नाम ऊनार्थैः पूर्वादिभिश्च नामभिः सह वा समस्यते, स तत्पुरुषसंज्ञक समासो भवति। माषेणोनं—माषोनम्। एवं कार्षापणोन, माषविकल, कार्षापणविकलम्। पूर्वादि—मासेन पूर्वः मासपूर्व। संवत्सरपूर्वः। एवं मासावरः, संवत्सरावरः। पूर्वादयो यथा—पूर्व, अवर, सदृश, सम, कलह, निपुण, मिश्र, श्लक्ष्ण। आकृतिगणोऽयम्। तेन धान्येनार्थः—धान्यार्थः। हिरण्यार्थः। आत्मनापञ्चमः, आत्मनाषष्ठ—एतावलुक्समासौ। माषेणाधिकं—माषाधिकम्। एवं द्रोणाधिका खारी। भ्रात्रा तुल्यः—भ्रातृतुल्य। एकेन द्रव्यवत्त्वमेकद्रव्यवत्त्वमित्यादि सिद्धम्। अस्मादेव वचनात् पूर्वादियोगे तृतीया कर्त्रादौ वा द्रष्टव्या।

५१. नविंशत्यादिनैकोऽत्तुक् च ।

एकशब्दस्तृतीयान्तो नविंशत्यादिभिर्नामभिः सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। एकशब्दस्य च अतुगागमो भवति। उकावितौ। एकेन नविंशतिः एकान्नविंशतिः। पक्षे—एकादूनविंशतिः। एवमेकान्नत्रिंशत्,

---

१. प्राप्ता जीविका यया इत्यादि बहुव्रीहिणापि सिद्ध्यति, प्राप्तगवी इत्यादौ तु समासान्तो न स्यादिति वचनम्।

२. नाम नाम्ना इत्यनुवर्तमाने कोपेन ईषद्रक्त इति त्रिपदो न स्यात्। कोपेषद्रक्त इति न गुणवचनः, तेनोत्तरेण न समासः।

एकादूनविंशत्। एकान्नचत्वारिंशत्, एकादूनचत्वारिंशत् नविंशत्यादिनेति निर्देशात् नञोऽन्न भवति।

५२. कर्तृसाधने कृता।

तृतीयान्त नाम कर्तरि साधने च कृदन्तेन सह वा समस्यते, स तत्पुरुषसंज्ञक समासो भवति। कर्तरि तावत्—आत्मना कृतं आत्मकृतम्। परकृत, अहिदष्ट, राजहत, भगवत्त्रात। साधने—नखैर्भिन्न नखभिन्न। परशुच्छिन्न.। पादाभ्यां ह्रियते—पादहारक.। **'कृत्सगतिकारकस्यापि'** [८/४/१२६]। सुजनेन सुलभ —सुजनसुलभ। एवं अरिदुर्जय, चैत्रेण नखनिर्भिन्न —चैत्रनखनिर्भिन्न। कर्तृसाधने इति किम्? विद्ययोषित, अन्नेनोषित। तेन हेतुनेत्यर्थ। कृता इति किम्? धनेन धनवान्। गोभिर्वपावान्।

५३. कृत्यैरऽतव्यानीयैः स्तुतिनिन्दयोः।

कर्तरि साधने च वर्तमान तृतीयान्त नाम स्तुतिनिन्दयोरर्थयो. सतो तव्यानीयवर्जितकृत्यप्रत्ययान्तै सह वा समस्यते, स तत्पुरुषसंज्ञक। समासो भवति। काकपेया नदी। पूर्णतोयत्वात् तटस्थै काकैरपि पातु शक्या इति स्तुति., अल्पतोयत्वात् वा निन्दा। एव श्वलेह्य. कूप, मूर्खपाठ्यः श्लोक.। साधने—वाष्पच्छेद्यानि तृणानि। कोमलत्वात् स्तुति, निर्बलत्वाद् वा निन्दा। अतव्यानीयैरिति किम्? काकैः पातव्या पानीया वा नदी। स्तुतिनिन्दयोरिति किम्? स्वरूपकथने मा भूत्—काकेन पेय जलम्। बहुलाधिकारात् क्वचिदन्यत्रापि भवति। बुसेन उपेन्ध्यो वह्निरिति बुसोपेन्ध्यो वह्नि.। एव तृणोपेन्ध्य.। अत्राग्नेरल्पता प्रदर्श्यते। घनघात्य.—इह कृच्छ्रसाध्यमुच्यते।

५४. न हेतौ।

हेतौ वर्तमान तृतीयान्त नाम नाम्ना सह न समस्यते। द्रव्येण कलह —द्रव्यहेतुनेत्यर्थ। पूर्वादिना प्राप्त।

५५. तुमक्त्वाक्तवतुभिः।

नेत्यनुवर्तते। तृतीयान्त नाम तुमा, क्त्वया, क्तवता च सह न समस्यते। **'कर्तृसाधने कृता'** [३/१/५२] इति प्राप्तोऽनेन निषिद्ध.। परशुना छेत्तुम्। परशुना छित्वा, चैत्रेण कृत्वा। दात्रेण लूनवान्, विद्यया ज्ञातवान्।

५६. चतुर्थी प्रकृत्या।

चतुर्थ्यन्त नाम प्रकृतिवाचिना सह वा समस्यते, स तत्पुरुषसंज्ञक समासो भवति। प्रकृतिर्मूलकारणम्। यूपाय दारु—यूपदारु। कुण्डलाय हिरण्य—कुण्डलहिरण्यम्। प्रकृत्येति किम्? रन्धनाय स्थाली, अर्हत नम। मूत्राय कल्पते यवागूरित्यादौ विकारस्याऽप्रधानस्य कल्पते इत्यादिक्रियासापेक्षत्वान्न भवति।

५७. हितादिभिः।

चतुर्थ्यन्त नाम हितादिभि सह वा समस्यते, स तत्पुरुषसंज्ञक समासो भवति। गोभ्यो हितं—गोहितम्। एव गोसुख, भूताय बलि —भूतबलिः। हित, सुख, बलि, रक्षित इति हितादय। आकृतिगणोऽयम्। तेन अश्वाय घास —अश्वघास। श्वश्रूसुरा, श्वश्रूसुर, हस्तिविधान, धर्मनियम, धर्मजिज्ञासा, नाट्यशाला, आत्मनेपद. परस्मैपदमित्यादि सिद्धम्।

५८. तदर्थार्थेन।

तस्याश्चतुर्थ्या अर्थो यस्य स तदर्थः। चतुर्थ्यन्तं नाम तदर्थेनाऽर्थशब्देन सह समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। भोजनाय अय —भोजनार्थ. सूप। पित्रे इदं—पित्रर्थं पयः। आतुराय इयमातुरार्था यवागूः। **'चतुर्थ्यर्थो वाच्यवत्'**

१. श्रीभिक्षुलिङ्गानुशासनम्, परवल्लिङ्गाधिकारः, श्लोक १।

इति वाच्यलिङ्गता। नित्यसमासश्चाऽयम्। चतुर्थ्यैव तदर्थस्योक्तत्वात् अर्थशब्दाऽप्रयोगे वाक्याऽसंभवात्। तदर्थेत्यर्थविशेषणं किम्? पित्रे अर्थः—पित्रे धनमित्यर्थः।

५९. कृत्येन।

कृतो यः कृत्यः। चतुर्थ्यन्तं नाम कृत्यप्रत्ययान्तेन सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। देवाय देयं—देवदेयं पुष्पम्। वरप्रदेया कन्या। यग्रहणं किम्? विप्राय दातव्यम्।

६०. पञ्चमी भयाद्यैः।

पञ्चम्यन्तं नाम भयादिभिः सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। वृकाद् भयं—वृकभयम्। वृकभीतः, वृकभीतिः, वृकभीः, ग्रामनिर्गतः। भय, भीत, भीति, भी, भीरु, भीलुक, निर्गत, जुगुप्सु, अपेत, अपोढ, मुक्त, पतित, अपत्रस्त इति भयादयः। आकृतिगणोऽयम्। तेन नातरः, तपरः, स्थानभ्रष्टः, द्वीपान्तरानीत इत्यादि सिद्धम्। बहुलाधिकारात् क्वचिन्न भवति। प्रासादात्पतितः, भोजनादपत्रस्तः।

६१. क्तेनाऽसत्त्वे।

असत्त्वे वर्तमानाः पञ्चम्यन्ताः क्तान्तेन सह वा समस्यन्ते, स तत्पुरुषसंज्ञकः समासो भवति। स्तोकान्मुक्तः। अल्पान्मुक्तः। कृच्छ्रान्मुक्तः। कतिपयान्मुक्तः। दूरादागतः। विप्रकृष्टादागतः। अन्तिकादागतः। अभ्याशादागतः। कृच्छ्राल्लब्धः। 'असत्त्वे पञ्चम्याः उत्तरपदे' [३/२/१०] इत्यलुक्। क्तेनेति किम्? स्तोकान्मोक्षः। असत्त्वे इति किम्? स्तोकाद् बद्धितः। स्तोकाद् द्रव्यादित्यर्थः। एवं अल्पात् प्रवृद्धम्। समासे तद्धितायुत्पत्तिः फलम्। स्तौकान्मुक्तिरित्यादि।

६२. परःशतपरःसहस्रपरोलक्षाः।

शत सहस्र, लक्ष—इत्येतेषां पञ्चम्यन्तानां परेण सह समासः, परशब्दस्य पूर्वनिपातः सुडागमश्च निपात्यते। शतात्परे—परःशताः। सहस्रात्परे—परःसहस्राः। लक्षात्परे—परोलक्षाः।

६३. षष्ठ्ययत्नाच्छेषे।

शेषे या षष्ठी तदन्तं नाम नाम्ना सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति अयत्नात्—न चेत् स शेषः 'स्मृत्यर्थदयेशः वा' [२/४/८] इत्यादि यत्नाद् भवति। राज्ञः पुरुषः—राजपुरुषः। यतिकम्बलः, राज्ञो गोक्षीरं—राजगोक्षीरम्। ऋद्धस्य राज्ञः पुरुषः, जिनभद्रगणेः क्षमाश्रमणस्य भाष्यमित्यादौ सापेक्षत्वान्न भवति। कथं देवदत्तस्य गुरुकुलं, जिनदत्तस्य दासभार्येति? सापेक्षत्वेऽपि गमकत्वाद् भवति। अयत्नादिति किम्? मातुः स्मृतं, सर्पिषो दयितं, मातुरीशितं, एधोदकस्योपस्कृतं, चौरस्य रुग्णं, चौरस्योज्जासितं, सर्पिषो नाथितं, शतस्य द्यूतश्चैव, कटकरणस्यायुक्तः। शेषे इति किम्? सर्पिषो ज्ञानम्। रुदतः प्रव्रजितः। मनुष्याणां क्षत्रियः शूरतमः। गवां कृष्णा सपन्नक्षीरतमा। कथं सर्पिर्ज्ञानं, मातृस्मरणम्? कृद्योगेऽत्र षष्ठीति उत्तरेण भविष्यति। सबन्धे तु अनेनैव। गोस्वामी, पृथिवीश्वरः, विद्यादायादः—इत्यादिषु तु अयत्नजा शेष एव षष्ठी। 'स्वामीश्वरा···' [२/४/११३] इति सूत्रस्य नित्यं षष्ठीप्राप्तौ पक्षे सप्तमीविधानार्थत्वात्। संघस्य भद्रं भूयात्, शासनस्य भद्रं भूयादित्यादौ तु आशिषि षष्ठ्याः समासो न भवति असामर्थ्यात् अनभिधानाद् वा। संघभद्रं भूयादित्युक्ते संघस्य भद्रं भूयादिति न प्रतीयते, अपि तु संघभद्रं नाम सघसंबन्धितया प्रसिद्धं किंचिद् भद्रं कस्यचिद् भूयादिति।

६४. कृति।

कृति—कृत्प्रत्ययनिमित्ता या षष्ठी विहिता तदन्तं नाम नाम्ना सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। सिद्धसेनकृतिः, गणधरोक्तिः, इध्मप्रश्चनः, पलाशशातनः।

६५. याजकादिभिः।

'कर्मजा तृचा च' [३/१/७१] इति वक्ष्यमाणप्रतिषेधापवादः। षष्ठ्यन्तं नाम याजकादिभिः सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति। विप्राणां याजकः—विप्रयाजकः। एवं गुरुपूजकः। याजक, पूजक, परिचारक, परिवेषक, परिषेचक, स्नापक, अध्यापक, आच्छादक, उत्सादक, उन्मादक, उद्वर्तक, होतृ, पोतृ, भर्तृ[1]। आकृतिगणोऽयम्। तेन विश्वगोप्ता, तीर्थकर्ता, तत्प्रयोजको हेतुश्च, जनिकर्तुः प्रकृतिः इत्यादावपि समासो भवति।

६६. पत्तिरथौ गणकेन।

षष्ठ्यन्तौ पत्ति, रथ—इत्येतौ शब्दौ गणकेन सह वा समस्येते, स तत्पुरुषसंज्ञकः समासो भवति। पत्तीनां गणकः—पत्तिगणकः। रथगणकः। पत्तिरथाविति किम्? अक्षराणां गणकः। गणकेनेति किम्? रथस्य दर्शकः। कथं ज्योतिर्गणकः, ग्रहगणकः? **'क्रीडाजीविकयोरकेन'** [३/१/६९] इत्यनेन भविष्यति।

६७. गुणतरेण तरलोपश्च।

गुणाद्यस्तरप्रत्ययस्तदन्तेन सह षष्ठ्यन्तं नाम वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति तरलोपश्च। सर्वेषां श्वेततरः—सर्वश्वेतः। सर्वेषां महत्तरः—सर्वमहान्। गुणग्रहणं किम्? मनुष्याणां क्षत्रियतरः। तरग्रहणं किम्? सर्वेषां श्वेतः।

६८. सर्वपश्चादादयः।

सर्वपश्चादित्यादयः शब्दाः कृतषष्ठीतत्पुरुषसमासा निपात्यन्ते। सर्वेषां पश्चात्सर्वपश्चात्पदं वर्तते। सर्वचिरं जीवति। तदुपरिष्टात् रुक्मं निदधातीत्यादि। अव्ययेन प्रतिषेधो वक्ष्यते, तदपवादोऽयम्। आदिशब्देन आप्तप्रयोगा अनुसर्तव्याः।

६९. क्रीडाजीविकयोरकेन।

षष्ठ्यन्तं नाम अकप्रत्ययान्तेन नाम्ना सह समस्यते क्रीडाजीविकयोर्गम्यमानयोः, स तत्पुरुषसंज्ञकः समासो भवति। उद्दालकपुष्पभञ्जिका, वारणपुष्पप्रचायिका, शालभञ्जिका—कस्याश्चित् क्रीडायाः संज्ञा। आजीविकायां—दन्तलेखकः, ज्योतिर्गणकः, रमणीयकारकः। क्रीडाजीविके वाक्येन न गम्येते इति नित्यसमासः। क्रीडाजीविकयोरिति किम्? ओदनस्य भोजकः, पयसः पायकः। **'कर्मजा तृचा च'** [३/१/७१] इति प्रतिषेधे प्राप्ते वचनम्।

७०. न कर्तरि।

कर्तरि विहिता या षष्ठी तदन्तं नाम अकप्रत्ययान्तेन नाम्ना सह न समस्यते। भवतः शायिका। भवत आसिका। भवतोऽग्रगामिका[2]। कर्तरीति किम्? इक्षुभक्षिकां मे धारयसि। पयःपायिकां मे धारयसि।

७१. कर्मजा तृचा च।

कर्तरीत्यनुवर्तते। तच्चाऽकस्यैव विशेषणम्। तृच् तु कर्तर्येव अतस्तस्येति विशेषणस्य निरर्थकत्वात्। कर्मणि विहिता षष्ठी कर्मजा। तदन्तं नाम तृच्प्रत्ययान्तेन कर्तरि विहितो योऽकस्तदन्तेन च नाम्ना सह न समस्यते। ओदनस्य भोजकः। सक्तूनां पायकः। अपां स्रष्टा। पुरां भेत्ता। कर्मजेति किम्? सम्बन्धषष्ठ्याः प्रतिषेधो मा भूत्। गुणिविशेषको गुणः। गुणिनि सम्बन्धी विशेषक इत्यर्थः। कर्तरीति किम्? इक्षुभक्षिका मे धारयसि। पयःपायिका मे धारयसि। कथं भूभर्ता, वज्रभर्तेति? भर्तृशब्दो यः पतिपर्यायस्तेन सम्बन्धषष्ठ्या याजकादिपाठात् कर्मषष्ठ्या वाऽयं समासः। क्रियाशब्दस्य[3] तु

१. भर्तृशब्दस्य पतिवाचकस्यैवात्र पाठः।

२. **'कृत्सगतिकारकस्य'** [८/४/१२९] इति न्यायात् अग्रगामिकेति अस्यापि कृदन्तत्वम्।

३. बिभर्तीति भरणक्रियामात्रमुपादाय वर्तमानस्येत्यर्थः। पतिपर्यायभर्तृशब्द औणादिकोऽव्युत्पन्नोऽप्यस्ति।

तत्राऽग्रहणादनेन प्रतिषेधः। भुवो भर्ता। वज्रस्य भर्ता।

७२. तृतीयायाम्।

कर्तरि या तृतीया तस्यां सत्यां कर्मजा षष्ठी न समस्यते। आश्चर्यो गवां दोहोऽगोपालकेन। साध्विद शब्दानामनुशासनमाचार्येण। तृतीयायामिति किम्? साध्विदं शब्दानुशासनमाचार्यस्य। साध्वी कटचिकीर्षा चैत्रस्य। कर्तरि षष्ठयामपि न समास इति कश्चित्। विचित्रा सूत्रस्य कृतिराचार्यस्य। कर्तरीति किम्? साध्विदं शब्दानुशासनमाचार्यस्य न पुण्येन। कर्मजेति किम्? मैत्रस्य सबन्धी कृतो मैत्रकृतश्चैत्रेण। कथ गोदोहोऽगोपालकेन? सबन्धषष्ठया भविष्यति।

७३. अस्वस्थगुणैः।

ये गुणाः स्वात्मन्येवावतिष्ठन्ते नान्यस्मिन् द्रव्ये ते स्वस्था। न स्वस्था अस्वस्थाः। अस्वस्थगुणवाचिभिर्नामभि सह षष्ठयन्त नाम न समस्यते। पटस्य शुक्ल, काकस्य कृष्ण, गुडस्य मधुर, चन्दनस्य सुरभि, कुङ्कुमस्य मृदु। अत्र अर्थात् प्रकरणाद् वा वर्णादिर्बोधो जायते। ननु शुक्लादिर्वर्णादिविशेषण, पटस्य शुक्लो वर्ण इति ततश्च पटादेर्वर्णादिना सबन्धो न तु शुक्लादिविशेषणेनेति समासस्य प्राप्तिरेव नास्ति, कि निषेधेन? उच्यते—ये इमे शुक्लादयस्ते पटादेरेवेति सामर्थ्योपपत्ते समास प्राप्नोतीति प्रतिषिध्यते। पटस्य शौक्ल्य, काकस्य कार्ष्ण्यं, गुडस्य माधुर्यं—एषु पूर्वेषु च शुक्लादेर्गुणस्य शुक्लः पट इत्यादौ द्रव्येऽपि प्रवृत्तिप्रदर्शनात् अस्वास्थ्यमस्त्येव। गुणशब्देन चेह लोकप्रसिद्धा रूपरसगन्धस्पर्शगुणा अभिप्रेतास्ततस्तद्विशेषैरेवायं प्रतिषेधः, तेन यत्नस्य गौरव—यत्नगौरवम्। बुद्धिकौशल, करणपाटवं, हस्तचापल, वचनमार्दवं, उत्तरपदार्थप्राधान्य, वर्तमानसामीप्य, गततान्छीलय, पटहशब्द, नदीघोप, वाङ्माधुर्य, गोशन, गोसहस्र, समाहारैकत्व—इत्यादिषु प्रतिषेधो न भवति। अस्वस्थगुणैरिति किम्? घटवर्णः, कन्यारूपं, कपित्थरसः, चन्दनगन्धः, स्तनस्पर्श। बहुलाधिकारात् कण्टकस्य तैक्ष्ण्य, वृषलस्य धाष्टर्य—इत्यादिषु समासो न भवति। कुसुमसौरभ्य, चन्दनसौरभ्यमित्यादिषु भवति।

७४. पूरणशतृशानाऽव्ययतृप्तार्थैः।

पूरणप्रत्ययान्तैः, शत्रन्तै, शानान्तैरव्ययैस्तृप्तार्थैश्च नामभि सह षष्ठयन्त नाम न समस्यते। पूरण—तीर्थकराणां षोडश। चक्रधराणा पञ्चम शान्ति। वासुदेवाना तृतीय स्वयंभू। शतृ—चैत्रस्य पचन्। रामस्य द्विषन्। अश्वानां धावन्त शीघ्रतमा। शान—चैत्रस्य पचमान। मता कुर्वाण। अव्यय—राज्ञ साक्षात्। ग्रामस्य[१] पुरस्तात्। चैत्रस्य कृत्वा। मैत्रस्य प्रकृत्य। अव्ययीभावस्याप्यन्वर्थाश्रयणात् क्वचिदव्ययत्वम्, तेन चैत्रस्योपकुम्भमित्यत्र समासो न भवतीति केचित्। तृप्तार्था—फलानां तृप्त। फलानां सुहित। सक्तूना पूर्ण। ओदनस्याशित। पयसो घ्राणः। सर्वत्र संबन्धे षष्ठी। पूरणादिभिरिति किम्? ब्राह्मणस्य कर्तव्य ब्राह्मणकर्तव्यम्। ईश्मव्रश्चन। पलाशशातनः। राज्ञ पाटलिपुत्रकस्य धनम्। शुकस्य माराविदस्य[२] शब्द, सर्पिष पीयमानस्य गध, सूत्रस्याऽधीयमानस्यार्थ, इत्यादौ सामानाधिकरण्ये धनादिपदाऽपेक्षया षष्ठीति असामर्थ्यात् समासो न भवति। विशेषणसमासस्तु निरपेक्षत्वेन सामर्थ्याद् भवत्येव। पाटलिपुत्रकश्चासौ राजा च तस्य पाटलिपुत्रकराजस्य इत्यादि। षष्ठीसमासे तु अनियमेन पूर्वनिपात स्यात्।

७५. क्तेनेच्छाबोधपूजार्थेन।

इच्छाबोधपूजार्थेन क्तप्रत्ययान्तेन नाम्ना सह षष्ठयन्तं नाम न समस्यते। राज्ञामिष्टः, राज्ञां मतः, राज्ञां ज्ञातः, राज्ञां बुद्धः, राज्ञां पूजितः, राज्ञामर्चितः। कथं राजपूजितः, राजमहितः, राजसंमतः, कलहंसराममहित कृतवान्? इति बहुलाधिकारात्। भूतकालक्तेन तृतीयासमासा एते इति केचित्। अन्ये तु कृद्योगजाया एव षष्ठया इह समासप्रतिषेध

१. अव्युत्पन्नमव्यय, व्युत्पत्तौ तु 'रिरिष्टा ···' [२/४/८८] इति षष्ठया विधानात् समासो न प्राप्नोत्येव।

२. मारमवैति माराविन्, तस्यापत्य 'तस्याऽपत्ये' [२/२/३१] इति अण् प्रत्ययः।

इति संबन्धषष्ठीसमासा एते इत्याहु ।

७६. आधारे ।

आधारे विहितो यः क्तस्तदन्तेन नाम्ना सह षष्ठ्यन्तं नाम न समस्यते । इदमेतेषां यातं, इदमेषामासित, इदमेषां भुक्तं, इदमेषां पीतम् ।

७७. सप्तमी शौण्डादिभिः ।

सप्तम्यन्तं नाम शौण्डादिभिः सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । अक्षेषु प्रसक्तः शौण्ड इव अक्षशौण्डः । शौण्डशब्द इह गौणो व्यसनिनि वर्तते । वृत्तौ प्रसक्तिक्रियायाः अन्तर्भावादप्रयोगः । अक्षधूर्तः, अक्षकितवः । शौण्डादयो यथा—शौण्ड, धूर्त्त, कितव, व्याल, सव्य, आयस, व्यात, सवीण, अन्तर, अधीन, पटु, पण्डित, कुशल, चपल, निपुण, चतुर, सिद्ध, शुष्क, पक्व, बन्ध । आकृतिगणोऽयम् । तेन शिरःशेखरः, हस्तकटकः, आपातरमणीयः, अवसानविरसः, पृथिवीविदितः, पृथिवीप्राप्तः । ऋणे अधमः—अधमर्णः । ऋणे उत्तमः—उत्तमर्णः । राजदन्तादित्वात्परनिपातः । अन्तेगुरुः, मध्येगुरुः—'**मध्यान्ताद् गुरौ**' [३/२/२०] इति अलुक् । गलेचोपकः—'**तत्पुरुषे कृति**' [३/२/२२] इति अलुगित्यादि सिद्धं भवति ।

७८. काकादिभिः क्षेपे ।

सप्तम्यन्तं नाम काकादिभिः सह समस्यते क्षेपे गम्ये, स तत्पुरुषसंज्ञकः समासो भवति । तीर्थे काक इव तीर्थकाकः । अनवस्थित[1] एवमुच्यते । एवं तीर्थध्वाङ्क्षः, तीर्थवायसः, तीर्थवकः, तीर्थश्वा, तीर्थसारमेयः, तीर्थकुक्कुटः, तीर्थशृगालः । उपमया चात्र क्षेपो गम्यते । नित्यसमासोऽयं, न हि वाक्येन क्षेपो गम्यते । क्षेप इति किम्? तीर्थे काकस्तिष्ठति । आकृतिगणोऽयम् ।

७९. सिंहादिभिः पूजायाम् ।

सप्तम्यन्तं नाम सिंहादिभिः सह समस्यते पूजायां वाच्यायां, स तत्पुरुषसंज्ञकः समासो भवति । समरे सिंह इव समरसिंहः । एवं रणव्याघ्रः, भूमिवासवः, कलियुधिष्ठिरः, भूमिदेवः, कलिगौतमः, युगप्रधानः । पूजाऽत्रोपमया लक्ष्यते । नित्यसमासोऽयं, न हि वाक्येन पूजा गम्यते । पूजायामिति किम्? समरे सिंहस्तिष्ठति । आकृतिगणोऽयम् ।

८०. कृत्यैनाऽऽवश्यके ।

कृतो यो य प्रत्ययस्तदन्तेन सह सप्तम्यन्तं नाम समस्यते आवश्यके गम्यमाने, स तत्पुरुषसंज्ञकः समासो भवति । मासेऽवश्यं देयं—मासदेयं ऋणम् । वर्षदेयं, पूर्वाह्णेगेयं साम, प्रातरध्येयोऽनुवाकः । नित्यसमासोऽयं, न हि वाक्येन आवश्यकत्वं गम्यते इति हेतोः । कृद्ग्रहणं किम्? मासे पित्र्यम् । यग्रहणं किम्? मासे दातव्यम् । संवत्सरकर्तव्यमिति तु बहुलाधिकारात् । आवश्यक इति किम्? मासे देया भिक्षा ।

८१. संज्ञायाम् ।

सप्तम्यन्तं नाम संज्ञायां विषये नाम्ना सह समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । अरण्येतिलकाः, अरण्येमाषकाः, वनेकशेरुका, वनेवल्वजाः, वनेकिंशुकाः, कूपेपिशाचिका, त्वचिसारः । '**अद्व्यसात्सप्तम्या बहुलम्**' [३/२/१८] इत्यलुक् । नित्यसमासोऽयं, न हि वाक्येन संज्ञा गम्यते इति हेतोः ।

---

१. *यथा काकस्तीर्थफलमजानन्न चिरस्थायी भवत्येव यो देवदत्तादि कार्याणि आरभ्य तेषु अनिर्वाहकः स तीर्थाधारेण काकेनोपमीयमानः क्षिप्यते, इत्यस्ति क्षेपस्य गम्यमानता ।*

८२. क्तेनाऽहोरात्रांशाः ।

अंशशब्दः प्रत्येकं सम्बध्यते । अंशः अवयवः । अहरवयवा राज्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह वा समस्यन्ते, स तत्पुरुषसंज्ञकः समासो भवति । पूर्वाह्णे कृतम्—पूर्वाह्णकृतम् । एवमपराह्णकृतं, पूर्वरात्रकृतं, अपररात्रकृतम् । क्तेनेति किम् ? पूर्वाह्णे भोक्ता । अंशग्रहणं किम् ? अह्नि भुक्तं, अह्नि कृतं, रात्रौ नृत्तम् । अहोरात्रग्रहणं किम् ? शुक्लपक्षे कृतम् । पक्षो मासांशः । बहुलाधिकारादहोरात्राऽनंशेऽपि क्वचित्समासः । रात्रिवृत्तम् । क्वचिदहोरात्राऽन्तरेऽपि समासः । सन्ध्यागर्जितमित्यादि ।

८३. तत्र ।

क्तेनेत्यनुवर्तते । तत्रेति सप्तम्यन्तं नाम क्तान्तेन सह वा समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । तत्रभुक्तं, तत्रकृतम् । समासादैकपद्यम् । तात्रकृतिः ।

८४. क्षेपे ।

क्तेनेत्यनुवर्तते । क्षेपे गम्यमाने सप्तम्यन्तं नाम क्तान्तेन सह समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । प्रवाहेमूत्रितं, भस्मनिहुतं, उदकेविशीर्णम् । निष्फलं कृतमेवमुच्यते । सर्वत्रोपमानेन क्षेपो गम्यते । **'तत्पुरुषे कृति'** [३/२/२२] इत्यलुक् । नित्यसमासोऽयं, न हि वाक्येन क्षेपो गम्यते इति हेतोः ।

८५. पात्रेसमितेत्यादयः ।

पात्रेसमितादयः सप्तमीतत्पुरुषा निपात्यन्ते क्षेपे गम्यमाने । पात्रे एव समिताः पात्रेसमिताः । पात्रे एव बहुलाः पात्रेबहुलाः । पात्रशब्देन पात्रसहचारिभोजनं लक्ष्यते, ततो भोजने एव समिता मिलिता न पुनः क्वचित् कार्ये इत्यर्थः । गेहे एव शूरः गेहेशूरः । गोष्ठेशूरः । गेहे एव क्ष्वेडतीत्येवंशीलो गेहेक्ष्वेडी । गोष्ठेक्ष्वेडी । गेहेनर्दी, गोष्ठेनर्दी । गेहेनर्ती, गोष्ठेनर्ती । गेहमेव विजितमनेन गेहेविजिती । गोष्ठेविजिती । इष्टादित्वादिन्, **'इष्टादीनः कर्मणि'** [२/४/१०३] इति सप्तमी । गेहेविचितीत्यपि कश्चित् । गेहेव्याडः, गोष्ठेव्याडः । गेहेव्यालः, गोष्ठेव्यालः । गेहेदाही, गोष्ठेदाही । गेहेधृष्टः, गोष्ठेधृष्टः । गेहेपटुः गोष्ठेपटुः । गेहेपण्डितः, गोष्ठेपण्डितः । गेहेप्रगल्भः, गोष्ठेप्रगल्भः । एषु अवधारणेन क्षेपो गम्यते । गेहे एव तृप्तः गेहेतृप्तः । एवं गेहेमेही, पिण्डीशूरः । यश्चावश्यकेऽपि कार्ये बहिर्न गच्छति भोजन एव सरभते स एवमुच्यते । अत्र अवधारणेन निरुत्साहतया च क्षेपो गम्यते । गर्भे एव सुहितः—गर्भेसुहितः । एवं गर्भेतृप्तः, गर्भेदृप्तः, गर्भेशूरः, गर्भेधीरः । मिथ्याऽभिमानित्वादनुचितचेष्टो यः स एवमुच्यते । तत एव क्षेपो गम्यते । कर्णेटिरिटिरि, कर्णेचुरुचुरुः, कर्णेटिरिटिरा, कर्णेचुरुचुरा । चापलेनानुचितचेष्टो यः स एवमुच्यते । तत एव क्षेपो गम्यते । टिरिटिरीति गत्यनुकरणम् । चुरुचुर्विति वाक्यानुकरणम् । पितरिशूरः, मातरिपुरुषः । यः सदाचारं भिनत्ति स एवमुच्यते । अत्र प्रतिषिद्धसेवनेन क्षेपो गम्यते । उदुम्बरे कृमिरिव—उदुम्बरकृमिः । उदुम्बरमशकः । उदपाने कच्छप इव—उदपानकच्छपः । उदपानमण्डूकः । एवं अवटकच्छपः, अवटमण्डूकः, कूपकच्छपः, कूपमण्डूकः । अल्पदृश्वा एवमुच्यते । नगरे काक इव—नगरकाकः । नगरवायसः, नगरश्वा । एतैः सदृशो धृष्ट उच्यते । उदुम्बरकृम्यादिषु उपमया क्षेपो गम्यते । इतिशब्दः समासान्तर-निवृत्त्यर्थः, तेन परमाः पात्रेसमिताः, पात्रेसमितानां पुत्रः—इत्यादिषु समासो न भवति । निपातनात् सप्तम्या अलुक् । बहुवचनमाकृतिगणार्थम् । तेन व्रणकृमिः, गृहसर्पः, गृहकलविङ्कः, आखनिकबकः इत्यादयोऽपि गृह्यन्ते ।

८६. कुः पापाल्पयोर्नित्यम् ।

पाप, अल्प—इत्येतयोरर्थयोः कुरित्यव्ययं नाम्ना सह नित्यं समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । कुत्सितो ब्राह्मणः—कुब्राह्मणः । ईषदुष्णम्—कोष्णं, कवोष्णं, कदुष्णम् । एवं कामधुरम् । पापाल्पयोरिति किम् ? कुर्विशाला—पृथिवीत्यर्थः ।

८७. गतिः ।

गतिसंज्ञकं नाम नाम्ना सह नित्यं समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । ऊरीकृत्य, खाट्कृत्य, प्रकृत्य,

शुक्लीकृत्य, पटपटाकृत्य, कारिकाकृत्य ।

८८. दुर्निन्दाकृच्छ्रयोः ।

निन्दाकृच्छ्रयोरर्थयोर्दुरित्यव्ययं नाम्ना सह नित्य समस्यते, स तत्पुरुषसञ्ज्ञकः समासो भवति । दुष्टः पुरुष — दुष्पुरुष. । कृच्छ्रं कृतं—दुष्कृतम् ।

८९. सुः पूजायाम् ।

पूजायां वाच्यायां सु इत्यव्ययं नाम्ना सह समस्यते, स तत्पुरुषसञ्ज्ञकः समासो भवति । शोभन पुरुषः—सुपुरुषः । एवं सुराजा ।

९०. अतिरतिक्रमे च ।

अतिक्रमेऽर्थे चकारात्पूजायां चार्थे अति इत्यव्ययं नाम्ना सह नित्यं समस्यते, स तत्पुरुषसंज्ञकः समासो भवति । अतिस्तुतं भवता, अतिसिक्तं भवता—अतिक्रमेण स्तुतिसेकौ कृतावित्यर्थ । अतिस्तुत्य, अतिसिच्य । पूजाया—शोभनो राजा अतिराजा । बहुलाधिकारादतिक्रमे क्वचिन्न भवति । अति स्तुत्वा, अति सिक्त्वा ।

९१. आङल्पे ।

अल्पेऽर्थे आङ इत्यव्ययं नाम्ना सह नित्य समस्यते, स तत्पुरुषसञ्ज्ञक समासो भवति । ईषत्पिङ्गलः— आपिङ्गल. । एवमाकडारः । आबद्धमायुक्तमित्यादौ तु गतिलक्षण एव समास ।

९२. प्रादयो गताद्यर्थे प्रथमया ।

प्रादय. शब्दा गताद्यर्थे वर्तमाना. प्रथमान्तेन नाम्ना सह नित्य समस्यन्ते, स तत्पुरुषसञ्ज्ञक समासो भवति । प्रगत आचार्य —प्राचार्य. । एवं प्रान्तेवासी । प्रवृद्धो गुरु —प्रगुरु । प्रकृष्टो वीरः—प्रवीर । सगतोऽर्थः—समर्थ । विरुद्ध पक्ष.—विपक्ष । प्रत्यर्थी पक्ष.—प्रतिपक्ष । प्रतिबद्धं वच.—प्रतिवचः । उपश्लिष्ट पति. –उपपति । उपपन्नोऽनुकूल प्रतिकूलो वा नायक.—उपनायक , अनुनायक., प्रतिनायक. । आदिशब्देन यथादर्शनम् ।

९३. अत्यादयः क्रान्ताद्यर्थे द्वितीयया ।

अत्यादय. शब्दा. क्रान्ताद्यर्थे वर्तमाना द्वितीयान्तेन नाम्ना सह नित्यं समस्यन्ते. स तत्पुरुषसञ्ज्ञकः समासो भवति । अतिक्रान्त खट्वामतिखट्व । अत्र तत्पुरुषविधानं बहुव्रीहिबाधनार्थम्, तेन तल्लक्षण समासान्तविधिर्न । एवमतिमाल , अतिगङ्ग । उद्गतो वेलामुद्वेल । प्रतिगतोऽक्ष प्रत्यक्ष । अनुगत प्रतिगतो वा लोमानि—अनुलोम., प्रतिलोम । अभिप्रपन्नो मुखमभिमुख. । आदिशब्देन यथादर्शनम् ।

९४. अवादयः क्रुष्टाद्यर्थे तृतीयया ।

अवादय. शब्दा क्रुष्टाद्यर्थे वर्तमानास्तृतीयान्तेन नाम्ना सह नित्य समस्यन्ते, स तत्पुरुषसञ्ज्ञक समासो भवति । अवक्रुष्टः कोकिलया—अवकोकिल । एवमवमयूरम् । परिणद्धो वीरुधा—परिवीरुत् । संनद्धो वर्मणा—संवर्मा । अनुगतमर्थेनाऽन्वर्थ नाम । संगतमक्ष्णेण—समक्षं वस्तु । वियुक्तमर्थेन—व्यर्थं वचः । संगतमर्थेन—समर्थं पदम् । आदिशब्देन यथादर्शनम् ।

९५. पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ।

पर्यादयः शब्दाः ग्लानाद्यर्थे वर्तमानश्चतुर्थ्यन्तेन नाम्ना सह नित्यं समस्यन्ते, स तत्पुरुषसंज्ञकः समासो भवति । परिग्लानोऽध्ययनाय—पर्यध्ययनः । अलं कुमार्यै—अलंकुमारिः । उद्युक्त. संग्रामाय—उत्संग्रामः । अलं जीविकायै—अलंजीविकः । अलंशब्दस्य चतुर्थ्यन्तेन वाक्यमपीच्छन्त्यन्ये । आदिशब्देन यथादर्शनम् ।

९६. निरादयो गताद्यर्थे पञ्चम्या ।

निरादय. शब्दा. गताद्यर्थे वर्तमाना पञ्चम्यन्तेन नाम्ना सह नित्य समस्यन्ते, स तत्पुरुषसंज्ञक. समासो भवति । निर्गत कौशाम्ब्या.—निष्कौशाम्बिः । अपगत: शाखाया.—अपशाख. । अन्तर्गतोऽङ्गुल्या.—अन्तरङ्गुलो नखः । उत्क्रान्ता कुलादुत्कुला कुलटा । एवमुद्वेल. समुद्र, उच्छास्त्र वच, उत्सूत्रो न्याय. उत्शृङ्खल कलभ । अपगत अर्थाद्—अपार्थं वच । एवमपक्रमं कार्यम् । आदिशब्देन यथादर्शनम् । बहुलाधिकारात् षष्ठ्यन्तेनाऽपि । अन्तर्गतो गार्ग्यस्य—अन्तर्गार्ग्य । एवमन्तरङ्गुलो नख । सप्तम्यन्तेनापि । प्रतिष्ठितं उरसि प्रत्युरसमित्यादि ।

९७. अव्ययं प्रवृद्धादिभिः ।

अव्यय नाम प्रवृद्धादिभिर्नामभि. सह नित्य समस्यते, स तत्पुरुषसंज्ञक समासो भवति । पुनःप्रवृद्ध बर्हिः, पुनरुत्स्यूतं वास, पुनर्निष्क्रान्तो रथ, पुनरुक्त वच, पुनर्नव वय, पुन श्रृतं पय, स्वर्यात, अन्तर्भूत., प्रात.सवनं, उच्चैर्घोषः, नीचैर्गत, अधरपद, अनद्वापुरुष[1], असशक्त पुरुष, प्रायश्चित्त, सद्यस्क्री, प्राग्वृत्तं, पुराकल्प, श्वःश्रेयसं, श्वोवसीयसम् । बहुवचमाकृतिगणार्थम् ।

९८. सप्तम्युक्तं कृता ।

कृत्प्रत्ययविधायकेषु सूत्रेषु सप्तम्यन्तैर्नामभिरुक्तं सप्तम्युक्तम् । सप्तम्युक्त नाम कृदन्तेन नाम्ना सह नित्यं समस्यते, स तत्पुरुषसंज्ञक समासो भवति । कुम्भ करोति—कुम्भकारः । शरलावः, अग्निचित्, सोमसुत् । इह च **गतिकारक-सप्तम्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्विभक्त्युत्पत्तेः प्रागेव समास** इष्यते । तेन प्र-सृ-स्थ इत्यादौ, चर्मन्-टा-क्रीत, अभ्र-टा-विलिप्त इत्यादौ, कच्छ-अम्-प इत्यादौ च समासे सति अकारान्तत्वादीप् सिद्ध । प्रष्ठी,[2] चर्मक्रीती, अभ्रविलिप्ती, कच्छपी इत्यादि। यदि पुनर्विभक्त्यन्तै कृदन्तै समास स्यात् तदा अन्तरङ्गत्वाद् विभक्ते प्रागेव आप. प्राप्तावकारान्तत्वाऽभावादीप् न स्यात् । तथा माषान् वापिन्, व्रीहीन् वापिन् इत्यादौ समासे नकारस्याऽन्तत्वान् णत्व[3] सिद्धम् । माषवापिणी, व्रीहिवापिणी । विभक्त्यन्तेन तु समासेऽन्तरङ्गत्वाद् विभक्ते प्रागेव ईप्प्राप्तौ नकारस्याऽनन्त्यत्वात् णत्व न स्यात् पूर्वपदस्य च विभक्त्यन्तत्व-नियमान् चर्मक्रीतीत्यादिषु पदकार्यनकारलोपादि सिद्धं भवति । सप्तम्युक्तमिति किम् ? कारकस्य व्रज्या, कारकस्य गतिः ।

९९. तृतीयादीनि वा ।

'दंशेस्तृतीयायाम्' [५/१/६९] इति प्रभृतीनि सप्तम्युक्तानि नामानि कृदन्तेन सह वा समस्यन्ते, स तत्पुरुषसंज्ञक. समासो भवति । मूलकोपदंश भुङ्क्ते, मूलकेनोपदंशं भुङ्क्ते । दण्डोपघात दण्डेनोपघात गा शादयति गोपः । उच्चैः-कृत्य, उच्चैः कृत्वा । तिर्यक्कृत्य, तिर्यक् कृत्वा ।

१००. विशेषणं विशेष्येण तुल्यार्थं कर्मधारयश्च ।

विशेषणवाचि नाम विशेष्यवाचिना नाम्ना सह तुल्यार्थे वा समस्यते स च समास तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति। विशिष्यतेऽनेकप्रकार वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यतेऽनेनेति विशेषण, व्यवच्छेद्यं विशेष्यम्। भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे वृत्तिस्तत् तुल्यार्थम् । नील च तदुत्पलं च नीलोत्पलम् । कृष्णाश्च ते तिलाश्च कृष्णतिलाः । पुमांश्चासौ गौश्च पुगव. । पक्षे वाक्यमपि । विशेषणविशेष्ययो संबन्धिशब्दत्वादेकतरोपादानेनैव द्वये लब्धे द्वयोरुपादान परस्परमुभयो-र्व्यवच्छेद्यव्यवच्छेदकत्वे समासो यथा स्यादित्येवमर्थम् । तेनेह न भवति—तक्षकः[4] सर्प., लोहितस्तक्षक[5] इति । न ह्यऽसर्पो-

---

१. न विद्यते द्वा—संशयोऽस्येति व्युत्पत्त्या अद्वा धर्मी उच्यते । न अद्वा अनद्वा—मशयित. पुरुष. ससंशय. पुरुषो वा ।

२ **'वर्त्तुयोगाद्'** [२/४/५१] ईप् ।

३. **'नामान्तस्थुम्स्वादेरयुवपक्वाह्नः'** [२/२/८३] इत्यनेन ।

४ सर्प इति विशेष्यं तक्षक इति विशेषणम् । व्यतिक्रमेण तु तक्षको विशेष्यमेव । न ह्यस्य सर्पो विशेषण घटते असंभवात् ।

५. लोहित इति विशेष्यं तक्षको विशेषणम् । व्यत्ययेन तु तक्षको विशेष्यमेव, लोहित इति विशेषणं न भवति तस्य रक्तत्वाऽव्यभिचारात् ।

ऽन्यवर्णो वा तक्षकोऽस्ति। कथं तर्हि आम्रवृक्ष, शिंशपावृक्ष.? न ह्यवृक्ष आम्र. शिंशपा वा भवति। उच्यते नाऽत्राम्रादय: शब्दा वृक्षविशेषाणामेव वाचका, किं तर्हि फलादेरपि तत्सहचरितमाधुर्यस्थैर्यादिगुणविशेषस्य च। तेन आम्राणां फलानां संबन्धी वृक्ष आम्रवृक्ष। एवं शिंशपावृक्ष, अस्तपर्वत, उदयपर्वत इत्यादय षष्ठीसमासा द्रष्टव्या। यद्येवमुभयोर्विशेषणत्वे उभयोश्च विशेष्यत्वे सति विशेष्यस्यापि विशेषणत्वमित्युत्पलशब्दस्यापि नीलादिना समासप्रसङ्ग, तथा च **'प्रथमोक्तं प्राक्'** [३/१/१६५] इति वचनादुत्पलनीलमित्यपि स्यात्। नैवम्। अविशेषेपि विशेषणविशेष्यभावस्य **प्रधानान्ययाप्यप्रधानं** इति न्यायात् अप्रधानस्यैव प्रधानेन समास। प्राधान्यं च द्रव्यशब्दानां द्रव्यस्यैव साक्षात् क्रियाभि संबन्धात्। यद्यपि चोत्पलादिशब्दा जातिशब्दास्तथापि उत्पत्ते: प्रभृत्याविनाशाद् द्रव्येण जातेरभिसंबन्धाद् द्रव्यशब्दा उच्यन्ते। गुणक्रिययोस्तु तथा द्रव्येण संबन्धाभावान्न तन्निमित्ता. शब्दा द्रव्यशब्दा इति नीलोत्पलमित्याद्येव भवति न तु उत्पलनीलादीनि। यस्तु गुणादिशब्दानामेव समासस्तत्रोभयोरपि पदयोरप्रधानत्वात्कामचारेण पूर्वापरनिपात.। खञ्जश्चासौ कुण्टश्च खञ्जकुण्ट, कुण्टखञ्ज:। एवं शुक्लकृष्ण., कृष्णशुक्ल.। रोहितपाण्डु:, पाण्डुरोहित। हरितबभ्रु, बभ्रुहरित। पूर्वा चासावुत्तरा[1] च पूर्वोत्तरा। एवमुत्तरपूर्वा। दक्षिणपूर्वा, पूर्वदक्षिणा विदिक्। पाचकपाठक, पाठकपाचक पुरुष। कृष्णसारङ्ग[2], कृष्णशबल., कृष्णकल्माष — इत्यादौ तु गुणशब्दत्वेऽपि सारङ्गादिशब्दानां समुदायवाचित्वात्प्राधान्य, कृष्णादिशब्दाना तु अवयववाचित्वेन अप्राधान्यमिति कृष्णादीनामेव पूर्वनिपात.। तुल्यार्थे इति किम्? वृद्धस्योक्षा — वृद्धोक्षा। कर्मधारये तु समासान्त स्यात्। बहुलाधिकारात् क्वचित्समासो न भवति। रामो जामदग्न्य, अर्जुन कार्त्तवीर्य, दीर्घश्चारायण.। क्वचिन्नित्य.। कृष्णसर्प, लोहितशालि, गौरखर., लोहिताहि, नरसिंह, पुरुषमृग, करिमकर, बर्कटिट्टिभ, नकुलसर्प। जातिविशेषवाचित्वान्नित्यसमासा एते। न हि वाक्येन जातिर्गम्यते। चकारस्तत्पुरुषकर्मधारयसंज्ञाद्वयसमावेशार्थ। कर्मधारयसंज्ञाप्रयोजन तु **'कडारादय: कर्मधारये'** [३/१/२०१] इत्यादि।

१०१. पूर्वकालैकसर्वजरत्पुराणनवकेवला:।

पूर्वकाल इत्यर्थनिर्देश। पूर्व कालो यस्यार्थस्य स पूर्वकाल। तद्वाचि नाम एकादीनि च तुल्यार्थानि परेण नाम्ना सह वा समस्यन्ते, स तत्पुरुष. कर्मधारयश्च समासो भवति। पूर्वकाल संबन्धिशब्दत्वादपरकालेन। पूर्वं स्नात पश्चादनुलिप्त स्नातानुलिप्त पुरुष। एवं लिप्तवासित, छिन्नप्ररूढो वृक्ष। एकशब्द संख्याऽन्याऽसहायाऽद्वितीयेषु वर्तते। एका शाटी—एकशाटी। शाटशब्देन त्वनभिधानान्न भवति। एक शाट। एके ऋषय - एकर्षय। एकचौर, एकधनुर्धर। सर्वशब्दो द्रव्यावयवप्रकारगुणाना कार्त्स्न्ये वर्तते। सर्वशैला, सर्वरात्र, सर्वान्न, सर्वशुक्ल। जरत्—जरद्धस्ती, जरद्गव, जरद्राज:। पुराण—पुराणवैयाकरण, पुराणान्नम्। नव—नवोदक, नवान्न, नवोक्ति। केवल केवल असहाय ज्ञान केवलज्ञानम्। पूर्वेणैव सिद्धे पुनर्वचन **'स्पर्धे'** [८/४/१३१] परमिति पूर्वनिपातस्य विषयप्रदर्शनार्थं पूर्वापरकालवाचिनोरद्रव्यशब्दत्वादनियमे प्राप्ते पूर्वकालवाचिन एव पूर्वनिपातार्थं च। केवलजरत्, केवलपुराणम्।

१०२. कुत्सितानि कुत्सनैरपापाद्यै:।

कुत्सितवाचीनि नामानि पापादिवर्जितै कुत्सनैर्निन्दाहेतुभि. सह तुल्यार्थे वा समस्यन्ते, स तत्पुरुष कर्मधारयश्च समासो भवति। वैयाकरणश्चासौ खसूची च वैयाकरणखसूची। य. शब्द पृष्ट सन्निष्प्रतिभत्वात् खं सूचयति स एवमुच्यते। वैयाकरणखसूचिरित्यन्ये। याज्ञिककितव:—अयाज्ययाजनात् तृष्णापर। मीमांसकदुर्दुरूढ[3]। क्षत्रियभीरु, भिक्षुविट, मुनिधूर्त., ब्राह्मणजाल्म.। कुत्सितशब्दनिन्दायामेवाय समासस्तेनेह न—वैयाकरणश्चौर.। न ह्यत्र वैयाकरणत्व कुत्स्यते। विशेषणसमासस्तु भवत्येव—चौरवैयाकरण। कुत्सनैरिति किम्? कुत्सितो ब्राह्मण। अपापाद्यैरिति किम्? पापवैयाकरण., अणकवैयाकरण.। प्रवृत्तिनिमित्तमेव कुत्स्यते। एवं पापकुलाल, अणकनापित, हतविधि, दग्धदैव, दुष्टामात्य:, क्षुद्रतापस.। आकृतिगणोऽयम्। विशेष्यस्य पूर्वनिपातार्थं वचनम्।

---

१. रविपरिवर्तनसंयोगेन दिश उच्यन्ते। अत अत्रापि गुण प्रवृत्तिनिमित्तम्।

२. वर्णसमूह।

३. दुर्दुरूढ —नास्तिक।

१०३. उपमानानि सामान्यैः ।

उपमीयतेऽनेनेति उपमानम् । उपमानोपमेययोः साधारणो धर्मः सामान्यम् । उपमानवाचीनि नामानि सामान्यवाचिभिर्नामभिः सह तुल्यार्थे वा समस्यन्ते, स तत्पुरुषः कर्मधारयश्च समासो भवति । घन इव श्यामः घनश्यामः । एवं मृगचपला, तडित्पिशङ्गी, हंसगद्गदा । उपमानानीति किम् ? देवदत्ता श्यामा । सामान्यैरिति किम् ? अग्निरिव माणवकः, पर्वता इव बलाहकाः । विशेषणसमासेनैव सिद्धे उपमानानि सामान्यैरेवेति नियमार्थं वचनम्, तेन अग्निर्माणवकः इत्यादौ विशेषणसमासोऽपि न भवति ।

१०४. उपमेयानि व्याघ्रादिभिः सामान्याऽप्रयोगे ।

उपमेयवाचीनि नामानि सामर्थ्यादुपमानवाचिभिर्व्याघ्रादिभिः सह तुल्यार्थे वा समस्यन्ते न चेदुपमानोपमेययोः साधारणधर्मवाची शब्दः प्रयुज्यते, स तत्पुरुषः कर्मधारयश्च समासो भवति । पुरुषो व्याघ्र इव पुरुषव्याघ्रः । एवं पुरुषसिंह, पुरुषवृषभ, वृषभगिह । सामान्याऽप्रयोगे इति किम् ? पुरुषो व्याघ्र इव शूरः । व्याघ्रादयो यथा—व्याघ्र, सिंह, ऋषभ, वृषभ, महिष, चन्दन, वृक, वराह, हस्तिन्, कुञ्जर, रुरु, पृषत, पुण्डरीक, पलाशिका, कुञ्चा, कुरर्, पद्म, वज्र, पल्लव, कमल, किसलय । आकृतिगणोऽयम् । तेन वदनेन्दु, पार्थिवचन्द्र, वानरश्वा, कुचकुम्भः, स्तनकलश इत्यादयोऽपि भवन्ति । उपमानानि सामान्यैरेवेति नियमेन विशेषणसमासे प्रतिषिद्धे समासविधानार्थं वचनम् ।

१०५. पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराः ।

पूर्वादयः शब्दाः नाम्ना सह तुल्यार्थे वा समस्यन्ते, स तत्पुरुषः कर्मधारयश्च समासो भवति । पूर्वश्चासौ पुरुषश्च पूर्वपुरुषः । एवं अपरपुरुष, प्रथमपुरुष, चरमपुरुष, जघन्यपुरुषः, समानपुरुषः, मध्यपुरुषः, मध्यमपुरुषः, वीरपुरुषः । विशेषणसमासेनैव सिद्धे '**स्पर्धे**' [८/४/१३१] परमिति पूर्वनिपातस्य विषयप्रदर्शनार्थमद्रव्यवाचिनोरनियमेन पूर्वापरभावप्रसक्तौ पूर्वनिपातनियमार्थं च वचनम् । तेन पूर्वजरन्, वीरपूर्वः, पूर्वपटुः[1] । कथं एकवीरः ? परत्वात् '**पूर्वकालैक**···' [३/१/१०१] इति सूत्रं बाधित्वाऽनेन समासे कृते वीरैक इति स्यात् । उच्यते—बहुलाधिकाराद् भविष्यति ।

१०६. श्रेण्यादिः कृतादिभिश्च्व्यर्थे ।

श्रेण्यादयः शब्दाश्च्व्यर्थे वर्तमानाः कृतादिभिः सह तुल्यार्थे वा समस्यन्ते, स तत्पुरुषः कर्मधारयश्च समासो भवति । अश्रेणयः श्रेणयः कृताः—श्रेणिकृताः पुरुषाः । अनूका ऊकाः कृताः—ऊककृताः । राशिस्थानीकृता इत्यर्थः । एवं पूगकृताः, श्रेणिमताः, श्रेणिमिताः, श्रेणिभूताः । च्व्यर्थे इति किम् ? श्रेणयः कृताः । किंचित् निगृहीता अनुगृहीता वेत्यर्थः । च्व्यन्ताना तु '**गतिः**' [३/१/८७] इति नित्यसमासः । श्रेणीकृताः, ऊकीकृताः । श्रेण्यादयो यथा—श्रेणि, ऊक, पूग, कुन्दुम, कन्दुम, राशि, निचय, विशिष्ट, निर्धन, कृपण, इन्द्र, देव, मुण्ड, भूत, श्रमण, वदान्य, अध्यायक, अध्यापक, ब्राह्मण, क्षत्रिय, पटु, पण्डित, कुशल, चपल, निपुण, क्षपण इति श्रेण्यादि । कृतादयो यथा—कृत, मत, मित, भूत, उप्त, उक्त, समाज्ञात, समाख्यात, समाम्नात, सभावित, अवधारित, अवकल्पित, निराकृत, उपकृत, उपाकृत, अपकृत, कलित, उदाहृत, उदीरित, उदित, दृष्ट, विश्रुत, विहित, निरूपित, आसीन, आस्थित, अवबद्ध । आकृतिगणोऽयम् । श्रेणिकृताः इत्यादौ क्रियाकारकसंबन्धमात्र, न विशेषणविशेष्यभाव इति वचनम् ।

१०७. क्तं नञ्विशिष्टेन ।

क्रियावाचिशब्दत्वादनियमेन पूर्वापरनिपाते प्राप्ते पूर्वनिपातार्थं वचनम् । नञेव विशेषो यस्य सर्वमन्यत्

---

१. पूर्वशब्दो दिग्योगेन कालयोगेन वा द्रव्यं विशिनष्टि पटुशब्दश्च पटुत्वेन । तत्र विशेषणसमासे द्वयोरपि गुणवचनविशेषणत्वात् खञ्जकुण्टादिवदनियमेन पूर्वनिपातः स्यात् ।

प्रकृत्यादितुल्यं तन्नञ्विशिष्टम् । नञ्विशिष्टेन सामर्थ्यात् क्तान्तेन सह तुल्यार्थे सामर्थ्यादनञ् क्तान्त वा समस्यते, स तत्पुरुषः कर्मधारयश्च समासो भवति । कृत च तदकृत च कृताकृतम् । एवं भुक्ताभुक्त, पीतापीतं, अशितानशितम् । इट. क्ताऽवयवत्वाद् विकारस्य तु एकदेशविकृत.नन्यत्वान्न भेदकत्वम् । तेन क्लिष्टाक्लिशित, पूतापवित, शातांशित, छातान्छितमित्यादि । क्तमिति किम् ? कर्तव्यमकर्तव्य च । नञ्विशिष्टेनेति किम् ? कृत प्रकृतं च । नञ्विशिष्टेनैवेत्यवधारणं किम् ? कृतं चाविहित चेति प्रकृतिभेदे कृत चाकर्तव्य चेति प्रत्ययभेदे गतश्च प्राप्तोऽगतश्चाऽज्ञात इत्यर्थभेदे सिद्ध चाभुक्तं चेति प्रकृत्यर्थयोर्भेदे च मा भूत् ।

१०८. न सेडऽनिटा ।

सेट् क्तान्त नाम नञ्विशिष्टेन क्तान्तेनानिटा नाम्ना सह तुल्यार्थे न समस्यते । पूर्वापवाद. । क्लिशितमक्लिष्ट, पवितमपूतम् । इड्ग्रहणमर्थभेदाऽहेतोर्विकारस्य उपलक्षणम् । तेन शिताशात[1], छिताच्छातमित्यादि न भवति । कथ विन्नावित्तं, त्राणात्रातम् ? क्तादेशस्य नत्वस्य परेऽसिद्धत्वाद् भविष्यति । सेडिति किम् ? कृताकृत, शातशातम् । अनिटेति किम् ? अशितानशितेन जीवति, शिताशित, छिताच्छितम् ।

१०९. कृताऽपकृतादयः ।

तुल्यार्थे मिलिता कृतापकृतादय शब्दा. कृततत्पुरुषकर्मधारयसमासा वा निपात्यन्ते । कृतापकृत, भुक्तापभुक्त, पीतविपीतं, जातानुजातम् । आकृतिगणोऽयम् ।

११०. शाकपार्थिवादीनां मध्यमपदलोपश्च ।

तुल्यार्थे मिलितानां शाकपार्थिवादीना तत्पुरुष. कर्मधारयश्च समासो वा भवति मध्यमपदलोपश्च । शाकप्रिय शाकप्रधानो वा पार्थिवः—शाकपार्थिव । देवपूजको ब्राह्मण —देवब्राह्मण । घृतप्रधाना रोटि —घृतरोटि. । सहस्रबाहुरर्जुनः—सहस्रार्जुन । त्र्यवयवा विद्या—त्रिविद्या । एकाधिका दश—एकादश । षोडश । अश्वयुक्तो रथ —अश्वरथ । घृतपूर्णो घटः—घृतघटः । आकृतिगणोऽयम् ।

१११. सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ।

सदादय. शब्दा. तुल्यार्थे पूज्यमानै सह वा समस्यन्ते, स तत्पुरुष कर्मधारयश्च समासो भवति । संश्चासौ पुरुषश्च सत्पुरुष । एव महापुरुष , परमपुरुष , उत्तमपुरुष , उत्कृष्टपुरुष । पूज्यमानैरिति किम् ? सन् घट —विद्यमान इत्यर्थ । उत्कृष्टो गौ —कर्दमात् उद्धृत इत्यर्थ । महान् धान्यराशि । बहुलाधिकारात् क्वचिदपूज्यमानैरपि भवति । महाजन , महोदधि । वैपुल्यमत्र गम्यते । क्वचित्पूजार्थोऽपि महच्छब्दोऽपूजा द्योतयति । महाब्राह्मण इत्यादि । पूज्यमानैरेवेति नियमार्थ पूर्वनिपातार्थ च वचनम्, तेन सच्छुक्ल इत्यादौ खञ्जकुण्टादिवत् अनियमेन पूर्वनिपातो न भवति । परमजरन्, महावीर , परममहान्—इत्यादौ च 'स्वर्थे' [८/४/१३१] परमिति यथापर पूर्वनिपातश्च सिद्धो भवति ।

११२. वृन्दारकनागकुञ्जरैः पूज्यमानम् ।

पूज्यमानवाचि नाम वृन्दारकादिभि सह तुल्यार्थे वा समस्यते, स तत्पुरुष कर्मधारयश्च समासो भवति । गौश्चासौ वृन्दारकश्च गोवृन्दारक । एवमश्ववृन्दारक । गोनाग , अश्वनाग. । गोकुञ्जर , अश्वकुञ्जर । प्रशस्य इत्यर्थ । पूज्यमानमिति किम् ? देवदत्तो नाग इव मूर्ख —हस्तीव मूर्ख इत्यर्थ. । अत्रोपमानेनापि निन्दैव गम्यते न तु पूजा, तेन देवदत्तो न पूज्यमान. । व्याघ्रादेराकृतिगणत्वात् 'उपमेयानि व्याघ्रादिभिः सामान्याऽप्रयोगे' [३/१/१०४] इत्यनेनैव सिद्धे पूज्यमानमेवेति नियमार्थ सामान्यप्रयोगेऽपि विधानार्थ च वचनम् । तेन गोनागो बलवान् इत्यादि सिद्धम् ।

---

१. अत्र 'छाशोर्वा' [४/४/४३] इति इकारविकल्प न तु इड्विकल्प । तेन विकारोपलक्षणेन सविकारमविकारेण न समस्यते इत्यर्थत्वात् समासो न भवति ।

११३. कतरकतमौ जातिप्रश्ने ।

कतरकतमावित्येतावेकार्थौ जातिप्रश्ने गम्यमाने सामर्थ्याज्जातिवाचिना नाम्ना सह तुल्यार्थे वा समस्येते, स तत्पुरुष. कर्मधारयश्च समासो भवति। कतरश्चासौ कठश्च कतरकठ.[1]। एवं कतरकालापः, कतमकठ, कतमकालापः, कतरगार्ग्यः, कतमगार्ग्यः । जातिप्रश्न इति किम् ? गुणक्रियाद्रव्यप्रश्ने न भवति। कतरः शुक्ल, कतमः शुक्लः, कतरो गन्ता, कतमो गन्ता, कतरो देवदत्तः, कतमो देवदत्त. । **'विशेषणं विशेष्येण··'** [३/१/१००] इत्येव सिद्धे जातिप्रश्ने एवेति नियमार्थं वचनम्।

११४. किं क्षेपे ।

क्षेपे वर्तमान. किंशब्दः तुल्यार्थे नाम्ना सह समस्यते, स तत्पुरुष. कर्मधारयश्च समासो भवति। को राजा -- किराजा यो न रक्षति। एव किंगौर्यो न वहति। किंसखा योऽभिद्रुह्यति । स किंवैयाकरणो य शब्दं न ब्रूते। सर्वत्र तत्कार्याऽकरणात् क्षेपो गम्यते। तथा कुत्सितो नरोऽश्वमुखत्वात् किंनर । एव किंपुरुष । कुत्सित शुकः किंचिन्नीलत्वात् किंशुकः पलाश । एव किञ्जल्क[2], किंकिरातमित्यादि[3]। **'न किमः क्षेपे'** [८/३/२] इति समासान्तप्रतिषेध । क्षेप इति किम् ? को राजा पाटलिपुत्रे। विकल्पाधिकारेऽपि नित्योऽयं समास. न हि वाक्येन क्षेपो गम्यते। विशेषणसमासेनैव सिद्धे क्षेपे एवेति नियमार्थं वचनम्।

११५. पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-बष्कयिणी-प्रवक्तृ-श्रोत्रियाध्यापक-धूर्तैर्जातिः ।

जातिवाचि नाम पोटादिभि. सह तुल्यार्थे वा समस्यते, स तत्पुरुष कर्मधारयश्च समासो भवति। इभ्या च सा पोटा च इभ्यपोटा। आर्यपोटा। पुरुषवेषधारिणी स्त्री पोटा गर्भ एव दास्य प्राप्ता वा। इभ्या चासौ युवतिश्च इभ्ययुवतिः। नागयुवतिः । अग्निश्चासौ स्तोक च अग्निस्तोकम्। विषस्तोकम्। दधि च तत्कतिपय च दधिकतिपयम्। तक्रकतिपयम्। गौश्चासौ गृष्टिश्चेति गोगृष्टि । अजगृष्टिः । गृष्टिरेकवारप्रसूता। गोधेनु, अजधेनु । धेनुर्नवप्रसूता। गोवशा, अजवशा। वशा— वन्ध्या। गोवेहत्, अजवेहत्। वेहद् —गर्भघातिनी। गोबष्कयिणी, अजबष्कयिणी। बष्कयेण वृद्धवत्सेन या दुह्यते सा बष्कयिणी। कठप्रवक्ता, कालापप्रवक्ता। प्रवक्ता —उपाध्यायः। कठश्रोत्रिय, कालापश्रोत्रिय । श्रोत्रियश्छन्दोऽध्यायी। कठाध्यापक, कालापाध्यापक। अध्यापकोऽध्येता। मृगधूर्त., गार्ग्यधूर्त । जातिरिति किम् ? देवदत्ता पोटा, जिनमित्रः प्रवक्ता। **'कुत्सितानि कुत्सनैः···'** [३/१/१०२] इत्यनेनैव सिद्धे धूर्तग्रहण शब्दप्रवृत्तिनिमित्तादन्यत्राऽपि कुत्साया यथा स्यादित्येवमर्थम्। विशेष्यस्य जाते पूर्वनिपातार्थं वचनम्।

११६. प्रशंसारूढैः ।

जातिरित्यनुवर्तते। जातिवाचि नाम तुल्यार्थे प्रशंसारूढै सह समस्यते, स तत्पुरुष कर्मधारयश्च समासो भवति। प्रशंसायां रूढा मतल्लिकादय नियतलिङ्गा[4] एवात्र ग्राह्या। गौश्चासौ मतल्लिका च गोमतल्लिका। एव अश्वमतल्लिका, गोमचर्चिका, गोप्रकाण्ड, पुरुषोद्घ, गोकुमारी, अश्वकुमारी, गोतल्लजक, कुमारतल्लजक, तानपादा., आर्यमिश्राः, केशपाश, केशहस्त, असिभित्ति, वक्षस्थल, कपोलपाली, उरःकपाट, स्तनतटम्। रूढग्रहणादिह न भवति— गौ. रमणीया, गौ शोभना। जातिरिति किम् ? मैत्रो मतल्लिका। विशेष्यस्य जाते पूर्वनिपातार्थं वचनम्।

११७. चतुष्पादो गर्भिण्या ।

जातिरित्यनुवर्तते। चत्वारः पादा यस्या जातेस्तद्वाचिन शब्दास्तुल्यार्थेन गर्भिणीशब्देन सह वा समस्यन्ते, स

---

१. कठ इत्यादि चरण, गार्ग्य इत्यादि गोत्रम्। ततो गोत्र च चरणै. सहेति जाति ।

२. जल्कः—चूर्णः।

३. किरात—काञ्चनारवृक्षस्य पुष्पम्।

४. उपलक्षणत्वान्नियतवचनाश्च तेन तातश्च ते पादाश्चेति सिद्धम्।

तत्पुरुष कर्मधारयश्च समासो भवति। गौश्चासौ गर्भिणी च गोगर्भिणी। एव अजगर्भिणी, अश्वगर्भिणी, महिषगर्भिणी। चतुष्पाद इति किम् ? ब्राह्मणी[1] गर्भिणी। जातिरिति किम् ? स्वस्तिमती गर्भिणी। जातेर्विशेष्यस्य पूर्वनिपातार्थ वचनम्।

११८. युवा खलतिपलितवलिनजरद्भिः।

युवन्शब्द खलत्यादिभि सह तुल्यार्थे वा समस्यते, स तत्पुरुष कर्मधारयश्च समासो भवति। युवा चासौ खलतिश्च युवखलति। एव युवपलित। वलयोऽस्य सन्ति वलिनः। अङ्गादित्वान्न.। युववलिन, युवजरन्। **नामग्रहणे लिङ्गविशिष्टस्याऽपि ग्रहणमिति** युवतिश्चासौ खलतिश्च युवखलति.। एव युवपलिता, युववलिना, युवजरती। युवशब्दस्य विशेष्यत्वात् परनिपाते प्राप्ते द्वयोर्वा गुणवचनत्वात् खञ्जकुण्टादिवदनियमे पूर्वनिपातार्थ वचनम्।

११९. कृत्यतुल्याख्या अजात्या।

तुल्याख्य—तुल्यपर्यायम्। कृत्यप्रत्ययान्तास्तुल्याख्याश्च शब्दा अजातिवचनेन सह तुल्यार्थे वा समस्यन्ते, स तत्पुरुष. कर्मधारयश्च समासो भवति। भोज्य च तदुष्ण च भोज्योष्णम्। एव भोज्यलवण, पानीयशीत, पानीयोष्ण, पेयाम्ल, ग्तुत्यपटु। तुल्याख्या—तुल्यश्वेतः, तुल्यमहान्, सदृशश्वेत, सदृशमहान्। अजात्येति किम् ? भोज्य ओदन., तुल्यो वैश्य। कथ शीतपानीयम् ? पानीयशब्दो जलवाच्यऽयमौणादिक, तस्याऽय विशेषणसमास। जात्या समासस्याऽजाते. पूर्वत्वस्य च प्रतिषेधार्थ वचनम्।

१२०. कुमारः श्रमणादिना।

कुमारशब्द श्रमणादिभि सह तुल्यार्थे वा समस्यते, स तत्पुरुष कर्मधारयश्च समासो भवति। येऽत्र स्त्रीलिङ्ग-शब्दास्तै सह स्त्रीलिङ्ग एव कुमारशब्द समस्यते, शेषैस्तूभयलिङ्ग इति विवेक। कुमारी चासौ श्रमणा च कुमारश्रमणा। कुमारश्चासौ पण्डितश्च कुमारपण्डित। कुमारपण्डिता। श्रमणादयो यथा—श्रमणा, प्रव्रजिता, कुलटा, गर्भिणी, तापसी, बन्धकी, दासी। एते सप्त स्त्रीलिङ्गा एव। अध्यायक, अभिरूपक, पटु, मृदु, पण्डित, कुशल, चपल, निपुण। सप्ताना स्त्रीलिङ्गाना श्रमणादीना पुलिङ्गत्वे कामचार। कुमारश्रमण, श्रमणकुमार। श्रमणादीना स्त्रीलिङ्गे पाठादेव **नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति** न्यायो विज्ञायते। कुमारशब्दस्य पूर्वनिपातार्थ वचनम्।

१२१. मयूरव्यंसकेत्यादयः।

मयूरव्यंसकादय शब्दा कृततत्पुरुषकर्मधारयसंज्ञका निपात्यन्ते। व्यंसक – धूर्त। व्यंसकश्चासौ मयूरश्च मयूरव्यंसक। एव छात्रव्यंसक। मुण्डन मुण्ड। सोऽस्याऽस्तीति मुण्ड, अभ्रादित्वाद। मुण्डश्चासौ कम्बोजश्च कम्बोजमुण्ड। एव यवनमुण्ड। व्यंसिका चासौ मयूरी च मयूरव्यंसिका। कर्मधारयलक्षण पुवद्भाव। एतेषु विशेष्यस्य पूर्वनिपातो निपातनात्। एहीडादयोऽन्यपदार्थे—एहि इडे[2] स्त्र इति जल्पो यस्मिन् कर्मणि काले वा तदेहीड वर्तते। एहि यवैरिति जल्पो यस्मिन् कर्मणि काले वा तदेहियव वर्तते। एतो निपातनान्नपुसकौ। अपेहि वाणिजेति जल्पो यस्यां क्रियाया सा अपेहिवाणिजा। एवमेहिवाणिजा, प्रेहिवाणिजा। अपेहिस्वागता, एहिस्वागता। अपेहिद्वितीया, एहिद्वितीया। अपेहिप्रघसा, एहिप्रघसा। अपेहिविघसा, एहिविघसा। अपेहिप्रकसा, एहिप्रकसा। प्रेहि स्वागतमिति जल्पो यस्यां सा प्रेहिस्वागता। एव प्रेहिवाणिजा। प्रोह कटमिति जल्पो यस्या सा प्रोहकटा। एव प्रोहकर्दमा, प्रोहकपर्दा। कृन्धि विचक्षणेति कृन्धि विचक्षणमिति वा जल्पो यस्या सा कृन्धिविचक्षणा। एवमुद्धमचूडा, भिन्धिलवणा, पचलवणा, भिन्धिपचा। आहर चेलमिति जल्पो यस्यां सा आहरचेला। एवमाहरवमना, आहरवितता। उद्धरोत्सृजेति जल्पो यस्यां सा उद्धरोत्सृजा। एवमुद्धराऽवसृजा। उत्पच निपच इति जल्पो यस्या सा उत्पचनिपचा। एवमुत्पतनिपता, उद्धमविधमा, उद्वपनिवपा। उन्मृजाऽवमृजेति यस्या सा उन्मृजावमृजा[3]। अत एव निपातनादिहैव च मृजेर्हो अन्प्रत्ययो भवति। इह द्वितीयेति यस्या सा इहद्वितीया। एवमिहपञ्चमी, अद्यद्वितीया,

१ समासे हि सति ब्राह्मणीशब्दस्य पुवद्भाव।

२ 'म्लेच्छीडेर्ह्रस्वश्च वा' [उ० १/३] अप्रत्यये वा ह्रस्वत्वे इडा, इला स्त्रीत्यर्थ। यथा महती इला महेलेति। तदामन्त्रणमिडे इति।

३. आख्यातयो. क्रियासातत्ये समासस्य वक्ष्यमाणत्वादसातत्यार्थोयमारम्भ। बहुव्रीहौ कप्प्रत्ययप्रसङ्गः स्यात्।

अद्यपञ्चमी । एहिरे याहिरे इति यस्यां सा एहिरेयाहिरा । एवमेहिरेगच्छरा । अहो पुरुष इति यस्या सा अहोपुरुषिका । अहं पूर्व इति यस्या सा अहपूर्विका । एव अहप्रथमिका, अहमहमिका । विकृत च प्रकृत च यस्यां सा विचप्रका । निश्चितं च प्रचितं च यस्यां सा निश्चप्रचा । या इच्छा यस्यां सा यदृच्छा । आख्यातमाख्यातेन सातत्ये—अश्नीत पिबत इति निरन्तरं जल्पो यस्यां सा अश्नीतपिबता । एवं लुनीतपुनीता, खादतमोदता, पचतभृज्जता, खादाचामा । एषु सर्वेषु क्रियैवान्यपदार्थः । ह्यन्त स्वकर्मणा बहुलमाभीक्ष्ण्ये कर्तरि समासाऽभिधेये—जहि जोडमिति[1] येन पुनः पुनरुच्यते स जहिजोड । एवमुज्जहिजोड, जहिस्तम्ब.[2], उज्जहिस्तम्बः, कुरुकट. । बहुलवचनान्नेह—पचौदनमित्यभीक्ष्णमाह । नाऽस्य किञ्चनमस्ति अकिञ्चनम् । नास्ति कुतोऽपि भयमस्य अकुतोभयम् । गतप्रत्यागतादयः—गतं च तत्प्रत्यागतं च गतप्रत्यागतम् । स्नात्वा कालीभूत. स स्नात्वाकालक. । एवं पीत्वास्थिरक., भुक्त्वासुहित. । प्रोष्य विप्रयुक्तो भूत्वा पापीयान्निःस्नेहो भवति प्रोष्यपापीयान् । उत्पत्याकाशे भूत्वा या पाकला पाण्डुर्भवति सा उत्पत्यपाकला । निपत्य भूमौ निपतिता रोहिणी या रक्ता भवति सा निपत्यरोहिणी । निषद्य निषण्णा सती श्यामा जाता निषद्यश्यामा । आचित च अवचित च आचोवचम् । उच्चैश्च नीचैश्च उच्चनीचम । उदक् चावाक् च उच्चावचम् । क्रयश्चासौ क्रयिका च क्रयक्रयिका समुदाय. । एवं पुटापुटिका, फलाफलिका, मानोन्मानिका । एषु व्यवस्थितपूर्वोत्तरपदसमासः । इतिशब्द स्वरूपावधारणार्थस्तेन परमो मयूरव्यंसक इति समासान्तर न भवति । बहुवचनमाकृतिगणार्थम् । तेन विस्पष्टपटु, पुनाराज, पुनर्गव, मायंदोह, प्रातर्दोह, पुनर्दोह., मायमाश, प्रातराश इत्यादयो द्रष्टव्या ।

१२२. दिक्संख्ये संज्ञायाम ।

दिग्वाचिन शब्दा सख्या च तुल्यार्थे नाम्ना सह समस्यन्ते संज्ञाया विषये, स तत्पुरुष कर्मधारयश्च समासो भवति । दक्षिणा कोशला —दक्षिणकोशला । उत्तरकोशला । दक्षिणपञ्चाला, उत्तरपञ्चाला । एवनामानो जनपदाः । पूर्वेषुकामशमी, अपरेषुकामशमी, पूर्वकृष्णमृत्तिका, अपरकृष्णमृत्तिका । एवनामानो ग्रामा । सख्या—पञ्चाम्रा.[3], दशाम्रा, पञ्चर्षय, सप्तर्षय । नित्यसमासोऽय, न हि वाक्येन सज्ञा गम्यते इति हेतो. । पूर्वोत्तरविभागप्रदर्शनार्थं तु विग्रहवाक्यम् । सज्ञायामिति किम् ? उत्तरा वृक्षा, पञ्च ब्राह्मणा । विशेषणसमासेनैव सिद्धे सज्ञायामेवेति नियमार्थं वचनम् ।

१२३. अधिकं च तद्धितोत्तरपदसमाहारेषु ।

चाद्दिक्सख्ये इत्यनुवर्तते । अनेकस्य कथचिदेकत्र समाहार. । तद्धितविषये उत्तरपदे च परत समाहारे च वाच्ये अधिकशब्दो दिक्सख्ये च तुल्यार्थे वा समस्यते, स तत्पुरुष कर्मधारयश्च समासो भवति । तद्धिते. तावत्—अधिकया षष्ट्या क्रीत, अधिका षष्टि भूतो भावी वा अधिकषाष्टिक.[4] । एव अधिकसाप्ततिक । नित्यसमासोऽय, न हि तद्धिते वाक्यमस्ति[5] । पूर्वस्यां शालायां भव—पौर्वशाल । एवं दाक्षिणशाल, औत्तरशाल, आपरशाल. । द्वयोर्मात्रोरपत्य—द्वैमातुर. । पाञ्चनापिति । पञ्चसु कपालेषु सस्कृत पञ्चकपाल । अध्यर्धेन कसेन क्रीत अध्यर्धकसः । उत्तरपदे तावत्—अधिक गौ. प्रिया यस्य अधिकगवप्रिय । उत्तरपदेऽपि नित्यसमास । त्रयाणामेकार्थीभाव एवोत्तरपदसभवात् । तत्र च द्वयोर्व्यपेक्षाभावात् । दक्षिणो गौर्धनमस्य दक्षिणगवधन । एवमुत्तरगवधन । एषु तत्पुरुषलक्षण. समासान्त । पञ्च गावो धनमस्य पञ्चगवधन. । पञ्च नाव प्रिया यस्य स पञ्चनावप्रिय । अध्यर्धा नौर्धनमस्य अध्यर्धनावधन । समाहारे दिगधिकशब्दौ न संभवत । पञ्चानां पूलाना समाहार—पञ्चपूली । पञ्चानां राज्ञां समाहार—पञ्चराजी । एव पञ्चकुमारि[6],

---

१. जुडण् प्रेरणे—इत्यतोऽडचि जोडो दास ।

२ स्तम्बे **'तुम्बस्तम्बावयः'** [उ० २/७०] इति बप्रत्यये निपातनात् भलोपे ।

३. सन्निवेशादिविशेषविशिष्टाना पञ्चानामाम्राणामिय सज्ञा ।

४. **'मानसंवत्सरस्याऽशाणकुलिजस्यासंज्ञायाम्'** [८/४/१०] ।

५ तद्धिता हि नाम्न उत्पद्यन्ते न तु समासारम्भकात् वाक्यात् ।

६ **'अपथो नपुंसकः सर्वो, द्विगुः पूर्वविप्रतनः'** [स्त्रीलिङ्गाधिकार, श्लोक ७] इति लिङ्गानुशासनात् नपुंसकत्वम् । **'नपुंसके'** [२/३/११३] इति ह्रस्वः ।

दशकुमारि। अध्यर्धानां पूलानां समाहारः—अध्यर्धपूली। अर्धपञ्चमपूली। विशेषणसमासेनैव सिद्धे एष्वेवेति नियमार्थं वचनम्, तेनेह न—अष्टौ प्रवचनमातरः।

१२४. संख्यापूर्वो द्विगुश्च।

तद्धितोत्तरपदसमाहारेषु इत्यत्र यः संख्यापूर्वस्तत्पुरुषः कर्मधारयश्च समास उक्तः स द्विगुसंज्ञकोऽपि भवति। उदाहरणानि तु पूर्वसूत्रे एव द्रष्टव्यानि। द्विगुसंज्ञाप्रयोजनं तु **'द्विगोः समाहारात्'** [२/३/४१] इत्यादि। चकारः कर्मधारयतत्पुरुषसंज्ञासमावेशार्थः।

१२५. सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः।

सुचोऽर्थो वारः। वाऽर्थो विकल्पः संशयो वा। सुज्वार्थे वर्तमानं संख्यावाचि नाम संख्येये वर्तमानेन संख्यावाचिना नाम्ना सह ऐकार्थ्ये वा समस्यते, स बहुव्रीहिसंज्ञकः समासो भवति। द्विर्दश द्विदशाः। त्रिर्दश त्रिदशाः। द्विविंशतिः[1] द्विविंशाः। एवं त्रिविंशा वृक्षाः। सुजर्थस्य समासेनैवोक्तत्वात्सुचोऽप्रयोगः। द्वौ वा त्रयो वा द्वित्राः। त्रिचतुराः, पञ्चषाः, सप्ताष्टाः। सुज्वार्थे इति किम्? द्वावेव न त्रयः। संख्येति किम्? गावो वा दश वा। संख्येयेति किम्? दश वा गावो वा। संख्येये इति किम्? द्विविंशतिर्गवाम्। बहुव्रीहिसंज्ञाप्रयोजनं तु **'अनो बहुव्रीहेः'** [२/३/५] इत्यादि।

१२६. आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे।

आसन्न, अदूर, अधिक, अध्यर्ध—इत्येतानि अर्धशब्दपूर्वपदं च पूरणप्रत्ययान्तं नाम संख्यावाचिना नाम्ना सह ऐकार्थ्ये द्वितीयाद्यन्तस्याऽन्यस्य पदस्यार्थे संख्येयरूपेऽभिधेये वा समस्यते, स बहुव्रीहिसंज्ञकः समासो भवति। आसन्ना दश दशत्वं येषां येभ्यो वा ते आसन्नदशाः—नवैकादश वा। एवमासन्नविंशाः—एकोनविंशतिः एकविंशतिर्वा। आसन्नत्रिंशाः—एकोनत्रिंशदेकत्रिंशद्वा। एवमदूरदशाः, अदूरविंशाः, अदूरत्रिंशाः। अधिका दश येभ्यो येषु वा ते अधिकदशाः—एकादशादयः। अधिकत्वं च दशानामेकाद्यपेक्षम्। एवमधिकविंशाः—एकविंशत्यादयः। अधिकत्रिंशाः—एकत्रिंशदादयः। अध्यर्धा विंशतिर्येषां ते अध्यर्धविंशाः—त्रिंशदित्यर्थः। एवमध्यर्धविंशाः, अध्यर्धचत्वारिंशाः। अर्धपञ्चमा विंशतयो येषां ते अर्धपञ्चमविंशाः—नवतिरित्यर्थः। एवमर्धचतुर्थविंशाः—सप्ततिरित्यर्थः। अर्धतृतीयविंशाः—पञ्चाशदित्यर्थः। आसन्नादिग्रहणं किम्? सन्निकृष्टा दश येषां ते सन्निकृष्टदशानः[2]। अप्रतिपदोक्तबहुव्रीहित्वात्समासान्तो डो न भवति। पूरणस्याऽर्धपूर्वत्वविशेषणं किम्? पञ्चमी विंशतिर्येषां ते पञ्चमीविंशतयः। ऊनपञ्चमा विंशतयो येषां ते ऊनपञ्चमविंशतयः। पूरणमिति किम्? अर्धद्वया[3] विंशतयो येषां ते अर्धद्वयविंशतयः। द्वितीयाद्यन्यार्थ इति किम्? आसन्ना दश, अधिका दशभिः। तथाऽधिका षष्टिर्वर्षाण्यस्येति वाक्येऽधिकषष्टिशब्दयोरनेन द्विपदो बहुव्रीहिर्न भवति। यदि स्यात् समासान्तो डः प्रसज्येत। न चासाविष्यते। उत्तरेण तु त्रिपदो बहुव्रीहिर्भवत्येव—अधिकषष्टिवर्षः। अधिका षष्टिर्येषां वर्षाणामित्यत्र त्वन्यार्थत्वेऽपि अनभिधानान्न भवति। **'तुल्यार्थं चाऽनेकं च'** [३/१/१२८] इत्यनेनैव सिद्धे प्रतिपदविधानं डप्रत्ययार्थम्। एवमुत्तरसूत्रमपि।

१२७. अव्ययम्।

पूर्वमनुवर्तते। अव्ययं नाम संख्यावाचिना नाम्ना सह ऐकार्थ्ये द्वितीयाद्यन्यार्थे संख्येयेऽभिधेये वा समस्यते, स बहुव्रीहिसंज्ञकः समासो भवति। उप—समीपे दश येषां ते उपदशाः—नवैकादश वा। एवमुपविंशाः, उपत्रिंशाः, उपचत्वारिंशाः। योगविभाग उत्तरार्थः।

---

१. **'विंशत्याद्या शतात् द्वन्द्वे, सा चैक्ये द्वन्द्वमेययोः'** [स्त्रीलिङ्गाधिकारः, श्लोक ७] इति लिङ्गानुशासनात् स्त्रीत्वमेकत्वं च।

२. अत्र **'संख्याया बहुव्रीहेः'** [८/३/७०] इति डो न भवति। तत्र प्रतिपदोक्तस्य समासस्य ग्रहणात्।

३. अर्धं द्वय विंशतिर्यासु एकं दशकलक्षणमर्धं द्वितीयं तु द्विभागीकृतं किं भवति? पञ्च।

१२८. तुल्यार्थं चाऽनेकं च ।

तुल्यार्थ—समानाधिकरणम् । एकमऽनेक च तुल्यार्थ नाम अव्यय च नाम्ना सह द्वितीयाद्यन्यार्थे वा समस्यते, स बहुव्रीहिसंज्ञक समासो भवति । आरूढो वानरो यं स आरूढवानरो वृक्ष. । ऊढ रथः येन स ऊढरथोऽनड्वान् । उपहृतो बलिरस्यै सा उपहृतबलिर्यक्षी । भीताः शत्रवो यस्मात् स भीतशत्रुर्नृप. । चित्रा गावो यस्य स चित्रगुश्चैत्रः । के सब्रह्मचारिणोऽस्य किंसब्रह्मचारी । अर्ध तृतीयमेषामर्धतृतीया । वीरा पुरुषा. सन्ति यस्मिन् स वीरपुरुषो ग्राम । अनेकं च — आरूढा बहवो वानरा यं स आरूढबहुवानरो वृक्ष । ऊढा बहवो रथा अनेन स ऊढबहुरथोऽनड्वान् । शोभना. सूक्ष्मजटा. केशा अस्य सुसूक्ष्मजटकेशः । शोभन नतमजिनं वासोऽस्य सुनताजिनवासा. । सजातानि अन्तेषु[१] शितीनि[२] रन्ध्राण्यस्मिन् समन्तशितिरन्ध्रः । पञ्च गावो धनमस्य पञ्चगवधन । पञ्च नाव प्रिया अस्य पञ्चनावप्रियः । मत्ता बहवो मातङ्गा यत्र तन्मत्तबहुमातङ्गं वनम् । पञ्च पूला धनमस्य पञ्चपूलधन । पञ्च कुमार्य प्रिया अस्य पञ्चकुमारीप्रिय.[३] । 'नाम नाम्ना···' [३/१/१६] इति विवक्षितसख्यत्वादनेकस्य समासो न स्यादित्यनेकग्रहणम् । अव्यय खल्वपि—उच्चैर्मुखमस्य उच्चैर्मुख । एव नीचैर्मुख । अन्तरङ्गानि अस्यान्तरङ्गः । एव बहिरङ्ग । कर्तुं कामोऽस्य कर्तुकाम । हर्तुं मनोऽस्य हर्तुमनाः । व्यधिकरणत्वादव्ययस्य न प्राप्नोतीत्यव्ययानुकर्षणार्थश्चकार । सामानाधिकरण्ये तु 'तुल्यार्थं···'इत्यनेनाऽपि सिध्यति । अस्ति क्षीरमस्या अस्तिक्षीरा गौ । अस्तिधना राजधानीत्यादि । क्रियावचनत्वे त्वस्त्यादीनां 'नाम नाम्ना···' [३/१/१६] इत्यादिनैव बहुलवचनात् सिद्धम् । तुल्यार्थग्रहणं किम् ? पञ्चभिर्भुक्तमस्य । द्वितीयाद्यन्यार्थ इति किम् ? वृष्टे मेघे गत । यथा मे माता तथा मे पिता । सुस्नात भो । इह कस्मान्न भवति—वृष्टे मेघे गत पश्य ? बहिरङ्गाऽत्र द्वितीयान्तता इति । शब्दे कार्याऽसभवादर्थे लब्धे यदर्थग्रहण तदन्यपदार्थस्य या लिङ्गसंख्याविभक्तयस्ता यथा स्युरित्येवमर्थम् । बहुलाधिकारात् राजन्वती भूरनेन, प्राग्ग्रामोऽस्मात्, पञ्च भुक्तवन्तोऽस्य—इत्यादिषु न भवति ।

१२९. हंसगमनादयः ।

हसगमनादय शब्दा. कृतबहुव्रीहिसमासान्ता अन्यपदार्थेऽभिधेये वा निपात्यन्ते । हंसगमनमिव गमनं यस्या सा हसगमना । हरिणाक्षिणी इव अक्षिणी यस्या. सा हरिणाक्षी । उष्ट्रमुखमिव मुखमस्य स उष्ट्रमुख । वृषस्कन्ध इव स्कन्धो यस्य स वृषस्कन्ध । इभकुम्भाविव स्तनौ यस्या सा इभकुम्भस्तनी । एव नागनासोरू, चन्द्रवदना, बिम्बोष्ठी, चक्रनितम्बा । पितुरिव स्थानमस्य पितृस्थान. । पितरीव स्थानीयमस्मिन् पितृस्थानीयः इत्यादि । अत्रोपमानमुपमेयेन सामान्यवाचिना सह समस्यते । उपमेयमरूपस्य चोपमानपदस्य यथासंभव लोप । कण्ठे स्थिता कण्ठेस्थिता इत्यलुक्समास. । तत कण्ठेस्थिता काला यस्य स कण्ठेकाल । एवमुरसि स्थितानि लोमानि अस्योरसिलोमा । एवमुदरेमणि, वहेगडु — इत्यादिषु सप्तमीपूर्वपद समानाधिकरण समस्यते उत्तरपदस्य च लोप । व्यधिकरणो वा कण्ठेकालादिषु बहुव्रीहि । केशसंघातश्चूडा अस्य केशचूडः, सुवर्णविकारोऽलकारोऽस्य सुवर्णालकार —इत्यादिषु संघातविकाराऽपेक्षया षष्ठ्या समस्त समानाधिकरण समस्यते उत्तरपदलोपश्च । केशसंघातचूडः, सुवर्णविकारालकार इत्यप्यन्य । प्रपतितानि पर्णान्यस्य प्रपर्ण., प्रपतितपर्ण. । प्रपलाशः, प्रपतितपलाश. । उद्रश्मि., उद्गतरश्मि —इत्यादिषु प्रादिपूर्वं धातुजं पद समस्यते तस्य च विकल्पेन लोप । अविद्यमान पुत्रोऽस्य अपुत्र, अविद्यमानपुत्र. —इत्यादिषु नञ्पूर्वमस्त्यर्थं पद समस्यते तस्य च वा लोप । आकृतिगणोऽयम् ।

१३०. तेन[४] सहः ।

सह इत्येतन्नाम तुल्ययोगे विद्यमानार्थे च वर्तमान तेनेति तृतीयान्तेन नाम्ना सह अन्यपदार्थे वा समस्यते, स बहुव्रीहिसंज्ञकः समासो भवति । तुल्ययोगे—सह पुत्रेण सपुत्र आगत, सछात्र आगतः । आगमनमुभयोस्तुल्यम् ।

---

१. अर्थकथनमिद विग्रहस्तु अन्तशितीनीति । अवान्तर समास. कार्य ।

२. कृष्णवर्णानि ।

३ न प्रधानपूरणी प्रियादाविति पुंवद्भावाऽभाव ।

४ तेनेति तृतीयान्तप्रतिरूपकान्निपातात् तृतीया ।

विद्यमानार्थे—सह कर्मणा वर्तते सकर्मकः । एवं सलोमकः, सपक्षकः, सधनः, समदः, सविद्यः । विद्यमानतायां सहार्थो न तुल्ययोगः[1] । सह इति किम् ? साकं, सार्धं, सत्रा, अमा पुत्रेण । बहुलाधिकाराद् विद्यमानार्थेऽपि क्वचिन्न[2] भवति । सहैव दशभिः पुत्रैर्भारं वहति[3] गर्दभी । सहैव धनेन भिक्षां भ्रमति । प्रथमान्तान्यपदार्थार्थ आरम्भः । एवमुत्तरत्रापि ।

१३१. दिशो रूढ्याऽन्तराले ।

रूढ्या दिशः संबन्धि नाम रूढ्यैव दिशः सबन्धिना नाम्ना सह अन्तराले अन्यपदार्थेऽभिधेये वा समस्यते, स बहुव्रीहिसंज्ञकः समासो भवति । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा दिक् । एवं पूर्वोत्तरा, उत्तरपश्चिमा, दक्षिणपश्चिमा । कथं पश्चिमदक्षिणा, पश्चिमोत्तरा ? कर्मधारयोऽयम् । बहुव्रीहौ हि सर्वादेः पूर्वनिपातः स्यात् । रूढिग्रहणं यौगिकनिवृत्त्यर्थम्, तेन ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालमिति वाक्यमेव ।

१३२. तत्र गृहीत्वा तेन प्रहृत्य सरूपेण युद्धे क्रियाव्यतिहारे ।

तत्रेति सप्तम्यन्तं नाम गृहीत्वा इति क्रियाव्यतिहारे तेनेति तृतीयान्तं नाम च प्रहृत्य इति क्रियाव्यतिहारे सरूपेण नाम्ना सह युद्धविषये अन्यपदार्थे वा समस्यते, स बहुव्रीहिसंज्ञकः समासो भवति । केशेषु च केशेषु च गृहीत्वा कृतं युद्धं केशाकेशि । एवं कचाकचि, बाहूबाहवि । दण्डैश्च दण्डैश्च प्रहृत्य कृतं युद्धं दण्डादण्डि । एवं यष्टायष्टि, मुष्टामुष्टि, अस्यसि । तत्रेति तेनेति च किम् ? केशाश्च केशांश्च गृहीत्वा कृतं युद्धम् । मुखं च मुखं च प्रहृत्य कृतं युद्धम् । गृहीत्वेति प्रहृत्येति च किम् ? केशेषु च केशेषु च स्थित्वा कृतं युद्धं गृहकोकिलाभ्याम् । दण्डैश्च दण्डैश्च आगत्य कृतं युद्धमेताभ्याम् । क्रियाव्यतिहारे इति किम् ? केशेषु[4] च केशेषु च गृहीत्वा कृतं युद्धमनेन । सरूपेणेति किम् ? हस्ते च पादे च गृहीत्वा कृतं युद्धम् । युद्धे इति किम् ? हस्ते च हस्ते च गृहीत्वा कृतं सख्यम् ।

१३३. चार्थे द्वंद्वः सहोक्तौ ।

नाम नाम्ना सह सहोक्तिविषये चार्थे वर्तमानं वा समस्यते स च समासः द्वंद्वसंज्ञको भवति । प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । एवं धवाश्वकर्णौ । वाक् च त्वक् च वाक्त्वचम् । छत्रोपानहम् । नाम नाम्ना इत्यनुवर्तमानेऽपि **'द्वंद्वे लघ्वक्षरमेकम्'** [३/१/१६८] इति सूत्रे एकग्रहणाद् बहूनामपि द्वंद्वो भवति । धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः । होतृपोतृनेष्टोद्गातारः । द्वयोर्द्वयोर्द्वंद्वे तु होतापोतानेष्टोद्गातारः इत्येव स्यात् । **'आ द्वंद्वे'** [३/२/३६] इत्यनेन पूर्वपदस्योत्तरपदे प्रत्येकमाकारः । चार्थे इति किम् ? वीप्सासहोक्तौ मा भूत् । ग्रामो ग्रामो रमणीयः । सहोक्ताविति किम् ? प्लक्षश्च न्यग्रोधश्च वीक्ष्यताम् । वाक् च त्वक् च गृह्यताम् । खञ्जश्चासौ कुण्टश्च खञ्जकुण्टः । इह समुच्चयान्वाचयेतरेतरयोगसमाहारभेदाच्चत्वारश्चार्थाः । तत्र परस्परनिरपेक्षस्याऽनेकस्य क्रियाकारकादेरेकस्मिन्नन्वयः समुच्चयः । चैत्रः पचति पठति च । चैत्रो मैत्रश्च पठति । ईश्वरं गुरुं च भजस्व । समुच्चये एवाऽन्यतरस्य गौणत्वेऽन्वाचयः । बटो ! भिक्षामट गां चानय । स हि भिक्षां तावदटति यदि च गां पश्यति तामप्यानयति । द्रव्याणामेव परस्परसव्यपेक्षाणामुद्भूतावयवभेदः समूह इतरेतरयोगः । यथा—चैत्रश्च मैत्रश्च घटं कुर्वाते । चैत्रमैत्रौ घटं कुर्वाते । चैत्रश्च मैत्रश्च दत्तश्च पटं कुर्वन्ति । चैत्रमैत्रदत्ताः पटं कुर्वन्ति । अत्रावयवानामुद्भूतत्वात् तत्सख्यानिबन्धनं द्विवचनं बहुवचनं च भवति । स एव तिरोहितावयवभेदः सहतिप्रधानः समाहारः । धवश्च खदिरश्च पलाशश्च तिष्ठति । धवखदिरपलाशं तिष्ठति । अत्र तु समूहस्य प्राधान्यात् तस्य चैकत्वादेकवचनमेव भवति । एषु चाद्ययोः सहोक्त्यऽभावात् समासो न भवति । उत्तरयोस्तु

---

१. ननु तुल्ययोगविद्यमानार्थयोः को भेदः ? उच्यते—क्रियागुणद्रव्यैरुभयोः सदृशः सम्बन्धस्तुल्ययोगः । विद्यमानार्थता तु न तथा । तथाहि—सकर्मकादात्मनेपदमित्युक्ते यथा धातोरात्मनेपदं भवति न तथा कर्मणोऽपि । तथा सलोमको भोज्यतामिति यथा देवदत्तो भोज्यते न तथा लोमान्यपि । तथा सपक्षकः खगो हतः इत्यत्र यथा पक्षी हतो न तथा पक्षा अपीति भावः ।

२. तुल्ययोगे तु भवत्येव ।

३. अत्र तत्पुत्राणामस्तित्वमेव विवक्षितं न तु वहनक्रियेति विद्यमानार्थता ।

४. एकः सकेशः अन्यश्च मुण्डोऽतो न मिथः क्रियाव्यतिहारः ।

चार्थे सहोक्तेर्विद्यमानत्वात्समासो भवति । का पुनरियं सहोक्तिः ? यद्वास्तिपदैः प्रत्येकं पदार्थानां युगपदभिधानं सा सहोक्तिः । प्लक्षन्यग्रोधावित्यत्र प्लक्षोऽपि द्व्यर्थः न्यग्रोधोऽपि द्व्यर्थः । प्लक्षश्च न्यग्रोधश्चेति वाक्येऽपि चकारेणायमेवार्थः कथ्यते । द्वन्द्वसंज्ञाप्रयोजनं तु **'द्वंद्वाच्चुदषहात्समाहारे'** [८/३/३६] इत्यादि ।

१३४. समानामर्थेनैकशेषः ।

अर्थेन समानां समानार्थानां शब्दानां सहोक्तौ गम्यमानायामेकशेषो भवति । एकः शिष्यते अन्ये निवर्तन्ते इति विवेकः । बहुवचनमतन्त्रं, तेन द्वयोरप्येकशेषः । वक्रश्च कुटिलश्च वक्रौ कुटिलौ वा । वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डाविति वा । एवं लोहिताक्षौ रक्ताक्षाविति वा । सितश्च शुक्लश्च श्वेतश्च सिताः शुक्लाः श्वेता वा । अर्थेन समानामिति किम् ? प्लक्षन्यग्रोधौ, धवखदिरपलाशाः । सहोक्ताविति किम् ? वक्रश्च कुटिलश्च । द्वंद्वापवादो योगः ।

१३५. स्यावावऽसंख्येयः ।

पूर्वेणैव सिद्धे सरूपार्थं[1] वचनम् । सर्वस्यां स्यादौ विभक्तौ समानां तुल्यरूपाणां सहोक्तौ गम्यमानायामेकशेषो भवति असंख्येयः—संख्येयवाचि शब्दरूपं वर्जयित्वा । अक्षश्च शकटाक्षः अक्षश्च देवनाक्षः अक्षश्च बिभीतकाक्षः अक्षाः । एवं पादाः[2], माषाः[3] । श्येनी च श्येनी च श्येन्यौ । एवं हरिण्यौ, रोहिण्यौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः । स्यादौ समानरूपाणामिति किम् ? माता च जननी माता च धान्यस्य । मातृमातारौ । याता च देवरजाया याता च गन्ता यातृयातारौ । अत्र ह्येकत्र मातरौ यातरावित्यन्यत्र मातारौ यातारावित्ति औकारे[4] रूपं भिद्यते । अन्ये तु यस्मिन् स्यादौ ये शब्दास्तुल्यरूपा भवन्ति तस्मिन् स्यादौ तेषां स्याद्यन्तरे विरूपाणामप्येकशेषो भवति । तेन मातृभ्यां, मातृभिः, मातृभ्यः, मात्राः, मातृणां, मातृषु इत्याद्यपि भवतीत्याहुः । अपरे त्वत्रापि बहुवचने ताभिस्तैरित्याद्यनुप्रयोगवैषम्यान्न भवितव्यमेकशेषेण द्विवचने तु ताभ्यां तयोरित्यनुप्रयोगसाम्याद् भवितव्यमेव इत्याहुः । असंख्येय इति किम् ? एकश्च एकश्च, द्वौ च द्वौ च, चत्वारश्च चत्वारश्च । द्वन्द्वोऽपि न भवत्यनभिधानात् । संख्येय इति कर्मनिर्देशात् संख्यानवाचिनो भवत्येव—विंशतिश्च विंशतिश्च विंशती । नवतिश्च नवतिश्च नवतिश्च नवतयः । द्वंद्वापवादोऽयं विधिः । तेनाऽकृतद्वंद्वानामेवैकशेषः वाक् च वाक् च वाचावित्यादि सिद्धम् । अन्यथा द्वन्द्वे कृते परत्वात् समासान्ते कृते वैरूप्यादेकशेषो न स्यात् ।

१३६. त्यदादिः ।

त्यदादिनाम्नामन्येन सहोक्तौ त्यदादिरेवैकः शिष्यते । स च चैत्रश्च तौ । यश्च मैत्रश्च यौ । अयं च चैत्रश्च इमौ । कश्च मैत्रश्च कौ । स्पर्धे परमिति त्यदादीनां मिथः सहोक्तौ यद्यत् पाठे परं तत्तदेवैकं शिष्यते । स च यश्च यौ । यश्च एष च एतौ । एष च अयं च एतौ । स च त्वं च युवाम् । त्वं च भवांश्च भवन्तौ । भवांश्च अहं च आवाम् । अहं च कश्च कौ । अहं च स च त्वं च वयम् । बहुलाधिकारात् क्वचित् पूर्वमपि । स च यश्च तौ । अयं च एष च इमौ । त्वं च भवांश्च युवाम् । **'स्त्रीपुंनपुंसकानां तु सहोक्तौ परलिङ्गता'**[5] इति वचनेन यत्परं लिङ्गं तदेव शिष्यते । सा च चैत्रश्च तौ । स च देवदत्ता च तौ । अत्र स्त्रीपुंलिङ्गयोः परं पुंलिङ्गमेव भवति । सा च कुण्डे च तानि । अत्र स्त्रीनपुंसकयोः

---

१ अन्यथा अर्थसाम्यस्य स्यादावप्यविद्यमानत्वात् पूर्वेणापि सिध्यति ।

२. पादो ह्रिश्लोकचतुर्थांशरश्मिप्रत्यन्तगिरिषु ।

३ माषो माने धान्यभेदे मूर्खे त्वग्दोषभिद्यपि ।

४. अयमर्थः—'नृस्वसृ''''' [१/४/५४] इति सूत्रे तृग्रहणेनैव नप्त्रादिग्रहणे सिद्धे यन्नप्त्रादीनां पृथगुपादानं तदेव ज्ञापयति अत्र सूत्रे औणादिकानामेषामेव ग्रहणमिति जननीदेवरजायावाचिनोर्मातृयातृशब्दयोरौणादिकयोः औकारे आर् न प्राप्नोति । द्वितीययोस्तु तृजन्तयोस्तृज्द्वारा प्राप्नोति इति रूपभेदः ।

५ श्रीभिक्षुलिङ्गानुशासनम्, परवल्लिङ्गाधिकार, श्लोक ४ ।

परं नपुंसकमेव भवति । स च कुण्डं च ते । तच्च चैत्रश्च ते । अत्र पुनपुंसकयोः पर नपुंसकमेव भवति । कथं स च कुक्कुट सा च मयूरी ते कुक्कुटमयूर्यौ ? उच्यते—'परवल्लिङ्गो' द्वन्द्वः' इति तद्विशेषणस्य त्यदादेरपि तल्लिङ्गत्वं ।

१३७. भ्रातृपुत्राः स्वसृदुहितृभिः ।

बहुवचन पर्यायार्थम् । भ्रात्रर्था पुत्रार्थाश्च यथाक्रम स्वस्रर्थैर्दुहित्रर्थैश्च सहोक्तौ शिष्यन्ते । भ्राता च स्वसा च भ्रातरौ । सोदर्यश्च स्वसा च सोदर्यौ । भ्राता च भगिनी च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ । सुतश्च दुहिता च सुतौ । पुत्रश्च सुता च पुत्रौ ।

१३८. पिता मात्रा वा ।

मातृशब्देन सहोक्तौ पितृशब्द एको वा शिष्यते । पिता च माता च पितरौ । पक्षे—मातापितरौ । मातुरर्च्यत्वात् पूर्वनिपातः ।

१३९. श्वशुरः श्वश्र्वा ।

वेत्यनुवर्तते । श्वश्रूशब्देन सहोक्तौ श्वशुरशब्द एको वा शिष्यते । श्वशुरश्च श्वश्रूश्च श्वशुरौ । पक्षे—श्वश्रूश्वशुरौ । द्विवचन जातौ भर्तृयोग च वर्तमानयो श्वश्र्वोः परिग्रहार्थम्, तेन जातौ तन्मात्रभेदे 'पुमान् स्त्रिया' [३/१/१४२] इति नित्यविधिर्न भवति ।

१४०. पौत्रादिर्यूना तन्मात्रभेदे ।

युवा जीवद्वश्यादि । पौत्रादेर्यूना सहोक्तौ पौत्रादिरेकः शिष्यते, तन्मात्र एव चेद् भेदो विशेषो भवति न चेत् प्रकृतिभेदोऽर्थभेदो वाऽन्यो भवतीत्यर्थः । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ[२] । वात्स्यश्च वात्स्यायनश्च वात्स्यौ । दाक्षिश्च दाक्षायणश्च दाक्षी । औपगवश्च औपगविश्च औपगवौ । पौत्रादिरिति किम् ? गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किम् ? गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ । तन्मात्रभेद इति किम् ? गार्ग्यवात्स्यायनौ । अत्र प्रकृतिरन्या । भागवित्तिभागवित्तिकौ । अत्र कुत्सा सौवीरदेशत्व चाऽन्योऽर्थः ।

१४१. स्त्री पुंवच्च ।

पूर्वमनुवर्तते । पौत्रादिस्त्रीवाची शब्दो युवावाचिना सहोक्तावेकः शिष्यते तन्मात्रभेदे पुवत् पुलिङ्गा चेय भवति । स्त्र्यर्थ पुमर्थो भवतीत्यर्थः । गार्गी च गार्ग्यायणश्च गार्ग्यौ । वात्सी च वात्स्यायनश्च वात्स्यौ । दाक्षी च दाक्षायणश्च दाक्षी । गार्गी च गार्ग्यायणौ च गर्गा । अत्र पुवद्भावादीप्निवृत्तौ यञो लुक् गर्गानिति 'शसोऽता दीर्घः सश्च नः पुंसि' [१/४/७२] इति नत्व च । इमौ गार्ग्यावित्यनुप्रयोगस्यापि पुंस्त्वम् ।

१४२. पुमान् स्त्रिया ।

पुमान् शब्दोऽत्र प्राणिनि पुंसि रूढः । स्त्रीवाचिना शब्देन सहोक्तौ पुरुषवाची शब्द एकः शिष्यते तन्मात्रभेदे—स्त्रीपुरुषमात्रभेदश्चेद् भवति । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । कुक्कुटश्च कुक्कुटी च कुक्कुटौ । मयूरश्च मयूरी च मयूरौ । कारकश्च कारिका च कारकौ । गोमांश्च गोमती च गोमन्तौ । पटुश्च पट्वी च पटू । पुमानिति किम् ? तीरं

---

१. श्रीभिक्षुलिङ्गानुशासनम्, परवल्लिङ्गाधिकार, श्लोक १ ।
२. गार्ग्यश्च गार्ग्यश्च गार्ग्यावित्ति सिध्यति । गार्ग्यश्च गार्ग्यायणश्चेति विवक्षाया तु द्वन्द्वः स्यादिति शेषारम्भः ।

नदनदीपते.[1] । घटघटीशरावोदञ्चनानि[2] । तन्मात्रभेदे इति किम् ? हसश्च वरटा च हसवरटे । **अश्ववडवौ**, पुरुषयोषितौ, द्रुणीकच्छपौ । अङ्गारकाश्च शकुनय कालिकाश्च तत्स्त्रिय कालिकाङ्गारका: । एषु प्रकृतिभेद. । गणकगणक्यौ, इन्द्रेन्द्राण्यौ, भवभवान्यौ । एषु भर्तृयोगलक्षणोऽर्थभेद । कुक्कुटमयूर्यौ, अजावर्करौ, कलभहस्तिन्यौ, गोवत्सौ । एषु प्रकृत्यर्थयोर्भेद. । कथ ब्राह्मणवत्सा च ब्राह्मणीवत्सश्च ब्राह्मणवत्साब्राह्मणीवत्सौ ? न ह्यत्र स्त्रीपुरुषमात्रभेदादन्यो भेदोऽस्ति । सत्यम् । तदित्यनेन प्रधानस्त्रीपुरुषौ परामृश्येते, तेन प्रधानस्त्रीपुरुषमात्रकृत एव भेदे भवति । अत्र तु विशेषणीभूताऽप्रधान-स्त्रीपुरुषकृतोऽपि भेदोऽस्तीति[3] न भवति । अन्ये तु तन्मात्रभेदादधिके प्रकृतिभेदे एवैकशेष नेच्छन्ति अर्थभेदे तु इच्छन्त्येव । इन्द्रश्च इन्द्राणी च इन्द्रौ । तथा वरुणौ, भवौ, शर्वौ, रुद्रौ, मृडाविति । एव पूर्वसूत्रेऽपि । भागवित्तिश्च भागवित्तिकश्च भागवित्ती ।

१४३. ग्राम्याऽशिशुद्विशफसंघेषु स्त्री ।

द्विशफवचनसामर्थ्यात् पशूनामिव ग्रहणम् । ग्राम्या अशिशवो द्विशफाश्च ये पशवस्तेषा सघेषु स्त्रीपुरुषाणा सहोक्तौ स्त्रीवाच्येवैक. शिष्यते तन्मात्रभेदे । पूर्वेण पुरुषशेषे प्राप्ते स्त्रीशेषार्थ वचनम् । गावश्च स्त्रियः गावश्च पुरुषा इमा गाव । अजाश्चेमे अजाश्चेमा इमा अजा[4] । एव मेष्य इमा । महिष्य इमा । ग्राम्येति किम् ? अरण्यपशूना मा भूत् । रुरवश्चेमे रुरवश्चेमा इमे रुरव । इमे पृषता । अशिश्विति किम् ? वत्साश्चेमे वत्साश्चेमा इमे वत्सा. । द्विशफेति किम् ? अश्वाश्चेमे अश्वाश्चेमा इमे अश्वा[5] । इमे गर्दभा । इमे मनुष्या । इमे पक्षिण । सघेष्विति किम् ? गौश्चाय गौश्चेय इमौ गावौ[6] । तन्मात्रभेदे इति किम् ? गोबलीवर्द, अजाविकम् । बहुलाधिकारात् क्वचित्पुमानेव शिष्यते । उष्ट्रचश्च उष्ट्राश्च इमे उष्ट्रा । इमे छागा. । व्यावृत्तौ सर्वत्र पूर्वेण पुरुषशेष एव भवति ।

१४४. नपुंसकमऽनपुंसकेनैकत्वं च वा ।

अनपुसकेन सहोक्तौ नपुसक नाम एकं शिष्यते एकत्व चाऽस्य वा तन्मात्रभेदे । शुक्ल च वस्त्रं शुक्लश्च कम्बल: ते शुक्ले । पक्षे—शुक्लम् । शुक्ल च वस्त्र शुक्ला च शाटी ते शुक्ले । पक्षे—शुक्लम् । शुक्लं च वस्त्र शुक्लश्च कम्बल. शुक्ला च शाटी तानि शुक्लानि[7] । पक्षे—शुक्लम् । नपुसकग्रहण किम् ? स्त्रीपुसयोरपि[8] शेष स्यात् । अनपुसकेनेति किम् ? शुक्ल च शुक्ल च शुक्ले । शुक्ल च शुक्ल च शुक्ल च शुक्लानि । **'स्यादावसंख्येयः'** [३/१/१३५] इत्येकशेष. । अनेन त्वेकशेषे विकल्पेनैकत्वं प्रसज्ज्येत । तन्मात्रभेदे इति किम् ? महद्धिम हिमानी । हिमं च हिमानी च हिमहिमान्यौ । महदरण्य-मरण्यानी । अरण्य च अरण्यानी च अरण्यारण्यान्यौ । अक्षाश्च देवनादय. अक्षाणि चेन्द्रियाणि अक्षाक्षाणि । पद्मश्च नाग. पद्मा च लक्ष्मी पद्मं च जलज पद्मपद्मापद्मानि । एषु[9] प्रवृत्तिनिमित्तलक्षणार्थभेदोऽप्यस्तीति नैकशेष. ।

---

१ नन्वत्र **'नदीदेश'''** [३/१/१५१] इति सूत्रेणैकत्व कथ न भवति ? तथा च **'नपुंसके'** [२/३/११३] इति ह्रस्वत्वे नदनदिपतेरिति स्यात् उच्यते—तत्र नदीत्युक्ते नदीविशेषो गृह्यते । अय तु सामान्यवाचीति ।

२. चतुर्णामपि सहोक्तौ द्वयोरपि सहोक्तिरस्तीति घटघटयोरेकशेषे घटशरावोदञ्चनानीति प्राप्तम् । एव पूर्वसूत्रेष्वपि बहूनामपि सहोक्तौ यथाप्राप्तयो: पदयोरेकशेषो भवत्येव ।

३. तथाहि ब्राह्मणवत्सशब्दो भिद्यते कथमित्युच्यते एकत्र ब्राह्मणस्य वत्सा ब्राह्मणवत्सेति पुमर्थो विशेषणम् । अन्यत्र तु ब्राह्मण्या वत्सो ब्राह्मणीवत्स इति स्त्र्यर्थं इत्यर्थोऽप्यन्य इति तन्मात्रभेदाभावादेकशेषाभाव. ।

४ ननु गावोऽजाश्च शिशवो भवन्ति, तत्कथ अत्राऽशिशव इत्युच्यमान. स्त्रीशेष ? नैष दोष. । यद्यपि गावोऽजाश्च शिशवो भवन्ति, तत्राशिशुत्वकृतोय विधिर्न तु शिशुत्वनिबन्धन: प्रतिषेध. ।

५. एष्वश्वादीना खुरसबन्धेऽपि वृत्तैकखुरत्वात् मनुष्यादीना खुररहितत्वात् द्विखुरत्वाभावात् पुरुषशेष एव ।

६ ननु समुदायस्य सघरूपत्वात् तस्य च द्वयोरपि संभवात् कथ सघ इति वचनात् द्वयोरपि न भवति ? सत्यम् । द्वितीयेन विना सहोक्ते-रभावात् सहोक्तिग्रहणादेव द्वयो: सघे सिद्धे संघग्रहणं संघप्रकर्षार्थम् ।

७ इत्यत्र च नपुसकानपुसकार्थयोर्भेदात् **'समानामर्थेनैकशेषः'** [३/१/१३४] इत्येकशेषाभाव. ।

८ नपुसकग्रहणमन्तरेण यथा नपुसकस्यानपुसकेन सहोक्तावेकशेषस्तथा स्त्रीपुसयोरपि स्त्रीपुसाभ्यां सह वचने स्यादित्यर्थ. ।

६. ननु च एतेषु प्रकृतेरेकत्वात् स्त्रीत्वादिलिङ्गविशिष्टस्यैकस्यैवार्थस्याभिधानात् को भेद इत्याशङ्क्याह ।

१४५. पुष्यार्थान्नक्षत्रे पुनर्वसुः ।

पूर्वप्रपञ्चो निवृत्तः । एकत्वमित्यनुवर्तते । पुष्यार्थान्नक्षत्रे वर्तमानात् परो नक्षत्रे एव वर्तमानः पुनर्वसुशब्दः सहोक्तौ गम्यमानायां सामर्थ्याद् द्व्यर्थः सन् एकवद् भवति । उदितौ पुष्यपुनर्वसू । अर्थग्रहणं पर्यायार्थम् । तिष्यपुनर्वसू, सिध्यपुनर्वसू । समाहारे तु पुष्यपुनर्वसु । पुष्यार्थादिति किम् ? आर्द्रापुनर्वसवः । पुनर्वसुरिति किम् ? पुष्यमघाः । नक्षत्रे इति किम् ? पुष्यपुनर्वसवो माणवकाः । सहोक्ताविति किम् ? पुष्यः पुनर्वसू येषां ते पुष्यपुनर्वसवः ।

१४६. द्वंद्वः संख्याया विंशत्यादिना संख्यायाम् ।

संख्यायां विंशत्यादिभिः सह संख्याया द्वन्द्व एकत्वं भवति । एकविंशतिः, द्वाविंशतिः । एकत्रिंशत्, द्वात्रिंशत् । एकनवतिः, द्वानवतिः । अष्टशतं, अष्टसहस्रम् । विंशत्यादिभिरिति किम् ? एकश्च दश च एकादश । चतुर्दश । संख्यायामिति किम् ? एको जिनमित्राय दीयतां गौः विंशतिर्जिनदत्ताय इत्येकविंशती अनयोर्देहि । एवं त्रिंशच्चत्वारिंशतौ । समाहारद्वंद्वे स्वयमेव एकत्वे सिद्धे सर्वमिदं प्रकरणं नियमार्थम् । तेन सूत्रोदाहरणेषु समाहार एव । प्रत्युदाहरणेषु तु इतरेतर योगोऽपि ।

१४७. स्थेणोः सिच्यऽनुवादे चरणानाम् ।

प्रमाणान्तरप्रतिपन्नस्यार्थस्य शब्देन सकीर्तनमनुवादः । चरणाः कठादयो द्विजविशेषाः । अनुवादे गम्यमाने चरणानां द्वंद्व एकत्वं भवति स्थेणोः सिच्परयोः प्रयोगे सति । प्रत्यष्ठात् कठकौथुमम् । उदगात् कठकालापम् । प्रत्यष्ठात् मौदपैप्पलादम् । एषामुदयप्रतिष्ठे कश्चिदनुवदति । स्थेणोरिति किम् ? अगमन् कठकालापाः । सिचीति किम् ? अतिष्ठन् कठकालापाः । अनुवादे इति किम् ? उदगुः कठकालापाः । अप्रसिद्धं कथयति । चरणानामिति किम् ? उदगुस्तार्किकवैयाकरणाः ।

१४८. यजुः क्रतूनामऽनपुंसकानाम् ।

ससोमको यागः क्रतुः । यजुर्वेदविहितानामनपुंसकानां क्रतुवाचिशब्दानां द्वंद्व एकत्वं भवति । अर्कश्चाश्वमेधश्चार्काश्वमेधम् । साह्नातिरात्रम् । पौण्डरीकातिरात्रम् । अर्कादयः पुंलिङ्गाः । यजुरिति किम् ? इषुवज्रौ, उद्भिद्बिलभिदौ । इष्वादयः सामवेदे विहिताः । क्रतूनामिति किम् ? दर्शपौर्णमासौ । अनपुंसकानामिति किम् ? राजसूयं च वाजपेयं च राजसूयवाजपेये ।

१४९. निकटपाठानाम् ।

निकटः पाठो येषामध्येतॄणां ते निकटपाठाः । तेषां द्वंद्व एकत्वं भवति । पदमधीते पदकः । एवं क्रमकः । पदकश्च क्रमकश्च पदकक्रमकम् । पदानन्तरं क्रमस्य पाठात् पाठयोर्निकटत्वम् । एवं क्रमकवार्त्तिकम् । निकटग्रहणं किम् ? याज्ञिकवैयाकरणौ । पाठग्रहणं किम् ? पितापुत्रौ[1] ।

१५०. अप्राणिजातीनाम् ।

प्राणिवर्जजातिवाचिनां द्वन्द्व एकत्वं भवति । आरा च शस्त्री च आराशस्त्रि । धाना च शष्कुली च धानाशष्कुलि । युगवरत्र, तरुणैलम् । अप्राणिग्रहणं किम् ? ब्राह्मणक्षत्रियविट्शूद्राः । ब्राह्मणक्षत्रियविट्शूद्रम् । अप्राणीति प्राणिनो द्रव्यस्य पर्युदासेनाऽप्राणिनां द्रव्यजातीनामेवैकत्वविधानं, न गुणक्रियाजातीनाम् । रूपरसगन्धस्पर्शाः । गमनाकुञ्चनप्रसरणानि । जातीनामिति किम् ? नन्दकपाञ्चजन्यौ ।

१५१. नदीदेशनगराणां भिन्नलिङ्गानाम् ।

नदीदेशनगराभिधायिनां भिन्नलिङ्गानां शब्दानां द्वंद्व एकत्वं भवति । नदी—गङ्गा च शोणश्च गङ्गाशोणम् ।

---

१. अत्र निकटा जननक्रिया न तु पाठ इति ।

उद्धयश्च इरावती च उद्धयेरावति । विपाट् च स्त्री चक्रभिच्च नपुंसकं विपाट्चक्रभिदम् । देश—कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । कुरुकुरुजाङ्गलम् । वरेन्द्रीमगधम् । नगरः—मथुरा च पाटलिपुत्रश्च मथुरापाटलिपुत्रम् । काञ्चीकान्य-कुब्जम् । नगराणां देशत्वात्तद्ग्रहणेनैव सिद्धे नगरग्रहण ग्रामनिषेधार्थम्। जाम्बवश्च शालूकिनी च जाम्बवशालूकिन्यौ ग्रामौ। नदीदेशनगराणामिति किम् ? कुक्कुटमयूर्यौ । भिन्नलिङ्गानामिति किम् ? गङ्गायमुने, मद्रकेकयौ, मथुरातक्षशिले । देशग्रहणेन चेह जनपदानां ग्रहण पृथग् नदीनगरग्रहणात्, तेनेह न भवति— गौरी च कैलासश्च गौरीकैलासौ पर्वतौ । कैलासश्च गन्धमादनं च कैलासगन्धमादने पर्वतौ ।

१५२. नित्यवैरिणाम् ।

नित्यमनिमित्तं जातिनिबद्धं वैरं विद्यते येषां तेषां द्वंद्व एकत्वं भवति । अहिनकुल, मार्जारमूषिकं, श्वशृगालं, काकोलूकं, अश्वमहिषम् । इह नित्यवैरित्वाद् वक्ष्यमाणशकुनिविकल्पः पशुविकल्पश्चाऽनेन बाध्यते । नित्यवैरिणामिति किम् ? देवासुरा , देवासुरम् । कौरवपाण्डवाः, कौरवपाण्डवम् । नैषां निर्निमित्त वैरमपि तु राज्यापहारादिकृतम् ।

१५३. शूद्राणां शोध्यपात्राणाम् ।

शोध्य शोधनीय पात्रं येषा ते शोध्यपात्रा । येषा पात्रे सस्कृते सति ब्राह्मणादयो भुञ्जते ते इति शोध्यपात्राणां शूद्राणां द्वद्व एकत्वं भवति । तक्षायस्कार, रजकतन्तुवायं, कुलालवरुटं, शकयवनम् । शूद्राणामिति किम् ? ब्राह्मण-क्षत्रियविश । शोध्यपात्राणामिति किम् ? चाण्डालमृतपा ।

१५४. गवाश्वादिः ।

गवाश्वादय शब्दा कृतद्वंद्वैकत्वा निपात्यन्ते । गौश्चाश्वश्च गवाश्वम् । गवाविकं, गवैडकं, अजाविकं, अजैडक, कुब्जवामनं, कुब्जकिरात, पुत्रपौत्र, श्वचण्डालं, स्त्रीकुमारं, दासीमाणवक, शाटीप्रच्छद, उष्ट्रखर, उष्ट्रशश, मूत्रशकृत्, मूत्रपुरीषं, यकृन्मेदः, मासशोणित, दर्भशर, दर्भपूतीक, अर्जुनशिरीष, अर्जुनपुरुषं, तृणोपल, तृणोलप, कुडीकुडं, दासीदास, भागवतीभागवर्तामित गवाश्वादिगण । गवाश्वादिषु यथोच्चारितरूपग्रहणादन्यत्र नाय विधि । गोऽश्वौ, गोऽश्वम् । गोअश्वौ, गोअश्वम् । गोऽविकौ, गोऽविकम् । गवेलकौ, गवेलकम् । वक्ष्यमाणपशुविकल्पो भवत्येव ।

१५५. प्राणितूर्याङ्गाणाम् ।

अङ्गशब्द प्रत्येक सबध्यते । प्राण्यङ्गानां तूर्याङ्गाणां च द्वन्द्व एकत्वं भवति । प्राण्यङ्गे—पाणिपादं, शिरोग्रीवं, कर्णनासिक, दन्तोष्ठम् । तूर्याङ्गे— शाङ्खिकमौरजिक, मार्दङ्गिकपाणविकम् । इह प्रयोक्तृपुरुषाणामेव ग्रहणम् । मृदङ्गपणवमित्यत्र तु 'अप्राणिजातीनां' [३/१/१५०] इत्यनेनैकत्वं सिद्धम् ।

१५६. सेनाङ्गक्षुद्रजन्तूनां बहुत्वे ।

सेनाङ्गानां क्षुद्रजन्तूना च बह्वर्थानां द्वंद्व एकत्वं भवति । अश्वाश्च रथाश्चाश्वरथम् । रथिकाश्वारोहं, हस्त्यश्वम् । केचित्तु सेनाङ्गानां पशूनां पशुलक्षणं विकल्पमिच्छन्ति । हस्त्यश्व, हस्त्यश्वा । क्षुद्रजन्तवोऽल्पकायाः प्राणिनः आनुकुलमिह स्मर्यन्ते । यूकालिक्षं, दंशमशकं, यूकामत्कुण, कीटपिपीलिकम् । बहुत्वे इति किम् ? हस्त्यश्वौ, यूकालिक्षे ।

१५७. फलानां जातौ ।

बहुत्वे इत्यनुवर्तते । जातिविवक्षायां बह्वर्थानां फलवाचिनां द्वंद्व एकत्वं भवति । बदराणि च आमलकानि च बदरामलकम् । कुवलामलकम् । फलानामिति किम् ? ब्राह्मणक्षत्रिया । जाताविति किम् ? व्यक्तिविवक्षायां मा भूत् । एतानि बदरामलकानि तिष्ठन्ति । अप्राणित्वादेव सिद्धे बहुत्वे इति नियमार्थं वचनं, तेनेह न—बदरामलके ।

१५८. वा वृक्षतृणधान्यमृगशकुनीनाम् ।

एषां वृक्षादीनां द्वंद्वो वा एकत्वं भवति बहुत्वे । वृक्ष—प्लक्षाश्च न्यग्रोधाश्च प्लक्षन्यग्रोधं, प्लक्षन्यग्रोधाः ।

आम्राशोक, आम्राशोका. । तृण—कुशकाशं, कुशकाशाः । मुञ्जवल्वज, मुञ्जवल्वजा । धान्य—व्रीहियवं, व्रीहियवाः । तिलमाषं, तिलमाषा । मृग—रुरुपृषत, रुरुपृषता । ऋश्यैण, ऋश्यैणा. । शकुनि—शुकबक, शुकबका. । हंसचक्रवाकं, हंसचक्रवाका । बहुत्वे इति किम् ? प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ । प्लक्षौ च न्यग्रोधौ च प्लक्षश्च न्यग्रोधौ चेति वा प्लक्षन्यग्रोधा । एकस्याऽपि पदस्य बहुत्वे भवत्येव—प्लक्षश्च न्यग्रोधाश्च प्लक्षन्यग्रोध, प्लक्षन्यग्रोधा । प्लक्षौ च न्यग्रोधाश्च प्लक्षन्यग्रोध, प्लक्षन्यग्रोधा इत्यादि । आरण्याः पशवो मृगा इति मृगाणामपि पशुत्वात् पशुविकल्पेनैव सिद्धे मृगाणामिहोपादानमऽमृगैरबहुत्वे[1] चैकत्वाऽभावार्थम् । समाहारेतरेतरयोगभेदादेव विकल्पे सिद्धे वृक्षादीनां ग्रहणं परैः सह समाहारनिवृत्त्यर्थं, तेन आम्रयवा., रुरुशुका इत्यादिषु इतरेतरयोग एव ।

१५९. पशुव्यञ्जनानाम् ।

योगविभागसामर्थ्याद् बहुत्व इति निवृत्तम् । पशूनां व्यञ्जनवाचिनां[2] च द्वंद्व एकत्व वा भवति । गौश्च महिषश्च गोमहिषं, गोमहिषौ । अश्वबलीवर्द, अश्वबलीवर्दौ । महाजोरभ्र, महाजोरभ्रौ । व्यञ्जन-- दधिघृत, दधिघृते । शाकसूप, शाकसूपौ । अश्वमहिषमित्यत्र तु **'नित्यवैरिणां'** [३/१/१५२] इति नित्यमेकत्वविधिः ।

१६०. विरोधिनामऽद्रव्याणाम् ।

द्रव्यं गुणाद्याश्रय । अद्रव्यवृत्तीनां विरोधिवाचिनां नाम्नां द्वंद्व एकत्व वा भवति । सुखदुःख, सुखदुःखे । शीतोष्णं, शीतोष्णे । लाभालाभ, लाभालाभौ । जननमरण, जननमरणे । संयोगविभाग, संयोगविभागौ । विरोधिनामिति किम् ? रूपरसगन्धस्पर्शा , कामक्रोधौ । अद्रव्याणामिति किम् ? शीतोष्णे जले ।

१६१. अश्ववडवपूर्वापराधरोत्तराणाम् ।

एषां त्रयाणां द्वंद्व एकत्व वा भवति । अश्वश्च वडवा च अश्ववडव, अश्ववडवौ । अश्ववडवेति निर्देशादेवेतरेतरयोगे ह्रस्वत्व निपात्यते । पूर्वापर, पूर्वापरे । अधरोत्तर, अधरोत्तरे । पशुविकल्पेनैव सिद्धे अश्ववडवग्रहण तत्पर्यायनिवृत्त्यर्थम् । हयवडवे । अत्रापि समासद्वयभेदादेव विकल्पे सिद्धे पूर्वापरादिग्रहण पदान्तरनिवृत्त्यर्थं, तेन पूर्वपश्चिमौ, दक्षिणापरौ, अधरमध्यमौ, उत्तरदक्षिणौ इत्यत्र विकल्पो न भवति ।

१६२. न दधिपयआदेः ।

दधिपयआदीनां शब्दानां द्वंद्व एकत्व न भवति । दधि च पयश्च दधिपयसी । सर्पिर्मधुनी, मधुसर्पिषी, हरिवासवौ, ब्रह्मप्रजापती[3], शिववैश्रवणौ, स्कन्दविशाखौ[4], परिजाकौशिकौ[5], प्रवर्ग्योपसदौ, आद्यवसाने, सूर्याचन्द्रमसौ, मित्रावरुणौ, अग्नीषोमौ, सोमारुद्रौ, नारदपर्वतौ, खण्डामर्कौ[6], नरनारायणौ, रामलक्ष्मणौ, भीमार्जुनौ, कम्बलाश्वतरौ, मातापितरौ, पितापुत्रौ, श्रद्धामेधे, शुक्लकृष्णे, इध्माबर्हिषी । पूर्वस्य दीर्घत्व निपातनात् । ऋक्सामे, वाङ्मनसे—अत्र **'धेन्वनडुह…'** [८/३/८८] इत्यादिनाकारान्तत्वम् । याज्यानुवाक्ये, दीक्षातपसी, श्रुततपसी, मेधातपसी, अध्ययनतपसी, उलूखलमुसले । अत्राद्येषु त्रिषु व्यञ्जनविकल्पे शुक्लकृष्णे इत्यत्र **'विरोधिनामद्रव्याणां'** [३/१/१६०] इति विकल्पे इध्माबर्हिषी, उलूखलमुसले इत्यत्र **'अप्राणिजातीनां'** [३/१/१५०] इति नित्यमेकत्वे शेषेषु च **'चार्थे द्वंद्वः सहोक्तौ'** [३/१/१३३] इत्युभयस्मिन् प्राप्ते प्रतिषेधोऽयम् ।

---

१ यदा ग्राम्यपशूनामरण्यपशुभि सहोक्तिर्भवति तदा मा भूदित्यर्थं ।

२. व्यञ्जन—येनान्नं रुचिमापद्यते तद् दधिघृतशाकसूपादि ।

३. ब्रह्मणो व्यतिरिक्तश्चतुर्दशभेदभिन्न प्रजापतिः ।

४ अत्र स्कन्दस्य मित्रमपि स्कन्द । यद्वा स्कन्दशब्देन विनायक उच्यते ।

५. परिजा नदी कौशिकश्च पर्वत ।

६. देवताविशेषौ । 'देवतानामात्वान्ते…' [३/२/४२] इत्यात्वम् ।

१६३. संख्याने ।

नेत्यनुवर्तते । इयत्तापरिच्छेदः सङ्ख्यानम् । समासपदार्थानां सङ्ख्याने गम्यमाने द्वंद्व एकत्वं न भवति । यथायथं प्राप्तं निषिध्यते । उदगुर्दशेमे कठकालापाः, द्वावर्काण्वमेधौ, द्वादश पदकक्रमकाः, द्वौ गङ्गाशोणौ, पञ्च तक्षायस्काराः, इयन्तो गवाश्वाः, बहवः पाणिपादाः, कति मार्दङ्गिकपाणविकाः, दश हस्त्यश्वाः, शतं यूकालिक्षाः, तावन्ति बदरामलकानि, बहवः प्लक्षन्यग्रोधाः, दश गोमहिषाः, एतावन्ति दधिघृतानि ।

१६४. वा समीपे ।

पूर्वमनुवर्तते । समासपदार्थानां संख्यानस्य समीपे गम्यमाने द्वंद्व एकत्वं वा भवति । उपगता दश यस्य येषां वा उपदश गोमहिषं, उपदशा गोमहिषाः । उपदशाय गोमहिषाय, उपदशेभ्यो गोमहिषेभ्यः । द्वन्द्वार्थस्यैकत्वात् तदनुप्रयोगस्याऽपि बहुव्रीहेरेकवचनान्तत्वम् । यदा तु दशानां समीपमुपदशमित्यव्ययीभावस्तदोपदशं गोमहिषमिति भवति ।

१६५. प्रथमोक्तं प्राक् ।

अत्र समाससमात्रे यत्सूत्रे प्रथमोक्तमुक्तं तत् प्राक् पूर्वं निपतति । सप्तगङ्गं, ऊरीकृत्य, कष्टश्रितः, शङ्कुलाखण्डः, यूपदारु, वृकभयं, राजपुरुषः, अक्षशौण्डः, नीलोत्पलं, पञ्चाम्राः, आसन्नदशाः । वाक्यवत्समासेऽप्यनियमः स्यादिति वचनम् ।

१६६. राजदन्तादिषु ।

राजदन्तादिषु समासेष्वप्राप्तपूर्वनिपाताः प्राग् निपतन्ति । दन्तानां राजा राजदन्तः । **'षष्ठ्ययत्नाच्छेषे'** [३/१/६३] इति प्रथमोक्तत्वेन दन्तशब्दस्य पूर्वनिपाते प्राप्ते राजशब्दस्याऽनेन पूर्वनिपातः । पूर्वं वासितं पश्चाल्लिप्तं—लिप्तवासितम् । **'पूर्वकालैक'''** [३/१/१०१] इति प्रथमोक्तस्याऽपवादः । एवं सिक्तसमृष्टं, भृष्टलुञ्चितं, नग्नमुषितं, अवक्लिन्नपक्वं, अर्पितोतं, उप्तगाढम् । ऋणेऽधमोऽधमर्णः —अत्र **'सप्तमी'''** [३/१/७७] इति प्रथमोक्तत्वेन पूर्वनिपातेऽधमस्य पूर्वनिपातः । एवमुत्तमर्णः । आकृतिगणोऽयम् ।

१६७. बिम्बोष्ठादिषु वा ।

बिम्बोष्ठादिषु समासेष्वप्राप्तपूर्वनिपातं प्राग् वा निपतति । बिम्बोष्ठः, ओष्ठबिम्बः । बिम्बाधरः, अधरबिम्बः । पुरुषोत्तमः, उत्तमपुरुषः । आकृतिगणोऽयम् ।

१६८. द्वंद्वे लघ्वक्षरमेकम् ।

द्वन्द्वसमासे लघ्वक्षरं प्राग् निपतति यत्र चाऽनेकसम्भवस्तत्रैकमेव । तिलमाषं, शरमीर्यं, शैलौ मलयदर्दुरौ । एकमिति किम् ? युगपदनेकस्य पूर्वनिपाते प्राप्ते एकस्यैव पूर्वनिपातः, शेषाणां तु कामचार इति प्रदर्शनार्थः । घटशङ्खपटाः, पटशङ्खघटाः, घटपटशङ्खाः, पटघटशङ्खाः ।

१६९. शकृन्मूत्रादिषु वा ।

द्वंद्वसमासे शकृन्मूत्रादिषु लघ्वक्षरमेकं प्राग् वा निपतति । शकृन्मूत्रं, मूत्रशकृत् । कुशकाशं, काशकुशम् । करभरासभौ, रासभकरभौ । आकृतिगणोऽयम् ।

१७०. इवुवन्तमऽसखि ।

सखिशब्दं वर्जयित्वा इकारान्तोकारान्तमेकं नाम द्वंद्वसमासे प्राग् निपतति । अग्नीषोमौ, पटुगुप्तौ, अग्निधूमं, वायुतोयं, पतिसुतौ, स्वादुतिक्तौ । असखीति किम् ? सुतसखायौ, सखिसुतौ । इदुतोर्मिथस्तु यथेच्छा[1]—पतिवसू, वसुपती ।

---

१. इवुवन्तमित्यत्र एकपद्यादेकवचनत्वादसखीति सर्वस्य विशेषणत्वाच्च स्पर्धे परमिति न ।

ग्रहणवता नाम्ना न तदन्तविधिरिति सख्यन्तस्य प्रतिषेधो न भवति। बहुसखिबहुधनौ। एकमिति किम्? मृदुशुक्लपटव:, पटुशुक्लमृदव:, मृदुपटुशुक्ला:, पटुमृदुशुक्ला:।

१७१. न जायापत्यादिषु।

द्वंद्वसमासे जायापत्यादिषु प्राप्त इदुदन्तयो: प्राग् निपातो न भवति। जाया च पतिश्च जायापती। जंपती, दपती—अनयोर्गणपाठादेव जायाशब्दस्य जभावो दमावश्च वा निपात्यते। भार्यापती, पुत्रपती, स्वसृपती। चित्रास्वाती माणविके। अनक्षत्रार्थोऽयं प्रयोग:। पुत्रपशू, केशश्मश्रू, शिरोजानु, शिरोविजु[1]। आकृतिगणोऽयम्।

१७२. गुणवृद्ध्यादिषु वा।

द्वंद्वसमासे गुणवृद्ध्यादिषु प्राप्त इदुदन्तयो: प्राग् निपातो वा भवति। गुणवृद्धी, वृद्धीगुणौ। सर्पिर्मधुनी, मधुसर्पिषी। दीर्घलघू, लघुदीर्घौ। चन्द्रराहू, राहुचन्द्रौ। आकृतिगणोऽयम्।

१७३. स्वराद्यदन्तम्।

द्वंद्वसमासे स्वरादि यददन्तं तदेकं नाम प्राग् निपतति। अश्वखर, अश्वमयूर, उष्ट्रखर, अस्त्रशस्त्र, इन्द्रचन्द्रौ। इदुदन्तादपि परत्वादयमेव—इन्द्राग्नी, इन्द्रवायू, इन्द्राविष्णू। एकमिति किम्? अश्वरथेन्द्रा:, इन्द्राश्वरथा:, अश्वेन्द्ररथा:, इन्द्ररथाश्वा:।

१७४. न शूद्रार्यादिषु।

पूर्वापवाद:। द्वंद्वसमासे शूद्रार्यादिषु स्वराद्यदन्तं नाम प्राग् न निपतति। शूद्रार्यौ, अवन्त्यश्मकौ, विष्वक्सेनार्जुनौ, विषयेन्द्रियाणि, राजाश्वौ। आकृतिगणोऽयम्।

१७५. धर्मार्थादिषु वा।

द्वंद्वसमासे धर्मार्थादिषु स्वराद्यदन्तं प्राग् वा निपतति। धर्मार्थौ, अर्थधर्मौ। कामार्थौ, अर्थकामौ। शब्दार्थौ, अर्थशब्दौ। आद्यन्तौ, अन्तादी। अग्नीन्द्रौ, इन्द्राग्नी। चन्द्रार्कौ, अर्कचन्द्रौ। अश्वत्थकपित्थौ, कपित्थाश्वत्थौ। आकृतिगणोऽयम्।

१७६. अल्पस्वरम्।

द्वंद्वसमासे अल्पस्वरमेकं नाम प्राग् निपतति। प्लक्षन्यग्रोधौ, धवखदिरौ, निम्बपिप्पलौ, वागग्नी, वाग्वायू, वागर्थौ।

१७७. नोदूखलमुसलादिषु।

पूर्वापवाद:। द्वंद्वसमासे उदूखलमुसलादिषु अल्पस्वरं नाम प्राग् न निपतति। उदूखलमुसले, तन्दुलकिण्वं, चित्ररथबाह्लीकौ, स्नातकराजानौ, अक्षिभ्रुवं, दारगवं, उशीनरबीजं, अधरोष्ठम्। आकृतिगणोऽयम्।

१७८. समीरणाग्न्यादिषु वा।

द्वंद्वसमासे समीरणाग्न्यादिषु अल्पस्वरं प्राग् वा निपतति। समीरणाग्नी, अग्निसमीरणौ। आदित्यचन्द्रौ, चन्द्रादित्यौ। पाणिनीयरौढीया:, रौढीयपाणिनीया:। आकृतिगणोऽयम्।

---

१. विजु:—कृकाटिकाप्रदेश:।

१७९. अर्चितम् ।

द्वन्द्वसमासे यदर्चितं तदेक नाम प्राग् निपतति । निर्ग्रन्थगृहस्थौ, देवदैत्यौ, श्रद्धामेधे, दीक्षातपसी, श्रद्धातपसी, मेधातपसी, मातापितरौ, वधूवरौ, रुद्राग्नी, रुद्रेन्द्रौ, वासुदेवार्जुनौ ।

१८०. न नरनारायणादिषु ।

पूर्वेण प्राप्तोऽनेन निषिध्यते । द्वन्द्वसमासे नरनारायणादिषु अर्चितं नाम प्राग् न निपतति । नरनारायणौ, सोमारुद्रौ, कुबेरकेशवौ, काकमयूरौ, उमामहेश्वरौ । आकृतिगणोऽयम् ।

१८१. तपःश्रुतादिषु वा ।

द्वन्द्वसमासे तपःश्रुतादिषु अर्चितं नाम प्राग् वा निपतति । तपःश्रुते, श्रुततपसी । द्रोणभीष्मौ, भीष्मद्रोणौ । आकृतिगणोऽयम् ।

१८२. मासर्तुभ्रातृनक्षत्राण्यानुपूर्व्येण ।

आनुपूर्व्येणेति वचनादेकर्मिति निवृत्तम् । द्वन्द्वसमासे मासवाचि, ऋतुवाचि, भ्रातृवाचि, नक्षत्रवाचि च शब्दरूप यद्यत् पूर्वं तत्तत् आनुपूर्व्येण प्राग् निपतति । मास—फाल्गुनचैत्रौ, वैशाखज्येष्ठौ । ऋतु—हेमन्तशिशिरौ, शिशिरवसन्तौ, हेमन्तशिशिरवसन्ता । भ्रातृ—बलदेववासुदेवौ, युधिष्ठिरार्जुनौ । नक्षत्र—कृत्तिकारोहिण्यौ, मृगशिरःपुनर्वसू, अश्विनी-भरणीकृत्तिका ।

१८३. वसन्तग्रीष्मादिषु वा ।

द्वन्द्वसमासे ऋतुवाचि वसन्तग्रीष्मादिषु आनुपूर्व्येण प्राग् वा निपतति । वसन्तग्रीष्मौ, ग्रीष्मवसन्तौ । '**शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम्**'[1] । आदिशब्देन यथादर्शनम् ।

१८४. न पाण्डुधृतराष्ट्रादिषु ।

द्वन्द्वसमासे पाण्डुधृतराष्ट्रादिषु भ्रातृवाचि आनुपूर्व्येण प्राग् न निपतति । पाण्डुधृतराष्ट्रौ, विष्णुवासवौ । आदिशब्देन यथादर्शनम् ।

१८५. भीमसेनार्जुनादिषु वा ।

द्वन्द्वसमासे भीमसेनार्जुनादिषु भ्रातृवाचि आनुपूर्व्येण प्राग् वा निपतति । भीमसेनार्जुनौ, अर्जुनभीमसेनौ । देवापिशतनू, शतनुदेवापी । आदिशब्देन यथादर्शनम् ।

१८६. न पुष्यपुनर्वस्वादिषु ।

द्वन्द्वसमासे पुष्यपुनर्वस्वादिषु नक्षत्रवाचि नाम आनुपूर्व्येण प्राग् न निपतति । पुष्यपुनर्वसू, तिष्यपुनर्वसू, मघाश्लेषे, आर्द्रामृगशिरसी । आदिशब्देन यथादर्शनम् ।

१८७. वर्णाः ।

द्वन्द्वसमासे वर्णवाचिशब्दाः आनुपूर्व्येण प्राग् निपतन्ति । ब्राह्मणक्षत्रियौ, विट्शूद्रौ ।

---

१. **शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ।**
हेमन्ते शिशिरे चैव, वर्षासु दधि शस्यते ॥

[सुश्रुतसंहिता पूर्वार्द्ध, अध्याय ४५, दधिवर्ग श्लोक ८०]

१८८. बहुषूत्क्रमो वा ।

वर्णवाचिनां बहुषु प्राग् निपातस्य उत्क्रमो वा भवति । उत्क्रमः—ऊर्ध्वक्रम आदित अन्ततो वा । ब्राह्मण-क्षत्रियविट्शूद्रा , शूद्रविट्क्षत्रियब्राह्मणा ।

१८९. संख्या समासे ।

सर्वा सख्या प्रथमोक्तेत्यनियमे आनुपूर्व्येण सख्याया पूर्वनिपातार्थं वचनम् । समासमात्रे सख्यावाचि नाम आनुपूर्व्येण प्राग् निपतति । द्विगौ- द्वे शते समाहृते द्विशती । त्रिशती । द्वंद्वे --एकश्च दश च एकादश । एव द्वादश, त्रयोदश, सप्ततिशत, अशीतिशत, नवतिशतम् । बहुव्रीहौ--- द्वौ वा त्रयो वा द्वित्रा । एव त्रिचतुरा , पञ्चषा. । द्विर्दश द्विदशा. । एव त्रिदशा· ।

१९०. सर्वादिश्च बहुव्रीहौ ।

चकारात् सख्येत्यनुवर्तते । बहुव्रीहिसमासे सर्वादि सख्या च प्राग् निपतति । सर्व शुक्लमस्य सर्वशुक्ल । सर्व-कृष्ण ,सर्वसार , सर्वगुरु सर्वलघु·. विश्वदेव., विश्वामित्र , उभयचेतन । सख्या द्वौ कृष्णो गुणावस्य द्विकृष्ण । चतुर्ह्रस्व , पञ्चदीर्घ , षडुन्नत.[1], सप्तरक्त [2] । उन्नतरक्तशब्दौ न क्तान्तावपि[3] तु गुणशब्दौ । तेन स्पर्धे क्तान्तलक्षण पूर्वनिपातो न भवति । ननु सर्वादिसंख्ययोर्विशेषणत्वाद **'विशेषणं'** [३/१/१९१] इत्यनेनैव प्राप्नोति, किमनेन ? उच्यत-- पृथग्-वचन सर्वादिसख्ययो स्पर्धे परत्वार्थम् । तेन सर्वादित· सख्यैव प्राग् निपतति । द्व्यन्य , त्र्यन्य , द्वियुष्मत्क । उभयोस्तु सर्वादित्वे सख्याविषय विहाय स्पर्धे परस्य पूर्वनिपात । दक्षिणपूर्वा । बहुव्रीहाविति किम् ? उपसर्वम् । **'प्रथमोक्तं प्राक्'** [३/१/१५६] इत्यनियमे प्राप्ते नियमार्थ वचनम् ।

१९१. विशेषणम् ।

बहुव्रीहिसमासे विशेषण नाम प्राग् निपतति । चित्रा गावो यस्य स चित्रगु । शबलगु· ।

१९२. प्रियो वा ।

बहुव्रीहिसमासे प्रियशब्द. प्राग् वा निपतति । प्रियविश्व , विश्वप्रिय । प्रियगुड गुडप्रिय ।

१९३. सप्तम्यन्तम् ।

बहुव्रीहिसमासे सप्तम्यन्त नाम प्राग् निपतति । कण्ठेकाल , उरसिलोमा, उदरेमणि ।

१९४. गड्वादिभ्यो वा ।

बहुव्रीहिसमासे सप्तम्यन्त नाम गड्वादिभ्य. प्राग् वा निपतति । कण्ठेगडु , गडुकण्ठ । एव शिरसिगडुः, गडुशिरा । शिरस्यरु , अरु शिरा: । मध्येगुरु , गुरुमध्य । अन्तेगुरु , गुर्वन्त । व्यवस्थितविभाषया वहेगडुरित्येव भवति । आकृतिगणोऽयम् ।

१९५. नेन्द्वादिभ्यः ।

बहुव्रीहिसमासे इन्द्वादिभ्य शब्देभ्य· प्राक् सप्तम्यन्त नाम न निपतति । इन्दुमौंलौ यस्य स इन्दुमौलिः ।

---

१ **'वक्षोऽष्ठकक्षानखनासिकास्यं कृकाटिका चेति षडुन्नतानि ।'**

२. **'नेत्रान्तपादकरतालधरौष्ठजिह्वा रक्ता नखाः सप्त सुखप्रदानि ।'**

३. रूढत्वात् स्वत· सिद्धौ ।

चन्द्रमौलि., शशिशेखर., पद्मनाभ., ऊर्णनाभः, पद्महस्त, शखपाणि., दर्भपवित्रपाणि., पद्मपाणि.। आकृतिगणोऽयम्।

१९६. प्रहरणेभ्यः।

नेत्यनुवर्तते। बहुव्रीहिसमासे प्रहरणवाचिन: शब्दात् सप्तम्यन्त नाम प्राग् न निपतति। असि. पाणावस्य असिपाणि। एव दण्डपाणि:, चक्रपाणि, शूलपाणि, शार्ङ्गपाणि, धनुष्पाणिः, धनुर्हस्तः, पाशहस्तः, वज्रहस्त., वज्रपाणि: इत्यादि। बहुवचनं स्वरूपविधि निरासार्थम्। बहुलाधिकारात् पाणिवज्र, हस्तवज्रः इत्यत्र पूर्वनिपातोऽपि।

१९७. क्तान्तं वा।

प्रहरणेभ्य इत्यनुवर्तते। बहुव्रीहिसमासे प्रहरणवाचिन. शब्दात् क्तप्रत्ययान्त नाम प्राग् वा निपतति। उद्यतोऽसिरनेन[1] उद्यतासि, अभ्युद्यत। एवमुद्यतचक्र, चक्रोद्यतः। कलितप्रहरण., प्रहरणकलित। उत्खातखड्गः, खड्गोत्खात.। आकृष्टधन्वा, धनुराकृष्टः। उद्यतमुशल., मुशलोद्यत।

१९८. शेषे।

अग्रे विकल्पविधानान्नित्योऽय विधि.। प्रहरणादन्यत्र शेष। शेषे बहुव्रीहिसमासे क्तप्रत्ययान्त नाम नित्य प्राग् निपतति। कृत. कटोऽनेन कृतकट। भिक्षितभिक्ष, मुक्तोपानत्क। क्तान्तस्य विशेषणत्वात् **'विशेषणं'** [३/१/१९१] इत्यनेनैव सिध्यति, विशेष्यार्थ तु वचनम्। कटे कृतमनेन कृतकट। स्पर्धे परमेव—कृतविश्व.।

१९९. आहिताग्न्यादिषु वा।

क्तान्तमित्यनुवर्तते। बहुव्रीहिसमासे आहिताग्न्यादिषु क्तान्त नाम प्राग् वा निपतति। आहिताग्नि.[2], अग्न्याहित। जातपुत्र., पुत्रजात। आहिताग्न्यादयो यथा—आहिताग्नि, जातपुत्र, जातदन्त, जातश्मश्रु, पीततैल, पीतघृत, पीतमद्य, पीतविष, ऊढभार्य, गतार्थ, छिन्नशीर्ष, पीतदधि। आकृतिगणोऽयम्।

२००. जातिकालसुखादेः।

पूर्वमनुवर्तते। बहुव्रीहिसमासे जातिवाचिभ्य. कालवाचिभ्य मुखादिभ्यश्च क्तान्त नाम प्राग् वा निपतति। शाङ्गरजग्धी, जग्धशाङ्गरा। पलाण्डुभक्षिती, भक्षितपलाण्डु। पाणिगृहीती, गृहीतपाणि। कटकृत., कृतकट। व्यक्ति-विवक्षाया तु **'शेषे'** [३/१/१९८] इत्यनेन कृतकट इत्याद्येव भवति। अन्ये तु आकृतिज्ञातजातिवाचिन एव क्तान्तपूर्वनिपातमिच्छन्ति, तेनेह न—आहृतब्राह्मण[3], सेवितक्षत्रियः, तर्पितदाक्षि.। काल—मासयाता, यातमासा। संवत्सरयाता, यातसवत्सरा। मासगत, गतमास.। सुखादि—सुखयाता, यातसुखा। हीनदु खा, दु खहीना। तृप्रोत्पन्ना, उत्पन्नतृप्रा। सुख, दु ख, तृप्र, कृच्छ्र, अस्र, अलीक, करुण, कृपण, सोढ, प्रतीप इति सुखादि.।

२०१. कडारादयः कर्मधारये।

वेत्यनुवर्तते। कडारादय शब्दाः कर्मधारये समासे प्राग् वा निपतन्ति। कडारजैमिनि., जैमिनिकडार। गडुल-गालव, गालवगडुल.। काणद्रोण, द्रोणकाण। कडारादयो यथा—कडार, गडुल, काण, खञ्ज, कुण्ट, खेल, खोड, खलति, गौर, पिङ्गल, वृद्ध, भिक्षुक, बठर, तनु, कूट, नट। आकृतिगणोऽयम्। कडारादीनां गुणवचनत्वात् द्रव्यशब्दान्नित्यं पूर्वनिपाते प्राप्ते पक्षे परनिपातार्थं वचनम्। यदा तु द्वावपि गुणशब्दौ तत्र निर्ज्ञाताऽनिर्ज्ञाताभ्यां विशेषणविशेष्यत्वे पर्यायेण पूर्वनिपात इत्युक्तमेव। गडुलकाण., काणगडुल.। खञ्जकुण्ट., कुण्टखञ्जः। खोडखलति, खलतिखोड इत्यादि।

---

१. ननु अस्यादीनां जातिशब्दत्वात् **'जातिकाल···'** [३/१/२००] इत्यनेनैव क्तान्तस्य पूर्वनिपात सिद्ध., किमनेन? सत्यम्। व्यक्ति-विवक्षायामपि यथा स्यादित्यर्थम्।

२. नन्वग्निशब्दस्य जातिवाचित्वात् **'जातिकाल···'** [३/१/२००] इत्यनेनैव सिध्यति, किमत्र पाठ.? सत्यम्। व्यक्तिविवक्षायामपि यथा स्यादित्येवमर्थम्।

३. ब्राह्मणादिजातिरुपदेशादिगम्या न तु आकृतिगम्या।

द्वितीयश्चरणः

१. परस्परान्योन्येतरेतरेषां स्त्रीनपुंसकयोः स्यादेर्वाम् ।

स्त्रीनपुसकयो परस्परान्योन्येतरेतरेषां सबन्धिन स्यादे. स्थाने आमादेशो वा भवति। इमे सख्यौ परस्परां भोजयतः, परस्पर भोजयतः। आभि. सखीभि. परस्परा भोज्यते, परस्परेण भोज्यते। इमा सख्य परस्परा प्रयच्छन्ति, परस्परस्मै प्रयच्छन्ति। इमा परस्परां परस्परस्माद् वा बिभ्यति। इमा. परस्परा परस्परस्य वा स्मरन्ति। इमाः परस्परां परस्परस्मिन् वा स्निह्यन्ति। इमे कुले परस्परा भोजयतः, परस्पर भोजयत इत्यादि। इमे सख्यौ कुले वा अन्योन्यामन्योन्य वा भोजयत.। सखीभि कुलैर्वा अन्योन्यामन्योन्येन वा भोज्यते। इमे सख्यौ कुले वा इतरेतरामितरेतर वा भोजयत.। सखीभि. कुलैर्वा इतरेतरामितरेतरेण वा भोज्यते। स्त्रीनपुसकयोरिति किम् ? इमे नरा परस्पर भोजयन्ति। नरै परस्परेण भोज्यते। कश्चित्तु वा अम् इति पदच्छेदेऽमादेशो मन्यते। आभि सखीभिः कुलैर्वा परस्पर परस्परेण वा भोज्यते इत्यादि। केचित् पुस्यपीच्छन्ति। एभिर्नरै परस्परं परस्परेण वा भोज्यते इत्यादि। परस्परादय शब्दा स्वभावादेकत्वपुस्त्ववृत्तय क्रियाव्यतिहारविषया। अस्मादेव च निर्देशात् परान्येतरशब्दानां सर्वादीनां द्वित्वादि निपात्यते।

२. अव्ययीभावस्याऽतोऽमऽपञ्चम्याः ।

अदन्तस्याऽव्ययीभावस्य सबन्धिन स्यादेः स्थाने अमादेशो भवति अपञ्चम्या—पञ्चमी च वर्जयित्वा। उपकुम्भ तिष्ठति। उपकुम्भं पश्य। उपकुम्भ देहि। उपकुम्भं स्वामी। अव्ययीभावस्येति किम् ? कष्टश्रित। तत्सबन्धिन्या इति किम् ? प्रियोपकुम्भस्तिष्ठति। प्रियोपकुम्भाय देहि। अत इति किम् ? अधिस्त्रि, उपवधु, उपकर्तृ। अपञ्चम्या इति किम् ? उपकुम्भादानय।

३. वा तृतीयासप्तम्योः ।

अदन्तस्याऽव्ययीभावस्य सबन्धिन्योस्तृतीयासप्तम्यो स्थाने अम् वा भवति। उपकुम्भ उपकुम्भेन वा कृतम्। उपकुम्भमुपकुम्भे वा स्थितम्। तत्सबन्धिन्योरिति किम् ? प्रियोपकुम्भेन कृतम्। प्रियोपकुम्भे निधेहि।

४. ऋद्धनदीवंश्यानां सप्तम्याः ।

ऋद्ध—समृद्धम्। यस्य समृद्धि. सुशब्दादिना द्योत्यते तदन्तस्य नद्यन्तस्य वश्यान्तस्य च अदन्तस्याऽव्ययीभावस्य सबन्धिन्या सप्तम्या अम् भवति। ऋद्ध—मगधानां समृद्धि—सुमगध वसति। सुमद्र वसति। नदी—उन्मत्ता गङ्गा यस्मिन् देशे इत्युन्मत्तगङ्ग वसति। एव लोहितगङ्गम्। वश्य—एकविंशतिर्भारद्वाजा वश्या—एकविंशतिभारद्वाजं वसति। एवं त्रिकोशलम्। त्रिपञ्चाशद्गौतमम्। प्रतिपदोक्तस्यैव ग्रहणादिह न भवति—उपगङ्गे[1], उपयमुने। पूर्वेण तु विकल्पो भवत्येव। नित्यार्थ वचनम्।

५. अनतो लुक् ।

अदन्तमव्ययीभाव वर्जयित्वा अन्यस्याऽव्ययीभावस्य सबन्धिनः स्यादेर्लुग् भवति। स्त्रीषु अधिस्त्रि। उपवधु,

---

१. अत्र उपगङ्ग, उपयमुन— इत्येतौ शब्दौ गङ्गायमुनयो समीपस्य वाचकौ न तु स्वातन्त्र्येण नदीवाचकौ।

उपकर्तृ । अनत इति किम् ? उपकुम्भात्, उपकुम्भाभ्यां, उपकुम्भेभ्यः । उपकुम्भेन । उपकुम्भे । तत्संबन्धिविज्ञानादिह न— प्रियोपवधुः, अत्युपवधुः ।

६. समासप्रत्यययोः ।

समासे सति प्रत्यये च परे विभक्तेर्लुग् भवति । राजपुरुषः । कुम्भं करोति—कुम्भकारः । चित्रा गावो यस्य स चित्रगुः । पुत्रमिच्छति—पुत्रीयति । पुत्रकाम्यति । उपगोरपत्यमौपगवः । एषु राजन्-अस् पुरुष-स्, कुम्भ-अम् कार, चित्र-अस् गो-अस्, पुत्र-अम् य, पुत्र-अम् काम्य, उपगु-अस् अ इति स्थिते समासे प्रत्यये च तन्निमित्तस्य स्यादेर्लुक् । अत एव च लुग्विधानात् **'नाम नाम्ना···'** [३/१/१६] इत्युक्तावपि विभक्त्यन्तानामेव समासो विज्ञायते । समास-प्रत्यययोरिति निमित्तसप्तमीविज्ञानादुत्तरकालस्य स्यादेर्न लुक् । चित्रगुः, औपगवः । समासप्रत्यययोरिति किम् ? चित्रा गावो यस्येत्यादिवाक्ये न भवति ।

७. अव्ययस्य ।

अव्ययसंबन्धिनः स्यादेर्लुग् भवति । स्वः, प्रातः, उच्चैः, परमोच्चैः, कृत्वा, भोजं भोजं व्रजति, ततः, तत्र, कथं, ब्राह्मणवत्, पचतितराम् । तत्संबन्धिविज्ञानादिह न—अतिस्वरः, अत्युच्चैसः । अत एव लुग्विधानाद् अव्ययेभ्यः स्यादयोऽनुमीयन्ते । ततश्चायो स्वस्ते तव वा गृहं, अथोच्चैर्मे मम वा गृहमित्यादौ **'सपूर्वात्प्रथमान्ताद् वा'** [२/१/६७] इति विकल्पेन ते मे आदेशौ पदसंज्ञा च सिद्धा भवति ।

८. न शब्दनिर्देशे ।

शब्दशास्त्रनिर्देशे सति अव्ययसंबन्धिनः स्यादेर्लुग् न भवति । यथा सूत्रकारो निर्दिशति—**'एवेऽनवधारणे'** [१/२/२६] **'विपराभ्यां जेः'** [३/३/२३] इत्यादि ।

९. नाम्येकस्वरादमः खिति ।

खितीति खित्प्रत्ययान्तो गृह्यते केवलस्याऽसंभवात् । नाम्यन्तादेकस्वरात् परस्याऽमो लुग् न भवति खित्प्रत्ययान्ते परे । स्त्री स्त्रियं वात्मानं मन्यते—स्त्रीमन्यः, स्त्रियंमन्यः । श्रियंमन्यः, भ्रुवंमन्यः, गांमन्यः, नावंमन्यः, नरंमन्यः, रायंमन्यः । अथ श्रियमात्मानं मन्यते श्रियंमन्यं कुलमित्यत्र नपुंसकलक्षणोऽमो लोपः कस्मान्न भवति ? उच्यते—श्रीशब्दस्यात्म-समानाधिकरणस्य नपुंसके वृत्त्यभावान्नियतलिङ्गत्वाच्च न भवति । कैश्चिदिह अमो लुग् दृश्यते । श्रिमन्यं कुलम् । नामिग्रहणं किम् ? क्ष्मंमन्यः[1], वाग्मन्यः । एकस्वरादिति किम् ? हरिणिमन्या, वधुमन्या । खितीति किम् ? स्त्रीमानी—णिन् ।

१०. असत्त्वे पञ्चम्या उत्तरपदे ।

असत्त्वे विहितायाः पञ्चम्या लुग् न भवति उत्तरपदे परे । स्तोकान्मुक्तः, अल्पान्मुक्तः, कृच्छ्रान्मुक्तः, कतिपयान्मुक्तः, अन्तिकादागतः, अभ्याशादागतः, सविधादागतः, दूरादागतः, विदूरादागतः, विप्रकृष्टादागतः । **'क्तेनाऽसत्त्वे'** [३/१/६१] इति समासः । असत्त्वे इति किम् ? स्तोकभयम् । उत्तरपदे इति किम् ? निष्क्रान्तः स्तोकान्निस्तोकः ।

११. ब्राह्मणाच्छंसी ।

ब्राह्मणाच्छंसीति कृतपञ्चम्यलुक् समासो निपात्यते । ब्राह्मणाद् ग्रन्थादादाय शंसतीति ब्राह्मणाच्छंसी । ब्राह्मणाच्छंसिनौ, ब्राह्मणाच्छंसिनः । रूढिवशाद् ऋत्विग्विशेष उच्यते । उपात्तविषयमेव तदऽपादानं, यथा कुसूलात्पचति । निपातनस्येष्टविषयत्वाद् ऋत्विग्विशेषादन्यत्र लुग् भवति । ब्राह्मणशंसिनी स्त्री ।

---

१. **'खित्यनव्यय···'** [३/२/११६] इति मुम् ह्रस्वश्च । अमोऽलुकि तु क्ष्मांमन्य इत्यनिष्टं रूपं स्यात् ।

१२. ओजोऽञ्जोऽम्भःसहस्तपस्तमसस्तृतीयायाः ।

ओजस्,अञ्जस्, अम्भस्, सहस्, तपस्, तमस्—एभ्य परस्यास्तृतीयाया लुग् न भवति उत्तरपदे परे। ओजसाकृतम्। अञ्जसाकृतम् । अम्भसाकृतम् । सहसाकृतम् । तपसाकृतम् । तमसाकृतम् । कथं **'सततनैशतमोवृतमन्यतः'** [किरातार्जुनीयमहाकाव्य, ५/२] इति ? उत्तरपदस्य सविधिशब्दत्वाद् यत्र पूर्वपदीभूतस्तम शब्दस्तत्राय निषेध । यत्र तु पदान्तरेण सयुक्तस्तत्र न प्रतिषेध. । तृतीयाया इति किम् ? ओजसो भाव ओजोभाव । तमसा नेच्छन्त्येके । तपसोऽन्ये ।

१३. पुंजनुषोऽनुजान्धे ।

पुंस्शब्दात् जनुस्शब्दाच्च परस्यास्तृतीयाया लुग् न भवति यथासख्य अनुजशब्दे अन्धशब्दे चोत्तरपदे परे। पुसा हेतुना अनुजः—पुंसानुज । जनुपा जन्मना अन्ध — जनुषान्ध । अविकृताक्षो जात्यन्ध उच्यते। तृतीयाया इति किम् ? पुमांसमनुजाता पुमनुजा ।

१४. आत्मनः पूरणे ।

आत्मनः परस्यास्तृतीयाया लुग् न भवति पूरणप्रत्ययान्ते उत्तरपदे परे। आत्मनाद्वितीय, आत्मनातृतीय, आत्मनाचतुर्थ, आत्मनापञ्चम, आत्मनाषष्ठ, आत्मनैकादश । पूर्वादित्वात् समास । कथ **'जनार्दनस्त्वात्मचतुर्थ एव'** इति ? आत्मा चतुर्थोऽस्येति बहुव्रीहि ।

१५. मनसश्चाज्ञायिनि ।

मन शब्दादात्मशब्दाच्च परस्यास्तृतीयाया लुग् न भवति आज्ञायिन्युत्तरपदे परे । मनसा ज्ञातु शीलमस्य मनसाज्ञायी । एवमात्मनाज्ञायी । आत्मनो नेच्छन्त्येके ।

१६. संज्ञायाम् ।

मनस परस्यास्तृतीयाया लुग् न भवति उत्तरपदे परे सज्ञाया विषये। मनसादेवी, मनसागुप्ता, मनसादत्ता, मनसासंगता । एवनामा काचित् । संज्ञायामिति किम् ? मनोदत्ता कन्या ।

१७. परात्मभ्यां चतुर्थ्याः ।

सज्ञायामित्यनुवर्तते। परात्मशब्दाभ्यां परस्याश्चतुर्थ्या लुग् न भवति सज्ञाया विषये उत्तरपदे परे। परस्मैपद, परस्मैभाषा। आत्मनेपदं, आत्मनेभाषा । **'तादर्थ्ये'** [२/४/६४] चतुर्थी। हितादित्वात्समास । सज्ञायामिति किम् ? परहितं, आत्महितम् । कथं परहितो नाम कश्चित् ? नेयमनादिसज्ञा ।

१८. अद्व्सात्सप्तम्या बहुलम् ।

अकारान्तात् हसान्ताच्च परस्या सप्तम्या बहुलं लुग् न भवति संज्ञायां विषये उत्तरपदे परे। अदन्त— अरण्येतिलका, अरण्येमाषका, वनेकशेरुका, वनेवल्वजा, वनेकिंशुका, वनेहरिद्रका, कूपेपिशाचिका, पूर्वाह्णेस्फोटका, मध्याह्नेस्फोटका । हसान्त—युधिष्ठिर । बहुलग्रहणान् क्वचिद् विकल्प—त्वचिसार, त्वक्सार । क्वचिद् भवति— जलकुक्कुट, ग्रामसूकर । अद्व्सादिति किम् ? भूमिपाश, नदीकुक्कुटिका। संज्ञायामिति किम् ? अक्षशौण्डः, तीर्थकाक., नगरवायस । सप्तम्या इति किम् ? गौरखर । कथ गविष्ठिर ? बिदादिपाठात् **'गवियुधिभ्यां स्थिरस्य'** [२/२/२८] इति निर्देशाद् वा भविष्यति। नन्वन्तरङ्गत्वादवादेशे कृते हसान्तत्वादेव सिद्ध, किं बिदादिपाठाश्रयणेन ? नैवम्। अन्तरङ्गानपि हि विधीन् बहिरङ्गोऽपि लुग् बाधते इत्युक्तम् । अन्यथा नदीकुक्कुटिकादिष्वप्यन्तरङ्गत्वाद्यत्वे सत्यलुक् प्रसज्ज्येतेति। अग्रे सप्तम्यधिकारे यत्र शब्दविधान नास्ति तत्र **'अद्व्सात्'''** इत्यनुवर्तनीयम् ।

१९. कारे प्राचां हसे ।

राजलभ्यो रक्षानिर्वेश. कार । अदन्तात् हसान्ताच्च परस्या सप्तम्या लुग् न भवति प्राचा देशे कारार्थहसादौ

उत्तरपदे परे संज्ञायां विषये । मुकुटे मुकुटे कार्षापणो दातव्य—मुकुटेकार्षापण. । एवं स्तूपेशाणः, हलेद्विपदिका, हलेत्रिपदिका । हस—दृषदिमाषक., समिधिमाषक । वृत्तौ वीप्साया दानस्य चान्तर्भाव । प्राचामिति किम् ? यूथे यूथे देय पशु—यूथपशु. । एव यूथवृष । उदीचां देशे कारोऽय न प्राचाम् । कारे इति किम् ? अभ्यर्हितेऽभ्यर्हिते देयः पशुः—अभ्यर्हितपशु. । प्राचां देशे कारादन्यस्य देयस्य नामैतत् । हसे इति किम् ? अविकटेऽविकटे उरणो दातव्यः—अविकटोरणः । अविकटोऽविसमूहः । अद्धसादिति किम् ? नद्यां नद्यां दोहो दातव्यः—नद्यीदोहः । पूर्वेणैव सिद्धे नियमार्थोऽयं योग. । त्रिविधश्चात्र नियम । प्राचामेव, कारार्थसंज्ञायामेव, हसादावेवेति । तथा च प्रत्युदाहृतम् ।

२०. मध्यान्ताद् गुरौ ।

संज्ञायामिति निवृत्तम् । मध्यान्तशब्दाभ्यां परस्या सप्तम्या लुग् न भवति गुरुशब्दे उत्तरपदे परे । मध्येगुरुः, अन्तेगुरुः । मध्यगुरुः, अन्तगुरुरित्यप्यन्ये ।

२१. अमूर्धमस्तकात्स्वाङ्गादकामे ।

मूर्धमस्तकवर्जितात्स्वाङ्गवाचिनोऽदन्तात् हसान्ताच्च परस्याः सप्तम्या लुग् न भवति कामवर्जिते उत्तरपदे परे । कण्ठे कालोऽस्य कण्ठेकाल. । उदरेमणि , वहेगडुः, उरसिलोमा, शिरसिशिख । अमूर्धमस्तकादिति किम् ? मूर्धशिख , मस्तकशिख । स्वाङ्गादिति किम् ? अक्षशौण्ड, मुखपुरुषा शाला । अकामे इति किम् ? मुखे कामोऽस्य मुखकाम । अद्धसादिति किम् ? अङ्गुलिव्रणः । बहुलाधिकारात् करकमल, गलरोग , गलव्रण इत्यादि सिद्धम् ।

२२. तत्पुरुषे कृति ।

तत्पुरुषे समासे अदन्तात् हसान्ताच्च परस्याः सप्तम्या लुग् न भवति कृदन्ते उत्तरपदे परे । स्तम्बे रमते—स्तम्बेरम. । एव कर्णेजप., पात्रेसमित., प्रवाहेमूत्रित, उदकेविशीर्णम् । हस—भस्मनिहुत, भस्मनिमीढम् । बहुलाधिकारात् क्वचिदन्यतोऽपि—गोषुचर. । क्वचिन्न—मद्रचर. । क्वचिद् विकल्पः—खचर., खेचरः । वनचरः, वनेचर । क्वचिदन्यदेव—हृदयं स्पृशति—हृदिस्पृक् । अत्र द्वितीयार्थे सप्तमी । तत्पुरुष इति किम् ? धन्वनि कारका यस्य स धन्वकारक. । एवं कल्याणाभिनिवेश, धर्मरुचि । कृतीति किम् ? अक्षशौण्ड., अक्षकितव । अद्धसादिति किम् ? कुरुषु चरति कुरुचर । एव रात्रिचरः, नदीचर. ।

२३. बन्धे घञि वा ।

अदन्तात् हसान्ताच्च परस्या सप्तम्या लुग् वा भवति घञन्ते बन्धशब्दे उत्तरपदे परे । हस्ते बन्धो हस्ते बन्धोऽस्येति वा हस्तेबन्ध, हस्तबन्ध । चक्रेबन्ध., चक्रबन्ध. । बन्धे इति किम् ? पुटपाक., मनोराग । घञीति किम् ? अजन्ते मा भूत् । बध्नातीति बन्धः । चक्रबन्ध., हस्तबन्ध., चारकबन्ध. । अद्धसादिति किम् ? गुप्तिबन्धः, काराबन्ध. ।

२४. कालात्तरतमतनकालेषु ।

अदन्तात् हसान्ताच्च कालवाचिन शब्दात् परस्या. सप्तम्या लुग् वा भवति तरतमतनप्रत्ययेषु कालशब्दे चोत्तरपदे परे । तर—पूर्वाह्णेतरां[1], पूर्वाह्णतरे । अपराह्णेतरां. अपराह्णतरे । तम—पूर्वाह्णेतमां, पूर्वाह्णतमे । अपराह्णेतमां, अपराह्णतमे । तन—पूर्वाह्णेतन , पूर्वाह्णतन. । अपराह्णेतनः, अपराह्णतन । काल—पूर्वाह्णेकाले, पूर्वाह्णकाले । अपराह्णेकाले, अपराह्णकाले । कालादिति किम् ? शुक्लतरे, शुक्लतमे । अद्धसादिति किम् ? रात्रितरायां, निशातमायां, रात्रिकाले ।

---

१. द्वयोर्मध्ये प्रकृष्टे विभज्ये वा पूर्वाह्णे 'द्वयोर्विभज्ये च तरः' [८/२/२] यत्र सप्तम्या अलुक् तत्र प्रथमा सप्तम्यर्थस्य सप्तम्यैवोक्तत्वात् । यत्र तु सप्तम्या लुक् तत्र सप्तम्यर्थप्रतिपादनार्थं सप्तमी पुनर्दीयते ।

२५. शयवासवासिष्वकालात् ।

अकालवाचिनः अदन्तात् हसान्ताच्च परस्याः सप्तम्या लुग् वा भवति शय, वास, वासिन्—इत्येतेषूत्तरपदेषु परेषु । खेशयः, खशयः । बिलेशयः, बिलशयः । ग्रामेवासः, ग्रामवासः । वनेवासी, वनवासी । अन्तेवासी, अन्तवासी । बहुलाधिकारात् मनसिशयः, कुशेशयमिति नित्यं लुगभावः । हृच्छयः, चित्तशयः—इत्यत्र तु नित्यं लुग् । अकालादिति किम् ? पूर्वाह्णशयः, अपराह्णशयः । अद्धसादिति किम् ? भूमिशयः, गुहाशयः ।

२६. वर्षक्षरशरवराप्सरउरोमनसो जे ।

वर्ष, क्षर, शर, वर, अप्, सरस्, उरस्, मनस्,—इत्येतेभ्यः परस्याः सप्तम्या लुग् वा भवति जे उत्तरपदे परे । वर्षेजः, वर्षजः । क्षरेजः, क्षरजः । शरेजः, शरजः । वरेजः, वरजः । अप्सुजः, अब्जम् । सरसिजं, सरोजम् । उरसिजः, उरोजः । मनसिजः, मनोजः ।

२७. प्रावृड्वर्षाशरत्कालदिवः ।

योगविभागाद् वा इति निवृत्तम् । प्रावृष्, वर्षा, शरत्, काल, दिव्—इत्येतेभ्यः परस्याः सप्तम्या लुग् न भवति जे उत्तरपदे परे । प्रावृषिजः, वर्षासुजः, शरदिजः, कालेजः, दिविजः ।

२८. अपो ययोनिमतिचरेषु ।

अप्शब्दात् परस्याः सप्तम्या लुग् न भवति यप्रत्यये योनिमतिचरेषु चोत्तरपदेषु । अप्सु भवः—अप्सव्यः । दिगादित्वाद् यः । अप्सुयोनिः, अप्सुमतिः, अप्सुचरः ।

२९. नेन्सिद्धसमस्थेषु ।

इन्प्रत्ययान्ते, सिद्ध, सम, स्थ,—इत्येतेषु चोत्तरपदेषु सप्तम्या अलुग् न भवति । लुग् भवत्येवेत्यर्थः । इन्—स्थण्डिले वर्तते स्थण्डिलवर्ती । एवं स्थण्डिलशायी । सांकाश्यसिद्धः, काम्पिल्यसिद्धः । दुःखसमः, सुखसमः । समस्थः, विषमस्थः । 'शयवास···' [३/२/२५] इत्यादियोगद्वयविकल्पः 'प्रावृड्वर्षा···' [३/२/२७] आदियोगद्वयविधिरनेन प्रतिषेधश्च 'तत्पुरुषे कृति' [३/२/२२] इत्यस्यैव प्रपञ्चः । ते वै विधयः सुसंगृहीता भवन्ति येषां लक्षणं प्रपञ्चश्चेति ।

३०. षष्ठ्याः क्षेपे ।

क्षेपे गम्यमाने उत्तरपदे परे षष्ठ्या लुग् न भवति । चौरस्यकुलं, दासस्यभार्या, वृषल्याःपतिः । क्षेप इति किम् ? ब्राह्मणकुलम् । कथं चौरकुलं, दासभार्या, वृषलीपतिः ? यथार्थकथनमेतत् ।

३१. पुत्रे वा ।

पुत्रशब्दे उत्तरपदे परे क्षेपे गम्यमाने षष्ठ्या लुग्वा भवति । दास्याःपुत्रः, दासीपुत्रः । वृषल्याःपुत्रः, वृषलीपुत्रः । क्षेप इति किम् ? ब्राह्मणपुत्रः । दासीपुत्रः इत्यत्र तु तत्त्वाख्यानमेव न तु क्षेपः । विकल्पार्थं वचनम् ।

३२. वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु ।

वाचादिभ्यः परस्याः षष्ठ्या लुग् न भवति यथाक्रमं युक्त्यादिषूत्तरपदेषु परेषु । वाचोयुक्तिः, दिशोदण्डः । संबन्धषष्ठ्यौ । पश्यतोहरः । अनादरे षष्ठीयम् । जनं पश्यन्तमनादृत्य हर्तेत्यर्थः ।

३३. अदसोऽकञायनणोः ।

अदसः परस्याः षष्ठ्या लुग् न भवति अकञ्प्रत्ययान्ते आयनणप्रत्यये चोत्तरपदे परे । अमुष्य पुत्रस्य भावः—

आमुष्यपुत्रिका। एवमामुष्यकुलिका। चौरादित्वादकञ्। अमुष्यापत्यमामुष्यायणः। नडादित्वादायनण्। अदसोऽनन्तर-मायनणो विधानान्न तत्रोत्तरपदसंभव।

३४. मूर्खे देवानांप्रियः।

देवानांप्रिय इति षष्ठ्या लुगभावो निपात्यते मूर्खेऽभिधेये। देवानांप्रियः—मूर्खः। अन्यत्र देवप्रियः।

३५. शुनः शेपपुच्छलाङ्गूलेषु संज्ञायाम्।

श्वन्शब्दात् परस्या षष्ठ्या लुग् न भवति शेपादिषूत्तरपदेषु परेषु संज्ञायां विषये। शुनः शेप इव शेपोऽस्य शुनःशेपः। एवं शुनःपुच्छ, शुनोलाङ्गूल। शेप शब्दः सकारान्तोऽप्यस्ति इह त्वकारान्तस्य ग्रहणम्। संज्ञायामिति किम्? श्वशेपः, श्वपुच्छ, श्वलाङ्गूलम्। अन्ये तु सिंहस्यशेपः, सिंहस्यपुच्छ, सिंहस्यलाङ्गूलमित्यपि इच्छन्ति। असंज्ञायामपीति केचित्।

३६. दिवोदासदिवस्पतिवाचस्पतिवास्तोष्पतयः।

दिवोदासादय शब्दा षष्ठीलुगभावे निपात्यन्ते संज्ञाया विषये। दिवोदासः, दिवस्पतिः, वाचस्पतिः, वास्तोष्पति। संज्ञायामिति किम्? द्युदासः, द्युपतिः, वाक्पतिः, वास्तुपति।

३७. ऋतो विद्यायोनिसंबन्धिनस्तस्मिन्।

विद्यायोनिसबन्धिन ऋदन्तात्परस्या षष्ठ्या लुग् न भवति तस्मिन् विद्यायोनिसबन्धवाचिन्येवोत्तरपदे परे। होतुःपुत्रः, होतुरन्तेवासी, पितुःपुत्रः, पितुरन्तेवासी। ऋत इति किम्? आचार्यपुत्रः, मातुलान्तेवासी। विद्यायोनिसंबन्धिन इति किम्? भर्तृगृह, होतृधनम्।

३८. स्वसृपत्योर्वा।

विद्यायोनिसबन्धवाचिन परस्या षष्ठ्या लुग् वा भवति स्वसृ, पति—इत्येतयोरुत्तरपदयो परयोः। होतुःस्वसा, होतृस्वसा। पितुःष्वसा, पितुःस्वसा, पितृष्वसा। मातुःष्वसा, मातुःस्वसा, मातृष्वसा। दुहितुःपतिः, दुहितृपतिः। स्वसुःपति, स्वसृपति। विद्यायोनिसबन्धिन इति किम्? भर्तृस्वसा, होतृपतिः। विकल्पार्थो योगः।

३९. आ द्वंद्वे।

विद्यायोनिसबन्धिनामृकारान्ताना यो द्वंद्वस्तस्मिन् सत्युत्तरपदे परे पूर्वपदस्याकारान्तादेशो भवति। विद्या-संबन्धिनः—होता च पोता च होतापोतारौ। नेष्टोद्गातारौ। योनिसबन्धिनः—मातापितरौ, मातादुहितरौ, ननान्दायातरौ। अथेह प्रथमयो कस्मान्न भवति होतृपोतृनेष्टोद्गातार इति? अन्त्यस्यैवोत्तरपदत्वात्। कथं तर्हि होतापोतानेष्टोद्गातार इति? द्वयोर्द्वयोर्द्वन्द्वे भविष्यति। यदा च होता च पोता च नेष्टोद्गातारौ चेति विग्रहस्तदा होतृपोतानेष्टोद्गातार इति। ऋत इति किम्? गुरुशिष्यौ। तस्मिन्निति किम्? पितृपितामहौ। द्वंद्व इति किम्? पितृस्वसा। विद्यायोनिसबन्धिन इति किम्? दातृभोक्तारौ। विद्यायोनिसबन्धश्चेह प्रत्यासत्तेः समस्यमानानामृदन्तानामेव परस्पर द्रष्टव्यो न येन केनचित्, तेनेह न भवति—चैत्रस्य स्वसृदुहितरौ। नात्र स्वसृदुहित्रोः परस्परसबन्धः। न हि स्वसा चैत्रस्य स्वसा भवन्ती दुहितरमपेक्षते दुहिता वा स्वसारमिति। यद्येवं कथं चैत्रस्य पितृभ्रातराविति अस्ति ह्यत्र परस्परसंबन्धः। उच्यते—यद्यपि चैत्रस्य भ्राता भ्राता भवन् पितरमपेक्षते चैत्रपितृजनितस्यैव चैत्रभ्रातृत्वात्। तथापि पिता पिता भवन्न भ्रातर-मपेक्षते। यद्येव कथं मातापितरौ, होतापोतारौ? न ह्यत्र परस्परापेक्षस्तथाभावोऽपि तु पुत्रयजमानापेक्ष। नैवम्। अत्रापि मात्रादीनां परस्परसंबन्धात्। ते हि स्वकर्मणि प्रजने यागे च सहिता एव प्रवर्तन्ते, तत्कर्मनिमित्तश्चायं तेषां व्यपदेश इत्यदोषः। केचित्तु स्वसादुहितरावित्यत्रापीच्छन्ति।

४०. पुत्रे।

पूर्वमनुवर्तते। पुत्रशब्दे उत्तरपदे परे विद्यायोनिमबन्धिन ऋकारान्तस्य आकारोन्तादेशो भवति द्वंद्वसमासे। मातापुत्रौ, पितापुत्रौ, होतापुत्रौ।

४१. मातुर्मातरश्च पितरि।

द्वंद्वसमासे पितरि शब्दे उत्तरपदे परे मातृशब्दस्य मातर इत्यादेशो भवति चकारादात्व च। मातरपितरौ, मातापितरौ। एकशेषपक्षे—पितरौ। **'हैमस्तु'** [३/२/४७] मातरपितरमिति निपात्य मातरपितराभ्या, मातरपितरयो-रित्याद्याचष्टे।

४२. देवतानामवायूनां वेदसहश्रुतानाम्।

वेदे सहश्रुताना वायुर्वजिताना देवतावाचिना द्वंद्वसमासे उत्तरपदे परे पूर्वपदस्य आकारोन्तादेशो भवति। इन्द्रासोमौ, इन्द्रावरुणौ, इन्द्राबृहस्पती, शुनासीरौ[1], अग्नामरुतौ, अग्नेन्द्रौ, अग्नाविष्णू, सोमारुद्रौ, सूर्याचन्द्रमसौ[2], मित्रावरुणौ। देवतानामिति किम्? यूपचषालौ, उलूखलमुसलं। अवायूनामिति किम्? अग्निवायू, वाय्वग्नी। वेदेति किम्? शिववैश्रवणौ, स्कन्दविशाखौ, ब्रह्मप्रजापती। सहेति किम्? विष्णुशक्रौ। श्रुतानामिति किम्? चन्द्रसूर्यौ, दिवाकरनिशाकरौ। एतौ हि वेदे शब्दान्तरेण विद्येते चन्द्रसूर्य इत्यादिशब्दैस्तु न श्रुतौ।

४३. ईदग्नेः षोमवरुणयोः।

पूर्वमनुवर्तते। वेदसहश्रुताऽवायुदेवताना द्वंद्वे षोमवरुणयोरुत्तरपदयोरग्निशब्दस्य ईकारोन्तादेशो भवति। षोमेति निर्देशादीकारसंनियोगे षत्व च निपात्यते। अग्नीषोमौ, अग्नीवरुणौ। षोमवरुणयोरिति किम्? अग्नेन्द्रौ। देवताद्वंद्व इति किम्? अग्निसोमौ माणवकौ। ईकारसंनियोगविधानादिह षत्वमपि न।

४४. इद् वृद्धिमत्यविष्णौ।

पूर्वोक्ते देवताद्वंद्वे विष्णुवर्जिते वृद्धिमत्युत्तरपदे परे अग्नेरिकारोन्तादेशो भवति। ईकाराऽऽकारयोरपवाद। अग्नीषोमौ देवते अस्य आग्निसौमं कर्म। 'देवतानामात्वादौ' [८/४/२१] इत्युभयपदवृद्धि। एवमाग्निमारुतम्। अग्नीवरुणौ देवते अस्या आग्निवारुणीमनड्वाहीमालभेत। वृद्धिमतीति किम्? अग्नीवरुणौ, अग्नामरुतौ, आग्नेन्द्र कर्म। **'आतो नेन्द्रवरुणस्य'** [८/२/२२] इति उत्तरपदवृद्धिनिषेध। पूर्वेण आत्वम्। अविष्णाविति किम्? अग्नाविष्णू देवते अस्य आग्नावैष्णवम्[3]। पूर्वेणात्वम्।

४५. उषस उषासा।

पूर्वोक्ते देवताद्वंद्वे उत्तरपदे परे उषस्शब्दस्य उषासा इत्यादेशो भवति। उषश्च नक्त च उषासानक्तम्। एवमुषासासूर्यम्। केचित्तु सूर्यशब्दस्यापि इच्छन्ति। सूर्यश्च सोमश्च उषासासोमौ।

४६. दिवो द्यावा।

पूर्वोक्ते देवताद्वंद्वे उत्तरपदे परे दिव्शब्दस्य द्यावा इत्यादेशो भवति। द्यौश्च भूमिश्च द्यावाभूमी। द्यावाक्षमे, द्यावानक्ते। नक्तशब्दोऽकारान्तोऽप्यस्त्यनव्ययम्।

---

१. वायुरवी इत्यर्थः।

२. रविचन्द्रावित्यर्थः।

३. **'देवतानामात्वादौ'** [८/४/२१] इत्युभयपदवृद्धिः।

४७. दिवस्दिवः पृथिव्यां वा।

पूर्वोक्ते देवताद्वंद्वे दिव्शब्दस्य दिवस्, दिव—इत्यादेशौ वा भवत. पृथिव्यामुत्तरपदे परे। द्यौश्च पृथिवी च दिवस्पृथिव्यौ, दिव:पृथिव्यौ। पक्षे—द्यावापृथिव्यौ। दिव: इति विसर्गान्तस्य निर्देशात् दिवस् इति सकारस्य विसर्गो न।

४८. पुंवद् भाषितपुंस्कादऽनूङः स्त्रियास्तुल्यार्थे स्त्रियाम्।

भाषित. पुमान् येन स भाषितपुम्क.। भाषितपुस्कात्परस्य अनूङ. स्त्रीप्रत्ययस्य पुवद् भवति तुल्यार्थे स्त्रीलिङ्गे उत्तरपदे परे। पुवद्भावात् स्त्रीप्रत्ययो निवृत्त·। दर्शनीया भार्या यस्य स दर्शनीयभार्य। एव पटुभार्य, कल्याणभार्य:, शोभनभार्य, प्रसूतभार्य, प्रजातभार्य। एनी भार्या यस्य स एतभार्य:। एव श्येतभार्य·। युवतिर्जाया यस्य स युवजानि·। कल्याणी चासौ पञ्चमी च कल्याणपञ्चमी। पट्वी च मृद्वी च पट्वीमृद्वयौ, ते भार्येऽस्य पट्वीमृदुभार्य.। अत्र द्वंद्वपदाना परस्परार्थसंक्रमात् द्वयर्थस्य मृदुशब्दस्य द्वयर्थेन भार्याशब्देन सामानाधिकरण्यमिति पुंवद्भाव·। पूर्वस्य तु व्यवधानान्न भवति। भाषितपुस्कादिति किम्? द्रुणीभार्य, वरटाभार्य, वडवाभार्य। अनूङ इति किम्? ब्रह्मबन्धूभार्य·, वामोरूभार्य.। अनूङ इति प्रसज्यप्रतिषेधात् इडविडोऽपत्य स्त्री अञ्[1], तस्य[2] लुक्—इडविड्। सा चासौ भार्या च ऐडविडभार्येत्यादिषु 'पुंवत्कर्मधारये' [३/२/६१] इति पुवद्भाव। पर्युदासे हि ऊङसदृशप्रत्ययान्तस्यैव पुवद्भाव स्यादिति। स्त्रिया इति किम्? ग्रामणि कुल दृष्टिरस्य ग्रामणिदृष्टि·। तुल्यार्थ इति किम्? कल्याण्या माता कल्याणीमाता। दर्शनीयामाता। स्त्रियामिति किम्? कल्याणी प्रधानमेषां कल्याणीप्रधाना।

४९. मानि-क्यङ्-कच्-तस्त्र-तर-तम-चरट्-कल्प-देश्य-रूप-पाश-थ्येथट्-थट्-तिथट्-प्लुक्ष्।

मानिनि शब्दे क्यङादिप्रत्यये प्लुकि च परे भाषितपुस्कादनूङ. स्त्रिया. पुवद्भवति। दर्शनीया मन्यते दर्शनीयमानी अयमस्या। दर्शनीयमानिनीयमऽस्या। मानिन्ग्रहणमस्त्युत्तरपदार्थमतुल्यार्थार्थं च। दर्शनीयामात्मान मन्यते दर्शनीय-मानिनीति तु तुल्यार्थत्वात् पूर्वेणैव भवति। क्यङ—श्येनीवाचरति श्येतायते। कच्—दरदां राज्ञी दरत्[3], कुत्सिता दरत् दारदिका। तस्—तस्या. तत·। त्र—तस्या तत्र। तर—इयमनयोरतिशयेन पक्वा पक्वतरा। तम—इयमासामतिशयेन पक्वा पक्वतमा। चरट्—भूतपूर्वा पट्वी पटुचरी। कल्प—ईषदऽपरिसमाप्ता दर्शनीया दर्शनीयकल्पा। देश्य—एव दर्शनीयदेश्या। रूप—प्रशस्ता दर्शनीया दर्शनीयरूपा। पाश—निन्द्या दर्शनीया दर्शनीयपाशा। थ्य—अजायै हित अजथ्यम्। इथट्—इयतीना पूरणी इयनिथी। थट्—कतिपयानां स्त्रीणा पूरणी कतिपयथी। तिथट्—बह्वीनां पूरणी बहुतिथी। प्लुकि—पञ्चभिर्गार्गीभि गार्ग्यायणीभिर्वा क्रीत पञ्चगर्ग। दशगर्ग। '**द्विगोः प्लुगनिः**' [७/२/९६] इति इकण. प्लुक्। ततो '**यञञोऽश्यापर्णान्तः···**' [६/२/१३६] इत्यादिना यञो लुक्। पिदनुबन्धो लुगेव प्लुग् न ततो भिन्न। एष्विति किम्? पट्वीरूप्य, पट्वीमयम्।

५०. शसि बह्वल्पार्थात्।

'**बह्वल्पार्थात्···**' [८/२/१२] इति सूत्रेण विहिते शस्प्रत्यये परे भाषितपुम्कात्परस्य स्त्रीप्रत्ययस्य पुवद्भवति। बह्वीभ्यो देहि—बहुशो देहि। अल्पाभ्यो देहि—अल्पशो देहि। बह्वल्पार्थादिति किम्? तन्वी तन्वी खनति—तन्वीश. खनति। '**संख्यैकार्थाद् वीप्सायां**' [८/२/१३] इति शस् न तु '**बह्वल्पार्थात्···**' [८/२/१२] इत्यादिना।

५१. तत्वयोरऽसंज्ञाजातेः।

संज्ञाजातिवर्जिताद् भाषितपुस्कात्परस्या अनूङ· स्त्रियाः पुवद्भवति तत्वयो· परयो.। पट्व्या भाव.—पटुता, पटुत्वम्। पाचिकाया भाव:—पाचकता, पाचकत्वम्। मद्रिकाया भाव:—मद्रकता, मद्रकत्वम्। आनुकूलिक्या भाव:—

१. **रुदाद्राजनि चाञ्**।

२. '**अत्रणोरप्राच्यभर्गादेः**' [६/२/१३३]।

३. '**द्विस्वरमगध···**' [६/२/१२५] इत्यण्। '**अत्रणोरप्राच्यभर्गादेः**' [६/२/१३३] इति लुक्।

आनुकूलिकता, आनुकूलिकत्वम् । द्वितीयायाः--द्वितीयता, द्वितीयत्वम् । पञ्चम्याः—पञ्चमता, पञ्चमत्वम् । माथुर्याः—माथुरता, माथुरत्वम् । चन्द्रमुख्याः—चन्द्रमुखता, चन्द्रमुखत्वम् । सुकेश्याः—सुकेशता, सुकेशत्वम् । तत्वयोरिति किम् ? पट्वीमयं, पट्वीरूप्यम् । असंज्ञाजातेरिति किम् ? देवदत्ताता, देवदत्तात्वम् । कठीता, कठीत्वम् । केचिद् गुणवचनादेव भाषितपुंस्कात् स्त्रियाः पुंवदिच्छन्ति । तन्मते पाचिकायाः भावः—पाचकत्वेत्यादिषु दोषापत्तिः । रसवत्याः धूमवत्त्व, भुवस्तृणवत्त्वं, शालायादण्डित्वमित्यादिप्रयोगदर्शनाच्च तत् प्रत्यक्षविरुद्धम् ।

५२. च्वौ क्वचित् ।

भाषितपुंस्कादनूङः स्त्रियाश्च्वौ पुंवद्भवति, क्वचिल्लक्ष्यानुरोधेन । अमहती महती भूता—महद्भूता कन्या । एवं बृहत्कृता । क्वचिद् ग्रहणाद् अगोमती गोमती भूता—गोमतीभूतेत्यादौ न स्यादेव । पट्वी भूता—पटूभूता, मृद्वी कृता—मृदूकृतेत्यादौ विकल्पः । महतीभूतेत्यपि केचित् ।

५३. ञितद्धितयस्वरे जातेश्च ।

ञिप्रत्यये यकारादौ स्वरादौ च तद्धिते विषयभूते सति भाषितपुंस्कात्परस्या अनूङः स्त्रिया जातेश्च पुंवद्भवति । ञौ—पट्वीमाचष्टे—पटयति[1] । एवं लघयति, एतयति, श्येनयति । तद्धिते ये—एन्या साधु —एन्य । एवं श्येत्य । एन्या भावः—ऐत्यम् । श्यैत्यं, लौहित्यम् । तद्धिते स्वरे—भवत्या इदं भावत्कम् । भवदीयम् । इयमासामतिशयेन पट्वी—पटिष्ठा । पटीयसी । जातेस्तद्धिते ये—दरदोऽपत्यं स्त्री अण्, लुक्—दरत् । तस्या साधुः दारद्य । एवमौशिज्य । पुंवद्भावादणो लुक् निवर्तते । जातेस्तद्धिते स्वरे—गार्ग्यायण्या कुत्सितमपत्य—गार्गः[2], गार्गिक । हस्तिनीनां समूहः—हास्तिकम् । जातिग्रहणं जातिलक्षणनिषेधनिवृत्त्यर्थम् । चकारो भाषितपुंस्कात् स्त्रिया इत्यस्याप्यनुवर्तनार्थः । जातेर्भाषितपुंस्कात् परस्याः स्त्रियाश्च पुंवद्भवतीत्यर्थः । अकृते हि चकारे जातेरेव पुंवद्भाव स्यात् । तद्धिते इति किम् ? हस्तिनीमिच्छति—हस्तिनीयति । हस्तिन्यः । एनीयति, एन्यः । कथं यौवतम् ? भिक्षादौ युवतीति स्त्रीलिङ्गपाठस्तेन भविष्यति । कौण्डिन्य इति तु 'कौण्डिन्यागस्त्ययोः...' [६/२/१३७] इति निर्देशेन पुंवद्भावस्यानित्यत्वाद् भविष्यति । अनित्यत्वादेव मानाय्य इत्यत्रापि न भवति । सापत्न इत्यपि 'सपत्न्यादौ' [२/३/६६] इति सूत्रे सपत्नीति समुदायनिपातनात् पुंवद्भावो न । अत एव सपत्नीभार्य इत्यत्रापि न । तद्धितयस्वर इति विषयसप्तम्या आश्रयणं किम् ? पट्व्या भाव—पाटवम् । अत्र प्रत्ययोत्पत्तेः पूर्वमेव पुंवद्भावे लघ्वादित्वात् 'लघुपूर्वाद् य्वृवर्णात्' [७/३/७२] इत्यण् भवति । परसप्तम्या आश्रयणे तु पट्वीशब्दाल्लघ्वादित्वाभावादण् न स्यात् । यस्वरे इति किम् ? पट्व्या आगतः—पट्वीरूप्यम्, पट्वीमयम् ।

५४. एयेऽग्नाय्याः ।

पूर्वेणैव सिद्धे नियमार्थं वचनम् । एयप्रत्यये परे अग्नाय्या एव पुंवद्भवति नान्येषाम् । अग्नाय्याः अपत्यमाग्नेयः । अग्नायी देवता अस्य आग्नेयः स्थालीपाकः । नियमत्वान्नेह—श्यैनेयः, रौहिणेयः ।

५५. कुक्कुट्यादीनामण्डादिषु वा ।

कुक्कुट्यादीनां शब्दानामण्डादिषु परेषु पुंवद् वा भवति । कुक्कुट्या अण्ड—कुक्कुटाण्ड, कुक्कुट्यण्डम् । एवं मृगक्षीरं, मृगीक्षीरम् । काकशावः, काकीशावः । मृगपदं, मृगीपदम् । मृगशाव, मृगीशावः । मयूराण्ड, मयूर्यण्डम् । काकाण्ड, काक्यण्डम् । पुंस्त्रीलिङ्गपूर्वपदभेदेन समासविवक्षायां सूत्रानारम्भे कुक्कुटाण्डादयो न सिध्यन्ति । कुक्कुट्यादयोऽण्डादयश्च यथाप्रयोगमनुसर्तव्याः ।

---

१ ञिचि पुंवद्भावे 'नामिनोऽकलिहलेः' [४/२/२०] इति वृद्धौ टिलोपे पटयति । यद्वा वृद्धिमकृत्वैव उकारस्यैव लोप विदध्यात् ततोऽपीपटदित्यादौ समानलोपित्वादिस्व न स्यात् ।

२. 'पौत्रादेः स्त्रियाः कुत्सिते णश्च' [६/२/१०६] इति णेकणौ । ततः पुंवत्त्वे 'तद्धितेऽजातियस्वरे' [८/४/७८] इति यलोपः ।

५६. न प्रधानपूरणीप्रियादौ ।

प्रधानपूरणीप्रत्ययान्तेषु प्रियादौ च परतो यः प्राप्तः पुंवत्स न भवति । कल्याणी पञ्चमी यासां ताः कल्याणीपञ्चमा रात्रयः । एवं कल्याणीदशमा । प्रधानग्रहणादिह पुंवद्भावो भवत्येव—कल्याणपञ्चमीकः पक्षः । प्राधान्याभावात् 'अः पूरणीभ्यस्तत्प्राधान्ये' [८/३/४०] इति अः समासान्तो न । 'ऋन्नित्यदितः' [८/३/१०६] इति कप् । प्रियादि—कल्याणी प्रिया अस्य कल्याणीप्रियः । एवं भव्याप्रियः, भव्यामनोज्ञः, प्रियासुभगः । प्रियादयो यथा—प्रिया, मनोज्ञा, कल्याणी, सुभगा, दुर्भगा, स्वा, क्षान्ता, कान्ता, वामना, वामा, समा, सचिवा, चपला, बाला, तनया, दुहितृ, भक्ति इति । कथं दृढभक्तिः, स्थिरभक्तिः, शोभनभक्तिः ? उच्यते—अत्र भजनादेर्दार्ढ्यमात्रं विवक्षितं न तु स्त्रीत्वम् । दृढं भक्तिरस्येति ।

५७. णकतद्धितकोपधायाः ।

नेत्यनुवर्तते । णकप्रत्ययस्य तद्धितस्य च य, क, स उपधाया यस्या सा णकतद्धितकोपधा, तस्याः स्त्रियाः पुवन्न भवति । पाचिका भार्या यस्य स पाचिकाभार्यः । कारिकाभार्यः, हारिकाभार्यः । विलेपिकाया धर्म्यं वैलेपिकम् । आनुलेपिकम् । कारिकाकल्पा, पाचिकारूपा, कारिकायते, पाचिकामानिनी । तद्धित—मद्रिकाभार्यः, वृजिकाभार्यः, लाक्षिकीभार्यः, लाक्षिकीदेश्या, रौचनिकीचरी, मद्रिकायते, वृजिकामानिनी । णकतद्धित इति किम् ? पाकभार्यः, मूकभार्यः, जल्पाकभार्यः, कामुककल्पा, कुट्टाकमानिनी ।

५८. संज्ञापूरण्योः ।

संज्ञाया पूरण्याश्च स्त्रियाः पुवन्न भवति । संज्ञा—दत्ताभार्यः, गुप्ताभार्यः, दत्तापाशा, गुप्तापाशा । पूरणी—पञ्चमीभार्यः, दशमीभार्यः, द्वितीयाकल्पा, पञ्चमीदेश्या ।

५९. स्वरवृद्धिनिमित्तस्य तद्धितस्याऽरक्तविकारयोः ।

स्वरवृद्धिहेतोस्तद्धितस्य रक्तविकारार्थवर्जितस्य स्त्रीप्रत्ययस्य पुवन्न भवति । माथुरीभार्यः, वैदिशीभार्यः, सौतङ्गमीभार्यः, माथुरीदेश्या, नादेयीचरी । स्वरवृद्धिनिमित्तस्येति किम् ? अर्धप्रस्थे भवा—अर्धप्रस्थी । अर्धप्रस्थी भार्या यस्य अर्धप्रस्थभार्यः[1] । शोभनतरभार्यः, मध्यमभार्यः । स्वरे इति किम् ? वैयाकरणभार्यः[2] । अन्ये तु वृद्धिमात्रहेतोस्तद्धितस्य प्रतिषेधमिच्छन्ति । वैयाकरणीभार्यः । तद्धितस्येति किम् ? कुम्भकारभार्यः, काण्डलावभार्यः । अरक्तविकारयोरिति किम् ? कषायेण रक्ता—काषायी, सा बृहतिका यस्य काषायबृहतिकः । लोहस्य विकारो लौही, सा ईषा यस्य लौहेषो रथः ।

६०. स्वाङ्गाच्चीपो जातेश्चाऽमानिनि ।

स्वाङ्गात्परस्य स्त्रिया विहितस्येपः जातिवाचिन्याश्च स्त्रियाः पुवन्न भवति अमानिनि—मानिन्‌शब्दश्चेत्परो न भवति । दीर्घकेशीभार्यः, चन्द्रमुखीभार्यः, कलकण्ठीदेश्या, तनुगात्रीचरी, चन्द्रमुखीयते । जाति—कठीभार्यः, ब्राह्मणीभार्यः, शूद्राभार्यः, क्षत्रियादेश्या, ब्राह्मणीपाशा ।

आकृतिग्रहणा[3] जातिः, अत्रिलिङ्गा[4] च यान्विता ।
आजन्मनाशमर्थानां, सामान्यमपरे विदुः ॥

---

१. 'अर्धात्परिमाणस्याऽनतो वा स्वादेः' [८/४/१२] इत्यवाकारस्य वृद्धिविधौ वर्जनादाद्यस्य च वावचनादत्र वृद्ध्यभावः ।

२. नात्र ऐकारः स्वरस्थानी ।

३. पूर्वत्र जातिलक्षणे उक्तेऽपि अत्रैवविधा जातिर्ग्राह्येति वैचित्र्यार्थमाह—आकृतिग्रहणेति । ततश्च आकृतिग्रहणा जातिरिति प्रथमा जातिः । अनया च कुमारीभार्यः, किशोरीभार्यः इति सिद्धम् ।

४. अत्रिलिङ्गा च यान्विता, आजन्मनाशमर्थानामिति द्वितीया । केचित्तु आजन्मनाशमर्थानामन्विता इति आकृतिग्रहणा जातिरित्यस्य विशेषणं कुर्वन्ति । तन्मताभिप्रायेण कुमारभार्यः, किशोरभार्य इत्येव भवति ।

अत्र प्रथमजातिलक्षणानुसारेण कुमारीभार्यः, किशोरीभार्य इति भवति। द्वितीयजातिलक्षणानुसारेण कुमारभार्य, किशोरभार्य इति भवति। न हि कुमारत्वादि उत्पत्तेः प्रभृत्याविनाशमनुवर्तते। स्वाङ्गादिति किम्? पटुभार्य। ईप इति किम्? सकेशभार्य। अमानिनीति किम्? दीर्घकेशमानिनी, ब्राह्मणमानिनी। असमासनिर्देश सुखार्थ।

६१. पुंवत्कर्मधारये।

प्रतिषेधविषयेऽपि विधानार्थोयमारम्भः। विधानसामर्थ्याद् भाषितपुंस्कादिसर्वप्रपञ्चोऽनुवर्तते। कर्मधारये समासे भाषितपुंस्कादनूङ् स्त्रियाः पुंवद्भवति तुल्यार्थे स्त्र्युत्तरपदे परे। 'न प्रधानपूरणीप्रियादौ' [३/२/५६] इति प्रतिषेधे कल्याणी चासौ प्रिया च कल्याणप्रिया। एवं कल्याणमनोज्ञा। 'णकतद्धितकोपधायाः' [३/२/५७] इति प्रतिषेधे पाचकवृन्दारिका, कारकवृन्दारिका, मद्रकभार्या, लाक्षिकभार्या। 'संज्ञापूरण्योः' [३/२/५८] इति प्रतिषेधे दत्तवृन्दारिका, गुप्तवृन्दारिका, पञ्चमवृन्दारिका, षष्ठवृन्दारिका। 'स्वरवृद्धिनिमित्तस्य···' [३/२/५९] इति प्रतिषेधे माथुरी चासौ वृन्दारिका च माथुरवृन्दारिका। 'स्वाङ्गाद्वीपो···' [३/२/६०] इति प्रतिषेधे चन्द्रमुखी चासौ वृन्दारिका च चन्द्रमुखवृन्दारिका। दीर्घकेशवृन्दारिका, ब्राह्मणवृन्दारिका। यत्र निषेधो नास्ति तत्र तु भवत्येव--एका च शाटी च एकशाटी। भाषितपुंस्कादिति किम्? वडवावृन्दारिका। अनूङ इति किम्? ब्रह्मबन्धूवृन्दारिका।

६२. जातीयदेशीययोः।

जातीय, देशीय--इत्येतयोः प्रत्यययोः परयोर्भाषितपुंस्कादनूङः स्त्रियाः पुंवद्भवति। पट्वी प्रकारोऽस्या--पटुजातीया। ईषदपरिसमाप्ता पट्वी--पटुदेशीया। मद्रकजातीया, मद्रकदेशीया, पाचकजातीया, पाचकदेशीया, पञ्चमजातीया, षष्ठदेशीया, दत्तजातीया, गुप्तदेशीया, दीर्घकेशजातीया, चन्द्रमुखदेशीया। ननु 'मानिक्यङ्···' [३/२/४९] इति सूत्रे एवास्य प्रवेशः कर्तव्य, किमत्र स्थापनेन? उच्यते--माथुरी प्रकारोऽस्या इति कृते 'स्वरवृद्धिनिमित्तस्य···' [३/२/५९] इति प्रतिषेध प्राप्नोति, तद्बाधनार्थमत्र स्थापनम्। माथुरजातीया। मद्रकजातीया इत्यादिषु च 'णकतद्धितकोपधायाः' [३/२/५७] इत्यादि प्रतिषेधो बाध्यते। अप्राप्तप्रापणार्थोऽयमारम्भ।

६३. सर्वादीनामस्यादौ।

भाषितपुंस्काना सर्वादीनां स्त्रियाः पुंवद्भवति अस्यादौ--स्यादिश्चेत्तत परो न भवति। सर्वासां स्त्रियः--सर्वस्त्रियः। भवत्याः पुत्रः--भवत्पुत्रः। एकस्याः क्षीरं--एकक्षीरम्। एकस्या आगत--एकरूप्यम्। एकमयम्। तया प्रकृत्या तथा। एवं यथा। तस्यां वेलायां तदा। एवं यदा, कदा, सर्वदा, अन्यदा, तर्हि, यर्हि, कर्हि। सर्वामिच्छति--सर्वकाम्यति। भवत्काम्यति, एककाम्यति। प्रतिषेधविषयेऽपि परत्वाद् भवत्येव--सर्वा प्रिया अस्य सर्वप्रियः। एवं सर्वमनोज्ञः। सर्विका भार्या यस्य सर्वकभार्यः। एवं विश्वकभार्यः। सर्वादीनामिति किम्? कुमारीनिवासः। अस्यादाविति किम्? सर्वस्यै, दक्षिणपूर्वस्यै, उत्तरपूर्वस्यै। बहुवचनं व्याप्त्यर्थम्, तेन भूतपूर्वसर्वादेरपि भवति। दक्षिणोत्तरपूर्वाणाम्[1]।

६४. उदृदितस्तर-तम-रूप-कल्प-चेलड्-ब्रुव-गोत्र-मत-हतेषु ह्रस्वश्च वा।

चकारात् पुंवदित्यनुवर्तते। उकारानुबन्धात् ऋकारानुबन्धाच्च भाषितपुंस्कात्परस्य स्त्रीप्रत्ययस्य तरादिषु प्रत्ययेषु चेलडादिषु तुल्यार्थेषु चोत्तरपदेषु ह्रस्वान्तः पुंवच्च वा भवति। तर--श्रेयसितरा, श्रेयस्तरा, श्रेयसीतरा। पचन्तितरा, पचत्तरा, पचन्तीतरा। तम--श्रेयसितमा, श्रेयस्तमा, श्रेयसीतमा। पचन्तितमा, पचत्तमा, पचन्तीतमा। रूप--श्रेयसिरूपा, श्रेयोरूपा, श्रेयसीरूपा। पचन्तिरूपा, पचद्रूपा, पचन्तीरूपा। कल्प--विदुषिकल्पा, विद्वत्कल्पा, विदुषीकल्पा। पचन्तिकल्पा, पचत्कल्पा, पचन्तीकल्पा। चेलट्--विदुषिचेली, विद्वच्चेली, विदुषीचेली। पचन्तिचेली, पचच्चेली, पचन्तीचेली। टकार ईबर्थः। ब्रुव--विदुषिब्रुवा, विद्वद्ब्रुवा, विदुषीब्रुवा। पचन्तिब्रुवा, पचद्ब्रुवा, पचन्तीब्रुवा। गोत्र--श्रेयसिगोत्रा, श्रेयोगोत्रा, श्रेयसीगोत्रा। पचन्तिगोत्रा, पचद्गोत्रा, पचन्तीगोत्रा। मत--श्रेयसिमता, श्रेयोमता,

---

१. 'द्वन्द्वे न सर्वादिः' [१/४/२४] इति सर्वादित्वाऽभाव।

श्रेयसीमता। पचन्तिमता, पचन्मता, पचन्तीमता। हत—विदुषिहता, विद्वद्धता, विदुषीहता। पचन्तिहता, पचद्धता, पचन्तीहता। एवं सुदतितरेत्यादि। चेलडादय कुत्साशब्दाः 'कुत्सितानि···' [३/१/१०२] इति समासः। उदृदित इति किम्? कुमारितरा, किशोरितमा। तुल्यार्थे इति किम्? विदुष्या हता विदुषीहता। एवं पचन्तीहता। तरादिष्विति किम्? विद्वद्वृन्दारिका, पचत्पाशा।

६५. ईपः।

अग्रे विकल्पविधानान्नित्योऽयं विधिः। तरादिषु परेषु भाषितपुंस्काद् विहितस्य ईपो ह्रस्वो भवति तुल्यार्थे। गौरितरा, गौरितमा, नर्तकिरूपा, कुमारिकल्पा, ब्राह्मणिचेली, ब्राह्मणिब्रुवा, ब्राह्मणिगोत्रा, गार्गिमता, गौरिहता। परत्वाद्यथाप्राप्तं पुंवद्भावं बाधते। ईप इति किम्? मद्रिकातरा, मद्रिकातमा, दत्तारूपा, सेनानीरूपा, ग्रामणीकल्पा। भाषितपुंस्कादिति किम्? आमलकीतरा। तुल्यार्थ इति किम्? ब्राह्मण्या हता—ब्राह्मणीहता। 'वैकस्वरात्' [३/२/६७] इत्युत्तरत्र वचनादनेकस्वरादेवायं विधिः।

६६. भोगवद्गौरिमद्भ्यां संज्ञायाम्।

आभ्यां विहितस्येपो ह्रस्वो भवति तुल्यार्थे तरादौ परे संज्ञायां विषये। भोगवतितरा, भोगवतितमा, गौरिमतितरा, गौरिमतितमा, भोगवतिरूपा, गौरिमतिकल्पा, भोगवतिचेली, गौरिमतिब्रुवा, भोगवतिगोत्रा, गौरिमतिमता, भोगवतिहता। संज्ञायामिति किम्? भोगवतितरा, भोगवत्तरा, भोगवतीतरा। एवं गौरिमतितरेत्यादि। उदित्त्वात्पूर्वेण त्रैरूप्यम्।

६७. वैकस्वरात्।

भाषितपुंस्कादिति निवृत्तम्। एकस्वराद् विहितस्येपो ह्रस्वो वा भवति तुल्यार्थे तरादौ परे। स्त्रितरा, स्त्रीतरा। श्रितरा[1], श्रीतरा। कस्य भार्या—की। कितमा, कीतमा। स्त्रिरूपा, स्त्रीरूपा। श्रिकल्पा, श्रीकल्पा। एवं स्त्रिचेलीत्यादि। एकस्वरादिति किम्? कुटीतरा, द्रुणीतमा, आमलकीतरा, बदरीतमा, कुवलीरूपा। ईप इति किम्? श्रीतरा, धीतमा। तुल्यार्थ इति किम्? स्त्रिया हता—स्त्रीहता। नित्यदितोऽनेकस्वरादपीच्छन्त्येके। तन्मते आमलकितरा, बदरितमा, कुवलिरूपा, लक्ष्मिकल्पा, तन्त्रितरेत्याद्यपि भवति।

६८. ऊङः।

ऊङन्तस्य ह्रस्वो वा भवति तुल्यार्थे तरादौ परे। ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा। वामोरुतमा, वामोरूतमा। कमण्डलुरूपा, कमण्डलूरूपा। श्वश्रुकल्पा, श्वश्रूकल्पा। एवं भीरुचेली, भीरूचेलीत्यादि। तुल्यार्थ इति किम्? भीर्वा हता भीरूहता।

६९. महतो घासकरविशिष्टेषु डाः।

वेत्यनुवर्तते। महत्शब्दस्य डा इत्ययमादेशो वा भवति घासादिषु परेषु। असमानाधिकरणार्थोऽयमारम्भः, समानाधिकरणे तु परत्वादुत्तरेण नित्य एव विधिः। महता घासः— महाघासः, महद्घासः। महाकरः, महत्करः। कर एव कार इति महाकारः, महत्कारः। महाविशिष्टः, महद्विशिष्टः। महत इति किम्? राजकरः। घासादिष्विति किम्? महतः पुत्रः—महत्पुत्रः। डकारो टिलोपार्थः। स च उत्तरार्थः।

७०. स्त्रियाम्।

स्त्रियां वर्तमानस्य महत्शब्दस्य डा इत्यादेशो नित्यं भवति घासादिषु परेषु। महत्या घासः—महाघासः।

---

१. भर्तृयोगादीप्।

महाकर., महाविशिष्ट । **नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति** पूर्वेणैव सिद्धे नित्यार्थमिदम् ।

७१. अच्व्येस्तुल्यार्थजातीययोः ।

अच्व्यन्तस्य महत्शब्दस्य तुल्यार्थे उत्तरपदे जातीयप्रत्यये च परे डान्तादेशो भवति । महांश्चासौ वीरश्च महावीरः । महादेव । महती कीर्तिरस्य स महाकीर्त्ति । महास्तुति । महाश्चासौ घासश्च महाघासः । महान् करोऽस्य महाकरः । एव महाविशिष्टः । जातीये—महान् प्रकारोऽस्य महाजातीय । महाजातीया । अच्व्येरिति किम् ? अमहान्महान्[1] संपन्नो महद्भूतश्चन्द्रमा । तुल्यार्थजातीययोरिति किम् ? महत्याः पतिः—महतीपतिः । प्रकृष्टो महान्महत्तरः ।

७२. न पुंवन्निषेधे ।

पूर्वेण प्राप्तोऽनेन निषिध्यते । महत पुंवन्निषेधविषये उत्तरपदे परे डा न भवति । महती प्रिया अस्य महतीप्रिय । महतीमनोज्ञ ।

७३. इच्यऽस्वरे दीर्घ आच्च ।

इच्प्रत्ययान्ते अस्वरादावुत्तरपदे परे पूर्वपदस्य दीर्घ आकारश्चान्तादेशो भवति । बाहुषु च बाहुषु च मिथो गृहीत्वा कृतं युद्धं—बाहूबाहवि, बाहाबाहवि । एव केशाकेशि । मुष्टिभिश्च मुष्टिभिश्च प्रहृत्य कृतं युद्धं—मुष्टीमुष्टि, मुष्टामुष्टि । एव यष्टीयष्टि, यष्टायष्टि । दण्डादण्डि । दीर्घत्वात्वयोरकारान्तादन्यत्र विशेषः । दीर्घसाहचर्याद्[2] आत्वमपि स्वरान्तानामेव भवति, तेनेह न—दोर्दोषि, धनुर्धनुषि । अस्वरे इति किम् ? अस्यसि, इष्विषवि ।

७४. अष्टनः कपाले हविषि ।

हविष्यभिधेये अष्टन्शब्दस्य कपाले उत्तरपदे परे दीर्घोऽन्तादेशो भवति । अष्टसु कपालेषु संस्कृतं—अष्टाकपालं[3] हवि । हविषीति किम् ? अष्टाना कपालाना समाहार—अष्टकपालम् । पात्रादित्वात्स्त्रीत्वाऽभाव । कपाल इति किम् ? अष्टपात्र हवि ।

७५. गवि युक्ते ।

अष्टन्शब्दस्य गव्युत्तरपदे युक्तेऽभिधेये दीर्घोऽन्तादेशो भवति । अष्टागव शकटम् । अष्टौ गावो युक्ता अस्मिन्निति त्रिपदे बहुव्रीहौ कृते उत्तरपदे परे द्वयोर्द्विगु 'गोरतद्धितलुकः' [८/३/२०] इति ट । तत्र दीर्घत्वेन युक्तार्थगम्यत्वात् युक्तशब्दो निवर्तते । अथवा समाहारद्विगु । तत्र साहचर्यादुपचारादष्टगवेन युक्त शकट अष्टागवमुच्यते । गवीति किम् ? अष्टतुरगो रथः । युक्त इति किम् ? अष्टगव ब्राह्मणधनम् ।

७६. संज्ञायाम् ।

अष्टन्शब्दस्योत्तरपदे परे दीर्घोऽन्तादेशो भवति संज्ञाया विषये । अष्टौ पदान्यत्र अष्टापद कैलाशः । अष्टापदं सुवर्णम् । अष्टावक्रो मुनि । अष्टाविटपो नाम कश्चित् । संज्ञायामिति किम् ? अष्टदण्ड, अष्टगुणमैश्वर्यम् ।

७७. वने कोटर-मिश्रक-पुरग-सिध्रक-सारिकाणाम् ।

वने उत्तरपदे कोटरादीना दीर्घोऽन्तादेशो भवति संज्ञायां विषये । कोटरावणम् । मिश्रकावणम् । पुरगावणम् ।

---

१. संपन्न इत्यर्थकथनम् । अमहान्महान्भूत इति तु दृश्यमन्यथा च्वेरभाव ।

२. स्वरस्य ह्रस्वदीर्घप्लुताः इति न्यायादित्यर्थ ।

३. अत्राष्टनो ह्रमान्तत्वाद् दीर्घे परविधौ नलोपस्याऽभावेपि दीर्घस्य स्वरधर्मत्वादकारस्योपधाया अपि स्वरापेक्षयाऽन्त्यत्वाद् वाऽनेन दीर्घ ।

सिध्रकावणम् । सारिकावणम् । 'पुरगामिश्रकासिध्रका···' [२/२/७२] इत्यादिना णत्वम् ।

७८. अञ्जनादीनां गिरौ ।

गिरावुत्तरपदे अञ्जनादीनां दीर्घोऽन्तादेशो भवति संज्ञाया विषये । अञ्जनागिरिः, भाञ्जनागिरिः, लोहितागिरिः । अञ्जनादीनामिति किम् । कृष्णगिरिः, श्वेतगिरिः । संज्ञायामिति किम् ? अञ्जनस्य गिरिः अञ्जनगिरिः । अञ्जनादयो यथा—अञ्जन, भाञ्जन, लोहित, किंशुक, किंशुलक, साल्व, कुक्कुट, खञ्ज, नल, पिङ्गल इत्याकृतिगणोऽयम् ।

७९. अनजिरादिबहुस्वरशरादीनां मतौ ।

अजिरादिवर्जितबहुस्वराणां शरादीनां च मतौ प्रत्यये दीर्घोऽन्तादेशो भवति संज्ञायां विषये बहुस्वर—उदुम्बरावती, मशकावती, पुष्करावती, अमरावती, वीरणावती । शरादि—शरावती, वंशावती । शरादयो यथा—शर, वंश, कुश, धूम, अहि, कपि, मुनि, मणि, वार्द, वेट, ऋषि, मृग, पद्म, वात, भोग इत्याकृतिगणोऽयम् । बहुस्वरशरादीनामिति किम् ? गुणवती । अजिरादिवर्जनं किम् ? अजिरवती, खदिरवती । अजिरादयो यथा—अजिर, खदिर, खपुर, स्थविर, पुलिन, मलय, हंस, कारण्ड, चक्रवाक, अलङ्कार, शशाङ्क, हिरण्य इत्याकृतिगणोऽयम् । संज्ञायामिति किम् ? वलयवती कन्या । शरवती तूणा ।

८०. शुच्यादीनां मतौ ।

शुच्यादीनां मतौ प्रत्यये दीर्घोऽन्तादेशो भवति संज्ञाया विषये । शुचीमती । आकृतिगणोऽयम् । शुच्यादीनामिति किम् ? व्रीहिमती, इक्षुमती, द्रुमती, मधुमती ।

८१. ऋषौ विश्वस्य मित्रे ।

विश्वशब्दस्य मित्रे उत्तरपदे परे ऋषावभिधेये संज्ञाया विषये दीर्घोऽन्तादेशो भवति । विश्वामित्रो नामर्षिः । ऋषाविति किम् ? विश्वमित्रो माणवकः । संज्ञायामिति किम् ? विश्वं मित्रमस्य विश्वमित्रो मुनिः ।

८२. नरे ।

विश्वशब्दस्य नरशब्दे उत्तरपदे दीर्घोऽन्तादेशो भवति संज्ञाया विषये । विश्वे नरा अस्य विश्वानरो नाम कश्चित् । नर इति किम् ? विश्वसेनः । संज्ञायामिति किम् ? विश्वनरो राजा ।

८३. वसुराटोः ।

पृथग्योगात्संज्ञायामिति निवृत्तम् । विश्वशब्दस्य वसौ राटि च परे दीर्घोऽन्तादेशो भवति । विश्वं वस्वस्य विश्वावसुः । विश्वस्मिन् राजते इति विश्वाराट् । राडिति विकृतनिर्देशादिह न—विश्वराजौ, विश्वराजः ।

८४. कर्णे स्वामिचिह्नस्याऽविष्टाष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य ।

स्वामी चिह्न्यते येन तत्स्वामिचिह्नम् । तद्वाचिनो विष्टादिवर्जितस्य कर्णशब्दे उत्तरपदे परे दीर्घोऽन्तादेशो भवति । दात्रं चिह्नं कर्णे यस्य दात्रमिव वा कर्णौ यस्य स दात्राकर्णः पशुः । एवं शङ्कूकर्णः, द्विगुणाकर्णः, द्व्यङ्गुलाकर्णः । कर्णे इति किम् ? चक्रं सक्थनि यस्य स चक्रसक्थः । स्वामिचिह्नस्येति किम् ? शोभनकर्णः । स्वामिग्रहणं किम् ? लम्बकर्णः, अविद्धकर्णः शिशुः । चिह्नग्रहणं किम् ? वाहनस्य कर्णः—वाहनकर्णः । विष्टादिवर्जनं किम् ? विष्टकर्णः, अष्टकर्णः, पञ्चकर्णः, भिन्नकर्णः, छिन्नकर्णः, छिद्रकर्णः, स्रुवकर्णः, स्वस्तिककर्णः ।

८५. गतिकारकाणां नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ ।

गतिसंज्ञकानां कारकवाचिनां च नह्यादिषु क्विबन्तेषु उत्तरपदेषु परेषु दीर्घोऽन्तादेशो भवति । उपनह्यति

उपनह्यते वा उपानत् । परीणत् । वृत्—नीवृत्, उपावृत् । वृष्—प्रावृट्, परीवृट् । व्यध्—श्वावित्, मर्मावित् । रुच्—नीरुक्, अतीरुक्, । तन्—परीतत् । **'गमां क्वौ'** [४/३/४४] इति नलोप. । गतिकारकाणामिति किम् ? पटुरुक्, तीव्ररुक्, कमलरुक्, श्वेतरुक् । केचित्तु रुजाविच्छन्ति न रुचौ, तेन रुजरुच्योर्मतभेदेन विकल्प सिद्ध । नीरुक्, निरुक् । अतीरुक्, अतिरुक् । क्वाविति किम् ? उपनद्धं, विततम् । इह क्विग्रहणादन्यत्र धातुग्रहणे तदादिविधिर्लभ्यते । तेन अयस्कृत, अयस्कारः इत्यादौ सकारः सिद्धो भवति । अन्यथा ह्ययस्कृदित्यत्रैव स्यात् ।

८६. सहे विणि च ।

विण्प्रत्ययान्ते चकारात् क्विप्प्रत्ययान्ते च सहे परे गतिकारकाणा दीर्घोऽन्तादेशा भवति । तुरं वेग सहते—तुराषाट् । **'भजिसहिवहिभ्यो विण्'** [५/२/७३] । **'सहे साडः'** [२/२/२८] इति षत्वम् । तुरासट् । विधानसामर्थ्यात् सारूप्यार्थेऽपि विणि क्विप् प्रत्यय. । ऋतीपट्—सुषामादित्वात् षत्वम् ।

८७. घञ्युपसर्गस्य बहुलम् ।

घञन्ते उत्तरपदे परे उपसर्गस्य बहुल दीर्घोऽन्तादेशो भवति । नीक्लेद , नीमेद , नीमार्ग , नीवार , प्रावार , नीशार । क्वचिन्न—निषाद., विषाद , प्रताप , प्रभाव., प्रभारः, प्रहार । क्वचिद्विकल्प —प्रतीवेश , प्रतिवेशः । प्रतीपादः, प्रतिपाद । प्रतीबोधः, प्रतिबोध । परीणाम., परिणाम. । प्रतीहार , प्रतिहार । प्रतीकार , प्रतिकार । अतीसार , अतिसार. । वीसर्प , विसर्प । क्वचिद्विषयभेदेन—प्रासादो गृहम् । प्रसादोऽन्य । प्राकारो वप्र । प्रकारोऽन्य । अपामार्ग औषधि । अपमार्गोऽन्य । नीहारो हिमम् । निहारोऽन्य । वीनस पक्षिबन्धनम् । वितसोऽन्य । परीहारो देशानुरोध. । परिहारोऽन्य । परीरोधो मृगावरोध । परिरोधोऽन्य । घञीति किम ? अवसाय , अवहार । णप्रत्ययोऽयम् । उपसर्गस्येति किम् ? चन्दनसार , खदिरसार । मार्गमतिक्रान्त —अतिमार्ग । बहुलवचनादनुपसर्गस्याऽपि अघञ्यपि च भवति । दक्षिणापथ., उत्तरापथ । क्वचिद्विकल्प —अन्धतम , अन्धातम । अन्धतमस, अन्धातमसम् । क्वचिद्विषयभेदेन—अधीदन्त , अधीकर्ण., अधीकण्ठ , अधीपाद । एते आधिक्ये । अन्यत्र अधिदन्त इत्यादि भवति । क्वचिदनुत्तरपदेऽपि विकल्प – पूरुष , पुरुषः । नारक., नरक । सादनं, सदनम् । अतिशायन, अतिशयनम् ।

८८. नामिनः काशे ।

उपसर्गस्येत्यनुवर्तते । नाम्यन्तस्योपसर्गस्य काशशब्दे उत्तरपदे परे दीर्घोऽन्तादेशो भवति । नीकाश , वीकाशः, अनूकाश , प्रतीकाश । बहुलाधिकारान्निकाश इत्यपि । अच्प्रत्ययान्तोऽय काशशब्द , घञन्ते तु पूर्वेणैव विकल्प. । नीकाश , निकाश. । प्रतीकाशः, प्रतिकाश । नामिन इति किम् ? प्रकाशते इति प्रकाश ।

८९. दस्ति ।

दा इत्येतस्य यस्तकारादिरादेश नस्मिन् परे नाम्यन्तस्योपसर्गस्य दीर्घोऽन्तादेशो भवति । नीत्त, वीत्त, परीत्तम् । परीत्तवान् । परीत्त्रिम, प्रणीत्त्रिमम् । द इति किम् ? वितीर्णम् । तीति किम् ? सुदत्तम् । नामिन इति किम् ? प्रत्त, अवत्तम् ।

९०. अपील्वादेर्वहे ।

पील्वादिवर्जितस्य नाम्यन्तस्य वहे उत्तरपदे परे दीर्घोऽन्तादेशो भवति । वहतीति वहम् । ऋषीणा वहं—ऋषीवहम् । मुनीवह, कपीवहम् । एवनामानि नगराणि । घान्ते तु वहशब्दे ऋषीवह , मुनीवह , कपीवह. । अपील्वादेरिति किम् ? पीलुवह, दारुवह, चारुवहम् । नामिन इति किम् । पिण्डवह, काष्ठवहम् ।

९१. वलेऽपित्रादेः ।

वलप्रत्यये परे पित्रादिवर्जितस्य पूर्वपदस्य दीर्घोऽन्तादेशो भवति । आसुति. सुरा, साऽस्यास्तीति आसुतीवलः । एवं दन्तावल , कृषीवलः, उत्सङ्गावलः, पुत्रावल । अपित्रादेरिति किम् ? पितृवल., मातृवल., भ्रातृवलः, उत्साहवलः ।

प्रत्ययाऽप्रत्यययोः प्रत्ययस्यैव ग्रहणमिति न्यायान्नेह—कायस्य वलं कायवलम् । नागवलम् ।

९२. चितेः कपि ।

कप्प्रत्यये परे चितिशब्दस्य दीर्घोऽन्तादेशो भवति । एका चितिरस्मिन् एकचितीक । द्विचितीक , त्रिचितीकः ।

९३. शुनः ।

श्वन्शब्दस्य दीर्घोऽन्तादेशो भवति उत्तरपदे परे । शुनो दन्त.—श्वादन्तः । एव श्वादंष्ट्रा, श्वाकर्ण , श्वाकर्द., श्वाकूर्द , श्वावराहम् । बहुलाधिकारात् क्वचिद्विकल्प —श्वापुच्छं, श्वपुच्छम् । क्वचिद्विषयान्तरे—शुनः पदमिव पदमस्य श्वापद[1] व्याघ्रादि । शुन पद श्वपदम् । क्वचिन्न भवति—श्वफल्क., श्वमुख. ।

९४. एकादश षोडश षोडन् षोढा षड्ढा ।

एकादय. शब्दा दशादिषूत्तरपदादिषु कृतदीर्घत्वादयो निपात्यन्ते । एकोत्तरा दश, एक च दश च वा एकादश । अत्रैकस्य दशशब्दे उत्तरपदे दीर्घ । षडुत्तरा दश, षट् च दश च वा षोडश । अत्र षषोऽन्तस्योत्वमुत्तरपददकारस्य च डकार । षड् दन्ता अस्य षोडन् । अत्र दन्तशब्दस्य दत्रादेशे कृते दस्य डत्व षषोऽन्तस्योत्व च । एव षोडन्तौ, षोडन्त. । स्त्रिया तु षोडती । अन्ये तु दत्रादेशे कृते षोडन्निति शब्दान्तर नकारान्त[2] राजन्शब्दवत् निपातयन्ति । ततश्च षोडानमिच्छतीति क्यचि नकारलोपे ईत्वे च षोडीयतीति सिध्यतीति मन्यन्ते । षड्भि प्रकारै. षोढा, षड्ढा । अत्र धाप्रत्यये षषोऽन्तस्य वोत्व धकारस्य तु नित्य ढत्वम् । यत्तु षड्धेति रूप न तत् धाप्रत्यये कि तु षड् दधाति धयति वेति । **'आतो डोऽह्वावामः'** [५/२/५] इति डे कृते स्त्रियामपि च भवति । निपातनस्य चेष्टविषयत्वादत्रोत्वढत्वे न भवत. ।

९५. द्वित्र्यष्टानां द्वात्रयोऽष्टाः प्राक् शतादनशीतिबहुव्रीहौ ।

द्वि, त्रि, अष्टन्—इत्येतेषा यथासख्य द्वा, त्रयस्, अष्टा इत्येते आदेशा प्राक् शतात् सख्यायामुत्तरपदे[3] भवन्ति अशीति बहुव्रीहिसमासविषय चोत्तरपद वर्जयित्वा । द्वाभ्यामधिका दश, द्वौ च दश चेति वा द्वादश । एवं द्वाविंशति , द्वात्रिंशत् । त्रयोदश, त्रयोविंशति , त्रयस्त्रिंशत् । अष्टादश, अष्टाविंशति , अष्टात्रिंशत् । द्वित्र्यष्टानामिति किम् ? पञ्चदश । प्राक्शतादिति किम् ? द्विशत, त्रिशतं, अष्टशतम् । द्विसहस्र, त्रिसहस्र, अष्टसहस्रम् । अनशीतिबहुव्रीहाविति किम् ? द्व्यशीति , त्र्यशीति । द्वौ वा त्रयो वा द्वित्रा. । त्रिचतुरा , अष्टनवा । द्विर्दश द्विदशा । एव त्रिदशा. । प्राक्शतादित्यवधे सख्यापरिग्रहादिह न भवति । द्वैमातुर , त्रैमातुर , आष्टमातुर । द्विमुनि व्याकरणस्य, त्रिमुनि व्याकरणस्य ।

९६. चत्वारिंशदादौ वा ।

द्वित्र्यष्टाना प्राक्शताच्चत्वारिंशदादौ सख्यायामुत्तरपदे यथासंख्य द्वा, त्रयस्, अष्टा इत्येते आदेशा वा भवन्ति अनशीतिबहुव्रीहौ । द्वाभ्यामधिका चत्वारिंशत्, द्वौ च चत्वारिंशच्चेति वा द्वाचत्वारिंशत्, द्विचत्वारिंशत् । त्रयश्चत्वारिंशत्, त्रिचत्वारिंशत् । अष्टाचत्वारिंशत्, अष्टचत्वारिंशत् । द्वापञ्चाशत्, द्विपञ्चाशत् । त्रय.पञ्चाशत्, त्रिपञ्चाशत् । अष्टापञ्चाशत्, अष्टपञ्चाशत् । द्वाषष्टि , द्विषष्टिः । त्रयःषष्टि , त्रिषष्टि । अष्टाषष्टि , अष्टषष्टि. । द्वासप्तति , द्विसप्ततिः । त्रयःसप्ततिः, त्रिसप्तति । अष्टासप्तति , अष्टसप्तति. । द्वानवति , द्विनवति. । त्रयोनवति , त्रिनवति. । अष्टानवति , अष्टनवति । अनशीतिबहुव्रीहाविति किम् ? द्व्यशीति., त्र्यशीति , अष्टाशीति. । द्विश्चत्वारिंशत्, द्विचत्वारिंशा. । एवं त्रिचत्वारिंशा । अष्टौ चत्वारिंशतोऽस्मिन् अष्टचत्वारिंशत् । पूर्वेण नित्यं प्राप्ते विकल्पार्थमिदम् ।

---

१. अत्र बाहुलकान्नपुंसकत्वं, अन्यथा प्राणिनामत्वात् पुंस्त्वं स्यात् ।

२ स्वमते तु तकारान्तो निपातः ।

३. पूर्वपदस्य साक्षादेव निर्देशात् प्राक् शतादित्यवधेरनशीतिपर्युदासादशीते. सख्यारूपस्यैवोत्तरपदस्य ग्रहणम् ।

९७. नञोऽत् ।

नञ्शब्द उत्तरपदे परे अकारो भवति। न ब्राह्मण —अब्राह्मण । अवृषल , अचौर पन्था , अमक्षिको देश:, अमशक वर्तते, अमक्षिक वर्तते, अहिंसा, अस्तेयम् । अकार.[1] किम् ? पामनपुत्र । उत्तरपदे इति किम् ? न भुङ्क्ते ।

९८. त्यादौ क्षेपे ।

पूर्वमनुवर्तते । त्याद्यन्ते पदे परे नञ् अकारो भवति क्षेपे गम्यमाने। अपचसि त्व जाल्म ! । अकरोषि त्व जाल्म ! । त्यादाविति किम् ? न पाचको[2] जाल्म । क्षेप इति किम् ? न पचति चैत्र । अ मा नो ना प्रतिषेधे इत्यकारेण प्रतिषेधार्थीयेनैव सिद्धौ क्षेपे नञः श्रवणनिवारणार्थमनुत्तरपदार्थं[3] च वचनम् ।

९९. नगोऽप्राणिनि वा ।

अप्राणिन्यभिधेये नञोऽकाराऽभावे नग इति वा निपात्यते। न गच्छतीति नग.—पर्वत. । अग.—पर्वत । नगा — वृक्षा । अगा. —वृक्षा. । अप्राणिनीति किम् ? अगो वृषल शीतेन । विकल्पार्थ वचनम् ।

१००. नखादयः ।

नखादय शब्दा अकृताऽकाराद्यादेशा निपात्यन्ते। नाऽस्य खमस्तीति नख । न भ्राजते इति नभ्राट्, क्विबन्त. । न पातीति नपात्, शत्रन्त. । त्रिलिङ्गोऽयम् । निपातनात् तु नुमऽभाव । न वेत्तीति नवेदा । औणादिकोऽस् । सत्सु साधु — सत्य । साधौ य । न सत्य —असत्यः । न असत्य. —नासत्य । नासत्यौ, नासत्या. । न मुञ्चतीति नमुचि । औणादिक कि । नास्य कुलमस्तीति नकुल । कथं न न भ्राजते किन्तु भ्राजते एवेति नभ्राट् ? पृषोदरादित्वादेकस्य नञो लोपे भविष्यति । एव न न पाति नपात् । न न वेत्ति नवेदा । न न मुञ्चति नमुचिः । न न कुलमस्त्यस्य नकुल । न न खमस्त्यस्य नख । न पुमान् न स्त्रीति नपुंसकम् । अत एव निपातनात् स्त्रीपुंसयो पुंसकादेश । न क्षीयते न क्षरति वा नक्षत्रम् । औणादिके त्रटि क्षभावे निपात्यते । न क्रामति न क्रीणाति वा नक्र । इप्रत्ययो निपातनात् । नाऽस्मिन्नकं दु.खमस्ति नाक । न विद्यन्ते ग्ना: श्रियश्छन्दांसि वाऽस्य नग्न । न अग —नाग । न विद्यते भागोऽस्य नभाग । नारमञ्चति[4] नाराच । न आप्यत इति नापित । न मीयतेऽसाविति नमेरु । नाभिनन्दति वधूमिति ननान्दा । नान्तरेण भवति नान्तरीयकम् । न न चिकेत्ति नाचिकेत. । अत एव निपातनात् किज्ज्ञापनार्थो जुहोत्यादौ द्रष्टव्य । अस्माच्च नञ्द्वयोपपदात् सञ्ज्ञायामप् प्रत्ययो भवति । आकृतिगणोऽयम्, तेन नास्तिक., नभ , नारङ्गमित्यादयोऽपि द्रष्टव्या ।

१०१. अन् स्वरे ।

नञ स्वरादावुत्तरपदे परे अन् भवति। न विद्यते अन्तोऽस्येति अनन्तो जिन । एवमनादि । अजानामभाव. अनजम् । न अश्व.—अनश्व । अन् इति स्वरूपनिर्देशात् नलोपो द्वित्वं च न भवति ।

१०२. कोः कत्तत्पुरुषे ।

स्वर इत्यनुवर्तते । तत्पुरुषे समासे स्वरादावुत्तरपदे कुशब्दस्य कदित्यादेशो भवति । कुत्सित. अश्व.—कदश्वः । कदुष्ट्र , कदन्न, कदशनम् । तत्पुरुष इति किम् ? कुत्सिता उष्ट्रा अस्मिन् कूष्ट्रो देशः । स्वर इति किम् ? कुब्राह्मण. ।

---

१ ननु चादिषु निरनुबन्ध एव नञ पठ्यता स एव चेहानुक्रियतामिति । सत्यम् । निरनुबन्धपाठे पामनपुत्र इत्यादौ **'अज्ञादेर्नः'** [८/१/५०] इति विहितस्य नप्रत्ययस्यात्र ग्रहण स्यात् । यत **प्रत्ययाऽप्रत्ययोः प्रत्ययस्यैव ग्रहणमिति** हि न्याय. । तत. सानुबन्धपाठो युक्त एव ।

२ असमासोऽयं नञ्समासस्य पाक्षिकत्वात् पाचक इति नोत्तरपदमिति पूर्वेणापि न भवति ।

३. त्याद्यन्तेन समासाभावतः समासे च सति पूर्वोत्तरपदव्यवहारात् ।

४ नरसमूहम् ।

१०३. त्रिरथवदेषु ।

त्रि, रथ, वद—इत्येतेषु परेषु कुशब्दस्य कदादेशो भवति । कुत्सितास्त्रयः—कत्त्रयः । कुत्सितास्त्रयोऽस्य कत्त्रि. । कुत्सितो रथः—कद्रथः । कुत्सितो वदोऽस्य कद्वद । तत्पुरुष एवेच्छन्त्येके । अन्यत्र कुरथो राजा, कुवदो मूर्ख । **'हैमस्तु'** [३/२/१३३] त्रौ परे किंशब्दस्यापि कदादेशमिच्छति । के त्रय.—कत्त्रय. ।

१०४. तृणे जातौ ।

कुशब्दस्य तृणे उत्तरपदे जातावभिधेयाया कदादेशो भवति । कुत्सितं तृणमस्याः कत्तृणा नाम रौहिषाख्या तृणजातिः । जाताविति किम् ? कुत्सितानि तृणानि—कुतृणानि ।

१०५. का पथ्यक्षयोः ।

पथिन्, अक्ष—इत्येतयोरुत्तरपदयो कुशब्दस्य का इत्यादेशो भवति । कुत्सित. पन्था.—कापथम् । कुत्सित. पन्था अस्मिन् कापथो देश । अक्षशब्दस्याऽकारान्तस्य कृतसमासान्तस्य चाविशेषेण ग्रहणम् । कुत्सितोऽक्षः पाशकादि —काक्षः । कुत्सितमक्षमिन्द्रिय—काक्षम् । कुत्सितोऽक्षो यस्य काक्षो रथ । कुत्सितमक्षि अक्ष वाऽस्य काक्ष. । पथिशब्दनिर्देशात् तत्पर्यायेऽव्युत्पन्ने पथशब्दे न भवति । कुत्सित पथ —कुपथ । कुपथ वनम् । अनल्पार्थं वचनम् ।

१०६. अल्पे ।

अल्पार्थे वर्तमानस्य कुशब्दस्य उत्तरपदे परे कादेशो भवति । ईषन्मधुर— कामधुरम् । कालवणम् । स्वरादावपि[1] परत्वात् कादेश एव । ईषदम्ल—काम्लम् । एव काच्छम् ।

१०७. पुरुषे वा ।

पुरुषशब्दे उत्तरपदे परे कुशब्दस्य का इत्यादेशो वा भवति । कुत्सित पुरुष.—कापुरुष., कुपुरुष । कुत्सिता. पुरुषा अस्मिन् कापुरुष कुपुरुषो वा ग्राम । अनल्पार्थे विकल्पोऽयम् । अल्पार्थे तु पूर्वेण नित्यमेव । तत्रापि विकल्प एवेति कश्चित् । ईषत्पुरुष —कापुरुष , कुपुरुष ।

१०८. कवञ्चोष्णे ।

विकल्पोऽनुवर्तते चकारात् का च । उष्णशब्दे उत्तरपदे कुशब्दस्य कव, का—इत्येतावादेशौ वा भवतः । ईषत्कुत्सित वा उष्ण कवोष्णं, कोष्णम् । पक्षे यथाप्राप्तम् । तत्पुरुषे—कदुष्णम् । बहुव्रीहौ—कूष्णो देश । अन्यस्त्वग्नावपीच्छति । काग्नि, कवाग्नि., कदग्नि. ।

१०९. हृदयस्य हृद्याण्लेखलासेषु ।

हृदयशब्दस्य हृद् इत्यादेशो भवति ये अणि च प्रत्यये लेख, लास इत्येतयोश्च परयो । य—हृदयस्य प्रियः हृद्यः । हृदयस्य बन्धनो मन्त्र. हृद्य. । हृदये भव, हृदयाय हित—हृद्यम् । अण्—हृदयस्येद हार्दम् । सौहार्द, दौर्हार्दम् । लेख—हृदयं लिखतीति हृल्लेख । अण्सन्निधानाल्लेखशब्दोऽणन्तो गृह्यते, तेन घञन्ते न भवति । हृदयस्य लेखः हृदयलेखः । लास—हृदयस्य लास हृल्लास । अणीत्येव सिद्धे लेखग्रहणं ज्ञापकं **उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तग्रहणं न भवति । 'स्त्रियनव्यय…'** [३/२/१३६] इत्यादौ तु असम्भवात्तदन्तग्रहणम् । हृदयशब्दसमानार्थेन हृच्छब्देनैव सिद्धे हृदादेशविधानमत्र हृदयशब्दप्रयोगनिवृत्तिं सूचयति । अन्यत्र तु हृदय हृच्चोभय प्रयुज्यते । हृच्छोक, हृदयशोकः । हृद्रोगः, हृदयरोग । हृद्दाह , हृदयदाहः । हृत्कमल, हृदयकमलम् । सौहार्द्य, सौहृदय्यमित्यादि ।

---

१ न **'कोः कत्तत्पुरुषे'** [३/२/१०२] इति कदादेश इत्यर्थ. ।

११०. पदः पादस्याज्यातिगोपहतेषु ।

पादशब्दस्य पद इत्यादेशो भवति आज्यादिषूत्तरपदेषु । पादाभ्यामजति अतति चेति औणादिके इणि पदाजिः, पदातिः । अत एव निर्देशात् अजेर्वी न भवति । पादाभ्यां गच्छति—पदगः । पादाभ्यामुपहतः—पदोपहतः । पादशब्द-समानार्थः पदशब्दोऽस्ति, आदेशविधानमिह पादशब्दप्रयोगनिवृत्त्यर्थम् । कथं दिग्धश्चासौ पादश्च दिग्धपादः, तेनोपहतः—दिग्धपादोपहतः ? उच्यते—न चात्र पादशब्दः पूर्वपदं, किंतु दिग्धपादः, तेनात्र न भवति ।

१११. हिमकाषिहतियेषु पद् ।

हिमादिषूत्तरपदेषु पादशब्दसंबन्धिनि ये च प्रत्यये पादशब्दस्य पदित्ययमादेशो भवति । पादयोर्हिम—पद्धिमम् । पादौ कषतीत्येवंशीलः, पुनः पुनः पादौ कषति, पादाभ्यां साधु कषतीति वा पत्काषी । परमश्चासौ पत्काषी च परमपत्काषी । यदा च परमौ च तौ पादौ च परमपादौ तत्कषणशीलादिर्विवक्ष्यते तदा पादशब्दस्य पूर्वपदत्वाऽभावात् परमपादकाषीत्येव भवति । पादाभ्यां हतिः—पद्धतिः । य—पादौ विध्यन्ति पद्याः शर्कराः । पादयोर्भवाः—पद्याः पांशवः । पादाभ्यां हितं—पद्यं घृतम् । कथं पादार्थमुदकं पाद्यम् ? **'पाद्यार्घ्ये'** [७/३/२३] इति निपातनाद् भविष्यति । पादशब्दसंबन्धिनि य इति किम् ? द्विगुसमाससंबन्धिनि मा भूत् । द्वाभ्यां पादाभ्यां क्रीतं—द्विपाद्यम् । एवं त्रिपाद्यं, अध्यर्धपाद्यम् । **'पणपाद-माषाद्यः'**[1] [७/२/१०१] इति यः । यद्वा आज्यादिषु साधनभावः प्राण्यङ्गस्यैवेति पूर्वत्र पादशब्दः प्राण्यङ्गवचनः स एव चेहानुवर्तते इति परिमाणार्थस्य न भवति । अन्ये तु गोपहतयोरपीच्छन्ति । पादाभ्यां गच्छति—पद्गः । पादाभ्यामुपहतः—पदुपहतः । कथं हस्तिपादस्याऽपत्यं हास्तिपद इत्यत्राऽपत्याणि[2] पद्भावः ? **'कौपिञ्जलहास्तिपदादण्'** [७/१/१२८] इति निर्देशाद् भविष्यति । पादाभ्यां चरति पदिकः इति तु **'पदिकः'** [७/२/१४] इति निपातनात् ।

११२. ऋचस्तद्धितशसि ।

ऋचः संबन्धिनः पादशब्दस्य पदित्यादेशो भवति तद्धितशसि परे । पादं पादं गायत्र्याः शंसति—पच्छो गायत्रीं शंसति । वाक्यगम्यस्य गायत्र्याः पादसंबन्धस्य वृत्तौ निवृत्तत्वात् स्वाभाविकं शंसनक्रियापेक्षं कर्मत्वं भवति । ऋच इति किम् ? पादं पादं कार्षापणस्य ददाति—पादशः कार्षापणं ददाति । एवं पादशः श्लोकं व्याचष्टे । तद्धितग्रहणं किम् ? ऋचः पादान् पश्य । अत्र विभक्तिशसि न भवति ।

११३. शब्द-निष्क-घोष-मिश्रेषु वा ।

शब्दादिषूत्तरपदेषु पादशब्दस्य पदित्यादेशो वा भवति । पादयोः शब्दः—पच्छब्दः, पादशब्दः । एवं पन्निष्कः, पादनिष्कः । पद्घोषः, पादघोषः । पादाभ्यां मिश्रः—पन्मिश्रः, पादमिश्रः ।

११४. उदकस्योदः पेषं-धि-वास-वाहनेषु ।

उदकशब्दस्य पेषमादिषूत्तरपदेषु उद इत्यादेशो भवति । उदकेन पिनष्टि—उदपेषं पिनष्टि तगरम् । उदकं धीयतेऽस्मिन्निति उदधिः घटः । उदकस्य वासः—उदवासः । एवमुदवाहनः[3] । असंज्ञार्थं वचनम् । संज्ञायां तु उत्तरेणैव सिद्धम् ।

११५. एकहसे भाण्डे वा ।

एको हसः आदौ यस्य तस्मिन् भाण्डवाचिन्युत्तरपदे परे उदकशब्दस्य उद इत्यादेशो वा भवति । उदकुम्भः,

---

१ अत्र सूत्रे पणमाषसाहचर्यात् पादशब्दः परिमाणार्थ एव गृह्यते न प्राण्यङ्गवचन इति ।

२. अत एव निर्देशाद् **'अत इञ्'** [६/२/३४] इतीञं बाधित्वा **'तस्यापत्ये'** [६/२/३१] इत्यण् प्रत्ययो भवति ।

३. उदकं वाहनमस्येति कार्यम् ।

उदककुम्भ । उदघटः, उदकघटः । उदपात्रं, उदकपात्रम् । हमे इति किम् ? उदकाऽमत्रम् । एकेति किम् ? उदकस्थालम् । भाण्ड इति किम् ? उदकपर्वत , उदकदेश. ।

११६. मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहेषु ।

पूर्वमनुवर्तते । मन्थादिषूत्तरपदेषु उदकशब्दस्य उद इत्यादेशो वा भवति । उदमन्थः, उदकमन्थ । उदौदनः, उदकौदन । उदसक्तु , उदकसक्तु । उदबिन्दु , उदकबिन्दु । उदवज्र , उदकवज्र । उदभारः, उदकभारः । उदहारः, उदकहारः । उदवीवधः, उदकवीवध. । उदगाह., उदकगाह । अभाण्डार्थो यत्न ।

११७. संज्ञायामुत्तरपदस्य च ।

उदकशब्दस्य पूर्वपदस्योत्तरपदस्य च उद इत्यादेशो भवति संज्ञायां विषये । उदमेघो नाम यस्यौदमेघिः पुत्रः । उदवाहो नाम यस्यौदवाहिः पुत्र । उदपान—निपानम् । उदधि —समुद्र । उत्तरपदस्य—लवणोद., क्षीरोद., कालोद । एवंनामान समुद्रा । लोहितोदा, क्षीरोदा नाम नदी । अच्छोद, सितोद, अरुणोद, लोहितोदम् । एवंनामानि सरांसि ।

११८. तयोर्लोपो वा ।

तयो पूर्वोत्तरपदयोर्लोपो वा भवति सञ्ज्ञाया विषये । देवदत्त , देव , दत्त । सत्यभामा, सत्या, भामा । शब्दसाम्येऽपि[1] प्रकरणादे अर्थविशेषनिश्चय ।

११९. नस् नासिकायास्तस्क्षुद्रयोः ।

नासिकाशब्दस्य नस् इत्यादेशो भवति तस्प्रत्यये क्षुद्रशब्दे चोत्तरपदे परे । नासिकाया नस्त । नासिकायां नासिकया वा क्षुद्र —नःक्षुद्र ।

१२०. येऽवर्णे ।

नासिकाशब्दस्य यप्रत्यये वर्णादन्यस्मिन्नभिधेये नस् इत्यादेशो भवति । नासिकायै हितं तत्र भवं वा नस्यम् । य इति किम् ? नासिक्य नगरम् । सुपन्थ्यादित्वाच्चातुरर्थिको ञ्य । **निरनुबन्धग्रहणे न सानुबन्धकस्य ग्रहणं भवति ।** अवर्णे इति किम् ? नासिक्यो वर्ण ।

१२१. शिरसः शीर्षन् ।

यप्रत्यये परे शिरस्शब्दस्य शीर्षन् इत्यादेशो भवति । शिरसि भव —शीर्षण्य स्वर. । एवं शीर्षण्यो व्रण । शिरसे हितं —शीर्षण्य तैलम् । य इति किम् ? शिरस्त., सशिरस्क. । **निरनुबन्धग्रहणे न सानुबन्धकस्येति** नेह—शिर इच्छति—शिरस्यति । इह स एव य प्रत्ययो गृह्यते य. शरीरावयवत्वात् शिरसो विहितस्तेन शाखादिगणे वर्तमानस्य शिरस शीर्षन्न भवति ।

१२२. केशे वा ।

शिरस केशविषये यप्रत्यये परे शीर्षन्नादेशो वा भवति । शिरसि भवा —शीर्षण्या शिरस्या वा केशा । केचित्तु **'इल्वला मृगशीर्षस्य शिरस्यास्तारकाः स्मृताः'** इति प्रयोगदर्शनात् केशादन्यत्रापि विकल्पमिच्छन्ति ।

१२३. शीर्षस्तद्धिते स्वरे ।

शिरस्शब्दस्य स्वरादौ तद्धिते परे शीर्ष इत्यादेशो भवति । हस्तिशिरसोऽपत्य—हास्तिशीर्षि । एवं

---

१ ननु पूर्वपदस्योत्तरपदस्य वा लोपे य समुदायमनुवर्तते देवादिशब्दः स देवदत्तार्थेन च त्रिदशार्थेन च समान इति कथं निश्चयो भवति अय देवदत्तार्थ एव न तु त्रिदशार्थ इत्याह ।

स्थौलशीर्षि:, पैलुशीर्षि.। मृगशिरसा चन्द्रयुक्तेन युक्ता मार्गशीर्षी पौर्णमासी। स्थूलशिरस इद—स्थौलशीर्षम्। शिरसि कृतं—शीर्षम्। शिरसा तरति—शीर्षिक.। तद्धित इति किम्? शिरसा। स्थूलशिरसमाचष्टे—स्थूलशिरयति। स्वर इति किम्? शिरस्कल्प:। कथमित्वला मृगशीर्षस्येति? शीर्षशब्द: प्रकृत्यन्तरमस्ति। शीर्षच्छेद्य परिच्छिद्येति। अनेनैव च सिद्धे उक्तविषये शिरस. प्रयोगनिवृत्त्यर्थं वचनम्।

१२४. सहस्य सो वा बहुव्रीहौ।

बहुव्रीहिसमासे उत्तरपदे परे सहशब्दस्य स इत्ययमादेशो वा भवति। सह पुत्रेण—सपुत्र आगत:, सहपुत्र आगत:। एव सशिष्य:, सहशिष्य. आगत। सह लोम्ना वर्तते—सलोमक, सहलोमक। विद्यमानलोमक इत्यर्थ:। बहुव्रीहाविति किम्? सहयुध्वा, सहकृत्वा, सहकारी, सहज। कथ सहकृत्वा प्रियोऽस्य सहकृत्वप्रिय, प्रिय. सहकृत्वाऽस्य प्रियसहकृत्वेति? बहुव्रीहौ यदुत्तरपदं तस्मात्पूर्व. सहशब्दो न भवतीति सादेशो न भवति।

१२५. संज्ञायाम्।

नित्यार्थमारम्भ। बहुव्रीहिसमासे संज्ञाया विषये उत्तरपदे परे सहशब्दस्य सादेशो भवति। सहाश्वत्थेन वर्तते—साश्वत्थम्। सपलाश, सशिशपम्। एवनामानि वनानि। सह रसेन—सरसा दूर्वा। बहुव्रीहाविति किम्? सह चरतीति सहचर: कुरण्टक.। सह दीव्यतीति सहदेव कुरु। सहदेवा औषधि.। सह जायते—सहजन्या अप्सरा[1]।

१२६. अदृश्याऽधिकयो:।

अदृश्यं—परोक्षम्। अधिकमधिरूढम्। अदृश्याधिकवाचिनोरुत्तरपदयो: परयो सहस्य सो भवति बहुव्रीहिसमासे। अदृश्ये—साग्नि कपोत। सपिशाचा वात्या। सराक्षसीका विद्युत्। समुसलो व्रीहिकस[2]। अधिके—सद्रोणा खारी। समाष. कार्षापण.। सकाकणीको माष। 'सहस्य सो वा बहुव्रीहौ' [३/२/१२४] इत्यनेनैव सिद्धे नित्यार्थं वचनम्।

१२७. अकालेऽव्ययीभावे।

अव्ययीभावसमासे सहशब्दस्य अकालवाचिन्युत्तरपदे सादेशो भवति। ब्रह्मण: सपत् सब्रह्म साधूनाम्। एवं सवृत्तं सुविहितानाम्। सक्षत्रं यदूनाम्। संपत्तावव्ययीभाव। युगपच्चक्रेण चक्राणि वा धेहि सचक्रं धेहि। एव सधुरं प्राज:। यौगपद्येऽव्ययीभाव। तृणै: सह सतृणमभ्यवहरति। एवं समूलघातं हन्ति। साकल्येऽव्ययीभाव:। षड्जीवनिकामन्तमवसानं कृत्वाऽधीते सषड्जीवनिकमधीते साधु:। एवं सलोकबिन्दुसारमधीते पूर्वधर.। अन्त इत्यव्ययीभाव। अकाले इति किम्? सहपूर्वाह्ण शेते। सहापराह्णं भुङ्क्ते। अयमपि साकल्येऽव्ययीभाव.। अव्ययीभावे इति किम्? सहयुध्वा।

१२८. ग्रन्थान्ते।

ग्रन्थस्यान्तो ग्रन्थान्त:। तद्वाचिन्युत्तरपदेऽव्ययीभावे समासे सहशब्दस्य सादेशो भवति। कलामन्तं कृत्वा सकल ज्यौतिषमधीते। एव सकाष्ठ, समुहूर्तम्। कलादिशब्दा कालविशेषवाचिनोऽपि तत्सहचारिषु ग्रन्थेषु वर्तन्ते इति ग्रन्थान्तवाचित्वमुत्तरपदस्य। अन्त इत्यव्ययीभाव:। कालार्थ आरम्भ:।

१२९. नाशिष्यगोवत्सहलेषु।

आशिषि गम्यमानायां गवादिवर्जितेषूत्तरपदेषु सहशब्दस्य सादेशो न भवति। स्वस्ति राज्ञे सहराष्ट्राय।

---

१. वा बहुवचनान्त: स्त्रीलिङ्गोऽप्यम्।

२. कस इति खार्यादिवत् मानविशेषस्य नाम तत्परिमाणपरिच्छिन्नव्रीहिमध्यगतस्य मुसलस्य आवृतत्वाद् अदृश्यता।

स्वस्ति गुरवे सहशिष्याय। भद्रं सहसखायाचार्याय। आशिषीति किम् ? सपुत्रः, सहपुत्रः आगतः। अगोवत्सहलेष्विति किम् ? स्वस्ति भवते सगवे, सहगवे। सवत्साय, सहवत्साय। सहलाय, सहहलाय।

१३०. पक्षादिषु समानस्य।

समानशब्दस्य पक्षादिपूत्तरपदेषु सादेशो भवति। समानः पक्षोऽस्य समानः पक्षो वा सपक्षः। सजनपदः। कथं समानोदरे जातः सोदर्यः, समाने तीर्थे वसति सतीर्थ्य इति ? **'सोदर्यसमानोदर्यौ'** [७/१/८] इति **'सतीर्थ्यः'** [७/२/८३] इति च निपातनाद् भविष्यति। पक्षादयो यथा—पक्ष, ज्योतिष्, जनपद, रात्रि, नाभि, बन्धु, गन्ध, पिण्ड, देश, कर, लोहित, कुक्षि, वेणि इत्याकृतिगणोऽयम्।

१३१. नाम-गोत्र-रूप-स्थान-वर्ण-वयो-वचन-धर्म-जातीयेषु वा।

नामादिपूत्तरपदेषु समानशब्दस्य सादेशो वा भवति। समानं नामास्य सनामा, समाननामा। एवं सगोत्रः, समानगोत्रः। सरूपः, समानरूपः। सस्थानः, समानस्थानः। सवर्णः, समानवर्णः। सवयाः, समानवयाः। सवचनं, समानवचनम्। सधर्मः, समानधर्मः। सजातीयः, समानजातीयः। **'हैमस्तु'** [३/२/१४६] अत्रापि नित्यमेवेच्छति। कश्चित्तु पक्षशब्देऽपि विकल्पमिच्छति। सपक्षः, समानपक्षः।

१३२. सब्रह्मचारी।

सब्रह्मचारीति निपात्यते। समानो ब्रह्मचारी समाने ब्रह्मण्यागमे गुरुकुले वा व्रतं चरतीति सब्रह्मचारी। निपातनादेव व्रतशब्दस्यापि लोपः।

१३३. दृग्दृशदृक्षेषु।

दृग्, दृश, दृक्ष,—इत्येतेषूत्तरपदेषु समानशब्दस्य सादेशो भवति। समान इव दृश्यते—सदृक्, सदृशः, सदृक्षः। दृशदृक्षसाहचर्यात् टक्सक्प्रत्ययसहचरितक्विबन्तस्यैव दृशो ग्रहणादिह न भवति। समाना दृक् समानदृक्।

१३४. अन्यत्यदादेराः।

अन्यशब्दस्य त्यदादेश्च दृग्दृशदृक्षेषूत्तरपदेषु आकारोऽन्तादेशो भवति। अन्य इव दृश्यते—अन्यादृक्, अन्यादृशः, अन्यादृक्षः। एवं त्यादृक्, त्यादृशः, त्यादृक्षः। तादृक्, तादृशः, तादृक्षः। यादृक्, यादृशः, यादृक्षः। अमूदृक्, अमूदृशः, अमूदृक्षः। अनेनात्वे **'मादुवर्णोऽनु'** [२/१/८१] इति दीर्घ उकारः। भवादृक्, भवादृशः, भवादृक्षः। त्वादृक्, त्वादृशः, त्वादृक्षः। मादृक्, मादृशः, मादृक्षः। एकादृक्, एकादृशः, एकादृक्षः। द्वादृक्, द्वादृशः, द्वादृक्षः। युष्मादृक्, युष्मादृशः, युष्मादृक्षः। अस्मादृक्, अस्मादृशः, अस्मादृक्षः।

१३५. किमिदमोः कीशीशौ।

किं, इदं—इत्येतयोर्यथासंख्यं कीश्, ईश्—इत्येतावादेशौ भवतः दृग्दृशदृक्षेषु परेषु। शिदनेकवर्णः सर्वस्य। क इव दृश्यते—कीदृक्, कीदृशः, कीदृक्षः। अयमिव दृश्यते—ईदृक्, ईदृशः, ईदृक्षः।

१३६. अनञः क्त्वो यप्।

नञ्वर्जितादव्ययात्पूर्वपदात् यत्परमुत्तरपदं तदवयवस्य क्त्वाप्रत्ययस्य यबादेशो भवति। प्रकृत्य, प्रहृत्य, उच्चैःकृत्य, नानाकृत्य। अनञ इति किम् ? अकृत्वा, अहृत्वा, परमकृत्वा। अनञ इति नञ्सदृशमव्ययं गृह्यते इति इह नञोऽनव्ययाच्च न भवति। उत्तरपदस्येति किम् ? अलं कृत्वा, खलु कृत्वा।

१३७. सर्वादिविष्वग्देवाना टेरद्रयञ्चतौ क्वौ।

सर्वादीनां विष्वग्, देव—इत्येतयोश्च टेः अद्रि इत्यादेशो भवति क्विबन्ते अञ्चतौ परे। सर्वमञ्चतीति

सर्वद्र्यङ् । सर्वद्र्यञ्चौ, सर्वद्र्यञ्च , सर्वद्रीच , सर्वद्रीचा, सर्वद्रीची । एव तद्र्यङ्, तद्र्यञ्चौ, तद्र्यञ्च , तद्रीच , तद्रीचा, तद्रीची । अदद्र्यङ्, अदद्र्यञ्चौ, अदद्र्यञ्च , अदद्रीच , अदद्रीचा, अदद्रीची । कद्र्यङ्, कद्र्यञ्चौ, कद्र्यञ्च , कद्रीच , कद्रीचा । द्वद्र्यङ्, द्वद्र्यञ्चौ, द्वद्र्यञ्च । विष्वगित्यव्ययम् । विष्वगञ्चतीति विष्वद्र्यङ् । विष्वद्र्यञ्चौ, विष्वद्र्यञ्च , विष्वद्रीच , विष्वद्रीचा, विष्वद्रीची । देवानञ्चतीति देवद्र्यङ् । देवद्र्यञ्चौ, देवद्र्यञ्च , देवद्रीच , देवद्रीचा, देवद्रीची । सर्वादिविष्वग्देवानामिति किम् ? अश्वमञ्चतीति अश्वाची । अञ्चताविति किम ? विश्वयुक्, विष्वग्युक्, देवयुक् । क्वाविति किम् ? विष्वगञ्चनम् ।

१३८. सहसम्तिरसां सध्रिसमितिरयः ।

सह, सम्, तिरस्—इत्येतेषां यथासङ्ख्यं सध्रि, समि, तिरि—इत्येते आदेशा भवन्ति क्विबन्तेऽञ्चतौ परे । सहाञ्चतीति सध्र्यङ् । सध्र्यञ्चौ, सध्र्यञ्च , सध्रीच , सध्रीचा, सध्रीची, सध्रीचीन[1] । समञ्चतीति सम्यङ् । सम्यञ्चौ, सम्यञ्च , समीच , समीचा, समीची, समीचीन । तिरोऽञ्चतीति तिर्यङ् । तिर्यञ्चौ, तिर्यञ्च । शसि तु तिरश्चादेश — तिरश्च । सहसम्तिरसामिति किम् ? प्राङ्, प्राञ्चौ । अञ्चताविति किम् ? सहयुक्, सयुक् । क्वाविति किम् ? सहाञ्चन, समञ्चनम् ।

१३९. खित्यऽनव्ययस्वरान्तारुषां मुम् ह्रस्वश्च ।

अव्ययवर्जितस्य स्वरान्तस्य अरुषश्च मुमागमो भवति यथाप्राप्त ह्रस्वश्च खिति परे । कालिमन्या, हरिणिमन्या । परत्वात्पुवद्भावो ह्रस्वत्वेन बाध्यते । पण्डितमन्य , खट्वमन्य , महमन्य[2], रात्रिमन्यमह , वधुमन्य , खलपुंमन्य , ग्रामणिमन्य , क्षेमंकर , मेघकर , प्रियवद , वशवद , मुभगकरण, विहगम , मितगम , पतङ्ग । अरुतुद । खितीति किम् ? पण्डितमानी, शुभमानी । अव्ययवर्जन किम् ? दोषामन्यमह , दिवामन्या रात्रि । स्वरान्तेति किम् ? गीर्मन्य , विद्वन्मन्या ।

१४०. सत्यागदास्तूनां कारे ।

सत्य, अगद, अस्तु—इत्येतेषां मुमागमो भवति कारशब्दे परे । सत्य करोति सत्यस्य वा कार —सत्यंकार । एवमगदंकार , अस्तुंकार । अस्त्विति निपात क्रियाप्रतिरूपकोऽभ्युपगमे वर्तते ।

१४१. लोकंपृणानभ्याशमित्यमध्यंदिनानि ।

लोकंपृण, अनभ्याशमित्य, मध्यंदिन—इत्येते शब्दा कृतपूर्वपदमुमागमान्ता निपात्यन्ते । लोक पृणाति लोकस्य वा पृण — लोकंपृण । अश्नोतेर्घञ्यभ्याश इति रूपम् । अनभ्याश दूरमित्य गन्तव्यमस्यानभ्याशमित्य । दूरत परिहर्तव्य । अनभ्याशेनेत्योऽनभ्याशमित्य इति वा दूरेण प्राप्यो न त्वन्तिकेनेत्यर्थ । मध्यं दिनस्य मध्य च तद्दिन चेति वा मध्यंदिनम् । अन्ये तु प्रीणातेर्ण्यन्तस्य अचि ह्रस्वत्व निपात्य लोकंप्रिण लोकप्रीणक इत्यर्थ इत्युदाहरन्ति । कश्चित्त्वकृतह्रस्वत्वमेव मन्यते लोकंप्रीण ।

१४२. भ्राष्ट्राग्न्योरिन्धे ।

भ्राष्ट्र, अग्नि—इत्येतयोरिन्धशब्दे परे मुमागमो भवति । भ्राष्ट्रस्येन्ध —भ्राष्ट्रमिन्ध । एवमग्निमिन्ध ।

१४३. भद्रोष्णयोः करणे ।

भद्र, उष्ण—इत्येतयोः करणशब्दे परे मुमागमो भवति । भद्रस्य करणं—भद्रंकरणम् । एवमुष्णंकरणम् ।

---

१ **'अच्युत्स्त्रियां वाञ्चः'** [७/३/१०८] इति ईनप्रत्यय ।

२. महच्छब्दपर्यायोऽत्र महशब्द ।

१४४. गिलगिलमिलश्चेरऽगिलस्य ।

गिलवर्जितस्य अन्यस्य मुमागमो भवति गिल, गिलगिल—इत्येतयोः परयो.। बाल गिलतीति बालंगिलो राक्षस । तिमिंगिल , मत्स्यगिल , अपत्यगिला शिशुमारी। तिमीना गिलगिल —तिमिंगिलगिल.। गिलगिलशब्दे गिलशब्दो नोत्तरपदमिति गिलगिलोपादानम्। गिलशब्दस्य स्वरान्तस्य निषेधेन स्वरान्तस्यैव विधिस्तेन हसान्तस्य न भवति। धूर्गिल । अगिलस्येति किम् ? तिमिंगिल गिलति — तिमिगिलगिल । गिलं गिलति गिलगिल. इत्यत्र गिलगिलेति निर्देशादेव मुमागमो न भवति। अगिलस्येति तु निषेधो गिलान्तस्यापि निवृत्त्यर्थ.।

१४५. वाऽखित्कृदन्ते रात्रेः।

रात्रिशब्दस्य खिद्वर्जिते कृदन्ते उत्तरपदे मुमागमो वा भवति। रात्रौ चरति—रात्रिंचर , रात्रिचर । रात्रिंचरी, रात्रिचरी। रात्रावट —रात्रिमट., राज्यट । रात्रे करण —रात्रिंकरण, रात्रिकरणम्। खिद्वर्जन किम् ? रात्रिमन्यमह । 'खित्यनव्यय…' [३/२/१३६] इत्यादिना नित्यमेव भवति। कृदन्त इति किम् ? रात्रिसुखम्। अव्युत्पन्नोऽय सुखशब्द । अन्तग्रहण किम् ? रात्रिरिवाचरति क्विप् लोप तृच्—रात्रयिता। इदमेवान्तग्रहण ज्ञापक **इहोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणं न तदन्तस्य।** तेन **'कालात्तरतमतनकालेषु'** [३/२/२४] इत्यादौ प्रत्ययस्यैव ग्रहण सिद्धम्। **'नाम्येकस्वरादमः खिति'** [३/२/६] इत्यादौ त्वसभवात् तदन्तग्रहणम् ।

१४६. धेनोर्भव्यायाम् ।

धेनुशब्दस्य भव्याशब्दे उत्तरपदे मुमागमो वा भवति। धेनुश्चासौ भव्या च धेनुंभव्या[1], धेनुभव्या। केचित्तु नित्यमिच्छन्ति।

१४७. कृत्येऽवश्यमो लोपः।

कृत्यप्रत्ययान्ते उत्तरपदे अवश्यम्शब्दस्य अन्तस्य लोपो भवति। अवश्यकार्य, अवश्यस्तुत्य, अवश्यदेय, अवश्यकर्तव्य, अवश्यकरणीयम्। कृत्य इति किम् ? अवश्यलावक ।

१४८. समो हिततततयोर्वा ।

हिते तते च उत्तरपदे परे सम्शब्दस्यान्तस्य लोपो वा भवति। सहित, संहितम् । सतत, संततम्।

१४९. काममनसोस्तुमश्च ।

सम इत्यनुवर्तते। तुम्प्रत्ययान्तस्य सम्शब्दस्य चान्तस्य लोपो भवति काममनसोरुत्तरपदयो परयो । गन्तुं कामोऽस्य गन्तुकाम । भोक्तुमना । सम्यक् कामोऽस्य सकाम । समना । सहशब्देनापि सिद्धो सम श्रुतिनिवृत्त्यर्थं वचनम् ।

१५०. मांसस्य पच्यऽनड्घञि वा ।

मांसशब्दस्य अनडन्ते घञन्ते च पचावुत्तरपदे परे अन्तस्य लोपो वा भवति। मासस्य पचन—मास्पचनं, मासपचनम्। मांस्पचनी, मासपचनी। मांसस्य पाक —मांस्पाकः, मासपाकः। अनड्घञीति किम् ? मासपक्ति.। पचाविति किम् ? मांसदहन, मासदाह ।

१५१. अवाप्योस्तंसनद्धादिष्वादेः[2] ।

तंसादौ नद्धादौ च परतो यथासंख्य अव, अपि—इत्येतयोरादेर्लोपो वा भवति। वतस , अवतस.। पिनद्धं,

---

१. धेनोर्विशेषणत्वेन विवक्षितत्वात् विशेष्यत्वेऽपि वा धेनोर्भव्यायामिति भव्याशब्दस्य निर्विभक्तिकत्वेनोपादानात् धेनोः पूर्वनिपातः।

२. अस्मिन् सूत्रे वचनभेदो न यथासंख्यबाधक, आकृतिगणेषु बहुवचनस्याऽवश्यकरणीयत्वात्।

अपिनद्धम् । आदिशब्दाद्यथादर्शनम् । वगाहः, अवगाहः, पिधानं, अपिधान, वक्रय, अवक्रयः, पिहित, अपिहित, पिदधाति, अपिदधाति । पृषोदरादिप्रपञ्च एषः, तेन शिष्टप्रयोगोऽनुसरणीय ।

१५२. दिक्शब्दात्तीरस्य तारः ।

दिक्शब्दात् परस्य तीरशब्दस्य तार इत्यादेशो वा भवति । दक्षिणस्या दिश दक्षिणस्य वा देशस्य तीरं—दक्षिणतार, दक्षिणतीरम् । एवमुत्तरतार, उत्तरतीरम् । पश्चिमतार, पश्चिमतीरम् । पूर्वतार, पूर्वतीरम् । दिक्शब्दादिति किम् ? गङ्गातीरम् ।

१५३. द्व्यन्तरुपसर्गादप ईबनवर्णात् ।

द्वि, अन्तर्—इत्येताभ्यामनवर्णान्तेभ्य उपसर्गेभ्यश्च परस्य अप्शब्दस्य ईप् इत्यादेशो भवति । द्विधा गता आपोऽस्मिन्निति द्वीपम् । एवमन्तरीप, नीप, प्रतीप, समीप, अन्वीप, वीपम् । उपसर्गादिति किम् ? शोभना आपः—स्वाप । पूजिता आपः—अत्याप । स्वती पूजायां नोपसर्गौ । अत एव समासान्तो न भवति । अनवर्णादिति किम् ? प्राप, परापम् । सश्लिष्टा आगता आपोऽस्मिन् समापो देवयजनम् ।

१५४. ऊबनोर्देशे ।

अनोः परस्यापो देशेऽभिधेये ऊप् इत्यादेशो भवति । अनुगता आपोऽस्मिन् अनूपो देश. । देश इति किम् ? अन्वीप वनम् । कथ कूप, सूपः, यूप ? पृषोदरादित्वात् ।

१५५. अन्यस्य दुगीयकारके ।

ईयप्रत्यये कारकशब्दे च उत्तरपदे अन्यशब्दस्य दुगागमो भवति । अन्यस्यायमन्यदीयः । गहादित्वादीयः । अन्यस्मै हितं—अन्यदीयम् । अन्यस्यान्येन वा कारक —अन्यत्कारक । अन्य कारक —अन्यत्कारक. । अन्यत्कारिका ।

१५६. अषष्ठीतृतीयस्याशीराशास्थास्थितोत्सुकोतिरागेषु ।

अषष्ठ्यन्तस्य अतृतीयान्तस्य चाऽन्यशब्दस्य आशिष्, आशा, आस्था, आस्थित, उत्सुक, ऊति, राग—इत्येतेषूत्तरपदेषु दुगागमो भवति । अन्या आशी —अन्यदाशी । अन्या आशा —अन्यदाशा । अन्या आस्था—अन्यदास्था । अन्यमास्थितः—अन्यदास्थित । अन्यस्मिन्नुत्सुक —अन्यदुत्सुक । अन्या ऊति —अन्यदूति । अन्यत्र राग —अन्यद्राग. । अषष्ठीतृतीयस्येति किम् ? अन्यस्याशी.—अन्याशी । अन्येनास्थित —अन्यास्थित. ।

१५७. अर्थे वा ।

पूर्वमनुवर्तते । अषष्ठ्यन्तस्य अतृतीयान्तस्य च अन्यशब्दस्य अर्थशब्दे परे दुगागमो वा भवति । अन्यश्चासौ अर्थश्च, अन्योऽर्थोऽस्येति वा अन्यदर्थ , अन्यार्थ । अन्यस्मै इद—अन्यदर्थं, अन्यार्थम् । अन्यस्मिन्नर्थ —अन्यदर्थः, अन्यार्थः । अषष्ठीतृतीयस्येति किम् ? अन्यस्यार्थ —अन्यार्थ । अन्येनार्थ —अन्यार्थ ।

१५८. पृषोदरादयः ।

पृषोदर इत्येवप्रकारा शब्दा विहितलोपागमवर्णविकाराः शिष्टैः प्रयुज्यमानाः साधवो भवन्ति । पृषद्दुदरमुदरे वास्य पृषोदर । पृषत उदर—पृषोदरम् । पृषत उद्वान—पृषोद्वानम् । एव पृषोद्धारम् । अत्र तकारलोपो निपात्यते । जीवनस्य—जलस्य मूत —पुटबन्धः—जीमूत । अत्र वनस्य लोप. । वारिणो वाहक —बलाहक । अत्र पूर्वपदस्य बः उत्तरपदादेश्च लः आदेश । आध्यायन्ति तमिति आढय । अत्र ध्यस्य ढयादेश. । कृच्छ्रेण दास्यते नास्यते दम्यते च खलि, दुष्टो दासो नासो दम्भ इति वा दूडासः, दूणास , दूडभः । दुष्ट ध्यायति—दूढय । एषु पूर्वपदस्य दुसो दूभावः उत्तरपदादेश्च डत्वणत्वढत्वानि दम्भेर्नलोपश्च । मह्या रौति—मयूर । रौतेरच्यन्तलोप. महीशब्दस्य मयूभाव । मह्यां शेते—महिषः ।

ड: । अत्र पूर्वपदस्य ह्रस्वत्वं शस्य च षत्वम् । पिशितमश्नाति—पिशाचः । अत्र पिशितस्य पिशादेशः अश्नातेः शस्य चादेशः । शवानां शयनं—श्मशानम् । पूर्वपदस्य श्मादेशः उत्तरपदस्य च शानादेशः । ब्रुवन्तोऽस्यां सीदन्ति विषीदन्तीति वृसी । अत्र डट् प्रत्ययः । पूर्वपदस्य वृभावः । ऊर्ध्वं खं बिलं वास्य उदूखलं, उलूखलं वा । अत्र पूर्वपदस्योदूभावः उलूभावश्च उत्तरपदस्य खलादेशः । दिवि द्यौर्वौक एषां— दिवौकसः । अत्राऽकारागमः । अश्व इव तिष्ठति — अश्वत्थः । कपिरिव तिष्ठति कपयोऽस्मिंस्तिष्ठन्ति इति वा कपित्थः । दधिन तिष्ठति—दधित्थः । मह्यां तिष्ठति—महित्थः । एषु तिष्ठतेः सकारस्य तकारः । मुहुः स्वनं लाति मुहुर्मुहुर्लसतीति वा मुसलम् । अत्र मुहुःशब्दस्य मुभावः, स्वनशब्दस्य सभावः । पक्षान्तरे लसयोर्विपर्ययश्च । ऊर्ध्वौ कर्णावस्येत्युलूकः । अत्र ऊर्ध्वशब्दस्य उलादेशः कर्णशब्दस्य ऊकादेशश्च । मेहनस्य ख मेहनखं, तस्य माला मेखला । अत्र मेहनखे हनस्य मालाशब्दे च माशब्दस्य लोपः । कौ जीर्यति कुञ्जरः । अत्र कुशब्दस्य मुगागमः । आश्वस्य विषमस्ति — आशीविषः । अत्राशुशब्दस्याशीभावः । बलं वर्धयति—बलीवर्दः । अत्र बलस्य ईकारोऽन्तादेशो वर्धधकारस्य च दकारः । बिलं दारयति — बिडालः । अत्र बिलशब्दस्य ललोपः, उत्तरपदस्य डालादेशः । मृदमालीयते, डः— मृणालः । अत्र मृदो दकारस्य णकारः । असृगालीयते, डः—सृगालः । अत्रादेर्लोपः । असृग्गलति वा सृगालः । अत्रासृज आद्यन्तलोपः सस्य च शो वा—शृगालः । पुरो दाश्यते –पुरोडाशः । अत्रोत्तरपदादेर्डत्वम् । अश्वस्याऽम्बा—वडवा । अत्राश्वस्याऽशो लोपः डुगागमश्च अम्बाशब्दे च मो लोपो बकारस्य च वकारः । अव अवाक् अटन्त्यस्मिन्निति बाहुलकात् **'पुंसि संज्ञायां घः'** [६/१/६] इति घः, अवस्याऽन्त्याकारलोपश्च—अवटः । हिनस्तीति सिंहः । अत्र सकारहकारयोर्विपर्ययः । कृतकेन सरति—कृकलासः । अत्र तकारस्य लोपः, सकारलकारयोस्तु विपर्ययः । भ्रमन् रौति, डः—भ्रमरः । अत्र नलोपः । एवंप्रकारा शिष्टैः प्रयुक्ताः पृषोदरादयः । मयूरमहिषादीनां उणादौ व्युत्पादितानामपीह व्युत्पादनमनेकधा शब्दव्युत्पत्तिज्ञापनार्थम् । आकृतिगणोऽयम्, तेन मुहूर्तमारग्वधोश्वत्थामनिर्लयनीत्यादयोऽपि द्रष्टव्याः ।

वर्णागमो वर्णविपर्ययश्च,
द्वौ चाऽपरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेनयोग-
स्तदुच्यते पञ्चविधं निरुक्तम् ॥१॥

भवेद् वर्णागमाद्धंसः, सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम् ॥२॥

१५६. तस्करादयश्चौरादिषु ।

तस्करादयः शब्दाः चौरादिष्वर्थेषु साधवो भवन्ति ।

तस्करश्चौरे—तत्करोति तस्करश्चौरः । अत्र तकारस्य सकारादेशः । अन्यत्र तत्करः ।

अपरस्पराः क्रियासातत्ये— अपरस्पराः सार्था गच्छन्ति । सततं गच्छन्तीत्यर्थः । अन्यत्र अपरपराः सार्था गच्छन्ति । अपरे च परे च सकृदेव गच्छन्तीत्यर्थः । अवरस्परा वा इति कश्चित् ।

पारस्करो देशे—पारं करोतीति पारस्करो नाम देशः । अन्यत्र पारकरः ।

रथस्या नद्यां—रथं पाति पिबति वा रथस्या नाम नदी । अन्यत्र रथपा ।

किष्कुः प्रमाणे— किमपि ईषत्परिमेया कुः—भूमिः अस्य किष्कुः वितस्तिर्हस्तो वा । किं करोतीति वा किष्कुः । करोतेर्डुप्रत्ययः किमो मकारस्य च षकारः । कार्यं करोतीति वा किष्कुः । डुप्रत्ययः कार्यशब्दस्य च किष्भावः ।

किष्कुरुः प्रहरणे—कस्य कुरुः किष्कुरुर्नाम प्रहरणम् । किमो मकारस्य षकारादेशः ।

कारस्करवनस्पती वृक्षे—कारं करोति किल कारस्करो वृक्ष । कारकरोऽन्य । वनस्पतिर्वृक्षविशेष । वनपतिरन्य. । सर्वो हरितकायो वनस्पतिरिति जैना ।

करस्करो गिरिवृक्षयोः—करं करोतीति करस्करो नाम गिरिर्वृक्षो वा । करकरोऽन्य ।

किष्किन्धो गुहापर्वतयोः—किमप्यन्तर्दधाति किष्किन्धा नाम गुहा । किमो द्विर्वचनं पूर्वस्य च मकारस्य षकार । किं किं दधाति किष्किन्ध. पर्वत ।

गोष्पदं गोसेवितप्रमाणयोः—गावः पद्यन्ते यस्मिन् स गोष्पदो ग्रामसमीपादिदेश । प्रमाणे—गोष्पदमात्रं क्षेत्रम् । गोष्पदपूरं वृष्टो देव । अन्यत्र गोपदम् ।

अगोष्पदमसेविते—न विद्यते गो. पदं येषु तान्यगोष्पदानि अरण्यानि । ननु न गोष्पदमगोष्पदमित्येवाऽसेविते सिद्धे कथं पुन प्रपञ्च ? उच्यते—यत्र गावो गन्तुं क्षमा किन्तु तत्र न ताभि सेविते अगोष्पद स्यात् । यथा यत्र शुक्लगुणप्रसङ्ग स एवाऽशुक्ल इति न तु कज्जलादौ अशुक्लता गीयते । यत्र गवामत्यन्ताऽभावस्तत्राऽपि यथा स्यादित्येवमर्थं निपातनम् । न विद्यते गो पद यत्रेति त्रिपदबहुव्रीहिविवक्षायां रूपान्तरनिवृत्त्यर्थ च ।

आस्पदं प्रतिष्ठायां—आत्मयापनाय स्थान प्रतिष्ठा । आस्पदमनेन लब्धम् । अन्यत्र आ—ईषत् पदमा पदाद्वा आपदम् ।

आश्चर्यमऽद्भुते—आश्चर्य नीला द्यौः । अन्यत्र आचर्यं कर्म शोभनम् ।

अवस्करो वर्चस्के—कुत्सितं वर्चो वर्चस्कमन्नमलम् । अवकीर्यते इत्यवस्करोऽन्नमलम् । तत्सबन्धाद्देशोऽपि अवस्कर. । अन्यत्र अवकर ।

अपस्करो रथाङ्गे— अपस्करो रथावयव । अन्यत्र अपकर. ।

मस्करो वेणुदण्डयोः— मा क्रियते प्रतिषिध्यतेऽनेनेति मस्कर । मकरशब्दस्य वाऽव्युत्पन्नस्य मस्कर इति रूपम् । मस्करो वेणुर्दण्डो वा । अन्यत्र मकरो ग्राह ।

मस्करी परिव्राजके—मा करणशीलो मस्करी । स आह—मा कृषत कर्माणि शान्तिर्व श्रेयसीति । मकरिन्-शब्दस्य वा मस्करीति रूपम् । मस्करी परिव्राजक । अन्यत्र मकरीति समुद्र. ।

प्रस्कण्वहरिश्चन्द्रावृषौ—प्रगत कण्व पापमस्मादिति प्रस्कण्व ऋषि । हरिश्चन्द्र इव आह्लादको यस्य स हरिश्चन्द्र ऋषि । ऋषेरन्यत्र प्रकण्वो देश । हरिश्चन्द्रो माणवक. ।

कास्तीराजस्तुन्दास्कथानि नगरे—ईषत्तीरमस्य कास्तीरं नाम नगरम् । अजस्येव तुन्दमस्य अजस्तुन्द नाम नगरम् । आहृता कथा यस्मिन्निति आस्कथं नाम नगरम् । अन्यत्र कातीर, अजतुन्द, अकथम् ।

कुस्तुम्बुरुरोषधौ—कुत्सिता तुम्बुरुः कुस्तुम्बुरुरोषधि. । तत्फलान्यपि कुस्तुम्बुरूणि । अन्यत्र कुतुम्बुरुस्तिन्दुकवृक्षः ।

शष्कुली कृतान्ने—शष्कुली पूरिका । गौरादित्वादीप् । कृतान्नादन्यत्र शकुली मत्स्यविशेषः ।

प्रतिस्कशः प्रष्ठसहायभृत्येषु—'**ग्राममद्य प्रवक्ष्यामि भव मे त्वं प्रतिष्कशः**' । अन्यत्र प्रतिगतः कशां प्रतिकशोऽश्वः ।

बृहस्पतिर्देवतायां—बृहतां पतिर्बृहस्पतिर्देवता। अत्र तकारस्य सकारः। अन्यत्र बृहत्पतिः।

प्रायश्चित्तप्रायश्चित्ती पापशोधने—प्रकर्षेण एति आगच्छति आचारधर्मो यस्मात् स प्रायो मुनिजनः। प्रायेण चिन्त्यते स्मर्यते यत्पापशोधनं तत्प्रायश्चित्तं, प्रायश्चित्ति। बहुवचनमाकृतिगणार्थम्। तेन आचोवच-परोवरादयोऽपि द्रष्टव्याः।

१६०. शकुनौ विष्किरो वा।

विष्किर इति ससुट्को वा निपात्यते शकुनावभिधेये। विष्किरो विकिरो वा पक्षी। अन्यत्र विकिरः।

तृतीयश्चरणः

१. धातोः।

धातोरित्यधिक्रियते आ कृदन्तपरिसमाप्तेः। अत ऊर्ध्वं यान् विधीन् उपक्रमिष्याम ते धातोरेव विज्ञेयाः। धातवो भ्वादयो धातुपाठे अवलोकितव्या। **'भ्वादिर्धातुः'** [१/१/३१] इति धातुसंज्ञा।

२. वर्तमाने— तिप् तस् अन्ति— सिप् थस् थ—मिप् वस् मस्—ते आते अन्ते—से आथे ध्वे—ए वहे महे।

प्रारब्धः अपरिसमाप्तश्च कालो वर्तमान। वर्तमानेऽर्थे धातोस्तिबादय प्रत्यया भवन्ति। अस्ति, भवति, घटं करोति, ओदन पचति। जीवं न मारयति, मांसं न भक्षयति इत्यादौ नियम प्रारब्धोऽसमाप्तश्च प्रतीयते। इह अधीमहे, इह कुमारा क्रीडन्ति इत्यादौ क्रियान्तरव्यवधानेऽपि अध्ययनादिक्रियाया प्रारम्भाऽपरिसमाप्तिरस्त्येव। चैत्रो भुङ्क्ते इत्यादावपि हि क्रियान्तरव्यवधानमशक्यपरिहारम्। सोऽपि हि अवश्य भुञ्जानो हसति जल्पति पानीय वा पिबतीति। तिष्ठन्ति पर्वताः स्यन्दन्ते नद्य इत्यादौ तु स्फुटैव प्रारम्भाऽपरिसमाप्ति। कथ तर्हि तस्थु. स्थास्यन्ति गिरय इति? भूतभाविनां भरतकल्कि-प्रभृतीनां राज्ञां या क्रिया तदवच्छेदेन पर्वतादिक्रियाणामतीतत्वानागतत्वोपपत्तेर्न भूतभाविप्रत्ययानुपपत्तिदोष। एव च विद्यमानकर्तृकेभ्योऽस्त्यर्थेभ्यो धातुभ्य. सर्वे प्रत्यया भवन्ति। कूपोऽस्ति, कूपो भविष्यति, कूपो भविता, कूपोऽभूत्, कूप आसीत्, कूपो बभूव। पित्करण **'शिदपित्'** [३/४/१००] इत्यत्र विशेषणार्थम्। एव अन्यत्राऽपि पित्करणस्य प्रयोजन द्रष्टव्यम्।

३. विधिसंभावनयोः—यात् याताम् युस्—यास् यातम् यात— याम् याव याम—ईत ईयाताम् ईरन्—ईथास् ईयाथाम् ईध्वम्—ईय ईवहि ईमहि।

विधौ संभावने चाऽर्थे वर्तमानाद् धातोर्यादादय प्रत्यया भवन्ति। विधि —कर्तव्यार्थोपदेश क्रियायां प्रेरणा वा। अज्ञातज्ञापनमित्येके। संभावनं—कल्पनम्। विधौ—कटं कुर्यात्। प्राणिनो न हिंस्यात्। द्विसध्यमावश्यकं कुर्यात्। सामायिकमधीयीत। संभावने—इहासीत। इह शयीत। तत्त्वज्ञान न प्रसीदेयु। व्रत रक्षेत्। व्याकरणमधीयीय उत सिद्धान्तमधीयीय।

४. आशिषि च—तुप् ताम् अन्तु—हि तम् त—आनिप् आवप् आमप्—ताम् आताम् अन्ताम्—स्व आथाम् ध्वम्—ऐप् आवहैप् आमहैप्।

इष्टार्थस्याशंसनमाशी। आशिषि चकाराद् विधिसभावनयोश्च वर्तमानाद् धातोस्तुबादय. प्रत्यया भवन्ति। आशिषि—चिरं जीवतु भवान्। विधिसभावनयोः—कट करोतु भवान्। द्विसध्यमावश्यकं करोतु भवान्। आस्तां भवान्। प्रसीदन्तु गुरुपादा.। कश्चित्तु समर्थनायामपि तुबादय इतीच्छति। परैरशक्यस्य वस्तुनोऽध्यवसाय. समर्थना। कश्चिदाह—समुद्र शोषयितुमशक्यः। स आह—समुद्रमपि शोषयाणि, पर्वतमप्युत्पाटयानि।

५. अनद्यतनभूते— दिप् ताम् अन्—सिप् तम् त—अमिप् व म—त आताम् अन्त—थास् आथाम् ध्वम्—इ वहि महि।

अतीताया रात्रेर्यामद्वयादर्वाग् यावदागामिन्याः प्रथम यामद्वयं सोऽद्यतनस्ततोऽन्योऽनद्यतनः। अनद्यतने भूते काले वर्तमानाद् धातोर्दिबादय. प्रत्यया भवन्ति। ह्योऽभवत् तव पुत्र.। अनद्यतन इति किम्? अद्य ते पुत्रोऽभूत्। भूते इति किम्?

श्वो भविता राज्यभार. कुमारस्य।

६. **एते शिसः।**

एते तिबादय प्रागुक्ता. प्रत्ययास्ते शित्संज्ञका भवन्ति। शित्त्वाच्च शित्कार्यम्। भवति, भवेत्, भवतु, अभवत्।

७. **अबादिनान्तः।**

'अप् कर्तरि' [३/४/२०] इत्यादिविहिता अबादयो नाऽन्ता प्रत्यया. शित्संज्ञका भवन्ति। भवति, दीव्यति, तुदति, क्रीणाति। शित्संज्ञाप्रयोजन तु **'शिदपित्'** [३/४/१००] इत्यादि।

८. **भूतमात्रे — दि ताम् अन्--सि तम् त---अम् व म---त आताम् अन्त---थास् आथाम् ध्वम्--- इ वहि महि।**

भूतमात्रे काले वर्तमानाद् धातोर्द्यादय प्रत्यया भवन्ति। अनैषीत्, अकार्षीत्, अपाक्षीत्, अकृषाताम् कटौ चैत्रेण। मात्रवचनात् णबादिविषये दिबादिविषयेऽपि च भवति। रामो वनमगमत्। अजैषीत् गर्तो हूणान्।

९. **परोक्षे---णप् अतुस् उस्---थप् अथुस् अ---णप् व म---ए आते इरे---से आथे ध्वे---ए वहे महे।**

अनद्यतनभूत इत्यनुवर्तते[1]। अक्षाणा पर परोक्ष.। अत एव निर्देशात् साधु अव्युत्पन्नो वा असाक्षात्कारार्थः[2]। परोक्षेऽनद्यतनभूते वर्तमानाद् धातोर्णबादय प्रत्यया भवन्ति। यद्यपि साध्यत्वेन अनिष्पन्नत्वात्सर्वोऽपि धात्वर्थ परोक्षस्तथापि प्रत्यक्षसाधनत्वेन तत्र लोकस्य प्रत्यक्षत्वाऽभिमानोऽस्ति। यत्र स नास्ति स परोक्ष.। जघान कस वासुदेव। भरत विजिग्ये बाहुबली। धर्म दिदेश तीर्थंकर। परोक्ष इति किम्? ह्यो[3] मम पुत्रोऽभूत्। अनद्यतनभूत इति किम्? अद्य मम[4] पुत्रोऽभूत्।

१०. **आशिषि---क्यात् क्यास्ताम् क्यासुस्---क्यास् क्यास्तम् क्यास्त---क्यासम् क्यास्व क्यास्म---सीष्ट सीयास्ताम् सीरन्---सीष्ठास् सीयास्थाम् सीध्वम्---सीय सीवहि सीमहि।**

आशासनमाशी। आशिष्यर्थे वर्तमानाद् धातो क्यादादय प्रत्यया भवन्ति। चिरजीवी भूयाद् भवान्। जीयात्, जीयास्ताम्, जीयासु। आशिषीति किम्? चिर जीवति मैत्र। ककार कित्कार्यार्थः।

११. **अनद्यतनभविष्यति ता तारौ तारस्---तासि तास्थस् तास्थ---तास्मि तास्वस् तास्मस्---ता तारौ तारस्---तासे तासाथे ताध्वे---ताहे तास्वहे तास्महे।**

न विद्यतेऽद्यतनो यत्र तस्मिन् भविष्यत्यर्थे वर्तमानाद् धातोस्तादय प्रत्यया भवन्ति। श्वो भविता राज्यभार: कुमारस्य। कर्ता श्व। अनद्यतन इति बहुव्रीहि किम्? व्यामिश्रे मा भूत---अद्य श्वो वा गमिष्यति। अनद्यतनभविष्यतीति किम्? अद्य भविष्यति राज्यभार. कुमारस्य।

१२. **भविष्यति च---स्यति स्यतस् स्यन्ति---स्यसि स्यथस् स्यथ---स्यामि स्यावस् स्यामस्---स्यते स्येते स्यन्ते---स्यसे स्येथे स्यध्वे---स्ये स्यावहे स्यामहे।**

भविष्यति चकाराद् अनद्यतनभविष्यति च कालेऽर्थे वर्तमानाद् धातो: स्यत्यादय. प्रत्यया भवन्ति। गमिष्यति,

---

१ भूतमात्रेण परोक्षत्वस्याऽनभिधानादिह अनद्यतनभूत इत्येवानुवर्तते न त्वनन्तरसूत्रवर्तिभूतमात्र इति।

२ यस्य निकटवर्तिन्यपि काले क्रियासाधनानि अक्षेभ्य. पराणि भवन्ति सोऽपि परोक्ष एव। तेन अय पपाच, त्व पेचिथ---इति सिध्यति।

३ कस्याश्चिन्मातुर्वाक्यमेतत्।

४. कस्यचित् पितुर्वाक्यमेतत्। पुत्रस्योत्पत्तिर्मातु. प्रत्यक्षेऽपि पितु: परोक्ष एव भवति। तेन परोक्षत्वात् णबादौ प्राप्ते अद्यतनत्वात् तन्निषेधः।

भोक्ष्यते, श्वो भविष्यति, मासेन गमिष्यति ।

१३. यादादिनिमित्ते क्रियातिपत्तौ—स्यत् स्यताम् स्यन्—स्यस् स्यतम् स्यत—स्यम् स्याव स्याम—स्यत स्येताम् स्यन्त—स्यथास् स्येथास् स्यध्वम्—स्ये स्यावहि स्यामहि ।

भविष्यतीत्यनुवर्तते । **'उताप्योर्थाद्वे यादादिः'** [८/८/६६] इत्येव आदिक यादादिर्निमित्तम् । कुतश्चित् वैगुण्यात्[१] क्रियाया अतिपतनमनिष्पत्ति —क्रियातिपत्ति । तस्या सत्या भविष्यन्त्यर्थे वर्तमानाद् धातोर्यादादिनिमित्ते स्यदादय प्रत्यया भवन्ति । अभोक्ष्यत यदि भवान् घृतेन तर्हि मत्समीपमागमिष्यत् । अत्र भक्षण हेतु , आगमन फलम् । तयो कुतश्चित् प्रमाणात् भविष्यत अनिष्पत्तिमवगम्यैव एव प्रयुङ्क्ते । हेतुफले इति यादादिनिमित्तम् । एव स यदि गुरूनुपासिष्यत शास्त्रान्त-मगमिष्यत् । यदि सुवृष्टिरभविष्यत् सुभिक्षमभविष्यत् । क्रियातिपत्तावित्ति किम् ? यदि गुरूनुपासीत शास्त्रान्त गच्छेत् ।

१४. त्रीणि त्रीणि प्रथममध्यमोत्तमा अन्ययुष्मदस्मत्सु ।

उक्तानां सर्वासां विभक्तीना त्रीणि त्रीणि वचनानि यथासंख्यं अन्यस्मिन्नर्थे युष्मदर्थे अस्मदर्थे चाऽभिधेये यथासख्य च प्रथममध्यमोत्तमसंज्ञकानि भवन्ति । अन्यत्व युष्मदस्मदपेक्षम् । युष्मच्छब्दोपसृष्टार्थो युष्मदर्थस्तेन भवच्छब्देनोच्यमानो न युष्मदर्थ , किंतु अन्यार्थ एव । स पचति, तौ पचत , ते पचन्ति । पचति, पचत , पचन्ति । स पचते, तौ पचेते, ते पचन्ते । पचते, पचेते, पचन्ते । भवान् पचति, भवन्तौ पचत , भवन्त पचन्ति इत्यादि । युष्मदि—त्व पचसि, युवां पचथ , यूय पचथ । पचसि, पचथ , पचथ । त्व पचसे, युवां पचेथे, यूय पचध्वे । पचसे, पचेथे, पचध्वे । अस्मदि—अह पचामि, आवा पचाव , वय पचाम । पचामि, पचाव., पचाम । अह पचे, आवां पचावहे, वय पचामहे । पचे, पचावहे, पचामहे । एवं सर्वासु । द्वययोगे त्रययोगे च शब्दस्पर्धात् पराश्रयमेव वचनमतिदिश्यते । स च त्व च पचथ । स चाह च पचाव । स च त्व चाह च पचाम । कथमत्व त्व सपद्यते, अनहमह सपद्यते, त्वद्भवति, मद्भवति ? युष्मदस्मदोर्गौणत्वात् । त्वमादेशौ तु शब्दमात्रा-श्रयत्वाद् भवत एव । एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्ते पितेति प्रहासे यथाप्राप्तमेव प्रतिपत्तिर्नात्र प्रसिद्धार्थविपर्यासे किञ्चिन्निबन्धनमस्ति । रथेन यास्यसीति भाविगमनाभिधानात् प्रहासो गम्यते । न हि यास्यसीति बहिर्गमन प्रतिषिध्यते । अनेकस्मिन्नपि प्रहसितरि च प्रत्येकमेव परिहास इति अभिधानवशात् मन्ये इत्येकवचनमेव । लौकिकञ्च प्रयोगोऽनुसर्तव्य इति पाणिनीयाद्यन्यशब्दशास्त्रवत् नान्यसूत्रकल्पना न्याय्या ।

१५. तान्येकद्विबहुषु ।

अन्यादिषु यानि त्रीणि त्रीणि वचनानि उक्तानि तानि एकत्वद्वित्वबहुत्वेष्वर्थेषु यथाक्रम भवन्ति । एकस्मिन्नर्थे तिप् इत्येकवचनम् । द्वयोरर्थयो तस् इति द्विवचनम् । बहुष्वर्थेषु अन्ति इति बहुवचनम् । स पचति, तौ पचत , ते पचन्ति । एव युष्मदस्मदोरपि । तानीति विशेषणान्न प्रथमादिभिरेकादीना यथासख्यम् ।

१६. नवाद्यानि शतृक्वसू च परस्मैपदम् ।

एतासा पूर्वोक्तानां त्यादिविभक्तीनामाद्यानि नव[२] नव वचनानि शतृक्वसू च परस्मैपदसंज्ञानि भवन्ति । तिप् तस् अन्ति—सिप् थस् थ—मिप् वस् मस् । एव सर्वासु । परस्मैपदसंज्ञाप्रयोजनं तु **'शेषात्परस्मै'** [३/३/६१] इत्यादि ।

१७. पराणि शानकानौ चाऽऽत्मनेपदम् ।

एतासा पूर्वोक्ताना त्यादिविभक्तीना पराणि नव नव वचनानि शानकानौ च आत्मनेपदसंज्ञानि भवन्ति । ते आते अन्ते—से आथे ध्वे—ए वहे महे । एव सर्वासु । आत्मनेपदसंज्ञाप्रयोजन तु **'वृद्धयभिवद्योरात्मने'** [२/४/२५] इत्यादि ।

---

१ प्रमाणात् ।

१. संज्ञिना बहुत्वादगृहीतवीप्सोऽपि नवनुशब्दो वीप्सा गमयति । एव पराणीत्यत्रापि ।

१८. सकर्मकाऽकर्मकाभ्यां कर्मभावयोः ।

सकर्मकादकर्मकाच्च यथासङ्ख्य कर्मभावयोरात्मनेपद भवति । क्रियते कटश्चैत्रेण । क्रियमाण. । करिष्यमाण । चक्राण । भावे—भूयते भवता । भूयमानं भवता । सकर्मका अपि अविवक्षितकर्माण कर्त्रैकनिष्ठव्यापारा अकर्मका भवन्ति । तेनैषा भावेऽपि प्रयोग । क्रियते भवता । मृदु पच्यते भवता । पञ्च वारान् भुज्यते भवता । **'कालाऽध्वभावदेशमकर्म चाऽकर्मणाम्'** [२/४/१८] इति कालाध्वभावदेशानां कर्मसज्ञाया अकर्मकत्वस्य च विधानात् तद्योगे कर्मणि भावे चात्मनेपदादीनि भवन्ति । मास आस्यते । क्रोशो गुडधानाभिर्भूयते । गोदोह सुप्यते । नदी सुप्यते । भावे—मासमास्यते । क्रोशमधीयते । ओदनपाकं स्थीयते । कुरून् सुप्यते । भावे च युष्मदस्मद्भ्या सामानाधिकरण्याभावात् प्रथमपुरुष एव भवति । साध्यरूपत्वाच्च सङ्ख्यायोगो नास्तीति औत्सर्गिकमेकवचनमेव भवति । पाक, पाकौ, पाका । पाको वर्तते, पाक करोतीत्यादौ चाऽनव्यय-कृदभिहितो भावो द्रव्यवत् प्रकाशत इति सङ्ख्यया लिङ्गेन कारकैश्च युज्यते । त्यादिनेवाव्ययेनाऽभिहितः तु असत्वरूपत्वान्न युज्यते । उष्ट्रासिका आस्यन्ते, हतशायिका शय्यन्ते इति तु बहुवचन कृदभिहितेन अभेदोपचाराद्[१] भवतीति ।

१९. ङितः कर्तरि ।

ङकार इत्सज्ञको येषा ते ङित । ङिद्भ्यो धातुभ्य कर्तर्यात्मनेपद[२] भवति । एधङ—एधते । स्पर्धङ—स्पर्धते । शीङ—शेते । ह्नुङ—ह्नुते । ष्मिङ—स्मयते । ङित इति किम् ? गम्—गच्छति । वद्—वदति ।

२०. क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसो ह्ववहश्चाऽनन्योन्यार्थे ।

इतरेण चिकीर्षितायां क्रियायामितरेण हरण[३] करण क्रियाव्यतिहार । क्रियाव्यतिहारे वर्तमानाद् गतिहिंसा-शब्दार्थहसवर्जिताद् धातोर्ह्वहिभ्या च कर्तर्यात्मनेपद भवति न चेदन्योन्यार्था अन्योन्येतरेतरपरस्परशब्दा प्रयुज्यन्ते । व्यतिलुनते । व्यतिपुनते । व्यतिहरन्ते भारम् । सम्प्रहरन्ते राजान । मतिव्रहन्ते वर्गं । ह्ववहोर्गतिहिंसार्थत्वात् प्रतिषेधे प्राप्ते प्रतिप्रसवार्थमुपादानम् । व्यतिहार इति किम् ? लुनन्ति, पुनन्ति । क्रियेति किम् । द्रव्यव्यतिहारे मा भूत् । चैत्रस्य धान्य व्यतिलुनन्ति । अत्र लुनातिरूपसग्रहात्मके लवने वर्तते । चैत्रेण यत् गृहीत धान्यं पुरस्ताल्लवनेनोपसंगृह्णन्तीत्यर्थ. । अगतिहिंसाशब्दार्थहस इति किम् ? व्यतिगच्छन्ति. व्यतिसर्पन्ति, व्यतिहिंसन्ति, व्यतिघ्नन्ति, व्यतिजल्पन्ति, व्यतिपठन्ति, व्यतिहसन्ति । अनन्योन्यार्थे इति किम् ? अन्योन्यस्य व्यतिलुनन्ति । इतरेतरस्य व्यतिलुनन्ति । परस्परस्य व्यतिलुनन्ति । क्रियाव्यतिहारो व्यतिनैव द्योतित इत्यन्योन्यादिभि तत्कर्माभिसबध्यते अन्योन्यस्य केदारमिति । कर्तरीति किम् ? भावकर्मणो· पूर्वेणैव स्यादनेन मा भूत् । यदि ह्यनेन स्यात्तदा व्यतिगम्यन्ते ग्रामा , व्यतिहन्यन्ते दस्यव इत्यत्राऽगतिहिंसाशब्दार्थहस इति प्रतिषेध स्यादिति ।

२१. निविशः ।

निपूर्वाद् विश कर्तर्यात्मनेपद भवति । निविशते । न्यविशतेत्यटो धात्ववयवत्वान्न व्यवधायकत्वम् । मधुनि विशन्ति भ्रमरा इत्यादि तु निविशोरसबन्धात् अनर्थकत्वाच्च न भवति ।

२२. व्यवपरिभ्यः क्रियः ।

वि, अव, परि—इत्येतेभ्य उपसर्गेभ्य. परात् क्रीणाते· कर्तर्यात्मनेपद भवति । विक्रीणीते, अवक्रीणीते, परिक्रीणीते ।

---

१ आस्यन्ते इत्येवरूपस्य साध्यभावस्योष्ट्रासिकारूपेण सिद्धताख्येन सहेत्यर्थ । कया युक्ता आस्यन्ते इति कोऽर्थ ? आसनानि वर्तन्ते । कि विशिष्टानि ? उष्ट्रासिकारूपाणि ।

२. भावकर्मणो पूर्वसूत्रोपादानान्न्यायादेव कर्तृग्रहणे सिद्धे तद्ग्रहणमुत्तरार्थम् । तेनोत्तरसूत्रेण कर्तर्येव विधानम् । ततो व्यतिगम्यन्ते ग्रामा इत्यादिषु पूर्वेणात्मनेपद सिद्धमन्यथा अगतीत्यशेन निषेध स्यादिति तन्न स्वयमेव कथयिष्यति ।

३. अनेकार्थत्वात् हरणमित्यस्य करण पर्याय ।

सर्वत्र नित· फलवतोऽन्यत्र विधिः। धातुसाहचर्याद् व्यादीनामुपसर्गाणामेव ग्रहणादिह न—गवि क्रीणाति। अपचाव क्रीणीवः। उपरि क्रीणाति। क्री इत्यनुकरणमनुकार्येणार्थेनार्थवदिति नामत्वे सति तत· स्यादयः। **प्रकृतिवदनुकरणमिति** न्यायाच्च धातुकार्यमियादेश.। अत एव ज्ञापकात् **प्रकृतिवदनुकरणे कार्यं** भवति, तेन मुनी इत्याह, द्विष्पचतीत्याह इत्यादौ प्रकृतिभावषत्वविकल्पादि सिद्ध भवति।

२३. विपराभ्यां जेः।

वि, परा—इत्येताभ्यामुपसर्गाभ्या परात् जयते· कर्तर्यात्मनेपद भवति। विजयते, पराजयते। उपसर्गग्रहणान्नेह—बहुवि[1] जयति वनम्। सेना परा जयति।

२४. आङो दाणोऽनात्मास्यप्रसारविकासयोः।

आङ्पूर्वाद् ददातेर्धातो. कर्तर्यात्मनेपद भवति न चेदात्मास्यप्रसारण विकासश्चार्थो भवति। विद्यामादत्ते। धनमादत्ते। अनात्मास्यप्रसारविकासयोरिति किम्? उष्ट्रो मुखं व्याददाति—प्रसारयतीत्यर्थ.। विपादिका व्याददाति—विकसतीत्यर्थ.। आत्मग्रहण किम्? व्याददते पिपीलिकाः पतङ्गस्य मुखम्। आङ इति किम्? ददाति, प्रददाति। फलवत. अन्यत्रायं विधि.।

२५. गमेः क्षान्तौ।

आङ इत्यनुवर्तते। क्षान्तिरुपेक्षा कालहरण वा। क्षान्तौ वर्तमानाद् गमयते आङ्पूर्वकात् कर्तर्यात्मनेपद भवति। आगमयते गुरून्—कंचित् काल प्रतीक्षते। आगमयस्व तावत्—कंचित् काल सहस्वेत्यर्थ.। क्षान्ताविति किम्? आगमयति विद्या—गृह्णातीत्यर्थ.। क्षान्तौ स्वभावाद् गमिर्ण्यन्त एव वर्तते।

२६. नुप्रच्छिभ्याम्।

आङ्पूर्वान्नौते प्रच्छेश्च कर्तर्यात्मनेपद भवति। आनुते शृगाल—उत्कण्ठित शब्द करोतीत्यर्थ.। उत्कण्ठापूर्वके सशब्दे नौतेरय विधिर्न सर्वत्र। आपृच्छते गुरून्। आपृच्छस्व प्रियसखम्। वियुज्यमानस्य प्रश्नेऽय विधि·। आङ इति किम्? नौति, प्रणौति, पृच्छति, परिपृच्छति।

२७. अनुपरिभ्यां च क्रीडः।

अनु, परि, आङ्—इत्येतेभ्य उपसर्गेभ्यः परात् क्रीडते कर्तर्यात्मनेपद भवति। अनुक्रीडते, परिक्रीडते, आक्रीडते। अनुक्रीडमान, परिक्रीडमान., आक्रीडमान। उपसर्गग्रहणान्नेह—माणवकमनु क्रीडति—माणवकेन सह क्रीडतीत्यर्थ.। धातुना अनोरसबन्धाद् वा न भवति। एवमुपरि क्रीडति।

२८. समोऽकूजने।

कूजन—अव्यक्तः शब्द। ततोऽन्यस्मिन्नर्थे वर्तमानात् सपूर्वात् क्रीडते· कर्तर्यात्मनेपद भवति। सक्रीडते, संक्रीडमान—रमते इत्यर्थ·। सम इति किम्? क्रीडति। अकूजन इति किम्? सक्रीडन्ति शकटानि—अव्यक्त शब्द कुर्वन्ति इत्यर्थ·।

२९. अपस्किरः।

स्किर इति समुट्कस्य कृज् विक्षेपे इत्यस्य ग्रहणम्। अपपूर्वात् स्किरते कर्तर्यात्मनेपदं भवति। अपस्किरते वृषभो हृष्टः। अपस्किरते कुक्कुटो भक्ष्यार्थी। अपस्किरते श्वा आश्रयार्थी। 'अपाच्चतुष्पाच्छकुनि···' [४/४/५] इति

१. बहवो वय·—पक्षिणो विद्यन्ते यस्मिन् तद् बहुवि।

सुट्। ससुट्कनिर्देशान्नेह—अपकिरति वृषभः। अपेति किम्? उपस्किरति।

३०. हृनो गतताच्छील्ये।

गत प्रकार. सादृश्यमनुकरणमित्येकोऽर्थः। ताच्छील्य तत्स्वभावता। स्वभावादनुपूर्व एव हरतिर्गतताच्छील्येऽर्थे वर्तते। गतताच्छील्येऽर्थे वर्तमानाद् हरते. कर्तर्यात्मनेपद भवति। पैतृकमश्वा अनुहरन्ते। मातृकं गावोऽनुहरन्ते। पितुरागतं मातुरागतं गुणविषय क्रियाविषय वा सादृश्यमविकल शीलयन्तीत्यर्थः। एवं पितुरनुहरते[१], पितरमनुहरते। मातुरनुहरते, मातरमनुहरते। गतताच्छील्य इति किम्? पितुरनुहरति पुत्र.। मातुरनुहरति पुत्री। गतग्रहणं किम्? पितुर्हरति। मातुर्हरति। ताच्छील्यग्रहण किम्? नटो राममनुहरति। नटो हि कंचिदेव कालं राममनुकरोतीति असातत्ये न भवति।

३१. आशिषि नाथः।

आशिष्येवार्थे वर्तमानान्नाथते. कर्तर्यात्मनेपद भवति। सर्पिषो नाथते, मधुनो नाथते—सर्पिर्मे भूयान्मधु मे भूयात् इति आशास्ते इत्यर्थ। आशिष्येवेति नियम· किम्? याञ्चाया मा भूत्—मधु नाथति। ङित्करणं त्वस्याऽनप्रत्ययार्थम्।

३२. शप उपालम्भे।

उपालम्भ प्रकाशनम्। उपालम्भेऽर्थे वर्तमानात् शपते. कर्तर्यात्मनेपदं भवति। मैत्राय शपते—मैत्रं कंचिदर्थं बोधयतीत्यर्थः। वाचा मात्रादिशरीरस्पर्शनेन वा मैत्रं स्वाभिप्राय बोधयतीति यावत्। उपालम्भ इति किम्? मैत्रं शपति—आक्रोशतीत्यर्थ।

३३. प्रतीज्ञास्थेयप्रकाशनेषु स्थः।

प्रतिज्ञा—अभ्युपगमः। तिष्ठन्ति अस्मिन्निति स्थेयः। रूढिवशाद् विवादपदे निर्णेता प्रमाणभूत· पुरुष उच्यते। प्रतिज्ञादिष्वर्थेषु वर्तमानात् तिष्ठते कर्तर्यात्मनेपद भवति। नित्य शब्दमातिष्ठते। तदऽतदात्मक[२] तत्त्वमातिष्ठते। स्वभावात् चायमाङ्पूर्व एव प्रतिज्ञाया वर्तत। स्थेये—त्वयि मयि वा तिष्ठते विवाद·। विवादस्य त्व चाहं च निर्णेतेत्यर्थ.। संशय्य कर्णादिषु तिष्ठते य.। कर्णादिस्थेयोपदिष्ट[३] निर्णयतीत्यर्थ। प्रकाशने—तिष्ठते कन्या छात्रेभ्य। तिष्ठते वृषली ग्राम्येभ्य·। स्वाभिप्रायप्रकाशनेनात्मान रोचयतीत्यर्थ।

३४. विप्रसमवेभ्यः।

वि, प्र, सम्, अव—इत्येतेभ्य· परात् तिष्ठते. कर्तर्यात्मनेपद भवति। वितिष्ठते, प्रतिष्ठते, संतिष्ठते, अवतिष्ठते।

३५. उदोऽनूर्ध्वचेष्टायाम्।

अनूर्ध्वा या चेष्टा तस्यां वर्तमानादुत्पूर्वात् तिष्ठतेः कर्तर्यात्मनेपदं भवति। मुक्तावुत्तिष्ठते—मुक्त्यर्थं चेष्टत इत्यर्थ.। अनूर्ध्व इति किम्? आसनादुत्तिष्ठति। चेष्टायामिति किम्? अस्माद् ग्रामाच्छतमुत्तिष्ठति। सेनोत्तिष्ठति। उत्पद्यत इत्यर्थ.।

---

१ कर्मणोऽविवक्षात सबन्धेऽत्र षष्ठी।

२ स चासावसश्च तदसः। स आत्मा यस्येति कर्मधारयपूर्वो बहुव्रीहि।

३ कर्णादिराजाभिर्णेतृत्वेनाश्रयतीत्यर्थ·। तिष्ठन्तेऽस्मिन् विवादपदनिर्णयार्थमिति व्युत्पत्त. आधारे स्थेयमिति यप्रत्ययान्त निपात्यते। 'स्थेयो विवादस्थानस्य (पक्षस्य), निर्णतरि पुरोहिते' [मेदिनीकोश, वर्ग २६, श्लोक ६३]। कर्णादिष्विति आधारे सप्तमी। तेषां स्थेयत्व तिष्ठते इत्यात्मनेपदेन द्योत्यते।

३६. उपान्मन्त्रसाधनपथिकर्तृकदेवाराधनमैत्रीसंगमेषु ।

मन्त्रसाधनादिष्वर्थेषु वर्तमानादुपपूर्वात् तिष्ठतेः कर्तर्यात्मनेपद भवति। मन्त्रः साधन यस्यार्थस्य स मन्त्रसाधन । गायत्र्या. सूर्यमुपतिष्ठते—आराधयतीत्यर्थः। मन्त्रादन्यत्र—भर्त्तारमुपतिष्ठति यौवनेन। साधनग्रहणं किम्? गायत्री उपतिष्ठति। पन्था कर्ता यस्यार्थस्य स पथिकर्तृक.। अय पन्था. स्रुघ्नमुपतिष्ठते। देवाराधन—देवपूजा। जिनेन्द्र उपतिष्ठते।

'बहूनामप्यचित्तानामेको भवति चित्तवान्।
पश्य वानरसंघेऽस्मिन्, यदर्कमुपतिष्ठते॥'

[पा. १/३/२५ महाभाष्य प्रथम खड, पृ. १६२]

यदा तु नेयं देवपूजाऽपि तु चापलमिति विवक्षितं तदा न भवति।

'मैव मंस्थाः सचित्तोऽयमेषोऽपि हि यथा वयम्।
एतदप्यस्य कापेयं, यदर्कमुपतिष्ठति॥'

मित्रतया मित्र वा कर्तुमाचरण मैत्री उपस्थानस्य हेतु फलं वा। महामात्रानुपतिष्ठते। रथिकानुपतिष्ठते। मैत्र्या हेतुना फलेन वाराधयतीत्यर्थ। संगम—उपश्लेष.। यमुना गङ्गामुपतिष्ठते।

३७. वा लिप्सायाम्।

लिप्साया वर्तमानादुपपूर्वात् तिष्ठते. कर्तर्यात्मनेपद वा भवति। भिक्षुको दातृकुलमुपतिष्ठति उपतिष्ठते वा भिक्षां लभेय इति।

३८. उपसर्गादस्योहेः।

उपसर्गात् पराभ्यामस्यत्यूहिभ्यां कर्तर्यात्मनेपद वा भवति। विपर्यस्यति, विपर्यस्यते। समूहति, समूहते। अस्येति यग्निर्देशोऽस्त्यऽसति निवृत्त्यर्थ । उपसर्गादिति किम्। अस्यति, ऊहते। अस्यतेरप्राप्ते ऊहतेश्च नित्य प्राप्ते उभयत्र विभाषेयम्। अन्ये त्वकर्मकाभ्यामेवेच्छन्ति प्रत्युदाहरन्ति च निरस्यति शत्रून्, समूहते पदार्थान्।

३९. समुपनिविभ्यो ह्वः।

सम्, उप, नि, वि—इत्येतेभ्यः परात्. ह्वयते. कर्तर्यात्मनेपद भवति। सह्वयते, उपह्वयते. निह्वयते, विह्वयते।

४०. आङः स्पर्धायाम्।

स्पर्धा—सघर्ष पराभिभवेच्छा, सा धात्वर्थस्य विशेषणम्। आङ्पूर्वात् ह्वयते कर्तर्यात्मनेपद भवति स्पर्धायां गम्यमानायाम्। मल्लो मल्लमाह्वयते। छात्रश्छात्रमाह्वयते। स्पर्धमानस्तस्याह्वान करोतीत्यर्थ । स्पर्धायामिति किम्? गामाह्वयति गोपाल ।

४१. गन्धनावक्षेपण-सेवन-साहस-प्रतियत्न-कथोपयोगेषु कृञः।

गन्धनादिष्वर्थेषु वर्तमानात् करोते कर्तर्यात्मनेपदं भवति। गन्धन—द्रोहाभिप्रायेण परदोषोद्घाटनम्। उत्कुरुते, उदाकुरुते माम् । अध्याकुरुते—जिघासुरपकर्त्रे कथयतीत्यर्थ । अवक्षेपणं—कुत्सनं भर्त्सन वा । दुर्वृत्तानवकुरुते। कुत्सयतीत्यर्थ.। श्येनो वर्तिकामपकुरुते। भर्त्सयतीत्यर्थ। सेवने—महामात्रानुपकुरुते। सेवते इत्यर्थ । साहसं—अविमृश्य प्रवृत्तिः। परदारान् प्रकुरुते। तेषु सहसा प्रवर्तते इत्यर्थः। प्रतियत्न—सतो गुणान्तराधानम्। एधोदकस्योपस्कुरुते। तत्र गुणान्तरमादधातीत्यर्थः कथायां- जनवादान् प्रकुरुते। कथयितुमारभते इत्यर्थ.। उपयोग.—व्यवहारादौ विनियोगः। शत प्रकुरुते। व्यवहारादौ विनियुङ्क्ते इत्यर्थ । गन्धनादिष्विति किम्? कटं करोति। अफलवत्कर्त्रर्थ आरम्भ.।

४२. अधेः प्रशक्तौ ।

प्रशक्ति:—परेण अपराजय: परपराजयो वा । प्रशक्तौ गम्यमानायामधिपरात् कृञ: कर्तर्यात्मनेपदं भवति । तं ह्यधिचक्रे । तमभिभूतवान् तेन वा न पराजित इत्यर्थः । प्रशक्ताविति किम् ? अर्थमधिकरोति । अधेरिति किम् ? शत्रून् प्रकरोति ।

४३. वेः शब्दकर्माऽकर्मकात्वऽनाशे ।

विपरात् शब्दकर्मकादकर्मकाच्च अनाशे वर्तमानात् कृञ: कर्तर्यात्मनेपदं भवति । शब्दकर्मकात्—क्रोष्टा विकुरुते स्वरान् । नानोत्पादयतीत्यर्थः । अकर्मकात्—विकुर्वते सैन्धवाः । साधु दान्ताः शोभनं वल्गन्तीत्यर्थः । ओदनपूर्णश्छात्रा विकुर्वते । निष्फलं चेष्टन्त इत्यर्थः । शब्दकर्माकर्मकादिति किम् ? विकरोति मृदम् । अनाश इति किम् ? विकरोति शब्दम् । विनाशयतीत्यर्थः ।

४४. पूजोपनयनभृत्युत्क्षेपणज्ञानविगणनव्ययेषु नियः ।

पूजादिष्वर्थेषु नियः कर्तर्यात्मनेपदं भवति । पूजा—सन्मानं । स्याद्वादे नयते विद्वान् । उपनयनं—संस्कार-विशेषः । माणवकमुपनयते । भृतिर्वेतनम् । कर्मकरानुपनयते । वेतनेन आत्मसमीपं प्रापयतीत्यर्थः । उत्क्षेपण—ऊर्ध्वं नयनम् । शिशुमुदानयते । उत्क्षिपतीत्यर्थः । ज्ञान—प्रमेयनिश्चयः । नयते तत्त्वार्थे । तत्र प्रमेयं निश्चिनोतीत्यर्थः । विगणन—ऋणादेः शोधनम् । मद्रा: करं विनयन्ते । राजग्राह्यं भागं दानेन शोधयन्तीत्यर्थः । व्यय—लोकोपकारादिषु विनियोगः । शतं विनयते । सहस्रं विनयते । लोकोपकाराद्यर्थं तीर्थादिषु विनियुङ्क्ते इत्यर्थः । पूजादिष्विति किम् ? अजां नयति ग्रामम् । नित्त्वादफलवदर्थ आरम्भः ।

४५. कर्तृस्थाऽमूर्तकर्मणः ।

कर्तृस्थममूर्तं कर्म यस्य तस्मान्नयतेः कर्तर्यात्मनेपदं भवति । श्रमं विनयते, क्रोधं विनयते—शमयतीत्यर्थः । कर्तृस्थेति किम् ? चैत्रो मैत्रस्य मन्युं विनयति । अमूर्तेति किम् ? गडुं विनयति । कर्मेति किम् ? बुद्ध्या विनयति, श्रमं विनयते इत्यादौ श्रमापगमादेः फलस्य कर्तृसमवायित्वात् सिद्धे आत्मनेपदे नियमार्थं वचनम्, तेन प्रत्युदाहरणेषु फलवत्त्वविवक्षायामपि नात्मनेपदम् । शमयतिक्रियावचनादेव च नयतेरात्मनेपदं दृश्यते न प्रापणार्थात् । यथा—

'शिवमौपयिकं गरीयसीं, फलनिष्पत्तिमदूषितायतिम् ।
विगणय्य नयन्ति पौरुषं, विजितक्रोधरया जिगीषवः' ॥

[किरातार्जुनीयमहा० २/३५]

यथा च कोपं शमं नयति । मन्युं नाशं नयति । बुद्धिं क्षयं नयति ।

४६. वृत्तिसर्गतायनेषु क्रमः ।

वृत्त्यादिष्वर्थेषु वर्तमानात् क्रमेः कर्तर्यात्मनेपदं भवति । वृत्ति—अप्रतिबन्धः आत्मयापनं वा । शास्त्रेऽस्य क्रमते बुद्धिः । तत्र न हन्यते आत्मानं यापयति वेत्यर्थः । सर्ग—उत्साहः तात्पर्यं वा । सूत्राय क्रमते । तदर्थमुत्सहते तत्परो वेत्यर्थः । तायन—स्फीतता सतानं पालनं वा । क्रमन्तेऽस्मिन् योगाः । स्फीता भवन्ति सन्तन्यन्ते पाल्यन्ते वेत्यर्थः । वृत्त्यादिष्विति किम् ? क्रामति ।

४७. परोपात् ।

परा, उप—इत्येताभ्यामेव परात् क्रमेः वृत्त्यादिष्वर्थेषु कर्तर्यात्मनेपदं भवति । पराक्रमते, उपक्रमते । परोपादेवेति

किम् ? अनुक्रामति। वृत्त्यादिष्विति किम् ? पराक्रामति[1], उपक्रामति[2]। अन्ये तु परोपाभ्यां परात् क्रमतेर्वृत्त्याद्यर्थाऽभावे अपीच्छन्ति, तेन पराक्रमते, उपक्रमते इत्यात्मनेपदमेव। वृत्त्यादिषु तु अन्यसमाद् उपसर्गपूर्वादपि पूर्वेण मन्यन्ते। निष्क्रमते, प्रतिक्रमते - न प्रतिहन्यते इत्यर्थः।

४८. आङो ज्योतिरुद्गमने।

आङः परात् क्रमेर्ज्योतिषां चन्द्रादीनामुद्गमने ऊर्ध्वगमनेऽर्थे वर्तमानात् कर्तर्यात्मनेपदं भवति। आक्रमते चन्द्रः, आक्रमते सूर्यः —उदयते इत्यर्थः। ज्योतिरुद्गमने इति किम् ? आक्रामति माणवकः कुतुपम्[3]। अवष्टभ्नातीत्यर्थः। ज्योतिर्ग्रहणं किम् ? धूम आक्रामति—उद्गच्छतीत्यर्थः। आक्रामति धूमो हर्म्यतलम् —उद्गच्छन् व्याप्नोतीत्यर्थः। उद्गमन इति किम् ? '**नभः समाक्रामति नष्टवर्त्मना, स्थितैकचक्रेण रथेन** भास्करः'। अत्र व्याप्तिमात्रं विवक्षितं न तु उद्गमोपसर्जनव्याप्तिः। अन्ये तु उद्गमोपसर्जनां व्याप्तिं पश्यन्तोऽसाधुमेनं मन्यन्ते।

४९. वेः स्वार्थे।

स्वार्थः—पादविक्षेपः। स्वार्थे वर्तमानाद् वेः परात् क्रमेः कर्तर्यात्मनेपदं भवति। साधु विक्रमते गजः। स्वार्थे इति किम् ? अश्वेन[4] विक्रामति। विक्रामति[5] राजा उत्सहते इत्यर्थः।

५०. प्रोपाबाऽऽरम्भे।

आरम्भः—आदिकर्म। अङ्गीकरणं चेत्यन्ये। आरम्भेऽर्थे वर्तमानात् प्रोपाभ्यां परात् क्रमेः कर्तर्यात्मनेपदं भवति। प्रक्रमते, उपक्रमते भोक्तुम्। प्रारभते अङ्गीकरोति चेत्यर्थः। आरम्भ इति किम् ? पूर्वेद्युः प्रक्रामति गच्छतीत्यर्थः। अपरेद्युः उपक्रामति—समीपमागच्छतीत्यर्थः। '**परोपात्**' [३/३/४७] इत्यनेनापि न भवति वृत्त्यादेरर्थस्याऽविवक्षितत्वात्।

५१. अनुपसर्गाद् वा।

अनुपसर्गात् क्रमेः कर्तर्यात्मनेपदं वा भवति। क्रमते, क्रामति। अनुपसर्गादिति किम् ? संक्रामति। वृत्त्यादेरन्यत्रायं आरम्भ इत्यप्राप्तविभाषा।

५२. निह्नवे ज्ञः।

निह्नवः—अपलापः। निह्नवेऽर्थे वर्तमानाद् जानातेः कर्तर्यात्मनेपदं भवति। शतमपजानीते—अपह्नुते इत्यर्थः। अपेन च अस्य अयमर्थोऽभिव्यज्यते। निह्नवे इति किम् ? तत्त्वं जानाति।

५३. संप्रतिभ्यामऽस्मृतौ।

संप्रतिभ्यां पराज्जानातेरस्मृतौ वर्तमानात् कर्तर्यात्मनेपदं भवति। शतं संजानीते, सहस्रं संजानीते—अवेक्षते इत्यर्थः। शतं प्रतिजानीते—अभ्युपगच्छतीत्यर्थः। अस्मृताविति किम् ? मातुः संजानाति, मातरं संजानाति—स्मरतीत्यर्थः।

५४. अवाद् गिरः।

अवपूर्वाद् गिरतेः कर्तर्यात्मनेपदं भवति। अवगिरते। अवादन्यत्र गिरति। गिर इति किम् ? अवगृणाति।

---

१ परावृत्या क्रामति शौर्यं वा कुरुते।

२ समीपे गच्छतीत्यर्थः।

३ लघुचर्मस्नेहपात्रम्।

४ ननु अत्रापि पादविक्षेप एव कर्मकर्तरि, स च कर्तृकृतः साधनकृतो वा भवतु। सत्यम्। **गौणमुख्ययोः**··· इति न्यायात् सर्वकारकप्रधानभूतकर्तृकृत एव गृह्यते। अत्र तु साधनकृतः पादविक्षेप इति न भवति।

५. '**परोपात्**' [३/३/४७] एवेति नियमाद् '**वृत्तिसर्ग**···' [३/३/४६] इत्यादिनापि न।

अवपूर्वस्य गृणाते. प्रयोगो नास्तीत्यन्ये ।

५५. समः प्रतिज्ञायाम् ।

सपूर्वाद् गिरते. प्रतिज्ञाया वर्तमानात् कर्तर्यात्मनेपद भवति । प्रतिज्ञा अभ्युपगम. । स्याद्वादं संगिरते--प्रतिजानीते इत्यर्थ । प्रतिज्ञायामिति किम् ? संगिरति ग्रासम् ।

५६. उदश्चरः सकर्मकात् ।

उत्पूर्वात् सकर्मकाच्चरते कर्तर्यात्मनेपदं भवति । गुरुवचनमुच्चरते । मार्गमुच्चरते । व्युत्क्रम्य गच्छतीत्यर्थ । ग्रासमुच्चरते । सक्तूनुच्चरते । भक्षयतीत्यर्थः । उद इति किम् ? चार चरति । सकर्मकादिति किम् ? धूम उच्चरति । शब्द उच्चरति । ऊर्ध्वं गच्छतीत्यर्थ. ।

५७. समस्तृतीयया ।

सम परान्चरतेस्तृतीयान्तेन योगे सति कर्तर्यात्मनेपद भवति । अश्वेन सचरते । रथेन सचरते । तृतीययेति किम् ? उभौ लोकौ सचरसि ।

५८. उपाद्यमः स्वीकारे ।

उपपूर्वान् यम स्वीकारेऽर्थे वर्तमानात् कर्तर्यात्मनेपद भवति । कन्यामुपयच्छते वर । वेश्यामुपयच्छते । उपायंस्त महास्त्राणि । चित्रनिर्देश किम् ? शाटकानुपयच्छति । नात्राऽस्व स्व क्रियते । स्वत्वेन तु निर्ज्ञातस्य ग्रहणमिति न भवति । विवाहे एवेच्छन्त्यन्ये । तन्मते वेश्यामुपयच्छते इत्यादि न भवति ।

५९. शदेः शिति ।

शदे शिद्विषयात् कर्तर्यात्मनेपद भवति । शीयते, शीयेत, शीयताम्, अशीयत । शितीति किम् ? शशाद, शत्स्यति ।

६०. म्रियतेर्लुङ्लिङोश्च ।

लुङादिविषयात् लिङादादिविषयात् शिद्विषयाच्च म्रियते कर्तर्यात्मनेपद भवति । अमृत । मृषीष्ट । म्रियते, म्रियेत, म्रियताम्, अम्रियत । लुङादिलिङाद्योश्चेति किम् ? ममार, मर्तासि, मरिष्यति, अमरिष्यत् । तिब्निर्देशाद् यङ्लुकि न — मर्मर्ति ।

६१. स्मृदृशः सनः ।

सन्प्रत्ययान्ताभ्या स्मृदृशिभ्या कर्तर्यात्मनेपद भवति । सुस्मूर्षते पूर्ववृत्तम् । दिदृक्षते देवम् । सन इति किम् ? स्मरति, पश्यति ।

६२. शकेर्जिज्ञासायाम् ।

शकि: स्वभावादन्यधात्वर्थानुचारी प्रवर्तते शक्नोति भोक्तुमन्यद्वेति । ततो ज्ञानानुचार्यर्थान् सन्नन्तात् कर्तर्यात्मनेपद भवति । विद्या [1] शिक्षते । ज्ञातु शक्नुयामितीच्छतीत्यर्थ. । जिज्ञासायामिति किम् ? शक्तुमिच्छति---शिक्षति । शिक्ष विद्योपादाने---इत्यनेनैव सिद्धे आमनुप्रयोगार्थ [2] वचनम् । तेन शिक्षांचक्रे इति भवति न तु शिक्षांचकारेति । केचित्तु शके:

---

१ आत्मनेपदेनैव जिज्ञासाया अवगमात् जिज्ञासितुमिति न प्रयुज्यते ।

२ यद्येतत् सूत्र न व्यधास्यत तदा शकेर्धातोः सन्नन्तस्य 'आमः कृञः' [३/३/६६] इति आम परात् कृञ आत्मनेपद नाऽभविष्यम्, तत शिक्षांचक्रे इति न स्यात् । शिक्षेस्त्वामोऽसभव एव एकस्वरत्वात् ।

सन्नन्तस्यात्मनेपदमनिच्छन्त. शिक्षतेरेव जिज्ञासायामात्मनेपदमन्यत्र च परस्मैपदमिच्छन्ति ।

६३. अननोर्ज्ञः ।

सन्प्रत्ययान्ताज्जानाते कर्तर्यात्मनेपदं भवति, स चेदनोरुपसर्गात्परो न भवति । धर्मं जिज्ञासते । अननोरिति किम् ? धर्ममनुजिज्ञासति । कथं औषधस्यानुजिज्ञासते ? अकर्मकात्[1] **'प्राग्वत्'** [३/३/६५] इत्यनेन भविष्यति ।

६४. श्रुवोऽनाङ्प्रतेः ।

सन्प्रत्ययान्तात् शृणोते: कर्तर्यात्मनेपदं भवति, स चेदाङ्प्रतिभ्यामुपसर्गाभ्यां परो न भवति । शुश्रूषते गुरून् । सशुश्रूषते शब्दान् । अनाङ्प्रतेरिति किम् ? आशुश्रूषति, प्रतिशुश्रूषति । चैत्रं प्रति शुश्रूषते इति प्रतिना सम्बन्धाऽभावात् प्रतिषेधो न भवति ।

६५. प्राग्वत् ।

सन्प्रत्ययात् प्राग् यो धातुरात्मनेपदी तद्वत् सन्प्रत्ययान्तादपि कर्तर्यात्मनेपदं भवति । यत्पूर्वस्य धातोरनुबन्धेनोपपदेनार्थविशेषेण वात्मनेपदं दृष्टं तत्सन्नन्तादतिदिश्यते । **'नितः'** [३/३/८६] वक्ष्यमाणसूत्रेण फलवत्येव प्राप्ते अफलवत्यपि विधानार्थं वचनम् । अनुबन्धेन—शीङ् शेते, शिशयिषते । एधङ्—एधते, एदिधिषते । लोलूयते, लोलूयिषते । श्येनायते, शिश्येनायिषते । उपपदेन—निविशते, निविविक्षते । अश्वेन सञ्चरते, अश्वेन सञ्चिचरिषते । अर्थविशेषेण—शास्त्रेऽस्य क्रमते बुद्धिः, चिक्रंसते । उभयेन—आक्रमते चन्द्रः, आचिक्रंसते । यत्पुनः सप्रत्ययधातुनिमित्तं तन्नातिदिश्यते । शिशत्सति, मुमूर्षति—अत्र हि न शदिम्रियती एव निमित्ते किं तु शिद्यादिक्यादादयोऽपि । अनुबन्धादिनिमित्तमपि[2] यद् विशेषविधानबाधया प्राग् न दृष्टं तन्नातिदिश्यते । यथा अनुकरोति, अनुचिकीर्षति । पराकरोति, पराचिकीर्षति । तिजादीनां त्वर्थविशेषेषु केवलानामप्रयोगात् सन्नन्तसमुदायार्थमेवानुबन्धविधानम्[3] । तेन तितिक्षते, जुगुप्सते, मीमांसते इत्यादौ प्राग् अदृष्टमपि आत्मनेपदमनुबन्धसामर्थ्याद् भवति । यथा कुस्मङ्-चित्रङ्-महीङ्-हृणीङामनुबन्धो णिच्-क्यज्-यगन्त-समुदायार्थः । विकुस्मयते, चित्रीयते, महीयते, हृणीयते । अवयवे वा कृतं लिङ्गं समुदायस्य विशेषकं भवति । यद्येवं तितिक्षयति, जुगुप्सयति, मीमांसयति इत्यत्रापि प्राप्नोति । नैवम् । **अवयवे कृतं लिङ्गं तस्यैव समुदायस्य विशेषकं भवति यं समुदायं सोऽवयवो न व्यभिचरति ।** यथा गां सक्थनि कर्णे वा कृतं लिङ्गं चिह्नं गोरेव विशेषकं भवति न तु गोमण्डलस्य । सन्नन्तं च समुदायं तिजादयोऽर्थविशेषे न व्यभिचरन्ति णिजन्तं पुनर्व्यभिचरन्ति । ननु सन्नन्तमपि व्यभिचरन्ति—तेजयति, गोपायति, मानयतीति । नैवम् । अर्थविशेषेषु न व्यभिचार इत्युक्तत्वात् । **'गुप्तिज्भ्यां निन्दाक्षमयोः'** [४/१/१६], **'मानबधदानशानो विचारवैरूप्यार्जवनिशाने दीर्घश्च पूर्वस्य'** [४/१/१५] इति हि वक्ष्यते इति ।

६६. आमः कृञः ।

आम परादनुप्रयुज्यमानात्करोतेः आम एव प्राग् यो धातुः तस्मादिव कर्तर्यात्मनेपदं भवति । भवति न भवति चेति विधिप्रतिषेधावतिदिश्येते । यथा उशीनरवत् मद्रेषु यवाः सन्ति न सन्तीति । ईहाचक्रे, ईक्षाचक्रे इत्यफलवत्यपि भवति । बिभयाञ्चकार, जागराञ्चकार इति फलवत्यपि न भवति । यत्र तु पूर्वस्माद् उभयं तत्र फलवत्यफलवति चोभयं भवति । बिभराञ्चक्रे, बिभराञ्चकार । पाचयाञ्चक्रे, पाचयाञ्चकार । कृञ इति किम् ? ईक्षामास, ईक्षाबभूव ।

---

१. सकर्मकादनेन आत्मनेपदं विधीयते न तु अकर्मकादिति प्रतिषेधाऽभावः । कथं पुनर्ज्ञायते अनेन सकर्मकाद् विधिरिति । उच्यते—अकर्मकाद् **'ज्ञः'** [३/३/७५] इत्यनेन प्राग्दिष्टत्वात् सन्नन्तात् **'प्राग्वत्'** [३/३/६५] इत्यनेनात्मनेपदे सिद्धे सकर्मकादेवाऽस्य विधिरिति ज्ञायते ।

२. आदिपदात् **'गन्धनावक्षेपण'** [३/३/४१] इत्यादिना कृञो धातोः गन्धनाद्यर्थनिमित्तं **'अनुपराभ्यां कृञः'** [३/३/६२] इत्यादिविशेषविधानबाधितं यत्प्राग् न दृष्टं तदपि नातिदिश्यते ।

३. न च वाच्यं क्षमाद्यर्थाभावे अनुबन्धादात्मनेपदं भविष्यतीति । एषामर्थान्तरेऽपि त्यादयो नाभिधीयन्ते इति भणनात् ।

६७. उत्स्वराद्युजेरऽयज्ञपात्रे ।

उद स्वरान्तात् चोपसर्गात् परात् युनक्ते. कर्तर्यात्मनेपद भवति, चेद्यज्ञपात्रविषयार्थो युनिजे स्यात् । उद्युङ्क्ते, उपयुङ्क्ते, नियुङ्क्ते, प्रयुङ्क्ते । उत्स्वरादिति किम् ? सयुनक्ति, निर्युनक्ति । अयज्ञपात्रे इति किम् ? द्वन्द्व यज्ञपात्राणि प्रयुनक्ति । अत्र यज्ञपात्रयोरुभयो सबन्धस्तेन यत्र तु यज्ञ एव न तु तत्पात्रम् । तत्पात्रमव वा न यज्ञस्तत्र भवत्येव—यज्ञ मन्त्र रन्धनपात्राणि वा प्रयुङ्क्ते । यज्ञपात्राणि रन्धने प्रयुङ्क्ते । युजङ्च् समाधौ —इत्यस्य तु ङित्त्वादात्मनेपद सिद्धमेव ।

६८. समः क्ष्णुवः ।

सम. परात् क्ष्णौते कर्तर्यात्मनेपद भवति । सक्ष्णुते शस्त्रम् । सम इति किम् ? क्ष्णौति । अनुपसर्गत्वान्नेह—आयस क्ष्णौति ।

६९. भुञ्जोऽपालने ।

अपालनेऽर्थे वर्तमानात् भुनक्ते कर्तर्यात्मनेपद भवति । ओदन भुङ्क्ते, परिभुङ्क्ते । अपालने इति किम् ? राजा पृथिवी भुनक्ति—पालयतीत्यर्थ । **'अम्बरीषश्च नाभागो बुभुजाते चिर महीम्'** इत्यत्र तु न पालन भुजेरर्थ., किन्तु पालन-निमित्तक उपकार । धातूनामनेकार्थत्वात् । भुञ्ज इति नमो निर्देशात् कौटिल्यार्थस्य भुजेर्न भवति । ओष्ठौ निर्भुजति—कुटिलयतीत्यर्थ ।

७०. दीप्ति-ज्ञान-यत्न-विमत्युपसंभाषोपच्छन्दनेषु वदः ।

दीप्त्यादिष्वर्थेषु वर्तमानाद् वदते कर्तर्यात्मनेपद भवति । दीप्तिर्भासनम् । सा च कर्तृविशेषणम् । वदते विद्वान् स्याद्वादे । सम्यग्ज्ञानित्वाद् वदन् सन् दीप्यते इत्यर्थ. । ज्ञानमवबोध । वदते धीमास्तन्त्वार्थे । ज्ञात्वा वदतीत्यर्थ. । यत्न उत्साह । श्रुते वदते. तपसि वदते—तत्रोत्सहते इत्यर्थ । विमति नाना मति । धर्मे विवदन्ते । विमतिपूर्वक विचित्र भाषन्ते इत्यर्थ । उपसभाष –उपसान्त्वन उपालम्भो वा । कर्मकरानुपवदते उपसान्त्वयति उपलभते वेत्यर्थ. । उपच्छन्दन –रहस्युपमन्त्रणम् । परदारानुपवदते, कुलभार्यामुपवदते—रहस्युपलोभयतीत्यर्थ । दीप्त्यादिष्विति किम् ? यत्किञ्चिद् वदति ।

७१. व्यक्तवाचां सहोक्तौ ।

व्यक्ता व्यक्ताक्षरा वाग् येषा ते व्यक्तवाच रूढ्या मनुष्यादय एवोच्यन्ते । तेषां सहोक्तौ सम्भूयोच्चारणे वर्तमानाद् वदते कर्तर्यात्मनेपद भवति । सप्रवदन्ते ग्राम्या । सप्रवदन्ते पिशाचा । सम्भूय भाषन्ते इत्यर्थ । व्यक्तवाचामिति किम् ? सप्रवदन्ति कुक्कुटा । सप्रवदन्ति शुका । शुकसारिकादीनामपि व्यक्तवाक्त्वात् सहोक्ता-विच्छन्त्यन्ये । सप्रवदन्ते शुका । सप्रवदन्ते सारिका । सहोक्ताविति किम् ? चैत्रेणोक्ते मैत्रो वदति ।

७२. विवादे वा ।

विरुद्धार्थो वादो विवाद । व्यक्तवाचा सहोक्तौ विवादरूपाया वर्तमानाद् वदत कर्तर्यात्मनेपद वा भवति । विप्रवदन्ते विप्रवदन्ति वा मौहूर्त्ता । परस्परप्रतिषेधेन युगपद् विरुद्धं वदन्तीत्यर्थ । विवाद इति किम् ? सप्रवदन्ते वैयाकरणा —सह वदन्तीत्यर्थ । व्यक्तवाचामिति किम् ? विप्रवदन्ति पक्षिणः । सहोक्ताविति किम् ? मौहूर्त्तो मौहूर्त्तेन सह क्रमेण विप्रवदति । विरुद्धाभिधानमात्रमिह विवक्षित न तु विमतिपूर्वकम्, तेन विमतिलक्षणमपि आत्मनेपद न भवति ।

७३. अनोरकर्मकात् ।

व्यक्तवाचामित्यनुवर्तते । व्यक्तवाचा विषये अनुपूर्वाद् अकर्मकाद् वदते. कर्तर्यात्मनेपद भवति । अनुः सादृश्ये पश्चादर्थे वा । अनुवदते चैत्रो मैत्रस्य । यथा मैत्रो वदति तथा चैत्रो वदतीत्यर्थ । अनुवदते आचार्यस्य शिष्य । आचार्येण पूर्वमुक्ते पश्चाद् वदतीत्यर्थः । अकर्मकादिति किम् ? उक्तमनुवदति । व्यक्तवाचामिति किम् ? अनुवदति वीणा । कथ

वाचिकषडिकौ न सवदेते इति ? मिथो विरुध्येते इत्यर्थः । विमतिविवक्षाया भविष्यति ।

७४. उपात्स्थः ।

अकर्मकादित्यनुवर्तते । उपपूर्वाद् अकर्मकात् तिष्ठते कर्तर्यात्मनेपदं भवति । भोजनकाल उपतिष्ठते । योगे योगे उपतिष्ठते । ज्ञानमस्य ज्ञेयमुपतिष्ठते । संनिधीयते इत्यर्थः । अकर्मकादिति किम् ? राजानमुपतिष्ठति ।

७५. ज्ञः ।

अकर्मकाज्जानाते कर्तर्यात्मनेपदं भवति । सर्पिषो जानीते । मधुनो जानीते । ननु कथमत्र जानातिरकर्मकः ? उच्यते—नात्र सर्पिरादि ज्ञेयत्वेन विवक्षितं, किन्तु प्रवृत्तौ साधनत्वेन । सर्पिषा मधुना वा साधनेन भोक्तुं प्रवर्तते इत्यर्थः । अत एव **'अज्ञाने ज्ञः षष्ठी'** [२/८/८६] इति षष्ठी । मिथ्याज्ञानार्थो वा जानाति । सर्पिषि रक्तः प्रतिहतो वा उदकादिषु सर्पिष्टया ज्ञानवान् भवतीत्यर्थः । मिथ्याज्ञानं च अज्ञानमित्यज्ञानार्थत्वे पूर्ववदेव षष्ठी विभक्तिर्भवति । अथ वा सर्पिःसंबन्धि ज्ञानं करोतीति विवक्षायां ज्ञानार्थोऽपि जानातिरकर्मकः, तदा तु संबन्धे षष्ठी । अकर्मकादिति किम् ? तैलं सर्पिषो जानाति । तैलं सर्पिष्टया जानातीत्यर्थः । स्वरेण पुत्रं जानाति ।

७६. समो गमृच्छि-प्रच्छि-स्वरति-श्रु-विदर्ति-दृशः ।

सम्पूर्वेभ्यो अकर्मकेभ्यो गमादिभ्यः कर्तर्यात्मनेपदं भवति । सगच्छते, समृच्छते, सपृच्छते, सम्स्वरते, सशृणुते, संवित्ते । नित्यपरस्मैपदिभिः साहचर्यात् ज्ञानार्थस्यैव विदेर्ग्रहणम् । अर्तीति सामान्यनिर्देशात् स्वादिरदादिश्च गृह्यते । समृच्छते, समियृते । सपश्यते । स्वरत्यर्त्योर्स्तिब्निर्देशो यङ्लुग्निवृत्त्यर्थः । अकर्मकादिति किम् ? संगच्छति सुहृदम् ।

७७. आङो यमहनो निजाङ्गकर्मकाच्च ।

आङः पराभ्यां यमिहनिभ्यां अकर्मकाभ्यां कर्तृनिजाङ्गकर्मकाभ्यां च कर्तर्यात्मनेपदं भवति । अकर्मक—आयच्छते, आहते । निजाङ्गकर्मक—आयच्छते पादम् । आहते शिरः । निजाङ्गकर्मकाच्चेति किम् ? आयच्छति रज्जुम् । आहन्ति वृषलम् । निजेति किम् ? आयच्छति पादौ चैत्रस्य । आहन्ति शिरो मैत्रस्य । अङ्गेति किम् ? स्वामायच्छति रज्जुम् । स्वं पुत्रमाहन्ति । स्वाङ्गमित्यनुक्त्वा निजाङ्गकरणं पारिभाषिकस्वाङ्गशब्दनिवृत्त्यर्थम् । पारिभाषिकस्वाङ्गग्रहणात् तु आयच्छति पादौ चैत्रस्य—इत्यत्रापि आत्मनेपदप्रसङ्गः स्यात् ।

७८. व्युदस्तपः ।

निजाङ्गकर्मकाच्चेत्यनुवर्तते । वि, उत्—इत्येताभ्यां परादकर्मकान्निजाङ्गकर्मकाच्च तपेः कर्तर्यात्मनेपदं भवति । वितपते उत्तपते वा रविः—दीप्यते इत्यर्थः । निजाङ्गकर्मके—वितपते उत्तपते पाणिम् । तापयतीत्यर्थः । व्युद इति किम् ? निष्टपति । निजाङ्गकर्मकाच्चेति किम् ? वितपति पृथिवीं सविता—संतापयतीत्यर्थः । उत्तपति सुवर्णं सुवर्णकारः—द्रवीकरोतीत्यर्थः । निजेति किम् ? उत्तपति पृष्ठं चैत्रस्य । अङ्गेति किम् ? स्वं सुवर्णमुत्तपति । इह दीप्यते, ज्वलति, भासते, रोचते—इत्येष्वर्थेषु तपिमकर्मकं स्मरन्ति । यथा वहति भारमिति प्रापणे वहिः सकर्मकः स्पन्दने तु अकर्मकम् । वहति नदी—स्पन्दते इत्यर्थः ।

७९. अणिक्कर्मणिक्कर्तृकाण्णिगोऽस्मृतौ ।

'प्रयोक्तृव्यापारे णिग्' [४/१/८५] इति वक्ष्यते । अणिगवस्थायां यत्कर्म तदेव णिगवस्थायां कर्ता यस्य सोऽणिक्कर्मणिक्कर्तृकः । तस्मात् णिगन्ताद् धातोरस्मृतौ वर्तमानात् कर्तर्यात्मनेपदं भवति । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयते हस्ती हस्तिपकान् । पश्यन्ति राजानं भृत्याः । दर्शयते राजा भृत्यान् भृत्यैरिति वा । पिबन्ति मधु पायकाः । पाययते मधु पायकान् । अणिगिति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयति हस्तिपकान् महामात्रः । आरोहयन्ति हस्तिपका महामात्रेण । प्रथमणिगन्तकर्मणि द्वितीयणिगन्तकर्तर्यपि मा भूत् । णिक्करणं किम् ? गणयति गणं गोपालकः ।

गणयते गणो गोपालकमिति ञिजन्तकर्मञिन्कर्तृकादपि प्रतिषेधो मा भूत् । कर्मेति किम् ? साधनादेः कर्तृत्वे मा भूत् । पश्यन्ति भृत्याः प्रदीपेन । दर्शयति प्रदीपो भृत्यान् । ञिन्निति किम् ? यस्याऽञिन्नन्तस्यैव कर्म कर्ता भवति ततो मा भूत् । लुनाति केदार चैत्र । लूयते केदार स्वयमेव । न प्रयुङ्क्ते—लावयति केदारं चैत्र । कर्तृग्रहणं किम् ? आरोहन्ति हस्तिन हस्तिपका । तानेनमारोहयति महामात्र । ञिन इति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः । तानारोहयते हस्तीति अञिन्नवस्थाया मा भूत् । प्रत्यासत्तेश्च यस्यैव धातो अञिन्नवस्था तस्यैव धातोर्ञिन्नवस्था गृह्यते, न धात्वन्तरस्य । तेनेह न भवति—आरुह्यमाणो हस्ती सिञ्चयति पृष्ठ मूत्रेण । हस्तिपकैरारुह्यमाणो हस्ती स्थलमारोहयति मनुष्यान् इत्यत्र तु सदृश-धातुप्रयोगेऽपि पूर्वो हस्तिपककर्तृको रुहि, परश्च मनुष्यकर्तृक इति साधनभेदान् क्रियाभेदे धातुभेद । अस्मृताविति किम् ? स्मरति वनगुल्म कोकिल. । स्मरयत्येन वनगुल्मः ।

८०. प्रलम्भने गृधिवञ्च्योः ।

अक्रियाफलार्थोऽयमारम्भ । गृधिवञ्चिभ्या ञिन्नन्ताभ्या प्रलम्भने—वञ्चनेऽर्थे वर्तमानाभ्यां कर्तर्यात्मनेपदं भवति । बटु गर्धयते, बटु वञ्चयते—विप्रतारयतीत्यर्थ । प्रलम्भने इति किम् ? श्वान गर्धयति—प्रलोभयतीत्यर्थ. । अहिं वञ्चयति—गमयतीत्यर्थ ।

८१. लीङ्लिनः पूजाभिभवयोश्चान्त्वाऽकर्तर्यपि ।

लीयतिलिनातिभ्या ञिन्नन्ताभ्या पूजाभिभवयो प्रलम्भने चार्थे वर्तमानाभ्यां कर्तर्यात्मनेपदं भवति, अनयोश्चा-ऽन्तस्य अकर्तर्यपि आकारादेश । जटाभिरालापयते—परैरात्मान पूजयतीत्यर्थ । श्येनो वर्तिकामपलापयते—अभिभवतीत्यर्थ । कस्त्वामुल्लापयते—वञ्चयते इत्यर्थ । एष्विति किम् ? बालकमुल्लापयति—उत्क्षिपतीत्यर्थ. । कथ तर्हि अत्र आत्वम् ? 'लीङ्लिनोर्वा' [६/२/१०३] इति भविष्यति । अकर्तर्यपीति किम् ? जटाभिरालापयते जटिलेन । ङिन्नानिर्देशो यौजादिक-निवृत्त्यर्थ ।

८२. स्मिङः प्रयोक्तुः स्वार्थे ।

प्रयोक्तु सकाशाद्य स्वार्थ स्मयस्तत्र वर्तमानात् ञिन्नन्तात्स्मयते. कर्तर्यात्मनेपद भवति, अस्य चान्तस्य अकर्तर्यपि आकारादेश । जटिलो विस्मापयते । प्रयोक्तु स्वार्थे इति किम् ? साधनात्स्वाथ मा भूत् । रूपेण विस्मापयति । अकर्तर्यपीति किम् ? विस्मापनम । ङिन्निर्देशाद्यङ्लुकि न—सेष्मापयति ।

८३. बिभेतेर्भीष् च ।

प्रयोक्तु सकाशात्स्वार्थे वर्तमानात् ञिन्नन्ताद् बिभेते. कर्तर्यात्मनेपद भवति, अस्य च भीषादेशः । पक्षेऽन्तस्य अकर्तर्यपि आकारादेश । मुण्डो भीषयते । मुण्डो भापयते । प्रयोक्तु. स्वार्थे इति किम् ? कुञ्चिकया भाययति । अकर्तर्यपीति किम् ? भीषा, भापनम् । तिब्निर्देशाद् यङ्लुकि न मुण्डो बेभाययति ।

८४. मिथ्यया कृञोऽभ्यासे ।

मिथ्याशब्दयुक्तो य. कृञ् तस्मात् ञिन्नन्तान् अभ्यासेऽर्थे वर्तमानात् कर्तर्यात्मनेपद भवति । अभ्यासः—पुन. पुन क्रियाऽभ्यावृत्तिः । पद मिथ्या कारयते । स्वरादिदोषदुष्टमसकृदुच्चारयति, पाठयतीत्यर्थ. । मिथ्ययेति किम् ? पदं साधु कारयति । कृञ इति किम् ? पद मिथ्या वाचयति । अभ्यास इति किम् ? सकृत् पद मिथ्या कारयति । अक्रिया फलार्थं वचनम् ।

८५. परिमुहायमायस-पा-धेट्-वद-वस-दमाद-रुच-नृतः फलवति ।

फलवतीति भूम्न्यतिशायने वा वतु । तेन यत्क्रियायाः प्रधानं फलमोदनादि यदर्थमियमारभ्यते तद्वति कर्तरि

---

१. कर्मणि आत्मनेपद तु भवत्येव आकारार्थं वचनम् ।

विवक्षिते परिपूर्वान्मुहेः आङ्पूर्वाभ्यां यमियमिभ्यां पिबत्यादिभ्यश्च ञिन्नन्तेभ्यः कर्तर्यात्मनेपदं भवति । परिमोहयते चैत्रम् । आयामयते सर्पम् । आयामयते मैत्रम् । पाययते बटुम् । धापयते शिशुम् । वादयते शिशुम् । वासयते पान्थम् । दमयते अश्वम् । आदयते चैत्रेण । रोचयते मैत्रम् । नर्तयते नटम् । पिबत्यर्त्तिधेटामाहारार्थत्वादौदासीन्यनिवृत्त्यर्थतायां[1] अकर्मकत्वाच्च नृतेश्चलनार्थत्वाच्च शेषाणां स्वरूपतो विवक्षातो वाऽकर्मकत्वात् उत्तराभ्यां[2] परस्मैपदे प्राप्ते वचनम् । पा इति धेट्साहचर्यात् पिबतेर्ग्रहणं, न पातेः । वदसाहचर्याच्च वस इति वसतेर्न वस्तेरिति । पालयति चैत्रम् । वासयति मैत्रम् ।

८६. अनुपसर्गाद् ज्ञः ।

अविद्यमानोपसर्गाज्जानातेः फलवति कर्तर्यात्मनेपदं भवति । गां जानीते । अश्वं जानीते । अनुपसर्गादिति किम् ? स्वर्गं प्रजानाति । फलवतीति किम् ? परस्य गां जानाति । अकर्मकात् **'ज्ञः'** [३/३/७५] इति सूत्रेण सिद्धे सकर्मकार्थं वचनम् ।

८७. अपाद् वदः ।

अपपूर्वाद् वदतेः फलवति कर्तर्यात्मनेपदं भवति । एकान्तमपवदते । अपादिति किम् ? वदति । फलवतीति किम् ? अपवदति परं स्वभावतः ।

८८. समुदाङ्भ्यो यमोऽग्रन्थे ।

सम्, उत्, आङ्—इत्येतेभ्यः परात् यमेरग्रन्थविषये प्रयोगे फलवति कर्तर्यात्मनेपदं भवति । संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते वस्त्रम् । समुदाङ्भ्य इति किम् ? नियच्छति वाचम् । अग्रन्थ इति किम् ? वैद्यश्चिकित्सामुद्यच्छति । चिकित्साग्रन्थे उद्यमं करोतीत्यर्थः । फलवतीति किम् ? संयच्छति उद्यच्छति आयच्छति वा परस्य वस्त्रम् । आङ्पूर्वकादकर्मकान्निजाङ्गकर्मकाच्च **'आङो यमहनो निजाङ्गकर्मकाच्च'** [३/३/७७] इति सिद्धे अन्यकर्मकार्थं वचनम् ।

८९. नितः ।

नकार इत्संज्ञको येषां ते नितः । निद्भ्यो धातुभ्यः फलवति कर्तर्यात्मनेपदं भवति । यजन्—यजते । डुपचंपन्—पचते । लक्षन्ण्—लक्षयते । डुकृन्—कुरुते । डुभृन्क्—बिभृते । कण्डून्—कण्डूयते । ञिन्नन्त—गमयते । नित इति किम् ? गच्छति । फलवतीति किम् ? यजन्ति याजकाः । पचन्ति पाचकाः । कुर्वन्ति कर्मकराः । गमयत्यश्वं दमकः । नात्र स्वर्गौदनादि प्रधानं फलं कर्त्रा सबध्यते । यच्च दक्षिणावेतनादि सबध्यते न तत् क्रियायाः फलं प्रधानमिति । तच्चैतत्स्वार्थलक्षणं फलं सदऽसद्वा विवक्षानिबन्धनमेव ग्राह्यम् । तथैव लोके व्यवहारात् । तथाहि—क्वचिदऽसदपि सद् विवक्ष्यते । यथा शोषयते व्रीहीनातपः । शब्दः प्राक् स्वार्थमभिधत्ते ततो द्रव्यम् । परकर्मण्यपि प्रवृत्ताः कदाचिदाहुर्यजामहे, इमे पचामहे । यत्नाद् अस्मदीयमेवैतदिति क्वचित् सदप्यऽसद् विवक्ष्यते । यथा—इमे ब्रूमः । अवचनप्रतिषेधपरत्वेन प्रवृत्तेर्विवक्षितत्वात् । एव ऋद्धस्य राज्ञः पुरुषः इत्यत्र समासो न भवति असमर्थत्वादिति ब्रूमः । तदाहुः—

> क्रियाप्रवृत्तावाख्याता, कैश्चित् स्वार्थपरार्थता ।
> असती वा सती वापि, विवक्षितनिबन्धना ॥

९०. वोपपदेन गम्ये ।

गम्ये प्रतीयमाने । अनन्तरसूत्रपञ्चकेन यदात्मनेपदमुक्तं तदुपपदेन गम्ये फलवति कर्तरि वा भवति । स्वं शत्रुं परिमोहयते परिमोहयति वा । स्वां गां जानीते जानाति वा । स्वं शत्रुमपवदते अपवदति वा । स्वान् व्रीहीन् संयच्छते संयच्छति वा । स्वं यज्ञं यजते यजति वा । स्वमश्वं गमयते गमयति वा । स्वं शिरः कण्डूयते कण्डूयति वा ।

---

१ यदैते सकर्मकरूपां तटस्थतां त्यजन्ति तदा स्वभावत्यागाद् अकर्मका भवन्तीत्यर्थः ।

२. **'अणिग्यऽकर्मक…'** [३/३/१०२] इत्यादिना **'चल्याहारार्थ…'** [३/३/१०३] इत्यादिना च ।

६१. शेषात्परस्मै ।

पूर्वप्रकरणेनात्मनेपदनियमः कृतः । परस्मैपदं तु अनियतमिति नियमार्थमिदम् । उपर्युक्तादन्यः शेषः । येभ्यो धातुभ्यो येन विशेषेणात्मनेपदमुक्तं ततोऽन्यस्मादेव धातोः कर्तरि परस्मैपदं भवति । अनुबन्धोपसर्गार्थोपपदप्रत्यय-भेदाच्चाऽनेकधा शेषः । अनुबन्धशेषात्—भवति, अत्ति, बोभवीति, दीव्यति, गोपायति, पणायति, पुत्रीयति, पुत्रकाम्यति, अश्वति, मन्तुयति । उपसर्गशेषात्—प्रविशति, अधितिष्ठति, आगच्छति, विपश्यति । अर्थशेषात्—करोति, नयति, वदति । उपपदशेषात्—गृहे सचरति । साधुभ्यः संप्रयच्छति । साधु पदं कारयति । प्रत्ययशेषात्—शत्स्यति, मुमूर्षति ।

६२. अनुपराभ्यां कृञः ।

अनुपराभ्यां परात् करोतेः कर्तरि परस्मैपदं भवति । अनुकरोति, पराकरोति । गङ्गामनु कुरुते तपः—अत्र तु न करोतिरनुना सबध्यते । गन्धनादावर्थे ञित्त्वात् फलवति च प्राप्तस्यात्मनेपदस्याऽपवादोऽयम् ।

६३. अभिप्रत्यतिभ्यः क्षिपः ।

अभि, प्रति, अति—इत्येतेभ्यः परात् क्षिपेः कर्तरि परस्मैपदं भवति । अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति । प्रति क्षिपते भिक्षामिति नाय क्षिपिः प्रतिना सबध्यते । ञित्त्वात् फलवति प्राप्तस्यात्मनेपदस्याऽपवादोऽयम् । एवमुत्तर-सूत्रद्वयमपि ।

६४. प्राद्वहः ।

प्रपूर्वाद् वहतेः कर्तरि परस्मैपदं भवति । प्रवहति ।

६५. परेर्मृषश्च ।

परिपूर्वान्मृषेर्वहेश्च कर्तरि परस्मैपदं भवति । परिमृष्यति, परिवहति । मैत्रं परि मृष्यते, धनं परि वहते इत्यत्र न परिर्मृषिवहिभ्यां सबध्यते । वहेर्नेच्छन्त्यन्ये ।

६६. व्याङ्परिभ्यो रमः ।

वि, आङ्, परि—इत्येतेभ्यः पराद् रमेः कर्तरि परस्मैपदं भवति । विरमति, आरमति, परिरमति । ङित्त्वादात्मनेपदस्याऽपवादः ।

६७. वोपात् ।

उपपूर्वाद् रमेः कर्तरि परस्मैपदं वा भवति । भार्यामुपरमति उपरमते वा । उपसंप्राप्तिपूर्विकायां रतौ वर्तमानः अन्तर्भूतणिजर्थो वा रमिः सकर्मकः । उपरमति उपरमते वा सतापः । उपरमति उपरमते वाऽध्ययनात् । उपाद् रमेः सकर्मकात्परस्मैपदमेवेत्येके । आत्मनेपदमेवेत्यन्ये ।

६८. द्युद्भ्यो द्यातौ ।

वेत्यनुवर्तते । बहुवचनं गणार्थम् । द्युतादिभ्यो धातुभ्यो द्यादिविषये कर्तरि परस्मैपदं वा भवति । ङित्वान्नित्य-मात्मनेपदे प्राप्ते विकल्पार्थं वचनम् । अद्युतत्, अद्योतिष्ट । अरुचत्, अरोचिष्ट । द्यादाविति किम् ? द्योतते । द्युतादयः—द्युतङ्, रुचङ्, घुटङ्, रुटङ्, लुटङ्, लुठङ्, श्विताङ्, ञिमिदाङ्, ञिक्ष्विदाङ्, ञिष्विदाङ्, शुभङ्, क्षुभङ्, णभङ्, तुभङ्, स्रम्भुङ्, भ्रंसुङ्, स्रंसुङ्, ध्वंसुङ्, वृतुङ्, स्यन्दूङ्, वृधुङ्, शृधुङ्, कृपूङ् ।

६६. वृद्भ्यः स्यसनोः ।

बहुवचनं पूर्ववत् । वृतादयो द्युताद्यन्तर्गताः पञ्च । वृतादिभ्यः स्यकारादिप्रत्ययविषये सन्प्रत्ययविषये च

कर्तरि परस्मैपदं वा भवति। वर्त्स्यति, वर्तिष्यते। अवर्त्स्यत्, अवर्तिष्यत। सनि—विवृत्सति, विवर्तिषते। स्यन्दूङ्—स्यन्त्स्यति, स्यन्दिष्यते। सिस्यन्त्सति, सिस्यन्दिषते। वृधुङ्—वर्त्स्यति, वर्धिष्यते। विवृत्सति, विवर्धिषते। शृधुङ्—शर्त्स्यति, शर्धिष्यते। शिशृत्सति, शिशर्धिषते। कृपूङ्—कल्प्स्यति, कल्पिष्यते। चिकॢप्सति, चिकल्पिषते। स्यसनोरिति किम्? वर्तते, वर्धते।

१००. कृपस्तादौ।

कृपेस्तादिविषये कर्तरि परस्मैपदं वा भवति। कल्प्तासि, कल्पितासे।

१०१. क्यषः।

'डाज्लोहितादिभ्यः क्यष्' [४/१/२५] इति वक्ष्यते। तदन्ताद्धातोः कर्तरि परस्मैपदं वा भवति। पटपटायति, पटपटायते। लोहितायति, लोहितायते। निद्रायति, निद्रायते।

१०२. अञिन्यऽकर्मकप्राणिकर्तृकाञ्ञिनः।

वेति निवृत्तम्। अञिन्नवस्थायां यो धातुरकर्मकः प्राणिकर्तृकश्च तस्मात् ञिन्नन्तात् कर्तरि परस्मैपदं भवति। आस्ते चैत्रः, आसयति चैत्रम्। शेते मैत्रः, शाययति मैत्रम्। अञिनीति किम्? स्वयमेवारोहयमाणं हस्तिनं प्रयुङ्क्ते—आरोहयते। अञिनीति नकारः किम्? ञिजवस्थायामकर्मकप्राणिकर्तृकाञ्ञिन्नन्ताद् यथा स्यात्। चेतयमानं प्रयुङ्क्ते—चेतयति। अकर्मकेति किम्? कटं कुर्वाणं प्रयुङ्क्ते—कटं कारयते। प्राणिकर्तृकादिति किम्? शुष्यन्ति व्रीहयः। शोषयते व्रीहीनातपः। **'अवयवे च प्राण्यौषधिवृक्षेभ्यः'** [६/३/३८] इति पृथग्निर्देशात् इह लोके प्रतीता एव प्राणिनो गृह्यन्ते। ञिन इति किम्? आस्ते, शेते। नकारः किम्? अञिन्नवस्थायामकर्मकप्राणिकर्तृकात् ञिजन्तान्मा भूत्। चेतयते। **'नितः'** [३/३/८६] इत्यात्मनेपदस्याऽपवादोऽयम्।

१०३. चल्याहारार्थ-बुध-युध-नश-जनेङ्-प्रु-द्रु-स्रुभ्यः।

चलिरर्थः कम्पनम्। तदर्थेभ्य आहारार्थेभ्यो बुधादिभ्यश्च ञिन्नन्तेभ्यो धातुभ्यः कर्तरि परस्मैपदं भवति। चल्यर्थ—चलयति, कम्पयति, चोपयति शाखाम्। आहारार्थ—निगारयति, भोजयति, आशयति चैत्रमन्नम्। पय उपयोजयते मैत्रेणेति युजेरनाहारार्थत्वान्न भवति। बुध्—बोधयति पद्मं रविः। बोधयति धर्मं शिष्यम्। युध्—योधयति काष्ठानि। नश्—नाशयति पापम्। जन्—जनयति पुण्यम्। इङ्—सूत्रमध्यापयति शिष्यम्। प्रु—प्रावयति राज्यम्। प्रापयतीत्यर्थः। द्रु—द्रावयति लोहम्। विलाययतीत्यर्थः। स्रु—स्रावयति तैलम्। स्पन्दयतीत्यर्थः। प्रुद्रुस्रूणामचलनार्थार्थं[1] शेषाणां सकर्मकार्थमप्राणिकर्तृकार्थं च वचनम्।

---

१ प्राप्तिप्रस्रवणाद्यर्थम्। गमनार्थे तु चल्यर्थत्वेनैव भविष्यति।

चतुर्थश्चरण:

१. घादौ सिच् ।

धातो घादौ प्रत्यये परे सिच् प्रत्ययो भवति । अनैषीत् । अपाक्षीत् । अकृषातां कटौ चैत्रेण । इकारचकारौ विशेषणार्थौ ।

२. हशषो नाम्युपधादऽनिटोऽदृशः सक् ।

हशषान्तात् नाम्युपधाद् दृशिवर्जितादनिटो धातो सक् प्रत्ययो भवति घादौ प्रत्यये परे । सिचोऽपवाद । ककारः कित्मज्ञार्थ । दुह् - अधुक्षत् । विश्—अविक्षत् । लिह्श्लिषो—अलिक्षत् । द्विष्—अद्विक्षत् । हशष इति किम् ? अभैत्सीत् । नाम्युपधादिति किम् ? अधाक्षीत् । अनिट इति किम् ? अकोषीत् । अदृश इति किम् ? अद्राक्षीत् । वेटोऽपि पक्षे अनिट्त्वाद् भवति । न्यघुक्षत् । सेट् पक्षे तु न्यगूहीत् ।

३. स्पृशिमृशिकृषेर्वा ।

स्पृशादिभ्यो नाम्युपधेभ्योऽनिड्भ्यो धातुभ्यो घादौ प्रत्यये परे सक् प्रत्ययो वा भवति । अस्पृक्षत्, अस्प्राक्षीत्, अस्पार्क्षीत् । अमृक्षत्, अम्राक्षीत्, अमार्क्षीत् । अकृक्षत्, अक्राक्षीत्, अकार्क्षीत् । **'स्पृशमृशकृषतृपदृपसृपां वा'** [४/४/५१] इति वा अमागम ।

४. श्लिषः ।

श्लिषेरनिटो घादौ परे सक् प्रत्ययो भवति । आश्लिक्षत् कन्या चैत्र । पुष्यादित्वात् ङे प्राप्ते वचनम् । **पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्** इति ङस्य एव बाधो न णिच । आश्लेषि कन्या चैत्रेण । अनिट इति किम् ? श्लिषु दाहे—इत्यस्मात सेटो मा भूत् । अश्लेषीत् । अधाक्षीदित्यर्थ ।

५. नाऽसत्त्वाश्लेषे ।

श्लिषेर्धातोरप्राण्याश्लेषे वर्तमानात् घादौ परे सक् प्रत्ययो न भवति । उपाश्लिषत् जतु काष्ठ च । समाश्लिषद् गुरुकुलम् । पृथग्योगात्[1] **'हशषो नाम्युपधादनिट**···' [३/४/२] इत्यादिनापि प्राप्त प्रतिषिध्यते । व्यत्यश्लिक्षत काष्ठानि । कर्मणि सिच् प्रत्यय । असत्त्वाश्लेष इति किम् ? व्यत्यश्लिक्षन्त[2] मिथुनानि ।

---

१ यदि हि अनन्तरविहितस्यैव प्रतिषेध. स्यात्तदा श्लिषोऽसत्त्वाश्लेषे इत्येकमेव योग कुर्यात् । अथ उपाश्लिषद् जतु काष्ठ च—इत्यत्र पूर्वं **'हशषो नाम्युपधात्** ' [३/४/२] इति सक् प्राप्त , स च पुष्यादि ङेन बाध्यते । तस्य पुनर्विधानार्थ **'श्लिषः'** [३/४/४] इत्यनेन सक्, तस्य चाऽनेन प्रतिषेध । व्यत्यश्लिक्षत् काष्ठानि—इत्यत्र तु **'हशषो नाम्युपधात्**···' [३/४/२] इति सक् प्राप्त , स च कर्मण्यात्मनेपदित्वात् पुष्यादि ङेन न बाध्यते । तस्याप्यनेनैव प्रतिषेध इति भावार्थ. ।

२. अत्र पूर्वस्मात् परो विधि पूर्वविधि. इत्यकारस्य स्थानित्वात् **'अनतोऽन्तोऽदात्मने'** [३/४/८४] इत्यनेनादादेशो न भवति ।

६. **दुहदिहलिहगुहिभ्यः सको लोपो वात्मने तुवयोः ।**

दुहादिभ्यो धातुभ्यः परस्य सक्प्रत्ययस्य लोपो वा भवति तवर्गादौ वकारादौ चात्मनेपदे द्यादौ परे । **'सकोऽतः स्वरे'** [३/४/५२] इत्यत्र अत इति ग्रहणं ज्ञापयति सकः सर्वस्यैव लोप इति, अन्त्यस्य वर्णस्यैव लोपे तु तत्र अत इति ग्रहणं निरर्थकं स्यात् । अदुग्ध, अधुक्षत । अदुग्धाः, अधुक्षथाः । अधुग्ध्वम्, अधुक्षध्वम् । अदुह्वहि, अधुक्षावहि । दिह्—अदिग्ध, अधिक्षत । अदिग्धाः, अधिक्षथाः । अधिग्ध्वम्, अधिक्षध्वम् । अदिह्वहि, अधिक्षावहि । लिह्—अलीढ, अलिक्षत । अलीढाः, अलिक्षथाः । अलीढ्वम्, अलिक्षध्वम् । अलिह्वहि, अलिक्षावहि । गुह्—न्यगूढ, न्यघुक्षत । न्यगूढाः, न्यघुक्षथाः । न्यघूड्ढ्वम्, न्यघुक्षध्वम् । न्यगुह्वहि, न्यघुक्षावहि । आत्मने इति किम् ? अधुक्षत्, अधिक्षत् । तुवयोरिति किम् ? अधुक्षामहि, अधिक्षामहि ।

७. **ञिश्रिद्रुस्रुकमेः कर्त्तर्यङ् ।**

ञ्यन्तात् श्रि, द्रु, स्रु, कम्—इत्येतेभ्यश्च अङ् प्रत्ययो भवति कर्तरि द्यादौ परे । ङकारो ङित्कार्यार्थः । ञि—अचूचुरत्, अचीकरत्, औजढत्[1], अचीकमत । कर्मकर्तापि कर्त्तैव । अचीकरत कटः स्वयमेव । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । अचकमत । कर्तरीति किम् ? अकारयिपातां कटौ मैत्रेण । **'कमेर्ञिङ्'** [८/१/२] इति ञ्यन्तत्वादेवाङि सिद्धे कमिग्रहणं **'अशिति ते वा'** [४/१/४] इति ञिङभावेऽपि अङ्सिद्ध्यर्थम् ।

८. **श्विधेटो वा ।**

श्वि, धेट्—इत्येताभ्यां द्यादौ परे अङ् प्रत्ययो वा भवति कर्तरि । अशिश्वियत्, अश्वयीत्, अश्वत्[2] । अदधत्, अधासीत्, अधात्[3] । कर्तरीति किम् ? अधिपाता गावौ वत्सेन ।

९. **शास्त्यस्यतिवक्तिख्यातेर्ङः ।**

एभ्यो धातुभ्यो द्यादौ परे ङप्रत्ययो भवति कर्तरि । ङकारो ङित्कार्यार्थः । शासुक्—अशिषत् । व्यत्यशिषत । अन्वशिषत स्वयमेव । असुच्—आस्थत्, उपास्थत । वचक् ब्रूनक् वा —अवोचत्, अवोचत । ख्याक् चक्षङक् वा—आख्यत्, आख्यत । कर्तरीति किम् ? अशासिषातां शिष्यौ गुरुणा । अस्यतीति यन्निर्देशः किम् ? असक् भुवि, असन् गत्यादौ—आस्था मा भूत् । अभूत्, आसीत् । शेषाणां तिव्निर्देशो यङ्लुगुनिवृत्त्यर्थः । अस्यतेः पुष्यादित्वात् ङे सिद्धे वचनमात्मनेपदार्थम् ।

१०. **सर्त्यर्तितृपिदृपेर्वा ।**

एभ्यो द्यादौ परे ङप्रत्ययो वा भवति कर्तरि । असरत्, असार्षीत् । सर्तेः कर्तर्यात्मनेपदं न दृश्यते इति नोदाह्रियते । आरत्, आर्षीत्, समारत, समार्ष्ट । तिव्निर्देशो यङ्लुगुनिवृत्त्यर्थः । असरिसारीत्, आरारीत् । अतृपत्, अत्राप्सीत्, अतार्प्सीत् । अदृपत्, अद्राप्सीत्, अदार्प्सीत् । तृपदृपो पुष्यादित्वान्नित्यं प्राप्ते शेषाणां तु अप्राप्ते विकल्पार्थं वचनम् ।

११. **लिपिसिचिह्वः ।**

एभ्यो द्यादौ परे ङप्रत्ययो भवति कर्तरि । अलिपत् । असिचत् । आह्वत् ।

---

१ ऊढमाख्यातवान् औजढत् इत्यत्र परे द्वित्वे **'ह्रो ढो···'** [२/१/११२] इत्यस्यासिद्धे तदाश्रितत्वात् **'झषान्तस्योर्ध्वोऽधः'** [२/१/१११] इत्यस्याप्यसिद्धे **'जी यत कृत'**··· इति न्यायात अकारस्य स्थानित्वे **'नाम्नो द्वितीयाद्यथेष्टम्'** [८/१/७८] इत्यनेन ढतेति द्वित्वम् । ततो ह्रस्व ढत्वे तकारस्य धत्वे ढत्वे ढलोपे च पूर्वजकारान्कारस्य दीर्घत्वे **'ह्रस्वः'** [४/१/६६] इत्यनेन ह्रस्व. ।

२ **'ऋदिच्छ्विस्तम्भु···'** [३/४/१४] इति वा ङप्रत्ययः ।

३. **'शाच्छासाह्वाव्याधेटो वा'** [३/४/९०] इति वा सिज् लुक् ।

४. **'क्रियाव्यतिहारे···'** [३/३/२०] इत्यत्र गत्यर्थवर्जनात् ।

१२. वात्मने ।

लिप्यादेर्ह्यादौ परे ङप्रत्ययो वा भवति कर्तर्यात्मनेपदे। अलिपत, अलिप्त। असिचत, असिक्त। आह्वत, आह्वास्त।

१३. लृदित्पुष्यादिद्युतादेः परस्मै ।

लृदिद्भ्यो धातुभ्य पुष्यादिभ्यो द्युतादिभ्यश्च ह्यादौ परे ङप्रत्ययो भवति कर्तरि परस्मैपदे। लृदित्—अगमत्, असृपत्, अशकत्। पुष्यादि—अपुषत्, औचत्। अश्लिषत् जतु काष्ठं च। पुष्यादयो दिवाद्यन्तर्गतास्ते च परस्मैपद-समाप्तिपर्यन्तं विज्ञेयाः। द्युतादि—अद्युतत्, अरुचत्। द्युतादयो **'द्युद्भ्यो ह्यादौ'** [३/३/६८] इति सूत्रे परिगणिता। यन्निर्देश. किम्? पोषतिपुष्णात्यादिभ्यो मा भूत्। अपोषीत्, अभूषीत्, अपोपीत्, अकोषीत्। परस्मै इति किम्? समगंस्त, व्यत्यपुक्षत, व्यद्योनिष्ट।

१४. ऋदिज्जृ-श्वि-स्तम्भु¹-स्तुम्भु-म्रुचु-म्लुचु-ग्रुचु-ग्लुचु-ग्लुञ्चुभ्यो वा ।

ऋदिभ्यो धातुभ्यो जॄप्रभृतिभ्यश्च ह्यादौ परे ङप्रत्ययो वा भवति कर्तरि परस्मैपदे। अरुधत्, अरौत्सीत्। अभिदत्, अभैत्सीत्। अजरत्, अजारीत्। अश्वत्, अश्वयीत्, अशिश्वियत्। अस्तभत्, अस्तम्भीत्। अस्तुभत्, अस्तुम्भीत्। अम्रुचत्, अम्रोचीत्। अम्लुचत्, अम्लोचीत्। अग्रुचत्, अग्रोचीत्। अग्लुचत्, अग्लोचीत्। अग्लुचत्, अग्लुञ्चीत्। परस्मै इति किम्? अरुद्ध, अभित्त।

१५. पदेर्णिच् ते तलोपश्च ।

पदङ्च् गतौ—इत्यस्माद् धातोर्णिच् प्रत्ययो भवति ह्यादेस्ते परे, निमित्तभूतस्य तप्रत्ययस्य च लोप. कर्तरि। उदपादि भिक्षा। समपादि विद्या। त इति किम्? उदपत्साताम्। पदेरात्मनेपदित्वात् त इति आत्मनेपदप्रथमपुरुषैकवचन तकारो गृह्यते न तु परस्मैपदमध्यमपुरुषबहुवचनम्। एवमुत्तरत्र। णकारो वृद्ध्यर्थः। चकारो **'न कर्मणा णिच्'** [३/४/३७] इत्यत्र विशेषणार्थः।

१६. दीप-जन-बुध्य-पूरि-तायि-प्यायिभ्यो वा।

एभ्यो णिच् प्रत्ययो वा भवति ह्यादेस्ते परे, निमित्तभूतस्य तप्रत्ययस्य च लोप. कर्तरि। अदीपि, अदीपिष्ट। अजनि, अजनिष्ट। अबोधि, अबुद्ध। अपूरि, अपूरिष्ट। अतायि, अतायिष्ट। अप्यायि, अप्यायिष्ट। त इति किम्? अदीपिषाताम्। कर्तरीति किम्? अदीपि भवता। उत्तरेण नित्यमेव। बुध्यते यन्निर्देशान्नेह—बुधुन्—अबोधिष्ट।

१७. भावकर्मणोः ।

सर्वस्माद् धातो भावकर्मविहिते ह्यादेस्ते परे णिच् प्रत्ययो भवति निमित्तभूततलोपश्च। भावे—अशायि भवता। आसि भवता। कर्मणि—अकारि कटो मैत्रेण। अपाच्योदनश्चैत्रेण। भावकर्मणोरिति किम्? अशयिष्ट भवान्। अकृत कटं भवान्।

१८. स्वरहनग्रहदृशिभ्यः स्यसिच्सीतादेर्णिड् वा ।

पूर्वमनुवर्तते। स्वरान्ताद् धातो हन, ग्रह, दृश—इत्येतेभ्यश्च परेषा स्यसिच्सीतादीना णिडागमो वा भवति भावे कर्मणि च। णित्त्वाद् वृद्धि। टित्त्वादादौ। स्वरात्—दायिष्यते, दास्यते। अदायिष्यत, अदास्यत। अदायिषाताम्, अदिषाताम्। दायिषीष्ट, दासीष्ट। दायिता, दाता। शमिष्यते², शामिष्यते, शमयिष्यते। अशमिष्यत, अशामिष्यत,

---

१. स्तम्भुस्तुम्भू इति द्वावपि सौत्रौ धातू।

२. णिड् विकल्पे **'शमोऽदर्शने'** [४/२/१२७] इति दीर्घविकल्पे च त्रैरूप्यम्। णिटि तु **'णेरनिटि'** [४/२/५५] इति णेर्लोप।

अशमयिष्यत । अशमिषाताम्, अशामिषाताम्, अशमयिषाताम् । शमिषीष्ट, शामिषीष्ट, शमयिषीष्ट । शमिता, शामिता, शमयिता । एव चायिष्यते, चेष्यते । शायिष्यते, शयिष्यते । स्नाविष्यते, स्नोष्यते । लाविष्यते, लविष्यते । कारिष्यते, करिष्यते । तारिष्यते, तरिष्यते, तरीष्यते । हन्—घानिष्यते, हनिष्यते । अघानिषाताम्, अवधिषाताम्, अहसाताम् । घानिषीष्ट, वधिषीष्ट । घानिता, हन्ता । ग्रह—ग्राहिष्यते, ग्रहीष्यते । अग्राहिषाताम्, अग्रहीषाताम् । ग्राहिषीष्ट, ग्रहीषीष्ट । ग्राहिता, ग्रहीता । दृश्—दर्शिष्यते, द्रक्ष्यते । अदर्शिषाताम्, अदृक्षाताम् । दर्शिषीष्ट, दृक्षीष्ट । दर्शिता, द्रष्टा । एभ्य इति किम् ? पठिष्यते । स्यादीनामिति किम् ? चीयते । भावकर्मणोरिति किम् ? दास्यति, चेष्यति । प्रकृतिप्रत्यययोर्वचन-वैषम्यान्न यथासंख्यम् ।

१९. यक् शिति ।

सर्वस्माद् धातो भावकर्मविहिते शिति प्रत्यये यक् प्रत्ययो भवति । भावे—शय्यते भवता । शय्येत भवता । शय्यता भवता । अशय्यत भवता । भिद्यते कुसूलेन । कर्मणि—क्रियते कट. । क्रियेत कट । क्रियता कट । अक्रियत कट । अक्रियेतां कटौ । अक्रियन्त कटा । शितीति किम् ? अभावि, बभूवे, भविषीष्ट, भविता, भविष्यते, अभविष्यत भवता । एवमकारि कटो भवता । भावकर्मणोरिति किम् ? आस्ते, पचति ।

२०. अप् कर्तरि ।

धातुभ्य कर्तरि अप् प्रत्ययो भवति, शिति परे । पकार पित्कार्यार्थ । भवति, पचति, एधते, भाषते, चोरयति, पचन्, पचमानः, भारय, पारय, जनमेजय. । कर्तरीति किम् ? पच्यते । शितीति किम् ? बभूव, भविषीष्ट, भविता ।

२१. अदादेर्लुक् ।

अदादिभ्य परस्य अप्प्रत्ययस्य लुग् भवति । अत्ति, हन्ति, द्वेष्टि, बोभवीति, बोभोति, चर्करीति, चरिकर्ति, चरीकर्ति । अदादयो धातुपाठे द्रष्टव्या ।

२२. दिवादेर्यन् ।

दिवादिभ्यो धातुभ्य कर्तरि यन् प्रत्ययो भवति शिति परे । अपोऽपवाद । नकार 'अब्यनः' [४/४/६२] इत्यत्र विशेषणार्थः । दीव्यति, सीव्यति, दीव्यन् । दिवादयो धातुपाठेन गम्या ।

२३. भ्राश-म्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषि-यसि-संयसिभ्यो वा ।

एभ्य कर्तरि यन् प्रत्ययो वा भवति शिति परे । प्राप्ताप्राप्तविभाषेयम् । भ्राश्यते, भ्राशते । म्लाश्यते, म्लाशते । भ्राम्यति, भ्रमति । भौवादिकस्य भ्रम्यति । क्राम्यति, क्रामति । क्लाम्यति, क्लामति । त्रस्यति, त्रसति । त्रुट्यति, त्रुटति । लष्यति, लषति । यस्यति, यसति । संयस्यति, संयसति । यसिग्रहणेनैव सिद्धे संयसिग्रहणमुपसर्गान्तरपूर्वकस्य यसेर्निवृत्त्यर्थम्, तेन आयस्यति, प्रयस्यति इति नित्य यन् ।

२४. कुषिरञ्जेः कर्मणि परस्मै च ।

कुषिरञ्जिभ्या कर्मकर्तरि शिद्विषये परस्मैपद वा भवति तत्सनियोगे यन् च । यगात्मनेपदापवादौ । कुष्णाति पाद देवदत्त । कुष्यति पाद स्वयमेव । कुष्यते पाद. स्वयमेव । कुष्यन् पाद स्वयमेव । कुष्यमाण पाद स्वयमेव । रजति वस्त्र रजकः । रज्यति वस्त्र स्वयमेव । रज्यते वस्त्र स्वयमेव । रज्यद् वस्त्रं स्वयमेव । रज्यमानं वस्त्र स्वयमेव । कर्मकर्तरीति किम् ? कुष्णाति पाद रोग । रज्यति वस्त्र शिल्पी । शितीति किम् ? अकोषि, चुकुषे, कोषिष्यमाण, अरञ्जि, ररञ्जे, रङ्क्ष्यमाण स्वयमेव । परस्मैपदसंनियोगविज्ञानादिह न भवति । कतीह कुष्णाना. पादा । कतीह रजमानानि वस्त्राणि । **'शक्तिवयस्ताच्छील्ये'** [५/३/८] इत्यानश् । यकः परस्मैपदविकल्पविधानेनैव सिद्धे यन्विधान कुष्यन्ति[1], रज्यन्ति[2]—

१-२ नपुसकलिङ्गे बहुवचनम् ।

इत्यत्र 'अभ्यनः' [१/४/६२] इत्यनेन नित्यनुमागमार्थम् ।

२५. स्वादेर्नुः ।

स्वादिभ्यो धातुभ्य कर्तरि नु प्रत्ययो भवति शिति परे। अपोऽपवाद.। सुनोति, सुनुते। सुन्वन्, सुन्वान.। सिनोति, सिनुते। सिन्वन्, सिन्वान। शितीति किम्? असावीत्, सुषाव, सूयात्, सोता। स्वादयो धातुपाठादवगन्तव्या.।

२६. अक्षो वा ।

अक्षू व्याप्तौ—इत्यस्मान्नु. प्रत्ययो वा भवति कर्तरि शिति परे। पक्षे अप्। अक्ष्णोति, अक्षति।

२७. तक्षः स्वार्थे ।

वेत्यनुवर्तने। स्वार्थं तनूकरणम्। तस्मिन् वर्तमानात् तक्षू इत्येतस्मात् कर्तरि नु प्रत्ययो वा भवति शिति परे। तक्ष्णोति, तक्षति काष्ठम्। तक्ष्णुवान[1], तक्षमाण। स्वार्थे इति किम्? संतक्षति वाग्भि शिष्य— निर्भत्सयतीत्यर्थ।

२८. तुदादेरऽन् ।

तुदादिभ्यो धातुभ्य कर्तरि अन् प्रत्ययो भवति शिति परे। अपोऽपवाद। नकारो 'मुचादितृफदृफगुफशुभोभानां नुमनि' [४/३/२०] इत्यत्र विशेषणार्थ। तुदति, तुदते। तुदन्, तुदमान। शितीति किम्? अतौत्सीत्, अतौत्ताम्। तुदादयो धातुपाठाद् बोद्धव्या।

२९. रुधादेर्नम् ।

रुधादिभ्यो धातुभ्य कर्तरि नम् प्रत्ययो भवति शिति परे। अपोऽपवाद.। मित्वादन्त्यस्वरात् पर। रुणद्धि, रुन्धे। भिनत्ति, भिन्ते। भनक्ति। हिनस्ति, हिंसन्। शितीति किम्? अरौत्सीत्, अरौद्धाम्। अरुधन्, अरुधताम्। रुधादयो धातुपाठादवगन्तव्याः।

३०. कृन्तनादेरुप् ।

कृन्धातो तनादिभ्यश्च कर्तरि उप् प्रत्ययो भवति शिति परे। अपोऽपवाद। पकार. पित्कार्यार्थः। करोति, कुरुते। कुर्वन्, कुर्वाण.। तनोति, तनुते। तन्वन्, तन्वान। शितीति किम्? अतानीत्, अतनीत्। तनादयो धातुपाठे द्रष्टव्याः।

३१. क्र्यादेर्नाः ।

क्र्यादिभ्यो धातुभ्य कर्तरि ना. प्रत्ययो भवति शिति परे। अपोऽपवाद। क्रीणाति, प्रीणाति। शितीति किम्? अक्रैषीत्, अक्रैष्ट। क्र्यादयो धातुपाठाद् बोद्धव्या।

३२. स्तम्भु-स्तुम्भु-स्कम्भु-स्कुम्भु-स्कुम्भ्यो नुश्च ।

आद्याश्चत्वारो रोधनार्था धातव सौत्रा. स्कुञ् आप्रवणे—इत्येतेभ्य कर्तरि नुश्चकारात् ना प्रत्ययो भवति शिति परे। स्तभ्नोति, स्तभ्नाति। स्तुभ्नोति, स्तुभ्नाति। स्कभ्नोति, स्कभ्नाति। स्कुभ्नोति, स्कुभ्नाति। स्कुनोति, स्कुनाति। स्कुनुते, स्कुनीते। स्तम्भ्वादीनामुदित्करण क्त्वाक्तयोरिड्विकल्पनित्यप्रतिषेधौ यथा स्याताम्। स्तब्ध्वा, स्तम्भित्वा। स्तब्ध, स्तब्धवान्।

---

१. 'शक्तिवयस्ताच्छील्ये' [५/३/८] इत्यानश्।

३३. श्राद्धे सृजेर्णियगात्मने तथा ।

सृजेर्धातोः श्रद्धावति कर्तरि णियगात्मनेपदानि भवन्ति तथा[१] यथा विहितानि । असर्जि मालां धार्मिकः । सृज्यते मालां धार्मिकः । स्रक्ष्यते माला धार्मिकः । श्राद्ध इति किम् ? व्यत्यसृष्ट माले मिथुनम् । सृजति, स्रक्ष्यति माला मालिकः । तथेति वचनात् द्यादौ आत्मनेपदे ने णिच् तलोपश्च शिति च यक् इति सिद्धम् ।

३४. तपेस्तपःकर्मकात् ।

तपेर्धातोरर्थान्तरवृत्तित्वेन तपःकर्मकात् कर्तरि णियगात्मनेपदानि भवन्ति तथा । तप्यते तपः साधुः । तेपे तपांसि साधुः । तपिरत्र करोत्यर्थः । णिच् तु **'तपः कर्त्रनुतापे च'** [३/४/४०] इति प्रतिषेधान्न भवति । अन्वतप्त तपः साधुः । तपेरिति किम् ? कुरुते तपांसि साधुः । तप इति किम् ? उत्तपति सुवर्णं सुवर्णकारः । कर्मेति किम् ? तपांसि साधुं तपन्ति—दुःखयन्तीत्यर्थः ।

३५. एकधातौ कर्मक्रिययैकाऽकर्मक्रिये ।

एकस्मिन् धातौ कर्मस्थक्रियया पूर्वदृष्टया एका अभिन्ना सप्रत्ययाऽकर्मिका क्रिया यस्य तस्मिन् कर्तरि कर्मकर्तृरूपे धातोर्णियगात्मनेपदानि तथा भवन्ति । अकारि कटः स्वयमेव । क्रियते कटः स्वयमेव । करिष्यते कटः स्वयमेव । क्रियमाणः कटः स्वयमेव । चक्रे कटः स्वयमेव । अभेदि कुसूलः स्वयमेव । भिद्यते कुसूलः स्वयमेव । बिभिदे कुसूलः स्वयमेव । अत्र करोति कटं, भिनत्ति कुसूलं—इत्यादौ यैव कटादिकर्मणा निर्वृत्तिद्विधाभवनादिका क्रिया सैव सौकर्यादऽविवक्षिते कर्तृव्यापारे स्वातन्त्र्यविवक्षायां तस्मिन्नेव धातावऽकर्मिका च । एव चाऽकर्मत्वाद् भावेऽप्यात्मनेपदं भवति । क्रियते कटेन । भिद्यते कुसूलेन । एकधाताविति किम् ? पचत्योदनं चैत्रः । सिध्यत्योदनः स्वयमेव । कर्मक्रिययेति किम् ? साध्वसिश्छिनत्ति, साधु स्थाली पचति—इति साधनाधारक्रिययैकक्रिये मा भूत् । एकक्रिय इति किम् ? स्रवति उदकं कुण्डिका । स्रवत्युदकं कुण्डिकाया । अत्र विसृजति[२] निष्क्रामतीति क्रियाभेदात् । गलन्त्युदकं वलीकानि[३] । गलत्युदकं वलीकेभ्य इति । अत्रापि मुञ्चतीति पततीति क्रियाभेदात् नैकक्रियत्वम् । अकर्मक्रिय इति किम् ? भिद्यमानः कुसूलः पात्राणि भिनत्ति । अन्योन्यमाश्लिष्यत । हन्त्यात्मानमात्मा । एकस्य कर्मत्वं कर्तृत्वं च कथमिति चेत् । उच्यते—सर्वमपि हि कर्म स्वव्यापारे स्वातन्त्र्यमनुभूय[४] कर्तृव्यापारेण न्यक्कृत सत्कर्मतामनुभवति । कर्तृव्यापाराऽविवक्षाया तु स्वव्यापारे स्वातन्त्र्यात् कर्तृत्वमस्याऽव्यावृत्तमेव । यदाहु —

> निर्वृत्त्यादिषु तत्पूर्वमनुभूय स्वतन्त्रताम् ।
> कर्त्रन्तराणां[५] व्यापारे कर्म संपद्यते ततः ॥
>
> निवृत्तप्रेषणं[६] चैतत् स्वक्रियावयवे स्थितम् ।
> निवर्तमाने कर्मत्वे स्वे कर्तृत्वेऽवतिष्ठते ॥

३६. पचिदुहेः ।

पचिदुहिभ्यामेकधातौ कर्मस्थक्रियया पूर्वदृष्टयाऽकर्मिकया सकर्मिकया वा एकक्रिये कर्तरि कर्मकर्तृरूपे णियगात्मनेपदानि भवन्ति अपवादविषयं मुक्त्वा । अपाच्योदनः स्वयमेव । पच्यते ओदनः स्वयमेव । पक्ष्यते ओदनः स्वयमेव । अदोहि

---

१ अत्र णियकौ तथा विधीयेते । आत्मनेपदं तु मुख्यमेव विधीयते ।

२ विसर्गः विसर्जनमात्रं निष्क्रमणं तु विसर्गानन्तरं गमनमित्यनयोर्भेदः ।

३ वलीकः—छदिः प्रान्तभागः । नेव इति भाषायाम् ।

४ यतः कटं करोतीत्यादिषु स्वव्यापारे जननादिलक्षणे कटादि कर्म स्वातन्त्र्यमनुभवति स्वातन्त्र्याच्च कर्तृत्वम् ।

५ स्वव्यापारे स्वातन्त्र्यात् कटादिकर्मणः कर्तृरूपादन्यो वरटादिः कटकर्मकः कर्ता कर्त्रन्तरं तस्य ।

६ निवृत्तकर्तृव्यापारमित्यर्थः ।

गौ· स्वयमेव। दुग्धे गौः स्वयमेव। अदुग्ध गौः स्वयमेव। उदुम्बरं फलं पचति वायु·। उदुम्बर फलं पच्यते स्वयमेव। अपक्तोदुम्बर. फलं स्वयमेव। गा दोग्धि पयो गोपालक.। दुग्धे गौः पय· स्वयमेव। अदुग्ध गौः पय. स्वयमेव। अधुक्षत गौ· पय स्वयमेव। दुहिपच्यो· कर्मणि णिच. प्रतिषेध वक्ष्यति। तथा अविशेषेण[1] दुहेर्णिचो विकल्पं यकश्च[2] प्रतिषेधं वक्ष्यति। अकर्मकस्येह पूर्वेणैव सिद्धे सकर्मकार्थ वचनम्।

३७. न कर्मणा णिच्।

पचिदुहे· कर्मणा योगेऽनन्तरोक्ते कर्तरि णिच् न भवति। अपक्तोदुम्बरः फल स्वयमेव। अदुग्ध गौ. पय. स्वयमेव। कर्मणेति किम्? अपाच्योदन. स्वयमेव। अदोहि गौः स्वयमेव। अनन्तरोक्ते कर्तरीति किम्? अपाचि उदुम्बरः फल वायुना। अदोहि गौ. पयो गोपालकेन।

३८. रुधः।

रुधो धातोरनन्तरोक्ते कर्तरि णिच् न भवति। अरुद्ध गौः स्वयमेव। अनन्तरोक्ते कर्तरीति किम्? अरोधि गौर्गोपालकेन।

३९. स्वरदुहो वा।

स्वरान्ताद् धातोर्दुहेश्चाऽनन्तरोक्ते कर्तरि णिच् वा न भवति। अकृत, अकारि कट स्वयमेव। अलविष्ट, अलावि केदार स्वयमेव। अदुग्ध, अदोहि गौ स्वयमेव। स्वरदुह इति किम्? अभेदि कुसूल· स्वयमेव। अनन्तरोक्ते कर्तरीति किम्? अकारि कटश्चैत्रेण। अदोहि गौर्वल्लवेन।

४०. तपः कर्त्रऽनुतापे च।

तपेर्धातो कर्मकर्तरि कर्तरि अनुतापे चार्थे णिच् न भवति। अनुतापग्रहणाद्[3] भावे कर्मणि च। अन्ववातप्त कितव स्वयमेव। कर्तरि—अतप्त तपासि साधु। **'तपेस्तपःकर्मकात्'** [३/४/३४] इति णिच् प्राप्त·। अनुतापे—अन्वतप्त[4] चैत्रेण। अन्ववातप्त पाप[5] पापेन कर्मणा। कर्त्रनुतापे चेति किम्? अतापि पृथिवी राज्ञा।

४१. ञिस्नुश्र्यात्मनेपदाऽकर्मकेभ्यो यक् च।

ञ्यन्ताद् धातो स्नुश्रिभ्यां चात्मनेपदविधौ अकर्मकेभ्यश्च कर्मकर्तरि यक् चकारात् णिच्च न भवति। येभ्योऽकर्मकेभ्य आत्मनेपद विधीयते ते आत्मनेपदाऽकर्मकाः। ञि—पचत्योदन चैत्र, त मैत्र प्रायुक्त—अपीपचत् ओदन चैत्रेण मैत्र। पुनरोदनस्य सुकरत्वेन कर्तृत्वे अपीपचतौदनः स्वयमेव। यदि वा स्वयमेव पच्यमान ओदन· स्व प्रायुक्त—अपीपचतौदन. स्वयमेव। उभयत्र स्वयमेव अपाचि इत्येवार्थ.। अचूचुरत् गां चैत्र। अचूचुरत गौः स्वयमेव। पुच्छमुत्क्षिपति—उत्पुच्छयते गौ.। अन्तर्भूतञ्यर्थत्वात् सकर्मकत्वे उदपुपुच्छत गा देवदत्त। उदपुपुच्छत गौ· स्वयमेव। यद्वा उत्पुच्छामकार्षीदिति ञिचि उदपुपुच्छद् गा देवदत्त·। उदपुपुच्छत गौ स्वयमेव। स्नु—प्रास्नावीत् गां देवदत्त.। प्रास्नोष्ट गौ स्वयमेव। श्रि—उदशिश्रियत् दण्ड दण्डी। उदशिश्रियत दण्ड· स्वयमेव। आत्मनेपदाऽकर्मक[6]—व्यकार्षीन्

---

१ कर्मणि सत्यसति वेत्यर्थ। अविशेषेणेत्युक्तेऽपि कर्मणि **'न कर्मणा णिच्'** [३/४/३७] इति नित्य प्रतिषेध अकर्मणि तु **'स्वरदुहो वा'** [३/४/३९] इति विकल्प।

२ **'भूषार्थसन्किरादिभ्यः''** [३/४/४२] इति सूत्रस्थकिरादिगणे पाठात्।

३ नन्वनेन सामान्येन सानुतापेऽननुतापे च कर्तरि कर्मकर्तरि च भविष्यति किमनुतापग्रहणेन इति आशङ्कया आह''।

४ पश्चात्तपनं कृतमित्यर्थ·। अग्रेतने तु पश्चात्ताप कारित इत्यर्थ।

५. दुष्ट.।

६. येषामकर्मकाणामात्मनेपद व्यधायि तेषामित्यर्थ।

सैन्धव चैत्रः। वलगयति स्म इत्यर्थः। व्यकृत[1] सैन्धव स्वयमेव। विकरोतिर्वल्गनेऽन्तर्भूतञ्यर्थ कर्मस्थक्रियः। व्यकार्षीत् कटं चैत्रः। व्यकृत कट. स्वयमेव। आवधीत् गा गोपः। आहत[2] गौ स्वयमेव। व्यनासीत् पृथिवी रविः। व्यनस्त[3] पृथिवी स्वयमेव। णिच्निषेधात् णिट् भवत्येव। पाचिषीष्ट, पाचिता ओदन स्वयमेव। प्रास्नाविष्ट, प्रास्नाविषीष्ट गौः स्वयमेव। उच्छ्रायिषीष्ट, उच्छ्रायिता दण्डः स्वयमेव। आघानिष्ट आघानिषीष्ट गौः स्वयमेव। अन्ये तु एभ्यो णिटोऽपि प्रतिषेधमिच्छन्ति। तन्मते पाचयिता, पाचयिष्यते ओदन। प्रस्नोता, प्रस्नोष्यते गौ। उच्छ्रयिता, उच्छ्रयिष्यते दण्डः। आहन्ता, आहनिष्यते गौ स्वयमेव इत्येव भवति। यक्प्रतिषेधो यथा—कारयते कट स्वयमेव। चोरयते गौ स्वयमेव। उत्पुच्छयते गौ स्वयमेव। स्नु—प्रस्नुते गौ स्वयमेव। श्रि—उच्छ्रयते दण्ड स्वयमेव। आत्मनेपदाऽकर्मक—विकुर्वते सैन्धवाः स्वयमेव। आहते गौ. स्वयमेव। एतान्यन्तर्भूतञ्यर्थत्वेन सकर्मकत्वात् गवादेः कर्मकर्तृत्वम्। यत्र तु ञ्यर्थो नास्ति तत्र कर्तृतैव, यथा प्रस्नौति गौर्दोग्धुः कौशलेन।

४२. भूषार्थसन्किरादिभ्यो णिञ्च।

भूषार्थेभ्य सन्प्रत्ययान्तेभ्य किरादिभ्यश्च धातुभ्य कर्मकर्तरि णिञ्चकारात् यक् च प्रत्ययौ न भवत। णिरुत्सृष्टानुबन्धो णिचणिटोर्ग्रहणार्थः। भूषार्थ—अलमकार्षीत् कन्या चैत्र। अलमकृत कन्या स्वयमेव। एवमलंकरिष्यते, अलंकुरुते कन्या स्वयमेव। पर्यस्कार्षीत कन्या चैत्र। पर्यस्कृत, परिस्करिष्यते, परिस्कुरुते कन्या स्वयमेव। अबूभुषत् कन्या छात्र.। अबूभुषत, भूषयिष्यते, भूषयते कन्या स्वयमेव। अममण्डत कन्या छात्र। अममण्डत, मण्डयिष्यते, मण्डयते कन्या स्वयमेव। भूषिमण्ड्योर्ण्यन्तत्वेनैव निषेधे सिद्धे णिट्प्रतिषेधार्थं भूषार्थपदाहरणम्। सन्नन्त अचिकीर्षीत कट चैत्र। अचिकीर्षिष्ट, चिकीर्षिष्यते, चिकीर्षते कट स्वयमेव। अबिभित्सीत कुसूल चैत्र। अबिभित्सिष्ट, बिभित्सिष्यते, बिभित्सते कुसूल स्वयमेव। किरादि—अकारीत् पाशु करी। अकीर्ष्ट, कीर्षीष्ट, किरते पाशु. स्वयमेव। एवमवाकीर्ष्ट, अवकीर्षीष्ट, अवकिरते पाशु. स्वयमेव। अगारीत् ग्रास चैत्र। अगीर्ष्ट, गीर्षीष्ट, गिरते ग्रास स्वयमेव। एव न्यगीर्ष्ट, निगीर्षीष्ट, निगिरते ग्रासः स्वयमेव। अदुग्ध गौ स्वयमेव। दुग्धे गौ स्वयमेव। दुग्धे गौ पय स्वयमेव। कथमदोहि गौ स्वयमेव? दुहेर्णिज्विकल्प उक्तः। अवोचत् कथा चैत्र। अवोचत, ब्रूते कथा स्वयमेव। अश्रन्थीत् माला मालिक। अश्रन्थिष्ट, श्रथ्नीते, श्रन्थते माला स्वयमेव। अग्रन्थीत् ग्रन्थ विद्वान्। अग्रन्थिष्ट, ग्रथ्नीते, ग्रन्थते ग्रन्थ स्वयमेव। श्रन्थिग्रन्थी क्र्यादौ युजादौ वा। अनसीत् दण्ड दण्डी। अनस्त नमते दण्ड स्वयमेव। परिणमति मृद कुलाल। परिणमते मृत्स्वयमेव। कृ, गृ, दुह, ब्रू, श्रन्थ्, ग्रन्थ्, नम् इति किरादयः। नम[5] अन्तर्भूतञ्यर्थत्वेन सकर्मकत्वात् दण्डादेः कर्मकर्तृत्वम्। यत्र तु ञ्यर्थो नास्ति तत्र कर्तृतैव। यथा नमति पल्लवो वातेन। ननु कर्मस्थया क्रियया एकाकर्मक्रिये कर्तरि णियगात्मनेपदानि भवन्ति। पूर्वसूत्रे ञ्यन्तानां[6] प्रयोजकव्यापार अत्र तु सन्नन्तानामिच्छाकर्तृस्थैव[7] क्रियेति णियकोः प्राप्तिरेव नास्ति किं प्रतिषेधेन? उच्यते—प्रयोजक व्यापारस्येच्छायाश्च तदर्थत्वात् करोत्यादिक्रियारूपस्य प्रकृत्यर्थस्य प्राधान्य, तस्य च कर्मस्थत्वात् ञिसन्नन्तानामपि कर्मस्थक्रियत्वम्। तथा ब्रूते[8] कथेत्यत्र वचन शब्दप्रकाशनफलत्वात्[9] उपाध्यायेनोक्तः करोतीतिवत् प्रेरणार्थत्वात्[10] वा कर्मस्थक्रियारूपम्। भूषाक्रियाणा न भूषाफल शोभाख्य कर्मणि दृश्यत इति कर्मस्थक्रियत्वम्। एवमन्यत्रापि भावनीयम्।

---

१. **'वेः शब्दकर्माऽकर्मकावनाशे'** [३/३/४३]।

२. **'आङो यमहनो निजाङ्गकर्मकाच्च'** [३/३/७७]।

३ **'व्युदस्तपः'** [३/३/७८]।

४ ननु स्नुधातुरकर्मक तत्कथ अस्य कर्मस्थक्रियत्वमित्याह…।

५ ननु नमधातुरकर्मकस्तत्कथमस्य कर्मस्थक्रियत्वमित्याह…।

६ यथा कुर्वन्त प्रयुङ्क्ते इत्यत्र हि प्रयोजकक्रिया देवदत्तादौ स्थिता, यतो देवदत्त कटादि कुर्वन् चैत्रेण प्रयुक्त स च कर्तैव।

७ इच्छाया. प्राणिधर्मत्वात्। यश्च इच्छति स कर्तैव।

८ ननु वचनक्रिया देवदत्ते कर्तरि स्थिता न तु कथाकर्मणि तत्कथ कर्मस्थक्रियत्वमित्याह…।

९. अस्या ये शब्दास्ते प्रकाशमाना वचनेन प्रकाश्यन्ते इति वचन कर्मस्थक्रियारूपम्।

१०. अयमर्थ —प्रेरणार्थो वा अत्र ब्रूञ्। ततश्च ब्रूते इति कोऽर्थः? शिष्येण बुध्यमाना बोधयतीत्यर्थ.।

४३. साधनक्रियया क्वचित् ।

एकधातौ पूर्वदृष्टया साधनस्थया क्रियया एकाकर्मक्रिये[1] कर्तरि णियगात्मनेपदानि क्वचिद् भवन्ति । परिवारयन्ति कण्टकं पुरुषा वृक्षम् । परिवारयन्ते कण्टका वृक्ष स्वयमेव । क्वचिन्न भवति---साध्वसिश्छिनत्ति ।

४४. हसान्नाहेरानः ।

पूर्वप्रपञ्चो निवृत्त । हसान्ताद् धातो परस्य नाप्रत्ययसयुक्तस्य हेः स्थाने आन आदेशो भवति । पुषाण, मुषाण, उत्तभान, विष्कभाण । हसादिति किम् ? लुनीहि । नाहेरिति किम् ? अश्नाति, उत्तभ्नुहि, विस्कम्नुहि ।

४५. दिस्योर्लोपः ।

हसान्ताद् धातो परयोर्दिस्योर्लोपो[2] भवति । अवट्, अवड् । अधोक्, अधोग् । अलेट्, अलेड् । हसादिति किम् ? अभवत्, अभव । दिसाहचर्यात्सिरपि दिबादरेव गृह्यते, तेनेह न---भिनन्सि ।

४६. अस्तिसिज्भ्यामीट् ।

हसादित्यनुवर्तते । हसान्तादस्तेर्धातोर्हसान्ताच्च सिच्प्रत्ययान्तात् परयोर्दिस्योरीडागमो[3] भवति । आसीत्, आसी । अकार्षीत्, अकार्षी । अवादीत्, अवादी । दिस्योरिति किम् ? अस्ति, असि । हसादिति किम् ? अभूत्, अदात् ।

४७ रुत्पञ्चकाच्छिति ।

रुदि-स्वपि-अनि-श्वसि-जक्षि-लक्षणात् रुत्पञ्चकात् परयोर्दिस्योरीडागमो भवति शिद्विषये । अरोदीत्, अरोदी । अस्वपीत्, अस्वपी । प्राणीत्, प्राणी । अश्वसीत्, अश्वसी । अजक्षीत्, अजक्षीः । दिस्योरिति किम् ? रोदिति, रोदिषि । रुत्पञ्चकादिति किम् ? अजागः ।

४८. अवश्चाऽट् ।

अत्ते रुत्पञ्चकाच्च परयोर्दिस्योरडागमो भवति शिद्विषये । आदत्, आदः । अरोदत्, अरोदः । पूर्वेण ईडपि---अरोदीत्, अरोदी । अस्वपत्, अस्वप । प्राणत्, प्राण । अश्वसत्, अश्वस । अजक्षत्, अजक्ष । दिस्योरिति किम् ? अत्ति, अत्सि, रोदिति, रोदिषि ।

४९. ह्रस्वझसावनिटः सिचो लोपो झसे ।

ह्रस्वान्तात् झसान्ताच्च धातोः परस्याऽनिटः सिचो लोपो भवति झसे परे । ह्रस्व---अकृत, अकृथा । समस्थित[4], समस्थिथा । आहत, आहथा[5] । झस अभित्त, अभित्था । अपक्त, अपक्था । ह्रस्वझसादिति किम् ? अमस्त, अमस्था । अच्योष्ट, अच्योष्ठा । अनिट इति किम् ? व्यद्योतिष्ट, व्यद्योतिष्ठा । झसे इति किम् ? अपक्षाताम्, अभित्साताम्, अभित्सत । लोपस्य स्थानिवत्त्वात्सिचि विधीयमाना वृद्धिस्तदभावेऽपि सिद्धा भवति, तेन अभैत्ताम्, अभैत्तम्, अभैत्त. अवात्ताम्, अवात्तम्, अवात्त इत्यादि सिद्धम् ।

---

१ एतदधिकारायातत्वात् योजित क्वचिद् ग्रहणात् तु सकर्मकत्वेऽपि भवति ।

२ अत्र दि, सि---इत्येतौ दिबादेरेव गृह्येते, शादेस्तु धातो परौ न लभ्येते सिचा व्यवधानात् ।

३. अत्र अस्ते परौ दिबादेरेव दिसी गृह्येते सिचस्तु सम्भवत्वात् शादे । अस्तेस्तु शादौ हसान्तत्वमेव नास्ति भू इत्यादेशात ।

४ **'विप्रसमवेभ्यः'** [३/३/३४] इत्यात्मनेपदम् ।

५. **'यमिरमिनमिगमिहनि'''** [४/३/४१] इति अन्तलोप ।

५०. इट ईटि ।

इटः परस्य सिचो लोपो भवति ईटि परे । अवादीत्, अलावीत्, अदेवीत् । इट इति किम् ? अकार्षीत्, अरौत्सीत् । ईटि इति किम् ? अभाणिषम्, अलाविष्टम् ।

५१. सो धि वा ।

धातोर्धकारादौ प्रत्यये परे सकारस्य लोपो वा भवति । चकाधि, चकाद्धि । आशाध्वम्, आशाद्ध्वम् । अलविढ्वम्, अलविड्ढ्वम्[1] । सिच्यनुवर्तमाने सग्रहणं सामान्यसकारपरिग्रहार्थं, तेन प्रकृतिसकारस्याऽपि लोपो भवति । विकल्पं नेच्छन्त्येके । अन्ये तु सिच एव नित्यं लोपमिच्छन्ति ।

५२. सकोऽतः स्वरे ।

स्वरादौ प्रत्यये परे सकोऽकारस्य लोपो भवति । अधुक्षाताम्, अधुक्षाथाम्, अधुक्षि । अधिक्षाताम्, अधिक्षाथाम्, अधिक्षि । स्वरे इति किम् ? अधुक्षत, अधिक्षत । अधुक्षन्नित्यकारलोपेऽपि स्थानिवद्भावादन्तोऽदादेशो न भवति । **'षष्ठ्यान्त्यस्य'** [८/४/१२३] इत्यनेनैव अन्त्यस्य अकारस्यैव लोपे सिद्धे अत इति ग्रहणं ज्ञापयति सकः सर्वस्यैव लोपो भवति । तेन **'गुहविहलिह…'** [३/४/६] इति विधीयमानस्य सर्वस्यैव सको लोपः ।

५३. व्मोराः ।

अत इत्यनुवर्तते । वकारादौ मकारादौ च प्रत्यये परे अकारस्य आकारादेशो भवति । पचाव, पचाम, पचावहे, पचामहे । अत इति किम् ? चिनुव, चिनुम । रुवः, रुमः ।

५४. आतामातेआथामाथे आत इः ।

अकारात्परेषामातामातेआथामाथे इत्येतेषामाकारस्य इकारादेशो भवति । शित्करणमुत्तरार्थम् । पचेताम्, पचेते । पचेथाम, पचेथे । अत इति किम् ? मिमाताम्[2], मिमाते । मिमाथाम्, मिमाथे ।

५५. यो यादादेः ।

अकारात्परस्य यादादिसबन्धिनो याशब्दस्य इकारादेशो भवति । शित्त्वात्सर्वस्य । पचेत्, पचेताम् । पचेः, पचेतम्, पचेत । पचेव, पचेम । अत इति किम् ? अद्यात् ।

५६. याम इयम् ।

अकारात्परस्य याम इयमित्यादेशो भवति । भवेयम्, पचेयम् ।

५७. युस इयुस् ।

अकारात् परस्य युस इयुसित्यादेशो भवति । भवेयुः, पचेयुः ।

५८. शासस्हनो हिना शाध्येधिजहिः ।

शास्[3], अस्, हन्—इत्येतेषां हिना सह शाधि, एधि, जहि इत्येते आदेशा यथासंख्यं भवन्ति । शाधि, एधि,

---

१ सिष् इडागमे च सिषः षत्वे च **'ष्टुभिः ष्टुः'** [१/३/६] इति धस्य ढत्वे **'झबे जबा झसानां'** [१/३/४३] इति षस्य डत्वे च सिद्धम्।

२. मांङ्क्—मानशब्दयोः ।

३. शास्हन्साहचर्यात् असिति आदादिकस्य ग्रहणम् ।

जहि । शास्हनोर्यङ्लुक्यपि[1]—शाधि, जहि । हनेस्तु यङ्लुकि नेच्छन्त्यन्ये । जङ्घहि ।

५९. हुझल्भ्यो हेर्धिः ।

हुधातोर्झलन्तात् हान्ताच्च परस्य हे स्थाने धिरित्यादेशो भवति । जुहुधि । छिन्द्धि, भिन्द्धि, अद्धि, विद्धि । लीढि । हुझल्भ्य इति किम् ? क्रीणीहि, प्रीणीहि । हुझल्भ्यः परत्वेन हेर्विशेषणादिह न भवति । रुदिहि, स्वपिहि । हेरिति किम् ? जुहोतु, अत्तु, लेढु ।

६०. अतः प्रत्ययाल्लोपः ।

धातोः परो योऽकारान्तः प्रत्ययस्तस्मात्परस्य हेर्लोपो भवति । पच, पठ, भव, दीव्य, तुद, चोरय । अत इति किम् ? युहि, राध्नुहि, प्राप्नुहि । प्रत्ययादिति किम् ? पापहि[2], वावहि[3] ।

६१. असंयोगादुतः ।

असंयोगात्परो य उकारान्त प्रत्ययस्तदन्तात् परस्य हेर्लोपो भवति । सुनु, चिनु, कुरु । असंयोगादिति किम् ? अर्णुहि, अक्ष्णुहि । असंयोगादित्युतो विशेषणादिहापि न भवति । आप्नुहि, राध्नुहि । उत इति किम् ? क्रीणीहि, प्रीणीहि । प्रत्ययादिति किम् ? युहि, रुहि ।

६२. वमोर्वाऽपिति ।

प्रत्ययादिति उत इति च पञ्चम्यन्तमपि व्यधिकरणषष्ठ्यन्ततया विपरिणम्यते । असंयोगात्परो य उकारस्तस्य प्रत्ययसम्बन्धिनो लोपो वा भवति वकारादौ मकारादौ चाऽपिति प्रत्यये । सुन्वः, सुनुवः । सुन्मः, सुनुमः । सुन्वहे, सुनुवहे । सुन्महे, सुनुमहे । तन्वः, तनुवः । तन्मः, तनुमः । तन्वहे, तनुवहे । तन्महे, तनुमहे । वमोरिति किम् ? सुनुतः, तनुतः । अपितीति किम् ? सुनोमि, तनोमि । उत इति किम् ? क्रीणीवः, प्रीणीमः । प्रत्ययस्येति किम् ? युवः, युमः । असंयोगादिति किम् ? तक्ष्णुवः, तक्ष्णुमः । अर्णुवः, अर्णुमः । असंयोगादित्युतो विशेषणादिहापि न भवति । आप्नुवः, आप्नुमः ।

६३. कृनो ये च ।

कृनः परस्य उकारस्य यकारादौ वकारमकारादौ चाऽपिति प्रत्यये लोपो भवति । कुर्यात्, कुर्याताम्, कुर्युः । कुर्वः, कुर्मः । कुर्वहे, कुर्महे । ये चेति किम् ? कुरुतः । अपितीति किम् ? करोमि ।

६४. अतः शित्युत् ।

शित्यपिति प्रत्यये य उकारस्तन्निमित्तो यः कृनोऽकारस्तस्य उकारादेशो भवति । कुरुतः, कुर्वन्ति, कुर्यात्, कुरु, कुरुताम्, अकुरुताम्, कुर्वन्, कुर्वाणः । उविधानबलाद् गुणो न भवति । ओकार एवाऽन्यथा विधीयेत । उकारनिमित्तत्वेनाकार-विज्ञानात् कुर्यादित्यादावुकारलोपेऽपि भवति अडागमस्य च न भवति । अकुरुत । अपितीति किम् ? करोति ।

६५. श्नसस्योर्लोपः ।

अत इत्यनुवर्तते । श्नम्प्रत्ययस्य अस्तेश्च धातोरकारस्य लोपो भवति शित्यपिति प्रत्यये । रुन्द्धः, रुन्धन्ति, रुन्ध्यात्, रुन्धन्, रुन्धानः । स्तः, सन्ति । स्थः, स्थ । स्वः, स्मः । स्यात् । स्तात्, स्ताम् । सन् । अपितीति किम् ? रुणद्धि, अस्ति । अत इति किम् ? अन्त्यस्य[4] मा भूत् । आस्ताम्, आसन् । तिब्निर्देशः किम् ? अस्यतेर्मा भूत् । अस्यतः ।

---

१ अस्तेस्तु स्वरादित्वात् यङ् नास्ति ।

२-३ पयङ्, वयङ्—गतौ ।

४. अत इत्यधिकाराऽभावे षष्ठ्यान्त्यस्येति अस्तेः सस्य लोपः स्यात् ।

६६. वा द्विषातोऽनो जुस् ।

द्विष आकारान्ताच्च धातोः परस्य शितोऽपितो[1]ऽनः स्थाने जुसादेशो वा भवति । अद्विषुः, अद्विषन् । अयुः, अयान् । अरुः, अरान् । अलुः, अलान् । अदधुरित्यत्र परत्वान्नित्यमेव । जकारः 'पुस्जुसोः' [४/२.३] इत्यत्र विशेषणार्थः ।

६७. सिज्विदोऽभुवः ।

सिच्प्रत्ययाद्[2] विदश्च धातोः परस्याऽनः स्थाने जुसादेशो भवति, न चेद् भुवः परः सिच् भवति । अकार्षुः, अहार्षुः, अगुः, अदुः[3], अधुः, अपुः, अस्थुः । विद्—अविदुः । अविदन्नित्यपि कश्चित् । अभुव इति किम् ? अभूवन्[4] ।

६८. द्व्युक्तजक्षपञ्चकात् ।

द्विरुक्तं यस्य स द्व्युक्तः । जक्षादीनां पञ्चकं जक्षपञ्चकम् । द्व्युक्ताद् धातोः जक्षपञ्चकाच्च परस्य शितोऽपितोऽनः स्थाने जुसादेशो भवति । अजुहवुः, अबिभयुः, अददुः, अनेनिजुः । भुवो यङ्लुकि ? अबोभवुः । जक्षादि—अजक्षुः, अदरिद्रुः, अजागरुः, अचकासुः, अशासुः । एभ्य इति किम् ? अदिहन्, अलिहन् । शित इति किम् ? आरन् ।

६९. अन्तो नो लोपः ।

द्व्युक्तजक्षपञ्चकात् परस्य शितोऽपितः सम्बन्धिनोऽन्तो नकारस्य लोपो भवति । जुह्वति, जुह्वतु । जुह्वत्, जुह्वती, जुह्वतः, जुह्वतम् । ददति, ददतु । ददत् । ददती स्त्री कुले वा । जक्षति, जक्षतु । जक्षत् । दरिद्रति, दरिद्रतु । दरिद्रत् । दरिद्रती स्त्री कुले वा । जाग्रति, जाग्रतु । जाग्रत् । चकासति, चकासतु । चकासत् । शासति, शासतु । शासत् । एभ्य इति किम् ? दिहन्ति, लिहन्ति ।

७०. शौ वा ।

द्व्युक्तजक्षपञ्चकात् परस्यान्तो नकारस्य लोपो वा भवति शिप्रत्यये । ददति, ददन्ति । जक्षति, जक्षन्ति । दरिद्रति, दरिद्रन्ति । जाग्रति, जाग्रन्ति । चकासति, चकासन्ति । शासति, शासन्ति कुलानि । शाविति किम् ? ददती, दधती कुले ।

७१. नश्चातः ।

द्व्युक्तजक्षपञ्चकस्य नाप्रत्ययस्य च आकारस्य लोपो भवति शित्यपिति प्रत्यये । मिमते, मिमताम्, अमिमत । संजिहते, संजिहताम्, समजिहत । याथति, याथतु । दरिद्रति, दरिद्रतु । ना—क्रीणन्ति, क्रीणन्तु, अक्रीणन् । लुनते, लुनताम्, अलुनत । पुनते, पुनताम्, अपुनत । नश्चेति किम् ? यान्ति, वान्ति । आत इति किम् ? बिभ्रति, जक्षति । अपितीति किम् ? अजहाम्, अक्रीणाम् ।

७२. एषामीर्हसेऽनपिद्दाधः ।

एषां द्व्युक्तजक्षपञ्चकनाप्रत्ययानामपिद्दाधावर्जितानामाकारस्य शित्यपिति हसादौ परत ईकारो भवति ।

---

१. विभक्तिविपरिणामेन षष्ठी ।

२. अपिदनुवर्तनमुत्तरार्थम् ।

३. भूवर्जनेन सिच् प्रत्ययो लभ्यते । अन्यथा षिचन्ज् क्षरणे इत्यस्य ग्रहणं स्यात् । सिचः परो ह्यादेरेवान् गृह्यते सम्भवत्वात् । विदस्तु दिवादेरेव । ह्यादेस्तु सिज्द्वारैव सिद्ध्यति अवेदिषुरिति ।

४. भुवो वर्जनादेव पूर्वं अनो जुस्, पश्चात् सिचो लुक् इद विज्ञायते । अन्यथा पूर्वं सिचो लुकि भुव प्राप्तिरेव नास्ति ।

५ यदा यङ्लुगन्तस्तदापि **प्रकृतिग्रहणे यङ्लुगन्तस्याऽपि** इति न्यायात् जुस् न भवति, नाप्युत्तरेण शितोऽभावात् । ततो अबोभूवाग्रति भवति ।

मिमीते, मिमीताम्, अमिमीत। दांप्दैपोर्यङ्लुकि—दादीतः, दादीथः। जक्षादिषु दरिद्रातेरिद् वक्ष्यते शेषाणां तु आत्वाऽभावात् प्राप्तिरेव न। अनुवर्तनं तु प्रवाहवशादेव। लुनीत, लुनीहि, लुनीयात्। हसे इति किम्? मिमते, लुनन्ति। अनपिघ्राध इति किम्? दत्त। धत्त। दद्व, दद्म। दध्व, दध्म। दद्यात्, दध्यात्। अपितीति किम्? जहाति, लुनाति। शितीति किम्? संजिहासते।

७३. इर्दरिद्रः।

दरिद्रातेराकारस्य इकारादेशो भवति हसादौ शित्यपिति प्रत्यये। दरिद्रित.। दरिद्रिथ., दरिद्रिथ। दरिद्रिवः, दरिद्रिम.। दरिद्रियात्। हसे इति किम्? दरिद्रति। शितीति किम्? दिदरिद्रासति। अपितीति किम्? दरिद्राति।

७४. भियो वा।

बिभेतेर्हसादौ शित्यपिति प्रत्यये परेऽन्तस्य इकारादेशो वा भवति। बिभित, बिभीत। बिभिथ। बिभीथ। बिभियात्, बिभीयात्। यङ्लुकि—बेभित, बेभीत। हसे इति किम्? बिभ्यति, बिभ्यतु। शितीति किम्? बिभीषति, बेभीयते। अपितीति किम्? बिभेति, बिभेमि।

७५. हाकः।

जहातेर्द्व्युक्तस्य हसादौ शित्यपिति प्रत्यये परेऽन्तस्य इकारादेशो वा भवति। जहित., जहीत। जहिथ, जहीथ। जहिव, जहीव। जहिम, जहीम। हस इति किम्? जहति, जहतु। शितीति किम्? जिहासति, जेहीयते। अपितीति किम्? जहाति, जहामि। अनुबन्धनिर्देश ओहाङक् गतौ इत्यस्य यङ्लुकश्च निवृत्त्यर्थ.। उज्जिहीते, संजिहीते, जहीत। योगविभाग उत्तरार्थ।

७६. आच्च हौ।

अपितीति निवृत्त पितोऽसम्भवात्। शितीत्यनुवर्तते। द्व्युक्तस्य जहातेर्हौ परे आकार इकारश्च वा भवति। जहाहि, जहिहि, जहीहि।

७७. यि लोपः।

यकारादौ शिति प्रत्यये परे जहातेरन्तस्य लोपो भवति। जह्यात्, जह्याताम्, जह्युः। शितीति किम्? जेहीयते, हेयात्।

७८. दरिद्रोऽशिति।

अशिति प्रत्यये विषयभूते दरिद्रातेरन्तलोपो भवति। दरिद्र्यात्, दरिद्रिता, दरिद्र्यति, दरिद्रितुम्, दरिद्रणीयम्। साधुदरिद्री—णिन्। विषयसप्तमीविज्ञानात् पूर्वमेवाकारलोपे दरिद्रातीति दरिद्रः। अजेव भवति नत्वाकारान्तलक्षणो णः। तथा दुर्दरिद्रमित्याकारान्तलक्षणोऽनो न भवति। अशितीति किम्? दरिद्राति, दरिद्रामि, अदरिद्राम्।

७९. ह्यादौ वा।

ह्यादिप्रत्यये विषये दरिद्रातेरन्तलोपो वा भवति। अदरिद्रीत्[1], अदरिद्रासीत्। अदरिद्रि[2], अदरिद्रायि।

---

१. विषयव्याख्यानात् आदेशादागमः इति न्यायात् प्रथम 'यमिरमिनमात: सक् च' [४/३/७८] इति इट्सगागमो न भवत।

२. भावकर्मणोर्णिचि 'आतो युक् कृण्णौ' [४/२/२४] इति युगागमो न।

८०. नाऽनड्णकयोः ।

दरिद्रातेरन्तलोपो न भवति अनट्, णक—इत्येतयोः परयोः । दरिद्राणम् । णके—दरिद्रायक । क्रियार्थायां क्रियाया णके दरिद्रायको व्रजति । अक इत्येव वक्तव्ये णकस्योपादानमाशिष्यकनि निषेधनिवृत्त्यर्थम् । दरिद्रकः ।

८१. सन्यनिटि ।

नेत्यनुवर्तते । दरिद्रातेरन्तलोपो न भवति अनिटि सन्प्रत्यये परे । दिदरिद्रासति । अनिटीति किम् ? दिदरिद्रिषति ।

८२. अस्तेः सि सः ।

अस्तेः सकारस्य लोपो भवति सकारादौ प्रत्यये परे । असि, व्यतिसे । अकारसकारयोर्लोपे प्रत्ययमात्रं पदम् । सीति किम् ? अस्ति ।

८३. ह एति ।

अस्तेः सकारस्य हकारादेशो भवति एकारादौ प्रत्यये परे । व्यतिहे, भावयामाहे, कारयामाहे चैत्रेण । णबादेरेकारे नेच्छन्त्यन्ये । भावयामासे, कारयामासे ।

८४. अनतोऽन्तोऽदात्मने ।

अनकारान्तात् परस्यात्मनेपदसबन्धिनः अन्त इत्येतस्य अत् इत्यादेशो भवति । चिन्वते, चिन्वताम्, अचिन्वत । लुनते, लुनताम्, अलुनत । आत्मनेपदस्येति किम् ? चिन्वन्ति, लुनन्ति । अनत इति किम् ? पचन्ते, पच्यन्ते, भवन्ते, भाषन्ते, एधन्ते ।

८५. शीङो रत् ।

शीङः परस्यात्मनेपदसबन्धिनोऽन्तो रत् इत्यादेशो भवति । शेरते, शेरताम्, अशेरत ।

८६. वेत्तेर्वा ।

वेत्तेः परस्यात्मनेपदसबन्धिनोऽन्तो रत् वा भवति । संविद्रते, संविद्रताम्, समविद्रत । पक्षे – संविदते, संविदताम्, समविदत । आत्मने इति किम् ? विदन्ति । वेत्तेरिति किम् ? रौधादिकस्य मा भूत् । विदन्ते ।

८७. आतो णप औः[1] ।

आदन्ताद् धातोः परस्य णपः स्थाने औरित्यादेशो भवति । पपौ, तस्थौ, ददौ मे । सुप्तोऽहं किल ययौ, पपौ । आत इति किम् ? स जगाम । सुप्तोऽहं किल विललाप ।

८८. तुह्योस्तातङाशिषि वा ।

आशिषि विहितयोस्तुह्योः स्थाने तातङ् आदेशो वा भवति । जीवताद् भवान् । जीवतु भवान् । जीवतात् त्वम् । जीव त्वम् । आशिषीति किम् ? जीवतु, जीव । ङित्करणं गुणनिषेधार्थम् । चिनोतु, चिनुतात् । चिनु, चिनुतात् ।

---

१. अत्र ओकारेणैव सिद्धे औकारकरणं दरिद्रौ इत्याद्यर्थम् । अन्यथा 'दरिद्रोऽशिति' [३/४/७८] इत्याकारलोपे इदं न सिध्येत् । ननु अत्रामादेशेन भाव्यं, तत्कथमेतदर्थम् ? सत्यम् । अत एव औकारकरणादामादेशस्याऽनित्यत्वम् ।

८९. अपिद्वाधापिबेतिस्थाभूभ्यः सिचो लुग् न चेट् परस्मै।

एभ्य. परस्य सिचो लुग् भवति तत्संनियोगे च एतेभ्य इट् न परस्मैपदे। अदात्, अधात्, अपात्। एतीति इणिकोर्ग्रहणम्। अगात्, अध्यगात्। अस्थात्। भू इति भवतेरस्त्यादेशस्य च ग्रहणम्। अभूत्। अपिदिति दो विशेषण किम्? अदासीत् केदार भोजन वा। पिबेति किम्? पातिपायत्यो –अपासीत् वन वा वस्त्र वा। परस्मै इति किम्? अपासत पयांसि चैत्रेण। व्यत्यभविष्ट, उपास्थिषत। लोपमकृत्वा लुग्विधान स्थानिवद्भावाऽभावार्थम्, तेन अबोभोत् इत्यत्र न वृद्धि·।

९०. शाच्छा-सा-घ्रा-धेटो वा।

शादिभ्य परस्य सिचो लुग् वा भवति तत्संनियोगे च एतेभ्य इट् न परस्मैपदे। अशात्, अशासीत्। अच्छात्, अच्छासीत्। असात्, असासीत्। अघ्रात्, अघ्रासीत्। अधात्, अधासीत्। **'श्विधेटो वा'** [३/४/८] इति अङपि। अदधत्। परस्मै इति किम्? अधिषातां[1] स्तनौ वत्सेन। धेट पूर्वेण नित्य प्राप्ते शेषेभ्योऽप्राप्ते विकल्प।

९१. तनादेर्नश्च तथासोः।

तनादेर्गणात् परस्य सिचो लुग् वा भवति, तत्सनियोगे धातोर्नकारस्य लुक् भवति, एतेभ्य इट् च न ते थासि च प्रत्यये परे। अतत, अतनिष्ट। अतथा, अतनिष्ठा। असत[2], असनिष्ट। असथा, असनिष्ठा·। अक्षत, अक्षणिष्ट। अक्षथा., अक्षणिष्ठा। अवत, अवनिष्ट। अवथा, अवनिष्ठा। अमत, अमनिष्ट। अमथा, अमनिष्ठा। इह परस्मै इति निवृत्तं थास्ग्रहणात्। थास्साहचर्यात् तप्रत्ययोऽपि आत्मनेपदसंबन्ध्येव गृह्यते, तेनेह न—अतनिष्ट यूयम्।

९२. सनस्तत्रात्।

सनोनेस्तत्र लुकि सति अन्तस्य आकारादेशो वा भवति। असात, असत। असाथा, असथा:। तत्रेति किम्? असनिष्ट, असनिष्ठा.। केचिदात्व न मन्यन्ते। नित्यमेवान्ये।

९३. सस्तोऽशिति से।

धातो सकारस्य तकारादेशो भवति अशिति विषये सकारादिप्रत्यये परे। अवात्सीत्, वत्स्यति, अवत्स्यत्। वत्सीष्ट चैत्रेण। व्यतिवत्सीष्ट, विवत्सति। अद्—जिघत्सति। घस्—घत्स्यति, व्यतिघत्सीष्ट। अशितीति किम्? आस्से, वस्से। से इति किम्? वसिषीष्ट, वसिष्यते। विषयसप्तमीविज्ञानात् अवात्ताम्, अवात्त इत्यत्र सिचः प्रागेव सकारस्य तकार:[3]।

९४. दिपि।

धातो. सकारस्य तकारादेशो भवति दिपि परे। अचकात्, अशात्।

९५. सिपि वा।

धातो. सकारस्य तकारादेशो वा भवति सिपि परे। अचकात्, अचका। अशात्, अशा। दिप्प्रत्यासत्ते सिबपि दिबादेरेव गृह्यते, तेनेह न—शास्सि।

९६. वो रः।

धातोर्दकारस्य रकारादेशो वा भवति सिपि परे। अभिनत्, अभिन। अच्छिनत्, अच्छिन। अत्रापि दिबादेरेव

---

१. **'इश्च स्थापिद्वाधः'** [३/४/१२०]।

२. षणादीनामुपदेशे नकार एव ततो लाक्षणिकत्वात् णकारस्यापि लुक्।

३. पूर्व तु सिचि कृते बलवत्त्वात् ततोऽनन्तर तस्य लोपो भविष्यति। वर्णविधित्वात् स्थानित्वमपि नाश्रीयते।

सिब् गृह्यते, तेनेह न भवति—भिनत्सि ।

९७. गीकुटादेर्ङिदञ्णित् ।

'घ्वादिस्थवाद्योर्गीः' [४/२/९३] इति ग्यादेशो वक्ष्यते । ग्यादेशात् कुटादेश्च धातो. परो ञित्णिद्वर्जितः प्रत्ययो ङित्संज्ञको[1] भवति । तुदाद्यन्तर्गणो वृत्पर्यन्त कुटादि । गी—अध्यगीष्ट, अध्यगीषाताम्, अध्यगीष्यत । अध्यगीष्येताम् । कुटादि—कुटिता, कुटितुम्, कुटितव्यम्, कुटित्वा, कुटिष्यति । पुटिता, पुटितुम्, पुटिष्यति । नुविता, नुवितुम् । धुविता, धुवितुम् । न्यनुवीत्, न्यधुवीत् इत्यत्र ङित्वात् **'समानस्याऽङिति सिचि परस्मै'** [४/२/३०] इत्यनेन वृद्धिरपि न भवति । अञ्णिदिति किम् ? अध्यगायि । उदकोटि, उत्कोट , कोटयति, चुकोट । गीकुटादेरिति किम् ? लेखनीयम् । केचिल्लिखिमपि कुटादौ पठन्ति । तन्मते लिखनीयम् । अपरे तु कडस्फरस्फलान् कुटादौ पठित्वा पाठसामर्थ्यात् ञ्णिति[2] वृद्धिनिषेधमिच्छन्ति । कडकः, स्फरकः, स्फलकः ।

९८. विजेरिट् ।

विजेरिट् ङिद् भवति । उद्विजिता, उद्विजितुम्, उद्विजितव्यम्, उद्विजिष्यते । इडिति किम् ? उद्वेजनम्, उद्वेजयति ।

९९. वोर्णोः ।

ऊर्णोतेरिट् वा ङिद् भवति । प्रोर्णुविता, प्रोर्णविता । प्रोर्णुवितुम्, प्रोर्णवितुम् । प्रोर्णुविष्यति, प्रोर्णविष्यति । इडिति किम् ? प्रोर्णवनम्, प्रोर्णवनीयम् ।

१००. शिदपित् ।

धातो परः पिद्वर्जित शित्प्रत्ययो ङिद् भवति । टन , मृत , जागृत , विन्त , अधीते, संवित्ते, दीव्यति, सुनुतः, तुदति, क्रीणाति, अधीयन् सिद्धान्तम्, अधीयान , विदन्, संविदान , जिनाति, बिभ्यति, हत , घ्नन्ति । शिदिति किम् ? चेपीष्ट, वेत्ता । अपिदिति किम् ? एति, जुहोति, जयति, हन्ति । कथ च्यवन्ते, प्लवन्ते ? अन्तरङ्गत्वाद् गुणे कृते अपो लोपात्, स्थानिवद्भावाद् वा ।

१०१. इन्ध्यसंयोगाण्णबादिः कित् ।

इन्धेरसयोगान्ताच्च धातो पर पिद्वर्जितो णबादि कित्संज्ञको भवति । समीधे, समीधाते, समीधिरे । निन्यतु, निन्युः । बिभिदतु., बिभिदुः । ईजतु , ईजु । ऊचतु , ऊचु । सुषुपतु , सुषुपु । जजागरतु , जजागरु । इन्ध्यसंयोगादिति किम् ? सस्रसे, दध्वंसे । णबादिरिति किम् ? इन्धिता, नेता । अपिदिति किम् ? निनय, निनयिथ । इयाज, इयजिथ । ङिदिति प्रकृते किद्वचनं यजादिस्वपिवचीनां सम्प्रसारणार्थ जागर्तेश्च गुणार्थम् । ङित्वे हि ते न स्याताम् । यथा स्वपितः, स्वपन्ति । जागृतः, जाग्रति ।

१०२. स्वञ्जेर्वा ।

स्वञ्जे. परो णबादि किद् वा भवति । परिषस्वजे, परिषस्वञ्जे ।

१०३. न क्त्वा सेट् ।

धातो पर सेट् क्त्वा किन्न भवति । सेवित्वा, देवित्वा, वर्तित्वा, भ्रंशित्वा, ध्वंसित्वा । कथं कुटित्वा ?

---

१ प्रत्यासत्तेर्न्यायात् यत्कार्यं कुटादेर्ङित्वद्वारा प्राप्नोति तस्मिन्नेव कार्ये ङित्व न आत्मनेपदादौ, तेन चुकुटिषति इत्यादौ सन्नन्तस्य ङित्वादात्मनेपद न भवति ।

२ सूत्रे यद्यपि ञ्णिति ङित्व प्रतिषिद्ध तथापि कडादीना पाठसामर्थ्यात् ञ्णिति एव ङित्त्वविधानमुचितम् । अन्यथास्य विधानवैयर्थ्यात् ।

'गाङ्कुटादिभ्योऽञ्णिन्ङित्' [३/४/९७] इति ङित्त्वात्। सेडिति किम्? कृत्वा, इष्ट्वा, शान्त्वा।

१०४. क्षुध-क्लिश-कुष-गुध-मृड-मृद-वद-वसः।

एभ्यः परः सेट् क्त्वा किद्[1] भवति। क्षुधित्वा, क्लिशित्वा, कुषित्वा, गुधित्वा, मृडित्वा, मृदित्वा, उदित्वा, उषित्वा। क्षुधेर्नेच्छन्त्यन्ये। पूर्वेण प्रतिषेधे **'हसादेरिवुवुपधात्…'** [३/४/१०८] इत्यादिना विकल्पे च प्राप्ते वचनम्।

१०५. वा तृषि-मृषि-कृशि-वञ्चि-लुञ्च्यृतेः।

एभ्यः परः सेट् क्त्वा किद्वा भवति। तृषित्वा, तर्षित्वा। मृषित्वा, मर्षित्वा। कृशित्वा, कर्शित्वा। वचित्वा, वञ्चित्वा। लुचित्वा, लुञ्चित्वा। ऋतित्वा, अर्तित्वा। सेडिति किम्? मृषु—मृष्ट्वा। वञ्चु—वक्त्वा। उदित्त्वात् क्त्वायां वेटौ। **'न क्त्वा सेट्'** [३/४/१०३] इति प्रतिषेधे प्राप्ते वचनम्।

१०६. नोपधात्थफात्।

वेत्यनुवर्तते। नकारोपधात् थान्तात् नकारोपधात् फान्ताच्च धातोः परः सेट् क्त्वा किद्वा भवति। श्रथित्वा, श्रन्थित्वा। ग्रथित्वा, ग्रन्थित्वा। गुफित्वा, गुम्फित्वा। ऋफित्वा, ऋम्फित्वा। नोपधादिति किम्? कोथित्वा, पोथित्वा, रेफित्वा। क्त्वेति किम्? ग्रथितः, ग्रथितवान्।

१०७. रुद-विद-मुष-ग्रह-स्वप-प्रच्छः सन् च।

सेडिति निवृत्तम्। एभ्यः परः सन्प्रत्ययः क्त्वा च किद् भवति। रुरुदिषति, रुदित्वा। विविदिषति, विदित्वा। मुमुषिषति, मुषित्वा। जिघृक्षति, गृहीत्वा। सुषुप्सति, सुप्त्वा। पिपृच्छिषति, पृष्ट्वा। रुदविदमुषो **'हसादेः…'** [३/४/१०८] इत्यादिना वक्ष्यमाणविकल्पे ग्रहेस्तु **'न क्त्वा सेट्'** [३/४/१०३] इति प्रतिषेधे प्राप्ते वचनम्। स्वपिप्रच्छ्योः सन्प्रत्ययार्थमेव, क्त्वा हि किदेव।

१०८. हसादेरिवुवुपधादय्वः सेटौ वा।

इकारोकारोपधात् हसादेर्धातोः परौ सेटौ सन्, क्त्वा—इत्येतौ प्रत्ययौ कितौ वा भवतः न तु यकारान्ताद् वकारान्ताच्च। लिलिखिषति, लिलेखिषति। लिखित्वा, लेखित्वा। शिश्वितिषते, शिश्वेतिषते। श्वितित्वा, श्वेतित्वा। दिद्युतिषते, दिद्योतिषते। द्युतित्वा, द्योतित्वा। मुमुदिषते, मुमोदिषते। मुदित्वा, मोदित्वा। हसादेरिति किम्? एषिषिषति, एषित्वा। ओषिषिषति, ओषित्वा। इदुदुपधादिति किम्? विवर्तिषते, वर्तित्वा। अय्व इति किम्? वेयित्वा[2], दिदेविषति, देवित्वा। सेटाविति किम्? बुभुक्षते, भुक्त्वा।

१०९. उदऽबर्हात् क्तौ भावारम्भे।

उपधादित्यनुवर्तते। उकारोपधात् अबर्हाद्[3] धातोः परौ भावे आरम्भे च विहितौ क्तौ—क्तक्तवतू सेटौ कितौ वा भवतः। कुचितमनेन, कोचितमनेन। प्रकुचितः, प्रकोचितः। प्रकुचितवान्, प्रकोचितवान्। मुदितमनेन, मोदितमनेन। प्रमुदितः, प्रमोदितः। रुदितमनेन, रोदितमनेन। प्ररुदितः, प्ररोदितः। प्ररुदितवान्, प्ररोदितवान्। उदुपधादिति किम्? श्वितितमनेन। प्रश्वितितः। अबर्हादिति किम्? गुधितमनेन। प्रगुधितः। भावारम्भे इति किम्? रुचिता कन्या। क्ताविति

---

१ इह मृडादीनामुपादानात् नेति नानुवर्तते। तेभ्यो हि **'न क्त्वा सेट्'** [३/४/१०३] इत्यनेन प्रतिषेधः सिद्ध इति तदुपादानमनर्थकं स्यात्। न च वाच्यं क्षुधादीनामुपादानादिति। यतस्तेषां **'हसादेरिवुवुपधात्…'** [३/४/१०८] इति विकल्पे प्राप्तेऽनेन प्रतिषेधे चरितार्थमुपादानम्।

२. दिवश्च य् च दिय्, दिय्यिवाचरति क्विप्, लुक्, क्त्वा।

३. अप्प्रत्यययोग्यो धातुः अबर्हः।

किम् ? प्रद्योतिषीष्ट । सेटाविति किम् ? रूढमनेन । प्ररूढ. । प्ररूढवान् ।

११०. न शीङ्-डीङ्-पूङ्-धृषि-क्ष्विदि-स्विदि-मिदः ।

शीङादिभ्य परौ सेटौ क्तक्तवतू कितौ न भवत । शयित, शयितवान् । डयित, डयितवान् । पवित, पवितवान् । प्रधर्षितः, प्रधर्षितवान् । प्रक्ष्वेदित, प्रक्ष्वेदितवान् । प्रस्वेदित, प्रस्वेदितवान् । प्रमेदितः, प्रमेदितवान् । शीङडीङ्पूङामनुबन्धनिर्देशो यङलुग्निवृत्त्यर्थ । शेश्यित., शेश्यितवान् । डेड्यित , डेड्यितवान् । पोपुवित , पोपुवितवान् । सेटाविति किम् ? डीयतेर्डीन , डीनवान् । पूत , पूतवान् । धृष्ट , धृष्टवान । क्ष्विण्ण , क्ष्विण्णवान् । स्विन्न , स्विन्नवान् । मिन्न., मिन्नवान् । डीङो दिवादिस्थात् **'डीयश्वीदितः क्तयोः'** [४/३/६०] इति क्तयोरिड्निषेध., भ्वादिस्थ एव सेट्त्वात् क्त्त्वप्रतिषेधविषयः । **'पूङ्क्लिशिभ्यो वा'** [४/३/८४] इति पूङो वेट्त्वम् । धृषादीना च **'आदितः'** [४/३/१००] इति क्तयोरिड् न **'भावारम्भयोर्वा'** [४/३/१०१] इति भावारम्भयोर्विकल्पैकपक्षे सेट्त्वम् ।

१११. मृषः क्षान्तौ ।

क्षान्तौ वर्तमानान्मृष परौ सेटौ क्तक्तवतू कितौ न भवत । मर्षित[1], मर्षितवान् । क्षान्ताविति किम् ? अपमृषित वाक्यमाह । सामूयमित्यर्थः । सेटाविति किम् ? मृष्ट , मृष्टवान् ।

११२. नामिनोऽनिट् सन् ।

नाम्यन्ताद् धातो परोऽनिट् सन्प्रत्यय किद् भवति । चिचीषति, तुष्टूषति लुलूषति, चिकीर्षति, तितीर्षति । नामिन इति किम् ? पिपासति, तिष्ठासति । अनिडिति किम् ? शिशयिषते । सन्निति किम् ? चेता, नता ।

११३. उपधायाम् ।

पूर्वमनुवर्तते । नामिन्युपधाया सति धातो परोऽनिट् सन् किद् भवति । बिभित्सते, बुभुत्सते, विवृत्सति, धिप्सति । अनिडिति किम् ? विवर्तिषते, विवर्धिषते । नामिन इति किम् ? यियक्षति[2], विवत्सति । सन्निति किम् ? भेत्ता ।

११४. आत्मने सोसिचौ ।

नामिन्युपधाया सति धातो परावनिटा सीसिचौ कितौ भवत आत्मनेपदविषय । भित्सीष्ट, अभित्त । भुत्सीष्ट, अबुद्ध । मृक्षीष्ट, असृष्ट । सीसिचाविति किम् ? भेत्स्यते, भोत्स्यते । आत्मने इति किम् ? अस्राक्षीत्, अद्राक्षीत् । नामिन इति किम् ? यक्षीष्ट, अयष्ट । उपधायामिति किम् ? चेषीष्ट, अचेष्ट । अनिटाविति किम् ? वर्धिषीष्ट, अवर्धिष्ट ।

११५. ऋवर्णात् ।

ऋवर्णान्ताद् धातो परावनिटौ सीसिचौ कितौ भवत आत्मनेपदविषये । कृषीष्ट, अकृत । हृषीष्ट, अहृत । तीर्षीष्ट, अतीर्ष्ट[3] । पूर्षीष्ट, अपूर्ष्ट । अनिटाविति किम् ? वरिषीष्ट, अवरिष्ट । तरिषीष्ट, अतरिष्ट ।

११६. गमो वा ।

गम्धातो परावनिटौ सीसिचौ कितौ वा भवतः आत्मनेपदविषये । सगसीष्ट, संगसीष्ट चैत्र । समगत, समगस्त चैत्र. । गसीष्ट, गंसीष्ट चैत्रेण । अगसाताम्, अगसाताम् ग्रामौ चैत्रेण ।

---

१ चुरादौ सेट् अन्यत्रानिट् ।

२ किस्वे सति तु सप्रसारण स्यात् ।

३ अस्मात् कर्मकर्तरि **'एकधातौ....'** [३/४/३५] इत्यात्मनपदतप्रत्यये **'स्वरदुहो वा'** [३/४/३८] इति विकल्पेन णिच् स्यात् । एवमपूर्ष्टेत्यत्रापि ।

११७. हनः सिच् ।

हन्तेः परः सिच् प्रत्ययः किद् भवति आत्मनेपदविषये । आहत, आहसाताम्, आहसत ।

११८. यमः सूचने ।

सूचनं—परदोषाविष्करणम् । सूचनेऽर्थे वर्तमानाद् यमेः परः सिच् किद् भवति आत्मनेपदविषये । उदायत, उदायसाताम्, उदायसत । **'आङो यमहनो निजाङ्गकर्मकाच्च'** [३/३/७७] इत्यात्मनेपदम् । सूचने इति किम् ? **आयस्त** कूपाद् रज्जुम् । उद्धृतवानित्यर्थः । सकर्मकात् **'समुदाङ्भ्यो यमोऽग्रन्थे'** [३/३/८८] इत्यात्मनेपदम् ।

११९. स्वीकारे वा ।

स्वीकारे वर्तमानाद् यमेः परः सिच् किद्वा भवति आत्मनेपदविषये । उपायत, उपायस्त महास्त्राणि । उपायत, उपायस्त कन्याम् । **'मोपायध्वं भयं सीतां नोपायंस्त दशाननः'** [भट्टिकाव्य ७/१०१] । **'उपाद्यमः स्वीकारे'** [३/३/५८] इत्यात्मनेपदम् । स्वीकारे इति किम् ? आयंस्त पाणिम् । सिजिति किम् ? उपयंसीष्ट कन्याम् । उद्वाहे एवेच्छन्त्यन्ये ।

१२०. इश्च स्थाऽपिद्दाधः ।

तिष्ठतेरपिद्दाधाभ्यां च परः सिच् किद्[1] भवति आत्मनेपदविषये तत्संनियोगे **चैषामिकारोऽन्तादेशो भवति ।** उपास्थित, उपास्थिषाताम्, उपास्थिषत । दाम्—व्यत्यदित । व्यत्यदिषाताम् वस्त्रे । देङ्—अदित पुत्रम् । डुदान्क्—**अदित** धनम् । दोच्—व्यत्यदित दण्डौ । धेट्—व्यत्यधित स्तनौ । डुधान्क्—अधित भारम् । स्थाऽपिद्दाध इति किम् ? **दांपदैपोः**—व्यत्यदास्त, व्यत्यदासाताम्, व्यत्यदासत । आत्मनेपद इति किम् ? अधासीत् ।

प्रभावोऽमूल्यानां मलयमिलितोद्गन्धिमरुतां,
न किंचित् कौशल्य भवति भवतो निम्बसुरभौ ।
प्रतापोऽयं[2] कालोः कलिकलुषकालोपमपदां,
तृतीयाऽध्याये यज्जनयसि रघो ! पूर्तिमधुना ।।

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं तृतीयोऽध्यायः ।

---

१. ननु इकारविधानादेव गुणो न भविष्यति किं सिचः किद्विधानेन ? सत्यम् । विधानस्य ह्रस्वद्वारा **'ह्रस्वात्सतावनिटः सिचो लोपो झसे'** [३/४/४६] इति सिज्लोपे चरितार्थत्वात् गुणः स्यात् ।

२. एवमिति शेषः ।

चतुर्थोऽध्यायः

प्रथमश्चरणः

१. गुपूधूपविच्छिपणिपनेरायः ।

गुपादिभ्यो धातुभ्य पर आयप्रत्ययो भवति स चाऽनिर्दिष्टार्थत्वात् स्वार्थे । गोपायति । धूपायति । विच्छायति । पणायति---व्यवहरति स्तौति चेत्यर्थ । **'न चोपलेभे वणिजां पणाऽयान्'** [भट्टिकाव्य, ३/२७] । पनायति । व्यवहारार्थात् पणेर्नेच्छन्त्यन्ये । शतस्य पणते । अनुबन्धस्याशिति आयप्रत्ययाऽभावपक्षे चरितार्थत्वादायप्रत्ययान्ताभ्यां पणिपनिभ्यामात्मनेपद न भवति । गुपू इत्यूकारो गुपङ् गोपनकुत्सनयोरित्यस्य निवृत्त्यर्थ. यङ्लुग्निवृत्त्यर्थश्च ।

२. कमेर्ञिङ् ।

कमेर्धातो स्वार्थे ञिङ् प्रत्ययो भवति । अकारो वृद्ध्यर्थ । ङकार आत्मनेपदार्थः । कामयते, कामयेते, कामयन्ते ।

३. ऋतेरीयङ् ।

ऋत घृणागतिस्पर्धेषु इत्यस्माद् धातो स्वार्थे ईयङ् प्रत्ययो भवति । ङकार आत्मनेपदार्थ । ऋतीयते, ऋतीयेते, ऋतीयन्ते ।

४. अशिति ते वा ।

गुपादिभ्योऽशिति विषये ते आयादयो वा भवन्ति । गोपायिता, गोप्ता । धूपायिता, धूपिता । विच्छायिता, विच्छिता । पणायिता, पणिता । पनायिता, पनिता । कामयिता, कमिता । ऋतीयिता, अर्तिता ।

५. हसादेरेकस्वराद् भृशाभीक्ष्ण्ये यङ् ।

गौणक्रियाणामधिश्रयणादीना क्रियान्तराऽव्यवहितानां[1] साकल्येन[2] सपत्तिः फलातिरेको[3] वा भृशत्वम् । प्रधानक्रियाया[4] विक्लेदादे क्रियान्तराऽव्यवधानेनावृत्तिः आभीक्ष्ण्यम् । तद्विशिष्टेऽर्थे वर्तमानाद् हसादेरेकस्वराद् धातोर्यङ् प्रत्ययो वा भवति । भृश पुन पुनर्वा पचति---पापच्यते । जाज्वल्यते । अथाभीक्ष्ण्ययङन्तस्याभीक्ष्ण्ये द्वित्व कस्मान्न भवति ? उक्तार्थत्वात् । यदा तु भृशार्थयङन्तादाभीक्ष्ण्यविवक्षा तदा भवत्येव । पापच्यते पापच्यते इति । धातोरेवेति नियमात्सोपसर्गान्न भवति । भृश प्राप्ति । हसादेरिति किम् ? भृशमीक्षते । एकस्वरादिति किम् ? भृश चकास्ति । केचिज्जागर्तेरिच्छन्ति । जाजागर्यते । सर्वस्माद् धातोरायादिप्रत्ययरहितात् केचिदिच्छन्ति । अवाव्यते, दादरिद्रयते । भृशाभीक्ष्ण्ये इति किम ? पचति. ज्वलति । वेति किम् ? लुनीहि लुनीहि इत्येवाय लुनातीत्यादि यथा स्यात् ।

---

१ विरोधिभिर्ग्रामगमनादिभि अविरोधिभिस्तूच्छ्वासादिभिर्भवत्येव ।

२ सामस्त्येन ढौकनमित्यर्थः ।

३ फलसमाप्तावपि क्रियानुपरतिः ।

४ पचौ विक्लेद प्रधानक्रिया । तां कश्चित् समाप्य क्रियान्तरमनारभ्य पुनस्तामेव क्रियामारभते तस्या पुन पुनर्भाव आभीक्ष्ण्यम् ।

६. अटयर्त्यशूर्णु-सूत्रि-मूत्रि-सूचिभ्यः।

एभ्यो भृशाभीक्ष्ण्ये वर्तमानेभ्यो यङ् प्रत्ययो भवति। भृशं पुनः पुनर्वाटति—अटाट्यते। एवमियर्ति ऋच्छति वा अरार्यते। अश्नुते अश्नाति वा अशाश्यते। ऊर्णुञ्—प्रोर्णोनूयते। सूत्रण्—सोसूत्र्यते। मूत्रण्—मोमूत्र्यते। सूचण्—सोसूच्यते। आदिमानां त्रयाणां स्वरादित्वात् परेषां त्रयाणां चाऽनेकस्वरत्वात् ऊर्णोतेः स्वराद्यनेकस्वरत्वात् पूर्वेणाऽप्राप्ते वचनम्।

७. गत्यर्थाद् भावस्य कौटिल्ये।

हसादेरेकस्वरात् गत्यर्थाद् भावस्य—क्रियायाः कौटिल्ये एव यङ् प्रत्ययो भवति न भृशाभीक्ष्ण्ये। कुटिलं क्रामति—चङ्क्रम्यते। दंद्रम्यते, वाव्रज्यते, जंगम्यते। भावस्येति किम्? कारककौटिल्ये मा भूत्। कुटिलं पन्थानं[1] गच्छति। कौटिल्य इति किम्? भृशमभीक्ष्णं वा क्रामति। कथं जंगमः[2]? रूढिशब्दोऽयं स्थावरप्रतिपक्षमात्रे वर्तते। भावस्य कौटिल्य इति समासाऽकरणं भावस्येत्युत्तरानुवृत्त्यर्थम्। भृशाभीक्ष्ण्ये कुटिलयुक्ते एव यङ् न केवले इत्यन्ये। **तक्रकौण्डिन्यन्यायेन भृशाभीक्ष्ण्ययोर्निषेधार्थं वचनम्।**

८. लुप-सद-चर-जप-जभ-दह-दश-गृभ्यो गर्हायाम्।

लुपादिभ्यो धातुभ्यो भावगर्हायामेव यङ् प्रत्ययो भवति न तु भृशादिषु। गर्हितं लुम्पति—लोलुप्यते। एवं सासद्यते, चञ्चूर्यते, जञ्जप्यते, जञ्जभ्यते, दंदह्यते, दंदश्यते, जेगिल्यते। भावगर्हायामिति किम्? साधु जपति। भावग्रहणं किम्? कारकगर्हायां मा भूत्। मन्त्रं जपति पिशुनः[3]। दशेः कृतनलोपस्य निर्देशः यङ्लुक्यपि नलोपार्थः, तेन दंदशीति[4]। नियमः किम्? भृशं पुनः पुनर्वा जपति, कुटिलं चरति— इत्यत्र न भवति।

९. न गृणाशुभरुचः।

गृणातिशुभिरुचिभ्यो भृशाभीक्ष्ण्यादौ[5] यङ् प्रत्ययो न भवति। गर्हितं गृणाति। भृशं शोभते। भृशं रोचते।

१०. लुग् बहुलम्।

यङ्प्रत्ययस्य बहुलं लुग् भवति। बोभूयते, बोभवीति, बोभोति। रोरूयते, रोरवीति, रोरोति। लालप्यते, लालपीति, लालप्ति। चङ्क्रम्यते, चङ्क्रमीति, चङ्क्रन्ति। जञ्जप्यते, जञ्जपीति, जञ्जप्ति। बहुलग्रहणं प्रयोगानुसरणार्थम्, तेन क्वचिन्न भवति। लोलूया, पोपूया।

११. अचि।

अचि प्रत्यये परे यङो लुग् भवति। लोलुवः, पोपुवः, सनीस्रसः, दनीध्वसः, चेच्यः, नेन्यः। नित्यार्थं वचनम्।

१२. नोतः।

उकारान्ताद् विहितस्य यङो लुग् न भवति अचि परे। योयूयः, रोरूयः।

१३. संशयप्रतीकारे कितः सन्।

कितो धातोः संशये प्रतीकारे च वर्तमानात् स्वार्थे सन् प्रत्ययो भवति। विचिकित्सति—संशेते इत्यर्थः।

---

१. अत्र तु पन्था एव कुटिलः न तु गमनक्रियायाः कौटिल्यम्।

२. अत्र कुटिलार्थाऽभावे कथं यङिति आशङ्कार्थः।

३. अत्र पिशुनत्वस्यैव गर्हा न तु जपनक्रियायाः।

४. अन्तरङ्गानपि... इति न्यायात् प्रथममेव यङो लुकि ङित्त्वाभावात् नलोपो न स्यात्।

५. आदिपदात् गृणातेर्गर्ह्येऽर्थे।

व्याधिं चिकित्सति—प्रतिकरोतीत्यर्थः । निग्रहविनाशौ प्रतीकारस्यैव भेदौ, तेनात्रापि भवति—क्षेत्रे चिकित्स्यः पारदारिकः । निग्राह्य इत्यर्थः । चिकित्स्यानि क्षेत्रे तृणानि—विनाशयितव्यानीत्यर्थः । संशयप्रतीकार इति किम् ? केतनं, केतयति । स्वार्थसन्नन्ता अर्थान्तरेषु चौरादयो भवन्तीत्यत्र अर्थान्तरेऽपि त्यादयो नाभिधीयन्ते इति अन्यादिना प्रत्युदाहृतम् । एवमुत्तरसूत्रद्वयेऽपि प्रायेण[1] ज्ञेयम् । नकारः 'सनि' [४/३/४७] इत्यत्र विशेषणार्थः ।

१४. गुप्तिज्भ्यां निन्दाक्षमयोः ।

गुप्, तिज्—इत्येताभ्यां यथासंख्यं निन्दाक्षमयोरर्थयोर्वर्तमानाभ्यां स्वार्थे सन् प्रत्ययो भवति । जुगुप्सते—निन्दतीत्यर्थः । तितिक्षते—सहते इत्यर्थः । निन्दाक्षमयोरिति किम् ? गोपनं, गोपयति । तेजनं, तेजयति ।

१५. मान्-बध्-दान्-शानो विचार-वैरूप्यार्जव-निशाने दीर्घश्च पूर्वस्य ।

मान्, बध्, दान्, शान्—इत्येतेभ्यो यथासंख्यं विचारे वैरूप्ये आर्जवे निशाने च वर्तमानेभ्यः स्वार्थे सन् प्रत्ययो भवति, द्वित्वे सति एषां पूर्वस्येकारस्य[2] दीर्घश्च । मीमांसते । बीभत्सते । दीदांसति, दीदांसते । शीशांसति, शीशांसते । अर्थनिर्देशः किम् ? अर्थान्तरे मा भूत् । अवमानयति, बाधयति, दानयति, शानयति ।

१६. इच्छायामेककर्तृककर्मणोऽतत्सनो वा ।

कर्मभूतादिषणैककर्तृकाद् धातोरिच्छायामर्थे सन् प्रत्ययो वा भवति, न चेत्स इच्छासन्प्रत्ययान्तो भवति । कर्तुमिच्छति—चिकीर्षति । गन्तुमिच्छति—जिगमिषति । इच्छायामिति किम् ? भोक्तुं व्रजति । एककर्तृककर्मण इति किम् ? भोजनमिच्छति चैत्रस्य । गमनेनेच्छति । अतत्सन इति किम् ? चिकीर्षितुमिच्छति । तद्ग्रहणं किम् ? जुगुप्सिषते । कथं नदीकूलं पिपतिषति, श्वा मुमूर्षति ? पतितुमिच्छति, मर्तुमिच्छति इति वाक्यवदुपमानाद् भविष्यति ।

१७. द्वितीयायाः काम्यः ।

द्वितीयान्तान्नाम्नः कर्मण इच्छायामर्थे काम्यः प्रत्ययो वा भवति । पुत्रमिच्छति—पुत्रकाम्यति । इदकाम्यति, स्वःकाम्यति । काम्येनैव कर्मण उक्तत्वाद् भावकर्त्रोरेव प्रयोगः । पुत्रकाम्यतेऽनेन । पुत्रकाम्यत्यसौ । द्वितीयाया इति किम् ? इष्टः पुत्रः । इष्यते पुत्रः । इह कस्मान्न भवति—भ्रातुः पुत्रमिच्छति, आत्मनः पुत्रमिच्छति, महान्तं पुत्रमिच्छति, पुत्रमिच्छति स्थूलं दर्शनीयं वा ? सापेक्षत्वात् न भवति । न ह्यन्यमपेक्षमाणोऽन्येन सहैकार्थीभावमनुभवितुं शक्नोति । भ्रातृष्पुत्रकाम्यतीत्यादि तु समर्थत्वात् । अर्थमिच्छति, दुःखमिच्छति इत्यत्रापि परस्येत्यपेक्षितत्वात्सापेक्षत्वम् । कथं तर्हि पुत्रकाम्यतीत्यत्र पुत्रस्यात्मीयता गम्यते अन्यस्याश्रुते इच्छायाश्चात्मविषयत्वात् ।

१८. अमाऽव्ययात् क्यच्च ।

पूर्वमनुवर्तते । अमकारान्तादनव्ययाच्च द्वितीयान्तान्नाम्नः कर्मण इच्छायामर्थे क्यच् चकारात् काम्यश्च प्रत्ययौ वा भवतः । पुत्रमिच्छति—पुत्रीयति । एवं नाव्यति, वाच्यति । चकारः काम्यार्थोऽन्यथा मान्ताऽव्यययोः सावकाशः स क्यचा बाध्येत । पक्षे—पुत्रकाम्यति । अमाव्ययादिति किम् ? इदमिच्छति । किमिच्छति । स्वरिच्छति । उच्चैरिच्छति । चकारः 'क्यचि' [४/१/६१] इत्यत्र विशेषणार्थः । ककारः क्यग्रहणे सामान्यग्रहणार्थः ।

१९. आधाराच्चोपमानादाचारे ।

अमकारान्तादनव्ययाच्चोपमानभूतात् द्वितीयान्ताद् आधाराच्च नाम्नः आचारेऽर्थे क्यच् प्रत्ययो वा भवति ।

---

१. प्रायेणेति भणनात् केतति, गोपते, तेजते, मानते, बधते इत्यादीनि भवति ।

२. द्वित्वे पूर्वस्य आकारस्य ह्रस्वे ह्रस्वाऽकारस्यैव दीर्घे प्राप्ते अनपेक्षत्वात् 'अत इत्सनि' [४/१/६७] इति इत्वमेव, पश्चादिकारस्यैव दीर्घः ।

पुत्रमिवाचरति- पुत्रीयति छात्रम्। वस्त्रीयति कम्बलम्। पुत्रीयति स्थूलं दर्शनीयं वा। आधारात् प्रासाद इवाचरति— प्रासादीयति कुट्याम्। पर्यङ्कीयति मञ्चके। उपमानादिति किम्? छात्रादेर्मा भूत्। आधाराच्चेति किम्? परशुना दात्रेणेवाचरति। अमाव्ययादिति किम्? इदमिवाचरति। स्वरिवाचरति। उपमानस्य नित्यमुपमेयापेक्षत्वात् सापेक्षत्वे अप्यसामर्थ्यं न भवति।

२०. कर्तुः क्विब् गल्भक्लीबहोडात्तु ङित्।

कर्तुरुपमानान्नाम्न आचारेऽर्थे क्विप् प्रत्ययो वा भवति। गल्भक्लीबहोडेभ्यः पुनः स एव ङित्। अश्व इवाचरति—अश्वति। एवं गर्दभति, दधयति। राजेवाऽऽचरति—राजनति। मधुलिडिवाचरति—मधुलेहति। गोधुगिव आचरति—गोदोहति। गल्भक्लीबहोडात्तु ङित्। गल्भते, अवगल्भते। क्लीबते, विक्लीबते। होडते, विहोडते। ङित्वाद् आत्मनेपदं भवति।

२१. क्यङ्।

कर्तुरुपमानादाचारेऽर्थे क्यङ् प्रत्ययो वा भवति। श्येन इवाचरति—श्येनायते। हंसायते, अश्वायते, गर्दभायते, गल्भायते, क्लीबायते, होडायते। क्विप्क्यङोस्तुल्यविषयत्वादऽसत्युत्सर्गापवादत्वे ।र्यायेण प्रयोग। ङकार आत्मनेपदार्थः।

२२. वा सो लोपश्च।

स इति आवृत्त्या पञ्चम्यन्तं षष्ठ्यन्तं चाभिसम्बध्नाति। सकारान्तात् कर्तुरुपमानादाचारेऽर्थे क्यङ् प्रत्ययो वा भवति अन्त्यसकारस्य च वा लोपः। पय इवाचरति—पयायते, पयस्यते। सरायते, सरस्यते। क्यङ् सिद्ध लोपार्थं वचनम्। चकारो लोपस्य क्यङ्सन्नियोगार्थः[1]।

२३. ओजोप्सरसः।

नित्यसलोपार्थं वचनम्। ओजःशब्दो वृत्तिविषये स्वभावात् तद्वति वर्तते। ओजःशब्दादप्सरस्शब्दाच्च कर्तुरुपमानाद् आचारेऽर्थे क्यङ् प्रत्ययो वा भवति सलोपश्च। ओजस्वीवाचरति[2]—ओजायते। अप्सरायते। अन्ये तु ओजःशब्देऽपि सलोपविकल्पमिच्छन्ति। ओजायते, ओजस्यते।

२४. च्व्यर्थे भृशादेर्हसस्य।

भृशादिभ्यः कर्तृभ्यः च्व्यर्थे क्यङ् प्रत्ययो वा भवति अन्त्यहसस्य यथासंभवं लोपश्च। अभृशो भृशो भवति—भृशायते। उन्मनायते, वेहायते। अनोजस्वी ओजस्वी भवति—ओजायते। अत्र तद्वद्वृत्तेरेव च्व्यर्थ इति धर्ममात्रवृत्तेर्न भवति। अनोज ओजो भवति। कर्तुरिति किम्? अभृशं भृशं करोति। च्व्यर्थ इति किम्? भृशो भवति। अभूततद्भावमात्रे च्वेर्विधानात् क्यङा च्विर्न बाध्यते। भृशीभवति। भृशादयो यथा—भृश, उत्सुक, शीघ्र, चपल, पण्डित, अण्डर, कण्डर, फेन, शुचि, नील, हरित, मन्द, मद्र, भद्र, सश्चत्, तृपत्, रेफत्, रेहत्, वेहत्, वर्चस्, ओजस्, उन्मनस्, सुमनस्, दुर्मनस्, अभिमनस् इति।

२५. डाज्लोहितादिभ्यः क्यष्।

डाच्प्रत्ययान्तेभ्यो लोहितादिभ्यश्च कर्तृभ्यः च्व्यर्थे क्यष् प्रत्ययो वा भवति। डाच्—अपटत् पटद् भवति— पटपटायति, पटपटायते। एवं दमदमायति, दमदमायते। डाजन्तात् क्यषविधानात् कृभ्वस्तिभिरिव क्यषापि योगे डाज् भवति। अलोहितो लोहितो भवति- लोहितायति, लोहितायते। कर्तुरिति किम्? अपटपटा पटपटा करोति। अलोहित

१ समुच्चये तु स्वतन्त्रौ लोपक्यङौ स्याताम्।

२ विग्रहमात्रमेतत्। प्रत्ययस्तु ओजस्शब्दादेव न तु ओजस्विन।

लोहितं करोति । च्व्यर्थ इति किम् ? लोहितो भवति । लोहितादयो यथा— लोहित, जिह्म, श्याम, धूम, चर्मन्, हर्ष, गर्व, सुख, दुःख, मूर्च्छा, निद्रा, कृपा, करुणा । आकृतिगणोऽयम् । षकारः 'क्यषः' | १/३/१०१ | इत्यत्र विशेषणार्थः । धूमादीनां स्वतन्त्रार्थवृत्तीनां प्रकृतिविकारभावाऽप्रतीतेश्च्व्यर्थो नास्तीति तद्वद्वृत्तिभ्यः प्रत्ययो भवति । अधूमवान् धूमवान् भवति – धूमायति, धूमायते ।

२६. कष्ट-कक्ष-कृच्छ्र-सत्र-गहनाय पापे क्रमणे क्यङ् ।

कष्टादिभ्यो निर्देशादेव चतुर्थ्यन्तेभ्यः पापे वर्तमानेभ्यः क्रमणेऽर्थे क्यङ् प्रत्ययो वा भवति । ङकार आत्मनेपदार्थः । कष्टाय कर्मणे क्रामति—कष्टायते । एवं कक्षायते, कृच्छ्रायते, सत्रायते, गहनायते । कष्टादिभ्य इति किम् ? कुटिलाय कर्मणे क्रामति । चतुर्थीनिर्देशः किम् ? रिपुं कष्टं क्रामति । पाप इति किम् ? कष्टाय तपसे क्रामति । क्रमणमत्र न पादविक्षेपः किंतु प्रवृत्तिमात्रम् । द्वितीयान्तेभ्यः पापचिकीर्षायामित्यन्ये । कष्टं चिकीर्षति—कष्टायते इत्यादि ।

२७. कर्मणो रोमन्थादुच्चर्वणे ।

रोमन्थात्कर्मणः परः उच्चर्वणेऽर्थे क्यङ् प्रत्ययो वा भवति । अभ्यवहृतं द्रव्यं रोमन्थः । उद्गीर्य चर्वणमुच्चर्वणम् । रोमन्थमुच्चर्वयति– रोमन्थायते गौः । उद्गीर्य चर्वयतीत्यर्थः । उच्चर्वण इति किम् ? कीटो रोमन्थं वर्तयति । उद्गीर्य बहिः यक्तं पृष्ठान्तेन निर्गतं वा द्रव्यं गुटिकां करोतीत्यर्थः ।

२८. बाष्पोष्मधूमफेनादुद्वमने ।

कर्मण इत्यनुवर्तते । बाष्पादिभ्यः कर्मभ्यः उद्वमनेऽर्थे क्यङ् प्रत्ययो वा भवति । बाष्पमुद्वमति—बाष्पायते । एवमूष्मायते, धूमायते, फेनायते ।

२९. सुखादेरऽनुभवे ।

साक्षात्कारोऽनुभवस्तस्मिन्नर्थे सुखादिभ्यः कर्मभ्यः क्यङ् प्रत्ययो वा भवति । सुखमनुभवति—सुखायते । दुःखायते । अनुभव इति किम् ? सुखं वेदयते प्रसाधको देवदत्तस्य । सुखादिविकारेणानुमानतो निश्चिनोतीत्यर्थः । सुखादयो यथा—सुख, दुःख, तृप्र, कृच्छ्र, आस्र, अलीक, करुण, कृपण, सोढ, प्रतीप इति ।

३०. शब्दादेः करणे वा ।

शब्दादिभ्यः कर्मभ्यः करणेऽर्थे क्यङ् प्रत्ययो वा भवति । जिजपवादः । शब्दं करोति—शब्दायते । वैरायते, कलहायते । वाशब्दो व्यवस्थितविभाषार्थः[२], तेन यथादर्शनं जिजपि भवति । शब्दयति, वैरयति । वाधिकारस्तु वाक्यार्थः । शब्दादयो यथा – शब्द, वैर, कलह, अभ्र, वेग, युद्ध, अभ्र, कण्व, मम, मेघ, अट, अटघा, अटाट्या, सीका, सोटा, कोटा, पोटा, प्लुष्टा, सुदिन, दुर्दिन, नीहार इति ।

३१. तपसः क्यच् ।

तपःशब्दात् कर्मणः करणेऽर्थे क्यच् प्रत्ययो वा भवति । तपः करोति—तपस्यति । शत्रूणां तपः करोति—तपस्यति शत्रून् । क्यच्विधानं परस्मैपदार्थम् ।

३२. नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये ।

नमस्, वरिवस्, चित्रङ्—शब्देभ्यः कर्मभ्यो यथासंख्यमर्चासेवाश्चर्येष्वर्थेषु करणेऽर्थे क्यच् प्रत्ययो वा भवति ।

---

१ पाप—अनार्जवाचारः, स इह नास्तीति न भवति । अथ यथेह पापं नास्ति तथा क्रमणमपि पादविक्षेपो नास्तीति द्वयाङ्गवैकल्यमित्याशङ्क्याह ।

२ व्यवस्थित—प्रयोगारूढविधिप्रतिषेधादिकार्यं विशेषेण भाषते इति व्यवस्थितविभाषा, तदर्थ इत्यर्थः ।

देवेभ्यो नमस्करोति नमस्यति देवान्। गुरूणा वरिव करोति—वरिवस्यति गुरून्। चित्र करोति—चित्रीयते। ङकार आत्मनेपदार्थ। अर्चादिष्विति किम्? नम. करोति। वरिव करोति। नमोवरिव.शब्दमुच्चारयतीत्यर्थ। चित्र करोति—नानात्वमालेख्य वा करोतीत्यर्थः। ननु च नमस्यति देवान् इत्यत्र नम.शब्दसयोगनिबन्धना चतुर्थी कस्मान्न भवति? उच्यते—नामधातूनामविवक्षितप्रकृतिप्रत्ययभेदानां धातुत्वादनर्थकोऽत्र नम.शब्द। **उपपदविभक्तेर्वा कारकविभक्तिर्बलीयसी**। एवं च नमस्करोति देवान् इति वाक्येऽपि द्वितीया सिद्धा। यद्येवं नमस्करोति देवेभ्य इत्यनेन न भवितव्यम्। नैवम्। करोते. नमःशब्दसम्बन्धेन देवपदेनाऽसबन्धत्वात्। कस्मै इति त्वाकाङ्क्षायां देवेभ्य इति सबन्धाद्दानपात्रे चतुर्थी वा इत्यदोष।

३३. अङ्गान्निरसने ञिङ्।

अङ्गवाचिन. शब्दात् कर्मणो निरसनेऽर्थे ञिङ प्रत्ययो वा भवति। हस्तौ निरस्यति—हस्तयते। पादयते, ग्रीवयते। निरसने इति किम्? हस्त करोति—हस्तयति। कर्मण इति किम्? हस्तेन निरस्यति। ङकार आत्मनेपदार्थ.।

३४. पुच्छादुत्परिव्यसने।

पुच्छशब्दात् कर्मण उदसने पर्यसने व्यसने असने चाऽर्थे ञिङ प्रत्ययो वा भवति। पुच्छमुदस्यति—उत्पुच्छयते। पर्यस्यते—परिपुच्छयते। व्यस्यति—विपुच्छयते। अस्यति—पुच्छयते।

३५. भाण्डात्समाचयने।

भाण्डशब्दात् कर्मण समाचयनेऽर्थे ञिङ् प्रत्ययो वा भवति। समाचयन च समा परिणा च द्योत्यते। भाण्डानि समाचिनोति—संभाण्डयते। परिभाण्डयते।

३६. चीवरात्संमार्जनपरिधानार्जने।

चीवरशब्दात् कर्मण समार्जने परिधाने अर्जने चार्थे ञिङ् प्रत्ययो वा भवति। चीवरं समार्जयति—सचीवरयते। चीवर परिधत्ते—परिचीवरयते। समाच्छादनमपि परिधानम्। चीवर समाच्छादयति—सचीवरयते। चीवरमर्जयति—चीवरयते।

३७. ञिज्बहुलं करणादिषु।

करणादिष्वर्थेषु नाम्नो ञिच् प्रत्ययो बहुल भवति। बहुलग्रहण प्रयोगानुसरणार्थ, तेन यस्मान्नाम्नो यद्विभक्त्यन्ताद् यस्मिन् धात्वर्थे दृश्यते तस्मात् तद्विभक्त्यन्तात् तद्धात्वर्थे एव भवति इति नियमो लभ्यते। मुण्डं करोति—मुण्डयति छात्रम्। एव मिश्रयत्योदन, श्लक्ष्णयति वस्त्र, लवणयति सूपम्। एष्यश्चव्यर्थे एयति कश्चित्। लघु करोति—लघयति। एव छिद्रयति, कर्णयति, दण्डयति, अन्धयति, अङ्कयति। व्याकरणस्य सूत्र करोति—व्याकरण सूत्रयति। द्वारस्योद्घाटं करोति—द्वारमुद्घाटयति। ननु व्याकरणशब्दाद् वाक्ये षष्ठी दृश्यते उत्पन्ने च प्रत्यये कथ द्वितीया? उच्यते—योऽसौ सूत्रव्याकरणयो सबन्ध. स उत्पन्ने प्रत्यये निवर्तते सूत्रयतिक्रियासबन्धाच्च द्वितीयैव। एव द्वारमुद्घाटयति, पाप्मिन[1] उल्लाघयति, त्रिलोकीं तिलकयति इत्याद्यपि द्रष्टव्यम्। अथ तप करोति तपस्यतीत्यादिवत् कर्मणो वृत्तावन्तर्भूतत्वान्मुण्डिरकर्मक प्राप्नोति। नैवम्। सामान्यकर्माऽन्तर्भूत विशेषकर्मणा तु सकर्मक एव, मुण्डयति क छात्रमिति। यद्येव पुत्रीयतिरपि विशेषकर्मणा सकर्मक प्राप्नोति, पुत्रीयति कं छात्रमिति। सत्यम्। आचारक्यचा तु बुद्धेरपहृतत्वात् इच्छाक्यजन्तस्य विद्यमानमपि विशेषकर्म न प्रयुज्यते। तथाहि—पुत्रीयति छात्रमित्युक्ते पुत्रमिवाचरति छात्रमिति प्रतीतिर्भवति

---

१. पाप्मा—पापमस्त्येषा, शिखादित्वादिन्, तान् पाप्मिन.।

न तु पुत्रमिच्छतीति । तदुक्तं—

> सदपीच्छाक्यचः[1] कर्म, तदाचारक्यचा हृतम् ।
> कौटिल्येनेव गत्यर्थाऽभ्यासो वृत्तौ न गम्यते ॥

मुण्ड बलीवर्दं करोतीति उभयधर्मविधाने[2] मुण्ड शुक्लं करोतीत्यनुवादे वाऽनभिधानान्न भवति। पटुमाचष्टे करोति वा पटयति। एव स्थूल—स्थवयति। दूर—दवयति। युवान—यवयति। क्षिप्रं—क्षेपयति। क्षुद्र—क्षोदयति। प्रियं—प्रापयति। स्थिर—स्थापयति। स्फिरं—स्फापयति। पुच्छं—पुच्छयति। वृक्षमाचष्टे रोपयति वा—वृक्षयति। कृतं गृह्णाति – कृतयति। एव वर्णयति, त्वचयति। त्वचशब्दोऽकारान्तस्त्वक्पर्यायः। रूप दर्शयति – रूपयति। रूपं निध्यायति—निरूपयति। लोमान्यनुमार्ष्टि—अनुलोमयति। तूस्तानि विहन्ति उद्वहति वा—वितूस्तयति, उत्तूस्तयति केशान्—विजटीकरोतीत्यर्थ। वस्त्रं वस्त्रेण वा समाच्छादयति—सवस्त्रयति। वस्त्र परिदधाति—परिवस्त्रयति। तृणान्युत्प्लुत्य शातयति—उत्तृणयति। हस्तिनातिक्रामति—अतिहस्तयति। एवमत्यश्वयति। वर्मणा सनह्यति—संवर्मयति। वीणया उपगायति—उपवीणयति। सेनया अभियाति—अभिषेणयति। चूर्णैरवध्वसयति अवकिरति वा—अवचूर्णयति। तूलैरनुकुष्णाति[3] अवकुष्णाति अनुगृह्णाति वा—अनुतूलयति, अवतूलयति। वास्या छिनत्ति—वासयति। एवं परशुना—परशयति। असिना—असयति। वास्या परिच्छिनत्ति—परिवासयति। वाससा उन्मोचयति—उद्वासयति। श्लोकैरुपस्तौति—उपश्लोकयति। हस्तेनाऽपक्षिपति—अपहस्तयति। अश्वेन सयुनक्ति—समश्वयति। गन्धेनार्चयति—गन्धयति। एवं पुष्पयति। बलेन सहते—बलयति। शीलेनाचरति—शीलयति। एव सामयति, सान्त्वयति। छन्दसोपचरति उपमन्त्रयते वा—उपच्छन्दयति। पाशेन सयच्छति—सपाशयति। पाश पाशाद् वा विमोचयति—विपाशयति। शूरो भवति—शूरयति। वीर उत्सहते—वीरयति। कूलमुल्लङ्घयति—उत्कूलयति। कूल प्रतीपं गच्छति—प्रतिकूलयति। कूलमनुगच्छति—अनुकूलयति। लोष्टानवमर्दयति—अवलोष्टयति। पुत्र सूते—पुत्रयति इत्यादि। आख्यान, नलोपाख्यानं, कंसवधं, सीताहरणं, रामप्रव्रजन, राजागमन, मृगरमण, आरात्रिविवासमाचष्टे इत्यादिषु इन्द्रियाणा[4] जय, क्षीरस्य पान, देवानां यागं, धान्यस्य क्रय, धनस्य त्याग, ओदनस्य पाक करोति इत्यादिषु च बहुलवचनान्न भवति। अथ हस्तौ निरस्यति हस्तयते, पादयते इत्यादिवद् उत्पुच्छयते इत्यादावप्युपसर्गस्याऽप्रयोग प्राप्नोति। नैवम्। यत्रानेकविशेषणविशिष्टा क्रिया प्रत्ययार्थस्तत्र क्रियाविशेषाभिव्यक्तये युक्त उपसर्गप्रयोग। यथा—विपाशयति, सपाशयतीति। यत्र त्वेकविशेषणविशिष्टा क्रिया प्रत्ययार्थः तत्र सदेहाऽभावादुपसर्गो न प्रयुज्यते। यथा श्येन इवाचरति—श्येनायते। बाष्पमुद्वमति—बाष्पायते। हस्तौ निरस्यति—हस्तयते। पुत्रमिवाचरति—पुत्रीयति। यद्येव अतिहस्तयति, उपवीणयति इत्यादावेकैकविशेषणविशिष्टत्वाद् उपसर्गप्रयोगो न प्राप्नोति। नैवम्। अत्र णिच्प्रत्ययस्य करोत्याचष्टेऽतिक्रामतीत्याद्यनेकार्थत्वात् सदेहे तदभिव्यक्त्यर्थमुपसर्गप्रयोगः। यत्र पुनरनेकोपसर्गविशिष्टा क्रिया प्रत्ययार्थस्तत्र शब्दशक्तिस्वाभाव्यादेक एवोपसर्गार्थ प्रत्ययार्थेऽन्तर्भवति द्वितीयस्तूपसर्गेणैव प्रत्याय्यते। यथा भाण्डं समाचिनोति—सभाण्डयते। वस्त्र वस्त्रेण वा समाच्छादयति—सवस्त्रयतीति।

३८. व्रताद् भोजनतन्निवृत्त्योः ।

व्रतं शास्त्रविहितो नियमः। व्रतशब्दाद् भोजने भोजननिवृत्तौ च वर्तमानात् करणादिष्वर्थेषु णिच् प्रत्ययो बहुल भवति। पय एव मया भोक्तव्यमिति व्रत करोति गृह्णाति वा—पयो व्रतयति। सावद्यान्न मया न भोक्तव्यमिति व्रत

---

१ यथा जगम्यते इत्यादौ यद्यपि भृश गच्छति तथापि कुटिल गच्छतीत्येव प्रतीयते न भृशार्थस्तथाऽत्रापि इच्छाक्यच. कर्म विद्यमानमपि आचारक्यचा हृत सद् वृत्तौ—आख्यातवृत्तौ न प्रतीयते।

२. कश्चिन्मृन्मय बलवीर्द करोति तत्र च मुण्डत्व बलीवर्दत्वं च धर्मद्वय विधत्ते, तत्र न भवति। मुण्ड प्रसिद्धमनूद्याऽप्रसिद्ध शुक्लं करोतीत्यनुवादे च न भवति अनभिधानात्।

३. तूलैः कृत्वा अनुकूल अवाक् च यथा भवति एवमन्तरवयवान् बहिर्निकासति। निःसारयतीत्यर्थः। अनुकुष्णात्यवकुष्णात्यनयोरुभयोः साधारणोऽर्थो अनुगृह्णाति इति। यतोऽत्रान्वर्थेऽव:।

४. इन्द्रियजयं करोति इत्येवमपि कृते न भवति बाहुलकादेव।

करोति गृह्णाति वा—सावद्यान्नं व्रतयति । अर्थनियमार्थ आरम्भः ।

३९. सत्याऽर्थवेदानामापुक् च ।

सत्य, अर्थ, वेद—इत्येतेषां ञिच्सनियोगे आपुगागमो भवति । सत्यं करोति आचष्टे वा—सत्यापयति । एवमर्थापयति, वेदापयति । विधानसामर्थ्यात् 'टेः' [८/४/८४] इति टेर्लोपो न भवति ।

४० एकस्वरस्याऽतः ।

अदन्तस्य एकस्वरस्य नाम्नो ञिच्सनियोगे आपुगागमो भवति । प्रियमाचष्टे करोति वा— प्रापयति । स्थापयति । त्वां मां वा आचष्टे—त्वापयति, मापयति । एकस्वरस्येति किम् ? द्राघयति, ह्रामयति । अत इति किम् ? स्व आचष्टे—स्वयति ।

४१. श्वेताश्वाऽश्वतरगालोडिताह्वरकाणामऽश्वतरेतकलोपः ।

श्वेताश्व, अश्वतर, गालोडित, आह्वरक—इत्येतेषां ञिच्सनियोगे यथासङ्ख्यमऽश्व, तर, इत, क—इत्येतेषां लोपो भवति । श्वेताश्वमाचष्टे करोति वा, श्वेताश्वेनातिक्रामतीति वा श्वेतयति । एवमश्वयति, गालोडयति, आह्वरयति । लोपार्थं वचनं ञिच् तु सर्वत्र पूर्वेण सिद्ध एव ।

४२. कण्ड्वादेर्यक् ।

कण्ड्वादिभ्यो धातुभ्यो यक् प्रत्ययः स्वार्थे भवति । ककारो गुणवृद्धिप्रतिषेधार्थः । द्विविधाः कण्ड्वादयः धातवो नामानि च । तत्र **गौणमुख्ययोः**··· इति न्यायात् मुख्यत्वाद् धातव एवात्र गृह्यन्ते । नामानि धातुभ्य एव भवन्तीति धातूनां मुख्यत्वम् । कण्डूयति, कण्डूयते । महीयते । मन्तूयति । धातोरिति किम् ? कण्डूः, कण्ड्वौ, कण्ड्वः । कण्ड्वादयो यथा—कण्डून्, महीङ्, हृणीङ्, वेङ्, लाङ्, मन्तु, वल्गु, असु, वेट्, लाट्, लिट्, लोट्, उरस्, उषस्, इरस्, तिरस्, इयस्, इमस्, अस्, पयस्, सभूयस्, दुवस्, दुरज्, भिषज्, भिष्णुक्, रेखा, लेखा, एला, वेला, केला, खेला, गोधा, मेधा, मगध, इरध, इषुध, कुषुम्भ, सुख, दुःख, अगद, गद्गद, तरण, वरण, उरण, तुरण, पुरण, भुरण, चुरण, भरण, तपुस, तम्पस, अरर, सपर, समर इति कण्ड्वादिः ।

४३. चुरादिभ्यो ञिच् ।

चुरादिभ्यो धातुभ्यः स्वार्थे ञिच् प्रत्ययो भवति । चोरयति, नाटयति, पदयते । ञकारो वृद्ध्यर्थः । ञिग्रहणेषु सामान्यग्रहणार्थश्च । चकारः सामान्यग्रहणाऽविधानार्थः । अत्र निरनुबन्धा धातवः परस्मैपदिनः सानुबन्धास्तु अनुबन्ध-विधानबलाद् आत्मनेपदिनः । वक्ष्यमाणयुजादिगणे तु सानुबन्धत्वं ञिजऽभावपक्षे सावकाशत्वात् ञिचि नात्मनेपदार्थम् । अनित्यो हि ञिच् चुरादीनामिति तु **'घुषेरविशब्दने'** [४/३/६३] इत्यत्र ज्ञापयिष्यते । बहुवचनमाकृतिगणार्थम्, तेन सवाहयतीति सिद्धम् । चुरादयो धातुपाठादवगन्तव्याः ।

४४. युजादेर्वा ।

चुराद्यन्तर्गणो युजादिः । युजादिभ्यो धातुभ्यः स्वार्थे ञिच् प्रत्ययो वा भवति । योजयति, योजति । साहयति, सहति । **'सहति कलभेभ्यः परिभवम्'** ।

४५. प्रयोक्तृव्यापारे ञिन् ।

कर्तारं यः प्रयुङ्क्ते स प्रयोक्ता, तद्व्यापारेऽभिधेये धातोर्ञिन् प्रत्ययो वा भवति । व्यापारश्च प्रेषणाऽध्येषण-निमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा भवति । तत्र तिरस्कारपूर्वको व्यापारः प्रेषणम् । सत्कारपूर्वकस्त्वध्येषणम् । कुर्वन्तं प्रेरयति—कारयति । पचन्तं प्रेरयति—पाचयति । अत्र प्रेषणेनाऽध्येषणेन वा यथासम्भवं प्रयोक्तृत्वम् । वसन्तं

प्रेरयति—वासयति भिक्षा। कारीषाग्निरध्यापयति। अत्र निमित्तभावेन। राजानमागच्छन्तं प्रेरयति—राजानमागमयति। मृगान् रमयति। रात्रिं विवासयति कथकः। अत्राख्यानेन। आख्यानेन हि बुद्ध्यारूढा राजादयः प्रयुक्ताः प्रतीयन्ते। कंसं घ्नन्तं प्रेरयति—कंसं घातयति। बलिं बन्धयति नटः[1]। अत्राभिनयेन[2]। पुष्येण युञ्जन्तं प्रेरयति—पुष्येण योजयति चन्द्रम्। मघाभिर्योजयति गणकः। अत्र कालज्ञानेन। उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां सूर्यमुद्गच्छन्तं प्रेरयति—माहिष्मत्यां सूर्यमुद्गमयति। रैवतकात् प्रस्थितः शत्रुञ्जये सूर्यं पातयति। अत्र प्राप्त्या। ननु[3] च कर्तापि करणादीनां प्रयोजक इति तद्व्यापारेऽपि णिञ् प्राप्नोति। नैवम्। प्रयोक्तृग्रहणसामर्थ्यात्[4]। णकारो णित्कार्यार्थः। ञकारो 'ञितः' [३/३/८६] इत्यत्र विशेषणार्थः।

४६. भुवः प्राप्तौ णिङ्।

भुवो धातोः प्राप्त्यर्थे वर्तमानात् णिङ् प्रत्ययो वा भवति। भावयते, भवते। प्राप्नोतीत्यर्थः। भवतीत्येवान्यत्र। णिङिति ङकार आत्मनेपदार्थः। भूङ इति ङकारनिर्देशो णिङोऽभावेऽप्यात्मनेपदार्थः। प्राप्त्यभावेऽपि क्वचिदात्मनेपदमिष्यते। यथा—

याचितारश्च नः सन्तु, दातारश्च भवामहे।
आक्रोष्टारश्च न सन्तु, क्षन्तारश्च भवामहे॥

प्राप्तावपि परस्मैपदमित्यन्ये। सर्वं भवति—प्राप्नोतीत्यर्थः। अवकल्कने तु भावयतीत्येव। भूण् अवकल्कने इति चुरादौ पाठात्।

४७. सन्यनिटि दीर्घः।

स्वरान्तस्य धातोरनिटि सन्प्रत्यये परे दीर्घो भवति। चिचीषति, नुनूषति, चिकीर्षति। सनीति किम्? स्तुतः। अनिटीति किम्? यियविषति।

४८. हनिगमोरुपधायाः।

हन्तेर्गमोश्च धातोरुपधाया दीर्घो भवति अनिटि सन्प्रत्यये परे। जिघांसति। गम्—जिगांस्यते, संजिगांसते। अधिजिगांस्यते माता। अधिजिगांसते सूत्रम्। गमिति इणिकिङादेशस्य गमेर्ग्रहणाद् गच्छतेर्न भवति। संजिगंसते वत्सो मात्रा। इङादेशस्यैव गमोरिच्छन्त्येके। तन्मते इण्—जिगमिष्यते, संजिगंसते। इक्—अधिजिगम्यते मातेत्येव भवति।

४९. तनो वा।

अनिटि सनि परे तनोतेरुपधाया दीर्घो वा भवति। तितांसति, तितंसति। अनिटीति किम्? तितनिषति[5]। यङ्लुकि—तंतनिषति।

५०. अन्त्यसंप्रसारणस्याऽवः।

वेन्वर्जितस्य धातोरन्तर्भूतस्य संप्रसारणस्य दीर्घो भवति। जीनः, जीनवान्। जिनाति—दीर्घे कृते 'प्वादेर्ह्रस्वः'

---

१. अयं नटः कौशलात्तथा रसमभिनयति यथा कंसवधाय बलिबन्धनाय साक्षादेव नारायणं प्रयुङ्क्ते इति परेषां प्रतिपत्तिर्भवतीति।

२. नाटकेन।

३. अयमर्थः—कटं करोतीत्यादौ मुख्यकर्तृव्यापारेऽपि णिञ् प्राप्नोति अत्रापि प्रयोक्तृव्यापारस्य विद्यमानत्वात्। तथाहि—कटं करोतीति कोऽर्थः? जायमानं जनयतीत्यर्थः। इत्याशङ्कायामाह।

४. कर्तारं यः प्रयुङ्क्ते स हि प्रयोक्ता। यदि च व्यापारमात्रे णिञ् स्यात्तदा व्यापारे णिञ् इत्येव उच्येत।

५. 'इवन्तर्ध…' [४/३/६६] इति वेट्।

[४/३/१६] इति ह्रस्व.। संवीतः, हूतः, शूनः । अन्त्यग्रहणं किम् ? सुप्तः, उप्त.। अव इति किम् ? उतः, उतवान् ।

५१. च्वियगयङ्क्यादावियक्येषु ।

च्विक्यग्रहणादऽधातोरप्ययं विधिः । क्य इति निरनुबन्धग्रहणेन क्यच्क्यङ्क्यषां ग्रहणम् । च्वौ, यकि, यङि, क्यादादिये, क्यच्, क्यङ्, क्यष्—इत्येतेषु च परेषु पूर्वस्य स्वरस्य दीर्घो भवति। च्वि—शुचीकरोति, शुचीभवति, शुचीस्यात् । पटूकरोति, पटूभवति, पटूस्यात् । यक्—चीयते, श्रूयते, मन्तूयति, वल्गूयति । यङ—चेचीयते, तोष्टूयते । क्यादादिय—चीयात्, स्तूयात् । क्यच्—निधीयति, दधीयति । क्यङ—श्येनायते, भृशायते । क्यष्—लोहितायते, लोहितायति । क्यादादेर्य इति विशेषणं किम् ? चेषीष्ट ।

५२. ऋतो रीः ।

पूर्वमनुवर्तते । ऋदन्तस्य धातोरधातोर्वा रीरादेशो भवति च्व्यादिषु परेषु । पित्रीकरोति, पित्रीभवति, पित्रीस्यात् । जेह्रीयते, चेक्रीयते । पित्रीयति, मात्रीयति । पित्रीयते, मात्रीयते । यकि क्यादादिये तु परत्वात् रिरेव । ऋत इति किम् ? चेकीर्यते, निर्जेगिल्यते ।

५३. यगऽनि रिः ।

यकि अनि च प्रत्यये परे ऋदन्तस्य रिरादेशो भवति । क्रियते, ह्रियते । अन्—व्याप्रियते, आद्रियते । ह्रस्वविधानसामर्थ्यात् पूर्वेण दीर्घत्वं न भवति ।

५४. क्यादादौ ये ।

यकारादौ क्यादादौ परे ऋदन्तस्य रिरादेशो भवति । क्रियात्, ह्रियात् । क्यादादाविति किम् ? बिभृयात् । य इति किम् ? कृषीष्ट, हृषीष्ट । योगविभाग उत्तरार्थ.।

५५. वातः सयोगादेरेः ।

संयोगादेरादन्तस्य धातोर्यकारादौ क्यादादौ परे एकारोऽन्तादेशो वा भवति । ग्लेयात्, ग्लायात् । म्लेयात्, म्लायात् । अपच्छायात् इत्यत्र तु छकारस्य द्वित्वे सति संयोगादित्वस्य लाक्षणिकत्वान्न भवति । संयोगादेरिति किम् ? यायात् । धातोरिति किम् ? निर्यायात् । य इति किम् ? ग्लासीष्ट ।

५६. अपिदा-धा-सा-स्था-मा-गा-पिब-हाकः ।

एषामेकारोऽन्तादेशो भवति यकारादौ क्यादादौ परे । देयात्, धेयात्, अवसेयात्, स्थेयात्, मेयात्, गेयात्, पेयात्, हेयात् । हाकः ककारो यङ्लुग्निवृत्त्यर्थः । जहायात् । शेषाणां यङ्लुक्यपि भवति । दादेयात्, दाधेयात्, अवसासेयात्, तास्थेयात्, मामेयात्, जागेयात्, पापेयात् । एषामिति किम् ? यायात् । य इति किम् ? गासीष्ट, पासीष्ट । पिबेति किम् ? पांक् रक्षणे—पायात् । पै इत्यस्यापीच्छत्यन्य.।

५७. ईर्हसेऽप्यपि क्ङित्यऽशिति ।

एषां पूर्वोक्तानां धातूनां यब्वर्जिते हसादौ क्ङित्यशिति प्रत्यये परे ईकारोऽन्तादेशो भवति । दीयते, देदीयते । धीयते, देधीयते । धीतः, धीतवान् । धीत्वा स्तनम् । सीयते, सेषीयते । स्थीयते, तेष्ठीयते । मीयते, मेमीयते । गीयते, जेगीयते । गीतः, गीतवान्, गीत्वा । पीयते, पेपीयते । पीत, पीतवान्, पीत्वा । हीयते, जेहीयते । हीनः, हीनवान् । हाङो न भवति । हायते, जाहायते । हसे इति किम् ? तस्थतु, तस्थुः । अयपीति किम् ? प्रदाय, प्रधाय, अवसाय । क्ङितीति किम् ? दाता, धाता, गाता । अशितीति किम् ? माहि । कथं निपीय ? पीङो भविष्यति ।

५८. घ्राध्मोर्यङि ।

घ्राध्मोर्यङि परे ईकारोऽन्तादेशो भवति । जेघ्रीयते, देध्मीयते । यङीति किम् ? घ्रायते, ध्मायते । यङ्लुकि—जाघ्रीत.[1], दाध्मीत. । अन्ये तु यङ्लुक्यपि इच्छन्ति । जेघ्रीत., देध्मीत. ।

५९. हनो घ्नीर्हिंसायाम् ।

हिंसाया वर्तमानस्य हन्तेर्यङि परे घ्नीरित्यादेशो भवति । जेघ्नीयते । हिंसायामिति किम् ? गतौ—जंघन्यते । केचिदिम विकल्पेनाहु. । त्व राजन् ! चटकमपि न जघन्यसे । दीर्घनिर्देशाद्यङ्लुक्यपि[2]—जेघ्नीत: । नेच्छन्त्यन्ये—जंघत इति भवति ।

६०. ईश्च्वावऽवर्णस्याऽनव्ययस्य ।

अव्ययवर्जितस्य अवर्णान्तस्य च्विप्रत्यये परे ईकारोऽन्तादेशो भवति । शुक्लीकरोति, शुक्लीभवति, शुक्लीस्यात् । मालीकरोति, मालीभवति, मालीस्यात् । अनव्ययस्येति किम् ? दिवाभूता रात्रि: । दोषाभूतमह. । दीर्घत्वाऽपवादो योग: ।

६१. क्यचि ।

क्यचि प्रत्यये परेऽवर्णान्तस्य ईकारोऽन्तादेशो भवति । दीर्घत्वाऽपवाद. । पुत्रीयति, मालीयति । योगविभाग उत्तरार्थ: ।

६२. वृषाश्वयोर्मैथुने सुक् ।

वृष, अश्व—इत्येतयोर्मैथुनेऽर्थे वर्तमानयो सुगागमो भवति क्यचि परे । कित्त्वादन्ते । उकार उच्चारणार्थ: । वृषस्यति गौ । अश्वस्यति वडवा । वृषाश्वशब्दावत्र मैथुने वर्तेते । मनुष्यादावपि हि प्रयुज्यते । **'सा क्षीरकण्ठकं वत्सं, वृषस्यन्ती न लज्जिता'** । शुनी गौश्च स्वमश्वस्यति । **'लक्ष्मणं सा वृषस्यन्ती, महोक्षं गौरिवागमत्'** [भट्टिकाव्यं, ४/३०] । मैथुने इति किम् ? वृषीयति, अश्वीयति ब्राह्मणी ।

६३. असुक् च लौल्ये ।

भोक्तुमभिलाषाऽतिरेको लौल्यम् । लौल्ये गम्यमाने क्यचि परे नाम्नोऽसुक् चकारात् सुगागमश्च भवति । दधि भक्षितुमिच्छति—दधिस्यति, दध्यस्यति । मधुस्यति, मध्वस्यति । एवं क्षीरस्यति, लवणस्यति । असुग्विधान-मनकारान्तार्थम् । अकारान्तेषु हि **'अवेतोरपदान्तेऽत:'** [२/१/३१] इति लोपे सति विशेषो नास्ति । अन्यस्तु लोप-ममृष्यमाण: क्षीरास्यति, लवणास्यति इत्युदाहरति । तच्च न बहुसंमतम् । लौल्ये इति किम् ? क्षीरीयति दानाय ।

६४. अशनायोदन्यधनाया: क्षुत्पिपासागर्धेषु ।

क्षुत्, पिपासा, गर्ध—इत्येतेष्वर्थेषु यथासङ्ख्य अशनाय, उदन्य, धनाय—इत्येते क्यजन्ता निपात्यन्ते । अशनायति इति क्षुधायाम् । उदन्यति इति पिपासायाम् । धनायति इति गर्धे । क्षुधादिष्विति किम् ? अशनीयति, उदकीयति, धनीयति दानाय ।

६५. शीङ ए: शिति ।

शीङ: शिति परे एकारोऽन्तादेशो भवति । शेते, शयाते, शेरते । शयीत । शेताम् । अशेत । शयान:, अतिशयान: ।

---

१. **'एचामीर्हल्यऽनपिद्गृश:'** [३/४/७२] इतीकार: ।

२. यङि तु घ्नीरिति ह्रस्वेऽपि **'च्विवर्णयङ्...'** [४/१/५१] इत्यादिना दीर्घ: स्यात् ।

शितीति किम् ? शिश्ये, सशीतिः। ङिन्निर्देशाद्यङ्लुकि न भवति। शेशीत., शेश्यति।

६६. शय् यि क्ङिति।

शीङः क्ङिति यकारादौ प्रत्यये शयादेशो भवति। शय्यते, शाशय्यते, सशय्य, शय्या। यीति किम् ? शिश्ये, शिश्यान.। क्ङितीति किम् ? शेयम्। यङ्लुकि न भवति। संशेशीय।

६७. उपसर्गादूहो ह्रस्वः।

उपसर्गात् परस्य ऊहतेर्ह्रस्वो भवति यकारादौ क्ङिति परे। समुह्यते, समुह्यात्, समुह्य। पर्युह्यते, पर्युह्यात्, पर्युह्य। अभ्युह्यते, अभ्युह्यात्, अभ्युह्य। उपसर्गादिति किम् ? ऊह्यते। यीति किम् ? समूहितम्। क्ङितीति किम् ? अभ्यूह्योऽयमर्थ। ऊ ऊह् इति ऊकारप्रश्लेषान्नेह—आ ऊह्यते ओह्यते, समोह्यत।

६८. क्याबादावीणः।

उपसर्गात्परस्येण ईकारस्य क्ङिति यकारादौ क्यादादौ परतो ह्रस्वो भवति। उदियात्, समियात्, अन्वियात्। **'क्वियग्यङ्क्याबादाविय···'** [४/१/५१] इत्यादिना दीर्घत्वे कृतेऽनेन ह्रस्व। क्यादादाविति किम् ? उदीयते। उपसर्गादिति किम् ? ईयात्। ई इण इति ईकारप्रश्लेषान्नेह—आ ईयात् एयात्, समेयात्। ननु प्रतीयात् इत्यत्र सवर्णदीर्घे सति कथं न ह्रस्व. ? उच्यते —दीर्घे सति उपसर्गात्परस्येणोऽभावात् न भवति। केचिदत्रापीच्छन्ति। प्रतियात्। इकोऽपि सवर्णदीर्घत्वे इच्छन्त्येके। अधियात्।

६९. शासेरात इङ्हसे।

क्ङितीत्यनुवर्तते। शास्तेराकारस्य इकारादेशो भवति ङे हसादौ क्ङिति च प्रत्यये परे। ङे- अशिषत्, अन्वशिषत्। क्ङिति हसे—शिष्ट, शिष्टवान्, अनुशिष्ट, शिष्ट्वा, अनुशिष्य, शिष्य, शिष्यते, शेशिष्यते, शिष्ठ, शिष्व, शिष्म। शासः शिसित्यकृत्वा आत इविधानं यङ्लुकि शाशिष्ट इत्यादिप्रयोगार्थम्। अन्यथा शिष्ट[1] इत्यादि स्यात्। ङहसे इति किम् ? शासति, शशासतु, शशासु। क्ङितीति किम् ? शास्ता, शास्त्र, शास्ति।

७०. क्विपि[2]।

शासेराकारस्य इकारादेशो भवति क्विपि प्रत्यये। आर्यान् शास्तीति आर्यशी.। मित्रशी.।

७१. आङः।

आङः परस्य शासेराकारस्य इकारादेशो भवति क्विपि प्रत्यये एव। आशी., आशिषौ, आशिष। पूर्वेणैव सिद्धे नियमार्थो योग, तेनेह न भवति—आयुराशास्ते, आशास्वहे, आशास्महे।

७२. णबाद्यङोर्द्विः प्राक् तु स्वरे स्वरविधेः।

णबादौ अङि च प्रत्यये परे धातोर्द्वित्व भवति, स्वरादौ तु द्विर्वचननिमित्ते प्रत्यये स्वरस्य कार्यात् प्रागेव द्वित्व भवति। पपाच, पपाठ, इयाज, आर, अचकमत। धातोरिति किम् ? प्राशिश्रियत्। **'वेस्तेः कित्'** [४/३/११७] इति वचनाद् आमि णबादिकार्यं न भवति। दयाचक्रे, विदाचकार। णबाद्यङोरिति किम् ? अदात्। प्रागिति किम् ? निनाय, निन्यतुः, निनयिथ, चक्रतुः, पपौ, पपतु., जग्मतु, अदधन्। एवमादिषु वृद्ध्यादे स्वरविधे पूर्वमेव द्वित्व सिद्धं भवति। स्वर

---

१ यङ्लुगन्तस्यापि अनेकवर्णत्वात् सर्वस्य शिसादेश स्यात्।

२ पूर्वेणैव सिद्धे क्विपीति पृथक्करण क्विपि हसकार्यस्याऽनित्यत्वज्ञापनार्थम्। तेन अव्ययित्यत्र **'य्वोः पुगयहसे'** [४/४/४९] इति यलोपो न। न च अलोपस्य स्थानिवत्त्व वाच्य **'न संधिः'** [१/३/४२] इति यविधौ स्थानिवद्भावनिषेधात्।

इति किम् ? दिदीर्वान्, णिणीर्वान्, जेघ्रीयते, देध्मीयते, जेगीयते । स्वरविधेरिति किम् ? श्वि—शुशाव[1] । तितवनीयिषति[2] इत्यत्र तु स्वरविधेर्द्विर्वचननिमित्तप्रत्ययाऽजन्यत्वान्न ततः प्राग् द्वित्वम् । जग्ले, मम्ले इति अनिमित्तकं आत्वम् । अधिजगे इति विषये आदेश । प्राक् तु स्वरे स्वरविधेरिति आद्विर्वचनमधिकार । अन्यथा हि आटिटत्[3] इत्यादि न सिध्यति ।

७३. आद्योऽवयव एकस्वरः ।

अनेकस्वरस्य[4] धातोराद्य एकस्वरोऽवयव. णवादौ अङि च प्रत्यये द्विर्भवति । जजागार, अचकाणत् । पूर्वेण सर्वस्य द्वित्वे प्राप्ते वचनम् ।

७४. सन्यङश्च ।

सन्नन्तस्य यङन्तस्य च धातोराद्य एकस्वरोऽवयवो द्विर्भवति । तितिक्षते, चिकीर्षति, पापच्यते, लोलूयते । षष्ठीनिर्देश उत्तरार्थः । चकार पूर्वोक्तनिमित्तसमुच्चयार्थं उत्तरार्थ एव, तेनोत्तरत्र णवादौ अङि सन्नन्तयङन्ताना च यथासभव द्वित्व सिद्धम् ।

७५. स्वरादेर्द्वितीयः ।

स्वरादेर्धातोर्द्विवचनभाजो द्वितीयावयव एकस्वरो द्विर्भवति न त्वाद्य । अटिटिषति, अशिशिषति । अटाट्यते, अशाश्यते । प्राक् तु स्वरे स्वरविधेरिति किम् ? आटिटत्, आशिशत्, प्रोर्णुनाव[5], प्रोर्णुनविषति । अरिरिषति[6] इत्यत्र तु इट.[7] कार्यित्व न निमित्तत्वम् । ततो द्वित्वनिमित्तस्य स्वरादिप्रत्ययस्याऽभावात् प्राक् स्वरविधिरेव[8] ।

७६. न बदनाः संयोगादयः ।

स्वरादेर्धातोर्द्वितीयस्याऽवयवस्यैकस्वरस्य बकारदकारनकारा सयोगस्यादयो द्विर्न भवन्ति । उब्जिजिषति, अड्डिटिषते, अड्डिडिषति, उन्दिदिषति, इन्दिद्रीयिषति, औब्जिजत् आड्डिटत्, आड्डिडत्, आन्दिदत् । बदना इति किम् ? ईचिक्षिषते । सयोगादय इति किम् ? प्राणिणिषति ।

७७. अये रः ।

स्वरादेर्धातोर्द्वितीयस्याऽवयवस्यैकस्वरस्य रेफ सयोगादिर्द्विर्न भवति अये—रेफात्पर आनन्तर्येण यकारश्चेन्न भवति । अर्चिचिषति, प्रोर्णुनविषति, प्रोर्णोनूयते, प्रोर्णुनाव, प्रोर्णुनवत्, आर्चिचत् । अये इति किम् ? अरार्यते, अर्यमाख्यातवान्, आरर्यत् । सयोगादिरिति किम् ? अरिरिषति ।

७८. नाम्नो द्वितीयाद्यथेष्टम् ।

स्वरादेर्नाम्नो धातोर्द्विर्वचनभाजो द्वितीयादारभ्य एकस्वरोऽवयवो यथेष्ट द्विर्भवति । अशिश्वीयिषति,

---

1. यवराणा स्वरेण सह सप्रसारणत्वात् स्वरहसयोर्मिश्रितो विधिरत्र न तु स्वरविधि. ।
2. तुकृधातोरनडन्तात् क्यचि सनि 'अन्यस्य' [४/१/७६] इति द्वित्वम् ।
3. प्रागेव ञेर्लोपे सति ।
4. एकस्वरस्यैकस्वरेऽवयवे द्विरुक्ते न किञ्चिदस्य फलम् ।
5. अत्र द्वित्वरूपे परे कार्ये णत्वशास्त्रस्याऽसिद्धत्वात् द्वित्वे कृते णत्वम् ।
6. ऋ क् गतौ ऋ प्रापणे च, ऋश् गतौ वा । अर्तुमऽरितुमरीतु वा इच्छतीति सनि आद्याभ्या 'ऋस्मिपूङञ्जशू···' [४/३/६७] इति ऋशस्तु 'इवन्तर्ध···' [४/३/६६] इत्यनेनेट् ।
7. स्वरादित्वाद् धातोर्द्वितीयावयवस्य इड्रूपस्य द्वित्वे चिकीर्षिते इट कार्यित्वमेवेत्यर्थ ।
8. गुणरूप इत्यर्थः ।

अश्वीयियिषति, अश्वीयिषिषति ।

७९. अन्यस्य ।

स्वरादेरन्यस्य हसादेर्नाम्नो धातोर्द्विर्वचनभाज एकस्वरोऽवयवो यथेष्ट प्रथमो द्वितीयस्तृतीयादिर्वाऽन्यतमो द्विर्भवति। पुपुत्रीयिषति, पुतित्रीयिषति, पुत्रीयियिषति, पुत्रीयिषिषति। पुत्रीयन्त प्रायुक्त—अपुपुत्रीयत्, अपुतित्रीयत्, अपुत्रीयियत् ।

८०. कण्ड्वादेस्तृतीयः ।

कण्ड्वादेर्धातोर्द्विर्वचनभाज एकस्वरस्तृतीय एवाऽवयवो द्विर्भवति। कण्डूयियिषति, असूयियिषति आसूयियत् ।

८१. पुनरेकेषाम् ।

एकेषामाचार्याणा मते द्वित्वे कृते पुनर्द्वित्व भवति। सुसोषुपिषते, प्राणिणिणिषत्, बुबोभूयिषते । एकेषामिति किम्? सोषुपिषते, प्राणिणिषत्, बोभूयिषते ।

८२. ईर्ष्यो यिः सन् वा ।

ईर्ष्यतेर्द्विर्वचनभाजो यि. सन् वा द्विर्भवति। ईर्ष्यियिषति, ईर्ष्यिषिषति ।

८३. ह्वादिः शिति ।

जुहोत्यादयो धातवः शिति प्रत्यये द्विर्भवन्ति । जुहोति, जुह्वत् । प्राक् तु स्वरे स्वरविधेरिति किम्? जुहवानि ।

८४. चराचर-चलाचल-पतापत-वदावद-घनाघन-पाटूपटं वा ।

एते शब्दा अचि कृतद्विर्वचना वा निपात्यन्ते। चरिचलिपतिवदिहन्तीनामजन्तानां द्वित्व हन्तेर्हस्य घत्व पूर्वस्य च दीर्घ । चरतीति चराचर.। एव चलाचल., पतापत., वदावद, घनाघन । पाटयतेरजन्तस्य द्वित्व ह्रस्वत्व पूर्वस्य च ऊदन्तो निपात्यते। पाटयतीति पाटूपट.। पक्षे—चर., चल., पत, वद, हन, पाट । केचित्तु पटूपट इति निपातयन्ति।

८५. चिक्लिद-चक्नसम् ।

चिक्लिदचक्नसशब्दौ निपात्येते। क्लिद्यते. के क्नस्यतेरचि उभयत्र घञर्थे वा के द्वित्व निपात्यते। चिक्लिद., चक्नस.। चक्नुः, ययु, बभ्रु इत्यौणादिकाः ।

८६. दाश्वत् साह्वत् मीढ्वत् ।

एते शब्दा क्वसुप्रत्ययान्ता निपात्यन्ते। दाशृन् दाने—इत्यस्य क्वसावद्वित्वमनिट्त्व च निपात्यते। दाश्वान्, दाश्वांसौ, दाशुषी। षहङ् मर्षणे—इत्यस्य परस्मैपदमद्वित्वमुपधादीर्घत्वमनिट्त्वं च निपात्यते। साह्वान्। मिह सेचने—इत्यस्याऽद्वित्वमनिट्त्वमुपधादीर्घत्व ढत्वं च निपात्यते। मीढ्वान् ।

८७. असवर्णे स्वरे पूर्वस्येवुतोरियुवौ ।

धातोर्द्वित्वे सति य. पूर्वस्तस्य सबन्धिनोरिकारोकारयोर्यथासंख्यमियुवौ भवत. असवर्णे स्वरे परे। इयेष, उवोष, इयर्ति, इयृयात्। अर्तेर्यङ्लुकि द्वित्वे पूर्वस्याऽकारे 'रुगरिकौ च लुकि' [४/१/११०] इति रिगित्यागमे तदिकारस्य चेयुभावे सति अरियर्ति, अरियरीति। रीकि तु अर्यर्ति, अर्यरीति। असवर्णे इति किम्? ईषतुः, ऊषतुः। स्वर इति किम्? पिपक्षति।

८८. **ह्रस्वस्यानादेर्लोपः।**

धातोर्द्वित्वे सति पूर्वस्य ह्रस्य अनादेर्लोपो भवति। जग्लौ, मम्लौ, पपाच, आटतुः। ऋच्छ—ऋचिच्छिषति[1]। उच्छी—उचिच्छिषति। अटाट्यते, बभ्रम्यते। ह्रसस्येति किम्? स्वरस्य मा भूत्। अनादेरिति किम्? आदेर्मा भूत्। पपाच।

८९. **खपे शसस्य।**

अनादिलोपापवादः। धातोर्द्वित्वे सति पूर्वस्य शसस्य तत्सबन्धिस्येव खपे परे लोपो भवति। चुश्चोत, टिष्ठेव, तस्थौ, चस्कन्द। खपे इति किम्? सस्नौ। शसस्येति किम्? पप्सौ।

९०. **गहोर्जः।**

धातोर्द्वित्वे सति पूर्वयोर्गकारहकारयोर्जकारादेशो भवति। जगाम, जघास, जघान। जह्रौ, जहार, जिहीर्षति, जुहोति, जहाति।

९१. **कङोश्चञौ।**

धातोर्द्वित्वे सति पूर्वयो ककारङकारयोर्यथासङ्ख्यं चकारञकारौ भवत। चकार, चखाद। ञुङ्वे, ञिङ्कारीयिषति।

९२. **न कवतेर्यङि।**

कवतेर्द्वित्वे सति पूर्वस्य कस्य चो न भवति यङि परे। कोकूयते खरः। कवतेरिति निर्देशः कौतेः कुवतेश्च निवृत्यर्थ। चोकूयते। कवतिरव्यक्ते शब्दे। कुवतिरार्त्तस्वरे। कौति शब्दमात्रे। एषां पाठे शब्दमात्रार्थत्वेऽपि गत्यर्थत्व अविशेषे धावतिगच्छत्यादीनामिवार्थभेद। यङ्लुकि च निषेधो न भवति। चोकवीति। अन्ये तु यङ्लुक्यपि प्रतिषेधयन्ति। कोकवीति। यङीति किम्? चुकुवे।

९३. **झभखघधोर्जबचपौ।**

धातोर्द्वित्वे सति पूर्वयोर्झभखथयोर्यथासङ्ख्यं जबचपौ आसन्नौ भवत। जझाम, डुढौके, दधौ, जुघोष, बभार। चखाद, पफाल, चिच्छेद, टिठकारयिषति, तस्थौ। झभखथयोरिति किम्? पपाच।

९४. **ष्ठिवेस्तिर्वा।**

ष्ठिवेर्द्वित्वे सति पूर्वस्य तिरित्यादेशो वा भवति। तिष्ठेव, टिष्ठेव। तेष्ठीव्यते, टेष्ठीव्यते। तेरिकारोऽत्रोच्चारणार्थः, तेन 'इवन्तर्ध···' [४/३/६६] इत्यादिना वेटि तुष्ठ्यूषति, टुष्ठ्यूषति। पूर्वस्येत्यादेशविधानमेव ज्ञापयति ष्ठिवेः षकारः ठकारपरः[2] ष्ठाष्टचैप्रभृतीनां तु तवर्गपरः, तेन तस्थौ, तष्टचौ[3] इत्यादि भवति। केचित्तु 'स्वरात्' [१/३/२५] इति द्विरुक्तस्य छकारस्य द्वित्वे सति पूर्वस्य त्यादेशमिच्छन्ति। तन्मते उच्छि—उतिच्छिषति। ऋच्छ—ऋतिच्छिषति।

९५. **ऋतोऽत्।**

धातोर्द्वित्वे सति पूर्वस्य ऋतोऽद् भवति। चकार, ववृधे।

---

१. अत्राऽनेन अधस्तनच्छस्य लोपे **निमित्ताभावे**·· इति न्यायेन ऊर्ध्वस्थचस्य छ, ततो '**झभखघधोर्जबचपौ**' [४/१/९३] इत्यनेन छस्य च।

२. यद्यत्र षकार. थकारपर. स्यात् तदाऽनेन तविधान न कुर्यात्। यत '**खपे शसस्य**' [४/१/८९] इति षलोपे **निमित्ताभावे**··· इति न्यायेन ठस्य थे '**झभखघधोर्जबचपौ**' [४/१/९३] इति थस्य च ते तकार सिद्ध एव। पक्षे टकारविधानार्थं तु 'ष्ठिवेष्टिर्वा' इति सूत्रं कुर्यादित्यर्थ।

३. अत्र '**खपे शसस्य**' [४/१/८९] इति षलोपे **निमित्ताभावे**··· इति टकारस्य तकारः।

९६. ह्रस्वः ।

धातोर्द्वित्वे सति पूर्वस्य दीर्घस्य ह्रस्वो भवति। ददौ, तस्थौ, पपौ, निनाय, लुलाव। कृ—चकार। मिसेके, लुलोके, डुढौके।

९७. अत इत्सनि ।

धातोर्द्वित्वे सति पूर्वस्याऽकारस्य इकारादेशो भवति सन्प्रत्यये परे। पिपक्षति, पिपासति, प्रतीषिषति, जिह्मायकीयिषति। अत इति किम्? लुलूषति। तपरकरण किम्? पापचिषते। सनीति किम्? पपाच।

९८. उतोऽवर्णे यलजपौ ।

धातोर्द्वित्वे सति पूर्वस्य उकारान्तस्य अवर्णान्ते यलप्रत्याहारे जकारे पवर्गे च परत सनप्रत्यये परे इकारादेशो भवति। यियविषति[1], यियावयिषति, रिरावयिषति, लिलावयिषति। जु सौत्रो धातु। जिजावयिषति। पिपविषते[2], पिपावयिषति, बिभावयिषति, मिमावयिषति। उत इति किम्? पापचिषते। यलजपाविति किम्? तुतावयिषति, जुहावयिषति, शुशावयिषति। अवर्णे इति किम्? बुभूषति[3], जुज्यावयिषति। सनीति किम्? लुलाव। ननु ञ्यन्ताना वृद्ध्यावादेशयो कृतयोर्द्वित्वे सति पूर्वस्य उकारान्तता न सभवति, तत्र **'अत इत्सनि'** [८/१/९७] इत्यनेनैव सिद्धे किं गुरुणा सूत्रेण, एतावत्तु विधेयं 'उतोऽवर्णे पये' इति। पिपविषते, यियविषति—इत्यत्र पूर्वस्योकारस्येत्व यथा स्यात्। सत्यम्। **औ यत् कृतं कार्यं तत्सर्वं स्थानिवद्भवतीति** न्यायज्ञापनार्थ वचनम्। तेन पुस्फारयिषति[4], चुक्षावयिषति, शुशावयिषति इत्याद्यपि सिद्धम्। एतच्च ज्ञापकं यलजपुवत् अन्यत्रापि अवर्णे एव द्रष्टव्यम्, तेन अचिकीर्तत्[5] इत्यत्रेकारवतो द्विर्वचन सिद्धम्।

९९. श्रु-स्रु-द्रु-प्रु-प्लु-च्यूनां वा ।

एषा सनि परे द्वित्वे सति पूर्वस्य उकारान्तस्य अवर्णान्ते धात्वक्षरे परे इकारादेशो वा भवति। शिश्रावयिषति, शुश्रावयिषति। सिस्रावयिषति, सुस्रावयिषति। दिद्रावयिषति, दुद्रावयिषति। पिप्रावयिषति, पुप्रावयिषति। पिप्लावयिषति, पुप्लावयिषति। चिच्यावयिषति, चुच्यावयिषति। उत इति किम्? सोस्रविषति[6]। अवर्णे इति किम्? शुश्रूषते, सुस्रूषति।

१००. ऋ-पृ-पॄ-भृ-मा-हाङां शिति ।

ऋ, पृ, पॄ, भृ, मा, हाङ्—इत्येतेषा द्वित्वे सति पूर्वस्य इकारादेशो भवति शिति परे। इयर्ति, इययात्। पिपर्ति, पिपृयात्। पिपर्ति, पिपूर्त, पिपूर्यात्। बिभर्ति, बिभृयात्। मिमीते, अमिमीत। जिहीते, अजिहीत। हाङिति ङकार. किम्? ओहांक्—जहाति। शितीति किम्? आर, पपार, बभार, ममे, जहे। शितीति द्वित्वस्य विशेषणं किम्? पर्पर्ति, परीपर्ति। अत्र यङन्तस्य द्वित्व न शितीति न भवति।

---

१. **'इवन्तर्ध…'** [४/३/६६] इति वेट्।

२. **'ऋस्मिपूङञ्ज…'** [४/३/६७] इति नित्यमिट्।

३ **'ग्रहगुहश्च सनः'** [४/३/८८] इति इड्निषेध।

४ **'चिस्फुरोर्वा'** [४/२/१११] इति वा आत्वम्।

५ ननु कीर्त्यादिणस्यानिमित्ते एव विधानात् निमित्तत्वाऽभावे कथ **औ यत् कृतं कार्यं** … इति न्यायेन स्थानित्वप्राप्तिरिति। सत्यम्। यद्विना यन्न भवति तत्तस्य निमित्तमिति कृत्वा ञिज्निमित्त कीर्त्ते। यतश्चुरादीना ञिच् अवश्यमेव भवति। ततो ञिच्सनियोगे कीरादेशोऽतो निमित्तत्वम्।

६ कुटिलार्थे यङ्लुगन्तस्य सन्प्रत्यये स्रवते प्रयोग। यदि शृणोति स्यात्तदा सन्प्रत्यये परे **'श्रुवोऽनाङ्प्रतेः'** [३/३/६४] इत्यात्मनेपद स्यात्।

१०१. निजविजविषां गुणः।

एषां त्रयाणां शिति द्वित्वे सति पूर्वस्य गुणो भवति। नेनेक्ति, नेनिक्ते, नेनिज्यात्, नेनेक्तु, अनेनेक्। वेवेक्ति, वेविक्ते, वेवेष्टि, वेविष्टे। शितीति किम्? निनेज, निनिक्षति, अनीनिजत्।

१०२. आङ्याऽनीगादेर्यङः।

चकारो गुणानुकर्षणार्थ। धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य अनीगादे—नीग्-मुग्-रीग्-रुग्-रिग्-वर्जितस्य आकारो गुणश्चामन्तौ भवतः। पापच्यते, अटाट्यते, चेचीयते, लोलूयते। हांक्—जेहीयते। पापचीति, बेभिदीति, लोलवीति। नैनावाद्गुणौ यङ्निमित्ताविति यङ्लुक्यपि भवतः। अनीगादेरिति किम्? वनीवच्यते, ययम्यते, नरीनृत्यते, नर्नर्ति, नरिनर्ति। ननु चात्र अपवादत्वान्नीगादय एव बाधका भविष्यन्ति किं नीगादिवर्जनेन? सत्यम्। द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधक इति ज्ञापनार्थम्, तेन अचीकरत्—इत्यत्र 'लघोर्दीर्घोऽस्वरादेः' [४/१/११२] इति सन्वत्कार्यं[1] न बाध्यते।

१०३. न हाको लुकि।

ओहाक् त्यागे—इत्यस्य द्वित्वे सति पूर्वस्य यङो लुकि आकारो न भवति। जहाति, जहेति। लुकीति किम्? जेहीयते।

१०४. वञ्च-स्रंस-ध्वंस-भ्रंश-कस-पत-पद-स्कन्दो नीक्।

एषां यङन्ताना द्वित्वे सति पूर्वस्य नीगागमो भवति। वनीवच्यते, वनीवञ्चीति। सनीस्रस्यते, सनीस्रसीति। दनीध्वस्यते, दनीध्वसीति। बनीभ्रश्यते, बनीभ्रंशीति। चनीकस्यते, चनीकसीति। पनीपत्यते, पनीपतीति। पनीपद्यते, पनीपदीति। चनीस्कद्यते, चनीस्कन्दीति। दीर्घविधानाद् ह्रस्वो न भवति।

१०५. मुरतो ञमस्य।

ञमान्तस्य धातोर्यङन्तस्य द्वित्वे सति पूर्वस्य अकारस्य मुरागमो भवति। 'यङो मुक्' [१/१/२५] इति पदत्वान्मस्याऽनुस्वारो विकल्पेन भवति। तनन्यते, तन्तन्यते। तननीति, तन्तनीति। जंगम्यते, जङ्गमीति। बंभण्यते, बम्भणीति। अत इति किम्। तेतिम्यते, जोघुण्यते। ञमस्येति किम्? पापच्यते।

१०६. जप-जभ-दह-दश-भञ्ज-पशाम्।

एषां यङन्तानां द्वित्वे सति पूर्वस्य अतो मुरागमो भवति। जजप्यते, जजपीति। जजभ्यते, जंजभीति। दंदह्यते, दंदहीति। ददश्यते, दंदशीति। बंभज्यते, बभञ्जीति। पशिनि[2] सौत्रो धातुः। पपश्यते, पाशीति। दशिति लुप्तनकारनिर्देशाद् यङ्लुक्यपि दशेर्नलोपो भवति। अन्यस्तु नलोप नेच्छति, तेन ददशीति।

१०७. चरफलाम्।

चर, फल, ञिफला—इत्येषां यङन्ताना द्वित्वे सति पूर्वस्य अतो मुरागमो भवति। चचूर्यते, चंचुरीति। पंफुल्यते, पफुलीति। बहुवचनं ञिफला विशरणे इत्यस्यापि परिग्रहार्थम्।

१०८. ति चोपधाया उर्गुणो न।

पूर्वमनुवर्तते। यङन्ताना[3] चरफला तकारादौ च प्रत्यये उपधाया अकारस्य उकारादेशो भवति तस्य च गुणो न

---

१. सन्वत्कार्यबाधे तु अचाकरत् इत्यनिष्ट स्यात्।

२. अथ दन्त्यान्तोऽपि गतौ कौटिल्ये यङ्। बन्धनार्थचुरादिगणस्थपशधातुस्तु नाऽत्र गृह्यते मौलस्यैव गत्यर्थत्वात्।

३. द्वित्वे सति ज्ञातव्य न पूर्वस्य उपधाऽकारस्य ग्रहणात्।

भवति। चचूर्यते[1], चचुरीति। पंफुल्यते, पफुलीति। चूर्तिः, ब्रह्मचूर्णिः, फुल्लिः, फुल्लः[2], फुल्लवान्। अत इति किम्? चारयतेः फालयतेश्च क्विप्। तत आचारे क्विप्। ततो यङ्—चचार्यते, पफाल्यते। अत्र एकदेशविकृतस्यानन्यत्वात् प्राप्नोति। गुणो नेति किम्? चंचूर्ति, पंफुल्ति।

१०९. ऋत्वतां रीक्।

ऋकारवतां धातूनां यङन्ताना द्वित्वे सति पूर्वस्य रीगागमो भवति। नरीनृत्यते, दरीदृश्यते, वरीवृत्यते, चलीक्लृप्यते, परीपृच्छ्यते, वरीवृश्च्यते, जरीगृह्यते। प्रच्छिव्रश्चिग्रहीणामृकारे कृते ऋत्वत्त्वम्। ऋत्वतामिति किम्? चेक्रीयते, जेह्रीयते। कृनहृतो रीभावे कृते द्वित्वमिति ऋत्वत्त्व नास्ति। बहुवचननिर्देशो लाक्षणिकपरिग्रहार्थः, अन्यथा औपदेशिकानामेव स्यात्।

११०. रुग्रिकौ च लुकि।

ऋत्वता धातूनां यङो लुकि द्वित्वे सति पूर्वस्य रुक्, रिक्, रीक्—इत्येते आगमा भवन्ति। उकावितौ[3]। चर्कर्ति, चरिकर्ति, चरीकर्ति। जर्हर्ति, जरिहर्ति, जरीहर्ति। नर्नर्ति, नर्नृतीति, नरिनर्ति, नरिनृतीति, नरीनर्ति, नरीनृतीति। वर्वष्टि, वर्वृश्चीति, वरिवृष्टि, वरिवृश्चीति, वरीवृष्टि, वरीवृश्चीति। चल्कल्प्ति, चल्क्लृपीति, चलिकल्प्ति, चलिक्लृपीति, चलीकल्प्ति, चलीक्लृपीति। लुकीति किम्? नरीनृत्यते। ऋत्वतामिति किम्? कॄ—चाकर्ति, चाकरीति, चाकीर्त, चाकिरति। गॄ—जागल्ति। तॄ—तार्तर्ति।

१११. असमानलोपे सन्वल्लघुनि ञावङ्परे।

न विद्यते समानस्य लोपो यस्मिन् अङ्परे ञौ द्वित्वे सति पूर्वस्य लघुनि धात्वक्षरे परे सन्प्रत्ययवत् कार्य भवति। 'अत इत्सनि' [४/१/९७] इति इत्त्वमुक्तमिहापि तथा—अचीकरत्, अजीहरत्। 'उतोऽवर्णे यलजपौ' [४/१/९८] इत्युक्तमिहापि तथा—अयीयवत्, अरीरवत्, अलीलवत्, अजीजवत्, अपीपवत्, अबीभवत्, अमीमवत्। 'श्रुस्रुद्रुप्रुप्लुच्युनां वा' [४/१/९९] इति उक्तमिहापि तथा—अशिश्रवत्, अशुश्रवत्। असिस्रवत्, असुस्रवत्। अदिद्रवत्, अदुद्रवत्। अपिप्रवत्, अपुप्रवत्। अपिप्लवत्, अपुप्लवत्। अचिच्यवत्, अचुच्यवत्। अन्यस्य न भवति। अनूनवत्, अजूहवत्। असमानलोपे इति किम्? अचकथत्। दृषदमाख्यत्—अददृषत्। पटु लघु कृपि हरि वाख्यत्—अपीपटत्, अलीलघत्, अचीकपत्, अजीहरत् इत्यादौ तु वृद्धौ कृतायां संध्यक्षरलोप इति असमानलोपत्वात् सन्वद्भावः। लघुनीति किम्? अततक्षत्, अररक्षत्, अबभाणत्। आविति किम्? अचकमत। आविति जात्याश्रयणात् वादितवन्त प्रयोजितवान्—अवीवदत्[4] वीणा परिवादकेन, अपीपठन्माणवकमुपाध्यायेन। अत्र ञेः समानस्य लोपेऽपि भवति।

११२. लघोर्दीर्घोऽस्वरादेः।

अस्वरादेर्धातोरसमानलोपे द्वित्वे सति पूर्वस्य लघोरङ्परे ञौ लघुनि धात्वक्षरे परे दीर्घो भवति। अपीपचत्, अचीचरत्, अलीलवत्, अजूहवत्, अबूभुजत्, अतूतवत्,। लघोरिति किम्? अचिक्षणत्। अस्वरादेरिति किम्? और्णुनवत्। ऊहरिवाचरतीति क्विब्लोपे ञौ—औरिरवत्। लघुनीति किम्? अततक्षत्। आविति किम्? अचकमत। अङ्परे इति किम्? रिरमयिषति। असमानलोपे इति किम्? अचकथत्, अददृपत्। ञिजात्याश्रयणात् अवीवदत् वीणां परिवादकेन।

---

१ द्वित्वे सत्यधिकाराभ पूर्वमुत्वम्। चूर्तिरित्यत्र तु द्वित्वाऽसभवात् द्वित्वाऽभावेऽपीति बुध्यम्।

२. 'अनुपसर्गाः फुल्ल ...' [५/३/८६] इति लत्वम्।

३. रिगित्यत्र ककार एव इत् न तु इकारो रुकाभेदाऽसभवात्।

४. वदति वीणा, ता परिवादकः प्रयुक्तवान्, तमन्यः प्रयुक्तवान्, ञिन्द्वयम्। यद्यपि अत्र ञौ ञेर्लोपः अभूत् तथापि न समानलोपः। यतो आविति जात्या एकवचनं ततश्च यः कश्चित् ञिन् स सर्वोऽपि निमित्ततयोपात्त। अतः स लुप्तोपि निमित्तम्। एवं अपीपठत् इत्यत्रापीति।

११३. स्मृ-दॄ-स्तॄ-त्वर-प्रथ-म्रद-स्पशोऽत् ।

एषां धातूनामसमानलोपे ङपरे णौ द्वित्वे सति पूर्वस्य अकारोऽन्तादेशो भवति । सन्वद्भावापवाद. । असस्मरत्, अददरत् । अत्र परत्वाद्दीर्घोऽपि न भवति । अतस्तरत्, अतत्वरत्, अपप्रथत्, अमम्रदत्, अपस्पशत्,

११४. वेष्टिचेष्टयोर्वा ।

वेष्टिचेष्टयोर्धात्वोरसमानलोपे ङपरे णौ द्वित्वे सति पूर्वस्य अकारोऽन्तादेशो वा भवति । अववेष्टत्, अविवेष्टत् । अचचेष्टत्, अचिचेष्टत् ।

११५. ई च गणः ।

गणेर्ङपरे णौ द्वित्वे सति पूर्वस्य ईकारोऽकारश्चान्तादेशो भवति । अजीगणत्, अजगणत् । गणेरदन्तत्वेन समानलोपित्वात् सन्वद्भावो दीर्घत्वं च न प्राप्नोतीतीत्वविधिः । **'भूरिदाक्षिण्यसंपन्नं यस्त्वं सान्त्वमचीकथः'** इति प्रयोगदर्शनाद् अन्येषामपि यथादर्शनमीत्वमिच्छन्त्येके ।

११६. उपान्त्यस्याऽसमानलोपिशास्वृदितो ङे ।

समानलोपिशास्वृदनुबन्धवर्जितस्य धातोरुपधाया ङपरे णौ ह्रस्वो भवति । अपीपचत्, अदीदपत्, अचीकरत् अलीलवत् । अत्र नित्यमपि[1] द्विर्वचनं बाधित्वा प्रागेव ह्रस्वो भवति ओणेरृदित्करणज्ञापकात् । तद्धि मा भवानोणिणत् इत्यत्र ऋदित्वादुपधाह्रस्वत्वप्रतिषेधो यथा स्यादित्येवमर्थं क्रियते । यदि चात्र नित्यत्वात्पूर्वमेव द्वितीयद्वित्वं स्यात् तदाऽनुपधत्वादेव ह्रस्वत्वस्याऽप्राप्तिरिति किं तन्निवृत्त्यर्थेन ऋदित्करणेन । एवं मा भवानटिटत्, मा भवानशिशत् इत्यादि सिद्धं भवति । ङपरे णौ इति च न धातुर्विशिष्यते, किं तर्हि तदुपधा इति णे. पूर्वस्याऽधातुत्वेऽपि ह्रस्वो भवति । तेन गोनात्रमाख्यत् अजूगुनत् । केचिदौत स्थानिवद्भावेनोपधत्वाऽभावात्[2] ह्रस्वं नेच्छन्ति । तेन अजुगोनत् । णाविति किम् ? ङयुपधाया एतावत्युच्यमाने अलीलवत् इत्यादौ अन्तरङ्गावपि वृद्ध्यावादेशौ, अदीदपत् इत्यादौ पुगागमं च बाधित्वा वचनसामर्थ्यात्[3] ङ्युपधाया स्वरस्य ह्रस्वं प्रसज्ज्येत । अपीपचत् इत्यादौ च ङ्युपधास्वराऽभावान्न स्यात् । ङपरे इति किम् ? कारयति, पाचयति । उपधाया इति किम् ? अचकाङ्क्षत् । असमानलोपिशास्वृदित इति किम् ? राजानमतिक्रान्तवान्—अत्यरराजत् । लोमान्यनुमृष्टवान् —अन्वलुलोमत् । स्वामिनमाख्यत्—असस्वामत् । तादृशमाख्यत्, अततादत् । यत्र टेर्लोप. स्वरहसरूपस्तत्र स्थानिवद्भावेन न सिध्यतीति वचनम् । यत्र तु स्वरस्यैव लोपस्तत्र स्वरादेशत्वात् स्थानिवद्भावेनैव सिध्यति । मालामाख्यत्—अममालत् । मातरमाख्यत् —अममातत् । अशशारत्, अशुशूरत् । ननु यत्रापि स्वरहसलोपस्तत्रापि अवयवाऽवयविनोरभेदनयेन स्वरादेश एवेति स्थानिवद्भावेनैव[4] सिद्धयति. किमऽसमानलोपिवचनेन ? सत्यम् । स्थानिवद्भावस्य अनित्यत्वख्यापनार्थं वचनम् । तेन वाम्या परिच्छिन्नवान्—पर्यवीवमत् । स्वादु कृतवान्—असिस्वददित्यादि सिद्धम् । अत्रेकारोकारयो **'नामिनोऽकलिहलेः'** [४/३/५१] इति वृद्धौ कृताया टिलोपादऽसमानलोपित्वम् । ननु च परत्वात् प्रथमं लोपेनैव भवितव्यम् । नैवम् । हलिकलिवर्जनात् परमपि लोपं वृद्धिर्बाधते । अत एव तत्र हलिकलिवर्जनमर्थवत् । शासु—अशशासत् । आशामोऽपि इच्छत्यन्यः । आशशासत् । ऋदित् ओणृ—मा भवानोणिणत् । ओखृ —मा भवानोचिखत् । एजृ—मा भवानेजिजत । याचृ—अययाचत् । सेकृ—असिसेकत् । लोकृ—अलुलोकत् । ढौकृ—अडुढौकत् । शासेरुदित्करणं यङ्लुग्निवृत्त्यर्थम् । अशाशसत् । अन्ये तु अशाशासत् इत्यपीच्छन्ति । वदति स्म

---

१. **कृताकृत** '' इति न्यायान्नित्यत्वम् । यथा मा भवानटिटत् इत्यादौ ह्रस्वत्वे कृतेऽकृते च द्वित्वं प्राप्नोतीति नित्यं, ह्रस्वस्तु द्वित्वे कृते न प्राप्नोतीत्यनित्यः ।

२ स्वमते तु **'स्वरस्य परे** '' [८/४/११७] इति परिभाषाया अनित्यत्वमाश्रितमिति सूत्रपर्यन्ते वक्ष्यति ।

३. अन्यथा यदि वृद्ध्यावादेशौ स्याता तदा उपधत्वाभावेन ह्रस्वत्वाऽभावात् वचननैरर्थक्यं प्राप्नोति ।

४. अयमर्थ—**'स्वरस्य परे**''' [८/४/११७] इति स्वरादेश स्थानी । अत्र तु स्वरहसादेश ।

५. ततश्च समानलोपित्वात् ह्रस्वत्वं न प्राप्नोतीति भाव ।

वीणा, तां प्रायुक्त परिवादकः, तमप्यन्य: प्रायुक्त—अवीवदत् वीणा परिवादकेनेति तु णिजात्याश्रयणात् सिद्धम् ।

११७. भ्राज-भास-भाष-दीप-जीव-मील-पीड-कण-रण-बण-भण-श्रण-लप-लुप-लुट-ह्वे-हेठां वा ।

एषामङ्परे णौ उपधाया ह्रस्वो वा भवति। अबिभ्रजत्, अबभ्राजत्। अबिभ्रसत्, अबभ्रासत्। अबीभसत्, अबभासत्। अबीभषत्, अबभाषत्। अदीदिपत्, अदिदीपत्। अजीजिवत्, अजिजीवत्। अमीमिलत्, अमिमीलत्। अपीपिडत्, अपिपीडत्। अचीकणत्, अचकाणत्। अरीरणत्, अरराणत्। अबीबणत्, अबबाणत्। अबीभणत्, अबभाणत्। अशिश्रणत्, अशश्राणत्। अलीलपत्, अललापत्। अलूलुपत्, अलुलोपत्। अलूलुटत्, अलुलोटत्। अजूहवत्, अजुहावत्। अजीहिठत्, अजिहेठत्।

११८. तिष्ठतेरित् ।

अङ्परे णौ तिष्ठतेरुपधाया इकारो भवति। अतिष्ठिपत्, अतिष्ठिपताम्, अतिष्ठिपन्। तिब्निर्देशो यङ्लुग्निवृत्त्यर्थः। अतास्थपत्।

११९. जिघ्रतेर्वा ।

अङ्परे णौ जिघ्रतेरुपधाया इकारो वा भवति। अजिघ्रिपत्, अजिघ्रपत्। तिब्निर्देशो यङ्लुग्निवृत्त्यर्थः। अजाघ्रपत्।

१२०. ऋद् ऋवर्णस्य ।

अङ्परे णौ धातोरुपधाया ऋवर्णस्य ऋकारादेशो वा भवति। अवीवृतत्, अववर्तत्। अवीवृधत्, अववर्धत्। अमीमृजत्, अममार्जत्। अदीदृशत्, अददर्शत्। अचीकृतत्, अचिकीर्तत्। वचनसामर्थ्यादिरकीर्दादेशौ बाध्येते। उपधाया इति किम्? अचीकरत्।

१२१. अत[1] आदेराण्णबादौ पूर्वस्य ।

णबादौ धातोर्द्वित्वे सति पूर्वस्यादेरकारस्य आकारो भवति। आट, आटतुः, आटुः, आटिथ। आद, आदतुः, आदुः, आदिथ। अत इति किम्? ईयतुः, ईयुः। आदेरिति किम्? पपाच, पपाठ। णबादौ इति उत्तरार्थम्। इह तु णबादेरन्यस्मिन् यङादौ द्वित्वे सति आदावकारस्यासंभवात्।

१२२. आतो नुड् ऋदाद्यशूसंयोगस्य ।

पूर्वभूतात् आकारात् परस्य ऋकारादेरश्नोतेः संयोगान्तस्य च धातोर्नुडागमो भवति णबादौ। ऋदादि—आनर्ध, आनृधतुः, आनृधुः। आनृजे, आनृजाते, आनृजिरे। अश्—आनशे, आनशाते, आनशिरे। संयोग—आनर्च, आनर्चतुः। आनञ्ज, आनञ्जतुः। आनङ्ग, आनङ्गतुः। आनर्च्छ, आनर्च्छतुः। ऋदादेरिति किम्? आर[2], आरतुः। अशू इत्यूकारः किम्? अश्नातेर्मा भूत्। आश, आशतुः। संयोगस्येति किम्? आट, आटतुः।

१२३. वाञ्छेः ।

पूर्वभूतात् आकारात्परस्य आञ्छेर्नुडागमो वा भवति णबादौ। आनाञ्छ, आनाञ्छतुः, आनाञ्छुः। पक्षे—आञ्छ, आञ्छतुः, आञ्छुः।

---

१ 'अवेतोरपवाञ्लेऽत:' [२/१/३१] इत्यस्यापवादः।

२ ऋत् आदिरेव यस्येति नात्र ऋदादित्वमेव, किंतु ऋदन्तत्वमपि। आद्यन्तवदेकस्मिन्निति ऋकारादित्वात् ऋकारान्तत्वाच्च।

१२४. भुवोऽत् ।

भवतेर्द्वित्वे सति पूर्वस्य अकारोऽन्तादेशो भवति णबादौ परे । बभूव, बभूवतुः । बभूवे चैत्रेण । अनुबभूवे कम्बलः साधुना । णबादाविति किम् ? बुभूषति । केचित्तु कर्त्तर्येव अकारमिच्छन्ति न भावकर्मणोः । तन्मते बुभूवे चैत्रेण, अनुबुभूवे कम्बलः साधुना इत्येव भवति ।

१२५. देर्दिगिर्न च द्विः ।

देङो दिगिरित्ययमादेशो भवति णबादौ परे न चाय द्विर्भवति । आदेशे कृते द्वित्वं प्राप्नोतीति निषिध्यते । आदेशसन्नियोगे च निषेधादन्यत्र द्वित्वं भवत्येव । दिग्ये, दिग्याते, दिग्यिरे । अवदिग्ये, अवदिग्याते, अवदिग्यिरे ।

१२६. अङि पिबः पीप्य् ।

ञ्यन्तस्य पिबतेरङि परे पीप्य् इत्ययमादेशो भवति न चाय द्विः । अपीप्यत्, अपीप्यताम्, अपीप्यन् । पिबतिनिर्देशात् पातेर्न भवति । अपीपलत् । लुप्ततिब्निर्देशात् यङ्लुक्यपि न भवति । अपापयत् । अङीति किम् ? पाययति ।

१२७. अनादेशादेरेकहसमध्येऽतोऽपिण्णबादिसेट्थपोरेः ।

अपिति णबादौ सेट्थपि च परे योऽनादेशादिर्धातुस्तत्सम्बन्धिनोऽसहायहसयोर्मध्यस्थितस्य अकारस्य एकारादेशो भवति न च धातुर्द्विर्भवति । पेचतुः, पेचुः, पेचिवान्, पेचुषी, पेचिम, पेचिथ । रेणतुः, रेणुः, रेणिथ । येमतुः, येमुः, येमिथ । अनादेशादेरिति किम् ? चकणतुः, चकणुः, चकणिथ । बभणतुः, बभणुः, बभणिथ । जगणतुः, जगणुः, जगणिथ । एकहसमध्ये इति किम् ? ततक्षतुः, ततक्षुः, ततक्षिथ । अत इति किम् ? दिदिवतुः, दिदिवुः, दिदेविथ । तपरकरणं किम् ? ननाथे, ननाथाते, ननाथिरे । अपिदिति किम् ? अहं पपच, अहं पपठ । णबादीति किम् ? पच्यते । सेट्थबिति किम् ? पपक्थ । अपिण्णबादिसेट्थब्भ्यामनादेशादित्वस्य विशेषणं किम् ? इहापि यथा स्यात् । णम्—नेमतुः, नेमुः, नेमिथ । पह—सेहे, सेहाते, सेहिरे । पहण्—सेहिथ । अत्र हि अनिमित्तं नत्वमत्वे न तु णबादिसेट्थब्निमित्ते इति ।

१२८. तॄ-फल-फला-भज-त्रपाम् ।

एषामकारस्य एकारादेशो भवति अपिति णबादौ सेट्थपि च परे न चैते द्विर्भवन्ति । तेरतुः[1], तेरुः, तेरिथ । फेलतुः, फेलुः, फेलिथ । भेजतुः, भेजुः, भेजिथ । त्रेपे, त्रेपाते, त्रेपिरे, त्रेपिथ । अपिदिति किम् ? अहं ततर । सेट्थबिति किम् ? बभक्थ । अत इति किम् ? तितीर्षति । तरतेरन्तो गुणरूपत्वात्[2] फलभजोरादेशादित्वात् त्रपेरऽनेकहसमध्यत्वाच्च न प्राप्नोतीति वचनम् ।

१२९. राधेर्हिंसायाम् ।

हिंसायां वर्तमानस्य राधेरवर्णस्य एकारादेशो भवति अपिति णबादौ सेट्थपि च परे न चाय द्विर्भवति । अतोऽभावादिह अत इति अवर्णत्वे विपरिणतः । रेधतुः, रेधुः, रेधिथ । अपरेधतुः, अपरेधुः, अपरेधिथ । परिरेधतुः, परिरेधुः, परिरेधिथ । अपिदिति किम् ? रराध । हिंसायामिति किम् ? आरराधतुः, आरराधुः, आरराधिथ ।

१३०. जॄ-भ्रम-वम-त्रस-फण-स्यम-स्वन-राज-भ्राज-भ्राश-भ्लाशां वा ।

एषामवर्णस्य एकारादेशो वा भवति अपिति णबादौ सेट्थपि च परे न चैते द्विर्भवन्ति । जेरतुः, जजरतुः । जेरुः, जजरुः । जेरिथ, जजरिथ । भ्रेमतुः, बभ्रमतुः । भ्रेमुः, बभ्रमुः । भ्रेमिथ, बभ्रमिथ । वेमतुः, ववमतुः । वेमुः, ववमुः ।

---

१. 'णबाद्यजोर्द्विः प्राक् तु स्वरे…' [४/१/७२] इति भणनात् पूर्वं द्वित्वे 'स्कृच्छृतामकि णबादौ' [४/२/६] इति गुणे अत एत्वे न च द्विरिति वचनात् कृतमपि द्वित्वं निवर्तते । एवं जॄधातोरपि ।

२. 'न शसदद…' [४/१/१३४] इति निषेधः स्यादित्याह ।

वेमिथ, ववमिथ। 'उद्वेमुस्तत्र रुधिरं रथिनोऽन्योन्य वीक्षिताः'। वमेर्नेच्छन्त्यन्ये। त्रेसतु, तत्रसतु। त्रेसुः, तत्रसुः। त्रेसिथ, तत्रसिथ। फेणतुः, पफणतुः। फेणुः, पफणुः। फेणिथ, पफणिथ। स्येमतुः, सस्यमतुः। स्येमुः, सस्यमुः। स्येमिथ, सस्यमिथ। स्वेनतुः, सस्वनतुः। स्वेनुः, सस्वनुः। स्वेनिथ, सस्वनिथ। रेजतुः, रराजतुः। रेजुः, रराजुः। रेजिथ, रराजिथ। भ्रेजे, बभ्राजे। भ्रेशे, बभ्राशे। भ्लेशे, बभ्लाशे। अपिदिति किम्? अहं जजर।

१३१. श्रन्थग्रन्थो नलोपश्च।

अनयोरवर्णस्य एकारादेशो वा भवति अपिति णबादौ सेट्थपि च परे, तत्संनियोगे च नकारस्य लोप न चैतौ द्विर्भवतः। श्रेथतुः, शश्रन्थतुः। श्रेथिथ, शश्रन्थिथ। ग्रेथतुः, जग्रन्थतुः। ग्रेथिथ, जग्रन्थिथ। अपिदिति किम्? शश्रन्थ, जग्रन्थ।

१३२. दम्भः।

दम्भेरवर्णस्य एकारादेशो भवति अपिति णबादौ परे, तत्संनियोगे च नकारलोप. न चायं द्विर्भवति। देभतुः, देभुः। अपिदिति किम्? ददम्भ।

१३३. थपि वा।

दम्भेरवर्णस्य एकारादेशो वा भवति थपि परे तत्संनियोगे च नकारलोप न चायं द्विर्भवति। देभिथ, ददम्भिथ। अन्ये तु श्रन्थिग्रन्थिदम्भीना नलोपे सति नित्यमेत्वमिच्छन्ति, नलोप तु अपिति णबादौ नित्यमेव। तेन श्रेथतुः, ग्रेथतुः, देभतुः। नलोपाऽभावे तु शश्रन्थिथ, जग्रन्थिथ, ददम्भिथ इत्येव भवति। अन्यस्त्वपिति णबादौ सेट्थपि च नित्यमेत्वमिच्छति, नलोप तु अपिति णबादावेव। तेन श्रेथतुः, ग्रेथतुः, देभतुः। नलोपाऽभावेऽपि श्रेन्थिथ, ग्रेन्थिथ, देम्भिथ इत्येव इच्छति।

१३४. न शसददवादिगुणिनाम्।

शसिदद्योर्वकारादीना गुणिना च धातूनामवर्णस्य एत्वं द्विर्वानिषेधश्च न भवति। विशशसतुः, विशशसिथ। ददे, दददाते, दददिरे। वादि—ववले, ववलाते, ववलिरे। ववणतुः, ववणिथ। गुणी—विशशरतुः, विशशरिथ, लुलविथ।

१३५. अपिद्दाधो हौ।

अपितो ददातेर्दधातेश्चाऽवर्णस्य एकारादेशो भवति हौ परे न चैते द्विर्भवन्ति। देहि, धेहि। न च द्विरिति वचनात् कृतमपि द्वित्वं निवर्तते। तेन यङ्लुक्यपि देहीति भवति। हाविति व्यक्तिनिर्देशादिह न भवति—दत्तात्, धत्तात्।

१३६. मिमीमामाङ्मेङ्स्वेत्स्वरस्य सि सनि।

मि इत्यादीनां चकाराद् अपिद्दाधा इत्येतयोश्च स्वरस्य इत् इत्यादेशो भवति सकारादौ सन्प्रत्यये परे न चैषां द्विः। डुमिंन्त्—मित्सति, मित्सते शतम्। मीति मीङ्चमीन्ञोर्ग्रहणम्। मित्सते। प्रमित्सति, प्रमित्सते शत्रून्। माक्—मित्सति। मांङ्क्—प्रमित्सते भूमिम्। मेंङ्—अपमित्सते यवान्। मातेर्नेच्छन्त्येके—मिमासति। **निरनुबन्धग्रहणे न सानुबन्धकस्येति** माङ्मेङोर्न ग्रहणमिति वचनम्। अपिद्दाधा दांम्—प्रदित्सति दानम्। देङ्—दित्सते पुत्रम्। डुदांन्क्—दित्सति, दित्सते वस्त्रम्। दोंच्—दित्सति दण्डम्। धेंट्—धित्सति स्तनम्। डुधान्क्—धित्सति, धित्सते सुतम्। स्वरस्येति किम्? सर्वस्य मा भूत्। सिग्रहणमुत्तरार्थम्।

१३७. रभ-लभ-शक-शक्लृ-पत-पदामिः।

एषां स्वरस्य सकारादौ सन्प्रत्यये परे इकारादेशो भवति न चैषां द्विः। आरिप्सते, लिप्सते, शिक्षति, पित्सति,

पित्सते। सीति किम्? पिपतिषति।

१३८. राधेर्वधे।

वधे—हिंसायां वर्तमानस्य राधेः स्वरस्य इकारादेशो भवति सकारादौ सन्प्रत्यये परे न चास्य द्विः। प्रतिरित्सति, अपरित्सति। वधे इति किम्? आरिरात्सति गुरून्।

१३९. ऋध ईर्त्।

ऋधः सकारादौ सन्प्रत्यये परे ईर्त् इत्यादेशो भवति न चास्य द्विः। ईर्त्सति। सीति किम्? अर्दिधिषति।

१४०. ज्ञप्याप्योर्ज्ञीपीपौ।

ज्ञपेरापेश्च सकारादौ सन्प्रत्यये परे यथासंख्यं ज्ञीप्, ईप्—इत्येतौ आदेशौ भवत न चानयोर्द्विः। ज्ञीप्सति, ईप्सति। सीति किम्? जिज्ञपयिषति। सनीति किम्? आप्स्यति।

१४१. दम्भेर्धिप्धीपौ।

दम्भेः सकारादौ सन्प्रत्यये परे धिप्, धीप्—इत्येतौ आदेशौ भवत न चास्य द्विः। धिप्सति, धीप्सति। सीति किम्? दिदम्भिषति।

१४२. मुचोऽकर्मकस्य गुणो वा।

मुचेरकर्मकस्य गुणो वा भवति सकारादौ सन्प्रत्यये परे न चास्य द्विः। मोक्षते, मुमुक्षते वा वत्सः स्वयमेव। मोक्षति, मुमुक्षति वा चैत्र। अकर्मकस्येति किम्? मुमुक्षति वत्सं चैत्र।

द्वितीयश्चरणः

१. नामिनो गुणोऽक्ङिति ।

नाम्यन्तस्य धातोः किद्ङिद्वर्जिते प्रत्यये परे आसन्नो गुणो भवति । चेता, नेता, स्तोता, लविता, कर्ता[1], तरिता । जयति, नयति, जुहोति, भवति, बिभर्ति, तरति, करोति । एता, एति इति आद्यन्तवद्भावात् । नामिन इति किम् ? उम्भिता, याति । ग्लायति, म्लायति इति ऐकारोपदेशबलान्न भवति । नीभ्याम्, लूभ्याम् इति गौणत्वात् । अक्ङितीति किम् ? चितः, चितवान्, अशिश्रियत्, अदुद्रुवत्, लिल्ये, लुलुवे, इत , युत ।

२. नूपः ।

धातोः परयोर्नु, उप् इत्येतयोर्नाम्यन्तयोः प्रत्यययोर्गुणो भवति किद्ङिद्वर्जिते प्रत्यये परे । सुनोति, सिनोति । तनोति, करोति । अक्ङितीति किम् ? सुनुत , तनुत ।

३. पुग्जुसोः ।

नाम्यन्तस्य धातोर्गुणो भवति पुकि जुसि च परे । अर्पयति, ह्रेपयति, रेपयति, क्नोपयति । जुस्—अबिभयु , अजुहवुः, अबिभरुः, ऐयरु , अजागरुः । नामिन इति किम् ? दापयति, अनेनिजु ।

४. उपधाया लघोः ।

धातोरुपधाया लघोर्नामिनो गुणो भवति अक्ङिति प्रत्यये परे । भेत्ता, गोप्ता, वर्तिता । भेदनम्, गोपनम्, वर्तनम् । वेत्ति, दोग्धि, नर्नर्ति । उपधाया इति किम् ? भिनत्ति, रुणद्धि, तृणत्ति । लघोरिति किम् ? ईहते, ऊहते । अक्ङितीति किम् ? भिन्नः, भिन्नवान् । बेभिद्यते, मरीमृज्यते ।

५. मिदेर्यनि ।

मिदेरुपधाया यनि परे गुणो भवति । मेद्यति, मेद्यतः, मेद्यन्ति ।

६. स्कृच्छृतामऽकि णबादौ ।

ससुटः कृतः ऋच्छतेर्ऋकारान्तानां च धातूनां नामिनो गुणो भवति णबादौ परे न तु ककारोपलक्षिते क्वसुकानरूपे । सचस्करतु , सस्चकरु । ऋच्छ—आनर्च्छ,आनर्च्छतु आनर्च्छु । कृ—विचकरतु., विचकरु. । तृ—तेरतु ,तेरु । शृ—विशशरतुः, विशशरु । पृ—निपपरतु , निपपरुः । स्कृ इति कृतः समुटो ग्रहणान्नेह— चक्रतुः, चक्रु । उत्तरेणैव सिद्धे स्कृग्रहणमुत्तरत्रौपदेशिकसयोगपरिग्रहार्थम्, तेन सम्क्रियते, सचेस्क्रीयते, सस्क्रियात् इत्यादौ **'यगाशीर्यिणि'** [४/२/८] इति गुणो न भवति । **'संयोगादृतः'** [४/३/७४] इतीट् न विकल्पेन । विचकार, निजगार इत्यादौ परत्वाद् वृद्धिरेव । अकीति किम् ? सचस्कृवान्, सचस्क्राणः, आनृच्छ्वान्, विचिकीर्वान्, वितितीर्वान्, विततिराणः । काने पूर्व द्वित्व

---

1. निर्दिश्यमानत्वात् ऋकारस्यैवादेशो न तु अनेकवर्णः सर्वस्य ।

पश्चादिरादिः स्वरविधित्वात् । णबादाविति किम् ? शीर्णः, जीर्ण ।

७. संयोगादृदर्तेः ।

संयोगात् परो य ऋकारस्तदन्तस्य धातोरर्तेश्च णबादौ परे गुणो भवति अकि । सस्मरतु , सस्मरुः । सस्वरतु, सस्वरु । दद्वरतु, दद्वरु । दध्वरतु, दध्वरुः । जह्वरतु, जह्वरु । अर्ति—आरतु, आरु । संयोगादिति किम् ? चक्रतु., चक्रु.। ऋदर्तेरिति किम् ? चिक्षियतुः, चिक्षियु । गुणप्रतिषेधविषये पुनः प्रसवार्थं वचनम् । वृद्धिस्तु भवत्येव— सस्मार, सस्वार । ऋत. संयोगेन विशेषणादर्तिग्रहणम । तिब्निर्देश उत्तरार्थः ।

८. यग्यङ्क्यादाविये ।

संयोगात्परो य ऋकारस्तदन्तस्य धातोरर्तेश्च यकि यङि क्यादादिसबन्धिनि ये च प्रत्यये परे गुणो भवति । स्मर्यते, स्वर्यते, अर्यते । सास्मर्यते, सास्वर्यते, अरार्यते । स्मर्यात्, स्वर्यात्, अर्यात् । औपदेशिकसयोगग्रहणादिह न भवति । सस्क्रियते, सचेस्क्रीयते, सस्क्रियात् । ऋत इति किम् ? आस्तीर्यते, आतेस्तीर्यते, आस्तीर्यात् । क्यादादिये इति किम् ? स्मृपीष्ट, समृपीष्ट । अर्तेरिति तिब्निर्देशाद्यङ्लुकि न भवति । आरियात्[1], अरियियात्[2] । **'हैमते'** [४/३/१०] तु अर्यियादिति ।

९. जागुः किति ।

जागर्तेः किति प्रत्यये परे गुणो भवति । जागरित., जागरितवान् । जागर्यते, जागर्यात् । क्वौ - जागः । जजागरतु, जजागरुः, जजागर्वान् । कितीति किम् ? जागृत, जाग्रति, जाग्रत्, जागृयात् । अपरे तु क्वसुकानयोर्गुण-प्रतिषेधमाहु । जजागृवान्. व्यतिजजाग्राण । क्ङितिं प्रतिषेधे प्राप्ते वचनम् । अक्ङिति तु पूर्वेणैव गुण । जागरिता ।

१० ऋवर्णदृशोऽङि ।

ऋवर्णान्तानां दृशेश्च ङे प्रत्यये परे गुणो भवति । मा भवानरत् । असरत्, असरताम् । अजरत्, अजरताम् । अदर्शत्, अदर्शताम् ।

११. न वृद्धिश्च यङ्लुक्यशिति ।

अशिति प्रत्यये परे यो यङो लुक् तस्मिन् सति गुणो वृद्धिश्च न भवति । देद्य.[3], वेव्य , नेन्य , लोलुव., पोपुव , मरीमृज. । अशितीति किम् ? रोरवीति, तोतोर्ति ।

१२. सूतेस्तुबादौ ।

सूतेस्तुबादौ परे गुणो[4] न भवति । सुवै, सुवावहै, सुवामहै । तिब्निर्देशाद्यङ्लुकि गुणो भवत्येव । सोषवाणि, सोषवाव ।

१३. भवतेः सिज्लुकि ।

सिचो लुकि सति भवतेर्गुणो न भवति । अभूत्, अभूताम्, अभू. । सिज्लुकीति किम् ? व्यत्यभविष्ट ।

---

१ ऋधातोः क्यादादौ द्वित्व, पूर्वस्यात् रुक्, **'वशावाको ये'** [४/१/५४] इति रि. । **'रो रि लोपो दीर्घश्च...'** [१/३/३६] इति रलोपः दीर्घश्चेति सिद्धिक्रमः ।

२. द्वित्वं, पूर्वस्याऽत्, रिक् रीक् वा, इय् रि. इति सिद्धिक्रम. ।

३ अपितो दाधातो दीङ्च इत्यस्य च यङि देदीयते इति वाक्ये अचि **'अचि'** [४/१/१५] इति मस्वरस्यैव यङो लुक : अन्यथा **'स्वरस्य परे पूर्वविधौ'** [८/४/११७] इति अवर्णस्य स्थानित्वे गुणप्राप्तिर्न स्यात् ।

४. वृद्धे. प्राप्त्यभावे चानुकृष्टोऽपि गुण एवानुवर्तते ।

तिब्निर्देशाद्यङ्लुकि न प्रतिषेधः । अबोभोत् ।

१४. द्व्युक्तोपधायाः शिति स्वरे ।

कृतद्विर्वचनस्य धातोरुपधाया नामिनः स्वरादौ शिति प्रत्यये परे गुणो न भवति । नेनिजानि, अनेनिजम् । वेविषाणि, अवेविषम् । बेभिदीति, अबेभिदम् । मोमुदीति, अमोमुदम् । नर्नृतीति, अनर्नृतम् । द्व्युक्तेति किम् ? वेद, वेदानि, अवेदम् । उपधाया इति किम् ? जुहवानि, बोभवीति, सोपवीति । शितीति किम् ? निनेज, विवेद, बेभेदिषीष्ट । स्वर इति किम् ? नेनेक्ति, मोमोक्ति, नर्नर्ति ।

१५. इणो योऽपिति ।

इण्धातोर्यकारादेशो भवति पिद्वर्जिते स्वरादौ शिति प्रत्यये परे । यन्ति, यन्तु, व्यतिप्रतियीरन्, मा स्म यन्, यन्, यन्तौ, यन्तः । शितीति किम् ? ईयतुः, ईयुः । स्वरादाविति किम् ? इत । अपितीति किम् ? अयानि । आयन्नित्यत्र तु **'एत्यस्त्योर्वृद्धिः'** [४/२/३७] इति वृद्धिरेवाऽपवादत्वात् ।

१६. इको वा ।

इक् स्मरणे इत्यस्य यकारादेशो वा भवति पिद्वर्जिते स्वरादौ शिति प्रत्यये परे । अधियन्ति, अधीयन्ति । अधियन्तु, अधीयन्तु । व्यत्यधियीरन्, व्यत्यधीयीरन् । मा स्माधियन्, मा स्माधीयन् । कतीहाधियानाः, कतीहाधीयानाः ।

१७. ह्रोर्वोऽजिति च ।

हुधातोर्वकारादेशो भवति जिद्वर्जिते चकारात् पिद्वर्जिते च स्वरादौ शिति प्रत्यये परे । जुह्वति, जुह्वतु, व्यतिजुह्वीरन्, व्यत्यजुह्वत, जुह्वन्, कतीह जुह्वानाः । अजितीति चेति किम् ? जुस्—अजुहवुः । जुहवानि । स्वर इति किम् ? जुहुतः । शितीति किम् ? जुहुवतुः ।

१८. मृजोऽतो वृद्धिः ।

मृजेर्गुणे सत्यकारस्य वृद्धिर्भवति । मार्ष्टि, मार्ष्टा, मार्ष्टुम्, मार्ष्टव्यम्, मार्जिता, मार्जकः, संमार्जनम्, समार्गः । अत इति किम् ? मृज्यते, मरीमृज्यते, मृष्टः, मृष्टवान् । कथं म्रष्टा, म्रष्टुम् ? केचिदिह रत्वमिच्छन्ति ।

१९. ऋतः स्वरे वा ।

मृजेर्ऋकारस्य स्वरादौ प्रत्यये परे वा वृद्धिर्भवति । परिमार्जन्ति, परिमृजन्ति । परिमार्जन्तु, परिमृजन्तु । पर्यमार्जन्, पर्यमृजन् । परिममार्जतुः, परिममृजतुः । परिमार्जन्, परिमृजन् । ऋत इति किम् ? ममार्ज[1], मार्जयति । स्वर इति किम् ? मृष्टः, मृष्ठ, मृज्वः, मृज्मः ।

२०. नामिनोऽहलिकलेर्ञ्णिति ।

नाम्यन्तस्य धातोर्नाम्निश्च हलिकलिवर्जितस्य ञिति णिति च प्रत्यये परे वृद्धिर्भवति । कारः, हारः, अचायि, अनायि, अयावि, अलावि, अकारि, अतारि, चिकाय, कारकः । हलिकलिवर्जनान्नाम्नोऽपि । तेन पटुमाख्यातवान् अपीपटत्, अलीलघत्—इत्यत्र वृद्धौ टिलोपे चाऽसमानलोपित्वात् सन्वद्भावः सिद्धो भवति । हलिकलिवर्जनं किम् ? हलिं कलिं वाऽग्रहीत्—अजहलत्, अचकलत् । अन्ये तु नाम्नो वृद्धिमनिच्छन्तोऽन्त्यस्वरस्योकारस्यैव ञिन्लोपमिच्छन्तः समानलोपित्वात्

---

१. गुणे कृते **'मृजोऽतो वृद्धिः'** [४/२/१८] इत्यनेन नित्य वृद्धिः, न तु अनेन विकल्पः । ननु गुणात्प्रागेव परत्वाद् वृद्धिः कथं न ? सत्यम् । विकल्पबलात् । **'ऋतः स्वरे वा'** [४/२/१९] इत्यस्य विकल्पपक्षे इदमुदाहरणमन्यथा हि परत्वाद् वृद्धिः स्यात्, किं व्यावृत्त्या ? किं बहुना ? गुणे कृते वृद्धिविकल्पो मा भूदित्येवमर्थमृत इति व्यावृत्तिस्तेन ममर्ज, मर्जयति इति न भवति ।

सन्वद्भावप्रतिषेधे अपपटत्, अललघत् इत्येवाहुः ।

२१. अतो वा ।

अकारान्तस्य धातोर्वृद्धिर्वा भवति ञ्णिति परे। अङ्कादयोऽदन्ताः । अङ्कापयति, अङ्कयति । गणापयति, गणयति । कथापयति, कथयति । कथापकः, कथकः ।

२२. उपधायाः ।

अत इत्यनुवर्तते । धातोरुपधाया अकारस्य वृद्धिर्भवति ञ्णिति परे । अपाचि, पाकः, पाचक , पपाच, पाचयति । अत इति किम् ? भोगः, भोजयति । उपधाया इति किम् ? भङ्गः, भञ्जकः, चकासयति । ञ्णितीति किम् ? पचति ।

२३. जागुर्णिणपोः ।

जागर्तेर्णौ णपि च एव ञ्णिति परे वृद्धिर्भवति। अजागारि, जागारिष्यते, जजागार। णिणपोरिति किम् ? जागरयति, जागरकः, साधुजागरी, जागरजागरं, जागरो वर्तते । पूर्वेणैव सिद्धे नियमार्थो योगः ।

२४. आतो युक्कृण्णौ ।

आकारान्तस्य धातोर्युगागमो भवति ञ्णिति कृति प्रत्यये णौ च परे । दायः, धाय , दायक , धायक , शतदायी, गोदायो व्रजति, अदायि, अधायि, दायिष्यते, धायिष्यते । कृद्ग्रहण किम् ? दापयति, ददौ ।

२५. न जनबधः ।

जनिबध्योः कृति ञ्णिति णौ च परे वृद्धिर्न[1] भवति। प्रजनः, प्रजन्य , जनकः, अजनि। बधः, बध्य , बधकः, अबधि । बधिरत्र बधन् बन्धने इत्यय गृह्यते, यस्य बीभत्सत इति वैरूप्ये एव सन्प्रत्यय इष्यते, अन्यत्र बधते । भक्षकश्चेत् नास्ति बधकोऽपि न विद्यते । हन्यादेशस्य तु वधेरदन्तत्वाद् वृद्धेरप्रसङ्ग एव ।

२६. मोऽकमि-वमि-यमि-रमि-नमि-गम्याचमेः ।

मान्तस्य धातोः कम्यादिवर्जितस्य ञ्णिति कृत्प्रत्यये णौ च परे वृद्धिर्न भवति । शमः, तमः, दमः । शमकः, तमकः, दमकः । शमी, तमी, दमी । अशमि, अतमि, अदमि । म इति किम् ? पाठः, पाठकः, अपाठि । कम्यादिवर्जनं किम् ? कामः, कामुक , अकामि । वाम , वामकः, अवामि । यामः, यामकः, अयामि । रामः, रामकः, अरामि । नामः, नामकः, अनामि । आगामुकः, आगामि । आचाम , आचामकः, आचामि । आचम इति किम् ? चमः, विचमः । चमकः, विचमकः । अचमि, व्यचमि । अन्ये तु सामान्येन निषेधमिच्छन्ति । चाम , विचाम इत्यादि । कथं आमः, आमक , आमि ? अमण् रोगे इति चौरादिकस्य भविष्यति, भौवादिकस्य तु अमः । अमः, अमक । कृण्णाविति किम् ? निशामयते, शशाम, तताम ।

२७. विश्रमेर्वा ।

विपूर्वस्य श्रमेर्ञ्णिति कृत्प्रत्यये णौ च परे वा वृद्धिर्भवति। विश्रामः, विश्रमः । सूर्यविश्रामभूमिः । अविश्रमं यावदिद शरीरम् । विश्रामकः, विश्रमकः । व्यश्रामि, व्यश्रमि । वीति किम् ? श्रमः, श्रमकः, अश्रमि । कृण्णाविति किम् ? विशश्राम । अन्ये तु विश्रमेर्वृद्धि नेच्छन्त्येव । अपरे तु नित्यमेव वृद्धिमुपयन्ति । अन्ये तु घञ्येव विकल्पमातिष्ठन्ते ।

२८. उद्यमोपरमौ ।

उदुपपूर्वयोर्यमिरम्योर्घञि वृद्ध्यभावो निपात्यते। उद्यमः, उपरमः । अन्यत्र पूर्वेण वृद्धिरेव। याम , संयामः,

---

१. युक्प्राप्त्यभावे व्यवहितापि वृद्धिरेवानुवर्तते ।

सुयामः, रामः, विरामः ।

२९. णबुत्तमो णिद् वा ।

णबादेरुत्तमपुरुषस्य णप् वा णिद् भवति । णित्त्वाश्रयं कार्यं पक्षे प्रतिषिध्यते । सुप्तोऽहं किल विललप, विललाप । विवय, विवाय । निनय, निनाय । लुलव, लुलाव । चुकुट, चुकोट । वा णित्त्वप्रतिबन्धात् कुटादीनां गुणविभाषा । उत्तम इति किम् ? स पपाच । णित्त्वाश्रयस्य विकल्पनात् णबाश्रयं नित्यमेव । अहं पपौ ।

३०. समानस्याऽङिति सिचि परस्मै ।

समानान्तस्य धातोः परस्मैपदविषये सिचि अङिति परे आसन्ना वृद्धिर्भवति । अचैषीत्, अनैषीत्, अयावीत्, अलावीत्, अकार्षीत्, अतारीत्, अचेचायीत्, अनेनायीत् । समानस्येति किम् ? गौरिवाचारीत्—अगवीत् । अचिकीर्षीत् इत्यत्र परत्वात् **'अतः'** [४/२/५४] इति अकारस्य लोपः । परस्मै इति किम् ? अच्योष्ट, अप्लोष्ट । अङितीति किम् ? णूज्—न्यनुवीत् । धूज्—न्यधुवीत् । ऊर्णु—प्रोर्णोनुवीत् । गुज्—न्यगुवीत् । ध्रुज्—न्यध्रुवीत् । येषां तु गु दीर्घान्तो ध्रुस्तु सेट् तेषां न्यगुवीत्, न्यध्रुवीत् इत्यपि भवति ।

३१. हसस्याऽनिटि ।

हसान्तस्य धातोः परस्मैपदविषयेऽनिटि सिचि परे समानस्य वृद्धिर्भवति । अपाक्षीत्, अभैन्सीत्, अरौत्सीत्, अतार्सीत् । अनेकहसव्यवधानेऽपि भवति । रञ्ज्—अराङ्क्षीत् । सञ्ज्—असाङ्क्षीत् । भञ्ज्—अभाङ्क्षीत् । तक्ष्—अताक्षीत् । त्वक्ष्—अत्वाक्षीत् । ऊदित्त्वाद् वेटौ । समानस्येति किम् ? उदवोढाम्[1] । अनिटीति किम् ? अतक्षीत्, अत्वक्षीत्, अदेवीत्, अकोषीत्, अनर्तीत् ।

३२. ऊर्णोतेर्वा ।

ऊर्णोतेः परस्मैपदविषये सिचि परे वृद्धिर्वा भवति । प्रौर्णावीत् । पक्षे—प्रौर्णुवीत्, प्रौर्णवीत् । परस्मै इति किम् ? प्रौर्णविष्ट । तिब्निर्देशो यङ्लुग्निवृत्त्यर्थं । प्रौर्णोनावीत् । अङित्त्वपक्षे पूर्वेण नित्यं वृद्धिः, ङित्त्वे तु प्रौर्णोनुवीत् । **'वोर्णोः'** [३/४/६६] इत्यत्र हि अनुबन्धाऽभावाद्यङ्लुगन्तस्यापि ग्रहणम् । एवं च प्रकृतेस्त्रैरूप्यं[2] यङ्लुगन्तस्य च द्वैरूप्यं सिद्धं भवति ।

३३. हसादेरदुपधस्य सेटि ।

हसादेरकारोपधस्य धातोः परस्मैपदे सेटि सिचि परे वृद्धिर्वा भवति । अकाणीत्, अकणीत् । अक्वाणीत्, अक्वणीत् । अश्वासीत्, अश्वसीत् । गौरिवाचारीत्—अगावीत्, अगवीत् । हसादेरिति किम् ? मा भवानटीत् । मा भवानशीत् । अदिति किम् ? अदेवीत्, असेवीत् । उपधाया इति किम् ? अरक्षीत्, अतक्षीत् । सेटीति किम् ? अपाक्षीत्, अधाक्षीत् ।

३४. वदव्रजरलः ।

नित्यार्थं वचनम् । वदव्रजां रान्तानां लान्तानां चोपधाया अतः सेटि सिचि परस्मैपदे वृद्धिर्भवति । अवादीत्, अव्राजीत्, अक्षारीत्, अत्सारीत्, अज्वालीत्, अचालीत् । अदिति किम् ? न्यखोरीत्, न्यमीलीत् । उपधाया इति किम् ? अश्वल्लीत्, अवभ्रीत् ।

३५. न श्वि-जागृ-श्वसि-क्षणि-ह्म्येदितः ।

श्वि, जागृ, श्वसि, क्षणि—इत्येतेषां हकारमकारयकारान्तानां एदितां च धातूनां परस्मैपदविषये सेटि सिचि

---

1. पूर्ववृद्धो एकदेश···इति न्यायाद् वहेरोत्वम् । ततो भूतपूर्वगत्या ढलोपस्य परेऽसिद्धत्वात् वा हसान्तत्वे पुनरप्योकारस्य वृद्धिं प्राप्नोति ।
2. शुद्धधातो रूपत्रयमित्यर्थः ।

परे वृद्धिर्न भवति। अश्वयीत्, अजागरीत्, अश्वसीत्। श्वस. स्थाने ग्रस पठन्त्यन्ये। अग्रसीत्। अक्षणीत्। ह्मन्त— अग्रहीत्। मान्त—अवमीत्। यान्त—अहयीत्। एदित्—अकगीत्, अरगीत्, अकखीत्। श्व्यादीना यङ्लुगन्तानामपि प्रतिषेध.। अशेश्वयीत्, अजजागरीत्, अशाश्वसीत्, अचङ्क्षणीत्, अचाचहीत्, अजर्गहीत्, अससयमीत्, अवाव्ययीत्। एदिता तु यङ्लुकि न प्रतिषेध। अजाहासीत्, अजाहसीत्। अत एव श्व्यादयो नैदित· क्रियन्ते। अन्यथा ह्येदित कृत्वा इह श्व्यादिग्रहणं न क्रियेत। सेटीति किम् ? अधाक्षीत्। वकारान्तस्यापि प्रतिषेधमिच्छत्यन्य:। अमवीत्। शिवजाग्रो: **'समानस्याऽङिति सिचि परस्मै'** [४/२/३०] इति वृद्धौ अन्येषा च **'हसादेरवुपधस्य सेटि'** [४/२/३३] इति विकल्पे प्राप्ते वचनम्।

३६. अमाङ्गा दिबादिद्यादिस्यदादावट्।

दिबादौ द्यादौ स्यदादौ च विषये धातो अडागमो भवति, माङ्योगे तु न। अकरोत्, अकार्षीत्, अकरिष्यत्। अभवत्, अभूत्, अभविष्यत्। विषयविज्ञानात् प्रत्ययव्यवधानेऽपि भवति। परविज्ञाने हि अहन्नित्यादावेव स्यात्। धातोरिति किम् ? प्राकरोत्। अमाङेति किम् ? मा भवान् भवत्। मा स्म भूत्। मा भवान् करोत्। मा स्म कार्षीत्। **'अस्मद् विना मा भूशमुन्मनीभू:'** [किरातार्जुनीयमहा० ३/३६]।

३७. एत्यस्त्योर्वृद्धि:।

पूर्वमनुवर्तते। इणिकोरस्तेश्च धातोर्वृद्धिर्भवति दिबादौ द्यादौ स्यदादौ च परे, माङ्योगे तु न वृद्धि.। आयन्, अध्यायन्। आस्ताम्, आसन्। दिबादावेवाय विशेष द्यादिस्यदाद्योरनुवर्त्तन तूत्तरार्थम्। अमाङेति किम् ? मा स्म भवन्तो यन्। मा स्म भवन्त सन्। ननु **'स्वरादेरादे:'** [४/२/३८] इति वक्ष्यमाणसूत्रेणैव वृद्धौ सिद्धाया किमर्थमिदम् ? उच्यते— आयन्, आसन्—इह इणो यत्वे अस्तेरल्लोपे च सति स्वरादित्वाऽभावाद् वृद्धिर्न प्राप्नोतीति वचनम्। ननु विषयत्वविज्ञानात् परत्वाद् वा प्रागेव वृद्धौ कुतो यत्वाऽकारलोपयो. प्राप्तिरिति चेत् ? उच्यते—इदमेव वचन ज्ञापक **कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद् वृद्धिस्तद्बाध्योऽट् च भवति**। तेन ऐयरु., अध्यैयत इत्यादौ इयादेशे वृद्धि. सिद्धा। अचीकरत् इत्यादौ च दीर्घत्वम्। पूर्वमटि तु स्वरादित्वात्तन्न स्यात्। यत्वाकारलोपयोरपवादश्चायम्। तेनेक पक्षे यत्वाऽभावे अध्यैयन् इत्यत्रेयि सति उत्तरेणैव वृद्धिर्भवति।

३८. स्वरादेरादे:।

स्वरादेर्धातोरादे: स्वरस्य दिबादौ द्यादौ स्यदादौ च विषये आसन्ना वृद्धिर्भवति, माङ्योगे तु वृद्धिर्न। आटत्, आश्नात्। आटीत्, आशीत्। आटिष्यत्, आशिष्यत्। आर्च्छत्, आर्च्छीत्, आर्च्छिष्यत्। ऐच्छत्, ऐषीत्, ऐषिष्यत्। ऐक्षत, ऐक्षिष्ट, ऐक्षिष्यत। ऐधत, ऐधिष्ट, ऐधिष्यत। औब्जत्, औब्जीत्, औब्जिष्यत्। औहत, औहिष्ट, औहिष्यत। औणत्, औणिणत्, औणिष्यत्। इन्द्रमैच्छत्—ऐन्द्रीयत्। उस्रामैच्छत्[1]—औस्रीयत्। एणमैच्छत्—ऐणीयत्। ओँकारमैच्छत्—औँकारीयत्। अमाङेति किम् ? मा भवानटीत्। मा स्म भवानटत्।

३९. अनिदितो हसस्योपधाया नो लोप: क्ङिति।

हसान्तस्याऽनिदितो धातोरुपधाया नकारस्य लोपो भवति क्ङिति प्रत्यये परे। स्रस्त., स्रस्तवान्, स्रस्यते, सनीस्रस्यते। ध्वस्त., ध्वस्तवान्, ध्वस्यते, दनीध्वस्यते। अस्तभत्, अग्लुचत्, परिष्वजते, परिष्वजेते। हसस्येति किम् ? नीयते, नेनीयते। अनिदित इति किम् ? टुनदि—नन्द्यते, नानन्द्यते। वदि—वन्द्यते, वावन्द्यते। उपधाया इति किम् ? नह्यते, नानह्यते। क्ङितीति किम् ? स्रंसिता, ध्वंसिता।

४०. लङ्गिकम्प्योरुपतापाङ्गविकारयो:।

लङ्गिकम्प्योरुपधाया नकारस्य यथासंख्यमुपतापे अङ्गविकारे चार्थे लोपो भवति क्ङिति प्रत्यये परे।

---

१. गाम्।

विलगितः[1], विकपितः। उपतापाङ्गविकारयोरिति किम्? विलङ्गितः[2], विकम्पितः[3]। इदित्वात् पूर्वेणाऽप्राप्ते वचनम्।

४१. नमः।

नम्प्रत्ययात् परस्य उपधाया नकारस्य लोपो भवति। भनक्ति, अनक्ति, हिनस्ति।

४२. दंशसञ्जोरपि।

दंशसञ्जोर्नकारस्य लोपो भवति अपि परे। दशति, सजति। तुदादावऽपठित्वाऽनयोर्भ्वादौ पाठोऽवर्थस्तेन 'अवृयनः' [१/४/६२] इति नित्यनुमागमः सिद्धो भवति। दशन्ती, सजन्ती।

४३. अकङ्घिनोश्च रञ्जेः।

रञ्जेरकटि घिनुणि चकारादपि च प्रत्यये परे उपधाया नकारस्य लोपो भवति। रजक, रागी, रजति। रजः, रजनिः, रजनं, रजतं इति औणादिकांकत्प्रत्ययान्ताः।

४४. णौ मृगरमणे।

रञ्जेरुपधाया नकारस्य णौ परे मृगाणा रमणे—क्रीडायामर्थे लोपो भवति। रजयति मृगान् व्याध। मृगरमण इति किम्? रञ्जयति रजको वस्त्रम्। रञ्जयति सभा नट।

४५. घञि भावसाधनयोः।

रञ्जेरुपधाया नकारस्य लोपो भवति भावसाधनवाचिनि घञि प्रत्यये परे। रञ्जन रजत्यनेनेति वा राग। घञीति किम्? रञ्जनम्। भावसाधनयोरिति किम्? रजन्त्यस्मिन्निति रङ्ग।

४६. स्यदो जवे।

जवः—वेग.। स्यद इति स्यन्देर्घञि नलोपो वृद्धयभावश्च निपात्यते जवेऽभिधेये। गोस्यद., अश्वस्यद। जव इति किम्? घृतस्यन्दः, तैलस्यन्दः।

४७. अवोदैधौद्म-प्रश्रथ-हिमश्रथ-दशनाः।

एते शब्दा. कृतनलोपादयो निपात्यन्ते। अवपूर्वस्य उन्दे इन्धेश्च घञि उन्देर्मनि नलोप., प्रहिमपूर्वस्य श्रन्थेर्घञि वृद्धयभावश्च, दशेरनटि नलोपो निपात्यते। अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ, दशनम्।

४८. नाञ्चेः पूजायाम्।

पूजार्थे वर्तमानस्य अञ्चेरुपधाया नकारस्य लोपो न भवति क्ङिति प्रत्यये परे। अञ्चिता गुरव। पूजायामिति किम्? उदक्तमुदक कूपात्। उद्धृतमित्यर्थः।

४९. क्त्वि स्कन्दस्यन्दोः।

क्त्वाप्रत्यये परे स्कन्दस्यन्दोरुपधाया नकारस्य लोपो न भवति। स्कन्त्वा, स्यन्त्वा। स्यन्देरूदित्वात् पक्षे इडागमः। स्यन्दित्वा। अत्र तु 'न क्त्वा सेट्' [३/४/१०३] इति कित्त्वाभावादेव नलोपाभाव।

---

१. विलग्यते स्म—रोगादिनोपतापितः।
२. विलङ्गति स्म—केनचिद् अङ्गेन हीन इत्यर्थ.।
३. विकम्प्यते स्म—मनसि कम्पितः। चित्ते भीत इत्यर्थ. इति नाङ्गविकारः।

५०. जनशां वा ति ।

क्त्वीत्यनुवर्तते । जान्तानां नशेश्चोपधाया नकारस्य तकारादौ क्त्वाप्रत्यये परे लोपो वा भवति । रक्त्वा, रङ्क्त्वा । भक्त्वा, भङ्क्त्वा । नष्ट्वा, नंष्ट्वा । तीति किम् ? विभज्य ।

५१. भञ्जेर्णौ ।

भञ्जेरुपधाया नकारस्य णौ परे लोपो वा भवति । अभाजि, अभञ्जि ।

५२. गम-हन-जन-खन-घसामङे स्वरे क्ङिति ।

उपधाया इत्यनुवर्तते । एषामुपधाया लोपो भवति ङवर्जिते क्ङिति स्वरे परे । किति—गम्—जग्मतुः, जग्मुः । हन्—जघ्नतुः, जघ्नुः । जन्—जज्ञे, जज्ञाते, जज्ञिरे । खन्—चख्नतुः, चख्नुः । घस्—जक्षतुः, जक्षुः, जक्षिवान् । ङिति—घ्नन्ति, कतीह निघ्नाना । कथं जज्ञतुः, जज्ञुः इति ? छान्दसावेतौ[1] । स्वरे इति किम् ? गम्यते, हन्यते । अङे इति किम् ? अगमत्, अघसत् । क्ङितीति किम् ? गमनम्, हननम् ।

५३. आतोऽशिति ।

धातोराकारान्तस्य लोपो भवति अशिति क्ङिति स्वरे परे । ददतुः, ददुः । दधतुः, दधुः । पपतुः, पपुः । जग्लतुः, जग्लुः । अदधत्, सस्था, प्रपा । अशितीति किम् ? यान्ति, वान्ति । क्ङितीति किम् ? दान, ददौ ।

५४. अतः ।

अदन्तस्य धातोर्लोपो भवति तेनैव विहिते अशिति प्रत्यये परे । कथयति, गणयति, कुषुभ्यति, मगध्यति, चैकीर्षितः[2], प्रचिकीर्ष्य, मिमिध्यिष्यति, दृपद्यिष्यति । अत इति विहितविशेषण किम् ? गतः, गतवान् । ततः, ततवान् । तपरकरण किम् ? याता, वाता । अशितीति किम् ? चिकीर्षेत, लोलूयेत । चिकीर्ष्यते, चिकीर्ष्यात् इत्यादौ लोप-विधेर्बलीयस्त्वात् 'स्वियग्यङ्···' [४/१/५१] इत्यादिना दीर्घो न भवति । विषयविज्ञानाद्[3] वा प्रागेव लोपः ।

५५. णेरनिटि ।

अनिटि अशिति प्रत्यये णेर्लोपो भवति । अततक्षत्, अररक्षत् । आटिटत्, आशिशत् । कारणा, हारणा । कारकः, हारकः । कार्यते, हार्यते । प्रकार्य । इय्युवगुणवृद्धिदीर्घलुगागमाना बाधकोऽयम् । अनिटीति विषयसप्तम्यपि, तेन चेतनः इत्यत्र प्रागेव णेर्लोपे 'ङितो हसाद्यन्तात्' [५/३/३८] इति अनः[4] सिद्धः । अनिटीति किम् ? कारयिता, हारयिता । अशितीति किम् ? कारयति, हारयति ।

५६. यो हसात् ।

हसान्ताद् धातोः परस्य यकारस्याऽशिति प्रत्यये परे लोपो भवति । जंगमिता, बेभिदिता, बेभिदांचक्रे, बेभिदिषीष्ट । यकि—बेभिद्यते, सोसूचिता, सोसूत्रिता, मोमूत्रिता, शाशयिता, कुषुभिता, मगधकः । सूच्यादीनां ञिज्लोपे शयादेशे अकारलोपे च हसान्तता । अन्ये तु लाक्षणिकहसान्तेभ्यो यलोप नेच्छन्ति, तेन सोसूच्यिता, शाशय्यिता, कुषुभ्यिता । तन्मतसंग्रहार्थं हसान्ताद् धातोर्विहितस्येति विशेषणं कार्यम् । धातोरिति किम् ? ईर्ष्यिता[5], मव्यिता, पुत्रकाम्यिता ।

---

१. जुहोत्यादौ जन जनने परस्मैपदिनं छान्दसं पठन्ति, तस्यायं प्रयोगः ।

२. क्ते चिकीर्षितम् । 'प्रज्ञादिभ्यः' [७/४/८८] इति अणि चैकीर्षितः ।

३. लोपात्स्वरादेशः—इत्याशङ्क्याह ।

४ अन्यथाऽनेकस्वरत्वात् 'णिस्वाहस···' [५/३/३२] इति णक एव स्यात् ।

५. अत्र धात्वन्तर्गतो यकारो न तु धातोः परः ।

हसादिति किम् ? लोलूयिता, पोपूयिता । अशितीति किम् ? बेभिद्यते, चेच्छिद्यते ।

५७. क्यस्य वा ।

हसान्ताद् धातोः परस्य क्यस्याऽशिति प्रत्यये परे लोपो वा भवति । सामान्यनिर्देशात् क्यच्क्यङोर्ग्रहणम् । क्यषस्तु हसान्तात् प्राप्तिरेव नास्ति । समिधमिच्छति—समिधिष्यति, समिध्यिष्यति । समिध्यात्, समिध्य्यात् । दृषदिवाचरति—दृषदिष्यते, दृषद्यिष्यते । दृषदिषीष्ट, दृषद्यिषीष्ट । हसादिति किम् ? पटीयिता, पटायिता । अशितीति किम् ? समिध्यति, दृषद्यते । केचित्तु यकोऽपि लोपविकल्पमिच्छन्ति । भिषजिता, भिषज्यिता । तन्मतसंग्रहार्थं ककारेण उपलक्षितो य् क्य् इति व्याख्येयम् ।

५८. इडेज्जुस्यातः ।

आकारान्तस्य धातोर्लोपो भवति इटि एकारे जुसि च परे । इट्—पपिथ, तस्थिथ । यङ्लुकि—दादिनु, दादितव्यम् । एत्—व्यतिरे, व्यतिले । जुस्—उदगुः, अदुः, अयुः, अरुः, अलुः । इडेज्जुसीति किम् ? याता, वाता । आत इति किम् ? अबिभयुः । अक्ङिदर्थं शिदर्थं च वचनम् ।

५९. ञेः सेट्क्तयोः ।

सेटोः क्तक्तवत्वोः परयोर्ञेर्लोपो भवति । कारितः, कारितवान् । हारितः, हारितवान् । गणितः । संज्ञपितः पशुः । सेडिति किमर्थम् ? इटि कृते लोपो यथा स्यात् । शाकितः, शाकितवान् । अन्यथेह इट्[1] न स्यात् ।

६०. आमन्तात्वाय्येत्न्वाय् ।

आम्, अन्त, आलु, आय्य, इत्नु—इत्येतेषु प्रत्ययेषु परेषु ञेरयादेशो भवति । लोपापवादः । कारयाञ्चकार, गणयाञ्चकार । गण्डयन्तः, मण्डयन्तः । स्पृहयालुः, गृहयालुः । स्पृहयाय्यः, महयाय्यः । स्तनयित्नुः, गदयित्नुः । अन्ताय्येत्नव औणादिकाः ।

६१. लघोर्यपि ।

लघोः परस्य ञेर्यपि परेऽयादेशो भवति । प्रशमय्य गतः, प्रदमय्य, प्रबेभिदय्य[2] । लघोरिति किम् ? प्रतिपाद्य गतः । वचनसामर्थ्यादेकेन वर्णेन व्यवधानमाश्रीयते न तु भूतपूर्वन्यायः, अतः[3] इत्यऽकरणात् ।

६२. वाप्नोः ।

आप्नोतेः परस्य ञेर्यपि परेऽयादेशो वा भवति । प्रापय्य गतः, प्राप्य गतः । नुनिर्देशादिङादेशस्य[4] न भवति । अध्याप्य गतः । आप्लृण् लम्भने इत्यस्यापीच्छन्त्यन्ये ।

६३. मेङो मित् ।

मेङो यपि परे मिदादेशो वा भवति । अपमित्य[5], अपमाय ।

---

१ एकस्वरत्वात् **'नैकस्वरादनुस्वारेतः'** [४/३/८५] इतीण्निषेधात् ।

२ प्रबेभिद्यमान—यङन्तात् ञिन् न यङ्लुगन्तात् । **'अतः'** [४/२/५४] इत्यल्लोपे **'यो हसात्'** [४/२/५६] इति यलोपः, अतः स्थानित्वाद् गुणाऽभावः । यङ्लुगन्ताद् हि ञिनि गुणः स्यात् ।

३. ननु वचनादेकवर्णव्यवधानं तदाश्रीयते यदा व्यवहितो न संभवति । अत्र तु चुराद्यदन्तेषु प्रबेभिदय्येत्यत्र यङोकारलोपे च भूतपूर्वगत्या अव्यवहितोऽपि संभवतीत्याह ।

४. **'क्विकोङां ञौ'** [४/२/१०६] इत्याकारः, **'अर्तिह्री···'** [४/२/११३] इत्यादिना च पुक् ।

५. अत्र म्यादेशेऽपि **'ह्रस्वस्य पित्कृति···'** [४/४/४७] इति तुगागमः सिध्यति, लाघवार्थं तु मिदादेशः ।

६४. क्षियो दीर्घः ।

क्षियो यपि परे दीर्घो भवति । प्रक्षीय, उपक्षीय । निरनुबन्धनिर्देशात् क्षिणुञ् हिंसायां इत्येतस्य न भवति । प्रक्षित्य । अस्यापि ग्रहणमित्यन्ये ।

६५. क्तयोः ।

क्तक्तवत्वो परयोः क्षियो दीर्घो भवति । आक्षीण, प्रक्षीण । आक्षीणवान्, प्रक्षीणवान् । '**क्षियो दीर्घात्**' [५/३/८०] इति तस्य न । योगविभाग उत्तरार्थः ।

६६. आक्रोशदैन्ययोर्वा ।

आक्रोशे दैन्ये च गम्ये क्तयोः परयोः क्षियो दीर्घो वा भवति । क्षितायुर्भव, क्षीणायुर्भव जाल्म !। दैन्ये— क्षितः, क्षीणो वा तपस्वी । दीर्घाऽभावपक्षे नत्वमपि न ।

६७. न भावकर्मणोः ।

भावे कर्मणि चार्थे विहितयोः क्तयोः परयोः क्षियो दीर्घो न भवति । क्षितं, क्षितः । कश्चित्तु भावेऽपि विकल्पमिच्छति । क्षीणमनेन, क्षितमनेन । क्षेर्भावकर्मणोर्लोके क्त एव नास्तीति कश्चित् ।

६८. श्रः शृतं हविःक्षीरयोः ।

श्रान्ते श्रायतेश्च क्तप्रत्यये हविषि क्षीरे चाभिधेये शृभावो निपात्यते । शृतं हविः । शृतं क्षीरं स्वयमेव । श्रातिश्रायती[1] हि अकर्मककर्मकर्तृविषयस्य पचेरर्थे वर्तेते । तयोश्चैतन्निपातनम् । हविःक्षीरयोरिति किम् ? श्राणा यवागूः ।

६९. श्रपेरेकप्रयोक्तरि ।

श्रायतेः श्रातेश्च ण्यन्तस्यैकस्मिन् प्रयोक्तरि क्ते परतो हविषि क्षीरे चाभिधेये शृभावो निपात्यते । श्राति श्रायति वा हविः स्वयमेव, तच्चैत्रेण प्रायुज्यत—शृतं हविश्चैत्रेण । शृतं क्षीरं चैत्रेण । यदा तु द्वितीये प्रयोक्तरि णिन् उत्पद्यते तदा न भवति । श्रपितं हविश्चैत्रेण मैत्रेणेति । हविःक्षीरयोरिति किम् ? श्रपिता यवागूः । अन्ये तु श्रपिं चुरादौ पठन्ति, तस्यैव श्रपेर्निपातनम् । प्रयोजकण्यन्तस्य त्वेकस्यापि प्रयोगं नेच्छन्ति । तन्मते कर्मकर्तृ हविः श्रातु चैत्रः प्रयुक्तवान् इति प्रयोजकव्यापारे णिनि श्रपितं हविश्चैत्रेणेत्येव भवति । अपरे तु सकर्मकावपि श्रातिश्रायती इच्छन्ति । तन्मते तयोरप्यण्यन्तयोर्निपातनं भवति । शृतं हविश्चैत्रेण । ण्यन्तयोस्तु न भवत्येव । श्रपितं हविश्चैत्रेण मैत्रेणेति ।

७०. नशेर्नेश् वा ङे ।

नशेर्ङे परे नेश् इत्ययमादेशो वा भवति । अनेशत्, अनशत् । अनेशताम्, अनशताम् । अनेशन्, अनशन् । अनेशम्, अनशम् । ङे इति किम् ? नश्यति ।

७१. श्वयत्यसूवचपतां श्वास्थवोचपप्ताः ।

श्वयति, असु, वच्, पत्—इत्येतेषां ङे परे श्व, अस्थ, वोच, पप्त—इत्येते आदेशा भवन्ति । अश्वत्, अश्वताम्, अश्वन्, अश्वः । असु—आस्थत्, आस्थताम्, आस्थन् । उपास्थत, उपास्थेताम्, उपास्थन्त । वच् ब्रून् वा— अवोचत्, अवोचताम्, अवोचन्, अवोचत । पत्—अपप्तत्, अपप्तताम्, अपप्तन् । श्वयतेस्तिब्निर्देशो यङ्लुग्निवृत्त्यर्थः[2] । अशेश्वियत्, अशोशुवत् ।

---

१. ननु कथं शृतं क्षीरं स्वयमेवेत्युक्तम् ? शृतं क्षीरं देवदत्तेनेति कथं न भवतीत्याशङ्क्याह ।

२. अन्येषां तु यङ्लुकि मूलप्रयोगा एव ।

७२. कृपश्चृतलृबऽकृपणादीनाम् ।

कृपधातोर्ऋकारस्य लृकारादेशो भवति न तु कृपणादीनाम्। क्लृप्तः, क्लृप्तवान्। क्लृप्यते, चिक्लृप्सति, अचीक्लृपत। अकृपणादीनामिति किम्? कृपणः, कृपाणः, कृपः, कृपीटम्।

७३. रो लः ।

कृपे रेफस्य लकारादेशो भवति न तु कृपणादीनाम्। कल्पते, कल्पयति, कल्पिता, कल्प्ता, कल्पः, कल्पकः, चलीक्लृप्यते, चलीकल्प्ति। अकृपणादीनामिति किम्? कर्पूरः, कर्परः, कर्पटः, कर्पटिः। आकृतिगणोऽयम्। योगविभाग उत्तरार्थः।

७४. गिरो यङि ।

गिरते रेफस्य लकारादेशो भवति यङि प्रत्यये परे। निजेगिल्यते, निजेगिल्येते, निजेगिल्यन्ते। गृणातेस्तु यङेव नास्ति। केचित्तु तस्यापीच्छन्ति। यङीति किम्? निगीर्यते।

७५. वा स्वरे ।

गिरते रेफस्य स्वरादौ प्रत्यये विहितस्य लकारो वा भवति। गिरति, गिलति। निगरणं, निगलनम्। निगारकः, निगालकः। स्वर इति किम्? निगीर्णः, निगीर्णवान्। विहितविशेषणं किम्? इह च यथा स्यात्—निगार्यते, निगाल्यते। इह च मा भूत्—गिरौ, गिरः।

७६. परेर्घाङ्कयोगेषु ।

परिसंबन्धिनो रेफस्य घ, अङ्क, योग—इत्येतेषु शब्देषु परेषु लकारो वा भवति। पलिघः, परिघः। पल्यङ्कः, पर्यङ्कः। पलियोगः, परियोगः।

७७. उपसर्गस्यायङि ।

उपसर्गसंबन्धिनो रेफस्य अयङ् गतौ—इत्यस्मिन् धातौ परे लकारो भवति। प्लायते, पलायते। पल्ययते, प्लत्ययते। अत्रानेकवर्णव्यवधानान्नेच्छन्त्यन्ये। प्रतिपूर्वस्य प्रयोग एव नास्तीत्यन्ये। उपसर्गस्येति किम्? परस्यायनं परायनम्। अयङीति किम्? इण् गतौ, अल्—प्रायः, परायः।

७८. निर्दुरोर्वा ।

निर् दुर्—इत्येतयोरुपसर्गयो रेफस्य अयङि धातौ परे लकारो वा भवति। निलयते, निरयते। दुलयते, दुरयते। निलयनं, निरयणम्। दुलयनं, दुरयणम्।

७९. कपिरकादीनाम् ।

कपिरकादीनां रेफस्य लकारो वा भवति। कपिलकः, कपिरकः। लोम, रोम। लोहिनी, रोहिणी। तिल्पिलीकं, तिर्पिरीकम्। अङ्गुलिः, अङ्गुरिः। पुलुषः, पुरुषः। तलुनः, तरुणः। सलिलं, सरिरम्। अलं, अरम्। मूलं, मूरम्। कलीलः, करीरः। कल्म, कर्म। मुकुलं, मुकुरम्। पांसुलः, पांसुरः। लेखा, रेखा। लिक्षा, रिक्षा। लोहितं, रोहितमित्यादि। व्यवस्थितविभाषेयम्, तेनार्थभेदेऽपि—इला—भूमिः। इरा—मदिरा। तल्पलः—गजपृष्ठैकदेशः। तर्परः—पशूनां कण्ठघण्टः। कलभः—बालहस्ती। करभः—उष्ट्रः। शलभः—पतङ्गः। शरभः—अष्टापदः। कालः—वर्णः। कारः—रक्षानिर्वेशः। बालः—केशः। वारः—क्रियाभ्यावृत्तिः। लघुः—ह्रस्वः। रघुः—राजा। गलः—प्राण्यङ्गम्। गरः—विषम्। एवं मुद्गलः, मुद्गरः, मण्डलः, मण्डरः, गलं, गरं—इत्यादय ऐकार्थ्येऽपि। आकृतिगणोऽयम्।

८०. असंयुक्तानादेर्डः ।

असंयुक्ताऽनादेर्डकारस्य लकारो वा भवति । ऋफिलः, ऋफिडः । वलभी, वडभी । चूला, चूडा । इला, इडा । व्यालः, व्याडः । पुरोलाशः, पुरोडाशः । षोलशः, षोडशः । बलिशं, बडिशम् । पुलिन, पुडिनम् । पीला, पीडा । असंयुक्तग्रहणं किम् ? पाण्डुः, कण्डूः, गण्डः । अनादिग्रहणं किम् ? डीनः, डामरः ।

८१. जपादीनां पो वः ।

जपादीनां पकारस्य वकारादेशो वा भवति । जवा, जपा । पारावतः, पारापतः । त्रिविष्टप, त्रिपिष्टपम् । पारावार, पारापारः । कवाटः, कपाटः । विष्टव, विष्टपम् । कवलः, कपलः । अवाची, अपाची । जपादयः प्रयोगतः अनुसर्तव्याः ।

८२. अदो घस्लृ द्यादिसन्घञचल्सु ।

द्यादि, सन्, घञ्, अच्, अल्—इत्येतेषु प्रत्ययेषु अदो घस्लृ इत्ययमादेशो भवति । द्यादि—अघसत् । सन्—जिघत्सति । घञ्—घासः । अच्—प्रात्तीति प्रघसः । अल्—प्रादनं प्रघसः । घस्लृ अदने—इत्यनेनैव सिद्धेऽदेः द्याद्यादिषु रूपान्तरनिवृत्त्यर्थं वचनम् । लृदित्करणं ङप्रत्ययार्थम् ।

८३. वा णबादौ ।

अदो घस्लृ इत्ययमादेशो वा भवति णबादौ परे । जघास, जक्षतुः, जक्षुः । पक्षे—आद, आदतुः, आदुः । घस्यदिभ्यामेव सिद्धे विकल्पवचनं घसेरसर्वविषयत्वज्ञापनार्थम्[1] ।

८४. वेर्वय् ।

वेञो धातोः वयित्ययमादेशो वा भवति णबादौ परे । उवाय, ऊयतुः, ऊयुः । ववौ, ववतुः, ववुः ।

८५. शृदृप्रां ह्रस्वः ।

शृ, दृ, पृ—इत्येतेषां धातूनां ह्रस्वो वा भवति णबादौ परे । विशशार, विशश्रतुः[2] । विदद्रतुः, निपप्रतुः । क्वसौ—विशश्रृवान्, विदद्रृवान्, निपप्रृवान् । पक्षे—विशशार, विशशरतुः । विददरतुः, निपपरतुः । विशिशीर्वान्, विदिदीर्वान्, निपुपूर्वान् ।

८६. हनो वधः क्यादावणौ ।

क्यादादिविषये[3] हन्धातोर्वध इत्यकारान्तादेशो भवति न तु णिविषये । वध्यात्, वध्यास्ताम्, वध्यासुः । आवधिषीष्ट, आवधिषीयास्ताम्, आवधिषीरन् । स्थानिवद्भावेनानिट्पाठत्वेऽपि अनेकस्वरत्वादिट्प्रतिषेधो न भवति । क्यादादाविति किम् ? हन्यात्, हन्याताम्, हन्युः । अणाविति किम् ? घानिषीष्ट ।

८७. द्यादौ वा त्वात्मने ।

द्यादिविषये हनो वध इत्ययमादेशो भवति आत्मनेपदे तु वा भवति । अवधीत्[4], अवधिष्टाम्, अवधिषुः ।

---

१. यद्ययं सर्वविषयः स्यात् तदा णबादावपि प्रयुज्येत, ततश्च **'वा णबादौ'** [४/२/८३] इति विकल्पेन आदेशविधानं व्यर्थं भवेदिति भावः । असर्वविषयत्वादेव क्यादादावपि नायं प्रयुज्यते ।

२. ह्रस्वत्वे **'स्कृच्छ्‌तामकि णबादौ'** [४/२/६] इति गुणो न ।

३. अत्र विषयविज्ञानात्पूर्वमेवादेशे वध्यात् इत्यादौ **'अतः'** [४/२/५४] इत्यकारलोपः सिद्धः । अन्यथा तत्रापि विहितव्याख्यानात् स न स्यात् । आवधिषीष्ट इत्यादौ चेट् सिद्धः । अन्यथा **'नैकस्वरादनुस्वारेतः'** [४/३/८५] इत्यत्र विहितव्याख्यानात् तेन निषेधः स्यात् ।

४. विषयविज्ञानात्प्रत्ययव्यवधानेऽपि भवति । यथा अडागमः । किं च विषयव्याख्यां विना अवधीत् इत्यत्र **'नैकस्वरादनुस्वारेतः'** [४/३/८५] इत्यनेन विहितव्याख्यानात् इट् न स्यात् ।

अलोपस्य स्थानिवद्भावेन **'हसादेरदुपधस्य सेटि'** [४/२/३३] इति वृद्धिर्न भवति। वा त्वात्मने—आवधिष्ट, आवधिषाताम्, आवधिषत, अवधि। आहत, आहसाताम्, आहसत, अघानि। द्यादाविति किम्? आजघ्ने।

८८. इणिकोर्गाः।

द्यादिविषये[1] इण इकश्च धातोर्गा इत्ययमादेशो भवति। अगात्, अगाताम्, अगु। अगायि भवता। अध्यगात्, अध्यगाताम्, अध्यगु। अध्यगायि भवता।

८९. आवऽज्ञाने गमुः।

इणिकोरज्ञाने वर्तमानयोर्औ विषये[2] गमु इत्ययमादेशो भवति। उकार **'हनिगमोरुपधायाः'** [४/१/४८] इत्यत्र विशेषणार्थ। गमयति, गमयत, गमयन्ति ग्रामम्। अधिगमयति, अधिगमयत, अधिगमयन्ति प्रियम्। अज्ञाने इति किम्? अर्थान् प्रत्याययति। अज्ञान इतीणो विशेषण नेकोऽसम्भवात्। धात्वन्तरेणैव सिद्धे आविकोऽज्ञानादन्यत्रेणश्च रूपान्तरनिवृत्त्यर्थं वचनम्। कथं अर्थान् गमयन्ति शब्दाः? गमिनैव सिद्धम्।

९०. इङश्च सनि।

इङ्धातोरिणिकोश्चाज्ञाने वर्तमानयोर्गमुरादेशो भवति सन्प्रत्यये परे। अज्ञान इति इण एव विशेषण नेकिङोरसम्भवात्। इङ्—अधिजिगांसते विद्याम्। इण्—अधिजिगमिषति ग्रामम्। इक्—मातुरधिजिगमिषति। अज्ञाने इति किम्? अर्थान् प्रतीषिषति।

९१. गा णबादौ।

इङो णबादौ विषये गा इत्यादेशो भवति। अधिजगे, अधिजगाते, अधिजगिरे, अधिजगिषे। विषयनिर्देश किम्? आदेशे कृते द्वित्वं यथा स्यात्, तेन '...**प्राक् तु स्वरे स्वरविधेः**' [४/१/७२] इति नोपतिष्ठते।

९२. औ सन्नङोर्वा।

सन्प्रत्यये अङ्प्रत्यये च परे औ परत इङो गादेशो वा भवति। अधिजिगापयिषति, अध्यापिपयिषति। अध्यजीगपत्, अध्यापिपत्। आविति किम्? अधिजिगांसते। सन्नङोरिति किम्? अध्यापयति।

९३. द्यादिस्यवाद्योर्गीः।

द्यादौ स्यदादौ च परे इङो गीरित्यादेशो वा भवति। अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत। **'गीकुटादेर्ङिदञ्णित्'** [३/४/९७] इति ङित्वाद् गुणो न। पक्षे—अध्यैष्ट, अध्यैषाताम्, अध्यैषत। स्यदादौ—अध्यगीष्यत, अध्यगीष्येताम्, अध्यगीष्यन्त। अध्यैष्यत, अध्यैष्येताम्, अध्यैष्यन्त।

९४. अस्तेर्भूरऽशिति।

अस्तेर्धातोरशिति विषये भूरादेशो भवति। अभूत्, बभूव, भूयात्, भविता, भविष्यति, अभविष्यत्, बोभूयते, बुभूषति, भवितव्यं, भवितुम्। कथं **'लावण्य उत्पाद्य इवास यत्नः'** [कुमारसम्भवमहा० १/३५]। असतेरय[3] प्रयोग.। कृभ्वस्तीनां पृथगनुप्रयोगनिर्देशान्नेह—ईहामास, ईहामासतु, ईहामासु। अशितीति किम्? अस्ति, स्यात्, अस्तु, आसीत्, सन्। विषयसप्तमीनिर्देश किम्? भव्यम्। प्रागेवादेशे य सिद्धः। अस्तीति निर्देशादस्यतेरसतेश्च न भवति। धात्वन्तरेणैव सिद्धे अस्तेरशिति प्रयोगनिवृत्त्यर्थं वचनम्।

---

1 अत्र विषयव्याख्यां विना अगात् इत्यादिषु सिचो लुकि स्यात् न तु अगायि इत्यत्र णिचा व्यवधानात्।

2. अत्र विषयविज्ञाने अजीगमत् सिद्धम्। अन्यथा औ परे गमादेशे औ परकृतं कार्यं ''इति न्यायाद् इ इति द्विर्वचन स्यात्।

3 असन्— गत्यादानयोश्च।

९५. ब्रुवो वच् ।

ब्रुवो धातोरशिति विषये वच् इत्यादेशो भवति। अवोचत्, अवोचत। उवाच, ऊचे। उच्यात्, वक्षीष्ट। अवक्ष्यत्, अवक्ष्यत। विवक्षति, वावच्यते, उच्यते, वक्तव्य, वक्तुम्। अशितीति किम्? ब्रवीति, ब्रूते, ब्रूयात्, ब्रवीतु, अब्रवीत्, ब्रुवन्, ब्रुवाण.। विषयसप्तमीनिर्देश. किम्? वाच्यम्। प्रागेवादेशे घ्यण्। धात्वन्तरेणैव सिद्धे ब्रुवोऽशिति प्रयोगनिवृत्त्यर्थं वचन, ब्रूनादेशस्य फलवत्यात्मनेपदार्थं च।

९६. भृज्जतेर्भर्ज् वा ।

भृज्जतेरशिति प्रत्यये भर्ज् इत्यादेशो वा भवति। अभार्क्षीत्, अभ्राक्षीत्। बभर्ज, बभर्जतु, बभर्जु। बभ्रज्ज, बभ्रज्जतु, बभ्रज्जु। भर्क्षीष्ट, भ्रक्षीष्ट। भर्ष्टा, भ्रष्टा। बिभर्क्षति, बिभ्रक्षति। बिभर्जिषति, बिभ्रज्जिषति। भर्ष्टुं, भ्रष्टुम्। भर्ग्य, भ्रद्‍ग्यम्[१]। भर्ग, भ्रद्‍ग। भर्जन, भ्रज्जनम्। अशितीति किम्? भृज्जति, भृज्जते। कथ भृज्ज्यात्, भृज्ज्यते, भृष्ट, भृष्टवान्, बरीभृज्ज्यते? परत्वाद् भर्जादेशं बाधित्वा **'ग्रहिज्याव्यधि…'** [४/४/८] इति सम्प्रसारणं भविष्यति। तिब्निर्देशाद्यङ्लुकि न—बर्भृज्जीति।

९७. अजेरऽघञचल्क्यप्सु वी ।

घञच्अल्क्यब्वर्जितेऽशिति प्रत्यये विषयभूतेऽजे[२] वी इत्यादेशो भवति। अनुस्वारेदिडभावार्थ.। विवाय, वीयात्, प्रवेय, प्रवयणीयं, प्रवायक, प्रवीय। अघञचल्क्यप्स्विति किम्? समाज, उदाज., अजतीत्यज, अजा, समजः पशूनां, उदजः पशूना, समज्या। अशितीति किम्? अजति, अजतु।

९८. अनवसे वा ।

अने वसादिषु च प्रत्ययेषु परेषु अशिति विषये अजेर्वी इत्यादेशो वा भवति। प्रवयणो, प्राजनो वा दण्ड। प्रवेता, प्राजिता। प्रवेष्यति, प्राजिष्यति। प्रवेतव्यं, प्राजितव्यम्। प्रवेतु, प्राजितुम्। प्रवीत., प्राजितः। प्रवीतिः, प्राजिति.।

९९. चक्षेर्वाचि ख्यांन्क्शांनौ ।

अशिति विषये वाचि वर्तमानस्य चक्षङ्धातोः ख्यान्, क्शान्—इत्येतावादेशौ भवत। अनुस्वारेदिडभावार्थः। आख्यत्, आख्यत। आक्शासीत्, आक्शास्त। आख्यायात्, आख्येयात्। आख्याता। आख्यास्यति, आख्यास्यते। आख्यातव्यम्। आख्यातुम्। क्शायात्, क्शेयात्। क्शाता। क्शास्यति, क्शास्यते। आक्शातव्यम्। आक्शातुम्। विषय-सप्तमीविज्ञानात् आख्येय, आक्शेयम्। वाचीति किम्? बोधे—विचक्षण., चक्षु। वर्जने—संचक्ष्यते, परिसचक्ष्या दुर्जना.। हिंसाया—नृचक्षा—राक्षसः। अशितीति किम्? आचष्टे। नकारः फलवद्विवक्षायामात्मनेपदार्थस्तेन स्थानिवद्भावेन नित्यमात्मनेपदं न भवति।

१००. णबादौ वा ।

अशिति णबादौ चक्षङो वाचि ख्यांन्क्शांनौ वा भवत। आचख्यौ, आचख्ये। आचक्शौ, आचक्शे। पक्षे—आचचक्षे।

१०१. आत्संध्यक्षराणाम् ।

धातोः संध्यक्षरान्तस्य आकारो भवति अशिति विषये। व्येंन्—सव्याता। देंङ्—दाता। म्लै—म्लाता।

---

१. **'च्यर्थहसाद्…'** [५/१/४८] इति घ्यणि **'चजोः…'** [६/१/२१] इति गे **'भवे अवा प्रसाना'** [१/३/४३] इति द।

२. **विषयविज्ञानात् यङि वेवीयते। प्रवेयं इत्यत्र च प्रागेवादेशे सति यप्रत्ययः।**

विषयसप्तमीत्वात् आत्वस्य प्रागेव कृतत्वादाकारान्तलक्षण. प्रत्ययो भवति । सुग्ल., सुम्ल । सुग्लानं, सुम्लानम् । धातोरिति किम् ? गोभ्याम्, नौभ्याम् । सध्यक्षराणामिति किम् ? कर्ता । इह लाक्षणिकत्वान्न भवति । चेता, स्तोता । अशितीति किम् ? ग्लायति, म्लायति, सव्ययति ।

१०२. न व्यस्थवृणपोः ।

व्ययतेस्थपि णपि च विषयभूते आकारो न भवति । संविव्ययिथ, संविव्याय । अहं संविव्यय । थवृणपोरिति किम् ? सव्याता, संव्यातुम् ।

१०३. वाऽपगुरो णमि ।

अपपूर्वस्य गुरीधातो सध्यक्षरस्य स्थाने आकारादेशो वा भवति णमि प्रत्यये परे । अपगारमपगार, अपगोर-मपगोरम् । आभीक्ष्ण्ये णम् द्वित्वं च । अपगारं युध्यन्ते । अस्यपगोरं युध्यन्ते । **'द्वितीयायां'** [६/१/७४] इति णम् ।

१०४. दीङः सनि ।

दीङ. सन्परे आत्वं वा भवति । दिदासते, दिदीषते । उपदिदासते, उपदिदीषते ।

१०५. यबऽक्ङिति ।

दीङो यपि अक्ङिति च प्रत्यये विषयभूते आकारादेशो भवति । उपदाय, उपदाता, अवदाय, उपदातु, उपदातव्य, उपादास्त । विषयसप्तमीनिर्देशात् पूर्वमेवात्वे सति ईषदुपादानः, उपादायो[1] वर्तते—इत्यत्र आकारान्तलक्षणोऽन इवर्णलक्षणस्य अलोऽभावे घञ् च भवति । यबक्ङितीति किम् ? दीनः, उपदीयते, उपदेदीयते । सानुबन्धनिर्देशाद्यङ्लुकि न भवति । उपदेदेति ।

१०६. मिन्मीनोऽखलऽचऽलि ।

मिनोतिमीनात्योर्यपि खलऽचल्वर्जिते अक्ङिति च प्रत्यये विषयभूते आकारादेशो भवति । निमाय, निमाता, निमातु, निमातव्य, न्यमासीत् । मीन्—प्रमाय, प्रमाता, प्रमातु, प्रमातव्य, प्रामासीत् । अखलचलीति किम् ? ईषन्निमय., दुष्प्रमय । अचि—मय , आमय । अलि—निमयः, प्रमयः । सानुबन्धनिर्देशाद्यङ्लुकि न—निमेमेति, प्रमेमेति । यबक्ङितीति किम् ? मितः, प्रमीत. । निमेमीयते, प्रमेमीयते । मिन्मीन इति किम् ? मीङ्च् हिंसाया इति दैवादिकस्य[2] मा भूत् । मेता, मेतुम् । अस्यापीच्छन्त्यन्ये—माता, मातुम् ।

१०७. लीङ्लिनोर्वा ।

लीयतेर्लिनातेश्च यपि खलऽचल्वर्जिते अक्ङिति प्रत्यये च विषयभूते आकारादेशो वा भवति । विलाय, विलीय । विलाता, विलेता । विलास्यते, विलेष्यते । विलास्यति, विलेष्यति । व्यलासीत्, व्यलैषीत् । अखलचलीति किम् ? ईषद्विलय., विलयः, विलयो वर्तते । यबऽक्ङितीति किम् ? लीन , विलीन , लीयते, लेलीयते, लिनाति । ङिल्लुप्ततिपो-निर्देशाद्यङ्लुकि न भवति । लेलेति । लीण् द्रवीकरणे—इति यौजादिकस्य च न भवति । विलाययति । अस्याप्यात्व इच्छन्त्येके—विलालयति ।

१०८. स्फुरस्फुलोर्घञि ।

स्फुर्, स्फुल्—इत्येतयोर्घञि संध्यक्षरस्य आकारो भवति । विस्फारः, विस्फालः । विष्फार , विष्फालः । **'वेः'**

---

१ अत्र पूर्वमात्वे कृते **'ऋवुवर्ण···'** [५/४/५१] इति घञ्बाधकोऽल् न भवति । अलि कृते तु **'आतो युक्···'** [४/२/२४] इ। युगऽभावे पश्चाद् आत्वे उपदा इति विरुद्ध रूप स्यात् ।

२. उपलक्षणत्वात् मीण् गतौ—इत्यस्यापि ।

[२/२/५४] इति वा षत्वम् । णौति किम् ? विस्फोरकः ।

१०९. जिक्रीङां णौ ।

जि, क्रीन्, इङ्—इत्येतेषां धातूनां संध्यक्षरस्य आकारो भवति णौ परे । जापयति, क्रापयति, अध्यापयति ।

११०. सिध्यतेरज्ञाने ।

षिधुंच् सराद्धौ—इत्यस्याऽज्ञाने वर्तमानस्य संध्यक्षरस्य आकारादेशो भवति णौ परे । मन्त्रं साधयति । तपः साधयति । अन्नं साधयति साधर्मिकेभ्यो दातुम् । अज्ञान इति किम् ? तपस्तपस्विन सेधयति । सिध्यति जानीते तपस्वी ज्ञानविशेषमासादयति । तं तपः प्रयुङ्क्ते इत्यर्थः । एनं स्वान्येव कर्माणि सेधयन्ति । अस्याऽनुभवविशेषमुत्पादयन्तीत्यर्थः[१] । सिध्यतेरिति किम् ? षिधु गत्यां—इति भौवादिकस्य मा भूत् । अन्नं सेधयति । तपः सेधयति । साधिनैव सिद्धे सिध्यतेरज्ञाने सेधयतीति प्रयोगनिवृत्त्यर्थं वचनम् ।

१११. चिस्फुरोर्वा ।

चिन्, स्फुर्—इत्येतयोः संध्यक्षरस्य आकारादेशो वा भवति णौ परे । चापयति, चाययति । स्फारयति, स्फोरयति ।

११२. प्रजने वियः ।

प्रजनो जन्मन उपक्रमो गर्भग्रहणम् । तस्मिन् वर्तमानस्य वी इत्यस्य आकारादेशो वा भवति णौ परे । पुरो[२] वातो गाः प्रवापयति[३], प्रवाययति—गर्भं ग्राहयतीत्यर्थः । वातेः प्रजने वृत्तिर्नास्तीत्यारम्भः ।

११३. अर्ति-ह्री-व्ली-री-क्नूयि-क्ष्माय्यातां पुक् ।

एषामाकारान्तानां च धातूनां पुगागमो भवति णौ परे । उकावितौ । अर्तीति ॠंक्—गतौ, ॠं—प्रापणे चेत्यनयोर्ग्रहणं सामान्यनिर्देशात् । अर्पयति । तिब्निर्देशो यङ्लुग्निवृत्त्यर्थः । अरारयति[४] । ह्रेपयति, व्लेपयति । रीति रीयतिरिणात्योर्ग्रहणम् । रेपयति । क्नोपयति, क्ष्मापयति । आदन्त—दापयति, धापयति, जापयति, क्रापयति, अध्यापयति, अदीदपत् ।

११४. शा-छा-सा-ह्वा-व्या-वेपां युक् ।

एषां णौ परे युगागमो भवति । पूर्वापवादः । शोंच्—शाययति । छोंच्—छाययति । सों सै वा—साययति । ह्वेंन्—ह्वाययति । व्येंन्—व्याययति । वेंन्—वाययति । वे इत्यनात्वेन निर्देशो वांक् गतिगन्धनयोः, ओवैं शोषणे इत्यनयोर्निवृत्त्यर्थः । वापयति । पां पाने, पैं शोषणे वा—पाययति । पातेर्लुक् वक्ष्यते । अशीशयत्, अपीपयत्[५] । एषां कृतात्वानां ग्रहणादिह प्रकरणे लाक्षणिकस्यापि ग्रहणं भवति, तेन पूर्वसूत्रे क्रापयतीत्यादि सिद्धम् ।

११५. धूनप्रीनोर्नुक् ।

धून्, प्रीन्—इत्येतयोर्णौ परे नुगागमो भवति । धूनृत्, धूनृश्, धूनृण् वा—धूनयति, अदूधुनत् । प्रींनृश् प्रीनृण्

---

१. अनुभव साक्षात्कारः, स च ज्ञानमेव ।

२. पूर्वस्या दिश आगतः । 'पूर्वावराधरेभ्योऽस्…' [८/१/१३३] ।

३. प्रवियतीः प्रयुङ्क्ते ।

४. आरतं प्रयुङ्क्ते ।

५. पैं शोषणे—इत्यस्यैवं, पिबतेस्तु 'अङि पिबः पीप्य्' [४/१/१२६] इत्यनेन पीप्यादेशेऽपीप्यदिति भवति ।

वा—प्रीणयति, अपिप्रिणत् । यौजादिकयोर्नेच्छन्त्येके । धावयति, प्राययति । अनुबन्धनिर्देशो यङ्लुग्निवृत्त्यर्थो धुवतिप्रीयतिनिवृत्त्यर्थश्च । दोधावयति, पेप्राययति । धावयति, प्राययति ।

११६. लियः स्नेहवितापने वा ।

ली इति लीङ्लीङोः सामान्येन ग्रहणम्[1] । लिय स्नेहवितापनेऽर्थे वर्तमानस्य णौ परे नुगागमो वा भवति । घृत विलीनयति, घृत विलाययति । णौ वृद्धौ आयादेश. । लिय ई ली इति ईकारप्रश्लेषात् ईकारान्तस्यैव भवति । कृतात्वस्य तु लुक्पुगागमौ भवतः । घृत विलालयति, घृत विलापयति । स्नेहवितापने इति किम् ? अयो विलाययति ।

११७. लो लुक् ।

लातेर्ली इत्यस्य च कृतात्वस्य स्नेहवितापनेऽर्थे णौ परे लुगागमो वा भवति । उकावितौ । घृत विलालयति, घृत विलापयति । घृत व्यलीललत्, घृत व्यलीलपत् । स्नेहवितापने इति किम् ? जटाभिरालापयते । श्येनो वर्तिका उल्लापयते ।

११८. पातेः ।

पाक् रक्षणे—इत्येतस्य णौ परे लुगागमो भवति । पालयति, अपीपलत् । पलण् रक्षणे इति चौरादिकेनैव सिद्धे पातेर्मुगागम. स्यादिति वचनम् । तिब्निर्देशो धात्वन्तरनिवृत्त्यर्थ. यङ्लुग्निवृत्त्यर्थश्च । पा पाने, पै शोषणे वा—पाययति, पापाययति[2] ।

११९. वो विधूनने जुक् ।

वा इत्येतस्य विधूननेऽर्थे जुगागमो भवति णौ परे । पक्षकेण उपवाजयति[3] । पुष्पाणि प्रवाजयेत् । अवीवजत् । विधूनन इति किम् ? ओवै—केशानावापयति । शोषयतीत्यर्थ. । वजिनैव सिद्धे वाते रूपान्तरनिवृत्त्यर्थं वचनम् ।

१२०. स्फायो वः ।

स्फाय्धातो णौ परे वकारोऽन्तादेशो भवति । स्फावयति, अपिस्फुवत् ।

१२१. शदेरगतौ तः ।

अगतावर्थे वर्तमानस्य शदेर्णौ परे तकारोऽन्तादेशो भवति । पुष्पाणि शातयति । अगताविति किम् ? गोपालको गा शादयति—गमयतीत्यर्थः ।

१२२. रुहः पो वा ।

रुहेर्णौ परे पकारोऽन्तादेशो वा भवति । रोपयति रोहयति वा व्रीहीन् । रोहत्यर्थे रुप्यतिर्न दृश्यते इति योगारम्भ ।

१२३. घटादेर्ह्रस्वो दीर्घस्तु वा णिणम्परे ।

घटादीनां धातूना णौ परे ह्रस्वो भवति णिणम्परे तु णौ दीर्घो वा भवति । घटयति । अघाटि, अघटि । घाटघाटं, घटघटम् । व्यथयति । अव्याथि, अव्यथि । व्याथंव्याथं, व्यथंव्यथम् । हिडयति । अहीडि, अहिडि । हीडंहीड, हिडंहिडम् ।

---

१ उपलक्षणत्वात् लीण् इत्यस्याऽपि ग्रहणम् ।

२ भृश पाति, यङ्लुक्, द्वित्व, पापत प्रयुङ्क्ते ।

३. वांक् इत्यस्य न तु पै ओवै इत्यस्य विधूनने वृत्त्यभावात् ।

अक्षाञ्जि, अक्षञ्जि। क्षाञ्जंक्षाञ्जं, क्षञ्जक्षञ्जम्। अदाक्षि, अदक्षि। दाक्षंदाक्षं, दक्षंदक्षम्। क्षञ्जिदक्ष्यादीनां घटादिपाठबलाद् अनुपधाया अपि वा दीर्घः। वा णिणम्परे इत्येव ह्रस्वविकल्पेन सिद्धे दीर्घग्रहणं हेडेरिकारस्य दीर्घत्वार्थम्। ह्रस्वविकल्पे हि पक्षे एकारश्रुति स्यात्। ञिन्यङ्व्यवहितेऽपि ञौ णिणम्परे दीर्घत्वार्थं च। ञिन्व्यवाये—शमयन्तं प्रयुङ्क्ते, ञिन्, तदन्तात् णौ णमि—अशामि, अशमि। शामशाम, शमंशमम्। यङ्व्यवाये—शंशमयतेर्णौ णमि च अशंशामि, अशशमि। शशामशंशाम, शंशमंशंशमम्। अत्र योऽसौ ञौ ञिर्लुप्यते यश्च यङोऽकारस्तस्य स्थानिवद्भावेन घटादीनां व्यवहितत्वात् आनन्तर्यं नास्तीति णिणम्परे ञौ न स्याद् ह्रस्वविकल्पः। दीर्घग्रहणे तु दीर्घविधिं प्रति स्थानिवद्भावप्रतिषेधात् आनन्तर्यमेवेति सिध्यति। घटादिर्भ्वाद्यन्तर्गणः धातुपाठादवगन्तव्यः। फणिमेके घटादिमनिच्छन्तो गतावपि फाणयतीत्याहुः। भोजस्त्वत्र दलिवलिस्खलित्रपिक्षपीनपि पपाठ। तन्मते दलयति, वलयति, स्खलयति, त्रपयति, क्षपयति। क्षै क्षये—इत्यस्य कृतात्वस्य पुकानिर्देशः। इह घटादयः पठितार्था एव गृह्यन्ते। अर्थान्तरे तु उद्घाटयति, श्रापयति, स्मारयति, दारयति, नाटयति, लाडयति, फाणयति, छादयति, प्रमादयति, ध्वानयति, स्वानयति, चालयतीत्यादि।

१२४. कगे-वनु-जनी-जॄष्-क्नस्-रञ्जाम्।

एषां ञौ परे ह्रस्वो भवति णिणम्परे तु ञौ वा दीर्घो भवति। कगयति। अकागि, अकगि। कागंकागं, कगंकगम्। वनु—उपवनयति। उपावानि, उपावनि। अवानि, अवनि। उपवानमुपवान, उपवनमुपवनम्। वानंवान, वनंवनम्। जन्—जनयति। अजानि, अजनि। जानंजानं जनजनम्। जॄष्—जरयति। अजारि, अजरि। जारंजारं, जरंजरम्। क्नस्—क्नसयति। अक्नासि, अक्नसि। क्नासक्नास, क्नसक्नसम्। रञ्ज्—रजयति मृगान् व्याधः। अराजि, अरजि। राजराज, रजंरजम्। 'ञौ मृगरमणे' [४/२/४४] इति नलोपः। नलोपे वचनस्य चरितार्थत्वात् नलोपाऽभावे[1] अरञ्जि, रञ्जरञ्ज इत्यत्र वा दीर्घो न भवति। केचित्तु ष्णसुन् निरसने इत्यस्यापीच्छन्ति। स्नसयति। कगे इति सौत्रो धातुः। एकारश्चैदित्कार्यार्थः। अकगीत्[2]। वनु इत्युकारनिर्देशात् वन सम्भक्तौ इत्यस्य न भवति। वानयति। अवानि। वानंवानम्।

१२५. अमोऽकम्यमिचमां ञिनि।

कम्यमिचमिवर्जितस्य अमन्तस्य धातोर्ञिनि परे ह्रस्वो भवति णिणम्परे तु ञिनि वा दीर्घो भवति। रमयति। अरामि, अरमि। रामंरामं, रमंरमम्। दमयति। अदामि, अदमि। दामंदामं, दमंदमम्। कथं संक्रामयति ? सङ्क्रामन्तं करोतीति शत्रन्तात् ञिचि भविष्यति। अकम्यमिचमामिति किम्? कामयते, अकामि, कामकामम्। आमयति, आममामम्। आचामयति, आचामि, आचाममाचामम्। ञिनीति किम्? ञिचि मा भूत्। स्यमङ्ण् वितर्के—स्यामयते, अस्यामि, स्यामस्यामम्। शमङ्ण् आलोचने—निशामयते, न्यशामि, निशामनिशामम्।

१२६. पर्यपाभ्यां स्खदः।

पर्यपाभ्यामेव परस्य स्खदेर्ञिनि परे ह्रस्वो भवति णिणम्परे तु ञिनि वा दीर्घो भवति। परिस्खदयति। पर्यस्खादि, पर्यस्खदि। परिस्खादंपरिस्खादं, परिस्खदंपरिस्खदम्। अपस्खदयति। अपास्खादि, अपास्खदि। अपस्खादमपस्खादं, अपस्खदमपस्खदम्। अवादप्यन्ये—अवस्खदयति। स्खदेर्घटादिपाठेन सिद्धे नियमार्थं वचनम्। अन्योपसर्गपूर्वस्य मा भूत्। प्रस्खादयति। अन्ये तु निषेधाधिकारे 'अपपरिस्खदः' इति पठित्वा पर्यपपूर्वस्य स्खदेर्निषेधमिच्छन्ति। तन्मते परिस्खादयति, पर्यस्खादि, परिस्खादंपरिस्खादम्। एवं अपस्खादयतीत्यादि। पर्यपाभ्यामन्यत्र प्रस्खदयति, प्रास्खादि, प्रास्खदि इत्यादि भवति।

---

१. मृगरमणाऽभावे नलोपाऽप्रवृत्तेरित्यर्थः।

२. एके कगेधातुं सर्वधात्वर्थेषु मेनिरे। यथा कगति यानि भुङ्क्ते सस्तीत्यादि। अन्ये कगे इति नोच्यते इत्यर्थे जगुः। यथा कगति—न वक्ति इत्यर्थः।

१२७. शमोऽदर्शने ।

अदर्शनेऽर्थे वर्तमानस्य शमेर्ञिनि परे ह्रस्वो भवति णिणम्परे तु ञिनि वा दीर्घो भवति। शमयति रोगम्। निशमयति श्लोकान्। अशामि, अशमि। शामशामं, शमशमम्। अदर्शन इति किम्? निशामयति रूपम्। दर्शने एव केचिदिच्छन्ति। तन्मते उदाहरणप्रत्युदाहरणयोर्विपर्ययः।

१२८. यमोऽपरिवेषणे[1] ञौ ।

अपरिवेषणे वर्तमानस्य यमेर्ञौ परे ह्रस्वो भवति णिणम्परे तु ञौ वा दीर्घो भवति। यमयति। अयामि, अयमि। यामयाम, यमंयमम्। अपरिवेषणे इति किम्? यामयति[2] अतिथीन्। यमः परिवेषणे इत्यन्ये। तन्मते उदाहरणप्रत्युदाहरणयो-विपर्ययः।

१२९. मारण-तोषण-निशानेषु ज्ञः।

एष्वर्थेषु वर्तमानस्य जानातेर्ञौ ह्रस्वो भवति णिणम्परे तु ञौ वा दीर्घो भवति। मारणे—संज्ञपयति पशून्। तोषणे—ज्ञपयति गुरून्। निशाने—ज्ञपयति शरान्। प्रज्ञपयति शस्त्रम्। अज्ञापि, अज्ञपि। ज्ञापंज्ञाप, ज्ञपज्ञपम्। निशान तेजन तीक्ष्णीकरणम्। अन्ये तु निशामने इच्छन्ति। निशामनं आलोचन प्रणिधानमाहुः। मारणादिष्विति किम्? आज्ञापयति भृत्यम्।

१३०. चहणः शाठ्ये ।

चहेश्चौरादिकस्य शाठ्येऽर्थे वर्तमानस्य ञौ परे ह्रस्वो भवति णिणम्परे तु ञौ वा दीर्घः। चहयति। चाहिष्यते, चहिष्यते। चाहंचाहं, चहचहम्। णिन्निर्देशात् भौवादिकस्य न भवति। चाहयति, अचाहि, चाहंचाहम्। शाठ्य इति किम्? अचहि, चहचहम्। चहयतीत्यदन्तत्वात् सिद्धे दीर्घार्थं वचनम्।

१३१. ज्वल-ह्वल-ह्मल-ग्ला-स्ना-वनु-वम-नमोऽनुपसर्गस्य वा ।

एषामनुपसर्गाणां ञौ परे ह्रस्वो वा भवति। ज्वलयति, ज्वालयति। ह्वलयति, ह्वालयति। ह्मलयति, ह्मालयति। ग्लपयति, ग्लापयति। स्नपयति, स्नापयति। वनयति, वानयति। वमयति, वामयति। नमयति, नामयति। अज्वालि, अज्वलि, ज्वालज्वालं, ज्वलंज्वल—इत्यादिषु दीर्घविकल्पः[3] सिद्ध एव। अनुपसर्गस्येति किम्? प्रज्वलयति, प्रह्वलयति, प्रह्मलयति, प्रग्लापयति, प्रस्नापयति, प्रवनयति, प्रवमयति, प्रणमयति। ग्लास्नोरप्राप्ते शेषाणां तु प्राप्ते विभाषा।

१३२. छादेरिस्मन्त्रट्क्विप्सु ।

छादेरिति ण्यन्तनिर्देशः। इस्, मन्, त्रट्, क्विप्—इत्येतेषु परेषु छादेर्धातोर्ह्रस्वो भवति। छदिः। छद्म। छत्रं, छत्री। धामच्छत्, उपच्छत्। त्रडिति किम्? त्रे मा भूत्। छात्रः।

१३३. एकोपसर्गस्य च घे ।

एकोपसर्गस्य अनुपसर्गस्य च छादेर्ह्रस्वो भवति घप्रत्यये परे। प्रच्छाद्यतेऽनेनेति प्रच्छदः। परिच्छदः, उपच्छदः। छाद्यतेऽनेनेति छदः। सप्त छदा अस्य सप्तच्छदः। उरसश्छदः, उरश्छदः। एवं दन्तच्छदः। एकोपसर्गस्य चेति किम्?

---

१ परिवेषणमिह भोजनविषयि परिवेषणं सूर्यादिवेष्टनं च गृह्यते।

२. परिवेषणक्रियया तान् व्याप्नोतीत्यर्थः।

३ अनेनैव सूत्रेण वा ह्रस्वविधानात् णिणम्परे इति नाऽनूद्यते।

समुपच्छादः, समुपाभिच्छाद । घ इति किम् ? प्रच्छादनं, तनुच्छादनम् ।

१३४. क्तक्तवतुक्तिषु ह्लादः ।

ह्लाद्धातोर्ह्रस्वो भवति क्त, क्तवतु, क्ति---इत्येतेषु प्रत्ययेषु परेषु। प्रह्लन्न, प्रह्लन्नवान्, प्रह्लत्तिः । क्तादिष्विति किम् ? प्रह्लादयति ।

तृतीयश्चरणः

१. ष्वादेरादेर्णो नः।

ष्वादेर्धातोरादेर्णकारस्य नकार आदेशो भवति। णीञ्—नयति। णम्—नमति। णह्—नह्यति। ष्वादेरिति किम्? णकारमिच्छति—णकारीयति। आदेरिति किम्? भणति। सर्वे च नादयो णोपदेशाः। नृति-नन्दि-नर्दि-नाटि-नक्कि-नाधृ-नाथृ-नॄ-वर्जम्। नाटीति नटण् नाट्ये—इति चौरादिकस्य वर्जनम्। भौवादिकस्य तु णट नृत्तौ—इत्यस्य प्रणटति, प्रणाटयति। णोपदेशश्चैषामुपसर्गात् णोपदेशस्य इत्यस्य विषयव्यवस्थार्थः।

२. षः सोऽष्ट्यैष्ठिवष्वष्कः।

ष्वादेर्धातोरादेः षकारस्य सकार आदेशो भवति न चेत् षकारः ष्ट्यैष्ठिवष्वष्कसम्बन्धी भवति। षह्—सहते। षिच्—सिञ्चति। ष्वादेरिति किम्? षण्डीयति। आदेरिति किम्? लषति। ष्ट्यायादिवर्जनं किम्? ष्ट्यायति, ष्ठीवति, ष्ठीव्यति, ष्वष्कते। स्वरदन्त्यपरसकारादयः स्मिस्विदिस्वदिस्वञ्जिस्वपयश्च षोपदेशाः, सृपि-सृजि-स्त्या-स्तृ-स्तॄ-सृ-सेकृ-वर्जम्। षोपदेशश्चैषां षत्वविषयव्यवस्थार्थः।

३. वेत्तेस्तिबादीनां णबादयो वा परस्मै।

परस्मैपदसंबन्धिनां वेत्तेः परेषां तिबादीनां प्रत्ययानां स्थाने परस्मैपदसम्बन्धिन एव णबादयो[1] नवादेशाः यथासङ्ख्यं वा भवन्ति। वेद, विदतुः, विदुः। वेत्थ, विदथुः, विद। वेद, विद्व, विद्म। पक्षे—वेत्ति, वित्तः, विदन्ति। वेत्सि, वित्थः, वित्थ। वेद्मि, विद्वः, विद्मः।

४. ब्रुवः पञ्चानां पञ्चाहश्च।

ब्रुवः परेषां तिबादीनां पञ्चानां स्थाने यथासङ्ख्यं पञ्च णबादय आदेशा वा भवन्ति तत्संनियोगे ब्रुवः आह इत्यादेशश्च भवति। अकार उच्चारणार्थः। आह, आहतुः, आहुः। आत्थ, आहथुः। पक्षे—ब्रवीति, ब्रूतः, ब्रुवन्ति। ब्रवीषि, ब्रूथः। पञ्चानामिति किम्? ब्रूथ।

५. आहस्तस्थे।

ब्रुवादेशस्य आहो हकारस्य तकारादेशो भवति थकारे परे। आत्थ। पूर्वसूत्रेण आहादेशः।

६. ऊतः पिद्धसादेरीट्।

ब्रुवः ऊकारान्परस्य हसादेः पित ईडागमो भवति। ब्रवीति, ब्रवीषि, ब्रवीमि, अब्रवीत्, अब्रवीः। ऊत इति किम्? आत्थ। पिदिति किम्? ब्रूतः। हसादेरिति किम्? ब्रवाणि, अब्रवम्।

---

1. आदेशानां स्थानिवत्त्वात् द्वित्वादिकार्यं न भवति।

७. तुरुस्तुभ्यो वा शिति ।

एभ्यः परस्य हसादेः पित ईडागमो वा भवति शिति विषये । तवीति, तौति । रवीति, रौति । स्तवीति, स्तौति । शितीति किम् ? तुतोथ, रुरविथ, तुष्टोथ । पिदिति किम् ? तुतः, रुतः, स्तुतः । केचिदित नानुवर्तयन्ति । तन्मते तुवीत, रुवीत, स्तुवीत इत्यपि भवति । हसादेरिति किम् ? तवानि, रवाणि, स्तवानि ।

८. यङ्लुको बहुलम् ।

यङ्लुगन्तात्परस्य हसादेः पित ईडागमो बहुलं भवति शिति विषये । बहुलमिति शिष्टप्रयोगानुसारेण, तेन क्वचिद् विकल्पः—बोभवीति, बोभोति । नर्नृतीति, नर्नर्ति । लालपीति, लालप्ति । क्वचिन्न—वर्वर्ति, चर्कर्मि । अन्ये तु वावदीति, लालपीति, रोरवीतीति नित्यम्, बोभोति, बोभवीति, सोषोति, सोषवीति, चर्कर्ति, चर्करीतीति विकल्प, नर्नति, वर्वर्ति, वर्वर्ष्टि इत्यत्र न भवतीत्याहु । पिदिति किम् ? बोभूतः, लालप्तः । हसादेरिति किम् ? बोभवानि, अबोभवम् ।

९. तृणह इम् ।

अर्थवशाद् विभक्तिविपरिणाम । तृहेर्नमि कृते शिद्विषये हसादौ पिति प्रत्यये परे इमागमो भवति । मित्त्वात् स्वरात्परः । तृणेढि, तृणेक्षि, तृणेह्मि, तृणेढु । अतृणेड् इत्यत्र हसादौ प्रत्ययेऽस्य विधानात् प्रत्ययाश्रयत्वमेव न वर्णाश्रयत्वं, वर्णस्य प्रत्ययविशेषणत्वात् इति प्रत्ययलोपे प्रत्ययलक्षण भवत्येव । आद्यन्तवद्भावाच्च हसादित्वम् । पितीति किम् ? तृण्ढः । हसादाविति किम् ? तृणहानि ।

१०. उत औरद्वेः ।

अद्विरुक्तस्य उकारान्तस्य धातोः शिद्विषये हसादौ पिति प्रत्यये परे औकारोऽन्तादेशो भवति । यौति, यौषि, यौमि । रौति, रौषि, रौमि । यौतु, रौतु । अयौत्, अरौत् । अयौः, अरौः । उत इति किम् ? एति, एषि । धातोरिति किम् ? सुनोति, तनोमि । पितीति किम् ? युतः, रुतः । हसादाविति किम् ? यवानि, रवाणि । अद्वेरिति किम् ? जुहोति, योयोति । तुप स्थाने तातङो ङित्त्वात् स्थानिवत्त्व बाध्यते, तेन युतात्, रुतात् इत्यादौ नौकारः । केचित्तु यङ्लुगन्तस्यापि इच्छन्ति । नोनौति, योयौति, रोरौति ।

११. ऊर्णोर्वा ।

अद्विरुक्तस्य ऊर्णोतेः शिति विषये हसादौ पिति प्रत्यये औकारादेशो वा भवति । पूर्वेण नित्य प्राप्ते विकल्पः । प्रोर्णौति, प्रोर्णोति । प्रोर्णौषि, प्रोर्णोषि । पितीति किम् ? प्रोर्णुतः । हसादाविति किम् ? प्रोर्णवानि । अद्वेरिति किम् ? प्रोर्णोनोति । यङ्लुगन्तस्यापीच्छन्त्यन्ये । प्रोर्णोनौति ।

१२. न दिस्योः ।

ऊर्णोतेर्दिस्योः परयोरौकारो न भवति । पृथग्योगात् पूर्वेणापि प्राप्तः प्रतिषिध्यते प्रौर्णोत्, प्रौर्णोः । दिस्योरिति किम् ? प्रोर्णौति, प्रोर्णौषि । दिसाहचर्यात् सिरपि दिबादेरेव गृह्यते ।

१३. गमिषव्यमां छोऽस्यादौ ।

गम्, इषज्, यम् —इत्येतेषां शिति प्रत्यये परे छकारोऽन्तादेशो भवति तिबादिश्चेदनन्तरो न भवति । गच्छति, सगच्छते । इच्छति, व्यतीच्छन्ते । यच्छति, आयच्छते । शितीति किम् ? गन्ता, एष्टा, यन्ता । अत्यादाविति किम् ? जंगन्ति[1], यंयन्ति । इषज् इति जकारनिर्देश इष्यतीष्णात्योर्निवृत्त्यर्थः ।

---

१. मतेस्तु त्वादिर्नास्ति, तेन यङ्लुक्यपि आदेशो भवति । जंगन्तीति वाक्ये सति र 'गमहन...' [४/२/५२] इति उपधालोपे 'खसे चपा सलानां' [१/३/४०] इति कृत्वे जक्छत् इति सिद्धम् । यमेस्तु यंयच्छत् ।

१४. श्रौत्यर्ति-धिवि-कृवि-दृश्-शद्-सद्-पा-घ्रा-ध्मा-स्था-म्ना-दामां शृच्छ-धि-कृ-पश्य-शीय-सीद-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छाः।

श्रौत्यादीनां धातूनां यथासंख्यं शृ इत्यादय आदेशा भवन्ति शिति परे अत्यादौ। श्रौतेः शृ—शृणोति, शृण्वन्। अर्तेर्ऋच्छ—ऋच्छति, ऋच्छन्, समृच्छमान। धिवेर्धि—धिनोति, धिन्वन्। कृवेः कृ—कृणोति, कृण्वन्। दृशः पश्य—पश्यति, पश्यन्। शदेः शीय—शीयते, शीयमानः। सदेः सीद—सीदति, सीदन्, कतीह सीदमाना। पः पिब—पिबति, पिबन्। घ्रो जिघ्र—जिघ्रति, जिघ्रन्। ध्मो धम—धमति, धमन्। स्थस्तिष्ठ—तिष्ठति, तिष्ठन्। म्नो मन—आमनति, आमनन्, कतीहामनमाना। दामो यच्छः—प्रयच्छति, प्रयच्छन्, दास्या सप्रयच्छमानः। घ्रादिभिः साहचर्यात् पाऽत्योर्भौवादि-कयोरेव ग्रहणम्। लाक्षणिकत्वाच्च पै इत्येतस्य न ग्रहणम्, तेन पान्, इयत्, पायति। श्रौत्यर्त्योस्तिव्निर्देशः धिविकृविदृशु-दामामनुबन्धश्च यङ्लुक्यादेशनिवृत्त्यर्थः। शोश्रुवत्[१]। अर्तेर्यङ्लुकि द्वित्वे पूर्वस्यात्वे रुगागमे धातोश्च रत्वे तन्निमित्ते रुगागमलोपे पूर्वाकारदीर्घत्वे च आरत्। चरीकृण्वत्, देधिन्वत्, दर्दृशत्, दादत्। दामो मकारस्य निर्देशो दानादेः शङ्कानिवृत्त्यर्थश्च।

१५. वेगे सर्तेर्धाव्।

सरतेर्वेगे गम्यमाने शिति परे धाव् इत्ययमादेशो भवति अत्यादौ। धावति, धावन्, कतीह धावमाना। वेग इति किम्? प्रियामनुसरति। धाविना सिद्धे सरतेर्वेगे सरतीति प्रयोगनिवृत्त्यर्थं वचनम्। तिव्निर्देशाद्यङ्लुकि न भवति। सर्स्रत्, सरिस्रत्, सरीस्रत्।

१६. ज्ञाजनोर्जा।

ज्ञा, जन्—इत्येतयोः शिति परे जा इत्यादेशो भवति अत्यादौ। जानाति, जानीते, जानन्, जानान। जन्—जायते, जायमानः। शितीति किम्? ज्ञायते, जन्यते। अत्यादाविति किम्? जाज्ञाति[२], जञ्जन्ति।

१७. क्रमो दीर्घः परस्मै।

क्रमेः परस्मैपदे शिति परे दीर्घो भवति अत्यादौ। क्रामति, क्राम्यति। क्रामन्, क्राम्यन्। अक्रामन्। परस्मै इति किम्? आक्रमते सूर्यः। परस्मैपदनिमित्तविज्ञानाद् हेलेपिऽपि भवति। क्राम, सक्राम।

१८. ष्ठिवुक्लम्वाचमः।

ष्ठिवेः क्लमेः आङ्पूर्वस्य च चमेः शिति परे दीर्घो भवति अत्यादौ। ष्ठीवति। दैवादिकस्य तु ष्ठिवो दीर्घोऽस्त्येत्र[३]। क्लामति, क्लाम्यति। आचामति। चमेराङ्पूर्वस्य ग्रहणादिह न भवति। चमति, विचमति। ष्ठिवुक्लमो-रुकारनिर्देशाद्यङ्लुकि न—तेष्ठिवत्, चक्लमत्।

१९. प्वादेर्ह्रस्वः।

प्वादीनां धातूनां ह्रस्वो भवति शिति परे अत्यादौ। पुनाति, लुनाति, स्तृणाति। पूञ् पवने—इत्यारभ्य वृत्करणपर्यन्त प्वादि। क्र्याद्यन्तर्गणो धातुपाठे द्रष्टव्यः। प्वादेरिति किम्? प्रीणाति, श्रीणाति। आ गणान्तात् प्वादय इति अन्ये। वृत्करण ल्वादिरिसमाप्त्यर्थम्। तन्मते व्रिणाति, भ्रिणाति इत्येव भवति। जानातीत्यत्र तु विधानसामर्थ्यान्न ह्रस्वः।

---

१. यङ्लुकः शतरि रूपमेतत्। केवले यङ्लुकि तु अत्यादावित्यनेनैव आदेशनिवृत्तिः स्यात् त्यादेरनन्तरत्वात्।

२. यङ्लुकः शतरि तु जाज्ञति, जञ्जतीति वाक्ये ज्ञाजनोर्द्वयोरपि जादेशे 'नश्चातः' [३/४/७१] इत्यातो लोपे जत् इति सिद्धं भवति।

३. 'म्वादेरिवुतोर्दीर्घोऽर्द्यञ्जने' [२/१/६४] इत्यादिना।

२०. मुचादि-तृफ-दृफ-गुफ-शुभोभानां नुमऽनि।

मुचादीनां धातूनां तृफादीनां च अन्प्रत्यये परे नुमागमो भवति। मुञ्चति, मुञ्चते। सिञ्चति, सिञ्चते। विन्दति, विन्दते। लुम्पति, लुम्पते। लिम्पति लिम्पते। कृन्तति। खिन्दति। पिंशति। तुदाद्यन्तर्गणोऽयं मुचादिः। तृफ—तृम्फति। दृफ—दृम्फति। गुफ—गुम्फति। शुभ—शुम्भति। उभ—उम्भति। तृफादयः सनकारा अनकाराश्च तुदादिषु पठ्यन्ते। तत्र तृम्फादीनामनि नस्य लोप इति तृफादीनां नुम्विधानम्। विधानसामर्थ्यात् तु अस्य लोपो न भवति इति तृफति, तृम्फति इत्यादि द्वैरूप्यं सिद्धम्। एषामिति किम्? तुदति। अनीति किम्? मोक्ता, तर्फिता।

२१. नशेर्झसे।

नश्यतेर्नुमागमो भवति झसादौ प्रत्यये परे। नष्टा, नष्टुं, नष्टव्य, नङ्क्ष्यति, निनङ्क्षति। झसे इति किम्? नश्यति, नशिता।

२२. मस्जेरन्त्यात् पूर्वम्।

मस्जतेरन्त्यवर्णात् पूर्वं नुमागमो भवति झसादौ प्रत्यये परे। मङ्क्ता, मङ्क्तुं, मङ्क्तव्य, मङ्क्ष्यति, मिमङ्क्षति, ममङ्क्थ, अमाङ्क्षीत्। अन्त्यात्पूर्वं करण सलोपार्थं, तेन मग्नः, मग्नवान्, मक्त्वा इत्यादि सिद्धम्। अन्यथा अन्त्यस्वरात् परे नुमि कृते अनादौ स्थितत्वात् सलोपो न स्यात्।

२३. जभेः स्वरे।

स्वरादौ प्रत्यये परे जभेर्नुमागमो भवति। जम्भयति, जम्भकः, साधुजम्भी, अजम्भि, जम्भजम्भं, जम्भो वर्तते। स्वर इति किम्? जभ्य, जजब्ध।

२४. रधेरिटि तु णबादावेव।

रध्यतेः स्वरादौ प्रत्यये परे नुमागमो भवति इटि तु—इडादौ तु प्रत्यये णबादावेव। रन्धयति, रन्धकः, साधुरन्धी, रन्धरन्ध, रन्धो वर्तते। इटि तु णबादौ। ररन्धिव, ररन्धिम। रेधिवान्—इत्यत्र नस्य लोपः। णबादावेवेति किम्? रधिता, रधिष्यति। स्वर इति किम्? रद्धा।

२५. रभेरऽनबणबादौ।

अब्वर्जिते णबादिवर्जिते च स्वरादौ प्रत्यये परे रभेर्नुमागमो भवति। आरम्भयति, आरम्भकः, आरम्भि, साध्वारम्भी, आरम्भमारम्भ, आरम्भो वर्तते। अनबणबादाविति किम्? आरभते, आरेभे। स्वर इति किम्? आरब्धः, आरब्धवान्।

२६. लभेः।

अब्वर्जिते णबादिवर्जिते च स्वरादौ प्रत्यये परे लभेर्नुमागमो भवति। लम्भयति, लम्भकः, साधुलम्भी, लम्भो वर्तते। अनबणबादाविति किम्? लभते, लेभे। लभेः परस्मैपदस्याऽपि अभिधानात् लभन्ती स्त्रीति केचित्। स्वर इति किम्? लब्धा। योगविभाग उत्तरार्थः।

२७. आङो यि।

आङः परस्य लभतेर्यकारादौ प्रत्यये परे नुमागमो भवति। आलम्भ्या गौः, आलम्भ्या वडवा। आङ इति किम्? लभ्यः। यीति किम्? आलब्धा।

२८. उपात् प्रशंसायाम्।

उपात्परस्य लभतेर्यकारादौ प्रत्यये परे प्रशंसायां नुमागमो भवति। उपलम्भ्या विद्या भवता। उपलम्भ्यं

शीलम् । प्रशंसायामिति किम् ? उपलभ्या वार्ता । उपलभ्यमस्माद् वृषलात् किंचित् ।

२६. ञिणमोर्वा ।

णौ णमि च परे लभेर्नुमागमो वा भवति । अलाभि, अलम्भि । लाभलाभं, लम्भलम्भम् ।

३०. उपसर्गात् खल्घञोश्च ।

उपसर्गात् परस्य लभेर्नुमागमो भवति खल्घञोश्चकारात् णि, णम्—इत्येतयोश्च परयो । खल्—ईषत्प्रलम्भ, ईषदुपलम्भ, दुष्प्रलम्भ, सुप्रलम्भम् । घञ्—प्रलम्भः, उपलम्भ , विलम्भ । णि—प्रालम्भि । णम्—प्रलम्भंप्रलम्भम् । उपसर्गादिति किम् ? ईषल्लभः, लाभो वर्तते । णिणमोर्नित्यार्थमुपसर्गादेव खल्घञोरिति नियमार्थं वचनम् ।

३१. सुदुर्भ्यः ।

सु, दुर्—इत्येताभ्यां व्यस्ताभ्यां समस्ताभ्यां चोपसर्गात् पराभ्यां परस्य लभतेर्नुमागमो भवति खल्घञो परयो । खल्— अतिसुलम्भं, अतिदुर्लम्भम् । घञ्—अतिसुलम्भः, अतिसुदुर्लम्भ । उपसर्गादिति किम् ? सुलभं, दुर्लभं, सुदुर्लभ, सुलाभ, दुर्लाभ , सुदुर्लाभ । अतिसुलभ, अतिदुर्लभ, इत्यते पूजातिक्रमयोरनुपसर्गत्वात् । उपसर्गादेव सुदुर्भ्य इति नियमार्थं वचनम् । बहुवचनं व्यस्तसमस्तपरिग्रहार्थम् ।

३२. इदितः ।

इदितो धातोर्नुमागमो भवति । नन्दति, निन्दति, नन्दित , निन्दित, कुण्डिता, हुण्डिता । अयं च नुम् उपदेशावस्थायामेव भवति अनैमित्तिकत्वात्, तेन कुण्डा, हुण्डा इत्यादौ **'क्तेटो गुरोर्व्यञ्जनात्'** [५/४/१०२] इति अप्रत्ययः सिद्धो भवति ।

३३. यन्योतो लोपः ।

धातोरोकारस्य लोपो भवति यनि प्रत्यये परे । दोत्—अवद्यति । षोत्—अवस्यति । शोत्—निश्यति । छोत्—अवच्छ्यति । यनीति किम् ? गौरिवाचरति—गवति ।

३४. शमसप्तकस्य दीर्घः ।

शमादीनां मदीपर्यन्तानां सप्तानां दीर्घो भवति यनि परे । शाम्यति, दाम्यति, ताम्यति, श्राम्यति, भ्राम्यति, क्षाम्यति, माद्यति । शमसप्तकस्येति किम् ? अस्यति । यनीति किम् ? भ्रमति ।

३५. ष्ठिवुसिवोरनटि वा ।

अनटि प्रत्यये परे ष्ठिवु, षिवु—इत्येतयोर्धात्वो दीर्घो वा भवति । निष्ठीवन, निष्ठेवनम् । सीवन, सेवनम् ।

३६. क्रमेः क्त्वि झसे ।

क्रमेर्धातोर्वा दीर्घो भवति झसादौ क्त्वाप्रत्यये परे । क्रान्त्वा, क्रन्त्वा । झसे इति किम् ? क्रमित्वा । उदित्वाद् वेट् । प्रक्रम्य, उपक्रम्य इत्यत्र **अन्तरङ्गानपि विधीन् यबादेशो बाधते** इति परिभाषया पूर्वमेव यप् ।

३७. अहन्अमस्य हे च क्विक्ङिति ।

चकारात् झसे इत्यनुवर्तते । हन्वर्जितस्य अमान्तस्य धातोः दीर्घो भवति क्वौ हझसादौ च क्ङिति प्रत्यये परे । प्रशान्, प्रतान्, प्रदान् । प्रशामौ, प्रतामौ, प्रदामौ । कमिवाचरति—कामति । शामति, कीमति, इदामति । क्ति—शान्त , शान्तवान्, शान्त्वा, शान्तिः । एवं तान्तः, दान्तः । ङिति—शंशान्हि, शंशान्तः, तंतान्तः, दंदान्तः । अमस्येति किम् ?

ओदनपक्, पक्वः, पक्ववान् । अहन्निति किम् ? वृत्रहणि, भ्रूणहनि । क्विब्ङितीति किम् ? गन्ता, रन्ता । हझसे इति किम् ? यम्यते, ययम्यते । कश्चित् तु आचारक्वौ दीर्घत्वं नेच्छति । कमिवाचरति—कमति । एवं शम्—शमति । किम्—किमति । इद—इदमति ।

३८. च्छ्वोः शूटौ ऽमे च ।

चकारः क्वौ हझसादौ चेत्यनुकर्षणार्थः । ङ्कितीति तु इह चाग्रे नानुवर्तते, **'यमिरमिनमि…'** [४/३/४१] इति सूत्रे तद्ग्रहणात् । अमादौ क्वौ हझसादौ च प्रत्यये धातोश्छकारवकारयोः यथासख्यं श्, ऊट्—इत्येतावादेशौ भवतः । प्रश्नः, विश्न । छस्य द्विःपाठात् द्वयोरपि शकारः । क्वि—शब्दप्राट्, शब्दप्राशौ । गोविट्, गोविशौ । झस—पृष्टः, पृष्टवान्, प्रष्टा, प्रष्टुम् । वस्य ऊट्—स्योमा, स्योन । सिवेर्मनि प्रत्यये औणादिके च ने लघूपधगुणात् पूर्वं नित्यत्वात् ऊट् क्रियते । तस्मिन् कृतेऽल्पापेक्षत्वेन अन्तरङ्गत्वाद्यत्व न तु गुणः[१] । क्विप्—अक्षद्यूः, हिरण्यद्यूः । **असिद्धं बहिरङ्गमन्तरङ्गे** इति स्वरानन्तर्ये नेष्यते, तेन यत्व भवति । ह—देद्यूहि । झस—द्यूत, द्यूतवान्, दुद्यूषति । केचिद् वन्क्वनिपोरूड्विकल्पेन सुस्योवा, सुस्यूवा, सुसेवा, सुसिन्वा इत्यपि मन्यन्ते । धातोरिति किम् ? दिवेरौणादिकडिव्प्रत्ययान्तस्य द्युभ्या, द्युभि । यदा तु दिवेः क्विप् तदा धातुत्वात् द्यूभ्या द्यूभिरिति । यङ्लुकि तु देद्योति, देद्योषि, सेष्योति, सेष्योषि, देद्यूत, सेष्यूतः । अन्ये तु देदेति, देदेषि, सेसेति, सेसेषि इत्येव इच्छन्ति । तन्मतपरिग्रहार्थं ङ्कितीत्यनुवर्तनीयम्[२] । शराज्भ्राज्यजादिसूत्रे च च्छग्रहणं विधेयम् । टकारः **'ऊटि'** [१/२/२५] इत्यत्र विशेषणार्थः ।

३९. ज्वरि-त्वरि-श्रिव्यवि-मवामुपधया च ।

चकारो अमादौ क्वौ हझसादौ च इति सर्वानुकर्षणार्थः । शकारस्थानी छ इह न सम्भवतीत्यूडेवानुवर्तते । एषां अमादौ क्वौ हझसादौ च प्रत्यये वकारस्य उपधासहितस्य ऊडादेशो भवति । ज्वर्—जूर्मा । जूः, जूरौ, जूरः । जाजूर्हि । जूर्ति, जाजूर्ति, जाजूर्त । त्वर्—तूर्मा । तूः, तूरौ, तूरः । तूर्ण, तूर्णवान्, तूर्तिः, तातूर्ति, तातूर्तः । श्रिव्—श्रोमा । श्रूः, श्रुवौ, श्रुवः । श्रूतः, श्रूतवान्, श्रूतिः, शेश्रोति, शेश्रूतः । अव्—ओम्, औणादिको म् । ओमा । ऊः, उवौ, उवः । ऊतिः । मव्—मोमा । मूः, मुवौ, मुवः । मामूहि । मूतिः, मामोति, मामूतः । ज्वरत्वरोरुपधा वकारात् परा, श्रिव्यविमवां तु पूर्वा ।

४०. राल्लोपः ।

रेफात् परयोर्धातोश्छकारवकारयोर्लोपो भवति अमादौ क्वौ हझसादौ च प्रत्यये परे । शूटोऽपवादः । मुर्छा — मोर्मा । मूः, मुरौ, मुरः । मामूर्हि । मूर्तः, मूर्तवान्, मूर्ति, मोमोर्ति । हुर्छा—होर्मा । हूः, हुरौ, हुरः । हूर्णः, हूर्णवान्, हूर्तिः, जोहोर्ति । तुर्वी—तोर्मा । तूः, तुरौ, तुरः । तूर्णः, तूर्णवान्, तूर्ति । धुर्वी—धोर्मा । धूः, धुरौ, धुरः । धूर्ण, धूर्णवान्, धूर्ति । धूर्त इति तु औणादिकः । अमादाविति किम् ? मूर्छा, तूर्विता ।

४१. यमि-रमि-नमि-गमि-हनि-मनि-वनति-तनादेः ङ्किति ।

हझस इत्यनुवर्तते । यम्यादीनां वनतेस्तनादीनां च धातूनामन्तस्य लोपो भवति हझसादौ ङ्किति प्रत्यये परे । यंयहि, यतः, यतवान्, यत्वा, यति । ररहि, रतः, रतवान्, रत्वा, रतिः । ननहि, नतः, नतवान्, नत्वा, नतिः । जगहि, गतः, गतवान्, गत्वा, गतिः । हत, हतवान्, हत्वा, हतिः, आहत, आहथा । मनीति मन्यतेर्ग्रहण मनोतेस्तनादित्वेन सिद्धत्वात् । मतः, मतवान्, मत्वा, मतिः । वति । वनते क्तक्तवतू नोदाहृतौ सेट्त्वात् झसादावभावात् । क्तौ तु नियमान्नेट्[३] । तिकि तु प्रतिषेधं वक्ष्यति । तनादि—तत, ततवान्, तत्वा, ततिः । सनोतेरात्वं वक्ष्यति । क्षणुन्—क्षतः, क्षतवान्, क्षत्वा, क्षतिः । ऋणुन्—ऋतः, ऋतवान् । तृणुन्—तृत, तृतवान् । घृणुन्—घृतः, घृतवान् । वनुङ्—वतः, वतवान् । मनुङ्—मतः,

---

१. इकारस्य ।

२. तर्हि प्रष्टा इत्येतत् छस्य शत्वाऽभावे 'शराज्भ्राज्…' [२/१/११७] इत्यादिना षत्वाऽभावे न सेत्स्यतीत्याह, तत्र च्छग्रहणं विधेयम् ।

३. 'ग्रहादिभ्यस्तेः' [४/३/७०] इति ।

मतवान् । एषामिति किम् ? शान्तः, दान्तः । तिब्मणनिर्देशाद्यङ्लुकि न भवति । ववान्तः, तंतान्तः । अन्यत्र भवति । यंयतः, रंरतः, नंनतः, जंगतः, जंघतः, मंमतः । क्ङितीति किम् ? यन्ता, रन्ता । हृझसादाविति किम् ? यम्यते, यंयम्यते ।

४२. यपि ।

एषां पूर्वोक्तानां धातूनामन्तस्य लोपो भवति यपि परे । **'मो वा'** [४/३/४३] इति **वक्ष्यमाणवचनात्** नान्तानामेवायं विधिः । प्रहत्य, प्रमत्य, प्रवत्य, प्रतत्य, प्रसत्य, प्रक्षत्य । यपीति किम् ? हन्यते, वन्यते, तन्यते ।

४३. मो वा ।

एषां पूर्वोक्तानां मकारान्तानां धातूनां यपि परेऽन्तस्य लोपो वा भवति । प्रयत्य, प्रयम्य । विरत्य, विरम्य । प्रणत्य, प्रणम्य । आगत्य, आगम्य । एषामिति किम् ? उपशम्य ।

४४. गमां[1] क्वौ ।

एषां गमादीनां यथादर्शनं क्वौ परेऽन्तस्य लोपो भवति । जनं गच्छति—जनगत् । कलिङ्गगत् । यम्—संयत्, वियत् । तन्—परीतत्, उपातत् । सन्—सुसत् । मन्—सुमत् । वन्—सुवत् । क्षण्—सुक्षत्, विक्षत् । अग्रे गुरिति औणादिको डुः । गमादयः प्रयोगानुसर्तव्याः ।

४५. न तिकि दीर्घश्च ।

एषां पूर्वोक्तानां धातूनां तिकि प्रत्यये परे अन्तस्य लोपो दीर्घश्च न भवति । यन्तिः, रन्तिः, नन्तिः, गन्तिः, हन्तिः, मन्तिः, वन्तिः, तन्तिः । क्षणिति लाक्षणिकोऽयं णकारः, तेन क्षन्तिरिति[2] भवति । अन्यस्तु औपदेशिकोऽयं इति मन्यते, तन्मते क्षण्टिः । अन्तलोपे प्रतिषिद्धे **'अहनुपञ्चमस्य...'** [४/३/३७] इत्यादिना दीर्घत्वं प्राप्तं, तदपि प्रतिषिध्यते । एषामिति किम् ? शान्तिर्भगवान् । तिकीति किम् ? यतिः, रतिः, ततिः ।

४६. जनसनखनामाः ।

क्ङिति हृझस इत्यनुवर्तते । एषां धातूनां हृझसादौ क्ङिति प्रत्यये परे आकारोऽन्तादेशो भवति । जन्—जंजाहि, जातः, जातवान्, जात्वा, जातिः । सनिति षणुव् दाने वनषन सम्भक्तौ वा । ससाहि, सातः, सातवान्, सात्वा, सातिः । खन्—चखाहि, खातः, खातवान्, खात्वा, खातिः । क्ङितीति किम् ? जजन्ति, ससन्ति, चंखन्ति ।

४७. सनि ।

जनादीनां धातूनां झसादौ सन्प्रत्यये परे आकारोऽन्तादेशो भवति । सिषासति । जनूखनोरिटा भवितव्यमिति झसादि सन्न भवति । झस इति किम् ? सिसनिषति । **'इवन्तर्ध...'** [४/३/६६] इति वेट् । क्ङितीत्यसंभवादिह न संबध्यते ।

४८. ये वा ।

जनादीनां धातूनां यकारादौ क्ङिति प्रत्यये परे आकारोऽन्तादेशो वा भवति । जायते, जन्यते । जाजायते, जंजन्यते । प्रजाय, प्रजन्य । यनि तु **'ज्ञाजनोर्जा:'** [४/३/१६] इति नित्यं जादेशः । जायते । जायात्, जन्यात् । सन्—

---

१. गमादयोऽन्येऽपि बहुलं ज्ञेया न तु **'यमिरमि...'** [४/३/४१] इति सूत्रोक्ता एव, गमादिगणस्य तेभ्यः पृथग्भूतत्वात् । अत एव सूत्रे यमामित्येव नोक्तं रमिनमिहमीनामुदाहरणानि च न दर्शितानि ।

२. नान्तप्रकृतेर्णत्वबाधनाय म्नामिति बहुवचनात् प्रथममेव नकारः । म्नामिति बहुवचनाण्णत्वं कृतमपि क्रमे कर्तव्ये निवर्तते वा । अत्र सूत्रे यमादयो गमादयश्च गृह्यन्ते, न तु अनन्तरसूत्रोक्ताः द्वयोरपि प्राप्तेः संभवात् ।

सायते, सन्यते। सासायते, संसन्यते। प्रसाय, प्रसन्य, प्रसत्य। सायात्, सन्यात्। खन्—खायते, खन्यते। चाखायते, चखन्यते। प्रखाय, प्रखन्य। खायात्, खन्यात्। क्ङितीति किम् ? जन्य, सासन्यम्।

४९. तनो यकि।

तनोतेर्यकि प्रत्यये परे आकारोऽन्तादेशो वा भवति। तायते, तन्यते। यकीति किम् ? तंतन्यते।

५०. सनस्तिकि तौ।

सनेस्तिकि प्रत्यये परे तौ पूर्वोक्तौ लोपाकारौ वा भवतः। पणु—सतिः, सातिः, सन्तिः[1]। षण्—सतिः, सातिः, सान्तिः। 'अहन्मस्य···' [४/३/३७] इति दीर्घः।

५१. वन्यात् अमस्य।

अम्प्रत्याहारान्तस्य धातोर्वनि प्रत्यये परे आकारोऽन्तादेशो भवति। तकार उच्चारणार्थः। जन्—विजावा। खन्—विखावा। क्रम्—दधिक्रावा। गम्—अग्रेगावा। धुण्—ध्वावा। घूर्ण—घूरावा। ओणृ—अवावा। इवि—व्याप्तौ च। वनि 'य्वोः पुगयहसे' [४/४/८९] इति वलोपे नकारस्यात्वे यावा। पुनराग्रहणं ताविति वेति च निवृत्त्यर्थम्।

५२. कृतः कीर्त्।

कृतण् इत्येतस्य धातोः कीर्त् इत्ययमादेशो भवति। कीर्तयति, कीर्तयतः, कीर्तयन्ति। कीर्तिः। कृत ॠदुपदेशः अचीकृतदित्यत्र ॠकारश्रवणार्थः[2]।

५३. ॠतां क्ङितोर्।

ॠकारान्तस्य धातोः किति ङिति च प्रत्यये परे निर्देशात् ॠकारस्यैव[3] स्थाने इरित्ययमादेशो भवति। तीर्णः, तीर्णवान्। दीर्णः, दीर्णवान्। आस्तीर्णः, विशीर्णः। ङिति—किरति, गिरति। ॠ ॠदिति ॠकारप्रश्लेषात् लाक्षणिकस्यापि ग्रहणं भवति। चिकीर्षति, जिहीर्षति। क्ङितीति किम् ? तरति, तरतः, तरन्ति।

५४. पुवादुर्।

पूर्वमनुवर्तते। धातोः पवर्गाद् वकाराच्च परस्य ॠकारस्य उरादेशो भवति क्ङिति परे। पूर्वापवादः। पूर्तः, पूः, पुरौ, पुरः, पोपूर्यते, पोपुरति, पुपूर्षति, बुभूर्षति, मुमूर्षति, वुवूर्षति, सुस्वूर्षति। पुवादिति किम् ? तीर्णम्। धातोरिति विशेषणादिह न भवति—समीर्णम्। क्ङितीति किम् ? पिपर्ति, निपरणं, निपारकः, वरिता, प्रावरणं, प्रावारकः।

५५. सतादेरशितोऽत्रोणादेरिट्।

धातोः परस्य सकारादेस्तकारादेश्चाऽशितः प्रत्ययस्य इडागमो भवति न तु त्रस्य उणादेश्च। अलविष्ट, लविषीष्ट, लविष्यति, अलविष्यत्, अटिटिषति, लविता, लवितव्यं, लवितुम्। सतादेरिति किम् ? त्रस्नुः, स्योमा, भूयात्, दीप्रः, ईश्वरः, विद्वान्। अशित इति किम् ? आस्से, आस्ते। अत्रोणादेरिति किम् ? शस्त्र, योत्र, पोत्रं, पत्त्रम्। उणादि—वत्सः, अंसः, दन्तः, हस्तः।

---

१. गमादित्वात् 'अहन्मस्य' [४/३/३७] इति प्राप्तोऽपि दीर्घो 'न तिकि दीर्घश्च' [४/३/४५] इति न भवति।

२. अयमर्थः धातुपाठे कीर्त्तणिति पठयता किं अनेन ? इति आह—ॠकारश्रवणार्थ इति। यतः ॠदुवर्णस्य इत्यत्र वर्णग्रहणसामर्थ्यात् कीदादेशो बाध्यते। ननु कृतणित्यत्र ॠकारमपनीय ऋकार एव क्रियताम्। एवं च ॠवर्णस्य इत्यत्रापि वर्णग्रहणं न कार्यं भवेत्। सत्यम्। कृत इति निर्देशे कृते तु कृतीज् वा गृह्यते इति संदेहः स्यात्।

३. न तु अनेकवर्णत्वेऽपि सर्वस्येति।

५६. स्वरतिसूतिसूयतिधूनूदितो वा ।

स्वरत्यादिभ्य ऊदिद्भ्यश्च धातुभ्य. परस्य सकारादेस्तकारादेश्चाऽशित. प्रत्ययस्य इडागमो वा भवति न तु त्रस्य उणादेश्च । स्वृं—स्वर्ता, स्वरिता । सिस्वूर्षति, सिस्वरिषति । षूङ् अदादौ दिवादौ च । सोता, सविता । प्रसोता, प्रसविता । धून्—धोता, धविता । ऊदित् गुपू—गोप्ता, गोपिता । गाहू—गाढा, गाहिता । रधूच्—रद्धा, रधिता । तृपूच्—तर्प्ता, त्रप्ता, तर्पिता । दृपूच्—द्रप्ता, दर्प्ता, दर्पिता । नशूच्—नष्टा, नशिता । मुहूच्—मोग्धा, मोढा, मोहिता । द्रुहूच्—द्रोग्धा, द्रोढा, द्रोहिता । स्नुहूच् —स्नोग्धा, स्नोढा, स्नोहिता । सतादेरशित इति किम्? ररन्धिथ । ररन्धिव, ररन्धिम । अन्यस्त्वत्रापि विकल्पमिच्छति । ररद्ध, ररन्धिथ । रेध्व, ररन्धिव । रेध्म, ररन्धिम । अत्रोणादेरिति किम् ? अशूङ्त्—अक्षरम् । तिब्निर्देशादनुबन्धनिर्देशाच्च यङ्लुकि नित्यमिट् । सरीस्वरिता, जोगूहिता । सूतिसूयत्योर्गणनिर्देश पूज् प्रेरणे इत्यस्य निवृत्त्यर्थं । सविता । धूनिति सानुबन्धनिर्देशो धूञ् विधूनने इत्यस्य निवृत्त्यर्थ. । धुविता । स्वरत. स्यत्यादावपि **'हनृत: स्यस्य'** [४/३/७५] इति परत्वान्नित्यमिट् । स्वरिष्यति । स्वृषूधूना **'ऋवर्णश्र्यूर्णुन: कित:'** [४/३/८६] इति **'उवर्णात्'** [४/३/८७] इति च परत्वात् किति नित्यमिट्प्रतिषेध. । स्वृत्वा, सूत्वा, धूत्वा । एके तु चायिस्फायिप्यायीनामपि विकल्पमिच्छन्ति । निचाता, निचायिता । निचिचासति, निचिचायिषति इत्यादि । अपर: पठति—नातिक्रंस्यति, नातिक्रमिष्यति । अन्यस्तु सिचि आस्कान्दिपम्, आस्कान्त्सामितीच्छति । बहुलमेकेषां[1] विकल्प: । पक्ता, पचिता । आस्कन्तव्य, आस्कन्दितव्यम् । पट्टा, पटिता । तदेवं व्यवस्थितविभाषाविज्ञानाद् **आगमशासनमनित्यमिति** न्यायाच्च विचित्रमतयो वैयाकरणा: ।

५७. निष्कुष: ।

निर्निस्संबद्धात् कुष: परस्याऽशित. सताद प्रत्ययस्य इडागमो वा भवति । निष्कोष्टा, निष्कोषिता । निष्कोष्टु, निष्कोषितुम् । निष्कोष्टव्य, निष्कोषितव्यम् । निष्पूर्वनियमात् केवलादन्यपूर्वाच्च नित्य एवेट् । कोषिता, प्रकोषिता । निर्निस्संबद्धात् कुष इति किम् ? निर्गता कोषितारोऽस्मान्निष्कोषितृको देश इति नित्यमिट् । योगविभाग उत्तरार्थ: ।

५८. क्तयो: ।

निष्कुष: परयोरशितो. क्तक्तवत्वोरिडागमो भवति । निष्कुषित., निष्कुषितवान् ।

५९. कृत-चृत-नृत-छृद-तृदोऽसिज्सादेर्वा ।

एभ्य परस्य सिज्वर्जितस्य सकारादे सतादेरशित.[2] प्रत्ययस्य इडागमो वा भवति । कृतीज् छेदने, कृतीर् सवेष्टने वा—कर्त्स्यति, कर्तिष्यति । अकर्त्स्यत्, अकर्तिष्यत् । चिकृत्सति, चिकर्तिषति । चृत्—चर्त्स्यति, चर्तिष्यति । अचर्त्स्यत्, अचर्तिष्यत् । चिचृत्सति, चिचर्तिषति । नृत्—नर्त्स्यति, नर्तिष्यति । अनर्त्स्यत्, अनर्तिष्यत् । निनृत्सति, निनर्तिषति । छृद्—छर्त्स्यति, छर्दिष्यति । अच्छर्त्स्यत्, अच्छर्दिष्यत् । चिच्छृत्सति, चिच्छर्दिषति । तृद्—तर्त्स्यति, तर्दिष्यति । अतर्त्स्यत्, अतर्दिष्यत् । तितृत्सति, तितर्दिषति । सादेरिति किम् ? कर्तिता, चर्तिता, नर्तिता, छर्दिता, तर्दिता । असिच इति किम् ? अकर्तीत्, अचर्तीत्, अनर्तीत्, अच्छर्दीत्, अतर्दीत्, । प्राप्ते विभाषा ।

६०. गमोऽनात्मने ।

गम: परस्य सकारादे: सतादेरशित: प्रत्ययस्य इडागमो भवति आत्मनेपद[3] चेन्न भवति । गम इति आदेशस्याऽनादेशस्य च ग्रहणमविशेषात् । गम्लृ—गमिष्यति, अगमिष्यत्, जिगमिषति, जिगमिषितुं, जिगमिषिता,

---

१. सर्वेषां धातूनामित्यर्थ: ।

२. सादेरित्येव सिद्धे सतादेरनुवर्तनमुत्तरार्थम् ।

३. आत्मनेपदविषयस्याऽविषयस्य च आत्मनेपदाऽभावे भवतीति ।

सजिगमिषितु, संजिगमिषिता, संजिगमिषितव्यम्। इण्क्—जिगमिषति ग्राम, जिगमिषु। इक्—अधिजिगमिषति मातु, अधिजिगमिषु। इङ्क्—अधिजिगमिषिता, शास्त्रस्य, अधिजिगमिषु, अधिजिगमिषितव्यम्। इङो नेच्छन्त्येके। अधिजिगांसिता, अधिजिगांसु, अधिजिगासितव्यम्। अनात्मने इति किम्? गस्यते[1] ग्राम., सगस्यते वत्सो मात्रा, गस्यमान सगस्यमान, अगंस्यत, समगस्यत, सगंसीष्ट, सजिगसते, सजिगसमान., सजिगंसिष्यते, सजिगसिष्यमाण:, अधिजिगांसते, अधिजिगासमान, अधिजिगांस्यते, अधिजिगासिष्यते, अधिजिगांसिष्यमाण। इणिको—जिगांस्यते, सजिगास्यते, अधिजिगांस्यते माता। कथ जिगमिषितेवाचरति जिगमिषित्रीयते इति? आत्मनेपदस्य क्यङाश्रितत्वेन बहिरङ्गत्वात्। केचित्तु आत्मनेपदविषयस्य गमेरात्मनेपदाऽभावे सति इटो विकल्पमिच्छन्ति। गम्लृ—सजिगसिता, सजिगमिषिता। सजिगसितव्य, सजिगमिषितव्यम्। इङ्क्—अधिजिगांसिता, अधिजिगमिषिता। अधिजिगासितव्य, अधिजिगमिषितव्यम्। अनात्मनेपदनिमित्तात् तु गमेर्नित्यमिटमिच्छन्ति। गमिष्यति, जिगमिषतीति। जिगमिषितु, अधिजिगमिषितु, अधिजिगमिषितव्य इत्यत्रापि गमेरनात्मनेपदविषयत्वान्नित्यमिड् भवति। एके तु परस्मैपदविषयस्यैव गमेरिटमिच्छन्ति, नात्मनेपदविषयस्य। तन्मते सजिगसिता, सजिगसितव्य, अधिजिगसिता[2] अधिजिगसितव्य इत्येव भवति।

६१. स्नोः।

योगविभागात् सादेरिति निवृत्तम्। सतादेरिति तु प्रवाहतोऽनुवर्तत एव। स्नो परस्य सतादेरशित प्रत्ययस्य इडागमो भवति आत्मनेपद चेन्न भवति। प्रस्नविष्यति, प्रस्नविता, प्रस्नवितासि, प्रस्नवितास्मि, प्रस्नवितु, प्रस्नवितव्यम्। प्रसुस्नूषति इत्यत्र **'ग्रहगुहश्च सनः'** [४/३/८८] इत्यनेन इट्प्रतिषेध। अनात्मने इति किम्? प्रस्नोष्यते, प्रस्नोष्यमाण., प्रास्नोष्यत, प्रस्नोषीष्ट, प्रास्नोष्ट, प्रस्नोता, प्रस्नोतासे, प्रस्नोताहे। प्रस्नवितेवाचरति—प्रस्नवित्रीयते इत्यत्र त्वात्मनेपदस्य बहिरङ्गत्वात् तदाश्रय प्रतिषेधो न भवति। स्नौतेरिट् सिद्ध एव, प्रतिषेधाभावादात्मनेपद इडऽनिवृत्त्यर्थ तु वचनम्। एवमुत्तरयोगोऽपीति।

६२. क्रमः।

क्रम परस्य सतादेरशितः प्रत्ययस्य इडागमो भवति आत्मनेपद चेन्न भवति। क्रमिष्यति, निरक्रमीत्, क्रमितासि, चिक्रमिषति, चिक्रमिषिता, चिक्रमिषितु, प्रक्रमितु, प्रक्रमितव्यम्। अनात्मने इति किम्? प्रक्रस्यते, प्रक्रस्यमान., उपक्रस्यते, उपक्रस्यमान, प्रक्रन्ता[3], उपक्रन्ता, प्रक्रन्तासे, उपक्रन्तासे, प्रक्रसीष्ट, उपक्रसीष्ट, प्राक्रस्त, उपाक्रस्त, प्राक्रस्यत, उपाक्रस्यत, प्रचिक्रसत, उपचिक्रसते, प्रचिक्रंसिष्यते, उपचिक्रसिष्यते। क्रमितेवाचरति—क्रमित्रीयते इति पूर्ववत् इड् भवति। कथ **'चिक्रंसया कृत्रिमपत्रिपङ्क्तेः'** [शिशुपालवधमहा० ३/५१] इत्यत्र इडऽभावः? गतानुगतिक एष पाठ.। जिघृक्षया कृत्रिमपत्रिपङ्क्तेरिति तु अविगान[4] पाठ।

६३. तुः।

अनात्मनेपदविषयात् क्रम परस्य तृचस्तृनश्च सतादेरशित प्रत्ययस्य इडागमो भवति। अनात्मन इति प्रकृतिविशेषणमऽत्रान्यथा व्यवच्छेद्याऽभावात्[5]। क्रमिता[6], निष्क्रमिता। आत्मनेपदविषयश्च क्रमि. क्रियाव्यतिहारवृत्त्यादिषु

---

१. गंस्यते ग्राम. इत्यारभ्य सजिगंसिष्यमाणः इति यावत् गम्लृ इत्येतस्य रूपाणि। तत्र निरुपसर्गस्य भावे कर्मणि चात्मनेपद संपूर्वस्य तु **'समो गमृच्छि…'** [३/३/७६] इत्यनेन कर्तरि।

२. इक् स्मरणे इत्यस्य रूपमेतत्। तन्मते इङादेशस्यैव गमे. सनि दीर्घत्वादिह दीर्घाऽभावः।

३ **'प्रोपाभ्यारम्भे'** [३/३/५०] इत्यात्मनेपदम्।

४. शोभनः।

५. प्रत्ययविशेषणे सति।

६. **'अनुपसर्गाद् वा'** [३/३/५१] इति विकल्पेनात्मनेपदविषयत्वात् क्रन्ता इत्यपि।

प्रोपव्याङ्पूर्वश्च आरम्भादिषु[1] भवति। अनात्मने इति किम्? व्यतिक्रन्ता, पराक्रन्ता, प्रक्रन्ता, उपक्रन्ता, विक्रन्ता, आक्रन्ता।

६४. न वृद्भ्यः।

वृतुङ्, स्यन्दूङ्, वृधुङ्, शृधुङ्, कृपूङ्—वृत्। एते पञ्च वृतादय। वृत्करण द्युतादिवृतादिपरिसमाप्त्यर्थम्। एभ्य परस्य सतादेरशित प्रत्ययस्य इडागमो न भवति, आत्मनेपदनिमित्त चेद् वृतादयो न भवन्ति। अनात्मनेपदनिमित्त च वृतादयः स्यसनोस्तादौ[2] च कृपिविकल्पेन भवन्ति। वृत्—वर्त्स्यति, अवर्त्स्यत्, विवृत्सति, विवृत्सिता, विवृत्सितुं, विवृत्सितव्य, विवृत्स। स्यन्द्—स्यन्त्स्यति, अस्यन्त्स्यत्, सिस्यन्त्सति, सिस्यन्त्सिता, सिस्यन्त्सितु, सिस्यन्त्सितव्यम्। वृधेर्वृतिवद्रूपाणि। शृध्—शर्त्स्यति, अशर्त्स्यत्, शिशृत्सति, शिशृत्सितु, शिशृत्सिता, शिशृत्सितव्यम्। कृप्—कल्प्स्यति, अकल्प्स्यत्, चिक्लृप्सति, चिक्लृप्सिता, चिक्लृप्सितु, चिक्लृप्सितव्यम्। कल्प्ता, कल्प्तारौ, कल्प्तार। कल्प्तासि, कल्प्तास्थ., कल्प्तास्थ। कल्प्तास्मि, कल्प्तास्व, कल्प्तास्म। स्यन्दिकृपोरूदिल्लक्षणो विकल्प परत्वादनेन बाध्यते। अनात्मने इति किम्? वर्तिता, कल्पितव्यम्। स्यादावप्येषां[3] पाक्षिकत्वात् आत्मनेपदनिमित्तत्व यत्र तत्रेड् भवत्येव। वर्तिष्यते, अवर्तिष्यत, विवर्तिषते, विवर्तिषितु, विवर्तिषितव्यमित्यादि। स्यन्दिकृपोरूदित्वाद् विकल्प। स्यन्त्स्यते, स्यन्दिष्यते। कल्प्स्यते, कल्पिष्यते इत्यादि। विवृत्सितेवाचरति—विवृत्सितीयते इत्यादौ तु पूर्ववत् प्रतिषेध.। एक तु 'वृद्भ्यः स्यसनोः' [३/३/९९] 'कृपस्तादौ' [३/३/१००] चात्मनेपदाभावे इट्प्रतिषेधमिच्छन्ति। तन्मते विवृत्सिता, विवृत्सितु, विवृत्सितव्य इत्यादौ अनात्मनेपदनिमित्तत्वाभावपक्षेऽपि[4] इट् न भवति।

६५. इच्छ-सह-लुभ-रुष-रिषस्तादेर्वा।

इच्छादिभ्य. परस्य तकारादेरशित. प्रत्ययस्य इडागमो वा भवति। एष्टा, एष्टु, एष्टव्यम्। एषिता, एषितु, एषितव्यम्। इच्छेति निर्देशात् इषज् इच्छाया इत्यस्य ग्रहणम्। इषच् गतौ, इषश् आभीक्ष्ण्ये इत्यनयोस्तु नित्यमेवेट्। सह—सोढा, सोढु, सोढव्यम्। सहिता, सहितु, सहितव्यम्। लुभ—लोब्धा, लोब्धु, लोब्धव्यम्। लोभिता, लोभितु, लोभितव्यम्। रुष्—रोष्टा, रोष्टुं, रोष्टव्यम्। रोषिता, रोषितु, रोषितव्यम्। रिष्—रेष्टा, रेष्टु, रेष्टव्यम्। रेषिता, रेषितु, रेषितव्यम्। तादेरिति किम्? एषिष्यति, सहिष्यते, लोभिष्यति। कश्चित्तु पठति सूत्र अशिभृन्स्तुशुचिवस्तिभ्य-स्तकारादौ वेट्। अष्टा, अशिता। भर्ता, भरिता। स्तोता, स्तविता। शोक्ता, शोचिता। वस्ता, वसिता। तथा रुनुसुदुभ्योऽपि अणबादावेवेट्। रोता, रविता। नोता, नविता। सोता, सविता। दोता, दविता। अणबादाविति किम्? रुरुविम, नुनुविम, सुसुविम, दुदुविम। तथा विषर्मूलफलकर्मण्यऽणबादाविड् वा। वेष्टा, वेषिता मूलानि फलानि वा। अन्यत्र सवेष्टा। अणबादाविति किम्? सविविषिमेति।

६६. इवन्तर्ध-भ्रस्ज-दम्भ-श्रि-स्वृ-यूर्णु-भर-ज्ञपि-सनि-तनि-पति-दरिद्रा-वृद्भ्यः सनः।

इवन्तेभ्य ऋधादिभ्य ॠदन्तेभ्यश्च धातुभ्य परस्य सन्प्रत्ययस्य इडागमो वा भवति। इवन्त—दुद्यूषति, दिदेविषति। मुस्यूषति, सिसेविषति ऋध्—ईर्त्सति, अर्दिधिषति। भ्रस्ज्—बिभ्रक्षति, बिभर्क्षति। बिभर्जिषति, बिभ्रज्जिषति। दम्भ—धिप्सति, धीप्सति, दिदम्भिषति। श्रि—शिश्रीषति, शिश्रयिषति। स्वृ—सिस्वरिषति, सुस्वूर्षति। यु—युयूषति, यियविषति। ऊर्णु—प्रोर्णुनूषति, प्रोर्णुनुविषति, प्रोर्णुनविषति। भर—बुभूर्षति, बिभरिषति। अब्निर्देशो यङ्लुको बिभर्तेश्च निवृत्त्यर्थं। बुभूर्षति। बिभर्तेरपीच्छन्त्येके, इडऽभावपक्षे गुणमपि[5]। बिभर्षति, बिभरिषति।

---

१. आदिपदाद् विपूर्वस्य स्वार्थे आङ्पूर्वस्य तु ज्योतिरुद्गमने।

२. 'वृद्भ्यः स्यसनोः' [३/३/९९] 'कृपस्तादौ' [३/३/१००] इति सूत्राभ्याम्।

३ स्यसनि तादौ चेत्यर्थः।

४. अत्र हि प्रकृतिरात्मनेपदविषया।

५. स्वमते तु 'गमिनोऽनिड् सन्' [३/४/११२] इति किल्वम्।

तन्मतसंग्रहार्थं कृतगुणस्य भृनो निर्देशः, तेन इडभावपक्षेऽपि गुणो भवति । ज्ञपिरिति ह्रस्वस्योपादानाद् ज्ञपण् ज्ञानज्ञापनयोरित्यस्य, मारणतोषणनिशानार्थस्य ज्ञाणश्च ग्रहणम् । ज्ञीप्सति । पक्षे ज्ञानज्ञापनार्थस्य ज्ञपेर्नियोगार्थस्य ज्ञाणश्च । जिज्ञापयिषति । मारणाद्यर्थस्य तु ज्ञाणो ह्रस्वत्वाद् जिज्ञपयिषति । सनीति सनतेः सनोतेश्च ग्रहणम् । सिषासति, सिसनिषति । तन्—तितंसति, तितांसति, तितनिषति । पत्—पित्सति, पिपतिषति । दरिद्रा—दिदरिद्रासति, दिदरिद्रिषति । वृ इति वृन्वृङोर्ग्रहणम् । प्रावुवूर्षति, प्राविवरिषति, प्राविवरीषति । वुवूर्षते, विवरिषते, विवरीषते । ॠदन्त—तितीर्षति, तितरिषति, तितरीषति । आतिस्तीर्षति, आतिस्तरिषति, आतिस्तरीषति । चिकीर्षति इत्यत्र तु लाक्षणिकत्वान्न भवति । इवन्तेत्यत्र अन्तग्रहणं इवि व्याप्तौ इत्यस्य शङ्कानिरासार्थम् । सन इति किम् ? देविता । यो: **'ग्रहगुहश्च सनः'** [४/३/८८] इति भ्रस्जभृनोस्तु सामान्येन प्रतिषेधेऽन्येषां च नित्यमिटि प्राप्ते विकल्पोऽयम् ।

६७. ऋ-स्मि-पूङ्ञ्जशू-कॄ-गॄ-दृ-धृ-प्रच्छिभ्यः ।

पृथग्योगाद् वेति निवृत्तम् । एभ्यः परस्य सन्प्रत्ययस्य इडागमो भवति । ऋ—अरिरिषति । स्मि—सिस्मयिषते । पूङ्—पिपविषते । अनुबन्धनिर्देशात् पुनोतेः, पुपूषति, पुपूषते । अञ्जू—अञ्जिजिषति । अशू—अशिशिषते । अश्नातेस्तु इड् अस्त्येव । कॄ—चिकरिषति, चिकरीषति । गॄ—जिगरिषति, जिगरीषति । **'वृतोऽव्यावादिपरस्मैसिचि च वा'** । [४/३/७२] इति वा दीर्घः । अन्ये तु व्यवस्थितविभाषया अस्येटो दीर्घत्वं नेच्छन्ति । दृङ्—आदिदरिषते । धृङ्—आदिधरिषते । प्रच्छ—पिपृच्छिषति । प्रच्छसहचरिताः कॄ, गॄ, धृ इत्येते तौदादिकाः, तेन कृणातेश्चिकीर्षति, चिकरिषति, चिकरीषति । गृणातेः—जिगीर्षति, जिगरिषति, जिगरीषति । धरतेर्दिधीर्षतीत्येव भवति । ऋस्मिपूङ्दृधृप्रच्छामऽप्राप्ते शेषाणां विकल्पे प्राप्ते वचनम् ।

६८. रुत्पञ्चकाद्धवसादेः शितः ।

रुदादिभ्यः पञ्चभ्यः परस्य हकारादेर्वसादेश्च शितः प्रत्ययस्य इडागमो भवति । रुदिहि । रोदिति, रुदितः । रोदिषि, रुदिथ । रोदिमि, रुदिव, रुदिम । रोदितु । अरुदिताम् । स्वपिहि । स्वपिति, स्वपितः । प्राणिहि । प्राणिति, प्राणितः । श्वसिहि । श्वसिति, श्वसितः । जक्षिहि । जक्षिति, जक्षितः । पञ्चकादिति किम् ? जागर्ति । हवसादेरिति किम् ? रुद्यात्, स्वप्यात्, रुदन्ति । शित इति किम् ? स्वप्ता ।

६९. ईडीशः सेध्वेस्वध्वमोः ।

ईड्, ईश्—इत्येताभ्यां परयोः तिबादिसेध्वयोर्स्तुबादिस्वध्वमोश्च इडागमो भवति ईड्—ईडिषे, ईडिध्वे । ईडिष्व, ईडिध्वम् । ईश्—ईशिषे, ईशिध्वे । ईशिष्व, ईशिध्वम् । समुदायद्वयापेक्षं द्विवचनम्, तेन स्वसहचरितस्य ध्वमो ग्रहणात् दिबादिध्वमि न भवति । ईडीशो—ऐड्ढ्वम् । णबादिसेध्वयोरामा भाव्यमिति तिबादिसेध्वयोर्ग्रहणम् । वचनभेदो यथासंख्यनिवृत्त्यर्थः ।

७०. ग्रहादिभ्यस्तेः ।

ग्रहादिभ्य एव परस्य तिप्रत्ययस्य इडागमो भवति । तेरिति सामान्येन क्तेस्तिको वा ग्रहणम् । निगृहीतिः, अपस्निहितिः, निकुचितिः, निपठितिः, उदितिः, भणितिः, रणितिः, मथितिः, लिखितिः, कम्पितिः, अन्दोलितिः । आकृतिगणोऽयम् । सतादेरशित इत्यादिनैव सिद्धे नियमार्थं[1] वचनम्, तेन तेर्ग्रहादिभ्य एव नान्यत्र । शान्तिः, वान्तिः, दीप्तिः, ज्ञप्तिः, स्रस्तिः, ध्वस्तिः । तिकः खल्वपि—तन्तिः, सन्तिः, कण्डूतिः । औ—पाक्तिः, याष्टिः, प्रज्ञप्तिः । तेरेव ग्रहादिभ्य इति विपरीतनियमो न भवति । उत्तरत्र ग्रहेर्णबादाविटो दीर्घनिषेधात् ।

---

१ प्राप्तावेवायं नियमस्तेन तेरिति तिपः अप्राप्त इड् न भवति ।

७१. गृह्णोऽणबादौ दीर्घः ।

गृह्णाते विहितस्य इटो दीर्घो भवति न चेत् स इट् णबादौ भवति। ग्रहीता, ग्रहीतु, ग्रहीषीष्ट, ग्रहीष्यति, अग्रहीष्यत् । अग्रहीत्--दीर्घस्य स्थानिवद्भावाद् **'इट ईटि'** [३/४/५०] इति सिचो लोपो भवति । न चाय वर्णविधि । इट इति रूपाश्रयत्वात् । अग्रहीश्वम्, अग्रहीढ्वम् । विहितविशेषण किम् ? यङन्ताद् विहितस्य मा भूत् । जरीगृहीता[1], जरीगृहितु, जरीगृहितव्यम् । लुप्ततिब्निर्देशाद्यङ्लुकि न भवति । जरीगर्हिता, जरीगर्हितुं, जरीगर्हितव्यम् । अणबादाविति किम् ? जगृह्हिव, जगृह्हिम । इट इति किम् ? ग्राहिषीष्ट, अग्राहिषाताम् । ग्राहिता—णिटो मा भूत् ।

७२. वृतोऽक्यादादिपरस्मैसिचि च वा ।

वृङ्वृञ्भ्यामृदन्तेभ्यश्च धातुभ्य. परस्येटो दीर्घो वा भवति क्यादादिवर्जिते परस्मैसिज्वर्जिते चकाराद् णबादि-वर्जिते च प्रत्यये परे । वृङ्—वरीता, वरिता । विवरीषते, विवरिषते । वृञ्—प्रावरीता, प्रावरिता । प्राविवरीषति, प्राविवरिषति । ऋदन्त—तरीता, तरिता । तितरीषति, तितरिषति । जरीता, जरिता । जिजरीषति, जिजरिषति । वृत इति किम् ? करिष्यति । अक्यादादिपरस्मैसिचि चेति किम् ? प्रावरिषीष्ट, आस्तारिषीष्ट, प्रावारिष्टाम्, प्रावारिषु , आस्तारिष्टाम्, आस्तारिषुः । सिच परस्मैपदविशेषणादात्मनेपदे दीर्घो भवत्येव । अवरीष्ट, अवरिष्ट । प्रावरीष्ट, प्रावरिष्ट । आस्तरीष्ट, आस्तरिष्ट । ववरिथ, तेरिथ ।

७३. आत्मने सीसिचोरिड् ।

वेत्यनुवर्तते । वृतः परयोरात्मनेपदविषययो. सी, सिच्—इत्येतयोरिडागमो वा भवति । वृषीष्ट, वरिषीष्ट । प्रावृषीष्ट, प्रावरिषीष्ट । आस्तीर्षीष्ट, आस्तरिषीष्ट । अवृत, अवरीष्ट, अवरिष्ट । प्रावृत, प्रावरीष्ट, प्रावरिष्ट । आस्तीर्ष्ट, आस्तरीष्ट, आस्तरिष्ट । आस्तीर्षाताम्, आस्तरिषाताम्, आस्तरीषाताम् । आस्तीर्षत, आस्तरिषत, आस्तरीषत । आत्मने इति किम् ? प्रावारीत्, अतारीत्, आस्तारीत्—एषु नित्यमेवेड् भवति । प्राप्तविभाषा ।

७४. संयोगादृतः ।

पूर्वमनुवर्तते । धातोः संयोगात् परो य ऋकारस्तदन्ताद् धातो परयोरात्मनेपदविषययोः सीसिचोरिड् वा भवति । स्मृषीष्ट, स्मरिषीष्ट । ध्वृषीष्ट, ध्वरिषीष्ट । अस्मृषाताम, अस्मरिषाताम् । अध्वृषाताम्, अध्वरिषाताम् । संयोगादिति किम् ? कृषीष्ट, अकृत । धातोरिति विशेषणादिह न भवति—मा निष्कृषीष्ट, मा निष्कृत । **'स्कृच्छ्रतामकि णबादौ'** [४/२/६] इत्यत्र स्कृनो ग्रहणात् सुट्संयोगो न गृह्यते, तेनेह न भवति—सम्स्कृषीष्ट, समस्कृत । ऋत इति किम् ? अच्योष्ट, अप्लोष्ट । आत्मने इति किम् ? अस्मार्षीत्, अध्वार्षीत् ।

७५. हनृतः स्यस्य ।

हन्तेर्ऋदन्ताच्च धातो. परस्य स्यस्य इडागमो भवति । हनिष्यति, अहनिष्यत्, हनिष्यन्, आहनिष्यते, आहनिष्यमाणः । करिष्यति, अकरिष्यत्, करिष्यन्, करिष्यमाण । स्वरिष्यति, अस्वरिष्यत्, स्वरिष्यन् । स्वरतेः परत्वाद विकल्पं बाधित्वा नित्यमिट् ।

७६. अञ्जेः सिचः ।

अञ्जे परस्य सिच इडागमो भवति । आञ्जीत्, आञ्जिष्टाम्, आञ्जिषु. । सिच इति किम् ? अङ्क्ता, अञ्जिता । ऊदित्त्वाद् विकल्पे प्राप्ते नित्यार्थं वचनम् ।

---

१. **'यो हसात्'** [४/२/५६] इति यलुकि गृह्णाते. पर इट् अस्त्येव । अतो विहितव्याख्यानम् ।

७७. धूञ्सुस्तोः परस्मै ।

एभ्यः परस्य सिच इडागमो भवति परस्मैपदविषये । अधावीत्, अधाविष्टाम्, अधाविषुः । सु इति सुमात्रस्य ग्रहणम् । असावीत्, असाविष्टाम्, असाविषुः । केचित्तु पूर्वोत्तराभ्यां निद्भ्यां साहचर्यात् सुनोतेरेव ग्रहणमिति मन्यन्ते । तन्मते सौतिसवत्योः असौषीदित्येव । स्तु—अस्तावीत्, अस्ताविष्टाम्, अस्ताविषुः । परस्मै इति किम् ? अधोष्ट, अधविष्ट । असोष्ट, अस्तोष्ट । धूञो विकल्पे सुस्तुभ्यां च प्रतिषेधे प्राप्ते वचनम् ।

७८. यमिरमिनम्यातः सक् च ।

यमिरमिनमिभ्य आदन्तेभ्यश्च धातुभ्य. परस्य परस्मैपदविषयस्य सिच इडागमो भवति, एषां यम्यादीनां सगागमश्च भवति । अयंसीत्, अयंसिष्टाम्, अयंसिषु । व्यरंसीत्, व्यरंसिष्टाम्, व्यरंसिषु. । अनंसीत्, अनंसिष्टाम्, अनंसिषु. । एभ्यो दिस्यो सिच इड्विधिर्वृद्धिप्रतिषेध[1] प्रयोजनम् । आदन्त—अयासीत्, अयासिष्टाम्, अयासिषु. । अग्लासीत्, अग्लासिष्टाम्, अग्लासिषु । अदरिद्रासीत्, अदरिद्रासिष्टाम्, अदरिद्रासिषुः । आतो[2] लोपपक्षे—अदरिद्रीत्, अदरिद्रिष्टाम्, अदरिद्रिषुः । परस्मै इति किम् ? आयस्त, उपायस्त, अरस्त, अनंस्त दण्डः स्वयमेव । अमास्त धान्यं चैव ।

७९. उदितः क्त्वो वा ।

उदितो धातो परस्य क्त्वाप्रत्ययस्य इडागमो वा भवति । दमित्वा, दान्त्वा । शमित्वा, शान्त्वा । तमित्वा, तान्त्वा । देवित्वा, द्यूत्वा । सेवित्वा, स्यूत्वा । यमुसिध्यत्योरप्राप्तेऽन्येषां प्राप्ते विभाषा ।

८०. जॄव्रश्चः ।

योगविभागाद् वेति निवृत्तम् । जॄव्रश्चिभ्या परस्य क्त्वाप्रत्ययस्य इडागमो भवति । जरित्वा, जरीत्वा, व्रश्चित्वा—**'न क्त्वा सेट्'** [३/४/१०३] इति कित्त्वाऽभावात्सप्रसारण न । जॄ इति क्र्यादिकस्य ग्रहणम् । दैवादिकस्य तु सानुबन्धस्य जीर्त्वा । अस्यैव इच्छन्त्यन्ये । जॄ इत्यस्य **'ऋवर्णश्यूर्णुनः कितः'** [४/३/८६] इति प्रतिषेधे व्रश्चेरूदित्त्वाद् विकल्पे प्राप्ते वचनम् ।

८१. क्षुधिवसेः क्तयोश्च ।

क्षुध्, वस्—इत्येताभ्यां परेषां क्त, क्तवतु—इत्येतयोश्चकारात् क्त्वा इत्यस्य च इडागमो भवति । क्षुधितः, क्षुधितवान्, क्षुधित्वा । उषितः, उषितवान्, उषित्वा । यङ्लुकि—वावसितः, वावसितवान्, वावसित्वा । नेच्छन्त्यन्ये—वावस्तः, वावस्तवान्, वावस्त्वा । वसिति वसतेर्ग्रहणम् । वस्तेस्तु इडस्त्येव ।

८२. लुभो विमोहने तेषाम् ।

विमोहन—आकुलीकरणम् । विमोहनेऽर्थे वर्तमानात् लुभ परेषां पूर्वोक्तानां क्त, क्तवतु, क्त्वा—इत्येतेषामिडागमो भवति । विलुभितः सीमन्त । विलुभिता. केशा । विलुभितानि पदानि । विलुभितवान् । लुभित्वा, लोभित्वा[3] केशान् गतः । विमोहन इति किम् ? लुब्धो जाल्मः । लुब्धवान् । लुब्ध्वा, लुभित्वा, लोभित्वा । **'इच्छसहलुभ···'** [४/३/६५] इत्यादिना विकल्पे प्राप्ते **'वेटोऽपतः'** [४/३/६१] इति नित्य प्रतिषेधे प्राप्ते वचनम् ।

---

१. दिस्योः यम्योः सिच इड्विधानस्य किं फलमित्याह—वृद्धे प्रतिषेध इति । **'हलस्थाऽनिटि'** [४/२/३१] इति प्राप्ताया इत्यर्थः ।

२. **'धातो वा'** [३/४/७९] इत्यनेन धादिविषयेऽपीत्यर्थः ।

३. **'हसावेरिदुदुपधाच''** [३/४/१०८] इति वा किस्वम् ।

८३. अञ्चेः पूजायाम् ।

पूजायां वर्तमानादञ्चेः परेषां क्त, क्तवतु, क्त्वा—इत्येतेषां इडागमो भवति । अञ्चिता गुरवः । उच्चैरञ्चितलाङ्गूलः[1] । अञ्चितवान् गुरून् । शिरोऽञ्चित्वेव संवहन्[2] । पूजायामिति किम् ? उदक्तमुदकं कूपात् । अक्त्वा, अञ्चित्वा । **'उदितः क्त्वो वा'** [४/३/७९] इति विकल्पे प्राप्ते **'वेटोऽपतः'** [४/३/९१] इति नित्यं प्रतिषेधे प्राप्ते वचनम् ।

८४. पूङ्क्लिशिभ्यो वा ।

पूङ्. क्लिशिभ्यां च परेषां क्त, क्तवतु, क्त्वा—इत्येतेषामिडागमो वा भवति । पूत, पूतवान्, पूत्वा । पवितः, पवितवान्, पवित्वा । क्लिष्ट, क्लिष्टवान्, क्लिष्ट्वा । क्लिशित, क्लिशितवान्, क्लिशित्वा । पूङिति ङकारः पूनो निवृत्त्यर्थः । **'न शीङ्डीङ्पूङ्…'** [३/४/११०] इत्यादावपि पूङो ङित्वात् पुनः अग्रहणं, तेन तस्य कित्त्वप्रतिषेधाऽभावात् पुवित इत्यनिष्टं रूपमासज्जेत । बहुवचनं क्लिश्यतिक्लिश्नात्योर्ग्रहणार्थम् । पूङ **'उवर्णात्'** [४/३/८७] इति नित्यं प्रतिषेधे प्राप्ते क्लिश्यतेर्नित्यमिटि प्राप्ते क्लिश्नातेश्च ऊदित्त्वात् क्त्वाया विकल्पे सिद्धेऽपि क्तयोर्नित्यं निषेधे प्राप्ते विकल्पार्थं वचनम् ।

८५. नैकस्वरादनुस्वारेतः ।

एकस्वरादनुस्वारेतो धातोर्विहितस्य सनादेरशितः प्रत्ययस्य इडागमो न भवति । पां पाने—पास्यति, पाता, पातुम् । चक्षे. ख्यांन्क्शानौ—आख्याता, आक्शाता । जि—जेता । णीन्—नेता । अजेर्वी—प्रवेता । इङ्को गी—अध्यगीष्ट । श्रु—श्रोता । स्मृ—स्मर्ता । शक्लृन् शकन्च् वा—शक्ता । शक्यतेरिटमिच्छन्त्येके । शकिता । वचक् ब्रूनादेशो वा—वक्ता । विचृन्र्—विवेक्ता । रिचृन्र्—रेक्ता । डुपचष्न्—पक्ता । षिचंन्ज्—सेक्ता । मुच्लृन्ज्—मोक्ता । प्रच्छज्—प्रष्टा । भ्रस्जंन्ज्—भ्रष्टा, भर्ष्टा । टुमस्जोंज्—मङ्क्ता । भुजोंज् भुजर् वा—भोक्ता । युजंङ्च् युजृंन्र् वा—योक्ता । यजन्—यष्टा । ष्वञ्जङ्ज—परिष्वङ्क्ता । रञ्जन् रञ्जन्च् वा—रङ्क्ता । रुजोंज्—रोक्ता । णिजृंन्क्—नेक्ता । विजृंन्क्—विवेक्ता । षञ्ज—सङ्क्ता । भञ्जोंर्—भङ्क्ता । भजन्—भक्ता । सृजङ्च् सृजज् वा—स्रष्टा । त्यज—त्यक्ता । स्कन्द—स्कन्ता । विदंच्, विद्लृन्ज् विदंङ्र् वा—वेत्ता । विदन्तेरिटमिच्छन्त्येके । वेदिता धनस्य । णुदंज्—नोत्ता । ञिष्विदाच्—स्वेत्ता । शद्लृ—शत्ता । षद्लृ षद्लृज् वा—सत्ता । भिदृंन्र्—भेत्ता । छिदृंन्र्—छेत्ता । तुदन्ज्—तोत्ता । अदक्—अत्ता, जिघत्सति । पदङ्च्—पत्ता । हदङ्—हत्ता । खिदङ्च्, खिदंङ्ज् खिदङ्र् वा—खेत्ता । खिन्दतेरिटमिच्छन्त्येके । खेदिता । क्षुदृंन्र्—क्षोत्ता । राधच् राधन् वा—राद्धा । साधन्—साद्धा । शुधच्—शोद्धा । युधंङ्च्—योद्धा । व्यधच्—व्यद्धा । बन्धश्—संबन्द्धा । बुधंङ्च्—बोद्धा । रुधृंन्र्—रोद्धा । क्रुधच्—क्रोद्धा । क्षुधच्—क्षोद्धा । सिध्रुच्—सेद्धा । हनक्—हन्ता । मनङ्च्—मन्ता । आप्लृन्—आप्ता । तप तपङ्च् वा—तप्ता । केचित् तिपृङ् क्षरणे इत्यप्यनिटमिच्छन्ति । तेप्ता, तेप्स्यते । शपन् शपन्च् वा—शप्ता । क्षिपच् क्षिपन्ज् वा—क्षेप्ता । छुपज्—छोप्ता । लुप्लृन्ज्—लोप्ता । सृप्लृ—स्रप्ता, सर्प्ता । लिपन्ज्—लेप्ता । टुवपन्—वप्ता । ञिष्वपक्—स्वप्ता । यभ—यब्धा । रभंङ्—आरब्धा । डुलभष्ङ्—लब्धा । यमु—यन्ता । रमङ्—रन्ता । णमं—नन्ता । गम्लृ—गन्ता । क्रुशं—क्रोष्टा । लिशङ्च् लिशङ्ज् वा—लेष्टा । रुशज्—रोष्टा । रिशज्—रेष्टा । दिशंन्ज्—देष्टा । दशं—दंष्टा । स्पृशंज्—स्प्रष्टा, स्पर्ष्टा । मृशज्—म्रष्टा, मर्ष्टा । विशज्—वेष्टा । दृशृ—द्रष्टा । शिष्लृंर्—शेष्टा । शुषंच्—शोष्टा । त्विषन्—त्वेष्टा । पिष्लृर्—पेष्टा । विष्लृन्क्—वेष्टा । कृष कृषन्ज् वा—क्रष्टा, कर्ष्टा । तुषंच्—तोष्टा । दुषच्—दोष्टा । पुषच्—पोष्टा । श्लिषच्—श्लेष्टा । द्विषंन्क्—द्वेष्टा । घस्लृ—घस्ता । वसं—वस्ता । रुह—रोढा । लुहं रिह इति हिसार्थौ सौत्रौ । लोढा, रेढा । एतावनिटौ नेच्छन्त्येके । दिहन्क्—देग्धा । दुहंन्क्—दोग्धा । लिहंन्क्—

१-२. उच्चैरञ्चितलाङ्गूलः, शिरोऽञ्चित्वेव संवहन् ।
दधद् विलुभितं वातैः, केशरं वह्निपिङ्गलम् ॥
[भट्टिकाव्य ९/४०]

लेढा। मिहं—मेढा। वहंन्—वोढा। णहनुच्—नद्धा। दह—दग्धा। एकस्वरादिति किम् ? अवधीत्, दरिद्रिता, शाशकिता। विहितविशेषण किम्। चिकीर्षति। पश्चादनेकस्वरत्वेऽप्यत्र प्रतिषेधो भवत्येव। अनुस्वारेत इति किम्? विरिवाचारीत्—अवायीत। श्वि—श्वयिता। श्रिन्—श्रयिता। डीङ् डीङ्च् वा—डयिता। शीङ्—शयिता। युक्—यविता। रुक्—रविता। क्षुक्—क्षविता। क्ष्णुक्—क्ष्णविता। णुक्—नविता। स्नुक्—प्रस्नविता। वृन्त्—प्रावरिता, प्रावरीता। वृङ्श्—वरिता, वरीता। भू—भविता। णू—नुविता। लू—लविता। तॄ—तरिता, तरीता। स्तॄन्श्—आस्तरिता, आस्तरीता। ओविजीङ्ज्—उद्विजिता। विदक् ज्ञाने—वेदिता शास्त्रस्य। ञिष्विदाङ्—स्वेदिता। ञिक्ष्विदाङ् ञिक्ष्विदाच् वा—क्ष्वेदिता। आभ्यामपीटं नेच्छन्त्येके। बुधन् बुध् वा—बोधिता। आभ्यामपीट नेच्छन्त्येके। षिधु षिधूच् वा—सेधिता। मनुङ्व्—मनिता। लुपच्—लोपिता। शिष—शेषिता। विषु विपश् वा—वेषिता। पुष पुषश् वा—पोषिता। श्लिषु—श्लेषिता। केचिद् विषिपुषिश्लिषिमाश्रादिडभावमिच्छन्ति।

अत्र सग्रहश्लोकाः—

> शिवश्रिडीशीयुरुक्षुक्ष्णुणुस्नुभ्यश्च[1] वृनो वृङः।
> उद्दन्तयुजादिभ्यः[2], स्वरान्ता धातवोऽपरे ॥१॥
>
> पाठ एकस्वरा. स्युर्येऽनुस्वारेत इमे मताः।
> द्विविधोऽपि शकिश्चैव, वर्चिविचिरिची पचिः ॥२॥
>
> सिञ्चतिर्मुचिरतोऽपि पृच्छति, भ्रस्जिमस्जिभुजयो युजिर्यजिः।
> स्वञ्जिरञ्जिरुजयो णिजिर्विजिसञ्जिभञ्जिभजयः सृजित्यजी ॥३॥
>
> स्कन्दिविद्यविद्लृविन्तयो नुदिः, स्विद्यतिः शदिसदी भिदिच्छिदी।
> तुद्यदी पदिहदो खिदिक्षुदी राधिसाधिशुधयो युधिव्यधी ॥४॥
>
> बन्धबुध्यरुधय क्रुधिक्षुधी, सिध्यतिस्तदनु हन्तिमन्यती।
> आपिना तपिशपिक्षिपिच्छुपो, लुम्पतिः सृपिलिपी वपिस्वपी ॥५॥
>
> यभिरभिर्लभियमिरमिर्नमिगमयः,
> क्रुशिलिशिरुशिरिशिदिशतिदशतयः।
> स्पृशिमृशतिविशतिदृशिशिल्लृशुषय-
> स्त्विषपिषिविष्लृकृपितुपिदुषिपुपचः ॥६॥
>
> श्लिष्यतिर्द्विषिरतो घसिवसती, रोहतिर्लुहिरिही अनिगदितौ।
> देग्धिदोग्धिलिह्यो मिहिवहती, नह्यतिर्दहिरिति स्फुटमनिटः ॥७॥

८६. ऋवर्णश्र्यूर्णुनः कितः।

ऋवर्णान्ताद् धातो श्रयतेरूर्णुनश्चैकस्वराद् विहितस्य कितः प्रत्ययस्य इडागमो न भवति। वृतः, वृतवान्, वृत्वा। स्वृतः, स्वृतवान्, स्वृत्वा। तॄ—तीर्णः, तीर्णवान्, तीर्त्वा। पॄ—पूर्तः, पूर्तवान्, पूर्त्वा। श्रि—श्रितः, श्रितवान्, श्रित्वा। उत्तरेणैव सिद्धे ऊर्णुग्रहणमनेकस्वरार्थम्। ऊर्णुतः, ऊर्णुतवान्, ऊर्णुत्वा। ऊर्णोतिरनुबन्धग्रहणाद्यङ्लुकि न निषेधः।

---

१. शीक्षुसाहचर्यात् यु, रु—इत्येतयोरादादिकयोरेव ग्रहण, न तु रुङ् हिसायां च युन्श् बन्धने इत्येतयोः।

२. श्व्यादिभ्यः स्वरान्तेभ्यो युजाद्यन्तर्गतेभ्यस्तु स्वरान्तेभ्यो हसान्तेभ्यश्च धातुभ्योऽपरे ये स्वरान्ता धातवस्ते सर्वे अनिटः मताः। केचित्तु युजाद्यन्तर्गतेभ्यः स्वरान्तेभ्य एवाऽपरे ये स्वरान्ता धातवस्ते अनिट इति व्याख्यान्ति। तन्मते युजाद्यन्तर्गता हसान्ता धातवः अनिट एव। अपरे तु युजाद्यन्तर्गतान् स्वरान्तान् हसान्तांश्च द्वयानपि अनिटो मन्यन्ते

ऊर्णोनवित्वा। एकस्वरादिति किम्? जागरितः, जागरितवान्, जागरित्वा। कित इति किम्। वरिता, तरिता, श्रयिता, ऊर्णुविता, ऊर्णविता। विहितविशेषणात् तीर्णः, पूतः इत्यत्र कृतेऽपीरादेशे निषेधो भवति।

८७. उवर्णात्।

उवर्णान्तादेकस्वराद् धातोर्विहितस्य कितः प्रत्ययस्य इडागमो न भवति। युतः, युतवान्, युत्वा। लून, लूनवान्, लूत्वा? कित इति किम्? यविता, लविता। योगविभाग उत्तरार्थ।

८८. ग्रहगुहश्च सनः।

ग्रहिगुहिभ्यामुवर्णान्ताच्च धातोर्विहितस्य सन्प्रत्ययस्य इडागमो न भवति। ग्रह—जिघृक्षति। गुह्—जुघुक्षति। रुरूषति, तुतूषति, बुभूषति, लुलूषति, पुपूषति। यौतेस्तु 'इवन्तर्ध···' [४/३/६६] इत्यादिना विकल्प। यियविषति, युयूषति। गुहेरिटमपीच्छत्यन्य। '**जुगूहिषन् मत्तगजोऽभ्यधावत्**'।

८९. स्वार्थे।

स्वार्थे विहितस्य सन्प्रत्ययस्य इडागमो न भवति। जुगुप्सते, तितिक्षते, चिकित्सति, मीमांसते, बीभत्सते, दीदासते, शीशासते। स्वार्थे इति किम्? पिपठिषति।

९०. डीयश्व्योदितः क्तयोः।

डीयते, श्वयतेः ईदिद्भ्यश्च धातुभ्य परयो क्त, क्तवतु—इत्येतयोरिडागमो न भवति। डीन, डीनवान्, उड्डीनः, उड्डीनवान्। शूनः, शूनवान्। ईदित —ओलजी—लग्नः, लग्नवान्। विजी—उद्विग्न, उद्विग्नवान्। यती—यत्तः, यत्तवान्। त्रसी—त्रस्त, त्रस्तवान्। दिपी—दीप्त, दीप्तवान्। डीयेति यन्निर्देशात् डयतेरिड् भवत्येव। डयितः, डयितवान्। क्तयोरिति किम्? डयिता, श्वयिता, लज्जिता, उद्विजिता। कृती, नृती, चृती—इत्येतेषां वेट्त्वेन क्तयोरिट्-प्रतिषेधे सिद्धे ईदित्व यङ्लुगर्थम्, तेन चरीकृत्त, चरीकृत्तवान्, नरीनृत्तः, नरीनृत्तवान्, चरीचृत्त, चरीचृत्तवान् इत्यत्र अनेकस्वरत्वेऽपीट्प्रतिषेधः।

९१. वेटोऽपतः।

पतिवर्जिताद् यत्र क्वचिद् विकल्पितेटो धातोरेकस्वरात् परयो क्तयोरिड् न भवति। रध्—रद्ध, रद्धवान्। अञ्जू—अक्त, अक्तवान्। गुहू—गूढ, गूढवान्। शमु—शान्त, शान्तवान्। असु—अस्त, अस्तवान्। केचिदस्यतेः भावे क्ते नित्यमिटमिच्छन्ति। असितमनेन। सह—सोढ, सोढवान्। अपत इति किम्? पतित, पतितवान्। सन्प्रत्यये वेट्त्वात् प्राप्ते प्रतिषेधः। एकस्वरादिति किम्? दरिद्रित, दरिद्रितवान्। कथ प्रोर्णुत, प्रोर्णुतवान्? '**ऋवर्णश्र्यूर्णुनः कितः**' [४/३/८६] इत्यनेन भविष्यति।

९२. धृषिशसेः प्रगल्भे।

प्रगल्भो जितसभ। अविनीत इत्यन्ये। धृषिशसिभ्या परयो प्रगल्भे एवार्थे क्तयोरिट् न भवति। धृष्ट, विशस्त—प्रगल्भ इत्यर्थ। प्रगल्भ इति किम्? धर्षितः, विशसित। धृषे 'आदितः' [४/३/१००] इति शसेरप्युदित्त्वात् '**वेटोऽपतः**' [४/३/९१] इति प्रतिषेधे सिद्धे नियमार्थ वचनम्। अथ भावारम्भयोर्नित्यार्थ धृषेरुपादान[1] कस्मान्न भवति? नैवम्। धृषेर्भावारम्भे स्वभावात् प्रगल्भार्थानभिधानात्।

---

१. नन्वादितां धातूना '**भावारम्भयोर्वा**' [४/३/१०१] इत्यनेन वा इट्प्रतिषेधेऽत्र धृषेरुपादान नित्यमिड्भावार्थमिति विधिपरतया किमिति न व्याख्यातमित्याशङ्का।

९३. घुषेरविशब्दने ।

विशेषनया शब्दन विशब्दन प्रतिज्ञान च । ततोऽन्यार्थे वर्तमानात् घुषे. परयो. क्तयोरिट् न भवति । घुष्टा रज्जु:—सबद्धावयवेत्यर्थ । घुष्टवान् । अविशब्दन इति किम् ? अवघुषित वाक्यमाह । नानाशब्दित प्रतिज्ञात वा वाक्य ब्रूते इत्यर्थ. । अत एव विशब्दनप्रतिषेधात् ज्ञाप्यते घुषेर्विशब्दनार्थस्य अनित्यश्चुरादेर्णिजिति[1] । तेनाऽयमपि प्रयोगो भवति— **'महीपालवचः श्रुत्वा, जुघुषुः पुष्यमाणवाः'** । स्वाभिप्राय नानाशब्दै राविष्कृतवन्त इत्यर्थ. ।

९४. संनिवेरर्दः ।

संनिविपूर्वादर्दते परयो. क्तयोरिट् न भवति । समर्ण्णः, समर्ण्णवान् । न्यर्ण्णः, न्यर्ण्णवान् । व्यर्ण्ण, व्यर्ण्णवान् । सनिवेरिति किम् ? अर्दितः, प्रार्दित. । कश्चित् केवलादऽपि इच्छति । अर्ण्ण, अर्ण्णवान् ।

९५. अभेः सामीप्ये ।

अभिपूर्वादर्दते परयो क्तयो सामीप्येऽर्थे इट् न भवति । अभ्यर्ण्ण—समीपमित्यर्थ. । अभ्यर्ण्णा सरित् । अभ्यर्ण्णे शेते । सामीप्ये इति किम् ? अभ्यर्दितो वृषल शीतेन । बाधित इत्यर्थ. ।

९६. कृच्छ्रगहनयोः कषः ।

कृच्छ्र—दु खं तत्कारण च । गहन—दुरवगाहम् । कृच्छ्रगहनयोरर्थयो कषे परयो. क्तयोरिट् न भवति । कष्ट वर्तते । कष्टोऽग्नि । कष्टानि वनानि । कृच्छ्रगहनयोरिति किम् ? कषित सुवर्णम् ।

९७. वर्तयतेर्वृत्तं ग्रन्थे ।

वृतेर्ण्यन्तात् क्ते वृत्तमिति ग्रन्थविषये निपात्यते । गुणाभावेट्प्रतिषेधौ णिलोपश्च[2] निपातनात् । वृत्तो गुणश्छात्रेण[3] । वृत्त पारायण चैत्रेण । वर्तेर्ग्रन्थविषये वर्तितमिति प्रयोगनिवृत्त्यर्थ वचनम् । ग्रन्थ इति किम् ? वर्तित कुङ्कुमम् । अन्ये तु ग्रन्थेऽपि वर्तितमिति प्रयोगमाद्रियन्ते ।

९८. दृढः स्थूलबलवतोः ।

स्थूले बलवति चार्थे दृहेर्दृंहेर्वा क्तान्तस्य दृढ इति निपात्यते । इडभाव. क्ततस्य ढत्व धातुहनयोर्लोपश्च निपातनात् । दृढः—स्थूलो बलवान् वा । परिदृढय्य[4] गत. । पारिदृढी कन्या । स्थूलबलवतोरिति किम् ? दृहितं, दृंहितम् ।

९९. लग्न-म्लिष्ट-फाण्ट-बाढ-स्वान्त-ध्वान्त-क्षुब्ध-विरिब्ध-परिवृढाः सक्तास्पष्टानायास-भृश-मनस्तमो-मन्थ-स्वर-प्रभुषु ।

लग्नादयः क्तान्ता सक्ताद्यर्थेषु यथासख्यमिडभावे निपात्यन्ते । लगेर्लग्नमिति सक्तं चेत् । लगितमन्यत् । म्लेच्छेर्म्लिष्टमिति अस्पष्ट चेत् । इत्वमपि निपातनात् । म्लेच्छितमन्यत् । फणे फाण्टमिति अनायाससाध्यं चेत् । यदश्रपितमऽपिष्टमुदकसंपर्कमात्राद् विभक्तरसमौषध कषायादि तदेवमुच्यते । अग्निना तप्त यदौषदुष्ण तत् फाण्टमित्यन्ये । फाणितमन्यत् । वाहेर्बाढमिति भृश चेत् । क्रियाविशेषणमेवैतत् स्वभावात् । बाढविक्रमा[5] इति तु विस्पष्टपटुवत्समास.[6] ।

---

१ ननु घुषृ शब्दे इत्यस्यैव विशब्दने चुरादित्वात् णिचि सत्यनेकस्वरत्वात् प्रतिषेधो न स्यात्, कि वर्जनेनेत्याह ।

२. **'श्रेः सेट्क्तयोः'** [४/२/५९] इत्यत्र सेटोरेव क्तयोरिति नियमात् **'णेरनिटि'** [४/२/५५] इति न प्राप्नोतीत्याह ।

३. उपचाराद् गुणप्रकरण गुणः ।

४. परिदृढमाचष्टे—णिच्, **'पृथुमृदुभृशकृशदृढ'''** [८/४/३९] इति ऋतो रः । परिद्रढनं—पूर्वं क्त्वा, **'लघोर्यपि'** [४/२/६१] इति अय् ।

५ यद्ययं क्रियाविशेषण तत्कथमत्र विक्रमाभिधायी बाढशब्द इत्याशङ्कायामाह—विस्पष्टपटुवत् समास ।

६. यथा तत्र क्रियाविशेषणेन समासस्तथाऽत्रापि बाढशब्देन क्रियाविशेषणेन समासः ।

वाहितमन्यत् । स्वनेः स्वान्तमिति मनश्चेत् । मनःपर्यायः स्वान्तशब्दः । विपयेष्वनाकुलं मनः स्वान्तमित्यन्ये । अन्यत्र **स्वनितो मृदङ्गः** । स्वनितं मनसा घट्टितं स्पृष्टमिति यावत् । ध्वनेः ध्वान्तमिति तमश्चेत् । तमःपर्यायो ध्वान्तशब्दः । **अनालोक गम्भीर तमो** ध्वान्तमित्यन्ये । अन्यत्र ध्वनितं तमसा । ध्वनितो मृदङ्गः । क्षुभेः क्षुब्ध इति मन्थश्चेत् । मथ्यते इति मन्थः । कर्मणि घञ् । क्तोऽपि क्षुभे कर्मण्येव । तत्सामानाधिकरण्यात् । क्षुब्धः समुद्रः । मथितः इति मथ्यमानः सक्षोभं गत[1] इति वार्थः । क्षुब्धा[2] गिरिनदी । मन्थनं वा मन्थः । तस्मिन्नभिधेये क्षुब्धं बल्लवेन । विलोडनं कृतमित्यर्थः । अन्यत्र क्षुभितं समुद्रेण[3] । क्षुभितं मन्थेन[4] । क्षुभितः समुद्रो मन्थेन । अन्यस्तु दध्यादिकं येन मथ्यते स मन्थो मन्थानक इत्याह ।

'अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति ।
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥'

[शिशुपालवधमहा० २/१०७]

विपूर्वात् सौत्राद् रिभेर्विरिब्ध इति भवति स्वरो ध्वनिश्चेत् । रेभेर्वा इत्वस्यापि भवति निपातनात् । विरिभितं, विरेभितमन्यत् । परिपूर्वस्य बृहेर्वृहेर्वा परिवृढ इति प्रभुश्चेत् । हकारनलोपे ढत्वे च निपातनात् । परिवृढः प्रभुः । परिवृढस्य गतः । परिवृढी कन्या । अन्यत्र परिबृंहितं, परिवृंहितम् । केचित्तु लग्नम्लिष्टफाण्टबाढविरिब्धा धात्वर्थस्य सक्ताद्यर्थविषयभावमात्रे भवन्तीत्याहुः । तेषां लग्नं सक्तेनेत्याद्यपि भवति । यथा—लोम्नि हृष्टमिति[5] ।

१००. आवितः ।

आकारानुबन्धाद् धातोः परयोः क्तयोरिट् न भवति । ञिमिदा—मिन्नः, मिन्नवान् । ञिक्ष्विदा—क्ष्विण्णः, क्ष्विण्णवान् । ञिष्विदा—स्विन्नः, स्विन्नवान् । श्विता—श्वित्तः, श्वित्तवान् । आदिता धातुना भावारम्भे वेट्त्वादन्यत्र **'वेटोऽपतः'** [४/३/६१] इत्यनेनैव नित्यमिट्प्रतिषेधे सिद्धे योगविभागो **यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः** इति न्यायज्ञापनार्थम्[6], तेन विदक् ज्ञाने—विदितः[7], विदितवान् । हृषितः, हृषितवान् । तुष्ट इत्यर्थः । इत्यादि सिद्धम् ।

१०१. भावारम्भयोर्वा ।

आरम्भ आदिक्रिया । आदितो धातोर्भावे आरम्भे च विहितयोः क्तयोरिट् वा भवति । मिन्नमनेन, मेदितमनेन । प्रमिन्नः, प्रमेदितः । प्रमिन्नवान्, प्रमेदितवान् । आदित इति किम् ? विदितमनेन, प्रविदितः, प्रविदितवान् । भावारम्भयोरिति किम् ? मिन्नः, मिन्नवान् । पूर्वेण नित्ये निषेधे प्राप्ते विकल्पः ।

१०२. शकेः कर्मणि ।

शकेर्धातोः परयोः कर्मणि विहितयोः क्तयोरिट् वा भवति । शक्तः, शकितो वा घटः कर्तुं चैत्रेण । **कर्मणि**

---

१. अन्तर्भूतणिजर्थत्वाद् गमित इत्यर्थः ।

२. मथिता मथ्यमाना सती क्षोभं गमिता वेत्यर्थः ।

३. अत्र मन्थनं वा मन्थ इति द्वितीयमपि व्याख्यानं न घटते । यतस्तत्र मन्थनं विलोडनम् । प्रस्तुते तु सञ्चलनमात्रम् ।

४. अत्र मन्थशब्देन मन्थानक उच्यते ।

५. यथा लोमविषये हृष्टं निपात्यते प्रयोगश्च लोमभिः हृष्टमिति तथाऽत्रापीत्यर्थः ।

६. **'आवितः'** [४/३/१००], **'भावारम्भयोर्वा'** [४/३/१०१] इत्येक एव क्रियतां किं योगविभागेनेति ? अयमर्थः—**'भावारम्भयोर्वा'** [४/३/१०१] इत्यनेन भावारम्भविवक्षाया विभाषा इति यदा कर्मणि कर्तरि वा विवक्ष्यते क्तस्तदा **'वेटोऽपतः'** [४/३/६१] इत्यनेनाऽपि निषेधो न स्यात् इत्यस्य पृथगारम्भः ।

७. **'गमहनविद्‌ल्…'** [४/३/११२] इत्यनेन विद्‌लृन्ज् इत्यस्यैव वेट्त्वं न विदक् इत्यस्य, इत्यतो नित्यमिट् । न च वाच्यं **'गमहन…'** [४/३/११२] इत्यत्र विद्‌लृ इति सानुबन्धोपादानादेव विदक् इत्यस्य न भविष्यतीति । यतो नाऽनुबन्धकृतानीति न्यायात् अनुबन्धवशाद् वैरूप्यं नानास्वरत्वं भिन्नवर्णत्वं च न भवतीति ।

क्तवतुर्नास्तीति नोदाह्रियते । कर्मणीति किम् ? शक्तः कटं कर्तुं चैत्रः ।

१०३. वम-जप-त्वर-रुष-संघुषास्वन-श्वसाऽमः ।

वमादिभ्य परयोः क्तयोरिट् वा भवति । वम्—वान्तः, वान्तवान् । वमितः, वमितवान् । जप्—जप्तः, जप्तवान् । जपितः, जपितवान् । त्वर्—तूर्ण, तूर्णवान् । त्वरितः, त्वरितवान् । रुष्—रुष्टः, रुष्टवान् । रुषितः, रुषितवान् । वेट्त्वात् रुषेर्नित्य प्रतिषेधे प्राप्ते वचनम् । संघुष्—सघुष्टं, संघुषित वाक्यम् । संघुष्टौ, संघुषितौ दम्यौ । संघुष्टवान्, संघुषितवान् वाक्यम् । आस्वन्—आस्वान्त, आस्वनितश्चैत्रः । संघुषास्वनिभ्यां परत्वादयमेव[1] विकल्पः, तेनाऽविशब्दनेऽपि—संघुष्टा रज्जु, संघुषिता रज्जुः । मनस्यपि—आस्वान्तं मनः, आस्वनितं मनः इति भवति । श्वस्—श्वस्त, श्वसित । प्रश्वस्तः, प्रश्वसितः । आश्वस्तः, आश्वसितः । आश्वस्तवान्, आश्वसितवान् । विश्वस्तः, विश्वसितः । विश्वस्तवान्, विश्वसितवान् । व्याङ्भ्यामेव केचिद् विकल्पमिच्छन्ति । तन्मते श्वसितः, निश्वसितः, उच्छ्वसितः । श्वसितवान्, निश्वसितवान्, उच्छ्वसितवान् । प्राङ्विभ्यो नित्यमिड्निषेध इत्यन्ये । प्रश्वस्तः, आश्वस्तः, विश्वस्तः । श्वसेः कर्तर्यऽय निषेधो भावे आधारे च नित्यमेवेट् इति केचित् । श्वसितं, निश्वसितम् । अम्—अभ्यान्तः, अभ्यान्तवान् । अभ्यमितः, अभ्यमितवान् ।

१०४. हृषेः केश-लोम-विस्मय-प्रतिघातेषु ।

केशलोमकर्तृका[2] क्रिया केशलोमशब्देनोच्यते । हृषेः केशादिष्वर्थेषु वर्तमानात् परयोः क्तयोरिट् वा भवति । हृष्टा केशाः, हृषिता केशाः । हृष्टं हृषितं वा केशैः । हृष्टानि हृषितानि वा लोमानि । हृष्टं हृषितं वा लोमभिः । हृष्टः हृषितश्चैत्र —विस्मित इत्यर्थः । हृष्टाः हृषिता वा दन्ता —प्रतिहता इत्यर्थः । केशादिष्विति किम् ? हृष्टो[3] मैत्र इत्यलीकार्थस्य, हृषितश्चैत्रस्तुष्टयर्थस्य ।

१०५. अपचितः ।

अपपूर्वस्य चायतेः क्तान्तस्येड्ऽभावश्चिरादेशश्च वा निपात्यते । अपचितः[4], अपचायितः । चिनोतिः पूजार्थो नास्तीति इद निपातनम् ।

१०६. ज्ञौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-छन्न-ज्ञप्ताः ।

ज्ञौ सति दमादीनां क्तान्तानां दान्तादयो वा निपात्यन्ते । दम्—दान्तः, दमितः । शम्—शान्तः, शमितः । पूरी—पूर्णः, पूरितः । एषु ञिलोपो निपात्यते । दासृ—दस्तः, दासितः । स्पश्—स्पष्टः, स्पाशितः । छद्—छन्नः, छादितः । एषु ह्रस्वश्च । ज्ञा—ज्ञप्तः, ज्ञापितः, संज्ञपितः, सज्ञप्तः । अत्र[5] क्वचित् ह्रस्वश्च । इडऽभावः सर्वत्र ।

१०७. सृजिदृशिस्कृस्वरास्वतस्नादिनित्यानिटस्थपः ।

सृजिदृशिभ्यां ससुटः कृञः स्वरान्तादऽकारवतश्च तादौ नित्यानिटो धातोर्विहितस्य थप इट् वा भवति । सृज्—सस्रष्ठ, ससर्जिथ । दृश्—दद्रष्ठ, ददर्शिथ । स्कृ—संचस्कर्थ, सचस्करिथ । स्वर—ययाथ, ययिथ । विवेथ, विवयिथ । निनेथ, निनयिथ । जुहोथ, जुहविथ । अस्वत्—शशक्थ, शेकिथ । पपक्थ, पेचिथ । इयष्ठ, इयजिथ । जगन्थ, जगमिथ ।

---

१. न तु 'घुषेरऽविशब्दने' [४/३/६३] 'लग्नम्लिष्ट...' [४/३/६६] इत्याभ्यां नित्यं प्रतिषेधः ।
२. केशलोमविषया रोमाञ्चादिका क्रिया केशलोमशब्देनोच्यते इत्यर्थः ।
३. हृषु अलीके इति उदित्त्वात् क्त्वाया वेट् । ततो 'वेटोऽपतः' [४/३/६१] इति क्तयोर्नेट् ।
४. पूजितश्चक्षुषा प्रत्यक्षीकृतो वेत्यर्थः ।
५. ज्ञपू इत्यत्र मारणाद्यर्थानामऽभावेऽपि ह्रस्व इत्यर्थः । अभावश्च तेषां पाक्षिके ज्ञापितः इत्यत्र ह्रस्वाऽभावदर्शनात् निश्चीयते ।

सृजिदृशिस्कृस्वरात्वत इति किम् ? रराधिथ, बिभेदिथ, चकर्थ । तादीति किम् ? किति[1] नित्यानिटो मा भूत् । लुलविथ । नित्येति किम् ? तादौ विकल्पेटो मा भूत् । धविथ, ररन्धिथ । अनिट इति किम् ? शिश्रयिथ । थप इति किम् ? पेचिव, पेचिम । विहितविशेषण किम् ? चकर्षिथ[2] । अदादेशस्य घसेर्वेनादेशस्य च वयेम्तादावभावान्नित्यमेवेड्[3] भवति । जघसिथ, उवयिथ । प्रकृत्यन्तरस्य तु घसेर्णबादौ प्रयोग एव नास्ति[4] । स्क्रादिसूत्रेण प्राप्ते विभाषा । स्वरान्तत्वेनैव सिद्धे स्कृग्रहणं **'ऋतो न'** [४/३/१०८] इति प्रतिषेधबाधनार्थम् ।

१०८. ऋतो न ।

ऋकारान्ताद् धातोस्तादौ नित्यानिटो विहितस्य थप इट् न भवति । जहर्थ, सस्मर्थ, दध्वर्थ । ऋत इति किम् ? बिभेदिथ । तादिनित्यानिट इति किम् ? सस्वरिथ । अत्रापि इड्निषेधनिच्छन्त्येके । सस्वर्थ । जजागरिथ इत्यत्र तु अनेकस्वरत्वाच्च इड्निषेधो न भवति । थप इति किम् ? जह्रिव, जह्रिम । पूर्वापवादोऽयम् ।

१०९. ऋवृव्येऽद[5] इट् ।

अर्तेर्वृनो व्येनोऽदश्च धातो परस्य थप इट् भवति । पुनरिट्ग्रहणान्नेति निवृत्तम् । ऋ—आरिथ । वृन्—ववरिथ । व्येंन्—संविव्ययिथ । अद्—आदिथ । अर्तेः पूर्वेण वृन उत्तरेण प्रतिषेधे व्येऽदोस्तु **'सृजिदृशि···'** [४/३/१०७] इत्यादिना विकल्पे प्राप्ते वचनम् ।

११०. स्कसृवृभृस्तुद्रुश्रुस्रोर्हसादेर्णबादेः ।

ससुटः करोते सृ-वृ-भृ-स्तु-द्रु-श्रु-स्रु-वर्जितेभ्यश्च सर्वधातुभ्य. परस्य हसादेर्णवादिप्रत्ययस्य इट् भवति । स्कृ—सञ्चस्करिव, सचस्करिम, संचस्करिषे । स्राद्यन्येभ्य -ददिव, ददिम, ददिषे । चिच्यिवहे, चिच्यिमहे । निन्यिवहे, निन्यिमहे । जुहुविव, जुहुविम । लुलुविध्वे, लुलुविढ्वे । जह्रिव, जह्रिम । तेरिव, तेरिम । शेकिव, शेकिम । पेचिषे, पेचिध्वे, पेचिवहे, पेचिमहे । स्कृ इति ससुटा निर्देश. किम् ? केवलस्य मा भूत । चकृव, चकृम, चकर्थ, चकृषे । स्रादिवर्जन किम् ? सस्रुव, सस्रुम, ससर्थ । ववृव, ववृम, ववृवहे, ववृमहे । बभृव, बभृम, बभर्थ । तुष्टुव, तुष्टुम, तुष्टोथ । दुद्रुव, दुद्रुम, दुद्रोथ । शुश्रुव, शुश्रुम, शुश्रोथ । सुस्रुव, सुस्रुम, सुस्रोथ । स्तुद्रुश्रुस्रूणां **'सृजिदृशि···'** [४/३/१०७] इत्यादिनाऽपि थपि विकल्पो न भवति । अनेन प्राप्तो हि स विकल्पः । एषां तु प्रतिषिद्धत्वात् प्राप्तिर्नास्ति । ववृषे इत्यत्र तु **'सतादेरशितो···'** [४/३/५५] इत्यादिनापि न भवति **'ऋवर्णश्र्यूर्णुनः कितः'** [४/३/८६] इति प्रतिषेधात् ।

१११. घसेकस्वरातः क्वसोः ।

घसेरेकस्वरादाकारान्ताच्च धातो. परस्य क्वसोरिट् भवति । घस्—जक्षिवान् । एकस्वर—आदिवान्, आशिवान् । द्वित्वदीर्घत्वयो कृतयोरेकस्वरत्वम् । ऊचिवान्, अनूचिवान् । सप्रमारणे दीर्घत्वे चैकस्वरत्वम् । शेकिवान्, पेचिवान्, उपसेदिवान् । इणोऽर्तेश्च द्विर्वचने कृतेऽपि समानदीर्घत्वे अरादेशे च सत्येकस्वरसद्भावेनेट प्राप्तिसद्भावान् इट्[6] नित्य एवेति पूर्वमेव भवति, तेन ईयिवान्, समीयिवान्, आरिवान् । आन्—पपिवान्, ययिवान्, तस्थिवान्, जग्लिवान् । घसेकस्वरात इति किम् ? बिभिद्वान्, चिच्छिद्वान्, बभूवान्, उपशुश्रुवान् । नित्यत्वात् द्वित्वे कृतेऽनेकस्वरत्वम् । विहितविशेषण[7]

---

१. **'उवर्णात्'** [४/३/८७] इति सूत्रेण ।

२. अत्र गुणे कृते अत्वान् न प्रथमम् ।

३. घाविसन्घञचलमु णबादौ च विधानात् घसादेशस्य ।

४ असर्वविषयत्वात् ।

५. वृ इति सामान्योक्तावपि वृन् एव गृह्यते । वृङस्तु आत्मनेपदित्वात् थपोऽसभव ।

६ द्वित्वमपि कृताकृतप्रसङ्गित्वेन नित्य किंतु इट परश्चेति तयो स्पर्धे परत्वात् पूर्वमिडेव ।

७ कुतो हेतोः घस्ग्रहणात् ? अन्यथा विहितविशेषणत्वे एकस्वरात् घस इट् सिद्ध एव ।

चेह नाश्रीयते। क्वसोरिति किम् ? बिभिदिव, बिभिदिम। वमयोर्नियमो न भवति। घस्यादग्रहणमनेकस्वरार्थम्। इटि हि सत्याकारलोप उपधालोपश्च भवति। दरिद्रातेस्त्वामा भवितव्यम्। दरिद्रांचकृवान्। पूर्वेणैव सिद्धे नियमार्थं वचनम्। एभ्य एव क्वसोरिट् भवति, नान्येभ्य इति।

११२. गम-हन-विद्लृ-विश-दृशो वा।

एभ्य परस्य क्वसोरिट् वा भवति। गम्—जग्मिवान्, जगन्वान्। हन्—जघ्निवान्, जघन्वान्। विद्लृ—विविदिवान्, विविद्वान्। विश्—विविशिवान्, विविश्वान्। दृश्—ददृशिवान्, ददृश्वान्। लृकारो लाभार्थस्य विदेर्ग्रहणार्थः, तेन ज्ञानार्थस्य विविद्वान् इत्येव भवति। सत्ताविचारणार्थयोस्त्वात्मनेपदित्वात् क्वसुर्नास्त्येव।

११३. कासासदयायानेकस्वरादाम् णबादेः कृभ्वस्ति चानु तदन्तम्।

काम्, आम्, दय्, अय्—इत्येतेभ्य अनेकस्वरेभ्यश्च धातुभ्य परस्य णबादे स्थाने आमादेशो भवति, आमन्ताच्च परे कृभ्वस्तयो धातवो णबाद्यन्ता अनु—पश्चादनन्तर प्रयुज्यन्ते। कासांचक्रे, कासांबभूव, कासामास। आमांचक्रे, आसांबभूव, आमामास। दयांचक्रे, दयांबभूव, दयामास। पलायांचक्रे, पलायांबभूव, पलायामास। अनेकस्वर—चकामांचकार, चकामांबभूव, चकामामास। चुलुम्पांचकार[1], चुलुम्पाबभूव, चुलुम्पामास। लोलूयांचक्रे, लोलूयांबभूव, लोलूयामास। अस्तेर्भूर्न भवति विधानबलात्। कासाद्यनेकस्वरादिति किम् ? पपाच। कश्चित्तु प्रत्ययान्तादेकस्वरात् अपीच्छति। गौरिवाचचार—गवांचकार, गवाबभूव, गवामास। एव स्वाचकारेत्यादि। अनुग्रहण विपर्यासव्यवहित-निवृत्त्यर्थम्, तेन चक्रेकासां, ईहादेवदत्तश्चक्रे इत्यादि न भवति। उपसर्गस्य तु क्रियाविशेषकत्वात् व्यवधायकत्वं नास्ति। तेन **'उक्षांप्रचक्रुर्नगरस्य मार्गान्'** [भट्टिकाव्य, ३/५] इत्यादि भवत्येव।

११४. गुरुनाम्यादेरऽनृच्छूर्णोः।

गुरुर्नामी आदिर्यस्य तस्माद् धातोर्ऋच्छूर्णुवर्जितात् परस्य णबादे स्थाने आमादेशो भवति, आमन्ताच्च परे कृभ्वस्तय णबाद्यन्ता अनु प्रयुज्यन्ते। ईहाचक्रे, ईहांबभूव, ईहामास। उञ्छांचकार, व्युच्छांचकार, उब्जांचकार। गुरुग्रहणं किम् ? इयेष। नामिग्रहण किम् ? आनर्च। आदिग्रहण किम् ? निनाय। ईङस्तु व्यपदेशिवद्भावाद्[2] भवति। अयाचक्रे, अयाबभूव, अयामास। ईषतु, ईषु इत्यत्र सनिपातलक्षणो विधिरनिमित्त तद्विघातस्येति न भवति। अनृच्छूर्णोरिति किम् ? आनर्च्छ, प्रोर्णुनाव।

११५. जागुषसमिन्धेर्वा।

जागृ, उष, सम्पूर्व इन्ध—इत्येतेभ्यो धातुभ्यः परस्य णबादे स्थाने आमादेशो वा भवति, आमन्ताच्च परे कृभ्वस्तयः णबाद्यन्ता अनु प्रयुज्यन्ते। जागरांचकार, जागरांबभूव, जागरामास, जजागार। ओषांचकार, उवोष। समिन्धांचक्रे, समीधे। सम्ग्रहणं किम् ? इन्धांचक्रे, प्रेन्धांचक्रे। सोपसर्गादिन्धेराम् न भवत्येवेति कश्चित्। अन्ये तु णबादाविन्धेः आमन्तस्यैव प्रयोग इत्याहु। समोऽन्यत्रापि इन्धेराम्विकल्प इत्यन्य। इन्धांचक्रे, ईधे इति।

११६. भीह्रीभृहुवां तिव्वत्।

भी, ह्री, भृ, हु—इत्येतेभ्य परस्य णबादे स्थाने आमादेशो वा भवति स च तिव्वत् आमन्ताच्च परे कृभ्वस्तयः णबाद्यन्ता अनु प्रयुज्यन्ते। बिभयांचकार, बिभयाबभूव, बिभयामास, बिभाय। जिह्रयांचकार, जिह्राय। बिभरांचकार, बभार। जुहवांचकार, जुहाव। तिव्वद्भावाद् द्वित्वमित्व चेति।

---

१. अयं धातुः **शिष्टानां यथादर्शनं सिद्धिः** इति भिक्षुन्यायदर्पणस्यान्तिमन्यायस्य बृहद्वृत्तौ वाक्यकरणीयेषु धातुषु द्रष्टव्यः।

२. व्यपदेशः—मिषम। ईङ एकाक्षरत्वात् ईकारस्यादिरूपोन्तरूपोऽपीति। सोऽस्याऽस्तीति व्यपदेशी।

एष्विति किम् ? अपकिरति बालो धूलि हृष्टः । हृष्टादिष्विति किम् ? अपकिरति हस्ती रजश्चापलेन ।

६. प्रात्तुम्पतेर्गवि ।

प्रात् परस्य तुम्प इत्येतस्य धातोर्गवि कर्तरि सुडागमो भवति । प्रस्तुम्पति गौः । प्रस्तुम्पति वत्सो मातरम् । प्रस्तुम्पको वत्सः । वत्सोऽपि गौरेव । गवीति किम् ? प्रतुम्पति वनस्पतिः ।

७. यजादिस्वपिवचेः संप्रसारणं किति ।

यजादीनां धातूनां स्वपि, वचि—इत्येतयोश्च सप्रसारण भवति किति प्रत्यये परे । यजन्—ईजतु , ईजु , इज्यते, इज्यात्, इष्टः, इष्टवान्, ईजिवान्, इष्ट्वा, इष्टिः । वेन्—ऊयतु , ऊयु । 'अपिति वा' [४/४/२२] इति वक्ष्यमाणवचनात् ववतुः, ववुः, ऊवतु , ऊवु , ऊयते, ऊयात्, उत , उतवान् । व्येन्—संविव्यतु , सविव्यु , सवीयते, सवीयात्, संवीतः, सवीतवान् । ह्वेन्—हूयते, हूयात्, हूत , हूतवान् । टुवपन्—ऊपतु , ऊपु , उप्यते, उप्यात्, उप्त , उप्तवान् । वहंन्—ऊहतु , ऊहु , उह्यते, उह्यात्, ऊढ , ऊढवान् । श्वि—शूयते, शूयात्, शून , शूनवान् । वद—ऊदतुः, ऊदुः, उद्यते, उद्यात्, उदितः, उदितवान् । वस– ऊषतु , ऊषु , उष्यते, उष्यात्, उषित , उषितवान् । स्वप्—सुषुपतु , सुप्यते, सुप्यात्, सुषुप्सति, सुप्त , सुप्तवान् । वचिति वच् ब्रूनादेशौ वा—ऊचतु , ऊचु , उच्यते, उच्यात्, उक्त , उक्तवान् । स्वपिमाहचर्यात् आदादिकस्यैव ग्रहण यौजादिकस्य तु न भवति । वच्यते । कितीति किम् ? इयाज, यक्षीष्ट, वावच्यते, वक्ता ।

यजिर्वयिर्व्ययिह्वेश्च, वपतिर्वहतिस्तथा ।
श्वयिर्वदिर्वसिश्चैते, नव प्रोक्ता यजादय ॥

८. ग्रहि-ज्या-व्यधि-व्रश्च-प्रच्छि-भ्रस्जां ङिति च ।

ग्रहादीनां धातूनां ङिति चकारात् किति च प्रत्यये परे सप्रसारण भवति । जगृहतु , जगृहु , गृह्यते, गृहीतः, जिघृक्षति । गृह्णाति, जरीगृह्यते, जरीगृहीति । ज्या—जिज्यतु , जीयते, जीयात्, जीन । जिनाति, जेजीयते, जेजेति । व्यध्—विविधतुः, विध्यते, विध्यात्, विद्ध । विध्यति, वेविध्यते, वेवेद्धि । व्रश्च्—वृश्च्यते, वृक्ण । वृश्चति, वरीवृश्च्यते । प्रच्छ—प्रच्छ्यते, पिपृच्छिषति, पृष्ट । पृच्छति, परीपृच्छ्यते, पृच्छा । भ्रस्ज्—भृज्ज्यते, भृष्ट । भृज्जति, बरीभृज्ज्यते । ङिति चेति किम् ? ग्रहीता, ज्याता, व्यद्धा, वव्रश्चतु , पप्रच्छतु , प्रश्न , बभ्रज्जतु ।

९. व्यचेरनसि ।

असुवर्जिते किति[1] ङिति च प्रत्यये परे व्यच्धातो सप्रसारण भवति । विचित , विचितवान् । विचति, विचिता, वेविच्यते । अनसीति किम् ? उरुव्यचाः । औणादिकोऽसुः । कुटादित्वात् ङित्त्वम् ।

१०. वशेरयङि ।

यङ्वर्जिते किति ङिति च प्रत्यये परे वश्धातो सप्रसारण भवति । उशित , उशितवान् । ऊशतुः, उष्टः, उशन्ति । अयङीति किम् ? वावश्यते । किङतीति किम् ? वष्टि । व्यचिवशिव्रश्चिप्रच्छिभ्रस्जीना यङ्लुगन्ताना नेच्छन्त्यन्ये । तस् -वाव्यक्त । तिक्—वाव्यक्ति । वावष्ट , वावष्टि । वाव्रष्ट , वाव्रष्टि । पाप्रष्टः, पाप्रष्टि । बाभ्रष्ट , बाभ्रष्टि । अन्ये तु **प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणमिति** यङ्लुक्यपि मन्यन्ते । तेन वेविक्त , वेविक्ति । वरिवृष्ट , वरिवृष्टि । परिपृष्ट , परिपृष्टि । बरिभृष्टः, बरिभृष्टि । अपरे तु विचतिवृश्चतिपृच्छतिभृज्जतीनां नित्यं, ज्याव्यध्व्यच्वशा त्वनित्यमिति मन्यन्ते, तेनेद सिद्ध—'**तस्यास्त्रयस्त्रीनपि विव्यधुः शरैरिति**' । अन्ये तु विविधुरित्येवाहुः ।

---

१. **चानुकृष्ट नानुवर्तते** इति न्यायस्याऽनित्यत्वात् चानुकृष्टमपि कितीत्यनुवर्तते ।

११. णबादौ पूर्वस्य पूर्वेषां व्यथेश्च]।

पूर्वेषामिति पूर्वग्रहणेन यजादेरारभ्य समस्तसूत्रस्था धातवो गृह्यन्ते। पूर्वेषां यजादीनां धातूनां व्यथेश्च णबादौ परे द्वित्वे सति पूर्वस्य सम्प्रसारण भवति। यज्—इयाज, इयजिथ। वेन्—उवाय, उवयिथ[1]। व्येन्—सविव्याय, संविव्ययिथ। टुवपन्—उवाप, उवपिथ। वहन्—उवाह, उवहिथ। वद—उवाद, उवदिथ। वस—उवास, उवसिथ। ह्वेन्श्वयत्योस्तु अग्रे विशेषविधिः। स्वपक्—सुष्वाप, सुष्वपिथ। वचक्—उवाच, उवचिथ। ग्रहादीना ग्रहेरविशेष, कृते सम्प्रसारणे 'ऋतोऽत्' [४/१/६५] इति अत्त्वे जग्राह, जग्रहिथ। ज्या—जिज्यौ, जिज्यिथ। व्यध्—विव्याध, विव्यधिथ। व्रश्चिप्रच्छिभ्रस्जीनामविशेषः। वव्रश्च, वव्रश्चिथ। पप्रच्छ, पप्रच्छिथ। बभ्रज्ज, बभ्रज्जिथ। व्यच्—विव्याच, विव्यचिथ। वश्—उवाश, उवशिथ। व्यथ्—विव्यथे, विव्यथाते, विव्यथिरे। णबादाविति किम्? यायज्यते, वावच्यते, वाव्यथ्यते।

१२. स्वपेरऽङि।

स्वपेः सम्प्रसारण भवति अङ्प्रत्यये परे। ण्यन्तादेवाङ्, अतो ण्यन्त एव स्वपितिर्गृह्यते। असूषुपत्। अङि सम्प्रसारण गुणो ह्रस्वत्व द्वित्व पूर्वस्य दीर्घत्वमित्यत्र क्रमः।

१३. स्यमिव्येनोश्च यङि।

स्यमु, व्येन्—इत्येतयोश्चकारात् स्वपेश्च सम्प्रसारण भवति यङि परे। सेसिम्यते, सेसिमीति। वेवीयते, वेवयीति। सोषुप्यते, सोषुपीति। यङ्लुकि नेच्छन्त्यन्ये। सस्यन्ति, वाव्याति, सास्वप्ति। यङीति किम्? व्ययति, स्वपिति।

१४. श्वेर्वा णबादौ च।

णबादौ चकाराद् यङि च परे श्वयतेर्धातोः सम्प्रसारण वा भवति। शुशाव। शिश्वाय—इह पक्षे सम्प्रसारण-निषेधात् 'णबादौ पूर्वस्य…' [४/४/११] इत्यादिना पूर्वस्यापि सम्प्रसारण न। अह शुशव, शिश्वय। शुशुवतुः, शिश्वियतुः। शुशविथ, शिश्वयिथ। शोशूयते, शोशवीति। शेश्वीयते, शेश्वयीति। अपिति णबादौ कित्त्वाद् यजादित्वेन प्राप्ते पिति णबादौ यङि चाऽप्राप्ते विभाषा।

१५. औ सन्नङि।

सन्परे अङ्परे च औ विषये श्वयतेः सम्प्रसारणं वा भवति। शुशावयिषति, शिश्वाययिषति। अशूशवत्, अशिश्वयत्। विषयविज्ञानादन्तरङ्गमपि वृद्ध्यादिक सम्प्रसारणेन बाध्यते। कृते च तस्मिन् वृद्धिस्तत आवादेशः उपधाह्रस्वत्वम्। ततो ञिकृतस्य स्थानित्वात् शोर्द्वित्व, ततः पूर्वदीर्घः। आविति किम्? शिश्वयिषति, अशिश्वियत्। सन्नङीति किम्? श्वाययति।

१६. ह्वः।

विकल्पो निवृत्तः पृथग्योगारम्भात्। सन्परे अङ्परे च औ विषये ह्वयतेः सम्प्रसारण भवति। जुहावयिषति, अजूहवत्। आविति विषयसप्तमीति किम्? ञिविषय एवान्तरङ्गमपि युगागमं बाधित्वा संप्रसारण[2] यथा स्यात्। सन्नङीति किम्? ह्वाययति। उत्तरेणैव सिद्धे ञेरन्यस्मिन् द्वित्वनिमित्तप्रत्ययव्यवधायके संप्रसारण मा भूदित्येवमर्थम्, तेनेह न भवति—ह्वायकमिच्छति—ह्वायकीयति। ततः सन्—जिह्वायकीयिषति[3]।

१७. द्वित्वे।

द्वित्वविषये ह्वयतेः संप्रसारणं भवति। जुहाव, जुहुवतुः, जोहूयते, जोहवीति, जुहूषति।

---

१. 'तृजिवृसि…' [४/३/१०७] इति वेटि 'य्वोः पुगागमहले' [४/४/४६] इति यकारलोपे उवथ।

२. कृते तु सम्प्रसारणे युग् न भवति। आकारान्तानामेव पुग्विधान तद्बाधकस्य युगागमस्यापि आकारान्तानामेव विधानत्वात्।

३. अत्र णकस्यापि व्यवधानं, अतः सम्प्रसारणाऽभावः।

१८. द्युतिस्वाप्योः पूर्वस्य ।

स्वापीति ण्यन्तनिर्देशः । द्युते. स्वापेश्च द्वित्वे सति पूर्वस्य संप्रसारण भवति । दिद्युते, अदिद्युतत्, देद्युत्यते, विदिद्युतिषते, विदिद्योतिषते । स्वापेः—सुष्वापयिषति । स्वपेर्णौ णके क्यचि औ अङि च असुष्वापकीयत् । स्वापे. क्विबन्तात् कर्तुः क्विपि यङ् । सोष्वाप्यते । अन्ये तु औ सति द्वित्वनिमित्तानन्तर्ये एवेच्छन्ति । स्वापकीयतेः सनि सिष्वापकीयिषति । स्वापीति ण्यन्तनिर्देश· किम् ? णकान्तात् क्यचि सनि च सिष्वापकीयिषति । स्वाप चिकीर्षति—सिष्वापयिषति । अत्र न स्वापि घञा व्यवधानात् । सोषोपयिषति । अत्रापि यङ्लुगन्तात् ञि· न तु स्वापिः ।

१९. न संप्रसारणे ।

संप्रसारणे परे पूर्वस्य संप्रसारणं न भवति । सवीयते, विध्यते, विच्यते, वेवीयते, वेविध्यते, वेविच्यते । संप्रसारणे इति वचनात् संयुक्ते सति द्वयोर्मध्ये परस्यैव सप्रसारण भवति, पूर्वस्य त्वनेन निषिध्यते ।

२०. णबादौ वयो यः ।

नेत्यनुवर्तते । पूर्वस्येति निवृत्तम् । वेनादेशस्य वयेर्यकारस्य पूर्वस्य परस्य च णबादौ परे संप्रसारणं न भवति । ऊयतुः, ऊयुः ।

२१. वेरऽयः ।

वेनोऽयकारान्तस्य पूर्वस्य परस्य च णबादौ परे सप्रसारणं न भवति । ववौ, वविथ । अय इति किम् ? उवाय, उवयिथ ।

२२. अपिति वा ।

वेनोऽयकारान्तस्य सप्रसारणं वा भवति अपिति णबादौ परे । ववतु , ववुः । ऊवतु , ऊवु· । द्वित्वे कृते परत्वाद् धातोरुवादेशे सति पश्चात् पूर्वस्य समानस्य दीर्घः । अय इति किम् ? ऊयतु·, ऊयुः ।

२३. ज्यश्च यपि ।

अग्रे विकल्पविधानान्नित्योऽयं निषेध. । ज्या इत्येतस्य चकारात् वेनश्च यपि परे सप्रसारण न भवति । प्रज्याय, उपज्याय । प्रवाय, उपवाय ।

२४. व्यः ।

व्येनो यपि परे सप्रसारणं न भवति । प्रव्याय, उपव्याय । योगविभाग उत्तरार्थ ।

२५. संपरिभ्यां वा ।

सपरिभ्यां परस्य व्येनो यपि परे संप्रसारण वा भवति । सव्याय, सवीय । परिव्याय, परिवीय । निरपेक्षत्वे-नान्तरङ्गत्वात् प्रागेव संप्रसारणस्य दीर्घत्वं[1] न तु तुगागमः । समो नेच्छन्त्येके, तेन नित्यं सव्याय ।

२६. चायः कीर्यङि ।

चायृन् इत्येतस्य यङि परे कीरित्यादेशो भवति । चेकीयते । दीर्घनिर्देशो यङ्लुगर्थः । चेकीत. ।

---

१. 'अन्त्यसंप्रसारणस्याऽचः' [४/१/५०] इत्यनेन ।

२७. दीङो दीय् णबादौ ।

दीङ्धातोः दीय् इत्ययमादेशो भवति णबादौ परे । उपदिदीये, उपदिदीयाते, उपदिदीयिरे । उपदिदीयिध्वे, उपदिदीयिढ्वे । उपदिदीयानः । दीङो ङित्करणं यङ्लुग्निवृत्त्यर्थम् । उपदेदियतः । णबादाविति किम् ? उपदेदीयते, उपदानम् ।

२८. प्यायः पीस्तयोः ।

प्यायते पीरित्यादेशो भवति, तयोर्णबादौ यङि च परे । आपिप्ये, आपिप्याते, आपिप्यिरे । पेपीयते, प्रपेपीयते । दीर्घनिर्देशो यङ्लुगर्थः । आपेपेति, आपेपीतः ।

२९. क्तयोरनुपसर्गस्य ।

अनुपसर्गस्य प्यायः क्तक्तवत्वोः प्रत्यययोः परयोः पीरित्यादेशो भवति । पीनं मुखम् । पीनवन्मुखम् । क्तयोरिति किम् ? प्यायते । अनुपसर्गस्येति किम् ? प्रप्यानो मेघः ।

३०. आङोऽन्धूधसोः ।

आङ उपसर्गात् परस्य प्यायतेरन्धावूधसि चार्थे क्तयोः परतः पीरादेशो भवति । आपीनोऽन्धुः । आपीनमूधः । अन्धुर्व्रणं ऊधसो वा पर्यायः[1] । आङ इति किम् ? प्रप्यानोऽन्धुः । परिप्यानमूध. । अन्धूधसोरिति किम् ? आप्यानश्चन्द्रः । आङ[2] एवेति नियमात् प्राप्यानमूध इत्यत्र आङन्तादुपसर्गान्न भवति । अनुपसर्गस्य तु पूर्वेण भवत्येव । पीनोऽन्धुः, पीनवानन्धु. । पीनमूधः, पीनवदूधः । अन्ये तु प्यायतेः केवलस्याङ्पूर्वस्य आङन्तोपसर्गपूर्वस्यैव च प्रयोगमिच्छन्ति, नान्यपूर्वस्य । तन्मते प्रप्यानपरिप्यानादयोऽप्रयोगाः । क्तयोरिति किम् ? आप्याय्यः[3] ।

३१. स्फायः स्फीर्वा ।

स्फायते क्तयोः परतः स्फीरादेशो वा भवति । स्फीतः, स्फीतवान् । संस्फीतः, संस्फीतवान् । स्फातः, स्फातवान् । क्तयोरिति किम् ? स्फातिः[4] । विकल्प नेच्छन्त्यन्ये ।

३२. प्रसमः[5] स्त्यः स्तीः ।

प्रसम् इत्येवंसमुदायपूर्वस्य स्त्यायतेः क्तयोः परतः स्तीरित्यादेशो भवति । प्रसंस्तीतः, प्रसंस्तीतवान् । प्रसम इति किम् ? संप्रस्त्यानः, संप्रस्त्यानवान् । स्त्यानः, संस्त्यानः । प्रसमो नेच्छन्त्यन्ये[6] ।

३३. प्रात्तश्च मो वा ।

प्रात् केवलात् परस्य स्त्यायतेः क्तयोः परयोः स्तीरित्यादेशो भवति क्तयोस्तकारस्य[7] च वा मकारो भवति । प्रस्तीमः, प्रस्तीमवान् । प्रस्तीतः, प्रस्तीतवान् ।

---

१. ननु तर्हि आङोऽन्धाविति सिद्धे ऊधोग्रहणं किमर्थम् ? सत्यम् । ऊधोग्रहणं बोधयति आपीन इति प्रयोगो व्रणे विशेषणतया ऊधसि च पर्यायेण । यद्वा ऊधोग्रहणमेव ज्ञापयति । अन्धुशब्दः कैश्चिदेव ऊधसि कीर्त्यते, अन्यथा अन्धुनापि साध्यसिद्धिः ।

२. अत्राऽप्यनुपसर्गस्येत्यनुवर्तनीयं, ततश्च आङ्पूर्वस्य 'प्यायः पीस्तयोः' [४/४/२८] इति पीः । कथं भूतस्याङोऽनुपसर्गस्य किमक्तं भवति केवलस्येत्यर्थः इत्यवधारणान्नियन्त्रणात् न तु सिद्धे सत्यारम्भोनियमार्थ इति । यद्वा सर्वं वाक्यं सावधारणं इति न्यायादेवकारः ।

३. 'कालाध्वभावदेशं···'[२/४/१८] इत्यनेन मासादेः कर्मत्वेऽन्तर्भूतण्यर्थत्वेन वा सकर्मकत्वे कर्मणि ध्यण्, भावे तु नपुंसकत्वं स्यात् ।

४. तत्कथं स्फीतिः ? उच्यते—स्फायते स्म क्तः, स्फीत इवाचरति 'कर्तुः क्विप् ।' स्फीततीति 'स्वरेभ्य इः' ।

५. व्यावृत्तौ केवलात् प्रोपसर्गात् न दर्शितं उत्तरेण विधानात् ।

६. ते ह्येतत् सूत्रं न कुर्वन्ति ।

७. आदेशे तकारविधानात् धातोस्तकारस्य मकारादेशो न प्राप्नोतीति प्रत्ययतकारस्यैव मकारः ।

३४. श्यः शीर्द्रवघनस्पर्शयोर्नश्चाऽस्पर्शे ।

द्रवघनत्वं—द्रवकाठिन्यम् । द्रवघने स्पर्शे च वर्तमानस्य श्यायते: क्तयो: परत: शीरित्यादेशो भवति तत्संनियोगे च क्तयोस्तकारस्याऽस्पर्शे विषये नकारादेशो भवति । शीनं घृतम् । शीनवद् घृतम् । शीनं मेद: । शीनवन्मेद: । द्रवावस्थाया: काठिन्यं गतमित्यर्थ: । स्पर्शे—शीतं[1] वर्तते । शीतो वायु: । गुणमात्रे तद्वति चार्थे स्पर्शविषयो भवति । द्रवघनस्पर्शयोरिति किम् ? संश्यानो वृश्चिक:—शीतेन संकुचित इत्यर्थ: । **'संयोगादेरातो यलवत:'** [५/३/७४] इति नत्वम् ।

३५. प्रते: ।

प्रतिपूर्वस्य श्यायते: क्तयो: परत: शीरित्यादेशो भवति तत्संनियोगे च क्तयोस्तकारस्य नकार: । प्रतिशीन:, प्रतिशीनवान् । प्रतिपूर्वोऽयं रोगे वर्तते इति पूर्वेणाऽप्राप्तौ वचनम् ।

३६. वाभ्यवाभ्याम् ।

अभि, अव—इत्येताभ्यां परस्य श्यायते: क्तयो: परयो: शीरित्यादेशो वा भवति तत्संनियोगे च क्तयो: तस्याऽस्पर्शे नकार: । अभिशीन:, अभिशीनवान् । अभिश्यान:, अभिश्यानवान् । अवशीन:, अवशीनवान् । अवश्यान:, अवश्यानवान् । द्रवघनस्पर्शयोरप्यनेन परत्वाद् विकल्पो भवति । अभिशीनं घृतम् । अभिश्यानं घृतम् । अवशीनं हिमम् । अवश्यानं हिमम् । अभिशीतो वायु: । अवशीतो वायु: । स्पर्शत्वान्न नत्वम् । अभिश्यानो वायु: । अवश्यानो वायु: । **'संयोगादेरातो यलवत:'** [५/३/७४] इति स्पर्शेऽपि नत्वम् । अभ्यवाभ्यामिति किम् ? संश्यान:, संश्यानवान् । केचित्तु समा व्यवधानेऽपीच्छन्ति । अभिसंशीन:, अभिसंशीनवान् इत्यादि । समस्ताभ्यामपीत्यन्ये । अभ्यवशीन:, अभ्यवश्यान: । वाशब्दस्य च व्यवस्थित-विभाषार्थादन्योपसर्गान्ताभ्यां न भवति । समभिश्यान:, समभिश्यानवान् । समवश्यान:, समवश्यानवान् ।

३७. प्राद्दान आरम्भे क्ते तश् ।

शकार: सर्वादेशार्थ:[2] । अकार उच्चारणार्थ: । आरम्भे—आदिकर्मणि वर्तमानस्य प्रशब्दादुत्तरस्य दान्धातो: तशादेशो वा भवति क्ते प्रत्यये परे । प्रत्त:, प्रदत्त:—दातुं प्रारब्धवानित्यर्थ: । प्रादिति किम् ? परीत्तम् । उत्तरेण नित्यमेव । दान इति किम् ? दोंच्—प्रत्तम् । आरम्भे इति किम् ? अन्यत्र नित्यमेव । प्रकर्षेण दीयते स्म—प्रत्तम् । क्ते इति किम् ? प्रत्तवान्—दातुं प्रवृत्त इत्यर्थ: ।

३८. विनिस्वन्ववेभ्य: ।

एभ्य: परस्य दान: क्ते परे तशादेशो वा भवति । वीत्त, विदत्तम् । नीत्त, निदत्तम् । सूत्त, सुदत्तम् । अनूत्त, अनुदत्तम् । अवत्तं, अवदत्तम् । उत्तरेण नित्य प्राप्ते विभाषेयम् । केचिदत्राप्यारम्भे एव विकल्पमिच्छन्ति । यदाहु —

अवदत्तं विदत्तं च, प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तं च, निदत्तमिति चेष्यते ॥

तन्मतसंग्रहार्थमारम्भ इत्यनुवर्तनीयम् ।

३९. स्वरादुपसर्गाद्वऽपिद्दस्ति किति ।

पूर्वयोगारम्भाद् वेति निवृत्तम् । स्वरान्तादुपसर्गात् परस्य पिद्वर्जितदाधातो: तशादेशो भवति तकारादौ किति प्रत्यये परे । प्रत्त:, प्रत्तवान् । परीत्त:, परीत्तवान् । परीत्त्रिमम्, प्रणीत्त्रिमम् । द्यतेरपीत्वं बाधित्वा विशेषविहितत्वात्[3]

१ कर्तरि क्त: । अत्र शीतस्पर्शो मुख्यभावेन । शीतो वायु इत्यत्र तु गौणभावेन वर्तते ।
२ अन्यथा षष्ठ्यान्त्यस्येति प्रवर्तते ।
३. उपसर्गात् इति विशेषविधानात् । उत्तरत्र तु सामान्यम् ।

तथैव भवति। अवत्तवान्, अवत्ति । उपसर्गादिति किम् ? दधि दत्तम्। लता दिता। स्वरादिति किम् ? निर्दत्त, दुर्दत्तम्। निर्दित, दुर्दितम्। अपिद् इति किम् ? प्रदाता व्रीहय.। निदातानि भाजनानि। कितीति किम् ? प्रदाता। तीति किम् ? प्रदाय।

४०. दत्।

पिद्वर्जितदाधातोस्तादौ किति परे दत् इत्ययमादेशो भवति। दत्त., दत्तवान्, दत्ति, दत्त्वा। द्यते परत्वात् इत्वम्। दित, दितवान्। अपिद् इति किम् ? दात बर्हि । अवदात मुखम्।

४१. द्यति-स्यति-मा-स्थामिः।

एषां तादौ किति प्रत्यये इकारोऽन्तादेशो भवति। द्यतेर्दद्भावस्य शेषाणामीत्वस्याऽपवाद.। द्यतिस्यतीति गणनिर्देशो दैवादिकयोरेव ग्रहणार्थ। दो—निर्दित, निर्दितवान्, दितिः, दित्वा। सो—अवसितः, अवसितवान्, सितिः, सित्वा। मा—मित, मितवान्, मिति, मित्वा। स्था—स्थित, स्थितवान्, स्थिति, स्थित्वा। तीति किम् ? अवदाय। कितीति किम् ? अवदाता, अवसाता।

४२. श्यतेर्व्रते।

श्यतेर्व्रतविषये प्रयोगे इकारादेशो भवति तादौ किति परे। संशितं व्रतं—असिधारातीक्ष्णमित्यर्थ.। संशित साधुः—व्रते यत्नवानित्यर्थ.। संशितव्रत साधुः। संशितशब्द अन्यत्राप्यस्तीति[१] व्रतमिति विशेषणं न दुष्यति। वक्ष्यमाणविकल्पबाधनार्थं वचनं, तेन व्रतविषये संशात इति न भवति। व्रत इति किम् ? निशात।

४३. छाशोर्वा।

छो, शो—इत्येतयोस्तादौ किति प्रत्यये परे इकारादेशो वा भवति। अवच्छितः, अवच्छितवान्। अवच्छातः, अवच्छातवान्। निशित, निशितवान्। निशात., निशातवान्। श्यतिशिनोत्योरपि रूपद्वयसिद्धौ श्यतेर्विकल्पवचनं **'क्तं नञ्विशिष्टेन'** [३/१/१०७] इति समासार्थम्[२]। शाताशितम्।

४४. हाको[३] हिः क्त्वि।

ओहांक् इत्येतस्य तादौ किति क्त्वाप्रत्यये परे हिरादेशो भवति। हित्वा। ककारो हाङ्निवृत्त्यर्थः। हात्वा। क्त्वीति किम् ? हीनः। तीति किम् ? प्रहाय। यङ्लुकि—जहित्वा। द्वित्वे पूर्वदीर्घत्वमपीच्छन्त्येके। जाहित्वा। उभयत्रेटि आतो लुक्।

४५. धानः।

दधातेस्तादौ किति प्रत्यये हिरादेशो भवति। क्त्वीति न सबध्यते पृथग्योगात्। विहितः, विहितवान्, हिति, हित्वा। नकारो धेट् इति निवृत्त्यर्थः। धीत, धीतवान्, धीतिः, धीत्वा। तीति किम् ? प्रधाय। यङ्लुकि इट्। दाधित, दाधितवान्, दाधित्वा। केचित्तु दोसोहाग्धाना यङ्लुकि आगमशासनमनित्यं इति न्यायादिट नेच्छन्ति, इत्वहित्वविधि च निषेधन्ति। तन्मते दत्त., दत्तवान्। परमात्रस्यैव दद्भाव इति मते निर्दादत्त., निर्दादत्तवान्, अवमासीन, अवमासीनवान्, जाहात[४], जाहातवान्, दाधीतः, दाधीतवान् इत्येव भवति।

---

१ ननु व्रते इत्व प्रत्ययादि इत्युक्तार्थत्वात् व्रतस्याऽप्रयोग प्राप्नोतीत्याह—अन्यत्रापि। अन्यस्मिन्नर्थे इत्यर्थ।

२. अन्यथा धातुभेदात प्रकृतिभेदे स न स्यात्।

३. इ इत्येव सिद्धे हिकरणमुत्तरार्थम्। इकरणे ह्युत्तरत्र धित इति स्यात्।

४ 'हाकः' [३/४/७५] इति अनुबन्धनिर्देशादत्र ईत्वं न।

४६. यपि चाऽदो जग्ध् ।

यपि चकारात् तादौ किति परं अदो जग्ध् इत्यादेशो भवति । प्रजग्ध्य, विजग्ध्य । जग्धः, जग्धवान्, जग्ध्वा, जग्धि. । यपि चेति किम् ? अदनम् । तीति किम् ? अद्यात् । कितीति किम् ? अत्तव्यम् । कथमन्नम् ? अनितेरौणादिको नः । **'अदोऽनन्न'** [५/२/८१] इति ज्ञापकाद् वा अद्यते तदित्यन्नम् । एकपदाश्रयत्वेन अन्तरङ्गत्वात् यबादेशात् प्रागेव जग्धादेशे सिद्धे यब्ग्रहण **अन्तरङ्गानपि विधीन् यबादेशो बाधते** इति न्यायज्ञापनार्थम्, तेन प्रशम्य, प्रपृच्छ्य, प्रदीव्य, प्रखन्य, प्रस्थाय, प्रपाय[1], प्रदाय, प्रधाय, प्रपठ्य इत्यादौ दीर्घत्व शत्वमूत्वमात्वमित्वमीत्व हित्वमिट्त्व यपा बाध्यते ।

४७. ह्रस्वस्य पित्कृति तुक् ।

ह्रस्वान्तस्य धातो. पिति कृत्प्रत्यये तुगागमो भवति । जगत्, अग्निचित्, सोमसुत्, पुण्यकृत्, आगत्य, विजित्य, प्रस्तुत्य, प्रहृत्य । ह्रस्वस्येति किम् ? ग्रामणी , आलूय । पिदिति किम् ? चितं, स्तुतम् । कृतीति किम् ? जुहोति । ग्रामणि कुलं, वृत्रह कुलं—इत्यत्र तु **असिद्धं बहिरङ्गमन्तरङ्गे** इति न भवति । मुशू[2], उपशूय इत्यत्रान्तरङ्गत्वाद् विशेषविहितत्वाच्च संप्रसारणं दीर्घत्व च भवति ।

४८. वेर्लोपः ।

विप्रत्ययस्य लोपो भवति सर्वत्र । वेरिति निरनुबन्धग्रहणेन च्विक्विप्विण्विचा ग्रहणम् । च्वि—शुक्लीकरोति, शुक्लीभवति । क्विप्—उखास्रत्, पर्णध्वत्, विश्वाराट् । विण्—तुरापाट्, प्रष्ठवाट् । विच्—कीलालपा , जाग ।

४९. य्वोः पुगऽयहसे ।

धातोर्यकारवकारयोर्लोपो भवति पुकि यकारवर्जिते हसादौ च प्रत्यये परे । पुग्ग्रहणमप्रत्ययार्थम् । क्नोपयति, क्ष्मापयति । क्नूत, क्ष्मातं, ऊतं[3], देदिव.[4], शेश्रिव , अजेजीव[5] । दिदिवान्, दिदिवांसौ, दिदिवांस । कण्डूमिच्छतीति कण्डूयते. क्विप् । कण्डू, कण्डुवौ, कण्डुव । लोलू, बोभृ । विचि—तेवृड्देवृङो मुने , मुदे. । कथ वृक्षवयतीति वृक्षव् ? ञिलोपस्य स्थानिवत्त्वाद् भविष्यति । यवर्जन किम् ? क्नूय्यते, सेव्यते । हसे इति किम् ? क्नूयिना, देविता । **प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणाद्** धात्ववयवे न भवति । व्रश्चक ।

५०. सृजदृशोऽमकिति झसे ।

सृज्, दृश्—इत्येतयोर्धात्वोरमागमो भवति झसादौ प्रत्यये परे अकिति—किति तु न भवति । मित्त्वात्स्वरात्परः । स्रष्टा, स्रष्टुं, स्रष्टव्य, अस्राक्षीत् । परत्वादमागमे सति वृद्धिः । स्रक्ष्यति, द्रष्टा, द्रष्टुं, द्रष्टव्य, अद्राक्षीन्, द्रक्ष्यति । सरिस्रष्टि, सरिस्रष्ट. । दरिद्रष्टि, दरिद्रष्ट । ङित्यपि नेच्छन्त्येके । झसे इति किम् ? सर्जन, दर्शनम् । अकितीति किम् ? सृष्ट., सृष्टवान्, दृष्ट , दृष्टवान्, सिसृक्षति, दिदृक्षते । प्रसज्याश्रयणात् प्रतिषेधे झसे इति नाश्रीयते, तेन सिजलुको झसादित्व प्रति वर्णाश्रयत्वेन स्थानिवद्भावाभावेऽपि कित्त्व प्रति स्थानिवद्भावात् किदाश्रय प्रतिषेधो भवति । असृष्ट[6], असृष्ठा । समदृष्ट, समदृष्ठा । धातोः स्वरूपग्रहणे तत्प्रत्यये[7] विज्ञानात् चेह न भवति । रज्जुसृड्भ्यां, देवदृग्भ्याम् ।

---

१. **'ईर्हसेऽप्यपि विङत्यशिति'** [४/१/५७] इति प्राप्तमीत्वम् ।

२ श्वयतेः क्विपि ।

३ ऊयीङ्—तन्तुसन्ताने ।

४. दिव्धातोर्यङ्लुकि तिबादेरुत्तमपुरुषस्य द्विवचने ।

५. जीवधातोर्यङ्लुकि दिबादेरुत्तमपुरुषस्य द्विवचने ।

६ अत्र सिच. कित्त्व तप्रत्ययस्य च झसत्वमस्ति । प्रसज्यप्रतिषेधात् सर्वं कित्त्वं प्रतिषिध्यते । यस्य कित्त्व तस्मिन्नेव झसे परे अम् न भवति इति तु नाश्रीयते ।

७. तस्माद्धातोर्झसादौ प्रत्यये कार्यविज्ञानम् । अत्र तु रज्जुसृडिति नाम्नः ।

५१. स्पृश-मृश-कृष-तृप-दृप-सृपां वा ।

एषां किद्वर्जिते झसादौ प्रत्यये परे अम्‌आगमो वा भवति । स्प्रष्टा, स्पर्ष्टा । स्प्रष्टु, स्पर्ष्टुम् । स्प्रष्टव्य, स्पर्ष्टव्यम् । अस्प्राक्षीत्, अस्पार्क्षीत् । स्प्रक्ष्यति, स्पर्क्ष्यति । एवं म्रष्टा, मर्ष्टा । क्रष्टा, कर्ष्टा । त्रप्ता, तर्प्ता । द्रप्ता, दर्प्ता । स्रप्ता, सर्प्ता । झसे इति किम् ? स्पर्शनं, मर्शनम् । अकितीति किम् ? स्पृष्टः, पिस्पृक्षति ।

५२. नामिराण्णबाद्याद्यक्यादादीनां धो ढः ।

नाम्यन्तात् रेफान्ताच्च परेषां णबादि, द्यादि, क्यादादि—इत्येतेषां धस्य ढो भवति । तुष्टुढ्वे, चकृढ्वे, अदिढ्वम्[1], अधिढ्वम्, अचेढ्वम्, अच्योढ्वम्, अप्लोढ्वम्, अकृढ्वम्, चेषीढ्वम्, कृषीढ्वम्, अतीर्ढ्वम्[2], तीर्षीढ्वम् । नामिरादिति किम् ? अपग्ध्वम्, पक्षीध्वम् । नामिरादिति धातोर्विशेषणं किम् ? ववसिध्वे, आसिध्वम्, आसिषीध्वम् । णबादिद्यादिक्यादादीनामिति किम् ? स्तुध्वे, स्तुध्वम्, अस्तुध्वम् ।

५३. हलाण्णीड्भ्यां वा ।

हलप्रत्याहारात् परात् णेरिटश्च परेषां णबादि, द्यादि, क्यादादि—इत्येतेषां धस्य ढो वा भवति । अग्राहिढ्वं, अग्राहिध्वम् । ग्राहिषीढ्व, ग्राहिषीध्वम् । अनायिढ्व, अनायिध्वम् । नायिषीढ्व, नायिषीध्वम् । अलाविढ्व, अलाविध्वम् । लाविषीढ्व, लाविषीध्वम् । अकारिढ्व, अकारिध्वम् । कारिषीढ्वं, कारिषीध्वम् । णबादौ णिर्न संभवतीति इटः— जगृहिढ्वे, जगृहिध्वे । अग्रहीढ्व, अग्रहीध्वम् । ग्रहीषीढ्व, ग्रहीषीध्वम् । उपदिदीयिढ्वे, उपदिदीयिध्वे । आयिढ्व, आयिध्वम् । अयिषीढ्व, अयिषीध्वम् । लुलुविढ्वे, लुलुविध्वे । अलविढ्व, अलविध्वम् । लविषीढ्व, लविषीध्वम् । तत्वरिढ्वे, तत्वरिध्वे । अत्वरिढ्व, अत्वरिध्वम् । त्वरिषीढ्वम्, त्वरिषीध्वम् । ववलिढ्वे, ववलिध्वे । अवलिढ्वं, अवलिध्वम् । सवलिषीढ्व, सवलिषीध्वम् । हलादिति किम् ? घानिषीध्वम्, आसिषीध्वम् ।

५४. हनो ञ्णिति घात् ।

ञ्णिति प्रत्यये परे हन्तेर्घात् इत्यादेशो भवति । घातः, घातयति । घातकः, साधुघाती, घातघातम् । ञ्णितीति किम् ? हतः ।

५५. णिणपोर्घन् ।

णौ णपि च परे हन्तेर्घन् इत्यादेशो भवति । अघानि, घानिषीष्ट । जघान । अहं जघान, अहं जघन । णपि उत्तरसूत्रेणैव सिद्धे घातो बाधनार्थं वचनम् ।

५६. हेश्च पूर्वाद्धो घोऽनङि ।

हेश्चकाराद् हनो धातोरङ्वर्जिते प्रत्यये परे द्वित्वे सति पूर्वस्मात् परस्य हस्य घो भवति । प्रजिघाय, प्रजिघीषति, प्रजेघीयते, प्रजेघेति । हन्—जिघांसति, जघन्यते, जंघनीति । अनङीति किम् ? प्राजीहयत् । अनङि द्विर्वचननिमित्तप्रत्ययेऽनन्तरस्य विज्ञानादिह न भवति । हननीयितुमिच्छति—जिहननीयिषति । अङ्पर्युदासात्[3] तु ञिव्यवधाने भवति । प्रजिघाययिषति[4] ।

---

१. 'ह्रस्व स्यापिह्राधः' [३/४/१२०] इतीत्वम् ।

२ ननु नाम्यन्तादित्यत्र विहितव्याख्याने क्रियमाणे नित्यत्वात् 'ॠतां क्डितीर्' [४/३/५३] इत्यनेन इरादेशे सत्यपि तद्धातोर्भावकर्मणि अतीर्ढ्वमित्यादीनि सिध्यन्तु नाम, किं पुना रेफग्रहणेन ? उच्यते—दाधाधात्वोः अदिढ्वम्, अधिढ्वम्—इत्यादीनि विधानसमये नाम्यन्ताभावान्न सेत्स्यन्तीति रेफग्रहणम् ।

३· प्रतिषेधात् ।

४. प्रहिण्वन्तं प्रयुङ्क्ते ञिन्, वृद्धिः । प्रहाययितुमिच्छति सन् ।

५७. जेर्गिः सण्णबादौ ।

सन्प्रत्यये णबादौ च द्वित्वे सति पूर्वस्मात् परस्य जयतेर्गिरादेशो भवति । जिगीषति, विजिगीषते । जिगाय, विजिग्ये । सन्णबादाविति किम् ? जेजीयते । जिनातेर्जिरूपस्य लाक्षणिकत्वात् जिज्यतु ।

५८. चे: किर्वा ।

सनि णबादौ च परे द्वित्वे सति पूर्वस्मात् परस्य चिनोते किरादेशो वा भवति । चिकीषति, चिचीषति । चिकाय, चिचाय । चिक्ये, चिच्ये । सन्णबादाविति किम् ? चेचीयते ।

५९. भूतेऽनद्यतनेऽयदि स्मृत्यर्थे स्यत्यादिः ।

स्मृत्यर्थे धातावुपपदे सति भूताऽनद्यतनेऽर्थे वर्तमानाद् धातो स्यत्यादिर्विभक्तिर्भवति अयदि- न चेद्यच्छब्दः प्रयुज्यते । दिबादेरपवाद । स्मरसि साधो ! स्वर्गे स्थास्यामः । अभिजानासि देवदत्त ! कश्मीरेषु वत्स्याम । एवं बुध्यसे, चेतयसे, अध्येष्यऽवगच्छसि[1] चैत्र ! कलिङ्गेषु गमिष्याम । अयदीति किम् ? अभिजानासि मित्र ! यत् कलिङ्गेष्ववसाम । स्मृत्यर्थे इति किम् ? मैत्र ! वयं कलिङ्गेष्वगच्छाम ।

६०. वाकाङ्क्षायाम् ।

अयदीति नानुवर्तते । स्मृत्यर्थे धातावुपपदे सति यदि प्रयुज्यमाने अप्रयुज्यमाने वा प्रयोक्तु क्रियान्तराकाङ्क्षाया सत्या भूतानद्यतनेऽर्थे वर्तमानाद् धातो स्यत्यादिर्विभक्तिर्वा भवति । स्मरसि मित्र ! कश्मीरेषु वत्स्यामस्तत्रौदन भोक्ष्यामहे पास्याम: पयांसि च । स्मरसि मित्र ! कश्मीरेषु अवसाम, तत्रौदनमभुञ्ज्महि अपिबाम पयांसि च । स्मरसि मित्र ! यत् कश्मीरेषु वत्स्यामो यत्तत्रौदन भोक्ष्यामहे पास्याम: पयांसि च । स्मरसि मित्र ! यत् कश्मीरेष्ववसाम, यत्तत्रौदनमभुञ्ज्महि अपिबाम पयांसि च । अत्र वासो लक्षण, भोजन पान च लक्ष्यमिति लक्ष्यलक्षणयो सबन्धे प्रयोक्तुराकाङ्क्षा भवति ।

६१. कृताऽस्मृत्यतिनिह्नवयोर्णबादिः ।

कृतस्यापि व्यापारस्य चित्तव्याक्षेपादिनाऽस्मरणे अत्यन्तापह्नवे वा गम्यमाने भूतेऽनद्यतनेऽर्थे वर्तमानाद् धातोर्णबादिर्विभक्तिर्भवति । अपरोक्षकालार्थ आरम्भ । सुप्तोऽहं किल विललाप । मत्तोऽहं किल विचचार । चिन्तयन् किलाहं शिर कम्पयांबभूव । अङ्गुलि स्फोटयामास । अतिनिह्नवे—कश्चित् केनचिदुक्त कलिङ्गेषु त्वया ब्राह्मणो हत, स तदऽपह्नुवान आह—क कलिङ्गान् जगाम ? को ब्राह्मण ददर्श ? नाहं कलिङ्गान् जगाम इत्यत्यन्तमपह्नुते । अतिग्रहणादेकदेशापह्नवे दिबादिरेव । न कलिङ्गेषु ब्राह्मणमहमहनम् ।

६२. परोक्षे हशश्वतोर्दिबादिश्च ।

हे शश्वति च प्रयुज्यमाने भूतानद्यतने परोक्षेऽर्थे वर्तमानाद् धातो दिबादिश्चकारात् णबादिश्च विभक्ती भवत । इति हाकरोत्[2], इति ह चकार । शश्वदकरोत्, शश्वच्चकार । हशश्वतोरिति किम् ? **'जघान कंसं किल वासुदेवः'** । वेत्यैव कृते भूतानद्यतनमात्रभाविन्या दिबादे पक्षे सिद्धौ सत्या दिबादिविधानं स्मृत्यर्थयोगेऽपि दिबादिरेव यथा स्यान्न स्यत्यादिरित्येवमर्थम् । तेन स्मरसि मित्र ! कश्मीरेष्ववति हाध्यैमहि । अभिजानासि चैत्र ! शश्वदध्यैमहि इत्यादि सिद्धम् । क्रियान्तराकाङ्क्षाया तु हशश्वत्प्रयोग एव न संभवतीति[3] नोदाह्रियते ।

---

१. अवपूर्वकोऽप्य स्मृत्यर्थ ।

२. निपातसमुदाय प्रवादपारम्पर्ये इतिहशब्दो वर्तते । यद्वा एतत् ह इति वाक्यालंकारे ।

३. निपातानां यथादर्शनं प्रयोगात् ।

६३. प्रश्ने पञ्चवर्षकाले ।

पञ्चवर्षमध्यस्थ. काल पञ्चवर्षकाल । पञ्चवर्षकाले एव प्रश्ने भूतानद्यतने परोक्षेऽर्थे वर्तमानाद् धातोर्दिबादिविभक्तिर्वा भवति । पक्षे णबादि । किमगच्छस्त्वं मथुराम् ? कि जगन्थ त्व मथुराम् ? प्रश्ने इति किम् ? जगन्थ त्व मथुराम् । पञ्चवर्षकाल इति किम् ? कि सत्यमेव लक्ष्मणो रावण जघान ?

६४. अविवक्षिते ।

भूतानद्यतने परोक्षे परोक्षत्वेनाऽविवक्षितेऽर्थे वर्तमानाद् धातोर्दिबादिर्विभक्तिर्भवति । अभवत् सगरो राजा । अहन् कस वासुदेव. । एव च परोक्षानद्यतने विवक्षावशाद् द्यादिदिबादिणबादयस्तिस्रो[1] विभक्तय: सिद्धा । तथा च अन्वनैषीत् ततो वाली[2] । न्यक्षिपच्चाङ्गदम्[3] । सुग्रीव प्रोचे सद्भावमागत[4] । राक्षसेन्द्रस्ततोऽभैषीत्[5] । सैन्य समस्तमऽयुयुत्सयत्[6] । स्वय युयुत्सयाचक्रे[7] । तथा—

अभूवंस्तापसा. केचित्, पाण्डुपत्रफलाशिनः ।
पारिव्राज्य तदादत्त, मरीचिश्च तृषार्दितः ॥

६५. पुरादौ द्यादिर्वा ।

परोक्ष इति निवृत्तम् । भूतानद्यतने परोक्षे चाऽपरोक्षे चार्थे वर्तमानाद् धातो. पुरा इत्यादावुपपदे द्यादिविभक्तिर्वा भवति । अपरोक्षे दिबादे परोक्षे तु णबादेरपवाद । वावचनात् पक्षे यथाप्राप्ति ते अपि भवत:[8] । अवात्सुरिह पुरा छात्रा । अवसन्निह पुरा छात्रा. । ऊषुरिह पुरा छात्रा. । तदाभाषिष्ट राघव. । तदाभाषत राघव: । बभाषे राघवस्तदा । भूतानद्यतनपरोक्षे द्यादि नेच्छन्त्यन्ये । एवमुत्तरसूत्रे पुरादियोगे तिबादिम् । ह्शश्वच्छब्दयोगेऽपि पुरादियोगे परत्वाद् विकल्पेन द्यादि । इति ह पुराकार्षीत्, अकरोत्, चकार । शश्वत् पुराकार्षीत्, अकरोत्, चकार । भूतमात्रविवक्षया द्यादे सिद्धौ पुरादियोगे तद्वचन स्मृत्यर्थह्शश्वत्स्मयोगे सामान्यविवक्षया[9] द्यादिर्न भवतीति ज्ञापनार्थम् ।

---

१ द्यादिस्तु भूतमात्रे इति सूत्रे मात्रवचनात् सिद्ध । णबादिस्तु परोक्षे विवक्षिते सति सिद्ध एव ।

२-३ 'अन्वनैषीत् ततो वाली, त्रपावानिव राघवम् ।
न्यक्षिपच्चाङ्गदं यत्नात्, काकुत्स्थे तनय प्रियम् ॥
[भट्टिकाव्य, ६/१३७]

४. म्रियमाणः स सुग्रीवं, प्रोचे सद्भावमागतः ।
संभविष्याव एकस्यामभिजानासि मातरि ॥
[भट्टिकाव्य ६/१३८]

५ राक्षसेन्द्रस्ततोऽभैषीद्वेष्टिष्ट परितः पुरम् ।
प्रातिष्ठिपच्च बोधार्थं, कुम्भकर्णस्य राक्षसान् ॥
[भट्टिकाव्य १५/१]

६. रावणः शुश्रुवान् शत्रून्, राक्षसानभ्युपेयुषः ।
स्वयं युयुत्सयांचक्रे, प्राकाराग्रे निषेदिवान् ॥
[भट्टिकाव्यं १४/२२]

७. आस्फायताऽस्य वीरत्वममर्षश्चाप्यतायत ।
रावणस्य ततः सैन्यं, समस्तमयुयुत्सयत् ॥
[भट्टिकाव्यं १७/५०]

८. वाकरणादन्यथा चशब्दं कुर्यात् ।

९. भूताऽनद्यतनविवक्षाया पुरादियोगेऽनेन द्यादिर्भवत्येव ।

६६. स्मे च तिबादिः[1]।

भूतानद्यतने परोक्षे चापरोक्षे चार्थे वर्तमानाद् धातोः स्मशब्दे पुरादौ चोपपदे तिबादिर्विभक्तिर्भवति। इति स्मोपाध्याय[2] कथयति। पृच्छति स्म पुरोधसम्। वसन्तीह पुरा छात्राः। भाषते राघवस्तदा। **'अथाह वर्णी विदितो महेश्वरः'** [कुमारसम्भवमहा० ५/६५]। **'यावद् गिरः खे मरुतां चरन्ति'** [कुमारसंभवमहा० ३/७२]। आदिग्रहणमिह पूर्वत्र च प्रयोगानुसरणार्थम्। एवं च पुरादियोगे द्यादिदिबादिणबादितिबादयश्चतस्रो विभक्तयः सिद्धाः। स्मपुरायोगे तु परत्वात्[2] तिबादिरेव। नटेन स्म पुराधीयते। एवं हशश्वत्स्मयोगेऽपि। इति ह स्मोपाध्यायः कथयति। शश्वदधीयते स्म। त्रययोगेऽपि[3] एवम्। न ह स्म वै पुराग्निरपरशु वृक्णं दहतीति।

६७. ननौ पृष्टोक्तौ वर्तमानवत्।

अनद्यतन[4] इति निवृत्तम्। पृष्टस्य धात्वर्थस्योक्तिः प्रतिवचनं पृष्टोक्तिः। ननुशब्दे उपपदे पृष्टोक्तौ भूतेऽर्थे वर्तमानाद् धातो वर्तमान इव तिबादिर्विभक्तिर्भवति। वर्तमानवद् वचनादत्र विषये शतृशानावपि भवतः। किमकार्षीः कटं चैत्र !? ननु करोमि भोः !। ननु कुर्वन्तं कुर्वाणं मां पश्य[5]। किमवोचः किंचिच्चैत्र !? ननु ब्रवीमि भोः !। ननु ब्रुवन्तं ब्रुवाणं मा पश्य। पृष्टोक्ताविति किम् ? नन्वकार्षीत् कटं चैत्रः।

६८. नन्वोर्वा।

न, नु—इत्येतयोः शब्दयोरुपपदयोः पृष्टोक्तौ भूतेऽर्थे वर्तमानाद् धातोस्तिबादिः विभक्तिर्वा भवति सा च वर्तमानवत्। किमकार्षीः कटं चैत्र !? न करोमि भोः !। न कुर्वन्तं कुर्वाणं मा पश्य। नाकार्षम्। कस्तत्रावोचत् ? अहं नु ब्रवीमि भोः !। नु ब्रुवन्तं ब्रुवाणं मा पश्य। अहं नु अवोचम्।

६९. यावत्पुरयोर्भविष्यति।

यावत्, पुरा—इत्येतयोर्निपातयोरुपपदयोर्भविष्यत्यर्थे वर्तमानाद् धातोस्तिबादिर्विभक्तिर्भवति। यावद् भुङ्क्ते। पुरा भुङ्क्ते। भविष्यदनद्यतनेऽपि परत्वात् तिबादिरेव। यावच्छ्वो व्रजति। पुरा श्वो भुङ्क्ते। लाक्षणिकत्वादिह न भवति। यावद्दास्यते तावद् भोक्ष्यते। यत्परिमाणमित्यर्थः। महत्या पुरा जेष्यति ग्रामम्। तृतीयान्तोऽयम्।

७०. कदाकर्ह्योर्वा।

कदा, कर्हि—इत्येतयोरुपपदयोर्भविष्यत्यर्थे वर्तमानाद् धातोस्तिबादिर्विभक्तिर्वा भवति। पक्षे तादिस्यत्यादी अपि। कदा भुङ्क्ते, कदा भोक्ता, कदा भोक्ष्यते। कर्हि भुङ्क्ते, कर्हि भोक्ता, कर्हि भोक्ष्यते। कर्हिशब्दस्य अनद्यतनार्थत्वान्न[6] प्राप्नोति, भूते तु यथाप्राप्ता दिबाद्यादय एव। कदाऽभवत्, कर्ह्यभवत्। कदाऽभूत्, कर्ह्यभूत्। कदा बुभुजे, कर्हि बुभुजे।

७१. किमि विभक्तिडतरडतमे लिप्सायाम्।

विभक्त्यन्ते डतरडतमान्ते च किम्शब्दे उपपदे लिप्सायां गम्यमानायां भविष्यति कालेऽर्थे वर्तमानाद् धातोस्तिबादिर्विभक्तिर्वा भवति। पक्षे तादिस्यत्यादी अपि। लब्धुमिच्छा लिप्सा। को भवतां भिक्षां ददाति, दाता, दास्यति वा। के के भवन्तो भोजयन्ति, भोजयितारः, भोजयिष्यन्ति वा। कतरो भवतोर्भिक्षां ददाति, दाता, दास्यति वा।

---

१. स्मशब्दोऽतीतकालद्योतकश्चादि।

२. ननु पुरादियोगे स्मयोगश्च भवति तदा किं पूर्वेण द्यादि उत अनेन तिबादिरित्याह।

३. त्रय—त्रिसंख्या ह, स्म, पुरा इत्यवयवास्य स चासौ योगश्च त्रययोगस्तस्मिन्।

४. अपेक्षातोऽधिकारः इति न्यायात्।

५. करोमि कुर्वे इति वाक्ये शतृशानौ। कृतकार्यं मां पश्येत्यर्थः।

६. ह्यिप्रत्ययस्य अनद्यतन एव विधानात्।

कतमो भवतां भिक्षां ददाति, दाता, दास्यति वा। किमीति किम्? स भिक्षां दास्यति। विभक्तिडतरडतमे इति किम्? कितरां कितमां वा भिक्षां दास्यति। लिप्सायामिति किम्? क. पाटलिपुरं गमिष्यति।

७२. लिप्स्यमानसिद्धौ।

लब्धुमिष्यमाण ओदनादिर्लिप्स्यमानस्तस्मात् सिद्धिर्लिप्स्यमानसिद्धिः स्वर्गाद्यवाप्तिलक्षणा। लिप्स्यमानसिद्धौ गम्यमानायां भविष्यति काले वर्तमानाद् धातोस्तिबादिर्विभक्तिर्वा भवति। पक्षे तादिस्यत्यादी अपि। अकिमर्थोऽयमारम्भः। यो भिक्षां ददाति, दाता, दास्यति वा स स्वर्गलोक याति, याता, यास्यति वा[1]। लिप्स्यमानादोदनात् स्वर्गसिद्धिमाचक्षाणो दातार प्रोत्साहयति।

७३. विध्याद्यर्थहेतौ।

विध्याद्यर्थस्य हेतुर्निमित्त विध्याद्यर्थहेतु.[2]। विध्याद्यर्थहेतौ वर्तमानाद् धातोर्भविष्यति काले तिबादिर्विभक्तिर्वा भवति। पक्षे तादिस्यत्यादी अपि। उपाध्यायश्चेदागच्छति, आगन्ता, आगमिष्यति वा अथ त्वं सूत्रमधीष्व, अथ त्वमनुयोगमादत्स्व। अत्र भविष्यदुपाध्यायागमन अध्ययनादिविषयस्य विध्याद्यर्थस्य हेतुर्भवति।

७४. यादादिश्चोर्ध्वमौहूर्तिके।

ऊर्ध्वं मुहूर्तादिति ऊर्ध्वमुहूर्तम्। 'नाम नाम्ना···' [३/१/१९] इति समास। तत्र भव. ऊर्ध्वमौहूर्तिकः। उत्तरपदवृद्धिस्त्वस्मादेव निर्देशात्। विध्याद्यर्थहेतौ ऊर्ध्वमौहूर्तिके भविष्यत्यर्थे वर्तमानाद् धातोर्यादादिश्चकारात् तिबादिश्च विभक्ती वा भवत। पक्षे तादिस्यत्यादी अपि। ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य पर मुहूर्तादुपाध्यायश्चेदागच्छेत्, आगच्छति, आगन्ता, आगमिष्यति वा अथ त्वं तर्कमधीष्व, अथ त्वं सिद्धान्तमधीष्व।

७५. परिदेवने तादिः।

परिदेवनं अनुशोचनम्। तस्मिन् गम्यमाने भविष्यत्यर्थे वर्तमानाद् धातोः तादिर्विभक्तिर्भवति। अनद्यतनार्थ आरम्भ। इय तु कदा गन्ता यैव पादौ निदधाति। अय तु कदाध्येता य एवमनभियुक्त। विशेषविधानात् परत्वाच्च कदार्कहिलक्षणविकल्पो बाध्यते।

७६. वर्तमानसामीप्ये वर्तमानवद् वा।

समीपमेव सामीप्यम्। वर्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्तमानाद् धातोर्वर्तमानवत् प्रत्यया वा भवन्ति। कदा चैत्र! आगतोऽसि। अयमागच्छामि। आगच्छन्तमेव मां विद्धि। वावचनाद् यथाप्राप्त च। अयमागमम्। एषोऽस्म्यागतः। कदा मैत्र गमिष्यसि। एष गच्छामि। गच्छन्तमेव मां विद्धि। पक्षे—एष गमिष्यामि, गन्तास्मि। गमिष्यन्तमेव मा विद्धि। वत्करणं सर्वसादृश्यार्थम्। येनैव प्रकृत्युपपदोपाध्यादिना[3] विशेषेण वर्तमाने प्रत्यया विहितास्तेनैव विशेषेण भूतभविष्यतोरपि भवन्ति। 'शतृशानौ···' [५/३/४] इति सूत्रादारभ्य यावदुणादयः इति वर्तमाने ये प्रत्ययाः सन्ति ते भूतभविष्यतोर्वा विधीयन्ते इति। कदा भवान् सोम पूतवान् पविष्यते वा। एषोऽस्मि पवमान.। कदा भवानिष्टवान् यक्ष्यते वा। एषोऽस्मि यजमान। कदा भवान् कन्यामलङ्कृतवान् करिष्यते वा। एषोऽस्मि अलकरिष्णुरिति। सामीप्य इति किम्? परुदगच्छत्। वर्षेण गमिष्यति।

७७. आशंसायां भूतवच्च।

अनागतस्य प्रियस्यार्थस्याशंसनं प्राप्तुमिच्छा आशंसा। आशंसायां वर्तमानाद् धातोर्भूतवच्चकाराद् वर्तमानवच्च

---

१. अत्रोभयोर्वाक्ययोर्मिलितयोर्लिप्स्यमानसिद्धिरवगम्यते। तेनोभयत्राप्यनेनैव तिबादि. सिद्धा।

२ आदिशब्देन सभावना गृह्यते।

३. आदिशब्दात्कर्तृविशेषेणापि। पवमान', यजमान' इत्यत्र प्रकृतिविशेषः। अलंकरिष्णुरित्यत्र तु उपपदविशेषः शीलाद्युपाधिविशेषश्च।

प्रत्यया वा भवन्ति। पक्षे यथाप्राप्त च। उपाध्यायश्चेदागमत्[1] एते नर्कमध्यगीष्महि। उपाध्यायश्चेदागत एतैस्तर्कोऽधीत। उपाध्यायश्चेदागच्छति एते तर्कमधीमहे। पक्षे—उपाध्यायश्चेत् आगमिष्यति एते तर्कमध्येष्यामहे। उपाध्यायश्चेदागन्ता एते तर्कमध्येतास्महे। सामान्यविधाने विशेषाऽविधानात् दिबादिणबादी न भवत.। आशसायामिति किम् ? उपाध्याय आगमिष्यति तर्कमध्येष्यते मैत्र.।

७८. क्षिप्रार्थे स्यत्यादिः।

भूतवच्चेत्यस्यापवाद। क्षिप्रार्थे उपपदे आशसाया वर्तमानाद् धातो स्यत्यादिविभक्तिर्भवति। उपाध्यायश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता वा क्षिप्र, आशु, त्वरित, अर, शीघ्र एते सिद्धान्तमध्येष्यामहे। क्षिप्रार्थे नेत्येव वक्तव्ये स्यत्यादिविधानं तादिविषयेऽपि यथा स्यादित्येवमर्थम्। उपाध्यायश्चेत् श्व क्षिप्रमागमिष्यति एते श्वः क्षिप्रमध्येष्यामहे।

७९. क्रियायां क्रियार्थायां भविष्यति।

यस्माद् धातोः स्यत्यादिस्तद्वाच्या या क्रिया सा अर्थः—प्रयोजन यस्या सा क्रियार्था। क्रियार्थाया क्रियायामुपपदे भविष्यत्यर्थे वर्तमानाद् धातो स्यत्यादिविभक्तिर्भवति। करिष्यामीति व्रजति। भोक्ष्ये इति व्रजति। क्रियायामिति किम् ? भिक्षिष्ये[2] इत्यस्य जटा। क्रियार्थायामिति किम् ? धावतस्ते पतिष्यति वाम[3]। यद्यप्यत्र धावनक्रिया तथापि पतनार्थं नोपात्ता।

८०. आशंसार्थे यादादिः।

आशसार्थे उपपदे धातोर्यादादिर्विभक्तिर्भवति। भूतवच्चेत्यस्याऽपवाद.। उपाध्यायश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता वा आशसे, अवकल्पये, सभावये युक्तोऽधीयीय। परत्वात् पूर्वसूत्रमपि बाध्यते, तेन द्वयोरुपपदयोर्यादादिरेव। आशंसे क्षिप्रमधीयीय।

८१. नाऽनद्यतनः सातत्यसामीप्ययोः।

भूतानद्यतने दिबादिर्भविष्यदनद्यतने च तादिर्विहिता, तयो प्रतिषेध। सातत्ये सामीप्ये च गम्यमाने धातोरनद्यतनविहित प्रत्ययो न भवति। सातत्ये—यावज्जीव भृशमन्नमदात्। यावज्जीव भृशमन्नं दत्तवान्। यावज्जीव भृशमन्न दास्यति। यावज्जीव युक्तोऽध्यापिपत्। यावज्जीव युक्तोऽध्यापयिष्यति। सामीप्ये—येय पौर्णमास्यऽतिक्रान्ता एतस्या जिनमह प्रार्वातिष्ट, प्रवृत्त। येय पौर्णमास्यागामिनी अस्या जिनमह प्रवर्तिष्यते। द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञानाय[4]। केचित् तु अनद्यतनविशेषविहितानामपि णबाद्यादीना प्रतिषेधमिच्छन्ति।

८२. भविष्यत्यऽवधौ देशस्याऽवरभागे।

नानद्यतन इत्यनुवर्तते। देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैव अवरभागे यो भविष्यत्कालस्तत्र वर्तमानाद् धातोरनद्यतनविहित प्रत्ययो न भवति। असातत्यार्थमसामीप्यार्थ च वचनम्। योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे, द्विः सक्तून् पास्याम। योऽयमध्वा गन्तव्य आ पाटलिपुत्रात् तस्य यदवरमर्ध तत्रौदनं भोक्ष्यामहे। भविष्यतीति किम् ? योऽयमध्वातिक्रान्त आ शत्रुञ्जयात् तस्य यदवर वलभ्यास्तत्र युक्ता द्विरध्यैमहि,

---

१ आगमदित्यत्र अध्यगीष्महीत्यत्र चाऽनेनैव भूतप्रत्यय उभयत्रापि आशंसाया विद्यमानत्वात्।

२ ननु प्रत्युदाहरणेऽपि कथ स्यत्यादिः ? उच्यते—अत्र 'भविष्यति च'' [३/३/१२] इत्यादि सूत्रेण विहित सामान्य एव स्यत्यादि. प्रत्युदाहृत। एतेन विधीयमाने स्यत्यादौ तु 'तुमणकौ क्रियायां क्रियार्थायां' [५/४/४] इति तुमा णकेन चापि भवितव्यम्।

३ भिन्नकर्तृकत्वेऽपि सूत्रस्य प्रवृत्तिरिति प्राप्नोति। अत्र हि धावनक्रियाया देवदत्त कर्ता, पतनक्रियायास्तु वाम।

४. द्वौ नञौ प्रकृतमर्थं गमयतः इति न्यायात्।

द्वि सक्तूनऽपिबाम । अवधाविति किम् ? योऽयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्म । अवरभागे इति किम् ? योऽयमध्वा गन्तव्य आ शत्रुञ्जयात् तस्य तत्पर वलभ्यास्तत्र द्विरोदनं भोक्तास्महे, द्विः सक्तून् पातास्मः ।

८३. कालस्याऽनहोरात्राणाम् ।

कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवाऽवरभागे यो भविष्यदर्थस्तत्र वर्तमानाद् धातोरनद्यतनविहितः प्रत्ययो न भवति, न चेन् सोऽवरभाग अहोरात्राणा सबन्धी भवति । योऽयमागामी मवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र पौषधव्रत करिष्यामोऽतिथिभ्यो दान दास्यामहे । भविष्यतीति किम् ? योऽयं सवत्सरोऽतीतस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता द्विरध्यैमहि । अवधाविति किम् ? योऽयमागामी निरवधिक कालस्तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येतास्महे । अवरभागे इति किम् ? परस्मिन् विभाषा वक्ष्यते । अनहोरात्राणामिति[1] किम् ? योऽयं मास आगामी तस्य योऽवर. पञ्चदशरात्र.[2] तत्र युक्ता द्विरध्येतास्महे । योऽय त्रिशद्रात्र आगामी तस्य योऽवरोऽर्धमास[3] तत्र द्विरोदन भोक्तास्महे । योऽय त्रिशद्रात्र आगामी तस्य योऽवर पञ्चदशरात्रस्तत्र[4] द्वि. सक्तून् पातास्मः इति त्रिविधेप्यहोरात्रसबन्धे मा भूत् । योगविभाग उत्तरार्थ ।

८४. परस्मिन् वा ।

कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैव परस्मिन् भागेऽनहोरात्रसबन्धिनि यो भविष्यदर्थस्तत्र वर्तमानाद् धातोरनद्यतनविहित. प्रत्ययो वा भवति । आगामिन. सवन्सरस्याग्रहायण्या परस्तात् द्वि सूत्रमध्येष्यामहे अध्येतास्महे वा । सातत्यसामीप्ययोरपि परत्वादयमेव विकल्प.[5] । आगामिन सवत्सरस्याग्रहायण्याः परस्तादविच्छिन्नं सूत्रमध्येष्यामहे अध्येतास्महे वा । कालस्येति किम् ? आ शत्रुञ्जयात् गन्तव्येऽस्मिन्नध्वनि वलभ्या. परस्तात् द्विरोदनं भोक्तास्महे । सातत्यसामीप्ययोस्त्विह कालप्रत्युदाहरणे नित्यं स्यत्यादि.[6] । आ शत्रुञ्जयात् गन्तव्येऽस्मिन्नध्वनि वलभ्या. परस्ताद् अविच्छिन्नं सूत्रमध्येष्यामहे । परस्मिन्निति किम् ? अवरभागे पूर्वेण नित्य प्रतिषेध. । भविष्यतीति किम् ? अतीते वत्सरे परस्तादाग्रहायण्या सूत्र युक्ता अध्यैमहि । अवधाविति किम् ? योऽयमागामी निरवधिक कालस्तस्य यत्परमाग्रहायण्यास्तत्र द्विरध्येतास्महे । अनहोरात्राणामिति किम् ? योऽय त्रिशद्रात्र आगामी तस्य य पर पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे ।

८५. भूते यादादिनिमित्ते क्रियातिपत्तौ स्यदादिः ।

'यादादिनिमित्ते क्रियातिपत्तौ स्यत्-स्यताम्…' [३/३/१३] इत्यादिना स्यदादिर्भविष्यति विहिता, सांप्रतं तु भूते विधीयते । भूतेऽर्थे वर्तमानाद् धातोर्यादादिनिमित्ते क्रियातिपत्तौ सत्या स्यदादिर्विभक्तिर्भवति । **'उताप्योर्बाढे यादादिः'** [४/४/६६] इत्यारभ्य यादादिनिमित्तेऽनेन विधानम् । तत. प्राक् **'वोतात् प्राक्'** [४/४/८६] इति विकल्पो वक्ष्यते । दृष्टो मया भवतः पुत्रोऽन्नार्थी चंक्रम्यमाण अपरश्च अतिथ्यर्थी, यदि स तेन दृष्टोऽभविष्यत्[7] उताभोक्ष्यत[8] अप्यभोक्ष्यत न तु दृष्टोऽन्येन पथा गत इति न भुक्तवान् ।

---

१. यत्राह.शब्दो रात्रिशब्दो वा प्रयुज्यते तत्राहोरात्रत्वम् ।

२. अत्र कालसबन्धी तावात्म्येनाऽहोरात्ररूपोऽवरभाग: ।

३ अत्र कालोऽहोरात्ररूपस्तस्य सबन्धी अवयवावयविभावेनाऽवरभाग ।

४ अत्र कालोऽवरभागश्च अहोरात्ररूप. ।

५. न तु **'नानद्यतन…'** [४/४/८१] इति नित्यं निषेध. ।

६. **'नानद्यतन…'** [४/४/८१] इति तादेर्निषेधात् ।

७. अत्राऽसंभावनाया गम्यमानत्वात् **'जातुयद्यदायदिकिंवृ…'** [४/४/९२] इति यादादिनिमित्तत्वम् ।

८ **'उताप्योर्बाढे…'** [४/४/९६] इति यादादिनिमित्तत्वम् ।

८६. बोतात् प्राक् ।

'उताप्योर्बाढे यादादिः' [४/४/६६] इत्यत्र यदुतशब्दसंकीर्तनं तत प्राक् यादादिनिमित्ते क्रियातिपत्तौ सत्यां भूतेऽर्थे वर्तमानाद् धातो स्यदादिर्विभक्तिर्वा भवति । कथं नाम संयतः सन् तत्रभवान् आधायकृतं असेविष्यत[१], धिग् गर्हामहे । वावचनाद्यथाप्राप्तं च । कथं सेवेत, कथं सेवते, धिग् गर्हामहे । उतात् प्रागिति किम् ? कालो यदऽभोक्ष्यत[३] भवान् । भूते इति किम् ? भविष्यति नित्यमेव ।

८७. गर्हायामऽपिजात्वोस्तिबादिः ।

भूते इति निवृत्तम् । गर्हायां गम्यमानाया अपि, जातु---इत्येतयोरुपपदयोर्धातोस्तिबादिः विभक्तिर्भवति । कालसामान्ये विधानात् कालविशेषे विहिता अपि प्रत्यया परत्वादनेन बाध्यन्ते । अपि तत्रभवान् जन्तून् हिनस्ति । जातु तत्रभवान् भूतानि हिनस्ति । अपि संयतः सन् तत्रभवानाधायकृतं सेवते, धिग् गर्हामहे । इह यादादिनिमित्ताऽभावात् क्रियातिपत्तौ स्यदादिर्नोदाह्रियते ।

८८. कथमि यादादिश्च वा ।

कथंशब्दे उपपदे गर्हाया गम्यमानायां कालत्रयेऽपि यादादिश्चकारात् तिबादिश्च विभक्ती वा भवतः । वावचनाद् यथाप्राप्तं च । कथं नाम तत्रभवान् मांसं भक्षयेत्, मांसं भक्षयति वा । धिग् गर्हामहे, अन्याय्यमेतत । पक्षे--- अबभक्षत्, अभक्षयत्, भक्षयांचकार, भक्षयिता, भक्षयिष्यति । अत्र यादादिनिमित्तमस्तीति भूते क्रियातिपत्तौ वा स्यदादि- र्भवति । कथं नाम तत्रभवान् मांसं अभक्षयिष्यत्, भक्षयेत्, भक्षयति, अबभक्षत्, अभक्षयत्, भक्षयाञ्चकार । भविष्यति तु क्रियातिपत्तौ नित्यमेव स्यदादिः । कथं नाम तत्रभवान् मांसमभक्षयिष्यत् । न तु तिबादिर्यादादिर्वादिस्यत्यादयः । गर्हायामिति किम् ? कथं नाम तत्रभवान् साधूनऽपूपुजत् । एवं यथाप्राप्ति तिबादयो भवन्ति ।

८९. विभक्तिडतरडतमे किमि यादादिस्यत्यादी ।

विभक्त्यन्ते डतरडतमान्ते च किंशब्दे उपपदे गर्हाया गम्यमानायां कालत्रयेऽपि यादादि, स्यत्यादि--इत्येते विभक्ती भवतः । किं तत्रभवानऽनृतं ब्रूयात् । किं तत्रभवानऽनृतं वक्ष्यति । को नाम, कतरो नाम, कतमो नाम, यस्मै तत्रभवानऽनृतं ब्रूयात्, अनृतं वक्ष्यति । अत्रापि यादादिनिमित्तमस्तीति भूते क्रियातिपत्तौ वा स्यदादिः । किं तत्रभवानऽनृत- मवक्ष्यत् । पक्षे-- ब्रूयात् वक्ष्यति वा । भविष्यति तु नित्यम् । किं तत्रभवानऽनृतमवक्ष्यत् । गर्हायामिति किम् ? किं तत्रभवान् देवानऽपूपुजदित्यादि ।

९०. असंभावनामर्षेऽन्यत्रापि ।

गर्हायामिति निवृत्तम् । अमर्ष ---अक्षमा । अन्यत्रेति विभक्तिडतरडतमान्ते किंशब्देऽनुपपदेऽपिशब्दात् उपपदे च असंभावनामर्षयोर्गम्यमानयोर्धातोः कालत्रयेऽपि यादादिस्यत्यादी विभक्ती भवतः । सर्वविभक्त्यपवादः । वचनभेदात् यथासंख्यं नास्ति । असंभावनाया---न संभावयामि, नावकल्पयामि, न श्रद्दधे, तत्रभवान् नामादत्तं गृह्णीयात्, अदत्तं ग्रहीष्यति वा । किम्युपपदेऽपि --न संभावयामि, नावकल्पयामि, न श्रद्दधे, किं तत्रभवान् नामादत्तमाददीत, अदत्तमादास्यते वा । अमर्षे -- न मर्षयामि, न क्षमे, धिग् मिथ्या नैतदस्ति तत्रभवान् नामादत्तं गृह्णीयात्, अदत्तं ग्रहीष्यति वा । किम्युपपदेऽपि--- न मर्षयामि, न क्षमे, धिग् मिथ्या नैतदस्ति किं तत्रभवान् नामादत्तमाददीत, अदत्तमादास्यते वा । अत्रापि यादादिनिमित्त- मस्तीति भूते क्रियातिपत्तौ वा स्यदादि । न संभावयामि, न मर्षयामि, तत्रभवानऽदत्तमग्रहीष्यत् । पक्षे---गृह्णीयात् ग्रहीष्यति

---

१ 'अव्यय प्रवृद्धादिभिः' [३/१/६७] इति समासः ।

२ 'कथमि यादादिश्च वा' [४/४/८८] इति यादादिनिमित्तम् ।

३ अत्र 'कालसमयवेलासु यदि···' [४/४/१०८] इति यादादिनिमित्तत्वम् । ततो भूते स्यदादिः ।

४ स्यदादिमबद्धत्वाद् भूतस्य ।

वा। भविष्यति तु नित्यम्। न सभावयामि, न मर्षयामि तत्रभवानऽदत्तमग्रहीष्यत्। अन्यत्राऽपि इति किम्? यदार्थात् प्रकरणाद् वा सभावनामर्षयोर्गम्यमानत्वात् तद्वाचकेनाऽपि[1] उपपदेन धातोर्न योगस्तदा मा भूत्।

९१. किंकिलास्त्यर्थयोः स्यत्यादिः।

किंकिलेति समुदायशब्दे अस्त्यर्थे च शब्दे उपपदे असभावनामर्षयोर्गम्यमानयोर्धातो. स्यत्यादिर्विभक्तिर्भवति। यादादेरपवाद[2]। वचनभेदात् असभावनामर्ष इति यथासङ्ख्य नास्ति। न सभावयामि, न मर्षयामि, किंकिल[3] नाम तत्रभवान् परदारानुपकरिष्यते। 'गन्धनावक्षेपण···' [३/३/४१] इत्यादिना साहसे आत्मनेपदम्। अस्त्यर्था अस्तिभवतिविद्यतय.। न संभावयामि, न मर्षयामि, अस्ति नाम, भवति नाम, विद्यते नाम, तत्रभवान् परदारानुपकरिष्यते। अत्र यादादिनिमित्तं नास्तीति क्रियातिपत्तौ स्यदादिर्न भवति।

९२. जातुयदायद्यदिषु यादादिः।

जातु, यदा, यद्, यदि- इत्येतेषूपपदेषु असभावनामर्षयोर्गम्यमानयोर्धातोर्यादादिर्विभक्तिर्भवति। स्यत्यादेरपवाद[4]। न सभावयामि, न मर्षयामि, जातु तत्रभवान् सुरा पिबेत्। यदा तत्रभवान् सुरा पिबेत्। यत्तत्रभवान् सुरा पिबेत्। यदि तत्रभवान् सुरा पिबेत्। अत्र यादादिनिमित्तमस्तीति भूते क्रियातिपत्तौ वा स्यदादि। न सभावयामि, न मर्षयामि, जातु तत्रभवान् सुरामपास्यत्। पक्षे- -पिबेत्। भविष्यति तु नित्यम्। जातु तत्रभवान् सुरामपास्यत्।

९३. गर्हायां च यच्चयत्रयोः।

यच्च, यत्र --इत्येतयोरुपपदयोर्गर्हाया चकारात् असभावनामर्षयोश्च गम्यमानयोर्धातोर्यादादिर्विभक्तिर्भवति। असभावनामर्षयो. स्यत्यादे, गर्हाया तु सर्वविभक्तीनामपवाद। धिग् गर्हामहे यच्च तत्र भवानस्मानाक्रोशेत्। यत्र भवानस्मानाक्रोशेत्। न सभावयामि, न मर्षयामि, यच्च तत्रभवान् परिवाद कथयेत्। यत्र तत्रभवान् परिवाद कथयेत्। अत्रापि यादादिनिमित्तमस्तीति भूते क्रियातिपत्तौ वा स्यदादि। धिग् गर्हामहे न सभावयामि न मर्षयामि यच्च यत्र वा तत्रभवानस्मानाक्रोक्ष्यत्। पक्षे—आक्रोशेत्। भविष्यति तु नित्यम्। धिग् गर्हामहे न सभावयामि न मर्षयामि यच्च यत्र वा तत्रभवान् परिवादमकथयिष्यत्।

९४. आश्चर्ये।

आश्चर्ये गम्यमाने यच्चयत्रयोरुपपदयोर्धातोर्यादादिर्विभक्तिर्भवति। सर्वविभक्तीनामपवाद[5]। आश्चर्य, अद्भुतं, चित्रं, विस्मयनीयं, यच्च तत्रभवानऽकल्प्य सेवेत। यत्र तत्रभवानऽकल्प्य सेवेत। अत्रापि यादादिनिमित्तमस्तीति भूते क्रियातिपत्तौ वा स्यदादि। चित्र यच्च यत्र वा तत्रभवानऽकल्प्यमसेविष्यत। पक्षे—सेवेत। भविष्यति तु नित्यम्। चित्र यच्च यत्र वा तत्रभवानऽकल्प्यमसेविष्यत।

९५. शेषे स्यत्यादिरयदौ।

यच्चयत्राभ्यामन्य. शेष। शेषे उपपदे आश्चर्ये गम्यमाने धातो स्यत्यादिर्विभक्तिर्भवति, यदिशब्दश्चेन्न

---

१. यथा विभक्तिडनरडतमे किमि उपपदेऽनुपदे च विभक्तौ स्त न तथा असभावनामर्षयोर्गम्यमानयो, किंतु तद्वाचके पदैः प्रयुज्यमानयोरेवेत्यर्थ। एतच्चास्मिन्नेव सूत्रे ज्ञातव्य नोत्तरत्र यत 'शेषे स्यत्यादिरयदौ' [४/४/९५] इत्यत्र आश्चर्य यदि स भुञ्जीत, चित्र यदि सोऽधीयीत—अत्र असभावनाप्यस्तीति कथयिष्यति।

२. 'असंभावनाऽमर्षे···' [४/४/९०] इति प्राप्ताया।

३. किलशब्द. प्रसिद्धिद्योतने वाक्यालकारे अमर्षद्योतने कामनामन्त्रणे। एव किंकिलशब्दोऽपि।

४. 'असंभावनामर्षे···' [४/४/९०] इति प्राप्ताया।

५. कालस्याऽनिर्देशात् त्रिष्वपि कालेष्वस्य प्रवर्त्तनात्।

प्रयुज्यते। सर्वविभक्त्यपवादः। आश्चर्यं चित्रमन्धो नाम पर्वतमारोक्ष्यति। बधिरो नाम व्याकरणं श्रोष्यति। मूको नाम धर्मं कथयिष्यति। अत्र यादादिनिमित्तं नास्तीति न स्यदादि। शेष इति किम्? यच्चयत्रयोः पूर्वेण यादादिरेव[1]। अयदाविति किम्? आश्चर्यं यदि स भुञ्जीत। चित्रं यदि सोऽधीयीत। अत्र असंभावनाप्यस्तीति[2] 'जातुयद्यदायद्यदाविषु…' [४/४/६२] इत्यादिना यादादिः।

६६. उताप्योर्बाढे यादादिः।

बाढेऽर्थे वर्तमानयोरुताप्योरुपपदयोर्धातोर्यादादिर्विभक्तिर्भवति। सर्वविभक्त्यपवादः। उत कुर्यात्, अपि कुर्यात्—बाढं करिष्यतीत्यर्थः।[3] बाढ इति किम्? उत दण्डः पतिष्यति। अपिधास्यति द्वारम्। प्रश्नः पिधानं च यथाक्रमं गम्यते। वोतात् प्रागिति निवृत्तम्। इतः प्रभृति यादादिनिमित्ते सति भूते भविष्यति च क्रियातिपत्तौ नित्यं स्यदादिः। उताकरिष्यत्, अप्यकरिष्यत्।

६७. संभावनेऽलमर्थे तदर्थाऽप्रयोगे।

अलमोऽर्थः सामर्थ्यम्। तद्विषये संभावने गम्यमाने तदर्थस्याऽलमर्थार्थस्य शब्दस्याऽप्रयोगे धातो यादादिविभक्तिर्भवति। सर्वविभक्त्यपवादः। संभावनं द्विविधं—शक्यमशक्यं च। शक्ये तावत्—अपि मासमुपवसेत्। अपि पुण्डरीकाध्ययनं अह्नाधीयीत। अपि स्कन्दकोद्देशं यामेनाऽधीयीत। अशक्यसंभावने—अपि शिरसा पर्वतं भिन्द्यात्। अपि खारीपाकं भुञ्जीत। अपि समुद्रं दोर्भ्यां तरेत्। अलमर्थे इति किम्? निदेशस्थायी मे जिनदत्तः प्रायेण गमिष्यति। तदर्थाऽप्रयोगे इति किम्? अलं मैत्रो हस्तिनं हनिष्यति। शक्तश्चैत्रो धर्मं करिष्यति। अथ यादादिनिमित्तमस्तीति भूते भविष्यति च क्रियातिपत्तौ नित्यं स्यदादिर्भवति। अपि पर्वतं शिरसाऽभेत्स्यत्। तथा काकिण्या हेतोरपि मातुः स्तनं छिन्द्यात् इत्यत्र 'गर्ह्यार्थापिजात्वोस्तिबादिः' [४/४/८७] इति तिबादिं बाधित्वा आश्चर्यं चित्रमपि शिरसा पर्वतं भिन्द्यात् इत्यत्र तु 'शेषे स्यत्यादिरयदौ' [४/४/६५] इति स्यत्यादिं च बाधित्वा परत्वादनेन यादादिरेव भवति।

६८. अयदि श्रद्धाधातौ वा।

पूर्वेण[4] नित्यं प्राप्ते विकल्पार्थं वचनम्। श्रद्धा—संभावना। तदर्थे धातावुपपदेऽलमर्थविषये संभावने गम्यमाने धातोर्यादादिर्विभक्तिर्वा भवति, यच्छब्दश्चेन्न प्रयुज्यते[5]। श्रद्दधे, संभावयामि, अवकल्पयामि भुञ्जीत भवान्। पक्षे यथाप्राप्तम्। भोक्ष्यते भवान्। अभुक्त भवान्। अभुङ्क्त भवान्। अयदीति किम्? संभावयामि यद् भुञ्जीत भवान्। श्रद्धाधाताविति किम्? अपि शिरसा पर्वतं भिन्द्यात्। उभयत्र पूर्वेण नित्यं यादादि। अत्रापि यादादिनिमित्तमस्तीति भूते भविष्यति च क्रियातिपत्तौ नित्यं स्यदादि। संभावयामि नाभोक्ष्यत भवान्।

६९. हेतुफले।

हेतु—कारणम्। फलं—कार्यम्। हेतुभूते फलभूते चार्थे वर्तमानाद् धातोर्यादादिर्विभक्तिर्वा भवति। सर्वविभक्त्यपवादः। यदि गुरूनुपासीत शास्त्रान्तं गच्छेत्। यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति। यदि गुरूनुपास्ते शास्त्रान्तं गच्छति। यदि गुरूनुपासीष्ट शास्त्रान्तमगमत्। अत्र गुरूपासनं हेतुः शास्त्रान्तगमनं फलम्। दक्षिणेन चेद् यायात् न शकटं पर्याभवेत्। दक्षिणेन चेद्यास्यति न शकटं पर्याभविष्यति। दक्षिणेन चेद्याति न शकटं पर्याभवति।

---

१. 'आश्चर्ये' [४/४/६४] इत्यनेन।

२. न केवलं यदिशब्दयोगः।

३. एवमन्या अपि विभक्तयो द्रष्टव्याः। सन्निहितत्वाच्च स्यत्यादिरेव दर्शिता।

४. 'संभावनेऽलमर्थे…' [४/४/६७] इत्यनेन।

५. क्रियाविशेषणत्वे चेद् यच्छब्दो न प्रयुज्यते। हेत्वर्थे तु भवत्येव।

दक्षिणेन चेदयासीन्न शकटं पर्याभून् । केचिन् तु भविष्यत्येव मन्यन्ते, न तच्छिष्टसंमतम् । अत्रापि यादादिनिमित्तमस्तीति क्रियातिपत्तौ भूते भविष्यति च नित्य स्यदादिः । दक्षिणेन चेदयास्यन्न शकटं पर्याभविष्यत् । हन्तीति पलायते, वर्षतीति धावति इत्यत्र तु हेतुफलभावस्य इतिशब्देनैव द्योतितत्वात् यादादिर्न भवति ।

१००. इच्छार्थे तुल्यकर्तृके कर्मणः ।

इच्छार्थे धातावुपपदे तुल्यकर्तृकेऽर्थे वर्तमानात्कर्मभूतात् धातोर्यादादिर्विभक्तिर्भवति । कर्मत्वं तुल्यकर्तृकत्व च धातो. श्रुतत्वादुपपदापेक्षे । भुञ्जीय इति इच्छति । भुञ्जीय इति वाञ्छति । भुञ्जीय इति कामयेत । इच्छार्थे इति किम् ? भोजको व्रजति । तुल्यकर्तृक इति किम् ? इच्छामि भुङ्क्ता भवान् । कर्मण इति किम् ? इच्छन् करोति । अत्र करोतीच्छत्योर्लक्ष्यलक्षणभावो न तु कर्मक्रियाभाव· ।

१०१. इच्छार्थेभ्यो वा वर्तमाने ।

वर्तमानेऽर्थे वर्तमानेभ्य इच्छार्थेभ्यो धातुभ्यो यादादिर्विभक्तिर्वा भवति । पक्षे तु तिबादिरेव । इच्छेत्, इच्छति, उश्यात्, वष्टि, कामयेत, कामयते, वाञ्छेत्, वाञ्छति । '**गर्हायामपिजात्वोस्तिबादिः**' [४/४/८७] इत्यादावपि परत्वादयमेव विकल्प. । अपि सयत. सन्नकल्प्य सेवितुमिच्छेत् इच्छति वा, धिग् गर्हामहे । भूतभविष्यतोरभावात् सत्यपि यादादिनिमित्ते सत्यामपि च क्रियातिपत्तौ स्यदादिर्न भवति ।

१०२. कामप्रवेदनेऽकच्चिति ।

कामप्रवेदन—स्वाभिप्रायप्रकाशनम् । कामप्रवेदने गम्यमाने कच्चिद्वर्जिते उपपदे धातोर्यादादिर्विभक्तिर्भवति । सर्वविभक्त्यपवाद. । कामो मे भुञ्जीत भवान् । इच्छा मे, अभिप्रायो मे, श्रद्धा मे, अभिलाषो मे, अधीयीत भवान् । अकच्चितीति किम् ? कच्चिज्जीवति ते माता । अत्र यादादिर्निमित्तमस्तीति भूते भविष्यति च क्रियातिपत्तौ नित्य स्यदादि· । कामो मेऽभोक्ष्यत भवान् ।

१०३. इच्छार्थे तुबादिश्च ।

इच्छार्थे धातावुपपदे कामप्रवेदने गम्यमाने धातोस्तुबादिश्चकारात् यादादिश्च विभक्ती भवतः । सर्वविभक्त्यपवादौ । इच्छामि भुञ्जीत भवान् । इच्छामि भुङ्क्ता भवान् । कामये, प्रार्थये, अभिलषामि, वश्मि, अधीयीत भवान् । अधीता भवान् । कामप्रवेदन इति किम् ? इच्छया, इच्छत भुङ्क्ते । नात्र प्रयोक्तु कामप्रवेदनम् । अत्र सत्यपि यादादिनिमित्ते इच्छार्थे उपपदे कामप्रवेदने क्रियातिपत्तेरऽसामर्थ्येनाऽसंभवात्[१] स्यदादिर्न भवति ।

१०४. प्रैषानुज्ञावसरे कृत्यतुबादी ।

प्रैषादिविशिष्टे कर्त्रादावर्थे धातोः कृत्यसज्ञकास्तुबादिश्च प्रत्यया भवन्ति । न्यत्कारपूर्विका प्रेरणा प्रैषः । अनुज्ञा—कामचारानुमति । अवसर.—प्राप्तकालता । भवता खलु कटः कर्तव्य, करणीयः, कृत्य, कार्य. । भवान् कट करोतु । भवान् हि प्रेषितोऽनुज्ञात । भवतोऽवसर कटकरणे । यद्यपि कृत्या सामान्येन भावकर्मणोर्विधास्यन्ते तथापि सर्वप्रत्ययापवादभूतया तुबादिविभक्त्या बाध्येरन्निति पुनर्विधीयन्ते । अत्र कृत्यविधानादेव एतत् प्रकरणसूत्रेषु पूर्वेषां परेषां च सर्वप्रत्ययानामपवादत्व निर्दिश्यते । अनुज्ञाया केचित् यादादिरेवेत्याहुः । अतिसृष्टो भवान् ग्राम गच्छेत् ।

१०५. यादादिश्चोर्ध्वमौहूर्तिके ।

ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद् धातोः प्रैषादिषु गम्यमानेषु यादादिश्चकारात् कृत्यतुबादी च प्रत्यया भवन्ति ।

---

१. कामप्रवेदनस्य क्रियातिपत्तेश्च परस्परं विरुद्धत्वात् संबन्धाऽभावेनेत्यर्थः ।

ऊर्ध्वं मुहूर्तात् कट कुर्याद् भवान्। कर्तव्यः, करणीय, कृत्य, कार्य कटो भवता। कट करोतु भवान्। भवान् हि प्रेषितः अनुज्ञातो भवतोऽवसर कटकरणे।

१०६. स्मे तुबादिः।

स्मशब्दे उपपदे प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद् धातोस्तुबादिर्विभक्तिर्भवति। कृत्यानां यादादेश्चापवाद। ऊर्ध्वं मुहूर्ताद् भवान् कट करोतु स्म। भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसर कटकरणे इति।

१०७. अधीष्टौ।

ऊर्ध्वमौहूर्तिक इति निवृत्त पृथग्योगात्[१]। स्मे उपपदेऽधीष्टौ गम्यमानायां धातोस्तुबादिर्विभक्तिर्भवति। अधीष्टिः सत्कारपूर्वको विधिः। यादादेरपवाद। अङ्ग स्म विद्वन्नणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्व।

१०८. कालसमयवेलासु यदि यादादिर्बहुलम्।

यच्छब्दप्रयोगे कालादिषूपपदेषु धातोर्यादादिर्विभक्तिर्भवति बहुलम्। कालो यदधीयीत भवान्। समयो यच्छयीत भवान्। वेला यद्भुञ्जीत भवान्। बहुलवचनात्कालो यदध्ययनस्य, समयो यच्छयनस्य, वेला यद्भोजनस्य इत्याद्यपि[२] भवति।

१०९. शक्तार्हयोः कृत्यश्च।

शक्त समर्थ। अर्ह योग्य। शक्तेऽर्हे च कर्तरि गम्यमाने[३] धातो कृत्याश्चकारात् यादादिश्च प्रत्यया भवन्ति। चानुकृष्टेन न यथासंख्यमिति न्यायेन न यथासख्यम्। भवता खलु भारो वोढव्य, वहनीय, वाह्य, उह्येत। भवान् भार वहेत्। भवान् हि शक्त। अर्हे—भवता खलु कन्या वोढव्या, वहनीया, वाह्या, उह्येत। भवान् खलु कन्या वहेत्[४]। भवता खलु छेदसूत्र वोढव्य, वहनीय, वाह्य, उह्येत। भवान् खलु छेदसूत्र वहेत्। भवानतदर्हति। यादादेर्बाधा मा भूदिति कृत्यग्रहणम्।

११०. द्यादिर्माङि।

माङ्शब्दे उपपदे धातोर्द्यादिर्विभक्तिर्भवति। सर्वविभक्त्यपवाद। माकार्षीदधर्मम्। माहार्षीत् परस्वम्। कथ मा भवतु तस्य पाप मा भविष्यतीति। असाधुरेवायम्। केचिदाहु[५] अङितो माशब्दस्याय प्रयोग।

१११. सस्मे दिबादिश्च।

स्मशब्दसहिते माङ इत्युपपदे धातोर्दिबादिश्चकारात् द्यादिश्च विभक्ती भवत। मा[६] स्म करोत्। मा स्म कार्षीत्। मा चैत्र स्म हर परद्रव्यम्। मा चैत्र स्म हार्षी परद्रव्यम्।

---

१. स्मेऽधीष्टौ च तुबादिरित्यकरणात्।

२. यच्छब्दप्रयोगेऽनेन यादादिर्विहितेति अनट् न प्राप्नोति। बाहुलकात् सोऽपि भवतीत्यर्थ।

३. न तु वाच्य एवेत्यर्थः।

४. अत्रार्हे कर्तरि वाच्ये व्यक्तिव्याख्यानादनेन यादादि। अन्यथाऽर्हे कर्तरि 'अर्हे तृच' [६/१/३७] इति परत्वात् तृजेव स्यात् भावकर्मणोरस्य चरितार्थत्वात्।

५. स्वमतेऽपि अङिन्माशब्दप्रयोगोऽस्ति, किंतु क्रियायोगेऽङिन्माशब्दस्य प्रयोगो नेष्यते, अत केचिदाहुरित्युक्तम्।

६. माशब्देन निषेध उच्यते स्मशब्देन च स एव द्योत्यते।

११२. धातुसंबन्धे प्रत्ययाः ।

धातुशब्देन धात्वर्थ[१] उच्यते। धात्वर्थानां संबन्धे विशेषणविशेष्यभावे सति अयथाकालमपि प्रत्ययाः साधवो भवन्ति। विश्वदृश्वाऽस्य पुत्रो भविता। कृतः कटः श्वो भविता। भावि कृत्यमासीत्। विश्वदृश्वेति भूतकालः प्रत्ययो भवितेति भविष्यत्कालेन प्रत्ययेनाभिसबध्यमानः साधुर्भवति। एवं कृतः कटः श्वो भवितेति। भावि कृत्यमासीत् इत्यत्र तु भावीति भविष्यत्कालः प्रत्ययः आसीदिति भूतकालेन प्रत्ययेनाभिसंबध्यमानः साधुर्भवति। विशेषणं गुणत्वाद् विशेष्यकालमनुरुध्यते। तेन विपर्ययो न भवति। तथा तिबाद्यन्तमपि यदाऽपरं तिबाद्यन्तं प्रति विशेषणत्वेनोपादीयते तदा तस्यापि समुदायवाक्यार्थापेक्षया कालान्यत्वं भवत्येव।

'साटोपमुर्वीमनिशं नदन्तो, यैः प्लावयिष्यन्ति समन्ततोऽमी।
तान्येकदेशान्निभृतं पयोधेः, सोऽम्भांसि मेघान् पिबतो ददर्श' ॥

[शिशुपालवधमहा० ३/७४]

अत्र प्लावयिष्यन्तीति भविष्यदर्थस्य ददर्श इति भूतानुगमः। बहुवचनात् अधात्वधिकारविहिता[२] अपि प्रत्ययास्तद्धिता धातुसबन्धे सति कालभेदे साधवो भवन्ति। गोमानासीत्, गोमान् भविता। अस्तिविवक्षायां हि मतुरुक्त। स कालान्तरे न स्यात् इति।

११३. भृशाभीक्ष्ण्ये हिस्वौ यथाविधि तध्वमौ च तद्युष्मदि ।

गुणक्रियाणामधिश्रयणादीनां क्रियान्तरैरव्यवहितानां साकल्यं फलातिरेको वा भृशत्वम्। प्रधानक्रियाया विच्छेदादेः क्रियान्तरैरव्यवहिताया पौनःपुन्यमाभीक्ष्ण्यम्। तद्विशिष्टे सर्वकालेऽर्थे वर्तमानाद् धातोः सर्वविभक्तिसर्ववचनविषये हिस्वौ तुबादिसबन्धिनौ भवतः यथाविधि धातोः सबन्धे यत एव धातोर्यस्मिन्नेव कारके हिस्वौ विधीयेते तस्यैव धातोस्तत्कारकविशिष्टस्यैव संबन्धेऽनुप्रयोगरूपे सति, तथा तध्वमौ हिस्वसाहचर्यात् तुबादेरेव सबन्धिनौ तयो तध्वमोः संबन्धी बहुत्वविशिष्टो युष्मत् तस्मिस्तद्युष्मदि अभिधेये भवतः चकारात् हिस्वौ च यथाविधि धातोः सबन्धे। लुनीहि लुनीहीत्येवायं लुनाति। अनुप्रयोगात् कालवचनभेदोऽभिव्यज्यते। लुनीहि लुनीहीत्येवेमौ लुनीत। लुनीहि लुनीहीत्येवेमे लुनन्ति। लुनीहि[३] लुनीहीत्येव त्वं लुनासि, युवा लुनीथ, यूय लुनीथ। लुनीहि लुनीहीत्येवाह लुनामि, आवा लुनीवः, वय लुनीम। एव लुनीहि लुनीहीत्येवाय लुनीयात्। लुनीहि लुनीहीत्येवाय लुनातु। लुनीहि लुनीहीत्येवाय अलुनात्। लुनीहि लुनीहीत्येवाय अलावीत्। लुनीहि लुनीहीत्येवाय लुलाव। लुनीहि लुनीहीत्येवायं लूयात्। लुनीहि लुनीहीत्येवायं लविता। लुनीहि लुनीहीत्येवाय लविष्यति। एव अधीष्वाधीष्वेत्येवाय अधीते, इमावधीयाते, इमेऽधीयते। त्वमधीषे, युवामधीयाथे, यूयमधीध्वे। अहमधीये, आवामधीवहे, वयमधीमहे। अयमधीयीत, अयमधीताम्, अयमध्यैत, अयमध्यगीष्ट, अयमधिजगे, अयमध्येषीष्ट, अयमध्येता, अयमध्येष्यते। एवं सर्वविभक्तिवचनान्तरेष्वपि हिस्वौ उदाहरणीयौ। एव भावकर्मणोरपि। शय्यस्व शय्यस्व इत्येव शय्यते, अशायि, शायिष्यते भवता। लूयस्व लूयस्वेत्येव लूयते, अलावि, लाविष्यते केदारः। तध्वमौ च तद्युष्मदि—लुनीत लुनीत इत्येव यूयं लुनीथ। लुनीहि लुनीहीत्येव यूयं लुनीथ। अधीध्वमधीध्वमित्येव यूयमधीध्वे। अधीष्व अधीष्व इत्येव यूय अधीध्वे। लुनीत लुनीतेत्येव यूयमलाविष्ट। लुनीहि लुनीहीत्येव यूयमलाविष्ट। अधीध्वमधीध्वमित्येव यूयमध्यैढ्वम्। अधीष्वाधीष्वेत्येव यूयमध्यगीढ्वम्। एव सर्वत्राप्युदाहार्यम्। यथाविधीति किम्? लुनीहि लुनीहीत्येवाय लुनाति। छिनत्ति लूयते वेति धातुसंबन्धे मा भूत्। अधीष्वाधीष्व इत्येवायं अधीते। पठति अधीयते वेति धातुसबन्धे मा भूत्। लुनीत लुनीत इत्येव यूयं लुनीथ। छिन्थेति धातुसंबन्धे मा भूत्। अधीध्वमधीध्वं इत्येव यूयमधीध्वे। पठथेति धातुसबन्धे मा भूत्। लुनीहि लुनीहि इत्यादौ च भृशाभीक्ष्ण्ये द्विर्वचनम्। ननु च

१. शब्दतः संबन्धाऽभावात्।
२. अन्यथा धातुप्रकरणत्वात् धातोरेव परे ये प्रत्ययास्त एव स्युः।
३. इतिशब्द संबन्धोपादानार्थः, अन्यथाऽसत्त्वभूतार्थवाचिनोराख्यातयोः परस्परेण संबन्धो नावगम्येत।

भृशाभीक्ष्ण्ययोर्यङपि विधीयते न तु तत्र द्विर्वचनमिह तु द्विर्वचनमित्यत्र को हेतु: ? उच्यते—यङ् स्वार्थिकत्वात् प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये समर्थोऽवद्योतयितु इति तदभिव्यक्तये द्विर्वचनं नापेक्षते। हिस्वादयस्तु कर्तृकर्मभावार्थत्वेनाऽस्वार्थिकत्वादसमर्था प्रकृत्यर्थोपाधी भृशाभीक्ष्ण्ये अवद्योतयितुमिति तदवद्योतनाय द्विर्वचनमपेक्षन्ते इति।

११४. समुच्चये वा सामान्यार्थस्य।

भृशाभीक्ष्ण्ये यथाविधि[1] इति च नानुवर्तते। समुच्चये गम्यमाने सामान्यार्थस्य धातो सबन्धे सति धातोः परौ हिस्वौ तध्वमौ च तद्युष्मदि वा भवत। व्रीहीन् वप, लुनीहि, पुनीहि इत्येव यतते, चेष्टते, समीहते, यत्यते, चेष्ट्यते, समीह्यते। पक्षे—व्रीहीन् वपति, लुनाति, पुनातीत्येव यतते, यत्यते। देवदत्तोऽद्धि, जिनदत्तोऽद्धि, गुरुदत्तोऽद्धि इत्येव भुञ्जते, भज्यते। पक्षे—देवदत्तोऽत्ति, जिनदत्तोऽत्ति, गुरुदत्तोऽत्ति इत्येव भुञ्जते, भुज्यते। अत्र क्रियासमुच्चय। ग्राममट, वनमट, गिरमट इत्येव अटति, घटते, अट्यते, घट्यते। पक्षे—ग्राममटति, वनमटति, गिरिमटतीत्येवाटति, घटते, अट्यते, घट्यते। सक्तून् पिब, धाना खाद, ओदन भुङ्क्ष्वेत्येवाभ्यवहरति, अभ्यवह्रियते। पक्षे—सक्तून् पिबति, धाना खादति, ओदन भुङ्क्ते इत्येवाभ्यवहरति, अभ्यवह्रियते। सूत्रमधीष्व, निर्युक्तिमधीष्व, भाष्यमधीष्वेत्येव अधीते, पठति, अधीयते, पठ्यते। पक्षे—सूत्रमधीते, निर्युक्तिमधीते, भाष्यमधीते इत्येवाधीते, पठति, अधीयते, पठ्यते। अत्र कारकसमुच्चय। तध्वमौ च तद्युष्मदि—व्रीहीन् वपत, लुनीत, पुनीतेत्येव यतध्वे, चेष्टध्वे, समीहध्वे। व्रीहीन् वप, लुनीहि, पुनीहि इत्येव यतध्वे, चेष्टध्वे, समीहध्वे। पक्षे—व्रीहीन् वपथ, लुनीथ, पुनीथेत्येव यतध्वे, चेष्टध्वे, समीहध्वे। ग्राममटत, वनमटत, गिरिमटतेत्येवाटथ, घटध्वे। ग्राममट, वनमट, गिरिमटेत्येवाटथ, घटध्वे। पक्षे—ग्राममटथ, वनमटथ, गिरिमटथेत्येव अटथ, घटध्वे। सूत्रमधीध्वं, निर्युक्तिमधीध्वं, भाष्यमधीध्वमित्येवाधीध्वे, पठथ। सूत्रमधीष्व, निर्युक्तिमधीष्व, भाष्यमधीष्वेत्येवाधीध्वे, पठथ। पक्षे—सूत्रमधीध्वे, निर्युक्तिमधीध्वे, भाष्यमधीध्वे इत्येवाधीध्वे, पठथ। एव वचनान्तरे[2] त्रिकान्तरे विभक्त्यन्तरेप्युदाहार्यम्। सामान्यार्थस्येति किम् ? व्रीहीन् वप, लुनीहि, पुनीहि इत्येव वपति, लुनाति, पुनातीति मा भूत्। क्रियाभेदेन व्रीहीत्यस्य सामान्यार्थत्वाऽभावात्। ग्राममट, वनमट, गिरिमटेत्येव ग्राममटति, वनमटति, गिरिमटतीति च मा भूत्। कारकभेदेन अटति इत्यस्य सामान्यार्थत्वाऽभावात्।

जगज्जालज्वाला ज्वलयति सदा लोकहृदयं,
विचारस्तत्त्वानां भवतु बत कस्मिन्नवसरे।
सुधावाग्भि कालुः सदयमसिचत् य[3] कविरघु,
चतुर्थोऽध्यायोऽयं भजति नितरा तद्धितपदम्[4]॥

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं चतुर्थोऽध्यायः।

---

१ समुच्चये इति भणनात् सामान्यार्थस्येति भणनाच्च।

२. एतच्च हिस्वौ प्रत्येव ज्ञातव्यं न तध्वमौ तयोरेव घटनात्।

३ तथापि इत्यध्याहार्यम्।

४. तस्य कालोर्हितपदस्तद्धितपदस्तं।

पञ्चमोऽध्यायः

प्रथमश्चरणः

१. कृत् ।

धातोर्विधीयमानो वक्ष्यमाण प्रत्यय कृत्संज्ञको भवति । घनघात्य[1], उदकेविशीर्ण[2], गोदायो[3] व्रजति । कृत्संज्ञा-प्रयोजन तु **'तिक्कृतौ संज्ञायां'** [५/१/८४] इत्यादय ।

२. बहुलम् ।

अधिकारोऽयम् । कृत्प्रत्ययां यथानिर्दिष्टात् अर्थादेरन्यत्रापि[4] बहुल भवति । पादाभ्यां ह्रियते—पादहारक । गले चोप्यत इति गलेचोपक इत्यादि ।

३. कर्तरि ।

कृत्प्रत्ययोऽर्थविशेषनिर्देशमन्तरेण कर्तरि भवति । कारक , कर्ता, पच , नन्दन. ।

४. कर्मणि घुर-केलिम-कृष्ट-पच्याः ।

घुर, केलिम— इत्येतौ प्रत्ययौ कृष्टपच्यशब्दश्च कर्मणि कर्तरि भवतीति वेदितव्यम् । घुरो वक्ष्यते । केलिमोऽत्र[5] एव वचनात् ज्ञायते । कृष्टपच्ये यश्च । भज्यते स्वयमेव—भङ्गुरं काष्ठम् । एव भिदुर, कुसूल. । छिदुरा रज्जुः । भार्मामदिविदा कर्तर्येव घुर कर्मकर्तुरसभवात् । भामते इत्येवशीलो भामुर । एव मेदुर , विदुर । छिदिभिदोरपि कर्तरि घुरमिच्छन्त्यन्ये । दोषान्धकारभिदुर । दुर्नारिवक्षश्छिदुर इति । पच्यन्ते स्वयमेव—पचेलिमा माषा । एव भिदेलिमास्तण्डुला । कृष्टे पच्यन्ते स्वयमेव- --कृष्टपच्या शालय ।

५. संगतेऽजर्यम् ।

सगमनं सगत सख्यमिति यावत् । सगते कर्तरि अभिधेये नञ्पूर्वाज्जीर्यतेर्यप्रत्ययो निपात्यते । न जीर्यतीति[6] अजर्यमार्यसगतम् । **'मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध'** [रघुवशमहाकाव्य १८/७] । सामान्यविशेषभावेन चोभयोरपि प्रयोगो भवति । **'तेन संगतमार्येण, रामाजर्यं कुरु द्रुतम्'** [भट्टिकाव्यं ६/५३] । अजर्यं सगतं नोऽस्तु । सगत इति किम् ? अजर. पटः । अजरिता कम्बल । कर्तरीति किम् ? अजार्यं संगतेन ।

---

१ अत्र कृत्संज्ञाया **'कर्तृसाधने कृता'** [३/१/५२] इति समास ।

२ अत्र **'क्षेपे'** [३/१/८४] इति समास । **'तत्पुरुषे कृति'** [३/२/२२] इत्यलुक् ।

३ अत्र **'सप्तम्युक्तं कृता'** [३/१/६८] इति समास ।

४ आदिपदात् उपपदधातू गृह्येते ।

५ **'विहाविशापचिभिदादेः केलिमः'** [उ० २/३५३] इति औणादिको नियतधातुविषयोऽय तु सर्वविषय इत्याह ।

६. कैयादिकस्य जृशो निपातन न दृष्टमित्याह ।

६. रुच्याव्यथ्यवास्तव्याः ।

एते कर्तरि निपात्यन्ते । रोचतेर्नञ्पूर्वात् व्यथतेश्च क्यप् प्रत्ययो वसतेस्तु तव्यण् निपात्यते । रोचते इति रुच्यो मोदको मैत्राय । न व्यथते इत्यव्यथ्यो मुनिः । वसतीति वास्तव्यः ।

७. भव्यगेयरम्यजन्याप्लाव्यापात्या वा ।

एते कर्तरि वा निपात्यन्ते । भावकर्मणोः प्राप्तयोः पक्षे कर्तरि विधानार्थमिदम् । भूगायतिरमयतिभ्यो यो य. प्रत्ययो यश्च जनेराङ्पूर्वाभ्यां च पतिप्लुभ्यां घ्यण् स कर्तरि वा निपात्यते । भवत्यसाविति भव्यः । पक्षे—भव्यमनेन । गायतीति गेयो माणवकः साम्नाम् । गेयानि माणवकेन सामानि । रमयत्यसौ रम्यः । रम्यते रम्यः । जायतेऽसाविति जन्यः । जन्यमनेन । आप्लवतेऽसौ इति आप्लाव्यः । आप्लाव्यमनेन । आपतत्यसौ इति आपात्यः । आपात्यमनेन ।

८. प्रवचनीयादयः ।

प्रवचनीयादयः कर्तर्यनीयप्रत्ययान्ता वा निपात्यन्ते । प्रवक्ति प्रब्रूते वा प्रवचनीयो गुरुः शासनस्य । प्रवचनीयं गुरुणा शासनम् । उपतिष्ठते इति उपस्थानीयः शिष्यो गुरोः । उपस्थानीयः शिष्येण गुरुः । एवं रमयतीति रमणीयो देशः । मदयतीति मदनीया योषित् । दीपयतीति दीपनीयं चूर्णम् । मोहयतीति मोहनीयं कर्म । ज्ञानमावृणोतीति ज्ञानावरणीयम् । एवं दर्शनावरणीयम् । अन्येऽपि यथादर्शनं विज्ञेयाः ।

९. आरम्भे क्तः ।

आरम्भे—आदिकर्मणि भूतादित्वेन[१] विवक्षिते वर्तमानाद् धातोर्यः क्तो विहितः स कर्तरि वा भवति । प्रकृतः कटं भवान् । प्रकृतः कटो भवता । प्रकृतं भवता । प्रभुक्त ओदनं चैत्रः । प्रभुक्त ओदनश्चैत्रेण । प्रभुक्तं चैत्रेण ।

१०. श्लिष-शीङ्-स्थास-वस-जन-रुह-भज-जॄभ्यः ।

एभ्यः क्तप्रत्ययो यो विहितः स कर्तरि वा भवति । श्लिष्—आश्लिष्टः कान्तां कामुकः । आश्लिष्टा कान्ता कामुकेन । आश्लिष्टं कामुकेन । शीङ्—अतिशयितो गुरुं शिष्यः । अतिशयितो गुरुः शिष्येण । अतिशयितं शिष्येण । स्था—उपस्थितो गुरुं शिष्यः । उपस्थितो गुरुः शिष्येण । उपस्थितं शिष्येण । आस्—उपासितो गुरुं शिष्यः । उपासितो गुरुः शिष्येण । उपासितं शिष्येण । वस्—अनूषितो गुरुं भवान् । अनूषितो गुरुर्भवता । अनूषितं भवता । जन्—अनुजातो माणवको माणविकाम् । अनुजाता माणविका माणवकेन । अनुजातं माणवकेन । विजाता वत्सं गौः । विजातो वत्सो गवा । विजातं गवा । रुह्—आरूढो वृक्षं भवान् । आरूढो वृक्षो भवता । आरूढं भवता । भज्—विभक्ता भ्रातरो रिक्थम् । विभक्तं भ्रातृभिः रिक्थम् । विभक्तं भ्रातृभिः । जॄ—अनुजीर्णा[२] वृषली चैत्रं—अनुप्राप्य जीर्णं इत्यर्थः । अनुजीर्णा वृषली चैत्रेण । अनुजीर्णं चैत्रेण । अकर्मका अपि हि धातवः उपसर्गसबन्धात् सकर्मका भवन्तीति शीङादिग्रहणम् । अन्यथा अकर्मकत्वादुत्तरेणैव सिद्धम् । श्लिषभजी केवलावपि सकर्मकौ ।

११. गत्यर्थाऽकर्मकपिबभुजेः ।

गत्यर्थेभ्योऽकर्मकेभ्यश्च धातुभ्यः पिबभुजिभ्यां च भूतादौ यः क्तो विहितः स कर्तरि वा भवति । गत्यर्थ—गतो मैत्रो ग्रामम् । गतो मैत्रेण ग्रामः । गतं मैत्रेण । यातास्ते ग्रामम् । यातस्तैर्ग्रामः । यातं तैः । अकर्मक—आसितो भवान् । शयितो भवान् । आसितं भवता । शयितं भवता । सकर्मका अपि अविवक्षितकर्माणोऽकर्मकाः, तेन पठितो भवान् । एवं प्रख्यातः, विदितः । अविवक्षितकर्मभ्यो नेच्छन्त्येके । तन्मते कृतो देवदत्तः, हृतो देवदत्तः इत्यादि कर्तरि न भवति ।

---

१. आदिशब्दाद् वर्तमानत्वभविष्यत्वयोरपि परिग्रहः । यथा—शातुमारभते प्रशातः । कथितुं प्रारप्स्यते प्रकष्टः ।

२. अनुपूर्वो जॄ प्राप्त्युपसर्जने, जरणे वर्तते, जनिस्तु जननोपसर्जनायां प्राप्ताविति भेदः ।

कालाध्वभावदेशैश्च कर्मभि सकर्मका अप्यकर्मका उक्ता, तेन वैरूप्य[1] भवति। सुप्तो भवान् मासम्[2]। सुप्तो भवता मासः। सुप्त भवता मासम्। एव ओदनपाक सुप्तः भवानित्यादि। पिब—पय. पीता गाव.। इद गोभिः पीतम्। इह गोभि पीतम्। भुज - अन्न भुक्तास्ते। इद तैर्भुक्तम्। इह तैर्भुक्तम्।

१२. आहारार्थाच्चाधारे।

आहारार्थाद् धातोश्चकाराद् गत्यर्थाकर्मकपिबभुजेश्च[3] य क्त स आधारे वा भवति। इदमेषा जग्धम्। इद तैर्जग्धम्[4]। इह तैर्जग्धम्। इद तेषामशितम्। इद तैरशितम्। इह तैरशितम्। इदमेषामभ्यवहृतम्। इद तैरभ्यवहृतम्। इह तैरभ्यवहृतम्। आरम्भे तु कर्तर्यपि भवति। इह ते अन्न प्राशिता। इह ते मधु प्रलीढाः। गत्यर्थादिभ्यः खल्वपि - इद तेषा यात, इदमहे सृप्त, इदमेषामासित, इदमेषां शयित, इद गवा पीत, इद तेषां भुक्तम्। पक्षे कर्तृकर्मभावेषु पूर्वाण्येवोदाहरणानि[5]।

१३. स्थानीयादयः।

स्थानीयादय शब्दा आधारे वा निपात्यन्ते। पक्षे यथाप्राप्तम्। तिष्ठन्ति यस्मिन्निति स्थानीय नगरम्। शेरते यस्मिन्निति शयनीय पल्यङ्कः। अन्येपि यथादर्शन विज्ञेया।

१४. स्थेयम्।

स्थेयमिति यप्रत्ययान्त शब्द आधारे वा निपात्यते। तिष्ठन्ति यस्मिन्निति स्थेय भवनम्। स्थेया शाला। पक्षे यथाप्राप्तम्।

१५. स्नानीयादयः साधने।

स्नानीयादय. शब्दा साधने वा निपात्यन्ते। पक्षे यथाप्राप्तम्। स्नाति तेनेति स्नानीय चूर्णम्। मुह्यत्यनेनात्मेति मोहनीय कर्म। याति अनेनेति यानीयोऽश्व। छिद्यतेऽनेनेति छेदनीय शस्त्रम्। अन्येऽपि यथादर्शन विज्ञेया.।

१६ दानीयादयो दानपात्रे।

दानीयादय शब्दा दानपात्रे वा निपात्यन्ते। पक्षे यथाप्राप्तम्। दीयते यस्मै इति दानीयोऽतिथि.। संप्रदीयतेऽस्मै इति सप्रदानम्। एव स्पृहणीया विभूति। अन्येऽपि यथादर्शन विज्ञेया.।

१७. दाशगोघ्नौ।

दानपात्र इत्यनुवर्तते। दाश, गोघ्न—इत्येतौ शब्दौ दानपात्रे निपात्येते। दाशन्ति यस्मै स दाश.। अच्, कृत्वात्कर्तरि प्राप्ते वचनम्। गाहन्ति यस्मै स गोघ्नोऽतिथि। अत्र गोशब्देन इन्द्रिय गृह्यते। समागताय अतिथये स्वेन्द्रियाणि समर्पयति। तद्वशी भवतीत्यर्थ। हन्तिरत्र गत्यर्थ। स ण्यन्तर्भावित, टगत्र निपात्यते।

---

१. 'कालाध्वभाव ··' [२/४/१८] इत्यादिना युगपत्सकर्मकत्वमकर्मकत्वं चोक्तम्, तेनाऽकर्मकत्वात् कर्तरि भावे च सकर्मकात् कर्मणि प्रयोग इति वैरूप्यम्।

२. अत्र यावता कर्मसज्ञा तावता कर्मणि द्वितीया। यावता त्वऽकर्मसज्ञा तावता कर्तरि क्त।

३. पिबभुजोरनुवर्तन तु गत्यर्थाऽकर्मकसबद्धत्वादेव। सिद्धिस्तु आहारार्थत्वेनैव भविष्यति।

४. ननु इद तैर्जग्धं इत्यादौ आधाराऽभावात् कर्मणि स्वयमेव क्तो भविष्यति, किं विकल्पेनेति ? नैवम्। तक्रकौण्डिन्यन्यायेन आधारे एव एभ्यः क्त स्यात्। यथा 'गत्यर्थाद् भावस्य कौटिल्ये' [४/१/७] इत्यत्र यङ्।

५. 'गत्यर्थाकर्मक ··' [५/१/११] इति सूत्रे दर्शितानि।

१८. भीमादयोऽपादाने ।

भीमादय शब्दा अपादाने कारके निपात्यन्ते । बिभ्यत्यस्मादिति भीम. । एवं भीष्मः, भयानकः, वरु., समुद्रः, स्रुव', स्रुक्, रक्ष , सकमुक , खलनि । उणादिप्रत्ययान्ता एते, **'ताभ्यामन्यत्रोणादयः'** [५/१/२०] इति निषेधेनाऽप्राप्ता निपात्यन्ते । अन्येपि यथादर्शनं विज्ञेया ।

१९. समावर्त्तनीयादयो वा ।

समावर्तनीयादय शब्दा अपादाने वा निपात्यन्ते । समावर्तते तस्मादिति समावर्तनीयो गुरु । एवमुद्वेजनीयः खल. । पक्षे यथाप्राप्तम् । अन्येपि यथादर्शन विज्ञेया ।

२०. ताभ्याऽमन्यत्रोणादयः ।

कृत्वात्कर्तरि एव प्राप्ते कर्मादिष्वपि विधानार्थ वचनम् । ताभ्यामिति पूर्वोक्ताभ्या दानपात्राऽपादानाभ्या अन्यत्र कारके भावे चोणादय प्रत्यया भवन्ति । करोतीति कारु । वातीति वायु । कषितोऽसाविति कर्मणि कपि । तन्यतेऽसाविति तनु । ऋचन्ति तया इति ऋक् । वृत्त तस्मिन्निति वर्त्म । चरित तस्मिन्निति चर्म ।

२१. क्त्वातुमऽमो भावे ।

क्त्वा, तुम्, अम्—इत्येते प्रत्यया भावे धात्वर्थमात्रे वेदितव्या । कृत्वा व्रजति । कर्तु व्रजति । कारकार व्रजति । चौरकारमाक्रोशति । अतिथिवेद भोजयति ।

२२. अकर्मकात् कृत्यक्तखलर्थाः ।

अकर्मकाद् धातो कृत्यक्तखलर्था प्रत्यया भावे भवन्ति । शयितव्य, शयनीय, शेय वा भवता । सकर्मका अपि अविवक्षितकर्माण कर्त्रेकनिष्ठव्यापारा अकर्मका भवन्ति । कर्तव्य, करणीय, देय, कृत्य, कार्य वा भवता । क्त—शयित भवता । कृत भवता । सकर्मकादपि नपुसके भावे क्तमिच्छन्त्येके । भवना ग्राम[1] गतम् । भवना ओदन भुक्तम् । खलर्थ—सुशय भवता । सुकर भवता । ईषदाढ्य भव भवता । सुग्लानं कृपणेन ।

२३. सकर्मकात् कर्मणि ।

सकर्मकाद् धातो कृत्यक्तखलर्था प्रत्यया. कर्मणि भवन्ति । कर्तव्य , करणीय , देयः, कृत्य , कार्य कटो भवता । क्त—कृत कटो भवता । खलर्थ —सुकर. कटो भवता । सुकट कराणि वीरणानि । सुज्ञान तत्त्व मुनिना ।

२४. वाऽसरूपोऽपवादः प्राक् क्तेः ।

अस्मिन् धात्वधिकारे असमानरूपोऽपवाद प्रत्ययो वा बाधको भवति **'स्त्रियां क्तिः'** [५/३/८७] इत्यत प्राक् । णकतृचौ उत्सर्गप्रत्ययौ, **'नाम्युपधप्रीकृगिरः कः'** [५/१/६५] इति क अपवादप्रत्यय । अस्मिन् कविषये णकतृचावपि भवत इति साराशः । विक्षिप , विक्षेपक , विक्षेप्ता । एव सर्वत्र । नन्दन., नन्दकः, नन्दयिता । अवश्यलाव्य, अवश्यलवितव्यं, अवश्यलवनीयम् । असरूप इति किम् ? **'कर्मण्यण्'** [५/२/१] इति अण् उत्सर्ग , **'आतो डोऽह्वावामः'** [५/२/५] इति डोऽपवाद । एतयोरन्ते अकार एवावतिष्ठते, अत समानरूपत्वम् । तेन अण्प्रत्यय डो नित्य बाधते । गोद , कम्बलद । एव घ्यणि यो न भवति । कार्यम् । **नानुबन्धकृतान्यसारूप्यानेकस्वरत्वानेकवर्णत्वानि** इति न्यायात् अणो णकार. डस्य डकारश्च असमानताहेतुर्न भवति । प्राक् क्तेरिति किम् ? कृतिः, चितिः, रक्षित, रक्षण—अत्र घञादिर्न भवति । चिकीर्षा, जिहीर्षा—अत्र क्तिर्न भवति । ईषत्पान', सुपान , दुष्पान.—अत्र खल् न भवति ।

१ भवता कर्ता गत वर्तते । कम् ? ग्रामम् ।

२५. तव्यानीयौ ।

धातोः परौ तव्य, अनीय—इत्येतौ प्रत्ययौ भवतः । शयितव्य, शयनीयम् । वस्तव्यं, वसनीयम् । कर्तव्य, करणीयं भवता । कर्तव्यः, करणीयः कटः ।

२६. स्वराद्य एच्चातः ।

स्वरान्ताद् धातोर्यः प्रत्ययो भवति आकारान्तानामेकारादेशश्च । दित्स्यं, धित्स्यं, चेय, जेयं, नेयं, शेयं, नव्यं, हव्य, लव्यं, भव्यम् । एच्चातः—देय, धेयम् । असरूपत्वात् तव्यानीयावपि । चेतव्य, चयनीयम् । जेतव्यं, जयनीयम् ।

२७. पु-शकि-तकि-चति-यति-शसि-सहेः ।

पवर्गान्तेभ्य शकादिभ्यश्च धातुभ्यो यः प्रत्ययो भवति । वक्ष्यमाणघ्यणोऽपवादः । पवर्गात्—तप्य, लभ्य, गम्यम् । कथ असिना वध्योऽसिवध्यः, मुशलवध्य ? उच्यते—'**न जनवधः**' [४/२/२५] इति वृद्धिप्रतिषेधे घ्यणा भविष्यति । शकादिभ्यः—शक्य, तक्य, चत्य, यत्यं, शस्यं, सह्यम् । असरूपत्वात् तव्यानीयावपि भवतः ।

२८. यजिभजिभ्यां वा ।

आभ्या य प्रत्ययो वा भवति । पक्षे घ्यण् । यज्यं, भज्यम् । याज्यं, भाग्यम् ।

२९. गदिमदियमोऽनुपसर्गात् ।

एभ्योऽनुपसर्गेभ्यो य प्रत्ययो भवति । गद्यं, मद्यं, यम्यम् । अनुपसर्गादिति किम् ? प्रगाद्य, प्रमाद्य, प्रयाम्यम् । वक्ष्यमाणघ्यण् ।

३०. चरेराङस्त्वगुरौ ।

अनुपसर्गात् चरे आङ्पूर्वात् तु अगुरावर्थे यः प्रत्ययो भवति । चर्य भवता, चर्यो देश । आचर्य भवता, आचर्यो देश । आङस्त्विति किम् ? अभिचार्यम् । अगुराविति किम् ? आचार्यो गुरु ।

३१. वर्योपसर्यावद्य-पण्यमुपेयर्तुमती-गर्ह्य-विक्रेये ।

वर्यादय शब्दा उपेयादिष्वर्थेषु यथासङ्ख्य यप्रत्ययान्ता निपात्यन्ते । वृणातेर्य वर्या उपेया चेद् भवति । शतेन वर्या, सहस्रेण वर्या वा कन्या—मैत्रीमापादनीयेत्यर्थ । वृत्यान्या । वृणोतेः क्यप् । स्त्रीलिङ्गनिर्देशान्नेह—वार्या ऋत्विज । अन्यस्तु '**सुग्रीवो नाम वर्योऽसौ, भवता चारुविक्रमः**' [भट्टिकाव्य ६/५०] इति प्रयोगदर्शनात् पुलिङ्गेऽपीच्छति । सामान्य-निर्देशात् तदपि सगृहीतम् । शतेन वर्य । सहस्रेण वर्यः । उपपूर्वात् सर्तेर्य उपसर्या ऋतुमती चेत् । उपसर्या गौ—गर्भग्रहणे प्राप्तकालेत्यर्थः । अन्यत्र उपसार्या शरदि मथुरा । नञ्पूर्वाद् वदेर्य अवद्यं गर्ह्य चेत् । अवद्यं पापं, अवद्या हिंसा—गर्ह्येत्यर्थः । अनुद्यमन्यत् । कथमवाद्या ? वदेर्निरुपपदात् घ्यण्, पश्चात् नञ्समास । पणेर्य पण्य विक्रेयं चेत् । पण्यः कम्बलः, पण्या गौः—विक्रेयेत्यर्थः । अन्यत्र पाण्यः साधुः ।

३२. अर्यः स्वामिवैश्ययोः ।

अर्तेः स्वामिनि वैश्ये चाभिधेये यो निपात्यते । अर्य स्वामी । अर्यो वैश्य । स्वामिवैश्ययोरिति किम् ? आर्यः ।

३३. वह्यं साधने ।

वहेः साधने यो निपात्यते । वहन्ति तेनेति वह्य शकटम् । वाह्यमन्यत् ।

३४. क्षय्यजय्यौ शक्तौ ।

क्षि, जि—इत्येतयो. शक्तौ गम्यमानायां यप्रत्ययेऽयन्तादेशो निपात्यते। शक्य क्षेतु क्षय्यो व्याधि.। शक्यं क्षेतु क्षय्यं बटुना। शक्य जेतु जय्य शत्रु । शक्यं जेतु जय्य राज्ञा। शक्ताविति किम्? अर्हे—क्षेयं पापम्। जेय मन ।

३५. क्रय्यः क्रयार्थे।

क्रीणातेर्यप्रत्ययेऽयन्तादेशो निपात्यते क्रयाय चेत् प्रसारितोऽभिधेयो भवति। क्रय्यो गौ । क्रय्य कम्बल.। क्रयार्थं इति किम्? **'क्रेयं नो धान्यं, न चास्ति प्रसारितम्'** [पा० ६/१/८२ महाभाष्य, द्वितीयखड, पृ० ७२८]।

३६. नाम्नि वदः क्यप् च।

अनुपसर्गादित्यनुवर्तते। नाम्नि उपपदेऽनुपसर्गाद् वदे क्यप् चकारात् यश्च प्रत्ययो भवत । ब्रह्मोद्यम्। किस्वात् संप्रसारणम्। ब्रह्मवद्यम्। सत्योद्यं, सत्यवद्यम्। नाम्नीति किम्? वाद्यम्। अनुपसर्गादिति किम्? प्रवाद्य, अनुवाद्यम्। क्यपि पकारस्तु गागमार्थः।

३७. हत्याभूय भावे।

नाम्नि उपपदेऽनुपसर्गात् परौ हत्या, भूय—इत्येतौ क्यबन्तौ निपात्येते। हन्ते स्त्रीभावे क्यप् तकारश्चान्तादेश.। ब्रह्मणो वधः[1]—ब्रह्महत्या। भ्रूणहत्या, दरिद्रहत्या, श्वहत्या। भवतेर्नपुंसके भावे क्यप्। ब्रह्मभूय गत, देवभूय गत—ब्रह्मत्वं देवत्वं वा गत इत्यर्थ। भावे इति किम्? श्वघात्या वृषली। नाम्नीनि किम्? हतिः, घान, भव्यम्। हन्तेर्भावे घ्यण् न भवत्यनभिधानात्। तथा च बहुलाधिकार.[2]। अनुपसर्गादिति किम्? उपहति, प्रभव्यम्।

३८. खेयमृषोद्ये।

अनुपसर्गादिति नाम्नीति च निवृत्तम्। खेय, मृषोद्य—इत्येतौ क्यबन्तौ निपात्येते। खनेर्घ्यणोऽपवाद क्यप् टेरेकारश्च। खन्यत इति खेयम्। निखेय[3], उत्खेयम्। मृषापूर्वाद् वदते पक्षे ये प्राप्ते नित्य क्यप्। मृषोद्यते, मृषोद्यम्। नात्र भाव एवेति योगविभाग ।

३९. ऋदुपधादक्लृपिचृदृचः।

ऋकारोपधाद धातो क्लृपि-चृति-ऋचि-वर्जितात् क्यप् प्रत्ययो भवति। वृत्य, वृध्य. गृध्यं. शृध्यम्। अक्लृपिचृदृच इति किम्? कल्प्य, चर्त्य, अर्च्यम्।

४०. वृनेति-दृ-जुषि-शासु-स्तुभ्यः।

एभ्य क्यप् प्रत्ययो भवति। वृन्—प्रावृत्य। वृङस्तु वार्या ऋत्विज। एतीनि इणिकोर्ग्रहणम्[4]। इत्य. अधीत्य। अयतेरिङश्च न भवति। उपेय, अध्येयम्। इकोऽप्यध्येयमित्येके। ईयतेरप्युपेयमिति भवति। दृ—आदृत्य। जुष्—जुष्यः। शास्—शिष्यः। आशासेस्तु **'आशास्यमन्यत्[5] पुनरुक्तभूतं'** [रघुवंशमहा० ५/३४] इति। स्तु—स्तुत्यः,

---

१. संबन्धे षष्ठी अकर्मकस्य विवक्षणात्।
२ एतदर्थमेव बहुलाधिकारोऽनुवर्तते इत्यर्थ।
३. निखेयमिति द्योतकत्वात् न्यादिप्रयोगेऽपि भवति।
४. इकस्तु परस्मैपद्यादाविकसाहचर्यात् निरास।
५. आङ· क्विप्येवेति नियमाद्वात इर्न।

अवश्यस्तुत्यः । कथं 'अनिवार्यो गर्जरन्यः स्वभाव इव देहिनाम्' इति ? संभवतेरन्यत्रापि[1] वृङ् ।

४१. भृनोऽसंज्ञायाम् ।

भृनो धातोरसंज्ञाया क्यप् प्रत्ययो भवति । भ्रियते इति भृत्य । पोष्य इत्यर्थः । असंज्ञायामिति किम् ? भार्यो नाम क्षत्रिय । भार्या स्त्री । कथं संज्ञायां कुमारभृत्या ? उच्यते—अत्र 'भृनः संज्ञायां' [५/४/६४] इति क्यपो भावे एव विधानम् ।

४२. समो वा ।

संपूर्वात् भृनः क्यप् प्रत्ययो वा भवति । संभृत्यः, संभार्यः । पक्षे घ्यण् ।

४३. पदास्वैरि-बाह्या-पक्षेषु ग्रहेः ।

विभक्त्यन्तं पदम् । अस्वैरी परतन्त्रः । बाह्या बहिर्भवा । पक्षो वर्गः । एष्वर्थेषु वर्तमानात् ग्रहेः क्यप् भवति । घ्यणोऽपवाद । प्रगृह्यते विशेषेण ज्ञायते प्रगृह्य[2] पदम् । यत्स्वरेण न सधीयते अग्नी इति । अवगृह्यते नानावयवसात्क्रियते[3] अवगृह्य पदम् । अस्वैरिणि—गृह्या कामिन । रागादिपरतन्त्रा इत्यर्थ । बाह्यायां—ग्रामगृह्या श्रेणि । नगरगृह्या सेना । बाह्येत्यर्थ । स्त्रीलिङ्गनिर्देशो लिङ्गान्तरेऽनभिधानख्यापनार्थ । पक्षे—त्वद्गृह्य, मद्गृह्य । गुणगृह्या वचने विपश्चित । तत्पक्षाश्रिता इत्यर्थ । एष्विति किम् ? ग्राह्यं वच ।

४४. कृ-वृषि-मृजि-शंसि-दुहि-गुहि-जपेर्वा ।

एभ्य क्यप् प्रत्ययो वा भवति । पक्षे घ्यण् । कृत्य, कार्यम् । वृष्यं, वर्ष्यम् । मृज्य, मार्ग्यम् । शस्यं, शंस्यम् । दुह्य, दोह्यम् । गुह्यं, गोह्यम् । जप्य, जाप्यम् । जपेरपि क्यबभावपक्षे[4] घ्यण् विकल्पसामर्थ्यात् ।

४५. विपूय-विनीय-जित्य-कुप्य-सूर्य-युग्याज्यं मुञ्ज-कल्क-हलि-धन-देवता-पत्र-घृते ।

विपूयादय शब्दा यथासख्यं मुञ्जादिष्वर्थेषु क्यबन्ता निपात्यन्ते । विपूर्वात् पूङ् पून् वा—विपूयो मुञ्जः । विपवितव्य इत्यर्थ । मुञ्जस्तृणविशेष । विपूर्वान्निय—विनीय कल्क । आर्द्रद्रव्य शिलापिष्ट कल्क इत्युच्यते बुधैः । जीयते निपुणेनेति जित्या जित्यो वा हलि. । महद् हल हलि । गुपे क्यप् आदिकत्व च । गोपाय्यते तदिति कुप्य धनम् । सर्तेः क्यप् ऋकारस्योर्, सुवतेर्वा रुगागमो निपातनात् । सरति सुवति वा कर्मसु लोकानिति सूर्यो देवता । युजे क्यप् गत्वं च । युञ्जन्ति तदिति युग्य पत्रम् । पतत्यनेनेति पत्र वाहन गजाश्वादि । आङ्पूर्वाद् अञ्जे क्यप् । आञ्जन्त्यनेनेति आज्यं घृतम् । एषु निपातनसामर्थ्यादनुक्तोऽपि कारकविशेषो गम्यते । मुञ्जादिष्विति किम् ? अन्यत्र विपव्य, विनेय, जेय, गोपाय्य, योग्य, आञ्जनम् ।

४६. भिद्योद्ध्यौ नदे ।

भिद्य, उद्ध्य—इत्येतौ क्यबन्तौ नदेऽभिधेये निपात्येते । भिनत्ति कूलानि इति भिद्य । उज्झति उदकमिति उद्ध्य । नदे इति किम् ? भेत्ता, उज्झिता ।

४७. तिष्य-पुष्य-सिद्ध्या नक्षत्रे ।

तिष्य, पुष्य, सिद्ध्य—इत्येते क्यबन्ता नक्षत्रेऽभिधेये निपात्यन्ते । त्विषिपुषिसिधिभ्य क्यप् त्विषेर्वलोपश्च ।

---

१ धातूनामनेकार्थत्वात् ।

२ परस्वरेणाऽसधीयमानस्य पदस्य प्रगृह्यमिति सज्ञा विहिता ।

३ यथा पचतीत्यत्र पच-अप्-तिप् इत्यवयवा ।

४ 'पुशकित…' [५/१/२७] इति यप्रत्यये तु विशेषाऽभाव ।

त्वेषन्ति, पुष्यन्ति, सिध्यन्ति कार्याणि अस्मिन्निति तिष्यः, पुष्यः, सिद्धयः। नक्षत्रे इति किम् ? त्वेषणः, पोषणः, सेधनः।

४८. ऋवर्णहसाद् घ्यण्।

ऋवर्णान्ताद् हसान्ताच्च धातोर्घ्यण् प्रत्ययो भवति। कार्यं, हार्यं, पाक्यं, वाक्यं, वाह्यं, घात्यम्। णकारो वृद्धयर्थः। घकारः **'चजोः कगौ घिति'** [६/१/२१] इत्यत्र विशेषणार्थः।

४९. आसु-यु-वपि-रपि-लपि-त्रपि-डिपि-दभि-चम्यानमेः।

आङ्पूर्वाभ्यां सुनोतिनमिभ्यां यौत्यादिभ्यश्च धातुभ्यो घ्यण् प्रत्ययो भवति। यापवादः। आसाव्यं, याव्यं, वाप्यं, राप्यं, लाप्यं, अभिलाप्यं, त्राप्यं, अपत्राप्यं, डेप्यम्। दभिः सौत्रो धातुर्वञ्चने वर्तते। दाभ्यं, अवदाभ्यं, आचाम्य, आनाम्यम्। सुनमोराङ्पूर्वत्वं नियमार्थम्, तेनेह न—सव्यं, प्रसव्य, नम्यं, प्रणम्यम्। डिपेः कुटादित्वात् यप्रत्यये गुणो न लभ्यते इति घ्यण् विधीयते। चमेः केवलस्य **'मोऽकमियमिः...'** [४/२/२६] इत्यादिना वृद्धिप्रतिषेधे घ्यणि ये वा न विशेष इति सोपसर्गस्योदाहरणम्। नमिरन्तर्भूतण्यर्थः सकर्मकः। अकर्मका अपि हि धातवो ण्यर्थे वर्तमानाः सकर्मका भवन्ति। यथा नेमिं नमन्ति। आनमेर्नेच्छन्त्येके।

५०. पाणिसमवयोः सृजेः।

पाणि, समव—इत्येतयोरुपपदयोः सृजेर्घ्यण् प्रत्ययो भवति। ऋदुपधलक्षणस्य क्यपोऽपवादः। पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः। समवसृज्यते इति समवसर्ग्यः। पाणिसमवयोरिति किम् ? सृज्य, संसृज्यम्। समवेति समुदाय-परिग्रहार्थं द्विवचनम्।

५१. उवर्णादावश्यके।

अवश्यस्य भावोऽवश्यंभाव इति वा अकञि आवश्यकम्। उवर्णान्ताद् धातोरावश्यके गम्ये घ्यण् प्रत्ययो भवति। यापवादः। लाव्यं, पाव्यम्। यन्नियोगात् कर्तव्यं अर्थप्रकरणादिना[1] निश्चितं तत्राय प्रत्ययः। लाव्यमवश्यं, पाव्यमवश्य, अवश्यलाव्य, अवश्यपाव्यम्। अत्रावश्यशब्देनापि अवश्यभावो[2] द्योत्यते, मयूरव्यंसकादित्वात् च समासः। अवश्यस्तुत्य इत्यत्र तु बहुलाधिकारात् **'वृनेतिवृजुषि...'** [५/१/४०] इत्यादिना क्यबेव। आवश्यक इति किम् ? लव्य, पव्यम्।

५२. पाय्य-धाय्या-सान्नाय्य-निकाय्यं मानर्ग्-हविर्निवासे।

पाय्यादयः शब्दा मानादिष्वर्थेषु यथासंख्यं घ्यणन्ता निपात्यन्ते। निपातनादेव च सर्वत्रायादेशः। मीयते येन तन्मानम्। तत्र माङ आदिपत्व च। मीयते तेनेति पाय्यं मानम्। मेयमन्यत्। दधातेर्ऋचि—धीयते समिदग्नावनयेति धाय्या ऋक्। रूढिशब्दत्वात् काश्चिदेव ऋच उच्यन्ते। अन्यत्र धेया। संपूर्वान्नियतेर्हविषि समो दीर्घत्व च। सान्नाय्य हविः। अयमपि रूढिशब्दत्वात् हविर्विशेषे अवतिष्ठते। सन्नेयमन्यत्। निपूर्वाच्चिनोतेर्निवासे आदिकत्व च। निकाय्यो निवासः। निचेयमन्यत्।

५३. प्रणाय्यो निष्कामासम्मतयोः।

प्रपूर्वान्नयतेर्घ्यण् आयादेशश्च निपात्यते निष्कामेऽसम्मते चाभिधेये। प्रणाय्योऽन्तेवासी—विषयेष्वनभिलाष इत्यर्थः। प्रणाय्यश्चौरः—सर्वलोकासम्मत इत्यर्थः। प्रणेयोऽन्यः।

---

१ अवश्यमादिशब्दमन्तरेणेत्यर्थः।

२. यथा व्यतिलुनते इत्यादौ आत्मनेपदेनाऽपि क्रियाव्यतिहारे द्योतिते व्यतिशब्दप्रयोगः, तथाऽत्रापि घ्यणा द्योतितेऽप्यवश्यंभावेऽवश्यंशब्द-प्रयोगः।

५४. संचाय्य-कुण्डपाय्य-राजसूयाः क्रतौ ।

एते क्रतावभिधेये आधारे कर्मणि वा घ्यणन्ता निपात्यन्ते । निपातनादेवायादेशदीर्घत्वे अपि भवत । संचीयते सोमोऽस्मिन् सचीयते वासाविति संचाय्यः क्रतु. । संचेयोऽन्य । कुण्डै पीयते सोमोऽस्मिन् कुण्डैः पीयते इति वा कुण्डपाय्यः क्रतुः । ससोमको हि यागः क्रतु. । कुण्डपानोऽन्यः । राजा सूयतेऽस्मिन् राज्ञा वा सोतव्य इति राजसूयः क्रतुः । राजसव्योऽन्य ।

५५. परिचाय्योपचाय्यानाय्यसमूह्यचित्या अग्नौ ।

एतेऽग्नौ निपात्यन्ते । पर्युपपूर्वाच्चिनोतेर्घ्यण् आयादेशश्च । परिचीयते इति परिचाय्योऽग्नि । एव उपचाय्यः । परिचेय , उपचेयोऽन्य. । आङ्पूर्वान्नयतेर्घ्यण् आयादेश्च । गार्हपत्यादानीयते इति आनाय्यो दक्षिणाग्निः । स ह्याहवनीयेन सह एकयोनिरेव[1] उच्यते । आनेयोऽन्यः । केचिदग्निविशेषादन्यत्रापि अनित्यविशेषे इच्छन्ति । आनाय्यो गोधुक् । अनित्य इत्यर्थ. । संपूर्वाद् वहेर्घ्यण् वशब्दस्य च ऊत्वम् । समुह्यते इति समूह्य. । संवाह्योऽन्यः । अन्ये तु सपूर्वाद् ऊहेरग्नौ एव इति नियमार्थं घ्यणं निपातयन्ति । अग्नेरन्यत्र समूहितव्य इत्येव । वहेस्तु तन्मते अग्नावपि सवाह्य इति भवति । चिनोतेः क्यप्—चित्योग्नि. । चेयोऽन्यः ।

५६. याज्या दानर्चि ।

यजे साधने घ्यण् निपात्यते दानर्च्यभिधेयायाम् । इज्यतेऽनयेति याज्या । **'स्यजियजिरुचिशुचि···'** [६/१/२७] इत्यादिना गत्वाभाव. ।

५७. अमावास्याऽमावस्ये तिथौ ।

अमावास्या, अमावस्या—इत्येतौ तिथावभिधेयाया निपात्यते । अमाशब्द. सहार्थ. । अमापूर्वाद् वसतेराधारे घ्यण् पक्षे ह्रस्वश्च । सह वसतोऽस्या सूर्याचन्द्रमसाविति अमावास्या अमावस्या वा तिथिविशेष । रूढिशब्दावेतौ तिथिविशेषे वर्तेते ।

५८. ते कृत्याः ।

ते पूर्वोक्ता तव्य, अनीय, य, क्यप्, घ्यण्—इत्येते पञ्च प्रत्यया. कृत्यसंज्ञका भवन्ति । कृत्यसंज्ञाप्रयोजन तु **'प्रैषानुज्ञावसरे कृत्यतुबादी'** [४/४/१०४] इत्यादि ।

५९. णकतृचौ ।

धातो परौ णकतृचौ प्रत्ययौ भवतः । कृत्त्वात्कर्तरि । पाचकः, पक्ता । पाठकः, पठिता । णकारो वृद्धयर्थ. । चकारः तृचतृनोर्विशेषतादर्शनार्थः ।

६०. अच् ।

धातोरच् प्रत्ययो भवति । कृत्त्वात्कर्तरि । करः, हरः, पचः, पठः, उद्वहः । चकारः **'अचि'** [४/१/११] इत्यत्र विशेषणार्थः ।

६१. लिहादिभ्यः ।

लिहादिभ्यो धातुभ्योऽच् प्रत्ययो भवति । पूर्वेणैव सिद्धे पुनर्विधानं बाधकबाधनार्थम् । लेहः, शेष, सेव., देवः, मेधः, मेषः, मेघः, देहः, प्ररोहः, न्यग्रोधः, कोप, गोप, सर्पः, नर्तः, दर्शः—एषु नाम्युपधलक्षणं कं दृशेस्तु वा[2] शं

---

१. आहवनीयोऽग्निर्दक्षिणाग्निश्च निर्वाणो गार्हपत्यादेवानीयेते । अतो द्वावप्येकयोनी । गार्हपत्याग्निस्त्वरणिनिर्मन्थनादेवोत्पाद्य इति न स आनाय्यः ।

२. यदि हि नित्यं लिहाद्यच् स्यात् तदा दृशः शविधानं अनर्थकं स्यादिति ।

बाधते। अनिमिष इति बहुलाधिकारात् कोऽपि भवति। श्वपच, पारापत, कद्वद, यद्वदः, अरीन् व्रणयति इति अरिव्रणा शक्तिः, जारभरः, कन्यावर, रघूद्वहः, रसावह—एष्वण बाधते। आकृतिगणोऽयम्[1]। नदी, भषी, प्लवी, गरी, चरी, तरी, दरी, स्तरी, सूदी, देवी, सेवी, चोरी, गाही—एतेऽजन्ता गौरादौ द्रष्टव्या[2]।

६२. ब्रुवः।

ब्रुवो धातोरचि ब्रुव इति निपात्यते। ब्राह्मणमात्मानं ब्रूते—ब्राह्मणब्रुवः[3]। अणत्वादेशगुणबाधनार्थं निपातनम्।

६३. नन्द्यादिभ्योऽनः।

नन्द्यादिभ्यो धातुभ्यो नामगणदृष्टेभ्योऽनः प्रत्ययो भवति। नन्द्यादयो नन्दनरमणेत्यादिनामगणशब्देभ्योऽपोद्धृत्य वेदितव्या। स च सप्रत्ययपाठो[4] विशिष्टविषयार्थो[5] रूपनिग्रहार्थश्च। नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्। नन्दन, वाशन, मदन, दूषण, साधन, वर्धन, शोभनः, रोचन। सहिरमिदमिरुचिकृतितपितृदिदहियुपूलूभ्यः संज्ञायामेवाऽण्यन्तेभ्यः। सहते सहनः। एवं रमण, दमन, रोचन, विरोचन, विकर्तन, तपन, प्रतर्दन, दहन, यवन, पवन, लवण। निपातनाण्णत्वम्। सम: क्रन्दिकृषिहृषिभ्यः संज्ञायामेव। संक्रन्दनः, संकर्षण, महर्षण। कर्मणि दमिअर्दिनाशिसूदिभ्यः—सर्वदमन, जनार्दन, वित्तविनाशन, मधुसूदनः। असंज्ञायामपि रिपुदमन, कुलदमन, परार्दन, रोगनाशन, अरिसूदनः। नर्दिभीषिभूषिदृपिजल्पिभ्यः—नर्दयति नर्दनः, बिभीषयते विभीषण, भूषयति भूषण, दृप्यति दर्पण, जल्पति जल्पन। आकृतिगणोऽयम्।

६४. ग्रहादिभ्यो णिन्।

ग्रहादिभ्यो नामगणदृष्टेभ्यो णिन् प्रत्ययो भवति। ग्राही, स्थायी, उपस्थायी, मन्त्री, समर्दी। उपावाभ्यां रुधः—उपरोधी, अवरोधी। अपाद् राधः—अपराधी। उदः सहिदहिदमिभासिभ्यः, उत्साही, उद्दाही, उद्दासी, उद्भासी। नेः श्रुशीविशवसवपरक्षिभ्यः—निशृणोति निश्रावी, निशायी, निवेशी, निवासी, निवापी, निरक्षी। नञो व्याहृसंव्याहृसंव्यवहृयाचिव्रजवदवसिभ्यः—न व्याहरति अव्याहारी, असंव्याहारी, असंव्यवहारी, अयाची, अव्राजी, अवादी, अवासी। नञ्पूर्वात् स्वरान्तादचित्तवत् कर्तृकात्—अकारी घर्मस्य बालातप, अहारी शीतस्य शिशिर। चित्तवत् कर्तृकान्न भवति। अकर्ता कटस्य चैत्र। केचिद् अनञ्पूर्वाद् इच्छन्ति। कारी, हारी। व्यभिभ्यां भुवो भूते—विभवति स्म विभावी, अभिभावी। विपरिभ्यां भुवो ह्रस्वश्च वा। विभवति विभावी, विभवी। परिभावी, परिभवी। वेः शीङ्षिनोर्देशे ह्रस्वश्च। गुणश्चित्ते विशेते विसिनोति वा विशयी विषयी च प्रदेश। निपातनात् षत्वम्। आकृतिगणोऽयम्।

६५. नाम्युपध-ज्ञा-प्री-कॄ-गिरः कः।

नाम्युपधेभ्यो धातुभ्य ज्ञा, प्री, कॄ, गॄ—इत्येतेभ्यश्च क प्रत्ययो भवति। ककार कित्कार्यार्थ। विक्षिप, विलिख, बुध, युध, कृश, वितृद। जानातीति ज्ञ। प्रीणातीति प्रिय। किरतीति किर, उत्किरः। गिलतीति गिलः। काष्ठभेद इति परत्वादण्।

६६. उपसर्गादातो डोऽश्यः।

उपसर्गात्परात् श्यैङ्वर्जिताद् आकारान्ताद् धातोर्डः प्रत्ययो भवति। आह्वयतीति आह्वः। प्रह्वः, सव्य

---

१. तेन वशा, अमर, क्षम, रण, श्लेष, अजगर इत्यादयोऽदर्शिता अपि ज्ञेया.।

२ अन्यैर्नद्यो इत्यादीनां ईबर्थं टित्त्वं कृत, तत्स्वमते कथमित्याह।

३. अनेन क्षेपो गम्यते।

४ अथ प्रकृतय एव पठ्यता, किं सप्रत्ययपाठेनेत्याह—विशिष्टविषयार्थं इति।

५ तेन ये निरुपसर्गयदुपपदापसर्गा पठ्यन्ते ते तथा गृह्यन्ते इत्यर्थ।

परिव्य:, प्रज्य, अनुज्य:, प्रस्थ:, सुग्ल, सुम्ल:, सुत्र, व्याल, सुर:। केनैव सिद्धे डविधानं सम्प्रसारणनिषेधार्थम्। उपसर्गादिति किम्? णे—दाय, धाय:। आत इति किम्? आहर्ता। अश्य इति किम्? णे—अवश्याय:, प्रतिश्याय:। **पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्** इति णो बाध्यते नाण्, तेन गोसदाय:, वडवासदाय: इत्यणेव।

६७. व्याघ्राघ्रे प्राणिनासिकयोः।

व्याघ्र, आघ्रा,—इत्येतौ शब्दौ जिघ्रतेर्यथासंख्य प्राणिनि नासिकायां चार्थे डप्रत्ययान्तौ निपात्येते। विविध-माजिघ्रति—व्याघ्र[१] प्राणी। आजिघ्रतीति आघ्रा नासिका। वक्ष्यमाणशस्यापवाद:।

६८. पा-घ्रा-ध्मा-धेट्-दृशः शः।

एभ्य: श प्रत्ययो भवति। शकार शित्कार्यार्थ। घ्रादिसाहचर्यात् पा इति पिबतेर्ग्रहणं न पाते:। पिब:, निपिब, उत्पिब:। पाययतेस्तु लाक्षणिकत्वान्न भवति। घ्रा— जिघ्रतीति जिघ्र। विजिघ्र:, उज्जिघ्र। ध्मा—धम:, विधम:, उद्धम:। धेट्—धय, विधय:, उद्धय। दृश्—पश्य:, विपश्य, उत्पश्य:। धेटष्टकार ईबर्थ:। उद्धयी, विधयी। उपसर्गादेव इच्छन्ति अन्ये।

६९. साहि-साति-वेद्युदेजि-चेति-धारि-पारि-लिम्प-विन्दोऽनुपसर्गात्।

एतेभ्य उपसर्गरहितेभ्य श प्रत्ययो भवति। साहयतीति साहय:। साति: सौत्रो धातु:। सातय:। वेदि—वेदय:। उदेजि—उदेजय:। चेति—चेतय। धारि—धारय:। पारि—पारय:। लिम्प—लिम्प। विन्द—विन्द[२]। अनुपसर्गादिति किम्? प्रसाहयिता। छत्रधार इति परत्वादणेव।

७०. नेर्लिम्पेः संज्ञायाम्।

निपूर्वात् लिम्पे: श: प्रत्ययो भवति संज्ञाया विषये। निलिम्पन्तीति निलिम्पा नाम देवा। संज्ञायामिति किम्? निलिप:।

७१. गवादौ विन्देः।

गवादिषूपपदेषु विन्दे: श: प्रत्ययो भवति संज्ञायाम्। गा विन्दतीति गोविन्द:। कुविन्द:, अरविन्द[३], कुरुविन्द:, उरविन्द:।

७२. अपिद्दाधो वा।

अनुपसर्गादित्यनुवर्तते। अनुपसर्गाभ्या अपिद्दाधाभ्यां श प्रत्ययो वा भवति। दद:[४], दध। पक्षे आदन्तलक्षणो ण:। दाय, धाय:। अनुपसर्गादिति किम्? प्रद:, प्रध:—ड:।

७३. ज्वलादेर्णः।

अनुपसर्गेभ्यो ज्वलादिभ्यो धातुभ्यो ण: प्रत्ययो वा भवति। अचोऽपवाद। षहङ्पर्यन्ता ज्वलादयो वृत्करणात्। ज्वाल:, ज्वल। चाल:, चल:। अनुपसर्गादिति किम्? प्रज्वल:। कथं निपात:, उत्क्रोश: इति? बहुलाधिकारात्[५]।

---

१ अनेकार्थत्वात् शिङ्घनपूर्वके हिंसने वर्तने।

२ लिम्पिसाहचर्यात् विन्देस्तौदादिकस्य ग्रहणं न तु विदि अवयवे इत्यस्य।

३. चक्रावयवविशेष। अब्जे तु नपुंसकत्वम्। कश्चित् तु अब्जेऽपि पुंस्त्वमाह। राजा च।

४. 'श्नाभ्यस्तयोरातः' [३/४/७६] इत्याकारलोपः।

५. सोपसर्गादपीत्यर्थः।

७४. दुनीभुवः ।

एभ्योऽनुपसर्गेभ्यो णः प्रत्ययो वा भवति । दावः, दवः । नायः, नयः । भावः, भवः । अनुपसर्गादिति किम् ? प्रदवः, प्रणयः, प्रभवः[1] ।

७५. समाङ्भ्यां स्रोः ।

सम्, आङ्—इत्येताभ्यां परात् स्रुवो णः प्रत्ययो वा भवति । संस्रावः, संस्रवः । आस्रावः, आस्रवः ।

७६. अवाद्धृसो नित्यम् ।

अवपूर्वाभ्यां हृसाभ्यां णः प्रत्ययो नित्यं भवति । अवहारः, अवसायः ।

७७. आत्तनि-श्वसि-व्यधीणः ।

आकारान्तेभ्यः तनि, श्वसि, व्यधि, इण्— इत्येतेभ्यश्च धातुभ्यो णः प्रत्ययो भवति । आदन्त—अवश्यायः, प्रतिश्यायः, ग्लायः, म्लायः । कथं दरिद्रातीति दरिद्रः ? 'दरिद्रोऽशिति' [३/४/७८] इत्यत्र विषयेऽप्याकारस्य लोपेन आदन्तत्वाऽभावादज्जेव । तन्—तानः, उत्तानः, अवतानः । श्वस्—श्वासः, आश्वासः । व्यध्—व्याधः, सव्याधः । इण्— आयः, अत्यायः, प्रत्यायः, अन्तरायः । अतिपूर्वादिवेण इत्येके ।

७८. गृह-ग्रह-ग्राहा गेह-नक्षत्र-जलचरेषु ।

ग्रहधातोर्गृह, ग्रह, ग्राह—इत्येते शब्दा यथासंख्यं गेह, नक्षत्र, जलचर—इत्येतेष्वर्थेषु निपात्यन्ते । कप्रत्यये— गृहं, गृहाणि । गृहास्तु पुंसि बहुवचनान्त एव । 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते' [पञ्चतन्त्र ४/८१] इत्युपचारात् दारा गृहाः । नक्षत्रे ग्रह इति अच्प्रत्ययान्तः । जलचरे ग्राह इति णप्रत्ययान्तः ।

७९. नृति-खनि-रञ्जिभ्यः शिल्पिन्यकट् ।

नृतिखनिरञ्जिभ्यः शिल्पिनि कर्तरि अकट् प्रत्ययो भवति । शिल्पं—कर्मकौशलम् । तद्वान् शिल्पी । नर्तकः, नर्तकी । खनकः, खनकी । रजकः, रजकी । शिल्पिनीति किम् ? नर्तिका, खानकः, रञ्जकः । टकारः ईबर्थः ।

८०. गस्थकः ।

गायतेः शिल्पिनि कर्तरि थकः प्रत्ययो भवति । गाथकः । गाङः प्रत्यये शिल्पी[2] न गम्यते इति गायतेर्ग्रहणम् ।

८१. टनण् ।

गायतेः शिल्पिनि कर्तरि टनण् प्रत्ययो भवति । गायनः, गायनी । टकारः ईबर्थः । णकारो णित्कार्यार्थः । योगविभाग उत्तरार्थः । एतौ प्रत्ययावशिल्पिन्यपि इत्येके ।

८२. हः कालव्रीह्योः ।

जहातेर्जिहीतेर्वा काले व्रीहौ च कर्तरि टनण् प्रत्ययो भवति । जहाति, जिहीते वा भावान् हायनः संवत्सरः । जहत्युदकं दूरोत्थानात् जिहते वा द्रुतं हायना नाम व्रीहयः । कालव्रीह्योरिति किम् ? हाता ।

८३. आशिष्यकन् ।

इष्टस्य प्रार्थनमाशीः । आशिषि गम्यमानायां धातोरकन् प्रत्ययो भवति । जीवतादित्याशास्यमानो जीवकः ।

---

१. प्रभाव इति 'भावाऽकर्त्रोः' [५/४/६] घञ् ।
२. शब्दशक्तिस्वाभाव्यात् ।

एवं नन्दकः, भवकः । आशिषीति किम् ? जीविका, नन्दिका, भाविका । नकारः 'अत इवनित्काप्यप्रत्यष्…' [२/३/६५] इत्यत्र विशेषणार्थः, तेन जीवका, नन्दका, भवका ।

८४. तिक्कृतौ संज्ञायाम् ।

आशिषि विषये संज्ञायां गम्यमानायां धातोः तिक्कृतश्च सर्वे प्रत्यया भवन्ति । शम्यात् शान्तिः । तन्यात् तन्तिः । सन्यात् सन्ति । रमतामित्येवमाशंसित रन्तिः । क्रृत्—वीरो भूयादिति वीरभूः[1] । मित्रभूः । क्विप् । अग्निरस्य भूयात् अग्निभूतिः[2] । देवभूतिः, अश्वभूतिः, सोमभूतिः । कुमारोऽस्य दुरितानि नयतामित्याशंसितः कुमारनीतिः । मित्रमेनं वर्द्धिषीष्ट मित्रवृद्धिः । क्तिः । देवा एन देयासुर्देवदत्तः । यज्ञदत्तः । विष्णुरेनं श्रूयादिति विष्णुश्रुतः । क्तः । शर्वे एनं वृषीष्ट शर्ववर्मा । मन् । गङ्गा एनं मियात् गङ्गामित्रः । त्रक् । वर्धिषीष्ट वर्धमानः ।

८५. प्रसुसृल्वोऽकः साधौ ।

एभ्यो धातुभ्यः साधुत्वविशिष्टेऽर्थे वर्तमानेभ्योऽकः प्रत्ययो भवति । साधु प्रवते इति प्रवकः । एवं स्रवकः, सरकः, लवकः । साधाविति किम् ? प्रावक, स्रावकः, सारकः, लावकः ।

---

१. वीरादेः शब्दात् भवत्यादेर्धातोरनेन प्रत्ययविधिः । ततो यद्यपि साक्षात् सप्तम्युक्तता नास्ति तथापि संज्ञायां प्रत्ययविधानात् सूचितेति 'सप्तम्युक्तं कृता' [३/१/१८] इति समासः । 'नाम नाम्नं…' [३/१/१६] इति वा ।

२. कृत्वात् कर्त्तर्येव प्राप्तौ बहुलाधिकारात् संबन्धादावपि प्रत्ययः ।

द्वितीयश्चरणः

१. कर्मण्यऽण् ।

उत्पाद्यविकार्यप्राप्यरूपे कर्मण्युपपदे धातोरण् प्रत्ययो भवति। अजाद्यपवादः। उत्पाद्ये—कुम्भं करोतीति कुम्भकारः। नगरकारः। विकार्ये—काण्डलावः, शरलावः। प्राप्ये—वेदाध्यायः, चर्चापारः, भारहारः, भारवाहः, सूत्रधारः, द्वारपालः, उष्ट्रप्रणायः, कमण्डलुग्राहः। आदित्यं पश्यति, हिमवन्तं शृणोति, ग्रामं गच्छति—इत्यादौ प्राप्ये कर्मण्यनभिधानान्न भवति। महान्तं घटं करोतीत्यत्र सापेक्षत्वात् अनभिधानाच्च[1] न भवति। तथा च बहुलाधिकारः। उत्पाद्यविकार्ययोरपि क्वचिन्न भवति। संयोगं जनयति, स्रजं विरचयति, वृक्षं छिनत्ति, कन्यां मण्डयति। णकारो वृद्ध्यर्थः।

२. शीलि-कामि-भक्ष्याचरीक्षि-क्षमिभ्यो णः ।

कर्मण्युपपदे शीलि, कामि, भक्षि, आचरि, ईक्षि, क्षमि—इत्येतेभ्यो धातुभ्यो ण प्रत्ययो भवति। धर्मं शीलयति—धर्मशीलः, धर्मशीला। धर्मकामः, धर्मकामा। वायुभक्षः, वायुभक्षा। आङ्पूर्वश्चरिः—कल्याणाचारः, कल्याणाचारा। सुखप्रतीक्षः, सुखप्रतीक्षा। बहुक्षमः, बहुक्षमा। अल्घञन्तैः[2] शीलादिभिर्बहुव्रीहौ सति धर्मशीलादयः सिध्यन्ति। अण्बाधनार्थं तु वचनम्। अणि हि स्त्रियामीप् स्यात्। तथा च धर्मशीली इत्याद्यनिष्टं रूपं स्यात्। एवं प्रायेषु च बहुव्रीह्याश्रयणे अम्भोऽतिगमेति[3] स्यात्, अम्भोऽतिगामी चेष्यते। कामीति ण्यन्तस्योपादानादण्यन्तादणेव पयस्कामीति। ण्यन्तस्य तु णे सति पयःकामेति भवति। अत एव च ण्यन्तनिर्देशादण्यन्तनिर्देशे 'अतः कृकमिकंस…' [२/२/८] इत्यादौ केवलस्यैव कमेर्ग्रहणम्, तेन णे सति सकारादेशो न भवति।

३. अनुपसर्गाद् गायष्टक् ।

कर्मण्युपपदे अनुपसर्गाद् गायतेः टक् प्रत्ययो भवति। वक्रं गायति—वक्रगः, वक्रगी। सामगः, सामगी। अनुपसर्गादिति किम्? वक्रसंगायः, खरुसंगायः। वक्रादयो गीतविशेषाः। गायतिनिर्देशो गाङ्निवृत्त्यर्थः।

४. सुराशीध्वोः पिबः ।

सुरा, शीधु—इत्येतयोः कर्मणोरुपपदयोरनुपसर्गात् पिबतेष्टक् प्रत्ययो भवति। सुरां पिबति—सुरापः, सुरापी। शीधुपः, शीधुपी। सुराशीध्वोरिति किम्? क्षीरपा बाला। पिब इति किम्? सुरां पाति—सुरापा। कथं[4] संज्ञायां सुरापा, सुरापीति? पातिपिबत्योर्भविष्यति। न च धात्वर्थभेदः। संज्ञासु धात्वर्थस्य व्युत्पत्तिमात्रार्थत्वात्।

---

१. विवक्षितार्थाऽप्रतिपादनात्। अणि हि सति महतो घटकारस्य प्रतीतिः।

२. ण्यन्तेभ्योऽलि अण्यन्तेभ्यस्तु घञि।

३. अतिगम्यते 'ऋदुवर्णवृद्धि…' [५/४/५१] इत्यलि बहुव्रीहौ न चैतदिष्यते। स्थिते तु अम्भः कर्म अतिगच्छति 'कर्मण्यण्' [५/२/१]।

४. अत्र ईप्विकल्पः कथमित्याशङ्का।

५. आतो डोऽह्वावामः ।

कर्मण्युपपदेऽनुपसर्गात् ह्वावामावर्जिताद् आकारान्ताद् धातोर्डः प्रत्ययो भवति । गां ददाति—गोदः । कम्बलदः, पार्ष्णित्रः, अङ्गुलित्रः, ब्रह्मज्यः, वपुर्वीतवान् वपुर्ध्यः[1] । अह्वावाम इति किम् ? स्वर्गह्वायः, तन्तुवायः[2], धान्यमायः[3] । अणेव । कथं मित्रह्वः ? 'क्वचित्' [५/२/१०२] इति अनेन डः । अनुपसर्गादिति किम् ? गोसदायः, वडवासंदायः । उपसर्गैरव्यवधानतैव[4] इत्यण्[5] ।

६. समः ख्यः ।

कर्मण्युपपदे संपूर्वात् ख्याधातोर्डो भवति । गां संख्याति संचष्टे वा गोसख्यः । पशुसंख्यः । उपसर्गार्थं वचनम् ।

७. आङो दश्च ।

कर्मण्युपपदे आङ्पूर्वाद्दातेश्चकारात् ख्या इत्येतस्माच्च डो भवति । दायमादत्ते—दायादः । स्त्रियमाचष्टे—स्त्र्याख्यः । प्रियाख्यः । इदमुत्तरं चोपसर्गार्थं वचनम् ।

८. प्राद् ज्ञश्च ।

कर्मण्युपपदे प्रपूर्वात् जानातेः चकाराद् दारूपाच्च डो भवति । प्रथिप्रज्ञः, प्रपाप्रदः । दांप्दैपो —केदारप्रदः, भाजनप्रदः । प्रादिति किम् ? गोसदायः । इह द इति दारूपो धातुर्गृह्यते, पूर्वसूत्रे तु दान एव ग्रहणम् । तस्यैवाङा योगात् ।

९. आशीर्गत्योर्हनः ।

कर्मण्युपपदे हन्धातोर्डः प्रत्ययो भवति आशिषि गतौ च गम्यमानायाम् । शत्रुं वध्यात्—शत्रुहः । पापहः, दुःखहः । गतौ—क्रोशं हन्ति—क्रोशहः ।

१०. क्लेशादिष्वपात् ।

क्लेशादिषु कर्मसूपपदेषु अपपूर्वाद् हन्तेर्डो भवति । अनाशीर्गत्यर्थं आरम्भः । क्लेशमपहन्ति—क्लेशापहः । तमोपहः, दुःखापहः, ज्वरापहः, दर्पापहः, दोषापहः, रोगापहः, वातपित्तकफापहः, विषाग्निदर्पापहः । यथादर्शनमन्येपि विज्ञेयाः । कथं दार्वाघाटः, चार्वाघाटः ? घटेरणि संज्ञाया भविष्यति । चारु आहन्तीति चार्वाघातो हन्तेरेव । दार्वाघातोऽपि तर्हि स्यात् । असंज्ञायामिष्यत एव । एवमसंज्ञाया सपूर्वाभ्यां घटिहनिभ्यां वर्णसंघाटः, वर्णघातः, पदससंघाटः, पदसंघातः इत्यादि सिद्धम् । हन्तेरेव वा पृषोदरादित्वाद् वर्णविकारः ।

११. कुमारशीर्षयोर्णिन् ।

कुमार, शीर्ष—इत्येतयो कर्मणोरुपपदयोर्हन्तेर्णिन् प्रत्ययो भवति । कुमारं हन्ति—कुमारघाती । शीर्षघाती । अत एव निपातनात् शिरसः शीर्षभावः । शीर्षशब्दोऽकारान्तः प्रकृत्यन्तरं वा । तथा च शीर्षे स्थितं पृष्ठतः इति ।

१२. अचित्ते टक् ।

कर्मण्युपपदे हन्तेरचित्तवति कर्तरि टक् प्रत्ययो भवति । वातं हन्ति—वातघ्नं[6] तैलम् । पित्तघ्नं घृतम् ।

---

१ अनिर्दिष्टार्थाः त्रिष्वपि कालेषु भवन्तीति वपुर्ध्य इत्यत्र भूतेऽपि डः ।

२ वातिवायत्योरकर्मकत्वान्न ग्रहणम् ।

३ धान्यं माति, मिमीते, मयते वा ।

४-५ नन्वणपि न प्राप्नोति कर्मण उपसर्गेण व्यवहितत्वादित्याह···इत्यण् । एतत् कुतो लभ्यते । 'अनुपसर्गाद् गायष्टक्' [५/२/३] इति सूत्रे उपसर्गवर्जनात् । अन्यथा कर्मणः परात् उपसर्गव्यवधाने न प्राप्नोत्येव ।

६. 'गमहनजन···' [४/२/५२] इत्युपधालोपः ।

श्लेष्मघ्नं मधु । रोगघ्नमौषधम् । जायाघ्नास्तिलकालकाः[1] । पतिघ्नी पाणिरेखा । सर्वकर्मघ्नी शैलेशी[2] । अचित्त इति किम् ? पापघातो यतिः । चौरघातो राजा । आखुघातो बिडाल । मत्स्यघातो बक । सस्यघातो वृषभः ।

१३. ब्रह्मादिषु ।

ब्रह्मादिषु कर्मसूपपदेषु हन्तेष्टक् प्रत्ययो भवति । ब्रह्म हन्ति—ब्रह्मघ्नः । कृतघ्नः, शत्रुघ्नः, वृत्रघ्नः, भ्रूणघ्नः, बालघ्न. । शशघ्नी पक्षिजातिः[3] । गा हन्ति—गोघ्न. पातकी । दानपात्रे तु 'दाशगोघ्नौ' [५/१/१७] इति पूर्वमेवोक्तम् । आकृतिगणोऽयम् । चित्तवदर्थ आरम्भ ।

१४. जायापत्योश्चिह्नवति ।

जाया, पति—इत्येनयो कर्मणोरुपपदयोर्हन्तेश्चिह्नवति कर्तरि टक् प्रत्ययो भवति । चिह्नं शरीरस्थं शुभाशुभ-सूचकं तिलकालकादि । जायाघ्नो ब्राह्मण । पतिघ्नी कन्या । अपलक्षणयुगित्यर्थः । चित्तवदर्थ आरम्भ. ।

१५. हस्ति-बाहु-कपाटेषु शक्तौ ।

एषु कर्मसूपपदेषु हन्तेष्टक् प्रत्ययो भवति शक्तौ गम्यमानायाम् । हस्तिनं हन्तुं शक्तः—हस्तिघ्नो मनुष्यः । बाहुघ्नो मल्लः । कपाटघ्नश्चौरः । शक्ताविति किम् ? हस्तिन हन्ति विषेण—हस्तिघातो रसद । चित्तवदर्थ आरम्भ. ।

१६. नगरेऽगजे ।

नगरे कर्मण्युपपदे हन्तेर्गजवर्जिते कर्तरि टक् प्रत्ययो भवति । नगरघ्नो व्याघ्र । अगज इति किम् ? नगरघातो हस्ती । चित्तवदर्थ आरम्भ. ।

१७. पाणिघताडघौ शिल्पिनि ।

पाणिताडयो. कर्मणोरुपपदयोर्हन्तेः शिल्पिनि कर्तरि टक् प्रत्ययो घादेशश्च निपात्यते । पाणि हन्ति—पाणिघ. । ताडघः शिल्पी । पाणिना ताडेन च हन्तीति साधनादपि केचित् । शिल्पिनीति किम् ? पाणिघात, ताडघात ।

१८. राजघः ।

राजनि कर्मण्युपपदे हन्तेष्टक् प्रत्ययो घादेशश्च निपात्यते । राजानं हन्ति—राजघ ।

१९. स्नुघ्नादयः संज्ञायाम् ।

स्नुघ्नादयः शब्दाष्टक् प्रत्ययान्ताः संज्ञायामेव निपात्यन्ते । स्नुघ्नो नगरम् । शतघ्नी आयुधविशेषः । हस्तघ्नो[4] ज्याघातत्रो[5] वर्ध्रपट्टः । आकृतिगणोऽयम् । अचित्तवत्त्वादेव सिद्धे सञ्ज्ञायामेवेति नियमार्थं वचनम् ।

२०. अर्होऽच् ।

कर्मण्युपपदेऽर्हतेरच् प्रत्ययो भवति । अणोऽपवादः । पूजामर्हति—पूजार्ह. साधु. । पूजार्हा देवप्रतिमा । मालार्हा स्त्री ।

---

१. तिल इव कालकस्तिलकालक, देहे कृष्ण लक्ष्म ।

२ शिलानामीश. शिलेशस्तस्येय निष्प्रकम्पत्वात् ।

३. श्येनजातिः ।

४. हस्तं हन्ति गच्छतीति ।

५. ज्याघातो धनुर्गुणघातः । तस्मात् त्रायते य स ज्याघातत्रः—चर्ममयो हस्तावरणविशेषः ।

२१. वयोऽनुद्यमे हृनः ।

कर्मण्युपपदे हरतेर्वयसि अनुद्यमे च गम्यमाने अच् प्रत्ययो भवति। प्राणिनां कालकृतावस्था वयः । उद्यम उद्यमनम् । तदभावोऽनुद्यमः । अस्थिहरः श्वशिशुः । कवचहरः क्षत्रियकुमारः । अंशहरो दायादः । अनुद्यमे—मनोहरः प्रासादः । मनोहरा माला । सञ्ज्ञायां टोऽपीति कश्चित् । मनोहरी, विषहरी मणिः । वयोऽनुद्यमे इति किम् ? भारहारः । वयसि क्रियमाणः[1] सम्भाव्यमानो[2] वोद्यमः उच्यमानो वयो गमयतीति उद्यमार्थं[3] वयोग्रहणम् ।

२२. आङः शीले ।

कर्मण्युपपदे आङ्पूर्वाद् हरतेः शीले गम्यमाने अच् प्रत्ययो भवति । शीलं स्वाभाविकी प्रवृत्तिः । पुष्पाणि आहरति इत्येवंशीलः—पुष्पाहरः । फलाहरः, सुखाहरः । पुष्पाद्याहरणे स्वाभाविकी फलनिरपेक्षा वृत्तिरस्येत्यर्थः । आङ इति किम् ? पुष्पाणि हर्ता, तृन् । शील इति किम् ? पुष्पाहारः । सुखाहरः इति अशीलेऽनुद्यमेऽर्थे पूर्वेणाऽच् ।

२३. धृनः प्रहरणादिष्वऽदण्डादौ ।

प्रहरणादिषु[4] कर्मसूपपदेषु धृन्धातोरच् प्रत्ययो भवति न तु दण्डादिषूपपदेषु । धनुर्धरति—धनुर्धरः । शक्तिधरः, चक्रधरः, वज्रधरः, शूलधरः, हलधरः । आदिग्रहणात् भूधरः, जलधरः, विषधरः, शशधरः, विद्याधरः, जटाधरः, श्रीधरः, पयोधरः । यथादर्शनमन्येष्वपि भवति । अदण्डादाविति[5] किम् ? दण्डधारः, कुण्डधारः, कर्णधारः, सूत्रधारः, छत्रधारः ।

२४. धनुर्दण्ड-त्सरु-लाङ्गलाङ्कुशर्ष्टि-शक्ति-यष्टि-तोमर-घटेषु ग्रहेर्वा ।

धनुरादिषु कर्मसूपपदेषु ग्रहधातोरच् प्रत्ययो वा भवति । पक्षेऽण् । धनुर्ग्रहः, धनुर्ग्राहः । दण्डग्रहः, दण्डग्राहः । त्सरुग्रहः, त्सरुग्राहः । लाङ्गलग्रहः, लाङ्गलग्राहः । अङ्कुशग्रहः, अङ्कुशग्राहः । ऋष्टिग्रहः, ऋष्टिग्राहः । शक्तिग्रहः, शक्तिग्राहः । यष्टिग्रहः, यष्टिग्राहः । तोमरग्रहः, तोमरग्राहः । घटग्रहः, घटग्राहः । **नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति** न्यायात् घटीग्रहः, घटीग्राहः ।

२५. सूत्रे धारणे ।

सूत्रे कर्मण्युपपदे ग्रहेर्ग्रहणपूर्वके धारणेऽर्थे वर्तमानादच् प्रत्ययो भवति । सूत्रं कार्पासादिमयं लक्षणसूत्रं वाऽविशेषेण गृह्यते । सूत्रं गृह्णातीति सूत्रग्रहः प्राज्ञः सूत्रधारो वा । सूत्रमुपादाय धारयतीत्यर्थः । अन्ये त्ववधारणे एव इच्छन्ति[6] । तन्मते सूत्रग्रहः प्राज्ञ एवोच्यते । धारणे इति किम् ? सूत्रग्राहः । यो हि सूत्रं गृह्णाति न तु धारयति स एवमुच्यते ।

२६. किंयत्तद्बहुषु कृञः ।

एषु कर्मसूपपदेषु करोतेरच् प्रत्ययो भवति । किं करोति—किंकरः, किंकरा । यत्करः, यत्करा । तत्करः,

---

१. क्रियमाणतया सम्भाव्यमान इत्यर्थः ।

२. अकुर्वन्नपि ततः कर्म । अस्मिन् कर्मणि अयं शक्तः इत्येवं सम्भाव्यमान इत्यर्थः ।

३. नन्वत्र वयोग्रहणं किमर्थमित्याह — उद्यमार्थमिति । अयमर्थो यत्र वयस्तत्रोद्यमेऽसत्यपि भवतीत्यर्थः । यथा कवचहर इत्यादौ ।

४. अत्र प्रहरणशब्दात् प्रहरणवाचिनः शब्दा गृह्यन्ते ।

५. दण्डादीनां वर्जनात् तेभ्योऽण् निर्णीयते । अन्यथा प्रहरणादिद्वारोऽच् प्रत्ययोऽपि स्यादिति सन्देहः स्यात् ।

६. तन्मते यः सूत्रं धारयत्येव तत्रैवाऽच् । सूत्रधारस्तु प्रयोजने एव गृह्णाति न तु सर्वकालम् ।

तस्करा । चौर्ये तु निपातनादेव तस्कर. । बहुकर, बहुकरा । बहुकरीति सख्यावचनात्[1] 'आद्यन्तानन्तकार···' [५/२/२८] इत्यादिना टेन भविष्यति । कथं किंकरीति ? 'हेतुताच्छील्यानुकूलेषु···' [५/२/२७] इत्यादिना ट । लिहादिप्रपञ्च-प्रकरणमिद धातूपपदार्थनियमार्थं पृथग् विहितम् ।

२७. हेतु-ताच्छील्यानुकूलेष्वऽशब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदेषु टः ।

कृन इत्यनुवर्तते । हेतुः प्रतीतशक्तिक कारणम् । ताच्छील्य तत्स्वभावता । अनुकूल आराध्यचित्तानुवर्ती । एषु कर्तृषु कर्मण्युपपदे करोतेष्ट. प्रत्ययो भवति न तु शब्दादिषूपपदेषु । हेतौ—यश करोति यशस्करी विद्या । शोककरी कन्या । कुलकरं धनम् । ताच्छील्ये—क्रीडाकर', श्राद्धकर. । अनुकूले—प्रेषणाकर, वचनकर. । हेत्वादिष्विति किम् ? कुम्भकार । अशब्दादिष्विति किम् ? शब्दकार., श्लोककार., कलहकार, गाथाकार, वैरकार, चाटुकार, सूत्रकार.. मन्त्रकार:, पदकार' ।

२८. आद्यन्तानन्त-कारबाह्वहर्दिवा-विभा-निशा-प्रभा-भाश्चित्र-कर्तृ-नान्दी-लिपि-लिबि-बलि-भक्ति-क्षेत्र-जङ्घा-क्षपा-क्षणदा-रजनी-दोषा-दिन-दिवस-धनुररुः-सख्यासु ।

अहेत्वाद्यर्थ आरम्भ । आद्यादिषु कर्मसूपपदेषु करोतेष्ट प्रत्ययो भवति । आदिकर, अन्तकर, अनन्तकर, कारकरः, बाहुकर. । अहस्कर —कस्कादित्वात् स । दिवाकर, विभाकर, निशाकर., प्रभाकर, भास्कर, चित्रकर., कर्तृकर, नान्दीकर, लिपिकर, लिबिकर, बलिकर, भक्तिकर, क्षेत्रकर, जङ्घाकर, क्षपाकर क्षणदाकर, रजनीकर, दोषाकर, दिनकर, दिवसकर, धनुष्कर, अरुष्कर, सख्याकर । सख्याग्रहणान् सख्यावाचिनोऽपि गृह्यन्ते । एककर, द्विकरः, त्रिकर. ।

२९. कर्मणि भृतौ ।

कर्मशब्दे कर्मण्युपपदे करोतेर्भृतौ गम्यमानायां टो भवति । भृतिर्वेतन कर्ममूल्यमिति यावत् । कर्मकरो भृतक । कर्मकरी दासी । भृताविति किम् ? कर्मकार । पुन कर्मग्रहण शब्दरूपकर्मप्रतिपत्त्यर्थम् ।

३०. स्तम्ब-शकृतोर्व्रीहि-वत्सयोरिः ।

स्तम्ब, शकृत्—इत्येतयो कर्मणोरुपपदयो करोतेर्यथासख्य व्रीहिवत्सयोरभिधेययोरि प्रत्ययो भवति । स्तम्बकरिर्व्रीहि. । शकृत्करिर्वत्स । व्रीहिवत्सयोरिति किम् ? स्तम्बकार, शकृत्कार ।

३१. हृनो दृतिनाथयोः पशौ ।

दृति, नाथ—इत्येतयो कर्मणोरुपपदयो पशौ कर्तरि हरते इ प्रत्ययो भवति । दृतिं हरति—दृतिहरि' श्वा । नाथहरि. सिंह । पशाविति किम् ? दृतिहारो व्याध । नाथहारी गन्त्री[2] ।

३२. फलेरजोमलेषु ग्रहेः ।

एषु कर्मसूपपदेषु ग्रहेरि प्रत्ययो भवति । फलानि गृह्णाति—फलेग्रहिर्वृक्ष । सूत्रे निर्देशादेव एदन्तत्वम् । रजोग्रहि कञ्चुक । मलग्रहि कम्बल ।

३३. देववातयोरापेः ।

देववातयो कर्मणोरुपपदयोरापेरि. प्रत्ययो भवति । देवान् आप्नोति—देवापि । वातापि. ।

---

१ 'बहुगणं भेदे' [१/१/४८] इति सख्यावत्त्वम् ।

२. यानविशेष, बाहिली इति भाषायाम् ।

३४. प्रियवशयोर्वदेः खः ।

प्रियवशयोः कर्मणोरुपपदयोर्वदेः खः प्रत्ययो भवति । प्रियं वदतीति प्रियंवदः । वशंवदः । खकारो मुमर्थः ।

३५. द्विषंतपपरंतपौ ।

द्विषत्, पर—इत्येतयोः कर्मणोरुपपदयोर्ण्यन्तात् तपेः खः प्रत्ययो ह्रस्वत्वं द्विषत्तकारस्य मकारश्च निपात्यन्ते । द्विषतस्तापयति—द्विषंतपः । परंतपः । निपातनस्येष्टविषयत्वात् स्त्रियामनभिधानम् । द्विषतीतापः । अण्यन्तस्य च तपेर्न भवति । द्विषतं परांश्च तपति—द्विषत्तापः, परतापः ।

३६. वाचंयमो व्रते ।

व्रतं शास्त्रितो[1] नियमः । तस्मिन् गम्यमाने वाचि कर्मण्युपपदे यमेः खः प्रत्ययोऽमोऽलुक् च निपात्यते । वाचं यच्छति नियमयति वा वाचंयमो व्रती । व्रत इति किम् ? वाग्यामोऽन्यः ।

३७. सर्वे सहः ।

सर्वशब्दे कर्मण्युपपदे सहधातोः खः प्रत्ययो भवति । सर्वं सहते—सर्वंसहो मुनिः ।

३८. कूलाभ्रकरीषेषु च कषः ।

कूलादिषु कर्मसूपपदेषु चकारात् सर्वे चोपपदे कषेः खः प्रत्ययो भवति । कूलंकषा नदी । अभ्रंकषो गिरिः । करीषंकषा वात्या । सर्वंकषः खलः ।

३९. मेघर्तिभयाऽभयेषु कृञः ।

एषु कर्मसूपपदेषु करोतेः खः प्रत्ययो भवति । मेघान् करोति—मेघंकरः । ऋतिर्गतिः सत्यता वा । ऋतिंकरः । भयंकरः, अभयंकरः । हेत्वादिविवक्षाया टमपि बाधते परत्वात् । भयंकरं श्मशानम् ।

४०. क्षेम-प्रिय-मद्र-भद्रेष्वण् च ।

क्षेमादिषु कर्मसूपपदेषु करोतेरण् चकारात् खश्च प्रत्ययौ भवतः । क्षेमं करोति—क्षेमकारः, क्षेमंकरः । प्रियकारः, प्रियंकरः । मद्रकारः, मद्रंकरः । भद्रकारः, भद्रंकरः । वेति वक्तव्ये पुनरण्विधानं हेत्वादिषु टबाधनार्थम् । कथं योगक्षेमकरी लोकस्येति ? उपपदविधिषु तदन्तविधेरनाश्रयणात् । अत एव 'आद्यन्तानन्तकार···' [५/२/२८] इति सूत्रेऽन्तग्रहणे सत्यपि अनन्तग्रहणम् । 'मेघर्तिभयाऽभयेषु···' [५/२/३९] इत्यत्र च भयग्रहणेऽपि अभयग्रहणम् ।

४१. तीर्थे तौ वा ।

तीर्थे कर्मण्युपपदे करोतेरण् खश्च प्रत्ययौ वा भवतः । पक्षे यथाप्राप्तष्टः । अणि—तीर्थं करोति तीर्थकारः । खे—तीर्थंकरः । टे—तीर्थकरः ।

४२. तॄ-भृ-वृ-जि-तपि-दमि-सहिभ्यः खः संज्ञायाम् ।

कर्मण्युपपदे एभ्यो धातुभ्यः खः प्रत्ययो भवति संज्ञाया विषये । रथं तरति—रथंतरं साम । विश्वंभरा वसुधा । पतिंवरा कन्या । धनंजयोऽर्जुनः । शत्रुंतपो राजा । दमिरन्तर्भूतण्यर्थो ण्यन्तश्च गृह्यते । बलिं दाम्यति दमयति वा बलिंदमः[2] कृष्णः । अरिंदमः, शत्रुंसहः—एतौ राजानौ । संज्ञायामिति किम् ? कुटुम्बं बिभर्ति—कुटुम्बभारः । केचित्तु

---

१. शास्त्र सजातमस्य उपदेशकतया । शास्तुः सकाशात् इतः प्राप्तो वा ।

२. 'अमोऽकम्यमिचमां णिनि' [४/२/१२५] इति ह्रस्वे 'ञेरनिटि' [४/२/५५] इति णिलोपः ।

रथेन तरति रथतर सामेत्यकर्मण्यपि इच्छन्ति ।

४३. धारेर्धर् च ।

कर्मण्युपपदे धारयतेः सञ्ज्ञाया ख प्रत्ययो भवति धर् इत्ययमादेशश्च । वसु धारयति—वसुधरा पृथ्वी । युगधरः, सीमधरः—तीर्थकरौ एतौ । सञ्ज्ञायामिति किम् ? छत्रधार ।

४४. पुरंदरभगंदरौ ।

एतौ सञ्ज्ञाया खप्रत्ययान्तौ निपात्येते । पुरो दारयति—पुरदरः शक्र । भग दारयति—भगदरो व्याधिः । दारयतेर्ह्रस्वः पुरोऽमोऽलुक् च निपात्यते । पुरे[१] कर्मणि तु पुरदार इति भवति ।

४५. कुक्ष्यात्मोदरेषु भृगः खिः ।

एषु कर्मसूपपदेषु भृगो धातो खि प्रत्ययो भवति । कुक्षिमेव बिभर्ति—कुक्षिभरि । आत्मभरि । उदरंभरि. । खित्त्वान्मुम् ।

४६. मन्याण्णिन् ।

कर्मण्युपपदे मन्यतेर्णिन् प्रत्ययो भवति । पण्डित मन्यते बन्धु—पण्डितमानी बन्धो । दर्शनीया मन्यते भार्या—दर्शनीयमानी भार्याया । यन्निर्देश उत्तरार्थ.[२] ।

४७. आत्ममाने खश् ।

कर्मण्युपपदे आत्ममानेऽर्थे वर्तमानान्मन्यते. खश् प्रत्ययो भवति । पण्डितमात्मान मन्यते—पण्डितमन्य. । पट्वीमात्मान मन्यते—पट्विमन्या । विद्वन्मन्य.[३], विदुषिमन्या । असरूपत्वाण्णिन्नपि । पण्डितमात्मान मन्यते—पण्डितमानी । पटुमानिनी । विद्वन्मानी, विद्वन्मानिनी । आत्ममाने इति किम् ? दर्शनीयमानी चैत्रस्य । पूर्वेणात्र णिन्नेव । खकारो मुमर्थ । शकारः शित्कार्यार्थ. ।

४८. एजेः ।

कर्मण्युपपदे एजयते खश् प्रत्यया भवति । अङ्गानि एजयति—अङ्गमेजय । जनमेजय., अरिमेजय ।

४९. शुनी-स्तन-मुञ्ज-कूलास्य-पुष्पेषु धेटः ।

एषु कर्मसूपपदेषु धेट्धातो खश् प्रत्ययो भवति । शुनी धयति—शुनिधय. । खित्त्वान्मुम् ह्रस्वश्च । स्तनधय., मुञ्जधयः, कूलधय , आस्यधय., पुष्पधय । धेटष्टकार ईबर्थ । शुनिधयी[४] । स्तनधयी कन्या ।

५०. नाडी-घटी-खरी-मुष्टि-पाणि-कर-वात-नासिकासु ध्मश्च ।

एषु कर्मसूपपदेषु धमतेश्चकारात् धेटश्च खश् प्रत्ययो भवति । नाडी धमति धयति वा नाडिधम., नाडिधय. । घटिधम , घटिधय. । खरिधम , खरिधय. । ईबन्तनिर्देशस्तदऽभावे खश्प्रत्ययनिवृत्त्यर्थ । नाडिं धमति धयति वा नाडिंधमः, नाडिध. । घटध्म., घटध । खरध्म , खरध । मुष्टिधम , मुष्टिधय । पाणिधम , पाणिधयः । करंधम, करधयः । वातंधमः, वातधय. । नासिकंधम., नासिकधय ।

---

१. निपातनस्येष्टविषयत्वात् ।

२. अग्रिमसूत्रे मनुतेर्निवृत्त्यर्थं ।

३. 'क्वस्स्रंसुध्वंस्भ्रंसऽनडुहां दः' [२/१/६६] 'अमे अथा अमा वा पदान्ते' [१/३/१] इति दत्व नत्व च ।

४. क्रियावाचकत्वात् जातिद्वारा ईप् न प्राप्त इति टकरणम् ।

५१. बहुविध्वरुस्तिलेषु तुदः ।

एषु कर्मसूपपदेषु तुदेः खश् प्रत्ययो भवति । बहु तुदति—बहुतुदं युगम् । विधुंतुदो राहुः । अरुंतुदः[1] पीडाकरः । तिलंतुदः काकः ।

५२. असूर्यललाटयोर्दृशितपोः ।

असूर्य, उग्र—इत्येतयोः कर्मणोरुपपदयोर्दृशेः खश् प्रत्ययो भवति । सूर्यमपि न पश्यन्ति—असूर्यंपश्या राजदाराः । दृशिना संबद्धस्य नञः सूर्येण सहाऽसामर्थ्येऽपि गमकत्वात्समासः[2] । उग्रं पश्यति—उग्रंपश्यः ।

५३. ललाटे तपः ।

ललाटे कर्मण्युपपदे तपेः खश् प्रत्ययो भवति । ललाटं तपति—ललाटंतपः सूर्यः ।

५४. परिमाणार्थमितनखेषु पचः ।

सर्वतो मानं परिमाणम् । तदर्थाः प्रस्थादयः शब्दाः । परिमाणार्थेषु मिते नखे च कर्मण्युपपदे पचेः खश् प्रत्ययो भवति । प्रस्थंपचा स्थाली । द्रोणपचा दासी । अल्पपचा मुनयः । पान्तावल्पंपचान् मुनीन् । मितंपचा ब्राह्मणी । नखंपचा यवागूः । पचिरत्र तापवाची ।

५५. उद्रुजोद्वहिभ्यां कूले ।

कूले कर्मण्युपपदे उद्रुज्, उद्वह्—इत्येताभ्यां खश् प्रत्ययो भवति । कूलमुद्रुजो गजः । कूलमुद्वहा नदी ।

५६. वहाभ्रयोर्लिहः ।

वह, अभ्र—इत्येतयोः कर्मणोरुपपदयोर्लिहेः खश् प्रत्ययो भवति । वहं लेढि—वहंलिहो गौः । अभ्रंलिहः प्रासादः ।

५७. वातशर्धयोरजहाग्भ्याम् ।

वात, शर्ध—इत्येतयोः कर्मणोरुपपदयोर्यथासङ्ख्यं अज्, हाक् इत्येताभ्यां खश् प्रत्ययो भवति । वातमजन्ति—वातमजा मृगाः । शर्धं[3] जहति—शर्धंजहा माषाः । खशः शित्त्वात् अजेर्वी आदेशो न भवति । हाकः ककारो हाङो निवृत्त्यर्थः ।

५८. इरंमदः ।

कर्मणीति निवृत्तम्[4] । इरापूर्वान्माद्यतेः खश् यनभावश्च निपात्यते । इरा—जलं तेन माद्यतीति[5] इरंमदः । मेघज्योतिः ।

५९. नग्न-पलित-प्रियान्ध-स्थूल-सुभगाढ्य-तदन्ते च्व्यर्थेऽच्वौ भुवः खिष्णु-खुकञौ ।

च्व्यर्थे वर्तमानेषु नग्नादिषु अच्व्यन्तेषु केवलेषु तदन्तेषु चोपपदेषु भुवः खिष्णुखुकञौ प्रत्ययौ भवतः । अनग्नो

---

१. मुमागमे 'संयोगान्तस्य' [२/१/११६] इति सलोपः ।

२. वाक्यार्थप्रतिपादकत्वादित्यर्थः ।

३. शृधु—शब्दकुत्सायाम् । शर्धते इति शर्धः—अपानवायुः ।

४. निपातनात् धातोरकर्मकत्वाद् वा ।

५. माद्यति दीप्यते अनेन्धनत्वादिति ।

नग्नो भवति—नग्नंभविष्णु, नग्नभावुक । पलितंभविष्णु, पलितंभावुक । प्रियंभविष्णु, प्रियभावुक । अन्धंभविष्णु, अन्धभावुक । स्थूलभविष्णु, स्थूलभावुक । सुभगभविष्णु, सुभगभावुक । आढ्यंभविष्णु, आढ्यभावुक । तदन्तेषु—अननग्नोऽनग्नो भवति—अनग्नंभविष्णु, अनग्नंभावुक । असुनग्न सुनग्नो भवति—सुनग्नभविष्णु, सुनग्नभावुकः इत्यादि । च्व्यर्थ इति किम् ? नग्नो भविता । अच्वाविति किम् ? आढ्यीभविता, तृच् । उपपदविधिषु तदन्तविधिरनाश्रित इति तदन्तग्रहणम् ।

६०. कृनः खनट् साधने ।

च्व्यर्थे वर्तमानेषु नग्नादिषु अच्व्यन्तेषु केवलेषु तदन्तेषु चोपपदेषु करोते. साधने खनट् प्रत्ययो भवति । साधन इति कर्तरि इत्यस्यापवाद । अनग्नो नग्नः क्रियतेऽनेन—नग्नकरण द्यूतम् । एव पलितकरण तैलम् । प्रियंकरणं शीलम् । अन्धकरण शोक । स्थूलकरणं दधि । सुभगंकरण रूपम् । आढ्यंकरण वित्तम् । तदन्ते—अननग्नोऽनग्न क्रियतेऽनेन—अनग्नंकरणः पटः । सुनग्नंकरणः । अपलितकरणो रस. इत्यादि । च्व्यर्थ इति किम् ? नग्न करोति द्यूतेन । नात्र प्रकृतिविकारभावो विवक्ष्यते । अच्वाविति किम् ? नग्नीकुर्वन्त्यनेन । अत्र खनट्प्रतिषेधसामर्थ्यादऽनडपि न भवति । नहि नग्नीकरणमित्यत्रानट्खनटो रूपे समासे स्त्रियां वा विशेषोऽस्ति[1] । केचित्तु च्व्यन्तेष्वपीच्छन्ति । नग्नीकरण द्यूतम् ।

६१. भावे चाशिते भुवः खः ।

आशितशब्दे उपपदे भवतेर्भावे चकारात्साधने चाभिधेये ख प्रत्ययो भवति । आशितेन तृप्तेन भूयते भवता—आशितंभवो वर्तते भवत । आशितो भवत्यनेन—आशितभव ओदन । आशितो भवत्यनया—आशितभवा पञ्चपूली । असरूपत्वादनडपि । आशितस्य भवनम् । न घञ् सरूपत्वात् । आशित इति निर्देशाद् अश्नाते कर्तरि[2] क्तो दीर्घत्व च । आङ्पूर्वाद् वा अविवक्षितकर्मकात्[3] कर्तरि क्तः ।

६२. नाम्नि गमः खड्डौ च विहायसस्तु विहः ।

नाम्नि उपपदे गम्धातो खड्, ड इत्येतौ चकारात् खश्च प्रत्यया भवन्ति विहायस्शब्दस्य च विहादेशो भवति । खड्—तुरो[4] गच्छति तुरग । भुजेन[5] भुज[6] इव वा गच्छति—भुजग. । प्रवेण प्लवेन वा गच्छति—प्रवग, प्लवग । पतो[7] गच्छति—पतग । विहायसा गच्छति—विहग. । ड—तुरग., भुजग, प्रवग, प्लवग, विहग, अत्यन्तग, सर्वग, सर्वत्रग, अनन्तग, परदारग, ग्रामग, गुरुतल्पग, प्रतीपग., पुरोग, पीठग, तीरग । अग्रादिषु तदन्तेष्वपि—अग्रग, सेनाग्रग, आदिग, पङ्क्त्यादिग, मध्यग., गृहमध्यग., अन्तग, शाखान्तग, अध्वग, नगराध्वग, दूरग., अदूरग, पारग, वेदपारग, अगारग., स्वगारग इत्यादि । अथ सज्ञायां—खे गच्छति खग पक्षी । न गच्छति—अगो वृक्ष पर्वतश्च । एव नग. । उरसा गच्छति—उरग. । पृषोदरादित्वात्सलोप । पतो गच्छति—पतग पक्षी । पद्भ्या न गच्छति पन्न[8] गच्छति वा पन्नग सर्प । आप[9] अब्धि गच्छति—आपगा नदी । आशु गच्छति—आशुग शर । निम्नगा, समुद्रगा, सततगा इत्यादि ।

---

१ च्व्यन्तत्वात् अव्ययत्वम् । 'खित्यनव्यय ' [३/२/१३६] इत्यादिना मुमागमोऽपि न भवति ।

२ शील्यादित्वात् ।

३. 'गत्यर्थाऽकर्मकपिबभुजेः' [५/१/११] इत्यनेन ।

४ त्वरमाण इत्यर्थ ।

५. भुजेन कौटिल्येन गच्छति ।

६. भुज्यतेऽनेन भुज —पाणि । तद्वद् गच्छति ।

७ पतन्नित्यर्थ ।

८ भ्रष्ट अधःपतनमिति यावत् ।

९ आपोऽत्र सन्ति 'ज्योत्स्नादिभ्योऽण्' [८/१/५५] । अपामयमाधारत्वेन 'तस्येदं' [७/१/११२] अण् वा । आप्यते नदीभिरिति वा भावे घञ् ।

अगो वृषलः शीतेन इति असंज्ञायामपि। अथ खः—सुतं सुतेन वा गच्छति—सुतंगमो नाम मुनिः। यस्य सौतंगमिः पुत्रः। मितं गच्छति—मितंगमोऽश्वः। अमितंगमा हस्तिनी। जनगमश्चण्डालः। पूर्वंगमाः पन्थानः। हृदयंगमा वाचः। तुरंगमोऽश्वः। भुजंगमः सर्पः। प्लवगमः कपिः। प्लवंगमो भेकः। विहंगमः नभसंगमश्च पक्षी। नभसशब्दोऽकारान्तोऽपि अस्ति। उरंगम इत्यपि कश्चित्। बहुलाधिकारात् यथाप्रयोगदर्शनं व्यवस्था। डकारष्टिलोपार्थः।

६३. सुगदुर्गावाधारे।

सुदुर्भ्यां पराद् गमेराधारे डः प्रत्ययो निपात्यते। सुखेन दुःखेन च गम्यतेऽस्मिन्निति सुगः, दुर्गः पन्थाः। आधार इति किम्? सुगन्ता, दुर्गन्ता। असरूपत्वादनडपि भवति। सुगमनः, दुर्गमनः। सुगमः[1], दुर्गमः इति तु कर्मणि।

६४. निर्गो देशे।

निस्पूर्वाद् गमेराधारे देशे डो निपात्यते। निर्गम्यतेऽस्मिन् देशे इति निर्गो देशः। देश इति किम्? निर्गमनः।

६५. शमि संज्ञायामः।

शमि नाम्नि उपपदे धातोः संज्ञायामः प्रत्ययो भवति। शमित्यव्ययं सुखे वर्तते। तत्र भवति शंभवोऽर्हन्। शं करोति—शंकरः। शंगरः, शंवरः, शंवदः। स्व पश्येत्यादिष्वव्ययानां कर्मत्वदर्शनात्[2] शमि कर्मणि हेत्वादिष्वपि परत्वात् कृनष्टो बाध्यते। शकरा नाम परिव्राजिका। शकरा नाम शकुनिका तच्छीला च। संज्ञायामिति किम्? शंकरी जिनदीक्षा।

६६. पार्श्वादिषु शीङः।

पार्श्वादिषूपपदेषु शीङः अः प्रत्ययो भवति। पार्श्वाभ्यां शेते—पार्श्वशयः। एवं पृष्ठशयः, उदरशयः। दिग्धेन सह शेते—दिग्धसहशयः। दिग्धसहात् तृतीयासमासात् शीङोऽकारः। पश्चात् उपपदसमासः। यथादर्शनमन्येऽपि विज्ञेयाः। अनाधारार्थः आरम्भः।

६७. उत्तानादिषु कर्तरि।

उत्तानादिकर्तृवाचिषूपपदेषु शीङ अ प्रत्ययो भवति। उत्तानः शेते—उत्तानशयः। एवमूर्ध्वशयः, अवमूर्धशयः[3]। अन्येपि यथादर्शनम्।

६८. आधारे।

आधारवाचिन्युपपदे शीङः अः प्रत्ययो भवति। खे शेते—खशयः। गर्तशयः[4], गुहाशयः, हृच्छयः। बिलेशयः, मनसिशयः, कुशेशयः[5]—इति सप्तम्या अलुक्। गिरिश इति संज्ञायां लोमादित्वात् शः। क्रियार्थत्वे तु गिरिशय इति भवितव्यम्।

६९. चरेष्टः।

आधारवाचिन्युपपदे चरेष्टः प्रत्ययो भवति। कुरुषु चरति—कुरुचरः। मद्रचरः, वनेचरः, निशाचरः। टकार ईबर्थः। कुरुचरी, मद्रचरी। आधारे इति किम्? कुरूंश्चरति[6]। पञ्चालांश्चरति।

---

१. 'ऋवर्णवृद्धशि…' [५/४/५१] इत्यल्।

२. एकेऽव्ययानां कर्मत्वं न मन्यन्ते, तन्मतमाक्षिप्याह।

३. अधो मूर्धानं कृत्वा यः शेते स एवमुच्यते।

४. फणगतति पुंस्त्रीत्वे गर्ते शेते इति वाक्यम्।

५. कश्चित् पुमान् जलजे तु नपुंसकत्वं स्यात्।

६. प्राप्ये कर्मणि क्वचिदण् भवतीति यद्यणानीयते तदा समासोऽपि भवति, तथा च कुरुचारः, पञ्चालचार इत्यपि।

७०. भिक्षासेनादायेषु ।

अनाधारार्थ आरम्भ । एषूपपदेषु चरेष्ट प्रत्ययो भवति । भिक्षां चरति—भिक्षाचर, भिक्षाचरी । सेनां चरति परीक्षते—सेनाचर. तापसव्यञ्जन[1] । सेनया वा चरति—सेनाचर । आदाय गृहीत्वा चरति—आदायचर । आदान कृत्वा चरतीत्यर्थ । किमादाय इत्यविवक्षैव । एष्विति किम् ? कुरूश्चरति ।

७१. पुरोऽग्रतोऽग्रेषु सर्तेः ।

पुरस्, अग्रतस्, अग्रे—इत्येतेषूपपदेषु सर्तेष्टः प्रत्ययो भवति । पुर सरति—पुरःसर, पुरःसरी । अग्रत सरति—अग्रतःसर. । आद्यादित्वात् तस् । अग्रे सरति—अग्रेसरः । सप्तम्यलुक् । एकारान्तमव्यय वा । सूत्रनिपातनाद् वा एकारः । तत्राग्रं सरति अग्रेण वा सरति अग्रेसर. इत्यपि भवति ।

७२. पूर्वे कर्तरि ।

कर्तृवाचिनि पूर्वशब्दे उपपदे सरतेष्ट. प्रत्ययो भवति । पूर्व सरति—पूर्वसर. । पूर्वो भूत्वा सरतीत्यर्थ । कस्मात् पूर्व इति अविवक्षैव[2] । पूर्वसरी । कर्तरीति किम् ? पूर्व देश सरति—पूर्वसार ।

७३. भजि-सहि-वहिभ्यो विण् ।

नाम्नि उपपदे भज, सह, वह—इत्येतेभ्यो विण् प्रत्ययो भवति । अर्ध भजते—अर्धभाक् । पादभाक्, दूरभाक् । प्रकृष्ट भजति—प्रभाक् । विभाक्, सुभाक् । तुतोति इति तुर । नाम्युपधत्वात् क । तुर महते—तुराषाट् । '**सहे विणि च**' [३/२/८६] इति दीर्घ. । '**सहेः साडः**' [२/२/३८] इति षत्वम् । प्रष्ठवाट्[3] ।

७४. दुहेर्डुघः ।

नाम्नि उपपदे दुहेर्डुघ. प्रत्ययो भवति । कामान्दुग्धे पूरयति—कामदुघा । धर्माय दुग्धे—धर्मदुघा । असरूपत्वात् क्विबपि । कामधुक् । डकारष्टिलोपार्थ ।

७५. स्थापास्नात्रः कः ।

नाम्नि उपपदे एभ्यः क. प्रत्ययो भवति । समे तिष्ठति—समस्थ. । विषमस्थ, कूटस्थ, कपिस्थ[4], दधित्थ., महित्थ., अश्वत्थ, कुलत्थ, द्विप, पादप, कच्छप, अनेकप, कटाहप, नदीष्ण, आतपत्रं, घर्मत्रम् । परत्वात् अयं '**शमि संज्ञायामः**' [५/२/६५] इत्यप्रत्यय बाधते । शस्थो नाम कश्चित् । शस्था इत्यसरूपत्वात् क्विप् ।

७६. शोकापनुद-तुन्दपरिमृज-स्तम्बेरम-कर्णेजपाः प्रियाऽलस-हस्ति-सूचकेषु ।

शोकापनुदादय. शब्दा यथासख्य प्रियादिष्वर्थेषु कप्रत्ययान्ता निपात्यन्ते । शोकमपनुदति—शोकापनुद प्रिय. । पुत्रादिरानन्दकर एवमुच्यते । तुन्द परिमार्ष्टि—तुन्दपरिमृजोऽलस । स्तम्बे रमते—स्तम्बेरमो हस्ती । कर्णेजप: सूचकः । प्रियादिष्विति किम् । शोकापनोदो धर्माचार्यः । तुन्दपरिमार्ज आतुर । स्तम्बे रन्ता पक्षी । कर्णे जपिता मन्त्री ।

७७. मूलविभुजादयः ।

मूलविभुजादय शब्दा कप्रत्ययान्ता नियतार्थधातूपपदा यथाशिष्टप्रयोग निपात्यन्ते । मूलानि विभुजति—

---

१ तापसस्य व्यञ्जन—चिह्न यस्य स तापसव्यञ्जन—गुप्तचर इति यावत् ।

२. तेन सापेक्षत्वात् समासो न प्राप्नोतीति न वाच्यम् ।

३. प्रष्ठं—अग्रगामिनं वहतीति ।

४. पृषोदरादित्वात् तिष्ठते. सकारस्य तकारः ।

मूलविभुजो रथः। उर्व्यां रोहति—उर्वीरुहो[1] वृक्षः। कौ मोदते—कुमुदं कैरवम्। मह्रीं धरति—महीध्रः शैलः। उषसि बुध्यते—उषर्बुधोऽग्निः। अपो बिभर्ति—अब्भ्रं[2] मेघः। सरसि रोहति—सरसिरुहं पद्मम्। नखानि मुञ्चन्ति—नखमुचानि धनूंषि। काकेभ्यो गूहनीयाः—काकगुहा तिलाः। धर्माय प्रददाति—धर्मप्रदः[3]। एवं कामप्रदः, शब्दप्रदः। शास्त्रेण प्रजानाति—शास्त्रप्रज्ञः। एवमागमप्रज्ञः। अन्येपि यथादर्शनं विज्ञेयाः।

७८. मन्-वन्-क्वनिब्-विचो यथाशास्त्रम्।

नाम्नि उपपदे धातोर्मन्, वन्, क्वनिप्, विच्—इत्येते प्रत्यया यथाशास्त्रं लक्ष्यानुसारेण भवन्ति। मन्—इन्द्रं शृणाति—इन्द्रशर्मा। सुशर्मा, सुवर्मा, सुदामा, अश्वत्थामा[4]। क्वचिदऽनुपपदेऽपि—शर्म, वर्म, हेम, दामा, पामा। वन्—भूरिदावा, घृतपावा, अग्रेगावा, विजावा। **'वन्याद् अमस्य'** [४/३/५१] इति आत्वम्। क्वनिप्—प्रातरित्वा, प्रातरित्वानौ। सुधीवा, सुपीवा। अनुपपदेऽपि—कृत्वा, कृत्वानौ। धीवा, पीवा। विच्—कीलालपाः, शुभयाः, पाप्मरेट्। अनुपपदेऽपि—रेट्, रोट्, वेट्, जागः। ककारपकारौ कित्पित्कार्यार्थौ।

७९. क्विप्।

*नाम्नि उपपदे धातोः क्विप् प्रत्ययो यथाशास्त्रं भवति। उखेन[5] उखया वा स्रसते—उखास्रत्। वहात् भ्रश्यति—*वहाभ्रट्। **'घञ्युपसर्गस्य बहुलं'** [३/२/८७] इति बहुलग्रहणात् उखवहयोर्दीर्घः। पर्णानि ध्वसते—पर्णध्वत्। शकान् ह्वयति—शकहूः। परिव्ययति परिवी। यवलूः, खलपूः, अक्षद्यूः, मित्रभूः, प्रतिभूः, कटंचिकी। अनुपपदेऽपि—पाः[6], वाः, कीः, गीः, ऊः, लूः, ऋुङ्, पक्। दिवि सीदति—दिविषत्। सप्तम्या अलुक्। सुषामादित्वात् षत्वम्। द्युसत्, अन्तरिक्षसत्, सभासत्। प्रसीदति प्रसत्। उपसत्। अण्डं सूते—अण्डसूः। शतसूः, प्रसूः। मित्रं द्वेष्टि—मित्रद्विट्। प्रद्विट्। द्विषो जेध्नीयिषीष्ट वः। मित्राय द्रुह्यति—मित्रध्रुक्। प्रध्रुक्, विध्रुक्। गां दोग्धि—गोधुक्। कामधुक्, प्रधुक्। अश्वं युनक्ति—अश्वयुक्। प्रयुक्। युङ्, युञ्जौ, युञ्जः। तत्त्ववित्, वेदवित्, प्रवित्। निर्विविदे विदां वरः। काष्ठं भिनत्ति—काष्ठभित्। बलभित्, गोत्रभित्, प्रभित्, भिद्। रज्जुं छिनत्ति—रज्जुच्छित्। तमश्छिद्, भवच्छित्, प्रच्छित्, छित्। शत्रुं जयति—शत्रुजित्। प्रसेनजित्, कर्मजित्, प्रजित्, अभिजित्। सेनां नयति—सेनानी। अग्रणीः, ग्रामणीः, प्रणीः। नीः, नियौ, नियः। विश्वस्मिन् राजते—विश्वाराट्। **'वसुराटोः'** [३/२/८३] इति दीर्घः। राजराट्, सम्राट्, विराट्, राट्। दध्यञ्चति—दध्यङ्। देवमञ्चति—देवद्र्यङ्। अदद्र्यङ्, विश्वद्र्यङ्, तिर्यङ्, सध्र्यङ्, सम्यङ्, प्राङ्, प्रत्यङ्। केवलान्न भवति। तथा ऋतौ ऋतुं ऋतवे ऋतुप्रयोजनो वा यजते ऋत्विग् याजकः। **'दिश्-दृश्-स्पृश्-मृश्-दधृषुष्णिह्-स्रजृत्विजां गः'** [२/१/१००] इति गत्वम्। धृष्णोति दधृक् प्रगल्भः। दधृगिति निर्देशात् द्वित्वम्। उत्स्निह्यति उन्नह्यति वा उष्णिक् छन्दः। उष्णिगिति निर्देशात् दलोपः षत्वं च। कथं दिश्यते दिक्, मृज्यते स्रक्? सपत् क्रुधादित्वात् क्विप्। ककारपकारौ कित्पित्कार्यार्थौ।

८०. स्पृशोऽनुदके।

उदकवर्जिते नाम्नि उपपदे स्पृशेः क्विप् प्रत्ययो भवति। घृतं स्पृशति—घृतस्पृक्। एवं मर्मस्पृक्, व्योमस्पृक्। मन्त्रेण स्पृशति—मन्त्रस्पृक्। कर्मोपपदात् एव इच्छन्त्यन्ये। अनुदके इति किम्? उदकस्पर्शः। उदकेन स्पर्ष्टा। अनुदक इति पर्युदासाश्रयणाद् उदकसदृशं अनुपसर्गं नाम गृह्यते, तेनेह न भवति—उपस्पृशति।

---

१ **'सप्तम्युक्तं कृता'** [३/१/६८] इति समासार्थमत्र पाठोऽन्यथा **'नाम्युपध'''** [५/१/६५] इत्यादिना सिध्यति।

२. अभ्रमिति तु **'खुरक्षुरखूर'''** [उ० २/१४६] इत्युणादिसूत्रेण सिद्धम्।

३. अत्रापि **'उपसर्गादातो डोऽश्वः'** [५/१/६६] इति डे समासो न स्यात्।

४. पृषोदरादित्वात् तिष्ठतेः सकारस्य तकारः।

५. कटिप्रोथे वर्तमान उखशब्दः पुंस्त्री स्यात्यां नित्यस्त्रीति मन्यन्ते वैयाकरणाः।

६. **'ईर्हसेऽपि'''** [४/१/५७] इत्यत्र साक्षात् हसग्रहणात् क्विब्लोपे ईत्वं न।

८१. अदोऽनन्न¹-कण-पल-पिप्पलेषु ।

अन्न-कण-पल-पिप्पल-वर्जिते नाम्नि उपपदे अदेः क्विप् प्रत्ययो भवति । आममत्ति—आमात् । सस्यात् । अन्नादिवर्जनं किम् ? अन्नादः, कणादः, पलाद , पिप्पलाद । क्विप् सिद्धोऽन्नादिप्रतिषेधार्थं वचनम् ।

८२. आमे क्रव्ये ।

आमं अपक्वम् । आमेऽर्थे वर्तमाने क्रव्ये उपपदे अदेः क्विप् प्रत्ययो भवति । क्रव्यशब्दो मांसपर्याय । क्रव्यमत्ति—क्रव्यात् । आममांसभक्षक इत्यर्थः । आम इति किम् ? क्रव्यादः । पक्वमांसभक्षक इत्यर्थः । नियमार्थं वचनम् ।

८३. त्यदाद्यन्यसमाने दृशेष्टक्सकौ चोपमाने कर्मणि ।

उपमाने कर्मणि वर्तमानेषु त्यदादि, अन्य, समान—इत्येतेषूपपदेषु दृशेर्धातो टक्, सक् इत्येतौ चकारात् क्विप् च प्रत्यया कर्मण्येव भवन्ति । त्यदादि—स्य इव दृश्यते –त्यादृश , त्यादृशी, त्यादृक्ष , त्यादृक्षा, त्यादृक् । एव तादृश , तादृशी, तादृक्ष., तादृक्षा, तादृक् । अन्य—अन्यादृश , अन्यादृशी, अन्यादृक्ष , अन्यादृक्षा, अन्यादृक् । समान—सदृशः, सदृशी, सदृक्ष., सदृक्षा, सदृक् । केचित्सकमपि टितं मन्यन्ते । तन्मते त्यादृक्षीत्याद्येव भवति । त्यदादिष्विति किम् ? वृक्ष इव दृश्यते । उपमाने इति किम् ? स दृश्यते । कर्मणीति किम् ? तेनेव दृश्यते । तस्मिन्निव दृश्यते । कर्मण्येव इति किम् ? तमिव पश्यन्तीत्यत्र कर्तरि न भवति ।

८४. कर्तरि णिन् ।

कर्तृवाचिनि उपमानभूते नाम्नि उपपदे धातोर्णिन् प्रत्ययो भवति । कृत्त्वात्कर्तरि । उष्ट्र इव क्रोशति—उष्ट्रक्रोशी । ध्वाङ्क्षरावी, खरनादी, सिंहनादी, सिंहनर्दी । कर्तरीति किम् ? शालीनिव कोद्रवान् भुङ्क्ते । उष्ट्रमिवाश्वमारोहति । उपमान इति किम् ? उष्ट्र. क्रोशति । अताच्छील्यार्थं जात्यर्थश्च आरम्भ. ।

८५. अजातौ ताच्छील्ये ।

अजातिवाचिनि नाम्नि उपपदे ताच्छील्येऽर्थे वर्तमानाद् धातोर्णिन् प्रत्ययो भवति । उष्ण भुङ्क्ते इत्येवशील —उष्णभोजी । शीतभोजी । अजाताविति किम् ? ब्राह्मणानामन्त्रयिता । शालीन् भोक्ता । प्रसज्यप्रतिषेधाद्² असत्ववाचिन्यपि उपसर्गे भवति । उदासरतीत्येवशील —उदासारी । प्रत्यासारी, प्रस्थायी, प्रतिबोधी, प्रयायी, प्रतियायी । उदाङ्प्रत्याङ्भ्या परः सर्ति³ वर्जयित्वा अन्यस्माद् धातोरुपसर्गपरात् नेच्छन्ति अन्ये । प्रभोक्ता, उपभोक्ता, संभोक्ता इति बहुलाधिकारात् न भवति । ताच्छील्य इति किम् ? उष्णभोज आतुर ।

८६. साधौ ।

नाम्नि उपपदे साधावर्थे वर्तमानाद् धातोर्णिन् प्रत्ययो भवति । अताच्छील्यार्थं आरम्भ. । साधु करोति—साधुकारी । साधुदायी, चारुनर्ती, साधुगामी । बहुलाधिकारात् साधु वादयति वादको वीणा, साधु गायति इत्यादौ न भवति ।

८७. ब्रह्मणि वदः ।

ब्रह्मण्युपपदे वदेर्णिन् भवति । अयमपि अताच्छील्यार्थं आरम्भः जात्यर्थोऽसरूपविधिनिवृत्त्यर्थश्च⁴ । ब्रह्म

---

१. ननु लक्ष्यानुसारेण 'क्विप्' [५/२/७६] इति क्विप् भविष्यति किमनेन ? सत्यम् । तस्यैव प्रपञ्चोऽयमिति ।

२ पर्युदासाश्रयणे तु जातिवाचिनि द्रव्यरूपनिषेधेऽजातिवाचिन्यपि द्रव्यवचने एव स्यात् ।

३ उत्प्रतिभ्या आङि सर्तेरिति परसूत्रमक्षार्थं ।

४. 'कर्मण्यण्' [५/२/१] इत्यादे. ।

ब्रह्माणं वा वदति—ब्रह्मवादी।

८८. व्रताभीक्ष्ण्ययोः।

व्रतं शास्त्रितो नियमः। आभीक्ष्ण्यं पौनःपुण्यम्। नाम्नि उपपदे व्रते आभीक्ष्ण्ये च गम्यमाने धातोर्णिन् प्रत्ययो भवति। व्रते—अश्राद्धं भुङ्क्ते—अश्राद्धभोजी[1]। अलवणभोजी, स्थण्डिलशायी, स्थण्डिलवर्ती, वृक्षमूलवासी, पार्श्वशायी। तदन्यवर्जनमिह[2] व्रतं गम्यते। आभीक्ष्ण्ये—पुनः पुनः क्षीरं पिबन्ति—क्षीरपायिण उशीनराः। तक्रपायिणः सौराष्ट्राः। कषायपायिणो गान्धाराः। सौवीरपायिणो बाह्लीकाः। व्रताभीक्ष्ण्ययोरिति किम्? स्थण्डिले शेते—स्थण्डिलशयः। बहुलाधिकाराद् आभीक्ष्ण्येऽपि इह न भवति—कुल्माषखादाश्चोलाः। अताच्छील्यार्थं जात्यर्थं च वचनम्।

८९. साधने यजेर्भूते।

साधने उपपदे भूतेऽर्थे वर्तमानात् यजेर्णिन् प्रत्ययो भवति। अग्निष्टोमेनेष्टवान्—अग्निष्टोमयाजी। भवति हि सामान्यविशेषयोर्भेदविवक्षाया सामान्ययजौ विशेषयजिरग्निष्टोमः साधनम्। भूत इति किम्? अग्निष्टोमेन यजते। साधने इति किम्? गुरूनिष्टवान्।

९०. कर्मणि हनः कुत्सायाम्।

कर्मण्युपपदे भूतेऽर्थे वर्तमानात् हन्तेर्णिन् प्रत्ययो भवति कुत्सायां गम्यमानायाम्। पितृव्यं हतवान्—पितृव्यघाती। मातुलघाती। असरूपत्वादणपि। पितृव्यघातः, मातुलघातः। केचित् तु असरूपविधिं नेच्छन्ति। कर्मणीति किम्? दण्डेन हतवान्। कुत्सायामिति किम्? शत्रु हतवान्—शत्रुघातः। चौरघातः। घञन्तान्मत्वर्थीयेनेना सिद्धे भूतकुत्साभ्यां अन्यत्र शत्रुघातीत्यादौ मत्वर्थीयनिवृत्त्यर्थं वचनम्।

९१. ब्रह्मभ्रूणवृत्रेषु क्विप्।

ब्रह्मादिषु कर्मसूपपदेषु भूतेऽर्थे वर्तमानात् हन्तेः क्विप् प्रत्ययो भवति। ब्रह्माणं हतवान्—ब्रह्महा। भ्रूणहा, वृत्रहा। 'क्विप्' [५/२/७६] इत्यनेनैव सर्वधातुभ्यः क्विप्प्रत्यये सिद्धे नियमार्थं वचनम्। चतुर्विधश्चात्र नियमः। ब्रह्मादिषूपपदेषु एव हन्तेर्भूते क्विप् नान्येषूपपदेषु इति प्रथमः, तेनेह न—पुरुषं हतवान् पुरुषघातः। मधुहा, अहिहा, गोत्रहा, हिमहा, तमोपहा, असुरहा, आखुहा—इत्यादिषु वर्तमानभविष्यतोः कालमात्रे[3] वा 'क्विप्' [५/२/७६] इत्यनेनैव क्विप्। तथा ब्रह्मादिषूपपदेषु हन्तेरेव भूते क्विप् नान्येभ्यो धातुभ्य इति द्वितीयः, तेनेह न—ब्रह्माधीतवान् ब्रह्माध्यायः इत्यणेव। ब्रह्मविदादयस्तु भूताऽविवक्षायाम्। तथा ब्रह्मादिषूपपदेषु हन्तेर्भूते क्विबेव नान्यः प्रत्ययः इति तृतीयः, तेन ब्रह्माणं हतवान् ब्रह्महा इति क्विबेव भवति नाणिनौ। ब्रह्मघ्नादयस्तु कालसामान्ये 'ब्रह्मादिषु' [५/२/१३] इति सूत्रे टक्प्रत्यये साधवः। कथं वृत्रस्य हन्तुः कुलिशमिति? उच्यते—केवलादेव हन्तेस्तृच्, पश्चाद् वृत्रेण सम्बन्धः। **मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्** इति न्यायात् क्विपाऽणादिरेव बाध्यते न क्तक्तवतू। तथा ब्रह्मादिषूपपदेषु हन्तेर्भूते एव क्विप् प्रत्ययो नान्यस्मिन् काले इति चतुर्थः, तेन ब्रह्माणं हन्ति हनिष्यति वा ब्रह्मघातः[4] इत्यणेव। तदेतत् सर्वं बहुलाधिकारात् लभ्यते।

९२. कृञः सुपुण्यपापकर्ममन्त्रपदेषु।

सुशब्दे पुण्यादिषु कर्मसु चोपपदेषु भूतेऽर्थे वर्तमानात् करोतेः क्विप् प्रत्ययो भवति। सुष्ठु कृतवान्—सुकृत्।

---

१. श्राद्धं—पितृदेवत्यं कर्म। तदुद्दिश्य यत् क्रियते पिण्डादिकं तदपि श्राद्धम्।

२. तस्याऽश्राद्धस्याऽन्यत् श्राद्धं, तस्य वर्जनम्।

३. कया रीत्या मधोर्हन्ता कोऽर्थः? मधुहननयोग्यः काल इति वाक्ये क्विपि मधुहेत्यादि।

४. 'ब्रह्मादिषु' [५/२/१३] इति टक्प्रसङ्गेऽपि बहुलमण्।

सुशब्दे कर्म इति न सबध्यतेऽसंभवात्। पुण्य कृतवान्—पुण्यकृत्। पापकृत्, कर्मकृत्, मन्त्रकृत्, पदकृत्। इदमपि नियमार्थं वचनम्। त्रिविधश्चात्र नियम.। स्वादिषूपपदेषु करोतेरेव भूते क्विप् नान्यस्मादिति प्रथम.। मन्त्रमधीतवान्—मन्त्राध्यायः। मन्त्रवित्, पापनुत् इत्यादौ तु भूताऽविवक्षायां क्विप्। तथा स्वादिषूपपदेषु करोतेर्भूते एव क्विप् नान्यस्मिन् काले इति द्वितीय.। कर्म करोति करिष्यति वा कर्मकार.। मन्त्रकार, पदकार। तथा स्वादिषूपपदेषु करोतेर्भूते क्विबेव प्रत्ययः नान्य. इति तृतीयः, तेन कर्म कृतवान् इत्यत्र कर्मकृदेव भवति न तु कर्मकार इति। स्वादिषु एव उपपदेषु करोतेः क्विबिति धातुनियमो नेष्यते, तेन शास्त्रकृत्, तीर्थकृत्, भाष्यकृत्, सूत्रकृत्, वृत्तिकृत् इत्यादय सिद्धाः।

९३. सोमे सुनः।

सोमे कर्मण्युपपदे सुनोते. क्विप् प्रत्ययो भवति भूते। सोम सुतवान्—सोमसुत्। चतुर्विधनियमार्थमेव वचनम्। सोमे एवेति नियमान्नेह—सुरा सुतवान् सुरासाव। सुरासुत् इति भूताऽविवक्षायाम्। सुन एवेति नियमात् सोम पीतवान् सोमपा इति विच्। भूते एवेति नियमात् सोम सुनोति सोष्यति वा सोमसाव इत्यण्। क्विबेवेति नियमात् सोम सुतवान् इत्यण् न भवति।

९४. अग्नौ चेः।

अग्नौ कर्मण्युपपदे भूतेऽर्थे वर्तमानाच्चिनोते क्विप् प्रत्ययो भवति। अग्नि चितवान्—अग्निचित्। इदमपि चतुर्विधनियमार्थं वचनम्। अग्नावेवेति नियमात् कुड्य चितवान् कुड्यचाय इत्यण्। चेरेति नियमात् अग्नि कृतवान् अग्निकार.। भूत एवेति नियमात् अग्नि चिनोति चेष्यति वा अग्निचाय.। क्विबेवेति नियमात् अग्नि चितवान् इति अग्निचिदेव भवति न तु अण्।

९५. कर्मण्यग्न्यर्थे।

कर्मण्युपपदे भूतेऽर्थे वर्तमानाच्चिनोते. कर्मणि कारकेऽग्न्यर्थेऽभिधेय क्विप् प्रत्ययो भवति। श्येन इव चीयते स्म श्येनचित्। एव कङ्कचित्, रथचक्रचित्। अग्न्यर्थं इष्टकचय उच्यते। बहुलाधिकाराद् रूढिविषय एवाय द्रष्टव्य.। केचित्तु सज्ञाशब्दत्वात् कालत्रयेऽप्यय भवतीत्याहु.। श्येन इव चीयते चितश्चेष्यते वा श्येनचित्।

९६. विक्रिय इन् कुत्सायाम्।

कर्मण्युपपदे भूतेऽर्थे वर्तमानात् विपूर्वात् क्रीणातेरिन् प्रत्ययो भवति कुत्साया गम्यमानायाम्। सोम विक्रीतवान्—सोमविक्रयी। घृतविक्रयी, तैलविक्रयी ब्राह्मण। कुत्सायामिति किम्? धान्यविक्राय, घृतविक्राय, तैलविक्राय. वणिक्। कर्मणीति किम्? ग्रामे विक्रीतवान्। भावेऽलन्तस्य मत्वर्थीयेनना सिध्यति कुत्सायामणबाधनार्थं वचनम्।

९७. दृशेः क्वनिप्।

कर्मण्युपपदे भूतेऽर्थे वर्तमानात् दृशे क्वनिप् प्रत्ययो भवति। मेरु दृष्टवान्—मेरुदृश्वा। विश्वदृश्वा, बहुदृश्वा, परलोकदृश्वा। सामान्यसूत्रेण क्वनिपि सिद्धे भूतकाले प्रत्ययान्तरबाधनार्थं[1] वचनम्।

९८. सहराजभ्यां युधि कृनः।

वचनभेदो यथासख्यनिवृत्त्यर्थ.। सहशब्दे राजन्शब्दे च कर्मण्युपपदे युधे कृनश्च क्वनिप् प्रत्ययो भूतेऽर्थे भवति। सह युद्धवान्—सहयुध्वा। सहयुध्वानौ। सह कृतवान्—सहकृत्वा। सहकृत्वानौ। सहशब्दे कर्म इति न संबध्यतेऽसंभवत्वात्। राजानं योधितवान्—राजयुध्वा। युधिरन्तर्भूतण्यर्थः सकर्मक.। राजान कृतवान्—राजकृत्वा।

---

१. अणादेरित्यर्थः।

कर्मणीति किम्? राज्ञा युद्धवान्। प्रत्ययान्तरबाधनार्थोऽयमप्यारम्भः।

९९. अनोर्जनेर्डः।

कर्मण्युपपदे भूतेऽर्थे वर्तमानात् अनुपूर्वात् जनेर्डः प्रत्ययो भवति। पुमांसमनुजातः—पुमनुजः[1]। स्त्र्यनुजः, आत्मानुजः। अनुपूर्वो जनिः जननोपसर्जनाया[2] प्राप्तौ वर्तमानः सकर्मकः।

१००. सप्तम्याम्।

कर्मणीति निवृत्तम्। सप्तम्यन्ते नाम्नि उपपदे भूतेऽर्थे वर्तमानात् जनेर्डो भवति। उपसरे[3] जातः—उपसरजः। मन्दुरायां[4] मन्दुरे वा जातः—मन्दुरजः। अप्सु जातं—अप्सुजम्। अब्जम्। **'वर्षक्षरशरवर'**...[३/२/२६] इत्यादिना सप्तम्या वाऽलुक्।

१०१. पञ्चम्यामजातौ।

जातिवर्जिते पञ्चम्यन्ते नाम्नि उपपदे भूतेऽर्थे वर्तमानात् जनेर्डो भवति। बुद्धेर्जातो बुद्धिजः संस्कारः। संस्कारजा स्मृतिः। संतोषजं सुखम्। अजाताविति किम्? हस्तिनो जातः। अश्वात् जातः।

१०२. क्वचित्।

उक्तादन्यत्रापि क्वचिल्लक्ष्यानुसारेण डो भवति। उक्तान्नाम्नोऽन्यत्रापि। किं जातेन—किंजः। केन जातः—किंजोऽनिर्ज्ञातपितृकः। अलं जातेन—अलंजः। द्विर्जातो द्विजः। न जातोऽजः। अधिजातः—अधिजः। उपजः। परिजः। प्रजाताः प्रजाः। अभिजः। अकर्मण्यपि—अनुजः। जातावपि—ब्राह्मणजः पशुवधः। क्षत्रियजं युद्धम्। स्त्रीजमनृतम्। उक्ताद् धातोरन्यतोऽपि। ब्रह्मणि जीनवान्—ब्रह्मज्यः। उक्तान्नाम्नो धातोश्चान्यतोऽपि। वरमाहृतवान्—वराहः। उक्तान्नाम्नो धातोः कारकाच्चान्यतोऽपि। परिखाता परिखा। आखाता आखा। उपखाता उपखा। नामधातुकालान्यत्वेऽपि। मित्रं ह्वयति—मित्रह्वः। अणोऽपवादो डः। धातुकारकान्यत्वे—पटे हन्यते स्म—पटहः। धातुकालान्यत्वे—वार्चरति—वार्चो हंसः। नामकारकान्यत्वे—पुंमानुजातः—पुमानुजः। नामाभावे उक्तधातुकालान्यत्वे—अटति अतति वा अः। कायति कामयते वा कः। भातीति भं नक्षत्रम्। नामाभावे उक्तधातुकालकारकान्यत्वे च खन्यते इति खम्।

१०३. सुयजोर्ङ्वनिप्।

भूतेऽर्थे वर्तमानात् सुनोतेर्यजेश्च ङ्वनिप् प्रत्ययो भवति। सुतवान्—सुत्वा। सुत्वानौ, सुत्वानः। इष्टवान्—यज्वा। यज्वानौ, यज्वानः। क्वनिब्वन्भ्यां सिद्धे भूते नियमार्थं वचनम्। मन्नादिसूत्रे[5] यथाशास्त्रं ग्रहणस्यैव प्रपञ्चः। ङकारो गुणनिषेधार्थः। पकारः पित्कार्यार्थः। इकारः उच्चारणार्थः।

१०४. जृषेरतृः।

भूतेऽर्थे वर्तमानात् जीर्यतेः अतृः प्रत्ययो भवति। जीर्यति स्म जरन्। जरती। असरूपत्वात् जीर्णः, जीर्णवान्।

---

१. पुमांसमनुजननेन प्राप्तवानित्यर्थः।

२. जननमुपसर्जनं यस्याः।

३. पशूनां प्रथमगर्भग्रहणकाले।

४. अश्वशालायाम्।

५. ननु तत्र यथाशास्त्रं ग्रहणादेव नियमो भविष्यतीत्याशङ्का।

ऋकारो दीर्घत्वप्रतिषेधार्थः ।

१०५. क्तक्तवतू ।

भूतेऽर्थे वर्तमानाद् धातोः क्त, क्तवतु—इत्येतौ प्रत्ययौ भवतः । क्रियते स्म कृतः । करोति स्म कृतवान् । प्रकृत. कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः । अत्र समुदायस्याऽभूतत्वेऽपि कटैकदेशे कटत्वोपचारात् तस्य च निर्वृत्तत्वाद् भूत एव धात्वर्थ इत्यारम्भेऽपि अनेनैव क्तक्तवतू सिद्धौ ।

तृतीयश्चरणः

१. क्वसुकानौ णबादिवत् ।

धातोः क्वसु, कान—इत्येतौ प्रत्ययौ भवतस्तौ च णबादिवत् भवतः। तत्र क्वसुः परस्मैपदत्वात् कर्तरि, कानस्त्वात्मनेपदत्वाद् भावकर्मणोरपि। णबादेर्भूतपरोक्षविषयत्वात् इमावपि भूतपरोक्षमात्रविषयौ। णबादिवत् करणं न णिद्वदर्थं प्रत्यययोः स्वयं कित्वात्, तेन गुणवृद्धी न भवतः। द्वित्वादीनि कार्याणि तु णबादिवत् करणाद् भवन्त्येव। पेचिवान्, पेचिवांसौ, पेचिवांसः। तस्थिवान्, तस्थिवांसौ, तस्थिवांसः। चकृवान्, चकृवांसौ, चकृवांसः। जग्मिवान्, पपिवान्। पेचानः, पेचानौ, पेचानाः। चक्राणः, चक्राणौ, चक्राणाः। ण्यन्ते—पाचयांचकृवान्, पाचयांचक्राणः। णबादिवत् करणादेव कित्वे सिद्धे कित्करणं सयोगान्तधात्वर्थम्, तेनाजिवान्, बभज्वान्, सस्वजानः। एषु कित्वान्नलोपः[1]। ऋदन्तानां गुणप्रतिषेधार्थं च। शिशीर्वान्, तितीर्वान्, पुपूर्वान्। कर्मणि—शशिराणः, ततिराणः, पपुराणः। भावे—शशिराणमित्यादि।

२. श्रुसदवसो भूते णबादिक्वसू वा ।

श्रु, सद, वस—इत्येतेभ्यो धातुभ्यो भूतमात्रेऽर्थे णबादि क्वसुश्च प्रत्ययो वा भवति। उपशुश्राव, उपससाद, अनूवास। उपशुश्रुवान्, उपसेदिवान्, अनूषिवान्। एभ्यः क्वसुविधानेन कानो बाध्यते। पक्षे यथाप्राप्ते दिबादिद्यादी—उपाशृणोत्, उपाश्रौषीत्। उपासीदत्, उपासदत्। अन्ववसत्, अन्ववात्सीत्।

३. ईयिवाननाश्वाननूचानः कर्तरि ।

एते शब्दा भूतमात्रेऽर्थे क्वसुकानान्ता कर्तरि वा निपात्यन्ते। इणः क्वसुरिड्भावश्च निपात्यते। ईयिवान्, समीयिवान्, उपेयिवान्। तथा नञ्पूर्वादश्नातेः क्वसुरिडभावश्च निपात्यते। अनाश्वान्। तथा वचेर्ब्रूनादेशाद् वा अनुपूर्वात् कानो निपात्यते। अनूचानः। निपातनस्येष्टविषयत्वात् कर्तुरन्यत्र अनूक्तमित्याद्येव भवति। वावचनात् पक्षे द्यादयोऽपि। अगात्, उपागात्, उपैत्, उपेयाय, नाशीत्, नाश्नात्, नाश. अन्ववोचत्, अन्वब्रवीत्, अन्ववक्, अनूवाच।

४. शतृशानौ वर्तमाने भविष्यति तु सस्यौ ।

धातोः शतृ, शान—इत्येतौ प्रत्ययौ वर्तमानेऽर्थे भवतः, भविष्यति काले तु शतृशानौ सस्यौ—स्यप्रत्ययसहितौ भवतः। स्योऽपि प्रत्ययत्वाद् धातोरेव। यान्[2], यान्तौ, यान्तः। शयानः, शयानौ, शयानाः। निरस्यन्, निरस्यमानः[3]। पचन्, पचमानः। एकविषयत्वात् तिबादिरपि—याति, यातः, यान्ति। एवं सर्वत्र। तथा सन् अस्ति, अधीयानः अधीते, विद्यमानः विद्यते, जुह्वत्[4] जुहोति, विदन् वेत्ति, जानन् जानाति ब्राह्मणः। तथा तरादौ प्रत्यये—पचत्तरः, पचत्तमः,

---

१ अन्यथा 'इन्ध्यसंयोगाण्णबादिः कित्' [३/४/१०१] इति असंयोगान्तादेव कित्वेऽत्र नलोपो न स्यात्।

२ 'उदृवितो नुम्' [१/४/५८] इति नुम्।

३. असुच् क्षेपणे—इत्यस्य 'उपसर्गादस्योहेः' [३/३/३८] इति वात्मनेपदित्वम्।

४. नुमि 'अन्तो नो लोपः' [३/४/६६] इति नकारलोपः।

पचतितरां, पचतितमां, पचद्रूपः, पचतिरूप, जल्पत्कल्प , जल्पतिकल्प, पश्यद्देश्य., पश्यतिदेश्य, पठद्देशीय , पठतिदेशीयम् । एव पचमानतरः, पचमानतम , पचतेतरा, पचतेतमामित्यादि । द्वितीयाद्यन्तपदसामानाधिकरण्यसंबोधनतरादिवर्जित-तद्धितप्रत्ययोत्तरपदक्रियालक्षणक्रियाहेतुषु तिबादेरन्वयायोगात् शतृशानावेव । पचन्त, पचमान पश्य । पचता, पचमानेन कृतम् । पचते, पचमानाय देहि । पचत., पचमानाद् भीतः । पचत., पचमानस्य स्वम् । पचति, पचमाने गत । संबोधने — हे पचन्, हे पचमान । तराद्यन्यतद्धिते—कुर्वतोऽपत्य कौर्वत । पाचत । वैक्षमाणिः । कुर्वत्पाश., पचत्पाश., । कुर्वच्चर., पचच्चर । उत्तरपदे—भज्यते इति भक्ति., कुर्वन् भक्तिरस्य कुर्वद्भक्ति.[1], कुर्वाणभक्ति । कुर्वत्प्रिय , कुर्वाणप्रियः । ब्रुवन्माठर , ब्रुवाणमाठर. । क्रियाया लक्षण ज्ञापक चिह्न, तत्र तिष्ठन्तोऽनुशास्ति गणका । शयाना भुञ्जते यवना. । बहुषु पिबत्सु कश्चैत्र इति पृष्टः, कश्चिदाह—यस्तिष्ठन् पिबति । एव यो गच्छन् भक्षयति । य शयानो भुङ्क्ते । योऽधीयान आस्ते । तथा य पठन् पचति स मैत्र । एवं यः पचन् पठति । योऽधीयान आस्ते । य आसीनोऽधीते । तथा—

फलन्ती वर्धते द्राक्षा, पुष्यन्ती वर्धतेऽब्जिनी ।
शयाना वर्धते दूर्वा, आसीन वर्धते बिसम् ॥

क्रियाया हेतुर्जनकस्तत्र अर्जयन् वसति । अधीयानो वसति । भविष्यति तु सस्यौ—यास्यन्, शयिष्यमाण , पक्ष्यन्, पक्ष्यमाणः । यास्यति, शयिष्यते, पक्ष्यति, पक्ष्यते । तथा भविष्यन्, भविष्यति, अध्येष्यमाणः, अध्येष्यते ब्राह्मण इत्यादि । तथा पक्ष्यत्तर, पक्ष्यमाणतम., पक्ष्यतितरा, पक्ष्यतितमामित्यादि । सर्वेषु एकविषयत्वात् स्यत्यादिरपि । पक्ष्यन् व्रजति, पक्ष्यमाणो व्रजतीति क्रियायां क्रियार्थायामेकविषयत्वाच्च स्यत्याद्यादयोऽपि । पक्ष्यामीति व्रजति । पाचको व्रजति । पक्तुं व्रजति । पूर्ववदेव च द्वितीयाद्यन्तसामानाधिकरण्यादिषु स्यत्यादे समन्वयाभावादभाव. । पक्ष्यन्त, पक्ष्यमाण पश्य । हे पक्ष्यन्, हे पक्ष्यमाण ब्राह्मण । पाक्ष्यत., पाक्ष्यमाणिः, पक्ष्यमाणपाशः । पक्ष्यद्भक्ति , पक्ष्यमाणप्रिय. । जल्पिष्यन्तो ज्ञाप्यन्ते पण्डिता । अध्येष्यमाणा वत्स्यन्तीत्यादि । वर्तमानभविष्यतोरभावे तु श्व. पक्ता । बहुलाधिकाराद् द्रव्यगुणयोर्लक्षणे हेतुहेतुमद्भावद्योतके तिबादियोगे च न भवति । य. कम्पते सोऽश्वत्थ । यत्तरति तल्लघु । हन्तीति पलायते । वर्षतीति धावति । करिष्यतीति व्रजति । हनिष्यतीति नश्यति । पचत्यतो लभते । विजयतेऽत. पूज्यते । क्रियाया अपि लक्षणे चादियोगे न भवति । य. पचति च पठति च स चैत्र । योऽधीते चास्ते च स मैत्र । शकार शित्कार्यार्थ । ऋकार ईबाद्यर्थ ।

५. तौ माङ्याक्रोशेषु ।

माङ्युपपदे आक्रोशे गम्यमाने सति तौ शतृशानौ प्रत्ययौ भवत । बहुवचनादवर्तमानेऽपि । मा पचन् वृषलो ज्ञास्यति । मा पचमानोऽसौ मर्तुकाम ।

'मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।
तस्या जननिरेवास्तु, जननीक्लेशकारिणः ॥'

[शिशुपालवधमहा० २/४५]

शतृशानौ अनुवृत्त्यैव सिद्धावपि तौ ग्रहणमवधारणार्थम् । तेनात्र विषये असरूपविधिनापि त्र्यादिर्न भवति । भवतीत्यपि कश्चित् ।

६. वेत्तेर्वा क्वसुः ।

वेत्ते. वर्तमानेऽर्थे क्वसु प्रत्ययो वा भवति । विद्वान्, विद्वांसौ, विद्वांस । साधुस्तत्त्व विद्वान् विदन् वेत्ति वा । विदुषा कृतं, विदता कृतम् । हे विद्वन्, हे विदन् । वैदुष., वैदतः । विद्वद्भक्ति, विदद्भक्ति । विद्वानास्ते, विदन्नास्ते ।

---

१. भज्यते इति कर्मणि क्तौ भक्ति. । सेव्य इत्यर्थ. । अत्र वाच्ये पुंलिङ्गेऽपि शब्दशक्तिस्वाभाव्यात् क्त्यन्तस्य स्त्रीलिङ्गतैव ।

विद्वाल्लँभते, विदल्लँभते। द्वितीयाद्यन्तपदसामानाधिकरण्यादिषु पूर्ववदनन्वयादेव न तिबादिः। ककारः कित्कार्यार्थः[1]। उकार ईबाद्यर्थः।

७. पूङ्यजोरानश्।

पूङ यज्—इत्येताभ्यां धातुभ्यां वर्तमानेऽर्थे आनश् प्रत्ययो भवति। पवते, पवमानः। मलय पवमान.। यजति यजते वा यजमानः। शानेनैव सिद्धे आनश्विधान षष्ठीसमासार्थ यजे परस्मैपदेऽपि आनशेवेति नियमार्थ च। शाने तु 'पूरणशतृशानाव्यय···' [३/१/७४] इत्यादिना षष्ठीसमासो न भवति। शकारः शित्कार्यार्थः।

८. शक्तिवयस्ताच्छील्ये।

धातोः वर्तमानेऽर्थे शक्ति, वयः, ताच्छील्य—इत्येतेषु गम्यमानेषु आनण् प्रत्ययो भवति। शक्ति—सामर्थ्यम्। कतीह हस्तिन निघ्नाना.। प्रस्थपञ्चक समश्नाना.। वय.—प्राणिनां कालकृता बालाद्यवस्था। कतीह शिखण्ड वहमाना। स्त्रियं गच्छमाना। ताच्छील्यं—तत्स्वभावता। कनीहात्मान वर्णयमाना., परान्निन्दमानाः। आनश्विधानात् नेह शतृ।

९. इङ्धारिभ्यामऽकृच्छ्रे शतृः।

अकृच्छ्र—सुखसाध्य। इङ्धारिभ्या धातुभ्या वर्तमानेऽर्थे शतृः प्रत्ययो भवति अकृच्छ्रेऽर्थे। अधीयन् द्रुमपुष्पीयम्। धारयन् आचाराङ्गम्। अकृच्छ्र इति किम्? कृच्छ्रेण अधीयते पूर्वगतम्। कृच्छ्रेण धारयति यतिधर्मम्। अत्रापि शानो मा भूदिति शतृविधानम्।

१०. सुन्द्विषार्हः सत्रिशत्रुस्तुत्ये।

सुनोतेर्द्विषोऽर्हश्च धातोर्यथासख्य सत्रिणि शत्रौ स्तुत्ये च कर्तरि वर्तमानेऽर्थे शतृ प्रत्ययो भवति। सत्री यजमान। सर्वे सुन्वन्तः। यज्ञस्वामिन इत्यर्थ। चौर चौरस्य वा द्विषन्। शत्रुरित्यर्थः। पूजामर्हन्। प्रशस्य इत्यर्थः। एष्विति किम्? सुरां सुनोति। भार्यां द्वेष्टि पर पश्यन्तीम्। वधमर्हति चौरः।

११. मुगानेऽतः।

धातोर्विहिते आने प्रत्यये परे अदन्तस्य मुगागमो भवति। पचमान., पवमान, कवचमुद्वहमान, करिष्यमाणः, विद्यमान। अत इति किम्? शयान., भुञ्जानः। आन इति किम्? पचन्।

१२. आसीनः।

आस्तेः परस्यानस्यादेराकारस्य ईकारादेशो निपात्यते। आसीन., उदासीन, उपासीनः, अध्यासीनः।

१३. शीलधर्मसाधुषु तृन्।

वर्तमान इत्यनुवर्तते। वर्तमानेऽर्थे वर्तमानाद् धातो. शीले धर्मे साधौ चार्थे तृन् प्रत्ययो भवति। शीले—कर्ता कटम्। वदिता जनापवादान्। करण वदन चास्य शीलमित्यर्थ.। धर्मे कुलाद्याचार.। वधूमूढा मुण्डयितारः श्राविष्ठायनाः। श्राद्धे सिद्धमन्नमपहर्तारः आह्वरकाः। मुण्डनादि तेषां कुलधर्म इत्यर्थ। साधौ—गन्ता ग्रामम्। कर्ता कटम्। साधु गच्छति, साधु करोतीत्यर्थः। नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृशब्दा औणादिकाः पितृमात्रादिवत्। अत एव एषा आर्द्विधौ पृथगुपादानम्। शीलादिष्विति किम्? कर्ता कटस्य। तृचैव सिद्धे कर्मणि षष्ठीबाधनार्थं वचनम्। नकारस्तृन्तृचोर्भेदपरिग्रहार्थः।

---

१. आदिपदात् 'तृन्नुदन्ताव्यय···' [२/४/६५] इत्यादि।

१४. भ्राज्यलंकृन्-निराकृन्-भू-सहि-रुचि-वृति-वृधि-चरि-प्रजनापत्रप इष्णुः ।

एभ्यो वर्तमानेऽर्थे वर्तमानेभ्य. शीलादावर्थे इष्णु प्रत्ययो भवति । भ्राजनशीलो भ्राजनधर्मा साधु भ्राजते वा भ्राजिष्णु । भ्राजिष्णुना लोहितचन्दनेन । अलकृन् - अलकरिष्णु । निराकृन्--निराकरिष्णु । भू—भविष्णु । सर्वेषा भविष्णूना जन्याना न तु स योग्यः । सह—सहिष्णु । रुच्—रोचिष्णु । वृत्--वर्तिष्णु । वृध्—वर्धिष्णु । चर—चरिष्णुः । प्रजन्—प्रजनिष्णु । अपत्रप्—अपत्रपिष्णु । भ्राजेर्नेच्छन्त्येके ।

१५. उदः पचि-पति-पदि-मदिभ्यः ।

उत्पूर्वेभ्य एभ्यः शीलादावर्थे वर्तमाने इष्णु प्रत्ययो भवति । उत्पचिष्णु , उत्पतिष्णु , उत्पदिष्णु , उन्मदिष्णु । पदेर्नेच्छन्त्यन्ये ।

१६. ग्ला-म्ला-स्था-क्षि-पचि-परिमृजिभ्यः स्नुः ।

एभ्य शीलादावर्थे वर्तमाने स्नु प्रत्ययो भवति । ग्लास्नु , म्लास्नु , स्थास्नु , क्षेष्णु , पक्ष्णु , परिमार्क्ष्णु ।

१७. त्रसि-गृधि-धृषि-क्षिपिभ्यः क्नुः ।

एभ्य शीलादावर्थे वर्तमाने क्नु प्रत्ययो भवति । त्रस्नु , गृध्नु , धृष्णु , क्षिप्णु । ककार कित्कार्यार्थ ।

१८. जिभूभ्यां ष्णुक् ।

जि, भू—इत्येनाभ्यां शीलादावर्थे वर्तमाने ष्णुक् प्रत्ययो भवति । जिष्णु, भूष्णु । कित्त्वान्न गुण ।

१९. शमष्टकाद् घिनुण् ।

शीलादावर्थे वर्तमानेभ्य शमादिभ्योऽष्टाभ्यो धातुभ्यो वर्तमाने घिनुण् प्रत्ययो भवति । शाम्यतीत्येवशीलः शमी । दमी, तमी, श्रमी, भ्रमी, क्षमी । मान्तत्वान्नेह वृद्धि । प्रमादी, उन्मादी, क्लमी । घञन्तान्मत्वर्थीयेन सिध्यति तन्बाधनार्थ तु वचनम् । अष्टकादिति किम् ? असिता । णकारो वृद्ध्यर्थ । उकार उच्चारणार्थ । घकार उत्तरत्र कत्वगत्वार्थ । अभिधानात् घिनुण् अकर्मकेभ्यस्तेनेह न भवति—अरण्य भ्रमिता । सकर्मकेभ्यस्तु यथादर्शन दर्शयिष्यामः ।

२०. युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहाभ्याहनिभ्यः ।

एभ्य. शीलादावर्थे वर्तमानेभ्यो वर्तमाने घिनुण् प्रत्ययो भवति । युज्यते युनक्ति वा इत्येवशीलो योगी । भुङ्क्ते भुनक्ति भुजतीति वा भोगी । भागी । कल्याणभागी । त्यागी । प्राणत्यागी । रागी । **'अकङ्घिनोश्च रञ्जेः'** [४/२/८३] इति नलोप । द्वेषी, दोषी, द्रोही, दोही, अभ्याघाती । अकर्मकादेव—गा दोग्धा । शत्रूनभ्याहन्ता ।

२१. समनुव्यवेभ्यो रुधः ।

सम्, अनु, वि, अव—इत्येतेभ्य परात् रुधे शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । सरुन्धे इत्येवशील सरोधी । अनुरोधी, विरोधी, अवरोधी ।

२२. आङो मुषक्रीडः ।

आङपराभ्या मुष, क्रीड—इत्येताभ्यां शीलादावर्थे वर्तमानाभ्या वर्तमाने घिनुण् प्रत्ययो भवति । आमुष्णाति

इत्येवशील आमोषी । आक्रीडी । शीलादिप्रत्ययान्ता.[1] प्रायेण रूढिप्रकारा यथादर्शन प्रयुज्यन्ते इति उपसर्गान्तराधिक्ये न भवति । एवमुत्तरत्रापि ।

२३. प्राच्च यमयसः ।

प्रादाङश्च पराभ्या यम, यस—इत्येताभ्या शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । प्रयच्छतीत्येवशील. प्रयामी । आयामी, प्रयासी, आयासी ।

२४. समः सृजि-पृणक्ति-वसि-ज्वरि-त्वरिभ्यः ।

सम· परात् सृजादिभ्यो धातुभ्य. शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । ससृजतीत्येवशील ससृज्यते वा ससर्गी । सपर्की । पृणक्तिनिर्देशात् रौधादिकस्यैव ग्रहण न तु आदादिकस्य । सपर्चिता । सवासी । संज्वारी, सत्वारी । आभ्या ञ्यन्ताभ्यामपीच्छन्त्यन्य । सज्वरी, सत्वरी । घटादित्वाद् ह्रस्व । अकर्मकादेव—संपृणक्ति शाकम् ।

२५. वेः सृज-विच-कत्थ-स्रम्भु-द्रु-कष-कस-लस-सृ-दह-हनिभ्यः ।

विपूर्वकेभ्य सृजादिभ्यो धातुभ्य शीलादावर्थे घिनुण् प्रत्ययो भवति । विसृजति इत्यवशीलो विसृज्यते वा विसर्गी । विवेकी, विकत्थी, विस्रम्भी, विद्रावी, विकाषी, विकासी, विलासी, विसारी, विदाही, विघाती ।

२६. प्राद् द्रु-सृ-मथ-वस-लपिभ्यः ।

प्रपूर्वकेभ्य एभ्य शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । प्रद्रवतीत्येवशीलः प्रद्रावी । प्रसारी, प्रमाथी, प्रवासी, प्रलापी ।

२७. व्यपाभिभ्यो लषः ।

वि, अप, अभि—इत्येतेभ्यः पराल्लषे शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । विलपतीत्येवशीलो विलाषी । अपलाषी, अभिलाषी ।

२८. परेः सृ-दहि-मुहि-देविभ्यः ।

परिपूर्वकेभ्य एभ्य. शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । परिसरतीत्येवशील परिसारी । परिदाही, परिमोही, परिदेवी ।

२९. संपरिव्यनुप्रेभ्यो वदः ।

सम्, परि, वि, अनु, प्र—इत्येतेभ्य उपसर्गेभ्य परात् वदे· शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । सवदतीत्येवशील. संवादी । परिवादी, विवादी, अनुवादी, प्रवादी ।

३०. समत्यपाभिव्यभिभ्यश्चरः ।

सम्, अति, अप, अभि, व्यभि—इत्येतेभ्य. पराच्चरेः शीलादावर्थे वर्तमाने घिनुण् प्रत्ययो भवति । सचरति

---

१. शीलधर्मसाधुषु अर्थेषु ये प्रत्ययास्तदन्ता इमे प्रायेण रूढिशब्दप्रकारा· । यथा रूढिशब्दा रूढिविषय एव प्रवर्त्तन्ते, तत्र च नियतरूपास्तथा इमेऽपि ये यथा प्रयोगे दृश्यन्ते यद्यदुपसर्गाः सोपसर्गा अनुपसर्गा वा ते तथैव प्रयोगानुसारेण प्रयोक्तव्या· । तथाहि – कामुक इति अनुपसर्ग एव प्रयुज्यते न सोपसर्गः । एव आगामुकः इति आङ् उपसर्गपूर्व एव न तु अनुपसर्गोऽन्योपसर्गपूर्वो वा इत्येवमन्यदपि द्रष्टव्यमिति नोपसर्गान्तराधिक्ये भवति ।

इत्येवंशीलः सचारी । अतिचारी, अपचारी, अभिचारी, व्यभिचारी ।

३१. परेः क्षिपरटवादिभ्यो णकश्च ।

परिपूर्वकेभ्यः क्षिपादिभ्यः शीलादावर्थे वर्तमाने णकश्चकाराद् घिनुण् च प्रत्ययौ भवतः । परिक्षिप्यति परिक्षिपतीत्येवंशीलः परिक्षेपकः, परिक्षेपी । परिराटकः, परिराटी । परिवादकः, परिवादी । **'णकतृचौ'** [५/१/५६] इति सामान्येनैव असरूपत्वात् सिद्धे पुनर्विधानं शीलादिप्रत्ययेष्वशीलादिकृत्प्रत्ययोऽसरूपविधिना न भवतीति ज्ञापनार्थम्, तेन अलंकारकः, परिक्षिपः, परिरटः इत्यादिशीलाद्यर्थे न भवति । बाहुलकात् क्वचिद् भवत्यपि । **'कामक्रोधौ मनुष्याणां खादितारौ वृकाविव'** । अत्र णकविषये तृच् ।

३२. निन्द-हिंस-क्लिश-खाद-विनाशि-व्याभाषासूयाऽनेकस्वरेभ्यः ।

एभ्यो धातुभ्यो वर्तमाने शीलादावर्थे णक प्रत्ययो भवति । निन्दतीत्येवंशीलो निदकः । हिंसकः । क्लिश्नाति क्लिश्यते वा क्लेशकः । खादकः । विनाशयति विनाशकः । व्याभाषकः । असूयः कण्ड्वादी—असूयकः । अनेकस्वर— दरिद्रायकः, चकासकः, गणकः, चुलुम्पकः । अनेकस्वरत्वादेव सिद्धेऽसूयग्रहणं कण्ड्वादिनिवृत्त्यर्थम्, तेन कण्डूयिता, मन्तूयिता । तृन्नेव । विनाशिग्रहणं *ण्यन्तस्य*[1] *ञ्यन्तस्य निवृत्त्यर्थम्* । कारयिता । अनेकस्वरान्नेच्छन्त्यन्ये । क्लिशेरविशेषेण ग्रहणाद् दैवादिकात् ङित्त्वेऽपि अनो न भवति ।

३३. उपसर्गाद्देवृदेविक्रुशिभ्यः ।

उपसर्गात् परेभ्यः शीलादावर्थे एभ्यो वर्तमाने णकः प्रत्ययो भवति । आदेवते इत्येवंशीलः आदेवकः । परिदेवकः । देवीति दीव्यतेर्देवतेर्वा ञ्यन्तस्य ग्रहणम् । आदेवयतीति आदेवकः । परिदेवकः । आक्रोशकः, परिक्रोशकः । उपसर्गादिति किम् ? देवनः, देवयिता, क्रोष्टा । देवतेर्ञ्यन्तादेवेति कश्चित् ।

३४. शृ-कम-गम-हन-वृष-भू-स्थाभ्य उकण् ।

एभ्यो धातुभ्यो वर्तमाने शीलादावर्थे उकण् प्रत्ययो भवति । शृणातीत्येवशीलः शारुकः । प्रशारुकः शरः । कामुकः, कामुकी रिरंसुः । कामुका येच्छा विना कामयते । कामुका[2] अन्यस्य स्त्रियो भवन्ति । गामुकः, आगामुकः स्वगृहम् । घातुकः, आघातुको व्याधः । वर्षुकः, प्रवर्षुकः पर्जन्यः । भावुकः, प्रभावुकः क्षत्रियः । स्थायुकः प्रमत्तः । उपस्थायुको गुरुम् । गुणानधिष्ठायुकः ।

३५. लष-पत-पदिभ्यः ।

एभ्यो वर्तमाने शीलादावर्थे उकण् प्रत्ययो भवति । अपलपतीत्येवशीलमपलाषुकं नीचसांगत्यम् । अभिलाषुकः । उत्पातुकं ज्योतिः । प्रपातुका गर्भाः । उपपादुका देवाः । योगविभाग उत्तरार्थः ।

३६. भूषा-क्रोधार्थ-चंक्रम्य-दंद्रम्य-जु-सृ-गृधि-ज्वल-शुचिभ्यश्चाऽनः ।

भूषार्थेभ्यः क्रोधार्थेभ्यश्चंक्रम्यादिभ्यश्चकारात् लष, पत, पद—इत्येतेभ्यश्च धातुभ्यो वर्तमाने शीलादावर्थे अनः प्रत्ययो भवति । भूषार्थे— भूषयतीत्येवंशीलो भूषणः कुलस्य । मण्डना गगनस्य भाः । प्रसाधनः । क्रोधार्थे—क्रोधनः, कोपनः, रोषणः । कुटिलं क्रामति द्रमतीत्येवशीलः चंक्रमणः, दंद्रमणः । अनयोर्यङन्तयोङित्त्वादुत्तरेणैव सिद्धे सकर्मकार्थं[3]

---

1. कथं तर्हि गणकः ? अत्रेदं व्याख्यानं कर्त्तव्यं यत् विनाशीति ञिन्नन्तस्योपादानं करोति तत् ज्ञापयति अन्यस्यापि ञिन्नन्तस्य वर्जनं, तेन जिजन्तस्य भवत्येव ।
2. **'अकमेरुकस्य'** [२/४/६६] इत्यत्र कमिवर्जनान्न षष्ठीनिषेधः ।
3. **'ङितो हसाद्यन्तात्'** [५/३/३८] इत्यनेन तु अकर्मकाद् विहितः ।

वचनं य[1] इति प्रतिषेधनिवृत्त्यर्थं[2] च। 'अतः'[3] [४/२/५४] इति हि लोपः प्रत्यये विषयभूतेऽपि[4] भवति। जवतिः सौत्रो वेगाख्ये[5] संस्कारे वर्तते, तेन चल्यर्थद्वारेण न सिध्यति इति इह उपादानम्। जवनः। सृ—सरणः। गृधु—गर्धनः। ज्वल्—ज्वलनः। शुच्—शोचनः। लष्—अभिलषणः। पत—पतनः। पदेर्ङित्त्वादुत्तरेणैव सिद्धे सकर्मकार्थं वचनम्। अर्थस्य पदनः। ग्रन्थस्य पदनः। पदनः क्षेत्राणाम्। उत्तरत्र सकर्मकेभ्योऽपि विधिरित्येकेषां दर्शनम्। तथा चोकणा बाधितोऽपि असरूपत्वात् पदेरनः प्रत्ययो भविष्यतीति चेत् एवं तर्हि शीलादिप्रत्ययेषु असरूपत्वेन शीलादिप्रत्ययो न भवतीति ज्ञापनार्थं पदग्रहणम्। तेन चिकीर्षिता कटं, अलंकर्ता कन्यामिति न भवति। कथं तर्हि गन्ता ग्रामं, आगामुकः, भविता, भावुकः, जागरिता, जागरूकः, विकत्थनः, विकत्थी, भासनः, भासुरः, वर्धनः, वर्धिष्णुः, अपलाषुकः, अपलाषी, कम्पना कम्प्रा शाखा, कमना कामुका युवतिः? क्वचित् समावेशोऽपि भवति। एतदर्थमेव च 'न णिङ्यसूददीप…' [५/३/३९] इति सूत्रे दीपिग्रहणम्। अन्यथा रप्रत्ययेन अनो बाध्येत इति तदनर्थकं स्यात्। अनस्यैव विषये समावेश इत्येके।

३७. चलशब्दार्थादकर्मकात्।

अर्थशब्दः प्रत्येकं सबध्यते। चलनार्थात् शब्दार्थाच्च धातोः शीलादावर्थे वर्तमानादविद्यमानकर्मकादविवक्षितकर्मकाद् वा वर्तमाने अनः प्रत्ययो भवति। चलतीत्येवंशीलश्चलनः। कम्पनः, चोपनः, चेष्टनः। शब्दयतीत्येवंशीलः शब्दनः। रवणः, आक्रोशनः। अकर्मकादिति किम्? पठिता विद्याम्।

३८. ङितो हसाद्यन्तात्।

हस आदिरन्तश्च यस्य स हसाद्यन्तः। ङकारानुबन्धाद् हसाद्यन्ताद् अकर्मकाद् धातोर्वर्तमाने शीलादावर्थे अनः प्रत्ययो भवति। स्पर्धङ्—स्पर्धनः। वृतुङ्—वर्तनः। वृधुङ्—वर्धनः। णेरतश्च विषय एव लोपे हसाद्यन्तत्वाद् इहापि[6] भवति। चितङ्ण्—चेतनः। गुपङ्—जुगुप्सनः[7]। मानङ्—मीमांसनः। ङित इति किम्? स्वप्ता। हसाद्यन्तादिति किम्? एधिता, शयिता। अकर्मकादिति किम्? वमिता वस्त्रं, सेविता विषयान्। कथमुत्कण्ठावर्धनैरिति? नात्र कर्मषष्ठीसमासो वृधेरकर्मकत्वात्, किंतु तृतीयासमासः। उत्कण्ठया वर्धनैः वर्धमानोत्कण्ठाशीलैरिति यावत्। अन्ये तु अकर्मकादेवेति नेच्छन्ति।

३९. न णिङ्-य-सूद-दीप-दीक्षिभ्यः।

णिङन्तेभ्यो यान्तेभ्यः सूदादिभ्यश्च धातुभ्यो वर्तमाने शीलादावर्थे अनः प्रत्ययो न भवति। भावयिता[8], हस्तयिता, उत्पुच्छयिता। क्ष्मायिता, क्नूयिता, दयिता। सूदिता, दीपिता, दीक्षिता। मधुसूदनारिसूदनबलसूदनादयो नन्द्यादिषु द्रष्टव्याः।

---

१. 'न णिङ्यसूद…' [५/३/३९] इति प्राप्ते।

२. ननु यदि सकर्मकार्थमारम्भस्तदा न विधेयः। यतोऽविवक्षितकर्मकाभ्यामाभ्यां 'ङितो हसाद्यन्तात्' [५/३/३८] भविष्यतीत्याह।

३. ननु यङोऽकारान्तत्वात् कथं यान्तत्वमित्याह…अत इति।

४. अनेकस्वरत्वाण्णकस्य।

५. स्थितिस्थापकभावनादिभेदात् त्रिधा संस्कारः। वेगाख्यस्तु चलनस्य हेतुरेव न तु चलनमित्यर्थः।

६. अन्यथाऽनेकस्वरत्वात् 'निन्दहिंस…' [५/३/३२] इत्यादिना णकः स्यात्।

७. नन्वत्राकारस्य विषयेऽपि लोपे सन्नन्तस्य ङित्त्वाऽभावाद् अनो न प्राप्नोति। न। अत्र गुपेः स्वार्थ एव सन्, ततश्च गुपङ्लक्षणे अवयवे कृतं लिङ्गं समुदायस्यापि विशेषकमिति न्यायात् गुपङ् एव द्रष्टव्यः। ननु तथापि सन्नन्तत्वात् 'सन्भिक्षाशंसि…' [५/३/४१] इत्यादिना उः प्रत्ययः प्राप्नोति। नैवम्। विषयव्याख्यानात्। यद्यकारलोपेऽपि उः प्रत्ययस्तदा विषयव्याख्याफलं न।

८. अत्रानेकस्वरत्वात् णकविषये णिलोपात् हसान्तत्वात् अनः प्राप्तः प्रतिषिध्यते। ततः इटि सति 'णेरनिटि' [४/२/५५] इत्युक्तेः पुनर्निवर्तते। एवं हस्तयितेत्यादौ भावना।

४०. वृङ्-भिक्षि-लुण्टि-जल्पि-कुट्टिभ्यः षाकः ।

एभ्यो वर्तमाने शीलादावर्थे षाकः प्रत्ययो भवति । वृणीते इत्येवंशीलो वराक , वराकी । भिक्षाक , भिक्षाकी । लुण्टाक , लुण्टाकी । जल्पाक , जल्पाकी । कुट्टाक , कुट्टाकी । षकार ईबर्थ. ।

४१. सन्नाशंसिभिक्षिभ्यः उः ।

सन्प्रत्ययान्तेभ्यो धातुभ्य आशंसिभिक्षिभ्यां च वर्तमाने शीलादावर्थे उ प्रत्ययो भवति । चिकीर्षतीत्येवंशील: चिकीर्षु. । जिहीर्षु । आशंसिति आङः शसिङ इच्छायामित्यस्य ग्रहण, न तु शसु स्तुतौ च इत्यस्य । तत्राङयोगस्याऽनियतत्वात् । आशंसु । भिक्षु. ।

४२. विन्द्विच्छू ।

वर्तमाने शीलादावर्थे वेत्तेरिच्छतेश्च उः प्रत्ययो यथासंख्य नुमागमछकारान्तादेशौ च निपात्यन्ते । वेदनशीलो विन्दु । एषणशील इच्छु. । कथमपा विन्दु. ? विन्देरवयवार्थात् औणादिक उ ।

४३. प्राज्जुसूभ्यामिन् ।

प्रात् पराभ्या जु, सू— इत्येताभ्या वर्तमाने शीलादावर्थे इन् प्रत्ययो भवति । प्रजवतीत्येवंशील प्रजवी । सु इति निरनुबन्धग्रहणात् सुवतेर्ग्रहण न सूतिसूयत्यो । प्रसुवतीत्येवंशील प्रसवी ।

४४. जीण्-दृ-क्षि-विश्रि-परिभू-वमाभ्यमाव्यथिभ्यः ।

एभ्यो धातुभ्यो वर्तमाने शीलादावर्थे इन् प्रत्ययो भवति । जि—जयतीत्येवंशीलो जयी । विजयी । इण्—अत्ययी, उदयी । दृ—आदरी । क्षीति क्षि—क्षये, क्षिज्—निवासगत्योरिति द्वयोरपि ग्रहणम्[1] । क्षयी । विश्रि—विश्रयी । परिभू— परिभवी । वम्—वमी । अभ्य—अभ्यमी । अव्यय्—न व्यथते इति अव्यथी ।

४५. श्रद्धा-निद्रा-तन्द्रा-शीङ्-दयि-पति-गृहि-स्पृहिभ्य आलुः ।

एभ्यो वर्तमाने शीलादावर्थे आलु प्रत्ययो भवति । श्रत्पूर्वो धान् श्रद्धत्ते श्रद्धालु । निद्राति निद्रायति वा निद्रालु । तत् द्राति द्रायति वा तन्द्रालु । निपातनात् तदो दस्य न । तन्द्रेति सौत्रो धातुर्वा । शेते इत्येवंशील शयालु. । दयते दयालु । पतिगृहिस्पृहयोऽदन्ता. चौरादिका । पतिगृही सौत्राविकारान्तौ वा । पतयति पतयालु । गृहयति गृहयालु । स्पृहयति स्पृहयालु । मृगयतेरपि कश्चित् । मृगयालु । लज्जालु , ईर्ष्यालु , शलालुरित्यादयस्त्वौणादिका । कृपालुहृदयालू मत्वर्थीयान्तौ ।

४६. शदि-सदि-धेड्-दा-सिभ्यो रुः ।

एभ्यो धातुभ्यो वर्तमाने शीलादावर्थे रु प्रत्ययो भवति । शीयते शद्रु । सीदति सद्रु । धयति धारुर्वत्सो मातरम् । ददाति, दयते, यच्छति, द्यति, दाति, दायति वेत्येवंशीलो दारु. । सिनोति सेरु. । कथ द्यति तर्दति दारु काष्ठम् ? औणादिक कर्मणि रु । एभ्य इति किम् ? दधातीत्येवंशीलो दधिर्गा ।

४७. सृदिघसो मरक् ।

सृ, अद्, घस्—इत्येतेभ्यो धातुभ्यो वर्तमाने शीलादावर्थे मरक् प्रत्ययो भवति । सरतीत्येवंशील सृमरः । अद्मर , घस्मर । ककार कितकार्यार्थ ।

---

१. क्षिणुष् इत्यस्य तु षानुबन्धत्वात् न ग्रह ।

४८. भञ्जिभासिमिदो घुरः ।

एभ्यो वर्तमाने शीलादावर्थे घुर प्रत्ययो भवति। भज्यते[1] स्वयमेवेत्येवंशीलं भङ्गुरं काष्ठम्। भासते भासुरं वपु। मेद्यति मेदते वा मेदुर.। घकारो गत्वार्थ.।

४९. वेत्तिच्छिदिभिदिभ्यः कित् ।

एभ्यो वर्तमाने शीलादावर्थे किद् घुर प्रत्ययो भवति। वेत्तीत्येवशीलो विदुरः। बहुलाधिकारात् वेत्तेः कर्तर्येव घुरः। छिद्यते, भिद्यते स्वयमेव छिदुर, भिदुर। किन्वान्न गुण। वेत्तीति तिब्निर्देशात् अन्ये त्रयो विद्धातवो न गृह्यन्ते।

५०. जागुरूकः ।

जागर्तेर्वर्तमाने शीलादावर्थे ऊकः प्रत्ययो भवति। जागर्तीत्येवशीलो जागरूक।

५१. यजि-जपि-दंशि-वदो यङः ।

यजादिभ्यो यङन्तेभ्यो वर्तमाने शीलादावर्थे ऊक प्रत्ययो भवति। भृशं पुनःपुनर्वा यजतीत्येवशीलो यायजूक। जंजपूक, दंदशूक, वावदूक। अन्येभ्योऽपीति केचित्। ददहूक, पापयूक, निजागदूक, नानशूक, पंपशूक।

५२. सासहि-चाचलि-वावहि-पापतयः कौ ।

शीलादावर्थे वर्तमानानां सहिचलिवहिपतीनां यङन्तानां कौ सति यथासंख्यमेते निपात्यन्ते। अत एव वचनात् किरपि। मासह्यते इत्येवंशील. सासहि। चाचल्यते चाचलि। वावह्यते वावहि.। पनीपत्यते पापति। निपातनादेव नीगभाव.। काविति ककार **'तृन्नुदन्ताऽव्ययक्वस्वानशतृ···'** [२/४/६५] इत्यत्र विशेषणार्थ।

५३. सस्रि-चक्रि-दधि-जज्ञि-नेमयः ।

एते शीलादावर्थे कृतद्विर्वचना किप्रत्ययान्ता वर्तमाने निपात्यन्ते। सरति इत्येवशील सस्रि। करोति चक्रि। दधाति दधिः। जायते जानाति वा जज्ञि.। नमति नेमि। द्विर्वचनाभाव एत्व च निपातनात्।

५४. स्थेश-भास-कस-पिस-प्रमदो वरः ।

स्थादिभ्यो वर्तमाने शीलादावर्थे वरः प्रत्ययो भवति। तिष्ठतीत्येवंशील. स्थावर। स्थावरा। ईश्वर, ईश्वरा। कथमीश्वरी? **'अश्नोतेरीच्चादेः'** [उ० २/१६२] इत्यौणादिके वरटि भविष्यति। भास्वरः, भास्वरा। विकस्वर, विकस्वरा। पेस्वरः, पेस्वरा। प्रमद्वर., प्रमद्वरा।

५५. यायावरः ।

यङन्तात् यातेर्धातोः शीलादावर्थे वर्तमाने वरप्रत्यये च कृते यायावर इति निपात्यते। कुटिलं यातीत्येवंशीलो यायावरः[2]।

५६. सृजीण्नशः क्वरप् ।

एभ्यो वर्तमाने शीलादावर्थे क्वरप् प्रत्ययो भवति। सरतीत्येवंशील सृत्वर.। सृत्वरी। जित्वरः, जित्वरी।

---

१. 'कर्मणि घुरकेलिम··' [५/१/४] इति घुरप्रत्ययस्य कर्मकर्तरि विधानादित्याह—भज्यते स्वयमेवेत्यादि। भासिमिदिविदां तु कर्तर्येव घुरोऽकर्मकत्वेन कर्मकर्तुरसंभवात्।

२. यायावरो गत्वर आचार्यो वा। तस्य छात्रा यायावरीया इति प्रसिद्धिः।

इत्वर., इत्वरी। क्रूरकर्मणि पथिके नीचे दुर्विधे च। नश्वर, नश्वरी। पकारस्तु गागमार्थ। **'मुख्यात् यिट्विवणम्'''** [२/३/२०] इत्यादिना ईप्।

५७. गत्वरः।

गमे क्वरपि मकारस्य तकारादेशे च गत्वर इति निपात्यते। गत्वर, गत्वरी।

५८. दीपि-कम्पि-स्म्यजसि-हिंसि-कमि-नमो रः।

दीपादिभ्यो धातुभ्यो वर्तमाने शीलादावर्थे र प्रत्ययो भवति। दीप्यतीत्येवशीलो दीप्र· दीपः। कम्प्रा शाखा। स्मेरं मुखम्। अजसिमिति जसुच्[१]-- मोक्षणे नञ्पूर्व। न जस्यति अजस्र श्रवणम्। अजस्रा प्रवृत्ति। अजस्र पाक। अजस्र पचति। अजस्रश-दोऽय स्वभावात् मातत्यविशिष्टा क्रियामाह। तेन धात्वर्थ[२] एव कर्तरि र प्रत्ययोऽन्यथा क्रियाभिधानानुपपत्ते। तेनाऽजस्रो घट इति न भवति। अजस्र इति अव्ययमपि नित्यार्थ क्रियाविशेषणमस्ति। हिस्रो व्याध। कामयते कम्रा युवति। बहुलाधिकारात् कर्मण्यपि। कम्यते कम्र। तत एव कमितेत्यपि। नमतीति नम्रः। अजसिकमिनमिभ्य कर्मकर्तर्येवेच्छन्त्येके।

५९. तृषिधृषिस्वपो नजिङ्।

एभ्यो वर्तमाने शीलादावर्थे नजिङ प्रत्ययो भवति। तृष्यतीत्येवशीलस्तृष्णक्। तृष्णजौ। धृष्णक्, धृष्णजौ। स्वप्नक्, स्वप्नजौ। ङकारो गुणप्रतिषेधार्थ। इकार उच्चारणार्थ.। धृषो नेच्छन्त्येके।

६०. शृवन्देरारुः।

आभ्यां वर्तमाने शीलादावर्थे आरु प्रत्ययो भवति। शृणातीत्येवशील· शरारु। विशीर्यते विशरारु·। वन्दते वन्दारु.।

६१. भियः क्रुकक्लुकाः।

बिभेतेर्वर्तमाने शीलादावर्थे क्रु, क्रुक, क्लुक---इत्येते प्रत्यया भवन्ति। ककारः कित्कार्यार्थ। बिभेतीत्येवंशीलो भीरु, भीरुक, भीलुक। कपिरकादित्वात् लत्व प्रयोगानुसरणाद् गरीय इति लाघवार्थ क्लुकवचनम्।

६२. दिद्युद्दद्वज्जगज्जुहू-वाक्-प्राड्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राड्-भ्राजादयः क्विपः।

एते शब्दा. क्विबन्ता. शीलादौ वर्तमानेऽर्थे निपात्यन्ते। द्योतत इत्येवंशीलो दिद्युत्। दिद्युतौ। दृणातीति ददृत्। ददृतौ। गच्छनीति जगत्[३]। जुहोतीति जुहू·। एषु द्वित्वम्। दृणातिजुहोत्योर्ह्रस्वत्वदीर्घत्वे च। वक्तीति वाक्[४]। पृच्छतीति प्राट्। प्राशौ। शब्दप्राट्, तत्त्वप्राट्। दधाति ध्यायति वा धी। श्रयतीति श्री। शतं द्रवतीति शतद्रू·। स्रवतीति स्रू। जवतीति जू। आयत स्तौतीति आयतस्तू। कट प्रवते कटप्रूः। परिव्रजतीति परिव्राट्। परिव्राजौ। एषु दीर्घत्वम्। दधातेराकारस्य ध्यायतेर्याशब्दस्य चेकार। बहुलाधिकारादशीलादावपि---धी., सुधीः, प्रधी, आधी.। भ्राजादि---विभ्राजत इति विभ्राट्। विभ्राजौ। भासत इति भा.। भासौ, भासः। पिपर्तीति पूः[५]। पुरौ, पुरः। धूर्वतीति धूः। धुरौ,

---

१. अन्येषामञिजन्ताना माहचर्याच्चुरादिञिजन्तो न गृह्यते।

२ अन्यस्य धातोरर्थ इत्यर्थ·। यथाऽजस्र· पाकः इत्यत्र पचधातो पाकलक्षणेऽर्थे।

३. क्रियाशब्दोऽय, तेन जगतौ, जगत इति। विष्टपवाचकस्तु **'गमेर्दिद् द्वे च'** [उ० ४/१३५] इति साधुस्तस्य च जगती, जगन्तीति द्विवचनबहुवचने सति भवत।

४. निपातनात् कर्मण्यपि।

५. पिपर्तीति पृ॰ इत्यस्य धात्वन्तरेण वाक्य तच्चार्थकथनमेव। पृणातीत्येवशीला इति तु कार्यम्।

धुरः। विद्योतते इति विद्युत्। विद्युतौ। ऊर्जयतीति ऊर्क्। ऊर्जौ, ऊर्जः। ग्रावाण स्तौति ग्रावस्तुत्। ग्रावस्तुतौ। पचतीति पक्। शक्नोतीति शक्। भिनत्तीति भित्। वेत्तीति वित्। शोकच्छित्। भुव. संज्ञायामेव—भूः—पृथिवि। शंभूः—शिवः। आत्मभूः—कामः। मनोभू. स एव। स्वयभू—ब्रह्मा। स्वभूः—विष्णुश्च। मित्रभूर्नाम कश्चित्। प्रतिभूः—उत्तमर्णाधमर्णयोरन्तरस्थः। दृन्भूः—व्यसनसहाय। कारभूः—पण्यमूल्यादिनिर्णेता। वर्षाभू.—दर्दुर औषधिश्च। पुनर्भू—पुनरूढा औषधिश्च संज्ञायाम्। अन्यत्र भविता। शीलादिषु असरूपविधिर्नास्तीति[1] सामान्यलक्षण.[2] क्विप् न प्राप्नोतीति पुनर्विधीयते। शीलादिप्रत्ययाना पूर्णोऽवधि। केचित्तु संज्ञाशब्दानां शीलाद्यर्थेषु कामचारस्ते यथाकथचिद् व्युत्पादनीया इति मन्यन्ते।

६३. शंसंस्वयंविप्रेभ्यो भुवो डुः।

एभ्यः पराद् भुवो वर्तमाने डु प्रत्ययो भवति। शं—सुख, तत्र भवति शम्भु—शकरः। संभुः—जनिता। स्वयभु.। विभु.—व्यापकः। प्रभु.—स्वामी। बहुलाधिकारात् शभुः संज्ञायाम्। अन्ये तु असंज्ञायामपि। मितद्र्वादयस्तु औणादिकाः।

६४. नी-पा-दाप्-शसु-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-नहेस्त्रट् साधने।

एभ्यो वर्तमाने साधने त्रट् प्रत्ययो भवति। नयन्त्यनेन नेत्रम्। पा—पात्र, पात्री। दाप्—दात्रम्। शसु—शस्त्रम्। यु—योत्रम्। युज्—योक्त्रम्। स्तु—स्तोत्रम्। तुद्—तोत्त्रम्। सि—सेत्रम्। सिच्—सेक्त्रम्। मिह्—मेढ्रम्। पत—पत्त्रम्। नह—नद्ध्र, नद्ध्री। टकार ईबर्थः।

६५. हलसूकरास्ये पुवः।

आस्य मुखम्। पुवो धातो वर्तमानेऽर्थे हलास्ये क्रोडास्ये च साधने त्रट् प्रत्ययो भवति। पुनाति पवते वाऽनेन पोत्रम्। हलस्य सूकरस्य च मुखमुच्यते।

६६. दशेस्त्रः।

दशे साधने कारके वर्तमाने त्र. प्रत्ययो भवति। दशन्त्यनया द्रष्ट्रा। प्रत्ययान्तरकरणमाबर्थम्।

६७. धात्री।

धयतेर्दधातेर्वा कर्मणि कारके त्रटि प्रत्यये च धात्री इति निपात्यते। धयन्ति तामिति धात्री—स्तनदायिनी। दधति तां भैषज्यार्थमिति धात्री—आमलकी।

६८. अर्ति-लू-धू-सू-खनि-सहि-वहि-चरिभ्य इत्रः।

साधन इत्यनुवर्तते। अर्त्यादिभ्यो धातुभ्यो वर्तमानेऽर्थे साधने कारके इत्र प्रत्ययो भवति। ऋच्छतीयर्ति वा अनेन अरित्रम्। लुनात्यनेन लवित्रम्। धुवत्यनेन धुवित्रम्। कुटादित्वात् न गुण.। धूनोतेरपि कश्चित्। धवित्रम्। सुवत्यनेन सवित्रम्। निरनुबन्धनिर्देशात् धूतसूङोर्न भवति। खनित्र, सहित्र, वहित्र, चरित्रम्।

६९. पुवः संज्ञायाम्।

पुवः साधने कारके वर्तमानेऽर्थे इत्रः प्रत्ययो भवति संज्ञायाम्। दर्भ. पवित्र.। बर्हिः पवित्रम्। यज्ञोपवीतं

---

१. ननु सृत्वादीनां पक्षेऽसरूपत्वात् सामान्यक्विप् भविष्यति किमनेनेत्याह।

२. भ्राजादिभ्य इति शेषः। दिद्युदादयस्तु निपातनीया एवाऽनेन सूत्रेण तेषां 'क्विप्' [५/२/७९] इत्यनेन सिद्ध्यभावात्।

पवित्रम् । ओघोपकरणं[1] पवित्रम् । पवित्रा नदी । दर्भादीनां पवित्रमिति सञ्ज्ञा ।

७०. ऋषिदेवतयोः साधनकर्त्रोः ।

पुव. साधने कारके कर्तरि च यथासङ्ख्य ऋषिदेवतयोरभिधेययो वर्तमाने इत्र प्रत्ययो भवति । ऋषौ साधने देवताया कर्तरीति विवेक । पूयतेऽनेनेति पवित्रोऽयं ऋषि । पुनाति पवते वा पवित्रोऽर्हन् स मा पुनातु ।

७१. ञीविच्छा-बोध-पूजार्थ-शील्यादिभ्यः क्तः ।

ञि इत् यस्य स ञीत् । ञीद्भ्यो धातुभ्य इच्छार्थेभ्य बोधार्थेभ्य पूजार्थेभ्यः शील्यादिभ्यश्च धातुभ्य वर्तमाने क्त प्रत्ययो भवति । पूर्ववच्चास्य[2] कर्तृकर्माद्यर्थनिर्देश । ञीत् ञिमिदा— मिन्न । क्ष्विण्ण, म्विन्न, धृष्ट, तूर्ण, सुप्त, भीत, इद्ध, तृपित, फुल्ल । इच्छार्थ—राज्ञामिष्ट, राज्ञा मत । बोधार्थ—राज्ञा बुद्ध, राज्ञा ज्ञात, राज्ञा विदित, राज्ञामवगत । पूजार्थ—राज्ञा पूजित, राज्ञामर्चित । शील्यादि—

शीलितो रक्षित क्षान्त, आक्रुष्टो जुष्ट उद्यतः ।
सयत. शयितस्तुष्टो रुष्टो रुषित आशित ॥१॥

कान्तोऽभिव्याहृतो हृष्टस्तृप्त सुप्त स्थितो भृत ।
अमृतो मुदित पूर्त, शक्तोऽक्त श्रान्तविस्मितौ ॥२॥

संरब्धारब्धदयिता, दिग्ध स्निग्धोऽवतीर्णक ।
आरूढो मूढ आयस्त, क्षुधितक्लान्तव्रीडिता ॥३॥

नत्तश्चैव तथा क्रुद्ध, श्लिष्ट मुहित इत्यपि ।
लिप्तदृप्तौ च विज्ञेयौ, सति लग्नादयस्तथा ॥४॥

बहुलाधिकारात् यथाभिधानेभ्यो भूतेऽपि क्तो भवति । तथा च तद्योगे तृतीयासमासोऽपि सिद्ध —**अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः** इति । एव शीलितो मैत्रेण, रक्षितो मैत्रेण, आक्रुष्टश्चैत्रेण इत्यादावपि द्रष्टव्यम् । वर्तमानक्ते तु षष्ठ्येव—**'कान्तो हरिश्चन्द्र इव प्रजानामिति'** । अन्य तु ञीदादिभ्य **तक्रकौण्डिन्यन्यायेन**[3] भूते क्तस्य बाधनात् वर्तमानक्तेन च योगे कर्तरि षष्ठीविधानात् त्वया ज्ञाता मया ज्ञात इत्यादिरपशब्द इति मन्यन्ते ।

७२. उणादयः ।

बहुलमित्यनुवर्तते । वर्तमानेऽर्थे वर्तमानाद् धातोरुणादय प्रत्यया बहुल भवन्ति । करोतीति कारु । वायु., पायु । बहुलवचनात् प्राय सञ्ज्ञाशब्दा केचित् तु असञ्ज्ञाशब्दा इति अनुक्ता अपि प्रत्यया भवन्ति । ऋफिड, ऋफिड्ड । तथा वर्तमाने विहिता उणादय क्वचिद् भूतेऽपि दृश्यन्ते । भसित तदिति भस्म । कषितोऽसौ कषि । ततोऽसौ तनि. । वृत्त तदिति वर्त्म । चरित तदिति चर्म । अद्भ्य सरन्ति स्म अप्सरस । उक्त च—

सञ्ज्ञासु धातुरूपाणि, प्रत्ययाश्च तत. परे ।
कार्यानुबन्धोपपद, विज्ञातव्यमुणादिषु ॥१॥

---

१ वहति प्रापयति निरवद्या सर्वमावद्यविरतिमिति अचि **'न्यङ्क्वादीनां धातवः'** [६/१/८२] इति साधु । यद्वा उङ् शब्दे ऊयते शब्द्यते उपादेयतया नाकोत्तरे **'मघाघघाघलीर्घाक्यः'** [उ० १/११०] इति घ ।

२. कर्तरि कर्मणि भावे च यथा यस्य प्रत्ययोऽभिहितस्तस्य तथैव केवल वर्तमानकाल एव ।

३. ननु **'गत्यर्थ ...'** [५/१/११] इति **'क्तक्तवतू'** [५/२/१०५] इत्यनेन च सामान्येन विधानादमीषामपि सिद्धौ इत्याह ।

तथा—

बाहुलकं प्रकृतेस्तनुदृष्टेः, प्रायसमुच्चयनादपि तेषाम् ।
कार्यसशेषविधेश्च तदूह्यं, नैगमरूढिभवं हि सुसाधु[1] ॥२॥

नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम् ।
यन्न पदार्थविशेषसमुत्थं, प्रत्ययतः प्रकृतेश्च तदूह्यम्[2] ॥३॥

ते चोणादिप्रत्ययान्ताः शब्दा उणादिपाठे द्रष्टव्याः ।

७३. रदाभ्यां क्तयोस्तस्य नो दस्य च ।

रेफान्तात् दकारान्ताच्च धातोः परस्य क्तक्तवत्वोः तकारस्य नकारादेशो भवति तत्संनियोगे धातोर्दकारस्य च नकारो भवति । पूरी—पूर्णः, पूर्णवान् । गुरी—गूर्णः, गूर्णवान् । भिद्—भिन्नः, भिन्नवान् । छिद्—छिन्नः, छिन्नवान् । रदाभ्यामिति किम् ? चितः, चितवान् । क्तयोरिति किम् ? पूर्तिः, भित्तिः । कथं चूर्णः ? चुरेरौणादिको णिः । कृतस्याऽपत्यं कार्तिरित्यत्र **असिद्धं बहिरङ्गमन्तरङ्गे**[3] इति न भवति । चरितः, उदितः इत्यत्र तु इटा व्यवधाने न स्यात् । कृतः, कृतवान् इत्यत्र तु वर्णैकदेशानां वर्णग्रहणेनाऽग्रहणान्न[4] भवति । रेफात्परेण स्वरभागेण व्यवधानाद् वा । ऋकारस्य हि मध्येऽर्धमात्रो रेफः, अग्रे पश्चाच्च तुरीयः स्वरभागः प्रतिज्ञायते[5] । कथं चीर्णः, चीर्णवानिति ? चॄ इति धात्वन्तरं चरतिसमानार्थं क्तक्तवतुविषयमामनन्ति ।

७४. संयोगादेरातो यण्वतः ।

संयोगादिर्यो धातुराकारान्तो यण्प्रत्याहारवान् तस्मात् परस्य क्तयोस्तकारस्य नकारादेशो भवति । स्त्यानः, स्त्यानवान् । निद्राणः, निद्राणवान् । ग्लानः, ग्लानवान् । संयोगादेरिति किम् ? यातः, यातवान् । आत इति किम् ? च्युतः, च्युतवान् । प्लुतः, प्लुतवान् । यण्वत इति किम् ? स्नातः, स्नातवान् । संयोगादेरिति धातोर्विशेषणादिह न भवति—निर्यातः, निर्यातवान् । निर्य्यात इत्यत्र द्वित्वेऽपि यण्वत इत्यभेदाश्रयणात् बहिरङ्गत्वेनाऽसिद्धत्वाच्च[6] न भवति ।

७५. द्वाद्योदितः ।

द्वादिभ्यो नवभ्यो धातुभ्य ओकार इद्येषां तेभ्यश्च परस्य क्तयोस्तस्य नकारादेशो भवति । दूङ्च्—दूनः, दूनवान् । षूङ्च्—सूनः, सूनवान् । दीङ्च्—दीनः, दीनवान् । धीङ्च्—धीनः, धीनवान् । मीङ्च्—मीनः, मीनवान् । रीङ्च्—रीणः, रीणवान् । लीङ्च्—लीनः, लीनवान् । डीङ्च्—डीनः, डीनवान् । व्रीङ्च्—व्रीणः, व्रीणवान् । इति द्वादयः । ओदित्—ओहाक्—हीनः, हीनवान् । ओविजी—उद्विग्नः, उद्विग्नवान् । ओप्यायी—पीनः, पीनवान् । टुओश्वि—

---

१ तनुदृष्टेः—विदुषः, तेषां उणादीनां प्रकृतेः, प्रायसमुच्चयनात् प्रायेण राशीकरणाद्, अपि—च, पुनः कार्यसशेषविधेः—कार्यस्य काक इत्यादिशब्दसिद्ध्यर्थं सूत्रानिर्माणरूपस्य विधेः सशेषत्वात्, तद्बाहुलकं—उणादिशब्दशास्त्ररूपं, ऊह्यं—विचिन्त्यम् । हि—यस्माद् बाहुलकात्, निगमः—आम्नायः, तत्र भवं—नैगमरूढिभवं च शब्दजातं, सुसाधु—सम्यक्प्रकारेण सिद्धं भवति ।

२ यन्नाम पदार्थविशेषसमुत्थं—प्रकृतिप्रत्ययसिद्धं न दृश्यते, तन्नाम ऊह्यं—विचिन्त्यम्, शकटस्य निरुक्ते—पदभञ्जनरूपे, व्याकरणे प्रत्ययतः प्रकृतेश्च, धातुजं—धातुजातं, तोकं—अपत्यं आह, शब्दकार इति शेषः । न केवलं पचत्यादिविशेष एव धातुजो भवति, किन्तु नामापि इति ।

३. आद्रूपमित्यर्थः ।

४. ऋकारलक्षणो वर्णः तस्य एकदेशो रेफो वर्णग्रहणेन न गृह्यते । कस्मात् ? असंन्निधानात् । यतो दकारः स्वतन्त्र एव वर्णोऽस्त्यस्तो रेफोऽपि स्वतन्त्र एव ग्राह्यः ।

५. पूर्वाचार्यैर्निश्चीयते न तु लेखितुं शक्यते ।

६. उपसर्गद्विपदाश्रयत्वाद् बहिरङ्गं यकारस्य द्वित्वम् ।

शून., शूनवान् । एभ्य इति किम् ? पीत:, पीतवान् ।

७६. दुग्वोर्दीर्घश्च ।

दु, गु—इत्येताभ्यां परस्य क्तयोस्तकारस्य नकारादेशो भवति धात्वोर्दीर्घश्च । दून, दूनवान् । गून., गूनवान् ।

७७. पूदिव्यञ्चिभ्यो नाशाद्यूतानपादानेषु ।

पू, दिव्, अञ्च्—इत्येतेभ्यो यथासङ्ख्य नाशेऽद्यूते अनपादाने[1] चार्थे परस्य क्तयोस्तकारस्य नकारादेशो भवति । पूना यवा.—विनष्टा इत्यर्थ. । आद्यून:, परिद्यून. । समक्नौ शकुने. पक्षौ । सगताविवर्थ. । नाशाद्यूतानपादानेष्विति किम् ? पूतं धान्यम् । द्यूत वर्तते । उदक्तमुदकं कूपात् । कथं व्यक्तम् ? अञ्जेर्भविष्यति ।

७८. सेर्ग्रासे कर्मकर्तरि ।

सिनोते. सिनाते. वा परस्य क्तयोस्तकारस्य नकारादेशो भवति ग्रासे कर्मणि कर्तृत्वेन विवक्षिते सति । सिनो ग्रास: स्वयमेव । ग्रास इति किम् ? सितं कर्म स्वयमेव । कर्मकर्तरीति किम् ? सितो ग्रासो मैत्रेण । सितो गलो ग्रासेन ।

७९. व्रश्चेः कश्च ।

व्रश्चे परस्य क्तयोस्तकारस्य नकारादेशो भवति धातो ककारोऽन्तादेशश्च । वृक्ण, वृक्णवान् । ओदित्त्वादेव नत्वे सिद्धे कत्वविधानार्थं वचनम् । क्तादेशस्य नस्य असिद्धत्वात् **'चजो: कगौ'** [२/१/११६] इत्यनेनैव कत्वे सिद्धे **'शराजभ्राजयज'''** [२/१/११७] इत्यादिना षत्वबाधनार्थं वचनम् ।

८०. क्षियो दीर्घात् ।

दीर्घात् क्षियो धातो. परस्य क्तयोस्तकारस्य नकारादेशो भवति । क्षीण., क्षीणवान् मैत्र । इदमेषां क्षीणम् । क्तयोरिति दीर्घ: । क्षीणायुर्जाल्म । क्षीणक तपस्वी । **'आक्रोशदैन्ययोर्वा'** [४/२/६६] इति वा दीर्घ । दीर्घादिति किम् ? क्षितमस्य । भावे क्त. । **'न भावकर्मणो:'** [४/२/६७] इति दीर्घप्रतिषेध । क्षित जाल्मस्य[2] । क्षित तपस्विन । कश्चित् तु भावेऽपि विकल्पमिच्छन्ति । क्षीणमनेन, क्षितमनेन । क्षेर्भावकर्मणोर्भाषायां[3] क्त एव नास्तीति कश्चित् ।

८१. नुदविन्त्युन्दत्राघ्राह्रीभ्यो वा ।

एभ्य. परस्य क्तयोस्तकारस्य नकारादेशो वा भवति तत्सनियोगे धातोर्दकारस्य च नकार. । नुन्न, नुन्नवान् । नुत्त:, नुत्तवान् । विद नमानिर्देशाद् विदङ् विचारणे इत्यस्यैव ग्रहणम् । विन्न, विन्नवान् । वित्त, वित्तवान् । विद्यतिविन्दत्योस्तु नित्यं नकार । विन्न, विन्नवान् । वेत्तेस्तु विदित, विदितवान् । उन्द—समुन्न, समुन्नवान् । समुत्त, समुत्तवान् । त्रा– त्राण त्राणवान् । त्रात:, त्रातवान् । घ्रा—घ्राण, घ्राणवान् । घ्रात, घ्रातवान् । ह्री—ह्रीण:, ह्रीणवान् । ह्रीत, ह्रीतवान् । कैश्चित् तु ध्राधातोरपि नत्व विकल्प्यते । ध्राण, ध्राणवान् । ध्रात, ध्रातवान् । ह्री इत्येतस्मादप्राप्ते अन्येभ्यस्तु प्राप्ते विकल्प. ।

८२. ॠल्वादेः क्तेश्च ।

ॠकारान्ताद् धातो. ल्वादिभ्यश्च परस्य क्तेश्चकारात् क्तयोश्च तकारस्य नकारादेशो भवति । तॄ—तीर्णि:,

---

१. कोर्थ: ? अञ्चिवाच्या क्रिया यद्यपि अपादानसाधनिका न भवतीत्यर्थ: ।

२. **'भावे वा'** [२/४/१०१] इति षष्ठी ।

३. लक्षणशास्त्रे न भवति, किंतु छन्दस्येवेत्यर्थ: ।

तीर्णः, तीर्णवान् । कॄ—कीर्णिः, कीर्णः, कीर्णवान् । गॄ—गीर्णिः, गीर्णः, गीर्णवान् । ल्वादि—लूनिः, लूनः, लूनवान् । धूनिः, धूनः, धूनवान् । लीनिः, लीनः, लीनवान् । ल्वादिषु ये ॠकारान्तास्तद्प्रभृतयस्तेषामग्रहणेनैव सिद्धे तत्र पाठः प्वादिकार्यार्थः । क्र्याद्यन्तर्गणो ल्वादिः ।

८३. न ध्या-ख्या-पॄ-मूर्च्छि-मदिभ्यः ।

एभ्यो धातुभ्य क्तेः क्तयोश्च तकारस्य यो नकारादेशः प्राप्तः स न भवति । ध्यातः, ध्यातवान् । ख्यातः, ख्यातवान् । पूर्तिः, पूर्तः, पूर्तवान् । मूर्तः, मूर्तवान् । **'राल्लोपः'** [४/३/४०] इति छकारलोपः । मत्तः, मत्तवान् । केचिदिह क्तेस्तस्य निषेधं नेच्छन्ति, तन्मते पूर्णिः ।

८४. क्षै-शुषि-पचिभ्यो म-क-वाः ।

क्षैशुषिपचिभ्य परस्य क्तयोस्तकारस्य यथासंख्यं म, क, व—इत्येते आदेशा भवन्ति । क्षामः, क्षामवान् । शुष्कः, शुष्कवान् । पक्वः, पक्ववान् ।

८५. ऋणमुत्तमर्णाधमर्णयोः ।

उत्तमर्णे अधमर्णे चार्थे ऋधातोः परस्य क्ततकारस्य नकारादेशे ऋणमिति निपात्यते । ऋणं ददाति । ऋणं धारयति । **'अधमर्णो ग्राहकः स्यादुत्तमर्णस्तु दायकः** इति **'हैमः'** [अभि० ३/५४६] । उत्तमर्णाधमर्णयोरिति किम् ? ऋतं वक्ष्यामि नाऽनृतम् ।

८६. निर्वाणमऽवाते ।

निरपूर्वाद् वाधातोः परस्य क्ततकारस्य नकारादेशे निर्वाणमिति निपात्यते अवाते कर्तरि[1]—वातश्चेन्निर्वाति-क्रियायाः कर्ता न भवति । निर्वाणो मुनिः । निर्वाणो दीपः । अवाते इति किम् ? निर्वातो वातः । निर्वातं वातेन । भावेऽपि वात एव कर्ता । निर्वाणः प्रदीपो वातेन इत्यत्र तु प्रदीपः कर्ता, वातस्तु हेतुः साधनं वेति प्रतिषेधो न भवति । केचित्तु निर्वाणं वातेन इति इच्छन्ति । तन्मते वाते कर्तरि[2] प्रत्यये सति प्रतिषेध इति द्रष्टव्यम् ।

८७. वित्तं धनप्रतीतयोः ।

विन्दतेः परस्य क्तस्य नत्वाऽभावे वित्तमिति निपात्यते धने प्रतीते चाभिधेये । विद्यते लभ्यते इति वित्तं धनम् । विद्यते उपलभ्यतेऽसाविति वित्तः प्रतीतः । धनप्रतीतयोरिति किम् ? विन्नः । वेत्तेर्विदितम् । विन्देर्विन्नं वित्तं च । विद्यतेर्विन्नम् । **'वित्तं धने प्रतीते च विन्दतेर्विन्नमन्यत्र'** ।

८८. भित्तं शकलम्

भिदेः परस्य क्तस्य नत्वाऽभावे भित्तमिति निपात्यते शकलपर्यायः चेद् भित्तशब्दो भवति । भित्तं—शकलमित्यर्थ । शकलमिति किम् ? भिन्नम् । शकलमिति पर्यायनिर्देशः किम् ? भिदिक्रियाविवक्षायां शकले विषये भिन्नमित्येव यथा स्यात् । भिन्नं शकलम्[3] । भिन्नं भित्तम्[4] ।

---

१. अकर्मकत्वात् कर्ता लभ्यते ।

२. अत्र भावे क्तः ।

३. वर्तते । किं तत् शकलम् ? किं विशिष्टं भिन्नम् ? द्विधाकृतमिति विशेषणशब्दोऽत्र भिन्नशब्दः । यदि पुनः पर्यायशब्दः स्यात् तदा शकलस्याऽप्रयोगः स्यात् । पर्यायाणां हि प्रयोगो यौगपद्येन नेष्यते इति वचनात् ।

४. भित्तं शकलमित्यर्थः ।

८९. अनुपसर्गाः फुल्लक्षीबकृशाः ।

अनुपसर्गा क्तप्रत्ययान्ता एते शब्दा निपात्यन्ते । ञिफला विशरणे इत्यस्मात् परस्य क्तस्य लादेशो भावारम्भविवक्षायामिडऽभावश्च[1] निपात्यते । फुल्ल । क्षीबृङ् मदे इत्यस्मात् कृश तनुत्वे इत्यस्माच्च परस्य क्ततकारस्य लोप इडभावश्च निपात्यते । क्षीब , कृश । अनुपसर्गा इति किम् ? प्रफुल्त[2], प्रक्षीबितः, प्रकृशित. । कथ प्रक्षीबः ? प्रगतः क्षीब इति प्रादिसमासाद् भविष्यनि । केचित् क्तवतावपि निपातमिच्छन्ति । फुल्लवान्, क्षीबवान्, कृशवान् । निपाननस्येष्टविषयत्वात् फल[3] निष्पत्तौ इत्यस्य फलित , फलितवान् ।

९०. उल्लाघोत्फुल्लसंफुल्लपरिकृशाः ।

उल्लाघादय शब्दा. सोपसर्गा क्तप्रत्ययान्ता निपात्यन्ते । उत्पूर्वात् लाघृङ् सामर्थ्ये इत्यस्मात् परस्य क्ततकारस्य लोप इडऽभावश्च निपात्यते । उल्लाघ । शेषा पूर्ववद् व्युत्पादनीया । उत्फुल्ल , सफुल्ल , परिकृश । इहापि क्तवतावपि निपातमिच्छन्ति केचित् । उल्लाघवान्, उत्फुल्लवान्, सफुल्लवान्, परिकृशवान् । फुल्लादय शब्दा. केनाऽचापि च सिध्यन्ति फुल्त इत्यादिरूपनिवृत्त्यर्थं तु वचनम् ।

---

१. अयमर्थ —यदा भावारम्भाऽविवक्षा तदा **'आदितः'** [४/३/१००] इति नित्यमिडऽभाव । यदा तु भावारम्भविवक्षा तदा **'भावारम्भयोर्वा'** [४/३/१०१] इति विकल्पेन इट् स्यात्, निपातसामर्थ्याच्च नित्य निषिध्यते ।

२ प्रफुल्ल इति तु फुल्ल विकसने इत्यस्मात् अचि सिद्धयति ।

३. उपलक्षणत्वात् फल गतावित्यस्यापि ।

चतुर्थश्चरणः

१. भविष्यति गम्यादिः ।

गम्यादयः शब्दा भविष्यति धात्वर्थे इन्नादिप्रत्ययान्ता साधवो भवन्ति । अनेन सामान्यतः सिद्धानां प्रत्ययानां भविष्यद्धात्वर्थता विधीयते । गमिष्यतीति गमी ग्रामम् । इन्नौणादिक । वर्तमाने प्राप्तो भविष्यति भवति । आगामी, भावी, प्रस्थायी—एभ्य औणादिको णिन् । प्रयायी, प्रतियायी, प्रबोधी, प्रतिबोधी, प्रतिरोधी—एभ्योऽजातौ ताच्छील्ये आवश्यके वा णिन् सिद्धो भविष्यति नियम्यते ।

२. कषेरऽनिटः क्तः ।

कषेः कृच्छ्रगहनयोरनिट्त्वमुक्तम् । अनिटः कषेर्भविष्यत्यर्थे क्तः प्रत्ययो भवति । कषिष्यतीति कष्टम् । कष्टा दिशस्तमसा । वर्तमानेऽपि कश्चित् । कषतीति कष्टम् । अनिट इति किम् ? कषिता. शत्रवः शूरेण ।

३. हेतुसिद्धौ वा ।

हेतुः कारणं, तस्य सिद्धिर्निष्पत्तिः हेतुसिद्धिः । हेतौ सिद्धौ सत्यां भविष्यत्यर्थे वर्तमानाद् धातोः क्तः प्रत्ययो भवति वा । किं ब्रवीषि वृष्टो देवः संपन्नास्तर्हि शालयः, संपत्स्यन्त इति वा । प्राप्ता नौस्तीर्णा तर्हि नदी, तरिष्यत इति वा ।

४. तुम्णकौ क्रियायां क्रियार्थायाम् ।

यस्माद् धातोस्तुमादि तद्वाच्या या क्रिया सार्थः प्रयोजनं यस्याः सा क्रियार्था । तस्यां क्रियायामुपपदे भविष्यत्यर्थे वर्तमानाद् धातोस्तुम्, णक इत्येतौ प्रत्ययौ भवतः । कर्तुं व्रजति, कारको व्रजति, भोक्तुं व्रजति । भोजको व्रजति । क्रियायामिति किम् ? भिक्षिष्ये इत्यस्य जटाः । क्रियार्थायामिति किम् ? धावतस्ते[१] पतिष्यति वासः । अत्रास्ति धावनक्रियोपपदं न त्वसौ पतनार्थमुपात्तेति न भवति । ननु **'णकतृचौ'** [५/१/५६] इति सामान्येनैव सिद्धत्वाद् वाऽसरूपविधिना सोऽपि भविष्यति, किं पुनर्णकविधानेन ? उच्यते—इह वासरूपविधिर्न प्रवर्तते इति पुनर्णकविधानं, तेनौदनस्य पाचको व्रजति, पक्ता व्रजति, पचो व्रजति, विक्षिपो व्रजतीत्यादि न भवति ।

५. भाववाचिनः ।

भाववाचिनो घञादयः प्रत्ययाः क्रियायां क्रियार्थायामुपपदे भविष्यत्यर्थे वर्तमानाद् धातोस्ते भवन्ति । क्रियार्थोपपदेन तुमा मा बाधिषतेति वचनम् । असरूपविध्यभावस्य ज्ञापितत्वात् । पाकाय व्रजति, पक्तये व्रजति । पचनाय व्रजति, पाचनायै व्रजति । वाचिग्रहणाद्[२] यो यथा विहितः स तथा भवति । **'तुमोऽर्थे भाववाचिनः'** [२/४/६८] इति

१. भिन्नकर्तृकत्वेऽपि सूत्रस्य प्रवृत्तिरिति प्राप्नोति । अत्र हि धावनक्रियाया देवदत्तः कर्ता पतनक्रियायास्तु वासः ।

२. यदि भावे इति क्रियेत तदा भावमात्र एव ये विहितास्त एव लभ्येरन्, न सर्वे । वाचिग्रहणे तु ये केचिद् भावं ब्रुवन्ति ते येन केनापि प्रकारेण भावं ब्रुवाणा गृह्यन्त एव ।

चतुर्थी।

६. कर्मण्यण्।

कर्मण्युपपदे क्रियाया क्रियार्थाया भविष्यत्यर्थे वर्तमानाद् धातोरण् प्रत्ययो भवति। कुम्भकारो व्रजति। काण्डलावो व्रजति। **'कर्मण्यऽण्'** [५/२/१] इति सामान्येन[1] विहितोऽण् णकेनाऽनेन बाध्येताऽसरूपविधिश्च नास्तीति पुनर्विधीयते। सोऽयमपवादत्वाण्णकं बाधते। परत्वात्सामान्यस्याणो बाधकान् टगादीनपि। तेन वक्रगायो व्रजति। सुरापायो व्रजति। गोदायो व्रजति। बहुलाधिकारात् णकस्यत्यादी अपि भवत। कट कारको व्रजति। ओदन भोजको व्रजति। काण्डानि लविष्यामीति व्रजति। कम्बल दास्यामीति व्रजति।

७. पद-रुज-विश-स्पृशो घञ्।

पूर्वप्रपञ्चो निवृत्त। पदादिभ्यो धातुभ्यो घञ् प्रत्ययो भवति। क्त्वाल्कर्तरि। पद्यते, पत्स्यते, अपादि, पेदे वा पाद। एवं रोग, वेश। स्पर्शो व्याधिविशेष। स्पर्शो देवदत्त कम्बलस्य। घकार क्त्वगत्वार्थ। अकारो वृद्ध्यर्थ।

८. सर्तेः स्थिर-व्याधि-बल-मत्स्येषु।

सर्तेरेषु कर्तृषु घञ् प्रत्ययो भवति। स्थिरे—सरति कालान्तरमिति सार स्थिर पदार्थ। सालसार, खदिरसार, कार्यसार। व्याध्यादौ—अतीसारो व्याधि। सारो बलम्। विसारो मत्स्य।

९. भावाऽकर्त्रोः।

भावे वाच्ये कर्तवर्जिते कारके च सर्वधातुभ्यो घञ् प्रत्ययो भवति। पचनं पाक। एवं राग, त्याग। प्रकुर्वन्ति तमिति प्राकार। एव प्राम, प्रसेव, समाहार, कार। साधनाऽधारयोरनट् तदपवादश्च हसान्तेभ्यो घञ् वक्ष्यते। दाशन्ते यस्मै स दाश। आहरन्त्यस्मादित्याहार[2]। असञ्ज्ञायामपि[3]—दायो दत्त, लाभो लब्धः। कृत कट, हृतो भार इत्यादौ बहुलाधिकारान्न भवति। अकर्त्रिति पर्युदासेन कारकाश्रयणात्संबन्धे[4] न भवति। देवदत्तस्य पच्यते। भावाकर्त्रोरिति किम्? पच। भावो भवत्यर्थ साध्यरूप क्रियासामान्य[5] धात्वर्थ स धातुनैवोच्यते तत्रैव च तिबादय क्त्वातुमसस्तव्यानीयादयश्च भवन्ति। यस्तु भावो धात्वर्थधर्म सिद्धता नाम लिङ्गसङ्ख्यायोगी स द्रव्यवद् धात्वर्थादन्य। तत्राय[6] घञादिविधि। तेन तद्योग लिङ्गवचनभेद सिद्धो भवति। पाक, पाकौ, पाका। पचन, पचने, पचनानि। पक्ति, पक्ती, पक्तय. इति।

१०. माने।

माने गम्यमाने धातोर्भावाऽकर्त्रोर्घञ् भवति। मान—इयत्ता। सा च द्वेधा—सङ्ख्या परिमाण च। एको निघास।

---

१ अनेन क्रियाया क्रियार्थायामुपपदे भविष्यत्यर्थे च विधानं पूर्वेण तु सामान्येन कर्मण्युपपद इत्यर्थ।

२. रसमित्यर्थ।

३ केचित् तु अत्र सञ्ज्ञाया इत्याहुः तन्निराकरणार्थमाह।

४ भावग्रहणाच्च। यदि भावग्रहणमपनीयाऽकर्त्तरीति कृत्वा प्रसज्यनञ् व्याख्यायते तदापि भाववत्सबन्धेऽपि घञ् स्यादिति सबन्धे घञ्निवृत्त्यर्थं भावग्रहणम्।

५ क्रियाणा साधारण रूपमित्यर्थ। तथाहि सर्वासु क्रियासु सत्त्वमिति भवत्यर्थ साधारण एव। स च धात्वर्थ। अत एव धातुनैवोच्यते स न प्रत्ययै। य पुन सिद्धता नाम स धात्वर्थस्य धर्म एव न धात्वर्थ। अत एव प्रत्ययैरेवोच्यते स न धातुना। तदुक्तं—

आख्यातसाध्यैरर्थोऽसावन्तर्भूतोऽभिधीयते।
नामशब्दाः प्रवर्तन्ते, संहृत्य इव क्रमम्॥

६. **क्रियायाः सिद्धतावस्था, साध्यावस्था च कीर्तिता।**
सिद्धतो द्रव्यमिच्छन्ति, तत्रैवेच्छन्ति घञ्विधिम्॥

द्वौ निघासौ । एकस्तण्डुलावक्षाय: । एकस्तण्डुलनिश्चाय । एक. कार: । द्वौ कारौ । त्रय. कारा । द्वौ सूर्पनिष्पावौ । समित्सग्राह । तण्डुलसग्राह: । मुष्टिरित्यर्थ. । मान इति किम् ? निश्चय. । अल एवायमपवाद: । क्त्यादिभिस्तु बाध्यते । एका तिलोच्छ्रिति. । द्वे प्रसृती ।

११. चेरऽस्तेये हस्तादेये ।

हस्तेन उपायान्तरनिरपेक्षेण आदातु प्राप्नु शक्यं हस्तादेयम् । हस्तादेये गम्यमाने चिनोतेर्भावाऽकर्त्रोर्घञ् भवति अस्तेये—न चेद् धात्वर्थ. स्तेये चौर्ये भवति । हस्तादेयशब्देन प्रत्यासत्ति प्राप्यस्य लक्ष्यते, तेन प्रत्यासत्तिविषये धात्वर्थे विधानम् । पुष्पप्रचाय । फलावचाय । फलोच्चाय । **'फलोच्चायश्च संहृत:'** । उदो नेच्छन्त्यन्ये । फलोच्चय: । हस्तादेय इति किम् ? पुष्पप्रचय करोति तरुशिखरे । अस्तेय इति किम् ? स्तेयेन पुष्पप्रचय करोति । हस्तादेयशब्देन प्रमाणमप्युच्यते । **'यद्धस्ते**[1]**' संभवति न हस्तादतिरिच्यते'** इति । ततश्च **'माने'** [५/४/१०] इति पूर्वसूत्रेणैव सिद्धे नियमार्थं वचनम् । अस्तेय एवेति, तेन पुष्पाणां हस्तेन प्रचय करोति चौर इत्यत्र पूर्वेणापि घञ् न भवति ।

१२. चिति-शरीर-निवास-राशिषु कश्चादे: ।

चीयते इति चितिर्यज्ञेऽग्निर्विशेष तदाधारो वा । चिति, शरीर, निवास, राशि—इत्येतेष्वर्थेषु चिनोतेर्भावाकर्त्रोर्घञ् भवति तत्संनियोगे धातोरादेश्च ककारादेश. । चितौ—आकायमग्नि चिन्वीत । शरीरे काय शरीरम् । निवासे—ऋषिनिकाय । राशौ—गोमयनिकाय, गोमयपरिकाय । कथ काष्ठनिचय ? बहुत्वमत्र विवक्षित न तु राशीकरणम् । चित्यादिष्विति किम् ? चय । च क इत्येव सिद्धे आदिग्रहणमादेरेव यथा स्यात्, तेन चेर्यङ्लुकि निकेचाय इत्येव भवति ।

१३. संघेऽनूर्ध्वे ।

न विद्यते कुतश्चिद् ऊर्ध्वमुर्गि किंचिद् यस्मिन् सोऽनूर्ध्व । तस्मिन् संघे प्राणिसमुदायेऽभिधेये चिनोतेर्भावाकर्त्रोर्घञ् भवति तत्संनियोगे धातोरादेश्च ककारादेश । वैयाकरणनिकाय । तार्किकनिकाय । संघे इति किम् ? सारसमुच्चय । प्रमाणसमुच्चय । अनूर्ध्वे इति किम् ? सूकरनिचय[2] । सूकरा हि उपर्युपरि चीयन्ते ।

१४. परिन्योर्नीणभ्यां द्यूताभ्रेषयो: ।

परिशब्दे निशब्दे च उपपदे यथासख्य निय इणश्च धातोर्भावाकर्त्रोर्घञ् प्रत्ययो भवति यथासख्यमेव द्यूते अभ्रेषे इत्येतयोर्गम्यमानयो. । स्थितेरचलनमभ्रेष । द्यूते—परिणायेन शारीन् हन्ति । समन्तान्नयनेन इति भाव. । अभ्रेषे—शास्त्रलोकप्रसिद्धयादिना नियतमयनं न्याय: । द्यूताभ्रेषयोरिति किम् ? कन्याया: परिणय. । न्ययं[3] गतश्चौर. ।

१५. व्युपयो. क्रमे शीङ. ।

क्रम परिपाटी । वि, उप—इत्येतयोरुपपदयो. शीङो भावाकर्त्रोर्घञ् भवति क्रमविषयश्चेद् धात्वर्थो भवति । तव राजविशाय. । मम राजोपशाय । क्रमप्राप्त पर्यायसाध्य शयनमुच्यते । अन्ये तु शयितु पर्याय[4] उच्यते इत्याहु: । क्रम इति किम् ? विशय:, उपशय. ।

---

१. हस्ते सम्मातीत्यर्थं ।

२ पूर्वेणापि न भवति व्यावृत्तिबलात्

३. नाशम् ।

४. स्वमते शयनस्य प्राधान्य तन्मते तु पर्यायस्येति तात्पर्यार्थ. ।

१६. पराविणः।

परावुपपदे क्रमविषयेऽर्थे वर्तमानादिणो भावाकर्त्रोर्घञ् प्रत्ययो भवति। तव पर्यायो भोक्तुम्। मम पर्यायो भोक्तुम्। क्रमेण पदार्थानां क्रियासंबन्धः पर्यायः। क्रम इति किम्? पर्ययः स्वाध्यायस्य। अतिक्रम इत्यर्थः। विपर्ययो मतेः। अन्यथाभवनमित्यर्थः।

१७. इङोऽपादाने तु पिद् वा।

इङो धातोर्भावाकर्त्रोर्घञ् भवति अपादाने तु कारके वा पिद् भवति। अध्ययनमध्यायः। अधीयत इति अध्यायः। उपेत्याधीयतेऽस्मात् इति उपाध्यायः। उपाध्यायी, उपाध्याया—अत्र पिद्विधानसामर्थ्यात् स्त्रिया क्तिः[1] बाध्यते।

१८. रौत्युपसर्गे।

उपसर्गे उपपदे रौतेर्धातोर्भावाकर्त्रोर्घञ् भवति। संरवणं संरावः। उपरावः, विरावः। उपसर्गे इति किम्? रवः। साराविण—इत्यत्र तु जिन् बाधकः। कथं रावः? बहुलाधिकारात्।

१९. समि द्रोः।

सम्युपपदे द्रुधातोर्भावाकर्त्रोर्घञ् भवति। संद्रावः। समीति किम्? प्रद्रवः, विद्रवः।

२०. उदि च युद्रोः।

उदि समि चोपपदे यु, द्रु—इत्येताभ्यां भावाकर्त्रोर्घञ् भवति। उद्यावः, संयावः। उद्द्रावः, संद्रावः।

२१. वाऽनुपसर्गेभ्यः।

बहुवचननिर्देशात् पूर्वसूत्रद्वयस्थिता द्रु, यु, द्रु—एते त्रयोऽप्यनुवर्तन्ते। द्रु, यु, द्रु—इत्येतेभ्योऽनुपसर्गेभ्यो भावाकर्त्रोर्घञ् प्रत्ययो वा भवति। दावः, दवः। यावः, यवः। द्रावः, द्रवः। पक्षेऽल्।

२२. श्रिनः।

अनुपसर्गात् श्रिनो भावाकर्त्रोर्घञ् भवति। श्रायः। अनुपसर्गादिति किम्? प्रश्रयः।

२३. भुवः।

अनुपसर्गाद् भुवो भावाकर्त्रोर्घञ् प्रत्ययो भवति। भावः। अनुपसर्गादिति किम्? संभवः। योगविभाग उत्तरार्थः।

२४. व्यनुप्रेषु वा।

वि, अनु, प्र—इत्येतेषूपपदेषु भुवो भावाकर्त्रोर्घञ् प्रत्ययो वा भवति। विभावः, विभवः। अनुभावः, अनुभवः। प्रभावः, प्रभवः।

२५. शो वायुवर्णावरणवृतोपकरणेषु।

शृ इत्येतस्माद् धातोर्भावाकर्त्रो वाय्वादिष्वर्थेषु घञ् प्रत्ययो भवति। शीर्यते औषधादिभिरिति शारो वायुः। मालिन्येन शीर्यते इति शारो वर्णः। निशीर्यते शीताद्युपद्रवो येन तत् नीशारः[2] आवरणम्। **गौरिवाकृतनीशारः प्रायेण**

---

१. पित्त्वस्य हि स्त्रियामीप् प्रत्ययः फलं, ततो यदि स्त्रिया क्तिर्भविष्यति तदा किं पिद्विधानेन?

२. बाहुलकात् परमप्यजन्त घं वा बाधते घञ् प्रत्ययं।

शिशिरे क्रुशः' । शीर्यते निहन्यते परस्परं येन इति शारो द्यूतोपकरणम् । वाय्वादिष्विति किम् ? शरः ।

२६. वौ क्षुश्रोः ।

वावुपपदे क्षु, श्रु—इत्येताभ्यां भावाकर्त्रोर्घञ् भवति । विक्षावः, विश्रावः । वाविति किम् ? क्षवः, श्रवः ।

२७. स्त्रः प्रथनेऽशब्दे ।

प्रथनं विस्तीर्णता । वावुपपदे स्तृ इत्येतस्माद् धातोर्भावाकर्त्रोरशब्दविषये प्रथनेऽभिधेये घञ् प्रत्ययो भवति । विस्तारः पटस्य । प्रथने इति किम् ? तृणस्य विस्तरः । छादनमित्यर्थः । अशब्दे इति किम् ? अहो द्वादशाङ्गस्य विस्तरः ।

२८. अयज्ञे प्रे ।

प्रे उपपदे स्तृ इत्येतस्मात् धातोर्भावाकर्त्रोर्घञ् प्रत्ययो भवति अयज्ञे—न चेत् यज्ञविषयः प्रयोगो भवति । प्रस्तारः, मणिप्रस्तारः, विमानप्रस्तारः, नयप्रस्तारः । अयज्ञ इति किम् ? बर्हिष्प्रस्तरः । **'समासेऽनुत्तरपदस्थस्य'** [२/२/१२] इति षत्वम् ।

२९. छन्दोनाम्नि ।

छन्दः—पद्य, वर्णविन्यास । छन्दोनाम्नि अभिधेये स्तृणातेर्भावाकर्त्रोर्घञ् भवति । विष्टारपङ्क्तिश्छन्दः[1] विष्टारबृहती छन्दः । **'वेः स्त्रः'** [२/२/२७] इति षत्वम् । आस्तारपङ्क्तिः, प्रस्तारपङ्क्तिः छन्दोनाम ।

३०. प्रे द्रुस्तुस्रुभ्यः ।

प्र उपपदे द्रु, स्तु, स्रु—इत्येतेभ्यो भावाकर्त्रोर्घञ् भवति । प्रद्रावः, प्रस्तावः, प्रस्रावः । प्रे इति किम् ? द्रवः, स्तवः, स्रवः । कथं स्रावः ? बहुलाधिकाराद् भविष्यति ।

३१. अवे नियः ।

अवे उपपदे नयतेर्भावाकर्त्रोर्घञ् भवति । अवनायः ।

३२. उदि वा ।

उदित्युपपदे नयतेर्भावाकर्त्रोर्घञ् वा भवति । उन्नायः, उन्नयः ।

३३. अनुपसर्गात् ।

अनुपसर्गान्नयतेर्भावाकर्त्रोर्घञ् प्रत्ययो वा भवति । नायः, नयः । अनुपसर्गादिति किम् ? प्रणयः ।

३४. निरभ्यौ पूल्वः ।

पू इति पूङ्पूञोः सामान्येनैव ग्रहणम् । निर्, अभि—इत्येतयोरुपपदयोर्यथासंख्यं पूलूभ्यां धातुभ्यां भावाकर्त्रोर्घञ् प्रत्ययो भवति । निष्पावः, अभिलावः । निरभाविति किम् ? पवः, लवः ।

३५. यज्ञे समि स्तोः ।

सम्युपपदे स्तौतेर्भावाकर्त्रोर्घञ् भवति यज्ञविषये । संस्तुवन्ति अत्रेति संस्तावश्छन्दोगानाम् । समेत्य स्तुवन्ति

---

१. पङ्क्त्यन्तं छन्दोनामेति वाक्यावस्थायां घञ् न, तेन विस्तारश्चासौ पङ्क्तिश्चेति कर्मधारयः । षष्ठीपञ्चमीतत्पुरुषो वा ।

छन्दोगा यस्मिन् देशे स देश: संस्ताव उच्यते । यज्ञ इति किम् ? संस्तवोऽन्यदृष्टे ।

३६. उन्न्योर्गिर: ।

उत्, नि—इत्येतयोरुपपदयो गिरतेर्गृणातेर्वा भावाकर्त्रोर्घञ् भवति । उद्गार , निगार । उन्न्योरिति किम् ? गर , सगर[1] ।

३७. किरो[2] धान्ये ।

उन्न्योरुपपदयो किरतेर्धान्यविषये धात्वर्थे वर्तमानाद् भावाकर्त्रोर्घञ् भवति । उत्कारो धान्यस्य । निकारो धान्यस्य । राशिरित्यर्थ । धान्य इति किम् ? पुष्पोत्कर , फलनिकर ।

३८. नौ वृ: ।

नावुपपदे वृणोतेर्वृणातेर्वा धान्यविशेषेऽभिधेये भावाकर्त्रोर्घञ् भवति । निव्रियन्ते इति नीवारा नाम व्रीहिविशेषा. । **'घञ्युपसर्गस्य बहुलं'** [३/२/८७] इति दीर्घत्वम् । धान्य इति किम् ? निवरा कन्या । स्वभावादऽलन्तोऽयम स्त्रिया वर्तते । क्तिस्तु बहुलाधिकारान्न भवति ।

३९. उदि पुव: ।

उद्युपपदे पूधातोर्भावाकर्त्रोर्घञ् भवति । उत्पाव । अलोऽपवाद ।

४०. श्रिनो वा ।

उद्युपपदे श्रिन्धातोर्भावाकर्त्रोर्घञ् प्रत्ययो वा भवति । उच्छ्राय , उच्छ्रय । नित्यमलि प्राप्ते विकल्प ।

४१. ग्रह: ।

उद्युपपदे ग्रहेर्धातोर्भावाकर्त्रोर्घञ् प्रत्ययो भवति । अलोऽपवाद । उद्ग्राह । उदीति किम् ? ग्रह , विग्रह ।

४२. अवन्योराक्रोशे ।

अव, नि—इत्येतयोरुपपदयोर्ग्रहेर्भावाकर्त्रोर्घञ् भवति आक्रोशे गम्यमाने । आक्रोश—शाप । अवग्राहो ह ते जाल्म ! भूयात् । निग्राहो ह ते वृषल ! भूयात् । आक्रोशे इति किम् ? अवग्रह पदस्य । निग्रहश्चौरस्य ।

४३. प्रे लिप्सायाम् ।

प्र उपपदे ग्रहधातोर्भावाकर्त्रोर्घञ् भवति लिप्साया गम्यमानायाम् । पात्रप्रग्राहेण चरति पिण्डपातार्थी भिक्षु । स्रुवस्य प्रग्राहेण चरति दक्षिणार्थी द्विज. । लिप्सायामिति किम् ? स्रुवस्य प्रग्रह । पात्रस्य प्रग्रह ।

४४. समि मुष्टौ ।

सम्युपपदे ग्रहेर्मुष्टिविषये धात्वर्थे भावाकर्त्रोर्घञ् भवति । मुष्टिरङ्गुलिसनिवेशो न परिमाणम् । तत्र **'माने'** [५/४/१०] इत्युक्तसूत्रेणैव सिद्धत्वात् । सग्राहो मल्लस्य । अहो मौष्टिकस्य सग्राह । मुष्टेर्दाढर्यमुच्यते । मुष्टाविति किम् ? सग्रह: शिष्यस्य ।

---

१. सगीर्यतेऽभ्युपगम्यते योद्धृभिर्युद्ध सगरण या नदा प्रतिज्ञा स सगर ।

२ निकारस्तिरस्कार इति तु करोतेर्घञ् ।

४५. परौ यज्ञे ।

परावुपपदे ग्रहेर्यज्ञविषये भावाकर्त्रोर्घञ् भवति । पूर्वपरिग्राहः, उत्तरपरिग्राहः । वेदेर्यज्ञाङ्गभूताया ग्रहणविशेष एताभ्यामभिधीयते । यज्ञ इति किम् ? परिग्रहः कुटुम्बिनः ।

४६. अवे वर्षविघ्ने वा ।

अवे उपपदे ग्रहेर्वर्षविघ्ने वाच्ये भावाकर्त्रोर्घञ् वा भवति । अवग्राहः, अवग्रहः । वृष्टेः प्रतिबन्ध इत्यर्थः । वर्षविघ्ने इति किम् ? अवग्रहः पदस्य । अवग्रहोऽर्थस्य ।

४७. प्रे रश्मितुलासूत्रयोः ।

प्रे उपपदे ग्रहे रश्मौ तुलासूत्रे चार्थे भावाकर्त्रोर्घञ् वा भवति । प्रगृह्यते इति प्रग्राहः, प्रग्रहः । अश्वादेः संयमनरज्जुस्तुलासूत्रं चोच्यते । अन्यस्तु प्रग्रहः ।

४८. वृगो वस्त्रे ।

प्रे उपपदे वृणोतेर्वस्त्रविशेषे वाच्ये भावाकर्त्रोर्घञ् वा भवति । प्रवृण्वन्ति तमिति प्रावारः, प्रवरः । **'घञ्युपसर्गस्य बहुलम्'** [३/२/८७] इति दीर्घः । अन्ये तु प्राङ्पूर्व एव वृणोतिः स्वभावाद् वस्त्रविशेषे वर्तते इति मन्यन्ते, तेन प्रावारः, प्रावरः इति भवति । वस्त्र इति किम् ? प्रवरो यतिः ।

४९. आङि रुप्लोः ।

वेत्यनुवर्तते । आङ्-उपपदे रु, प्लु—इत्येताभ्यां भावाकर्त्रोर्घञ् वा भवति । आरावः, आरवः । आप्लावः, आप्लवः । आङीति किम् ? विरावः, विप्लवः । रौतेर्घञि प्लवतेरलि नित्यं प्राप्ते विकल्पः ।

५०. परौ भुवोऽवज्ञाने ।

परावुपपदे भवतेरवज्ञानेऽर्थे वर्तमानाद् भावाकर्त्रोर्घञ् प्रत्ययो वा भवति । अवज्ञानमसत्कारपूर्वकोऽवक्षेपः । परिभावः, परिभवः । अवज्ञान इति किम् ? समन्ताद् भवनं परिभवः ।

५१. ॠदुवर्ण-वृ-दृ-वशि-रणि-गमि-ग्रहेरऽल् ।

ॠकारान्तेभ्य इवर्णान्तेभ्यः उवर्णान्तेभ्यो वृ इत्येवमादिभ्यश्च धातुभ्यो भावाकर्त्रोरल् प्रत्ययो भवति । घञोऽपवादः । लकारो **'मिन्मीनोऽखलचलि'** [४/२/१०६] इति विशेषणार्थः । कॄ—करः । गॄ—गरः । तॄ—तरः । दॄ—दरः । शॄ—शरः । इवर्णान्त—चयः, निश्चयः, जयः, क्षयः, क्रयः । उवर्णान्त—यवः, रवः, नवः, स्तवः, लवः, पवः । वृ—वरः । दृ—दरः, आदरः । वश्—वशः । रण्—रणः । गम्—गमः, अवगमः । ग्रह्—ग्रहः । कथं परिवारः ? ञ्यन्तादऽचि सिद्ध्यति ।

५२. वारः समूहावसरक्रियाभ्यावृत्तिषु ।

वृ इत्येतस्माद् धातोः समूहादिष्वर्थेषु भावाकर्त्रोरलि वृद्धौ च वार इति निपात्यते । वारः—समूहः अवसरः क्रियाभ्यावृत्तिश्च । पूर्वेणैव अलि सिद्धे वृद्ध्यर्थं निपातनम् ।

५३. भयादयो नपुंसके ।

भयादयः शब्दा अल्प्रत्ययान्ता नपुंसकलिङ्गे यथादर्शनं भावाकर्त्रोर्निपात्यन्ते । नपुंसके क्ताऽनडनिवृत्त्यर्थं वचनम् । भयं, वर्षं, धनं, वनं, खलं, पदं, युगम् । अत्र रथाङ्गकालविशेषयुग्मेषु अल् गत्वगुणाभावौ च निपातनात् ।

अनपुंसकक्तस्तु असरूपविधिना भवत्येव । भीतं[1] बटुना । वृष्टं मेघेन ।

५४. उपसर्गेऽदः ।

उपसर्गे उपपदे अद्धातोर्भावाकर्त्रोरल् प्रत्ययो भवति । प्रघसः, विघसः । **'अदो घस्लृ ह्यविसन्घञ्अचलस्'** [४/२/८२] इति घसादेशः । उपसर्गे इति किम् ? घासः ।

५५. न्यादो वा ।

निपूर्वाद् अदेरलि घस्लभावोऽकारस्य दीर्घत्वं च वा निपात्यते । न्यादः, निघसः ।

५६. यमः समुपनिविषु ।

सम्, उप, नि, वि—इत्येतेषूपपदेषु यमेर्भावाकर्त्रोरल् वा भवति । संयमः, संयामः । उपयमः, उपयामः । नियमः, नियामः । वियमः, वियामः ।

५७. क्वणो वैणे ।

वीणाया भवः—वैणः । **'क्वणयमहसस्वनो वा'** [५/४/७१] इति वक्ष्यमाणसूत्रेण अनुपसर्गे विधानात् उपसर्गोपपदस्यैव इह ग्रहणम् । उपसर्गे उपपदे वैणेऽर्थे वर्तमानात् क्वणेर्भावाकर्त्रोरल् वा भवति । प्रक्वणो वीणायाः । प्रक्वाणो वीणायाः । एवं निक्वणः, निक्वाणः । वैणे इति किम् ? प्रक्वाणः शृङ्खलस्य । कथं क्वणः, क्वाणो वीणायाः ? **'क्वणयमहसस्वनो वा'** [५/४/७१] इत्यादिना सामान्येन विधानात् वैणेऽपि भवति ।

५८. नौ गद-नद-पठ-स्वनश्च ।

नावुपपदे गदादिभ्यश्चकारात् क्वणेश्च भावाकर्त्रोरल् वा भवति । निगदः, निगादः । निनदः, निनादः । निपठः, निपाठः । निस्वनः, निस्वानः । निक्वणः, निक्वाणः ।

५९. संमदप्रमदौ हर्षे ।

समद, प्रमद—इत्येतौ भावाकर्त्रोर्हर्षेऽर्थे अलन्तौ निपात्येते । सम्मदः कोकिलानाम् । प्रमदः कन्यानाम् । हर्षे इति किम् ? समादः, प्रमादः । प्रसमोर्मदेर्हर्षे इत्यकृत्वा निपातनं रूपनिग्रहार्थम्, तेनोपसर्गान्तरयोगे न भवति । प्रसमादः[2], सप्रमादः, अभिसंमादः ।

६०. पणेर्माने ।

पणधातोर्मानेऽर्थे वर्तमानाद् भावाकर्त्रोरल् भवति । मूलकपणः, शाकपणः । पण्यत इति पणः, मूलकादीनां सव्यवहारार्थं परिमितो मुष्टिरित्यर्थः । माने इति किम् ? पाणः । घञोऽपवादो योगः ।

६१. समुदोरजः पशौ ।

सम्, उत्—इत्येतयोरुपपदयोरजतेर्धातोः पशावर्थे वर्तमानात् भावाकर्त्रोरल् प्रत्ययो भवति । समजः पशूनाम् । समूह इत्यर्थः । उदजः पशूनाम् । प्रेरणमित्यर्थः । समुदोरिति किम् ? व्याजः पशूनाम् । पशाविति किम् ? समाजः साधूनाम् । उदाजः खगानाम् ।

---

१. अत्र भावे **'अकर्मकात् कृत्यक्तखलर्थाः'** [५/१/२२] इति क्तः ।

२. प्रकृष्टः संमद इति कृते प्रसम्मद इत्यपि ।

६२. सृग्लहेः प्रजनाक्षे ।

सर्तिग्लहिभ्यां यथासङ्ख्य प्रजने अक्षे च धात्वर्थे भावाकर्त्रोरल् भवति । गवामुपसरः । पशूनामुपसरः । वीनामुपसरं दृष्ट्वा । प्रजनो गर्भग्रहणम् । तदर्थं स्त्रीषु पुंसां प्रथमं सरणमुपसर उच्यते । अक्षाणां ग्लहः । ग्रहणमित्यर्थः । ग्रहेः सूत्रनिपातनाल्लत्वम् । ग्लहिः प्रकृत्यन्तरं वा । प्रजनाक्षे इति किम् ? उपसारो भृत्यै राज्ञाम् । पादस्य ग्रहः । कथं परिसरविषमेषुलीढमुक्तौ ? आधारे पुंसि सञ्ज्ञायां घेन सिद्धम् ।

६३. ह्वः संप्रसारणं चाऽभ्युपनिविषु ।

अभि, उप, नि, वि—इत्येतेषूपपदेषु ह्वयतेर्धातोर्भावाकर्त्रोरल् प्रत्ययो भवति धातोर्वकारस्य संप्रसारण च । अभिहवः, उपहवः, निहवः, विहवः । अभ्युपनिविष्विति किम् ? प्रह्वायः । ह्व इति किम् ? निवायः । ह्वो हव इत्यनिपातनं किम् ? यङ्लुकि निपातन मा भूत्, तेन विजोहवः[1] इति सिद्धम् । अन्यथा विहव इति स्यात्[2] । जुहोतिनैव सिद्धे ह्वयते रूपान्तरनिवृत्त्यर्थं वचनम् ।

६४. आङि युद्धे ।

आङुपपदे ह्वयतेर्युद्धेऽर्थे भावाकर्त्रोरल् भवति धातोः संप्रसारण च । आहूयन्ते योद्धारोऽस्मिन्नित्याहवो युद्धम् । युद्ध इति किम् ? आह्वायः, आह्वानम् ।

६५. निपानमाहावः ।

निपिबन्त्यस्मिन् तन्निपान—पशुपक्षिणां पानार्थं कृतो जलाधारः । आङ्पूर्वात् ह्वयतेर्भावाकर्त्रोरल् आहावादेशश्च निपात्यते निपानं चेदभिधेय भवति । आहूयन्ते पानाय पशवोऽस्मिन्नित्याहावः पशूनाम् । आहावः शकुनीनाम् । निपानमित्यर्थः । निपानमिति किम् ? आह्वायः, आह्वानम् ।

६६. आह्वयो नाम्नि ।

आङ्पूर्वात् ह्वयतेर्भावाकर्त्रोरल् ह्वयादेशश्च निपात्यते नाम्न्यभिधेये । आह्वयो नाम ।

६७. समाह्वयो द्यूते ।

समाङ्पूर्वात् ह्वयतेर्भावाकर्त्रोरल् ह्वयादेशश्च निपात्यते द्यूतेऽभिधेये । समाह्वयः—प्राणिद्यूतम् ।

६८. भावेऽनुपसर्गात् ।

अनुपसर्गात् ह्वयतेर्भावेऽल् प्रत्ययो भवति धातोः संप्रसारणं च । ह्वानं हवः । भाव इति किम् ? कर्मणि ह्वायः । अनुपसर्गादिति किम् ? आह्वायः । अकर्तरीत्यस्यानुप्रवेशो मा भूदिति भावग्रहणम् ।

६९. हनो वा वध च ।

अनुपसर्गाद् हन्तेर्भावेऽल् प्रत्ययो वा भवति तत्संनियोगे चास्य वधादेशः । हननं वधः[3] । घातः । अनुपसर्गादिति किम् ? संघातः ।

---

१. भृशं विह्वयति । यङ्लुक्, 'ह्वित्वे' [४/४/१७] इति संप्रसारणम् । विजोहवनम् । अनेनाल् ।

२. प्रकृतिग्रहणे इति न्यायात् यङ्लुगन्तस्याप्यनेनाऽल्नि ह्वो हव इति कृतद्वित्वस्यापि निपाते विहव इति स्यादित्यर्थः ।

३. यङ्लुगन्तस्यापि वधो घात इत्येव भवति ।

७०. व्यध-जप-मद्भ्यः ।

भाव इति निवृत्तम् । एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् भवति । व्यध , जप , मद । अनुपसर्गादिति किम् ? आव्याधः, उपजापः, उन्मादः ।

७१. क्वण-यम-हस-स्वनो वा ।

एभ्योऽनुपसर्गेभ्यो भावाकर्त्रोरल् वा भवति । क्वण , क्वाण । यम , याम. । हस , हास । स्वन , स्वान. । अनुपसर्गादिति किम् ? प्रक्वाणः, प्रयाम., प्रहास , विस्वाण । अप्राप्तविभाषेयम् ।

७२. हनः प्रघणप्रघाणौ गृहैकदेशे ।

प्रपूर्वाद् हन्तेर्भावाकर्त्रोरल् प्रत्ययो घणघाणौ चादेशौ निपात्येते गृहैकदेशेऽभिधेये । प्रघण प्रघाणो वा द्वारप्रकोष्ठः । गृहैकदेशे इति किम् ? प्रघातोऽन्य ।

७३. अन्तर्घनान्तर्घणौ देशे ।

अन्तःपूर्वाद् हन्तेरल् प्रत्ययो घनघणौ चादेशौ निपात्येते भावाकर्त्रोर्देशेऽभिधेये । अन्तर्हण्यतेऽस्मिन्निलयन्तर्घन. अन्तर्घणो वा वाहीकेषु देशविशेष. । अन्तर्घातोऽन्यः । एके तु अन्त महतां देशोऽन्तर्घन । अभ्यन्तरो देश इति केचित् । तस्मिन्नन्तर्घणेऽपश्यत् । घणि प्रकृत्यन्तरमित्यन्ये ।

७४. निघोद्घसंघोद्घनापघनोपघ्ना निमितप्रशस्तगणात्याधानाङ्गासन्नेषु ।

हन्तेर्निघादय. शब्दा यथासख्य निमितादिषु वाच्येषु कृतघत्वादयोऽलन्ता निपात्यन्ते । समन्ततो मित तुल्यमविशेषेण वा मितं परिच्छिन्न निमितम् । तुल्यारोहपरिणाहमित्यर्थ । निर्विशेष निश्चयेन वा हन्यन्ते ज्ञायन्ते निघा वृक्षा । निघा शालय । निघा बृहतिका । निघ वस्त्रम् । निघातोऽन्य । उत्कर्षेण हन्यते ज्ञायते उद्घ प्रशस्त । उद्घातोऽन्यः । गण प्राणिसमूह । सहति सघ । अन्यत्र सघात । कथं सघातो मनुष्याणाम् ?[1] सघातशब्द समुदायमात्रे । अत्याधीयन्ते छेदनार्थ कुट्टनार्थ च काष्ठादीनि यत्र तदत्याधानम् । उद्धन्यतेऽस्मिन्निति उद्घन । काष्ठोद्घन , ताम्रोद्घन , लोहोद्घन । उद्घातोऽन्य । अङ्ग शरीरावयव । अपहन्यतेऽनेनेति अपघनोऽङ्गम् । व्रणिभिरपघनैर्घर्घराव्यक्तघोषान् । पाणि. पादश्चापघनो नापरमङ्गमित्यन्ये । अपघातोऽन्य । उपहन्यते समीप इति ज्ञायते उपघ्न आसन्न । गुरूपघ्न , ग्रामोपघ्न । उपघातोऽन्य । निपातनादेवोपात्तार्थविशेषे[2] वृत्तिरसरूपप्रत्ययबाधन च विज्ञायते ।

७५. मूर्तिनिरन्तरमेघेषु घनः ।

हन्तेर्मूर्त्यादिष्वर्थेषु अल् प्रत्ययो घनादेशश्च निपात्यते । मूर्ति काठिन्यम् । दधिघन , लोहघन । निरन्तरे— घना केशा । घना व्रीहय । मेघे—घनोऽभ्रम् । कथ घन दधि ? उच्यते—गुणाशब्दोऽय, तद्योगाद् गुणिन्यपि वर्तते । यथा धर्मशब्देन धर्मी अप्युच्यते ।

७६. साधनेऽयोविद्रुषु ।

अयस्, वि, द्रु—इत्येतेषूपपदेषु हन्तेः साधने कारके अल् प्रत्ययो घनादेशश्च निपात्यते । भावस्य कारकान्तरस्य चानुप्रवेशो मा भूदिति साधनग्रहणम् । अयो हन्यतेऽनेनेति अयोघन । विहन्यतेऽनेन तिमिर विघन । विघनेन्दुसमद्युतिः । वय पक्षिणो हन्यन्तेऽनेनेति वा विघन । द्रु हन्यतेऽनेनेति द्रुघन —कुठार । कथं द्रुघण ? अरीहणादिपाठाणत्वे भविष्यति ।

---

१. नन्वत्र प्राणिसमूहत्वात् निपात कथ न ? सत्यम् । सघातशब्द प्रसाध्य पश्चात् मनुष्यशब्देन सम्बन्धः ।

२. ननु निघादिशब्दानां निमितादार्थविशेषे कथ वृत्ति कथमाधारादौ असरूपविधिनाऽनडादयश्च न भवन्तीत्याह—निपातनादेवेति । अन्यथा निमितात्याधानादिषु विशेषार्थप्रतीतिम्तुल्यारोहपरिणाहादिका न स्यात् ।

घणतेर्वाऽजन्तस्य रूपम् । स्त्रिया त्वनडेव परत्वात् । अयोहननी, विहननी, द्रुहननी ।

७७. स्तम्बे घ्नश्च ।

स्तम्बशब्दे उपपदे हन्तेरल् साधने कारके घ्नघनादेशौ च निपात्येते । स्तम्बो हन्यतेऽनेनेति स्तम्बघ्नो दण्ड । स्तम्बघनो यष्टि । स्त्रियां परत्वादऽनडेव । स्तम्बहननी यष्टि । केचित् तु कप्रत्ययं निपातनं कृत्वा स्त्रियामपि स्तम्बघ्नेति इच्छन्ति । अन्ये तु स्तम्बपूर्वस्यापि हन्ते **'सातिहेतियूति…'** [५/४/९०] इति निपातनात् स्तम्बहेतिरितीच्छन्ति । साधने इति किम् ? स्तम्बहनन स्तम्बघात. । कथं स्तम्बघ्नीषीका ? साधनस्यापि कर्तृत्वविवक्षया **'अचित्ते टक्'** [५/२/१२] इति अनेन टकि सिद्धम् ।

७८. परौ घः ।

परावुपपदे हन्तेरल् घादेशश्च साधने कारके निपात्यते । परिहण्यतेऽनेनेति परिघोऽर्गला । लत्वे पलिघ. ।

७९. स्थादिभ्यः कः ।

साधन इति निवृत्तम् । स्थादिभ्यो धातुभ्यो भावाकर्त्रो क प्रत्ययो भवति । आखूनामुत्थान आखूत्थो वर्तते । शलभोत्थो वर्तते । प्रतिष्ठन्त्यस्मिन्निति प्रस्थ सानु । सतिष्ठन्तेऽस्यामिति सस्था । व्यवतिष्ठन्तेऽनयेति व्यवस्था । प्रस्नात्यस्मिन्निति प्रस्न । प्रपिबन्त्यस्यामिति प्रपा । विध्यतेऽनेनेति विध । आविध्यतेऽनेनेति आविध । विहन्यतेऽनेनास्मिन् वा विघ्न[1] । आयुध्यन्तेऽनेनेति आयुधम् । आध्यायन्ति तमिति आढ्य । पृषोदरादित्वात् ध्यस्य ढ । सर्वापवादत्वादऽनटमपि कप्रत्ययो बाधते । कथमाव्याध , घात , विघात , उपघात. ? बहुलाधिकारात् । स्थादयो यथाप्रयोग द्रष्टव्या ।

८०. ट्वितोऽथुः ।

ट इत् यस्य स ट्वित् । ट्वितो धातोर्भावाकर्त्रोरथु. प्रत्ययो भवति । वेपथु , वमथु , श्वयथु , याचथु , स्फूर्जथु , भ्रासथु , नन्दथु , क्षवथु , दवथु । असरूपत्वात् घञलावपि । वेप , क्षव ।

८१. ड्वितस्त्रिमक् तत्कृते ।

तेन धात्वर्थेन कृत तत्कृतम् । ड्वितो धातोर्भावाकर्त्रोस्त्रिमक् प्रत्ययो भवति तत्कृतेऽर्थे । पाकेन निर्वृत्त[2]— पक्त्रिमम् । कृत्रिम, लब्धिम, विहित्रिम, याचित्रिमम् । ककार कित्कार्यार्थ ।

८२. यजि-रक्षि-यति-प्रच्छि-स्वपो नः ।

एभ्यो धातुभ्यो भावाकर्त्रोर्न. प्रत्ययो भवति । यज्ञ , रक्ष्ण , यत्न , प्रश्न , स्वप्न. ।

८३. विच्छो नङ् ।

विच्छेर्भावाकर्त्रोर्नङ् प्रत्ययो भवति । विश्न । ङकारो गुणप्रतिषेधार्थ ।

८४. उपसर्गेऽपिद्दाधः किः ।

उपसर्गे उपपदे पिद्वर्जिताभ्या दाधाभ्या भावाकर्त्रो कि प्रत्ययो भवति । कित्करणमाकारलोपार्थम् । आदि , प्रदि., आधि , प्रधि , निधि , उपनिधि , सधि , समाधि । अन्तर्द्धि —**'अन्तर्णत्वङकिषु'** [१/१/४३] इति उपसर्गत्वम् ।

---

१. स्थादिगणपाठबलात् साधनेऽपि क. प्रत्ययो न तु **'साधनेऽशोबिव्रुष'** [५/४/७६] इत्यनेनाल् ।

२. अन्तर्भूतण्यर्थत्वात् निर्वर्तितमित्यर्थ । यदा तु कृतमित्येव वार्थ तदा कर्मकर्तरि क्त. ।

८५. कर्मण्याधारे ।

कर्मण्युपपदे पिद्वर्जिताभ्यां दा, धा—इत्येताभ्यां आधारे कारके किः प्रत्ययो भवति। जलं धीयतेऽस्मिन्निति जलधिः। शरधिः, इषुधिः, वालधिः, शेवधिः[1]। आधारग्रहणमर्थान्तरनिषेधार्थम्।

८६. अभिव्याप्तौ भावेऽनञिनौ।

क्रियया स्वसंबन्धिनः साकल्येनाभिसंबन्धः अभिव्याप्तिः। तस्यां गम्यमानायां धातोर्भावे अन, ञिन्—इत्येतौ प्रत्ययौ भवतः। समन्ताद् रावः संरवणं, साराविणं[2] वा सेनायां वर्तते। संकुटनं सांकोटिनं वा गृहाम्। अभिव्याप्ताविति किम्? संरावः, संकोटः। भावग्रहणं कर्मादिप्रतिषेधार्थम्। असरूपविधिना[3] क्तघञादिनिवृत्त्यर्थमनग्रहणम्।

८७. स्त्रियां क्तिः।

स्त्रियामिति प्रत्ययार्थविशेषणम्। धातोर्भावाकर्त्रोः स्त्रीलिङ्गे क्ति प्रत्ययो भवति। घञादेरपवादः। कृतिः, हृतिः, चितिः, नीतिः, नुतिः, भूतिः। स्त्रियामिति किम्? कारः, चयः।

८८. श्वादिभ्यः।

शृणोत्यादिभ्यो धातुभ्यः स्त्रीलिङ्गे भावाकर्त्रोः क्तिर्भवति। वक्ष्यमाणैः क्विबादिभिः सह समावेशार्थं वचनम्। श्रु—श्रुतिः, प्रतिश्रुत्। पद्—संपत्तिः, संपद्। स्तु—स्तुतिः, प्रतिस्तुत्। सद्—आसत्तिः[4], संसद्, उपनिषद्, निषद्या। विद्—संवित्तिः, संवित्, विद्या, वेदना। लभ्—लब्धिः, लभा। अर्द—अभ्यर्दितिः, अर्दिका। शंस्—प्रशस्तिः, प्रशंसा। पच्—पक्तिः, पचा। कण्डूय—कण्डूतिः, कण्डूः, कण्डूया। व्यवक्रुश्—व्यवक्रुष्टिः, व्यावक्रोशी। इष्—इष्टिः, इच्छा। यज्—इष्टिः, इज्या। मन्—मतिः, मन्या। आस्—आस्या, उपास्तिः, उपासना। शास्—अनुशिष्टिः, आशीः। भृञ्—भृतिः, भृत्या। स्तूयते, इज्यते, इष्यतेऽनयेति स्तुतिः, इष्टिः, इष्टिः। इष्टिरिति संज्ञाशब्दत्वात् साधनेऽपि क्तिरेव नाऽनट्। एवं स्तुतिः। अन्यत्र तु स्पर्धे **परत्वात् स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ** इति न्यायः।

८९. समिणासुनः।

संपूर्वात् इणः आङ्पूर्वात् सुनोतेश्च भावाकर्त्रोः स्त्रियां क्तिर्भवति। क्यपोऽपवादः। समितिः, आसुतिः। समाङोऽन्यत्र इत्या[5], सुत्या इति क्यबेव भवति।

९०. साति-हेति-यूति-जूति-ज्ञप्ति-कीर्तयः।

एते शब्दा भावाकर्त्रोः क्तिप्रत्ययान्ता निपात्यन्ते। सिनोतेः सुनोतेः स्यतेर्वा आत्वमित्वाभावश्च निपात्यते। सातिः। हिनोतेर्गुणे हन्तेर्वा टे एत्वे हेतिः। यौतेर्जवतेश्च दीर्घत्वे यूतिः, जूतिः। ज्ञपयतेर्ज्ञप्तिः। कीर्तयतेः कीर्तिः। आभ्यां ण्यन्तलक्षणोऽनो न भवति। कीर्तनेत्यपि कश्चित्।

९१. गापापचो भावे।

एभ्यो भावेऽर्थे स्त्रियां क्तिर्भवति। गा इति सामान्येन ग्रहणम्। प्रगीतिः, संगीतिः। पा इति गापचिसाहचर्यात्

---

१ शेवं स्थाप्यधनं तद्धीयतेऽस्मिन्।

२ **'ञिनो नित्यं'** [७/४/९१] इति स्वार्थे ताद्धितोऽण्।

३ अयमर्थो यदि असरूपन्यायेनानट् भविष्यति तदाऽनग्रहणं न क्रियते। यथा हि अनट् तथा असरूपविधिनैव क्तघञावपि प्राप्नुतः तौ मा भूतामित्यनग्रहणम्।

४ उपसर्गाणामतन्त्रत्वात् श्रमदादिभ्य क्तिक्विबादयोऽप्यनुज्ञाताः।

५. **'समजनिपन्निषदशीङ्सुञ्विदिचरिमनीणः'** [५/४/९५] इति क्यप्।

पिबतेर्ग्रहणम्[1]। प्रपीतिः[2], सपीतिः, पक्तिः, प्रपक्तिः। भावग्रहणमर्थान्तरनिरासार्थम्। बाधकस्य ङस्याऽपवादः[3]।

९२. स्थो वा।

तिष्ठतेर्भावेऽर्थे स्त्रियां क्तिर्वा भवति। प्रस्थितिः, उपस्थितिः। पक्षे ङः। आस्था, व्यवस्था, संस्था। पूर्ववत् ङस्याऽपवादः।

९३. आस्यटिव्रजियजः क्यप्।

एभ्यः परो भावेऽर्थे स्त्रियां क्यप्[4] प्रत्ययो भवति। आस्—आस्या। अट्—अट्या। वृथाट्या खलु सा तस्याः। व्रज्—व्रज्या। यज्—इज्या। ककारः कित्कार्यार्थः। पकार उत्तरत्र तु गागमार्थः।

९४. भृगः संज्ञायाम्।

भृगः परो भावेऽर्थे स्त्रियां क्यप् प्रत्ययो भवति संज्ञायां विषये। भरणं भृत्या। संज्ञायामिति किम्? भृतिः। भाव इति किम्? भ्रियत इति भार्या वधूः।

९५. समज-निपन्निषद-शीङ्-सुन्-विदि-चरि-मनीणः।

योगविभागाद् भाव एवेति निवृत्तम्। एभ्यः परो भावाकर्त्रोः स्त्रियां क्यप् प्रत्ययो भवति संज्ञायां विषये। समजन्त्यस्यामिति समज्या। निपन्निषदेति संहितानिर्देशात् पते पदेश्च ग्रहणम्। निपतन्त्यस्यामिति निपत्या। निपद्या। निषीदन्त्यस्यामिति निषद्या। शेरतेऽस्यामिति शय्या। सुन्वन्त्यस्यामिति सुत्या। वेदन विदन्ति तस्या तया वा हिताहितमिति विद्या[5]। चरणं चरन्ति अनयेति वा चर्या। मननं मन्यतेऽनयेति वा मन्या। अयनमेति अनयेति वा इत्या। संज्ञायामिति किम्? सवीतिः, निपत्तिः, निषत्तिः।

९६. कृगः शिवन् च वा।

करोतेर्भावाकर्त्रोः स्त्रियां शिन्संज्ञकोऽन् प्रत्ययो वा भवति। चकारात् क्यप् च। शित्त्वाद्यक्। क्रिया, कृत्या। पक्षे कृतिः। क्रियेति यदा भावकर्मणोरन् तदा मध्ये यक्। यदा त्वपादानादौ अन् तदा यग् नास्तीति रिरिकारस्य इयादेशः।

९७. मृगयेच्छा-याञ्चा-तृष्णा-कृपा-भाः।

एते शब्दाः स्त्रियां निपात्यन्ते। तत्रेच्छा भाव एव, शेषास्तु भावाकर्त्रोः। अन्ये तु सर्वान् भावे एवानुमन्यन्ते। मृगयतेः अन् अप् च यगऽपवादो निपात्यते। मृगया। इच्छतेः अन् यगऽभावश्च—इच्छा। याचितृष्योः नन्ङौ—याञ्चा, तृष्णा[7]। कृपेर्ङः रेफस्य च ऋकारः। कृपा। भातेर्ङः—भा।

९८. परौ सृचरेर्यः।

परावुपपदे सृचरिभ्यां परः स्त्रियां भावाकर्त्रोर्यः प्रत्ययो भवति। भाव इत्यन्ये। परिसर्या, परिचर्या।

---

१. पायतेस्तु लाक्षणिकत्वात् न ग्रहः।

२. भावेऽनेन क्तिरेव आधारे तु 'स्थादिभ्यः कः' [५/४/७९] इति कः। अपादाने तु 'आत उपसर्गे' [५/४/१०६] इति ङः।

३. वक्ष्यमाणः 'आत उपसर्गे' [५/४/१०६] इत्यनेन विहितस्य।

४. अस्य क्यपो न कृत्यसंज्ञा प्रकरणात् तत्र विहितस्यैव भवति।

५. पूर्ववत्संज्ञाशब्दत्वात् आधारेऽपि क्यप्।

६. संज्ञाशब्दत्वात् आदादिकस्यैव विदेर्ग्रहणं न तु अन्यस्य।

७. केचित् तु भिदादित्वात् तृषा। स्वमते तु संपदकुधादित्वात् तृट्।

पराविति किम् ? ससृतिः, चूर्तिः ।

९९. अटाट्याद् वा ।

अटतेर्यङन्तात् स्त्रिया भावाकर्त्रोर्यः प्रत्ययो वा भवति । भाव इत्यन्ये । अटाट्या । पक्षे अ प्रत्यय । अटाटा । अन्ये तु क्तिप्रत्ययबाधनार्थमयङन्तस्याऽटते यप्रत्यय द्विर्वचनं पूर्वदीर्घत्व च निपातयन्ति । अटनमटाट्या ।

१००. जागुरश्च ।

जागर्तेः स्त्रियाम प्रत्ययो यश्च भवति भावाकर्त्रो । भाव इत्यन्ये । जागरा, जागर्या ।

१०१. शंसिप्रत्ययात् ।

शसे. प्रत्ययान्तेभ्यश्च धातुभ्यो भावाकर्त्रो स्त्रियाम. प्रत्ययो भवति । प्रशसा, गोपाया, ऋतीया, मीमासा, कण्डूया, लोलूया, चिकीर्षा, पुत्रकाम्या, पुत्रीया, गवा, गल्भा, श्येनाया, पटपटाया । शसु क्तेऽनिट्[1] इति वचनम् ।

१०२. क्तेटो गुरोर्हसात् ।

क्तस्येट्[2] यस्मात् स क्तेट् । क्तेटो गुरुमतो हसान्ताद् धातोर्भावाकर्त्रो स्त्रियाम प्रत्ययो भवति । ईहा, ऊहा, ईक्षा, उक्षा, कुण्डा, हुण्डा, शिक्षा, भिक्षा, व्यतीहा[3], व्यतीक्षा । क्तेट इति किम् ? स्रग्नि, स्रस्ति, आप्ति, दीप्ति, अक्ति, राद्धि । चाय्—अपचिति । स्फुर्छा—स्फूर्ति । मुर्छा—मूर्ति । गुरोरिति किम् ? स्फुर् स्फूर्ति । निपठिति । हसादिति किम् ? सशीतिः ।

१०३. षितो ङः ।

षिद्भ्यो धातुभ्यो भावाकर्त्रो स्त्रिया ङ प्रत्ययो भवति । पचा, क्षमा । क्षान्तिरिति तु क्षाम्यते[4] । घटा, त्वरा, प्रथा, व्यथा, जरा । **'ऋवर्णदृशोङि'** [४/२/१०] इति गुण । ङकारो ङित्कार्यार्थ ।

१०४. भिदादयः ।

भिदादयः शब्दा भावाकर्त्रो स्त्रिया ङप्रत्ययान्ता यथादर्शन निपात्यन्ते । भिदा विदारणम् । छिदा द्वैधीकरणम् । विदा विचारणा । मृजा शरीरसस्कार । निपातनसामर्थ्यादेव **'ऋतः स्वरे वा'** [४/२/१६] इति वृद्धिर्न भवति । क्षिपा प्रेरणम् । दया अनुकम्पा । रुजा रोग । चुरा चौर्यम् । पृच्छा प्रश्न । एतेऽर्थविशेषे । अन्यत्र भित्ति कुड्य, छित्तिश्चौर्यादिकरणाद् राजापराध , विच्छित्ति प्रकार इत्यादि । आकृतिगणोऽयम् ।

अकृतस्य क्रिया चैव, प्राप्तेर्बाधनमेव च ।
अधिकार्थविवक्षा च, त्रयमेतन्निपातनात् ।।

१०५. कुहि-गुहि-वशि-वपि-तुलि-क्षपि-क्षिभ्यः संज्ञायाम् ।

एभ्यो भावाकर्त्रो स्त्रियां ङ प्रत्ययो भवति सज्ञाया विषये । कुहा नाम नदी । कुहनान्या । गुहा पर्वतकन्दरा औषधिश्च । गूढिरन्या । वशा स्नेहनद्रव्य धातुविशेषश्च । उष्टिरन्या । वपा मेदोविशेष । उप्तिरन्या । एव तुला उन्मानम् ।

---

१. क्ते सेड्भ्यस्तु उत्तरेणैव भविष्यति ।

२ क्तस्य इडेव यस्मात् इति अवधारण कार्य, तेन स्फुर्च्छादिषु धातुषु यद्यपि भावारम्भयो क्तस्य विकल्पेन इट् विहितस्तथापि एकस्मिन् पक्षे नागच्छतीति व्यावृत्ति. ।

३. 'व्यतिहारेऽनीहादिभ्यः' [५/४/११६] इत्यत्र ईहादिवर्जनात् क्यादीनामपवादोऽपि ञो न भवति ।

४ क्षमूष् सहने इति दैवादिकस्य ।

क्षपा रात्रि.। क्षिया आचारभ्रंश ।

१०६. रिखि-लिखि-शुभि-सिधि-मिधि-गुधिभ्यो गुणश्च ।

एभ्यो भावाकर्त्रो स्त्रियां ङः प्रत्ययो भवति तद्योगे धातोर्गुणश्च संज्ञायां विषये । रिखिः लिखेः समानार्थः सौत्रो धातु. । रेखा राजि । लेखा सैव । शोभा कान्ति । सेधा सत्वम् । मेधा बुद्धिः । गोधा प्राणिविशेषः दोस्त्राणं च ।

१०७. ऋ-कृ-हृ-धृ-तृभ्यो वृद्धिश्च ।

एभ्यो भावाकर्त्रो स्त्रियां ङः प्रत्ययो भवति तद्योगे धातोर्वृद्धिश्च संज्ञायां विषये । आरा शस्त्री । ऋतिरन्या । कारा गुप्ति । कृतिरन्या । हारा मानम् । हृतिरन्या । धारा प्रपात खड्गादेर्वा । धृतिरन्या । तारा ज्योति । तीर्णिरन्या ।

१०८. भीषि-भूषि-चिन्ति-पूजि-कथि-कुम्बि-चर्चि-स्पृहि-तोलि-दोल्यूनि-चूडि-पीडिभ्यः ।

एभ्यो ञ्यन्तेभ्यो भावाकर्त्रो स्त्रियां ङ. प्रत्ययो भवति । ञ्यन्तत्वाद् वक्ष्यमाणेऽने प्राप्ते वचनम् । भीषा, भूषा, चिन्ता, पूजा, कथा, कुम्बा, चर्चा, स्पृहा, तोला, दोला, ऊना, चूडा, पीडा ।

१०९. आत उपसर्गे ।

उपसर्गे उपपदे आकारान्तेभ्यो धातुभ्यो भावाकर्त्रो स्त्रियां ङः प्रत्ययो भवति । प्रदा, उपदा, प्रधा, उपधा, आधा, विधा, सधा । श्रद्धा—'श्रद्धाकृनोः' [१/१/४२] इति उपसर्गत्वम् । अन्तर्धा—'अन्तर्णत्वङकिषु' [१/१/४३] इति उपसर्गत्वम् । उपसर्गे इति किम् ? दत्ति ।

११०. माभाभ्यां वा ।

उपसर्गे उपपदे मातिभातिभ्या भावाकर्त्रो. स्त्रियां ङ प्रत्ययो वा भवति । उपमा, उपमिति., प्रमा, प्रमितिः । आभा, आभाति , प्रभा, प्रभाति ।

१११. त्रि-श्रन्थि-ग्रन्थि-वन्दि-कीर्ति-घट्टि-वेत्त्यासिभ्योऽनः ।

ञ्यन्तेभ्य श्रन्थ्यादिभ्यश्च धातुभ्यो भावाकर्त्रो. स्त्रियामन प्रत्ययो भवति । कारणा, हारणा, कामना, लक्षणा, भावना । श्रन्थना, ग्रन्थना, वन्दना, कीर्तना, घट्टना, वेदना, आसना, उपासना । वेत्तीति तिब्निर्देशो ज्ञानार्थपरिग्रहार्थः[१] ।

११२. इषोऽनिच्छायाम् ।

इषेरनिच्छाया वर्तमानात् भावाकर्त्रो. स्त्रियामन. प्रत्ययो भवति । एषणा, अन्वेषणा, गवेषणा, पिण्डैषणा । अनिच्छायामिति किम् ? इष्टि । कथ प्राणैषणा, वित्तैषणा, परलोकैषणा ? बहुलाधिकाराद् भविष्यति ।

११३. अधिपरौ वा ।

अधि, परि—इत्येतयोरुपपदयोरिषेरनिच्छाया भावाकर्त्रो स्त्रियामन. प्रत्ययो वा भवति । अध्येषणा, अधीष्टि. । पर्येषणा, परीष्टि । अधीष्टिरिति नेच्छन्त्यन्ये ।

११४. संपत्कुधादिभ्य क्विप् ।

पदादिभ्यः समादिपूर्वेभ्यः क्रुधादिभ्यश्च अनुपसर्गपूर्वेभ्यो धातुभ्यो भावाकर्त्रोः स्त्रियां क्विप् प्रत्ययो भवति ।

---

१. यङ्लुग्निवृत्त्यर्थश्च, तेनाऽस्मात् ष्वादिभ्य. क्तौ वेविक्ति. ।

संपद्, विपद्, आपद्, व्यापद्, प्रतिपद्, संसत्, परिषत्, उपसत्, उपनिषत्, निवित्, प्रतिश्रुत्, उपश्रुत, परिस्रुत्, उपानत्, प्रावृट्, विप्रुट्, नीवृत्, उपावृत्, सयत्, समित्[1], उपभृत्, समित्[2], आशीः, प्रशीः। संपदादिराकृतिगणः। क्रुत्, युत्, क्षुत्, तृट्, त्विट्, रुट्, रुक्[3], रुक्[4], शुक्, मुत्, मृत्, गीः, त्राः, दिक्, स्रक्। क्रुधादिराकृतिगणः।

११५. ल्वादिभ्यो वा।

ल्वादिभ्यो[5] धातुभ्यो भावाकर्त्रोः स्त्रियां क्विप् प्रत्ययो वा भवति। लूः, लूतिः[6]। भीः, भीतिः। ह्रीः, ह्रीतिः। भूः, भूतिः। कण्डूः, कण्डूया। कृत्, कृतिः। भित्, भित्तिः। छित्, छित्तिः। तुन्, तुत्तिः। दृक्, दृष्टिः। नक्, नष्टिः। युक्, युक्तिः। जूः, जूतिः। तूः, तूर्तिः। ऊः, ऊतिः। स्रूः, स्रूतिः। मूः, मूतिः। पूः, पूतिः। नुत्, नुतिः। शक्, शक्तिः।

११६. व्यतिहारेऽनीहादिभ्यो ञः।

व्यतिहरणं व्यतिहारः—परस्परस्य कृतप्रतिकृतिः। व्यतिहारविषयेभ्यो धातुभ्य ईहादिवर्जितेभ्यः भावे स्त्रियां ञः प्रत्ययो भवति। बाहुलकाद् भावे क्त्यादीनामपवादः। परस्परमाक्रोशनं व्यावक्रोशी[7]। व्याक्रोशी, व्यावमोषी, व्यावहासी, व्यावलेखी, व्यातिचारी, व्यावचर्ची, व्यात्युक्षी। अनीहादिभ्य इति किम्? व्यतीहा, व्यतीक्षा, व्यतिपृच्छा, व्यवहृतिः। व्युत्युक्षेत्यप्येके। **'ञिनो नित्यं'** [७/४/६१] इति स्वार्थेऽण् वक्ष्यते, तेन केवलस्य प्रयोगो न भवति। **'श्वादिभ्यः'** [५/४/८८] इति समावेशाऽभिधानात् व्यवक्रुष्टिः, व्याक्रुष्टिः इत्यपि भवति। स्त्रियामिति किम्? व्यतिपाको वर्तते।

११७. संज्ञायां णकः।

धातोर्भावाकर्त्रोः स्त्रियां णकः प्रत्ययो भवति संज्ञायां विषये। प्रच्छर्दनं प्रच्छर्द्यतेऽनयेति वा प्रच्छर्दिका। एवं प्रवाहिका, विचर्चिका, प्रस्कन्दिका, विपादिका—एता रोगसंज्ञाः। उद्दालकपुष्पाणि भज्यन्ते यस्यां सोद्दालकपुष्पभञ्जिका। एवं वारणपुष्पप्रचायिका। अभ्योषा खाद्यन्तेऽस्यामिति अभ्योषखादिका। एवं अवोपखादिका। साला भज्यन्ते यस्यां सा सालभञ्जिका। एवंनामानः क्रीडा। बहुलाधिकारादिह न भवति—शिरसोऽर्दनं शिरोर्तिः। एवं शीर्षार्तिः। शिरोऽभितप्तिः, शीर्षाभितप्तिः। चन्दनतक्षा क्रीडा।

११८. पुंस्यऽपि क्वचित्।

धातोर्भावाकर्त्रोः क्वचिद् यथादर्शनं पुंस्यपि णकः प्रत्ययो भवति। अरोचनं न रोचतेऽस्मिन्निति वा अरोचकः। अनाशकः, उत्कन्दकः, उत्कर्णकः।

११९. पर्यायार्हर्णोत्पत्तिषु।

पर्याय, अर्ह, ऋण, उत्पत्ति—इत्येतेष्वर्थेषु धातोः स्त्रियां भावाकर्त्रोः णकः प्रत्ययो भवति। पर्यायः क्रमः परिपाटीति यावत्। भवत आसिका। भवतः शायिका। भवतोऽग्रगामिका। आसितुं शयितुमग्रेगन्तुं च भवतः क्रम इत्यर्थः। अर्हणमर्हः योग्यता। अर्हति भवानिक्षुभक्षिकाम्। ओदनभोजिकाम्। पयःपायिकाम्। ऋणं यत्परस्मै धार्यते। इक्षुभक्षिकां मे धारयसि। उत्पत्तिः जन्म। इक्षुभक्षिका मे उदपादि। बहुलाधिकारात् क्वचिन्न भवति। चिकीर्षा, बुभुक्षा मे उदपादि।

१-२. उभे रूपे इण इन्धेश्च धातोः।

३-४ रुजेः रुचेश्च धातो रूपम्।

५ नन्वत्र ये क्विबन्तास्ते कृत्यादिगणे पठिष्यन्ते क्त्यन्तास्तु श्वादौ किमनेन? सत्यम्। कण्डूयेति तृतीयरूपार्थम्।

६ लूत्यादयेषु सर्वेषु स्त्रियां क्तिः।

७ **'ञिनो नित्यं'** [७/४/६१] इति स्वार्थेऽण्, ततः ङीप्।

१२०. भावे ।

भावे धात्वर्थनिर्देशे स्त्रियां धातोर्णकः प्रत्ययो भवति । आसिका, शायिका, जीविका, कारिका । बहुलाधिकारान्नेह— ईहा, ऊहा, ईक्षा, स्मरणा ।

१२१. वा प्रश्नाख्यानयोरिञ् च ।

प्रश्ने आख्याने च गम्यमाने धातोर्भावाकर्त्रोः स्त्रियां इञ् चकाराण्णकश्च प्रत्ययो वा भवति । वावचनात् पक्षे यथाप्राप्तम् । कां त्वं कारिमकार्षीः । कां कारिकामकार्षीः । पक्षे क्रियां कृत्यां कृतिं वाकार्षीः । आख्याने—सर्वां कारिमकार्षम् । सर्वां कारिकामकार्षम् । पक्षे क्रियां कृत्यां कृतिं वाऽकार्षम् । कां त्वं गणिमजीगणः । कां त्वं गणिकामजीगणः । कां गणनामजीगणः । सर्वां गणिमजीगणम् । सर्वां गणिकामजीगणम् । सर्वां गणनामजीगणम् । एवं पाचिं, पाचिकां, पक्तिं, पचाम् । पाठिं, पाठिकां, पठितिम् । प्रश्नाख्यानयोः इति किम् ? कृतिः, हृतिः ।

१२२. नञ्यऽनिराक्रोशे ।

नञ्युपपदे आक्रोशे गम्यमाने धातोर्भावाकर्त्रोः स्त्रियामनिः प्रत्ययो भवति । अजननिस्ते वृषल ! भूयात् । एवमजीवनिः, अकरणिः, अप्रयाणिः, अगमनिः । नञीति किम् ? मृतिस्ते जाल्म ! भूयात् । आक्रोशे इति किम् ? अकृतिस्तस्य पटस्य ।

१२३. हा-ज्या-ग्ला-म्लाभ्यः ।

एभ्यो भावाकर्त्रोः स्त्रियामनिः प्रत्ययो भवति । हानिः, ज्यानिः, ग्लानिः, म्लानिः ।

१२४. इ-कि-ति-तिप्-श्तिपः स्वरूपार्थयोः ।

धातोः स्वरूपेऽर्थे चाभिधेये इ, कि, ति, तिप्, श्तिप्—इत्येते प्रत्यया भवन्ति । भञ्जि, कृधि, सूति, अर्तिः, सरति । अर्थे —पजेरङ्गानि । भुजि क्रियते । सूतिं अर्तिं पचतिर्वा वर्तते ।

अधीतीयोऽध्यायेऽध्ययनधृतधीः पञ्चम इति,
स बुध्येताऽवश्यं सुगुणिगणिकालोरिह कृपाम् ।
न[1] शक्नोऽशक्तोऽयं कविरघुरगाधं विवरितुं,
वराके राकेशे न हि निजविभा किंतु तरणेः ।।

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं पञ्चमोऽध्यायः ।

---

१ यत इति शेषः ।

षष्ठोऽध्यायः

प्रथमश्चरण:

१· नपुंसके भावे क्तः ।

नपुसकलिङ्गे भावेऽर्थे धातो क्त प्रत्ययो भवति। घञाद्यपवाद । हसितं छात्रस्य। नृत्त मयूरस्य। व्याहृतं कोकिलस्य। गतं मतंगजस्य। नपुसके इति किम् ? हस, हास ।

२. अनट् ।

नपुसकलिङ्गे भावेऽर्थे धातोरनट् प्रत्ययो भवति। गमन, भोजन, वचन, हसन छात्रस्य। टकार उत्तरत्र ईबर्थं । योगविभाग उत्तरार्थ.।

३. यत्कर्मस्पर्शात्कर्तुशरीरसुखं तस्मिन् ।

येन कर्मणा सस्पृश्यमानस्य कर्तु शरीरस्य सुखमुत्पद्यते तस्मिन्नेव कर्मण्युपपदे नपुसकलिङ्गे भावेऽर्थे धातोरनट् प्रत्ययो भवति। पूर्वेणैव प्रत्यये सिद्धे नित्यसमासार्थ[1] वचनम्। पय पान सुखम्। ओदनभोजनं सुखम् । कर्मेति किम्? अपादानादिस्पर्शे मा भूत्। तूलिकाया उत्थान सुखम्। स्पर्शादिति किम्? अग्निकुण्डस्योपासन सुखम्। कर्त्रिति किम्? शिष्येण गुरो: स्नापन सुखम्। स्नापयतेर्न गुरु कर्ता कि तर्हि कर्म। शरीरग्रहणं किम्? पुत्रस्य परिष्वञ्जनं सुखम्। पुत्रस्य स्पर्शनान्न शरीरस्य सुख कि तर्हि मानसी प्रीति । अन्यथा परपुत्रपरिष्वङ्गेऽपि स्यात्। सुखमिति किम्? कण्टकानां मर्दनम्। सर्वत्र असमास. प्रत्युदाहार्य । अथवा येन कर्मणा स्पृश्यमानस्य कर्तु शरीरसुखमुत्पद्यते तस्मिन् कर्मण्यभिधेये सामर्थ्यात् कर्तर्युपपदे धातोरनट् भवति इत्यपरोऽर्थ.। राज्ञा भुज्यन्ते राजभोजना शालय:। राजाच्छादना. प्रावारा.। राजपरिधानानि वासांसि ।

४. रम्यादिभ्यः कर्तरि ।

रम्यादिभ्यो धातुभ्य. कर्तर्यनट् प्रत्ययो भवति। रमणी[2], कमनी, नन्दनी, इध्मव्रश्चनः, पलाशशातनः । आकृतिगणोऽयम्।

५. कारणम् ।

कृञः कर्तर्यनट् वृद्धिश्च निपात्यते। करोतीति कारणम्। कर्तरीति किम्? करणम्।

६. भुजादिभ्यः कर्मणि ।

भुजादिभ्यो धातुभ्य: कर्मण्यनट् प्रत्ययो भवति । भुज्यते यत्तद् भोजनम्। निरदन्ति यत्तन्निरदनम्। आच्छादनं, अवस्रावणं, अवसेचन, असनं, वसनं, आभरणम्। आकृतिगणोऽयम्।

---

१. 'सप्तम्युक्तं कृता' [३/१/६८] इत्यनेन ।

२ रमणनन्दनादयस्तु 'नन्द्यादिभ्योऽनः' [५/१/६३] इत्यने सेत्स्यन्ति । स्त्रीप्रत्ययार्थमिह विधानम् ।

७. स्कन्दादिभ्योऽपादाने ।

स्कन्दादिभ्यो धातुभ्योऽपादानेऽनट् प्रत्ययो भवति । प्रस्कन्दति यस्मात् स प्रस्कन्दनः । प्रपतन, प्रश्च्योतन, प्रस्रवणः, निर्झरण., शङ्खोद्धरण, अपादानम् । आकृतिगणोऽयम् ।

८. साधनाधारयोः ।

साधने आधारे च कारके धातोरनट् प्रत्ययो भवति । घञाद्यपवाद । साधने--इष्यतेऽनयेति एषणी । लेखनी, विचयनी, इध्मप्रश्चन, पलाशशातन, अविलवन, श्मश्रुकर्तन । आधारे—गौर्दुह्यतेऽस्या गोदोहनी । सक्तुधानी, तिलपीडनी, शयन, आसन, अधिकरणं, आस्थानम् ।

९. पुंसि संज्ञायां घः ।

पुलिङ्गयो साधनाधारयोरभिधेययोर्धातोर्घ. प्रत्ययो भवति सज्ञाया गम्यमानायाम् । साधने—प्रच्छद., उरश्छद., दन्तच्छदः, प्लवः, प्रणवः, कर, प्रत्यय., शर । आधारे --एत्य कुर्वन्ति अस्मिन् इति आकर । आलव., आरव, आपव., भव, लय, विषय, भर, प्रहर, प्रमर., अवसर, परिसर., विसर, प्रतिसर । पुसीति किम् ? विचीयतेऽनयेति विचयनी । प्रधीयते विकारोऽस्मिन्निति प्रधानम्[1] । सज्ञायामिति किम् ? प्रहरणो दण्ड । बहुलाधिकारात् क्वचिन्न भवति—प्रसाधनः[2], दोहन.[3] । घकार **'एकोपसर्गस्य च घे'** [४/२/१३३] इत्यत्र विशेषणार्थ ।

१०. गोचर-संचर-वह-व्रज-व्यज-खलापण-निगम-बक-भग-कषाकष-निकषाः ।

एते शब्दा. साधनाधारयो पुसि सज्ञाया घप्रत्ययान्ता निपात्यन्ते । **'हसाद् घञ्'** [६/१/११] इति घञि प्राप्ते घे निपातनम् । गावश्चरन्ति अस्मिन्निति गोचरो देश । व्युत्पत्तिमात्र चेदम् । विषयस्य तु सज्ञा । अनेकान्तात्मक वस्तु गोचर सर्वविदाम् । सचरन्तेऽनेन सचर । वहन्ति तेन वह वृषस्कन्धदेश । व्रजन्त्यस्मिन्निति व्रज । विपूर्वोऽजि —व्यजति अनेनेति व्यज. । निपातनाद् वीभावाऽभाव । खलन्त्यस्मिन्निति खल । एत्य पणायन्ति अस्मिन्निति आपण । निगच्छन्ति तत्रेति निगम । वक्तीति वक । बाहुलकात् कर्तरि । निपचन्त्यनेन निपक इत्यपि कश्चित् । भज्यतेऽनेन अस्मिन्निति वा भग । भगमिति बाहुलकात् नपुमकेऽपि घ । कषन्त्यस्मिन्निति कष । एव आकष निकष ।

११. हसाद् घञ् ।

हसान्ताद् धातो. साधनाधारयो पुसि सज्ञाया घञ् प्रत्ययो भवति । घस्याऽपवाद । विदन्त्यनेन विन्दति विन्दते वा वेद । चेष्टतेऽनेन चेष्टो बलम् । एत्य पचन्ति अस्मिन्निति आपाक । आराम, लेख, बन्ध, नेग, वेग, राग, रङ्ग., क्रम, प्रासादः, अपामार्ग, नीमार्ग. ।

१२. अवे तृस्त्रः ।

अव उपपदे तृ, स्तृ—इत्येताभ्यां साधनाधारयो पुसि सज्ञाया घञ् प्रत्ययो भवति । अवतरन्ति अनेन अस्मिन् वा इति अवतार । अवस्तृणन्ति अनेन अस्मिन् इति वा अवस्तार । बहुलाधिकारादऽसंज्ञायामपि—अवतारो[4] नद्या । उत्पूर्वादपि—नद्युत्तार. । साधनाधारयोरिति किम् ? अवतर. । केचित् तु सज्ञायामसज्ञाया च भावऽकर्तरि कारके च स्त्रो नित्यं तरतेस्तु विकल्पेन घञमिच्छन्ति । एकवचन साधनाधारयोरिति यथासख्यनिवृत्त्यर्थम् ।

---

१. सत्त्वरजस्तमसां साम्यावस्था प्रकृति. प्रधानम् ।

२-३. अत्र भिन्नन्तादऽनट् ।

४. येनकेनापि यथाऽवतीर्यते स एवावतारो न तु कस्यापि सज्ञा ।

१३. अध्यायन्यायोद्यावसंहाराधारावहारावायदारजाराः ।

स्वरान्तार्थ आरम्भः । एते शब्दाः पुंसि संज्ञायां साधनाधारयोर्घ प्राप्ते घञन्ता निपात्यन्ते । अधीयतेऽनेनास्मिन् वा अध्यायः । निपूर्वस्येणो नीयतेऽनेनेति न्यायः । उद्युवन्ति तेन तस्मिन् वा उद्यावः । संहरन्ति तेन तस्मिन् वा संहारः । आध्रियते तत्रेत्याधारः । अवहरन्ति तेन तस्मिन् वा अवहारः । एत्य वयन्ति वायन्ति वा तत्रेत्यावायः । दीर्यन्ते एभिरिति दाराः । जीर्यतेऽनेनेति जारः । दारयन्तीति दाराः, जरयतीति जारः इति कर्तरि केचिद् निपातयन्ति ।

१४. उदङ्कोऽनुदके ।

उत्पूर्वाद् अञ्चतेः पुंसि संज्ञायां साधनाधारयोर्घञ् निपात्यते उदकविषयश्चेद् धात्वर्थो न भवति । जलं चेत्तेन नोदच्यत इत्यर्थः । तैलोदङ्कः, घृतोदङ्कः । अनुदके इति किम् ? उदकोदञ्चनः । 'हलाद् घञ्' [६/१/११] इत्यनेनैव सिद्धे उदके प्रतिषेधार्थं वचनम् । रूपाऽविशेषाद् घोऽपि न भवति ।

१५. आलमानायः ।

आङ्पूर्वान्नयतेः साधने पुंसि संज्ञायां घञ् निपात्यते जालं चेदभिधेयं भवति । आनयन्ति तेन आनायो मत्स्यानाम् । आनायो मृगाणाम् । आनयोऽन्यः ।

१६. खनो घडइरेकेकवकाश्च ।

खनतेर्धातोः पुंसि संज्ञायां साधनाधारयोर्घ, ड, इर, इक, इकवक—इत्येते चकाराद् घञ् च प्रत्यया भवन्ति । आखनः, आखः, आखरः, आखनिकः, आखनिकवकः, आखानः ।

१७. दुःस्वीषत्सु कृच्छ्राकृच्छ्रार्थेषु खल् ।

कृच्छ्रं दुःखं, तद्दुरो विशेषणम् । अकृच्छ्रं सुखं, तत्स्वीषतोर्विशेषणम् । दुस्, सु, ईषत्—इत्येतेषु कृच्छ्राऽकृच्छ्रार्थेषु उपपदेषु धातोः खल् प्रत्ययो भवति । कृत्यादीनामपवादः । दुःखेन शय्यते इति दुःशयम् । सुखेन शय्यते इति सुशयं, ईषच्छयं भवता । दुःखेन क्रियते इति दुष्करः । सुखेन क्रियते इति सुकरः, ईषत्करः कटो भवता । दुष्करं, सुकरं, ईषत्करं भवता । दुःस्वीषत्सु इति किम् ? कृच्छ्रसाध्यं, सुखसाध्यं । कृच्छ्राऽकृच्छ्रार्थेषु इति किम् ? ईषल्लभ्यं धनं कृपणात् । अल्पं लभ्यमित्यर्थः । खकारः उत्तरत्र मुमागमार्थः । लकारः 'खलर्थाः' इत्यत्र विशेषणार्थः । इह स्त्रीप्रत्ययात् प्रभृति असरूपविधेरभावात् स्पर्धे अलः स्त्रीखलना स्त्रियास्तु खलनौ परत्वाद् भवतः । तत्र चयः, जयः, लवः—इत्यादौ अलोऽवकाशः, कृतिः, हृतिः—इत्यादौ स्त्रीप्रत्ययस्य, चितिः, स्तुतिः—इत्यादौ तूभयं प्राप्नोति । अलोऽविशेषेणाभिधानात् । तत्र परत्वात् स्त्रीप्रत्ययो भवति । तथा दुर्भेदं, सुभेदं—इत्यादौ खलोऽवकाशः, अलस्तु पूर्व एवाऽवकाश उक्तः, दुश्चयं, सुचयं, दुर्लवं, सुलवं—इत्यादौ तूभयप्राप्तौ परत्वात् खल् भवति । तथा इध्मव्रश्चनः, पलाशच्छेदनः—इत्यादौ अनस्यावकाशः, अलस्तु पूर्व एवाऽवकाशः उक्तः, पलाशशातनः, अविलवनः—इत्यादौ तूभयप्राप्तौ परत्वादनो भवति । एवं कृतिः, हृतिः—इत्यादौ स्त्रीप्रत्ययस्यावकाशः, दुर्भेदं, सुभेदं—इत्यादौ खलः, दुर्भेदा, सुभेदा—इत्यादौ तूभयप्राप्तौ परत्वात् खल् भवति । तथा इध्मव्रश्चनः, पलाशच्छेदनः—इत्यादौ अनस्यावकाशः, कृतिरित्यादौ स्त्रीप्रत्ययस्य, सक्तुधानी, तिलपीडनी—इत्यादौ तूभयप्राप्तौ परत्वादनडेव भवति ।

१८. च्व्यर्थे कर्तृकर्मणोर्भूकृञ्भ्याम् ।

दुस्, सु, ईषत्—इत्येतेषु कृच्छ्राऽकृच्छ्रार्थेषु उपपदेषु च्व्यर्थे कर्तरि कर्मणि चोपपदे यथासंख्यं भवतेः करोतेश्च धातोः खल् प्रत्ययो भवति । खानुबन्धबलात् कर्तृकर्मणोरेव आनन्तर्यम् । दुःखेनाऽनाढ्येनाढ्येन भूयते दुराढ्यंभवं भवता । सुखेनाऽनाढ्येनाढ्येन भूयते स्वाढ्यंभवं भवता । ईषदाढ्यंभवं भवता । दुःखेनाऽनाढ्यः आढ्यः क्रियते दुराढ्यंकरो मैत्रो भवता । सुखेनाऽनाढ्यः आढ्यः क्रियते स्वाढ्यंकरश्चैत्रो भवता । ईषदाढ्यंकरश्चैत्रो भवता । सुखेनाकटः कटः क्रियन्ते सुकटंकराणि

वीरणानि। मुकर कटो वीरणैरित्यत्र तु साधनविवक्षा। च्व्यर्थे इति किम् ? दुराढयेन[1] भूयते। स्वाढयेन भूयते। ईषदाढयेन भूयते। आढय एव सन् कंचिद् विशेषमापद्यत इत्यर्थ.। एव दुराढय क्रियते इत्यादि। अभूतप्रादुर्भावेऽपि वा प्रकृतेरविवक्षणात्[2] च्व्यर्थो नास्ति।

१६. आतोऽनः।

कृच्छ्राऽकृच्छ्रार्थेषु दुःस्वीषत्सु उपपदेषु आकारान्तेभ्यो धातुभ्योऽनः प्रत्ययो भवति। खलोऽपवादः। दुरुत्थान भवता। सूत्थानं भवता। ईषदुत्थान भवता। दुष्पान पयो भवता। सुपान पयो भवता। ईषत्पान पयो भवता। कथ ईषद्दरिद्रः? 'दरिद्रोऽशिति' [३/४/७८] इत्यत्र विषयेऽप्याकारस्य लोपेन आदन्तत्वाऽभावात् खलेव।

२०. शासि[3]-युधि-दृशि-धृषि-मृषिभ्यो वा।

कृच्छ्राऽकृच्छ्रार्थेषु दुःस्वीषत्सु उपपदेषु शास्यादिभ्यो धातुभ्योऽन प्रत्ययो वा भवति। पक्षे खल्। दुःखेन शिष्यते दुःशासनः, दुःशास.। सुखेन शिष्यते सुशासनः, सुशास। ईषच्छासनः, ईषच्छास। एव दुर्योधनः[4], दुर्योध। दुर्दर्शन, दुर्दर्श। दुर्धर्षणः, दुर्धर्ष.। दुर्मर्षण., दुर्मर्षः। एव स्वीषतोरपि।

२१. चजोः कगौ घिति।

धातोश्चकारजकारयो स्थाने यथासंख्यं कगौ भवतः घिति प्रत्यये परे। पाक, सेक, पाक्य, सेक्य, त्याग, रागः, भोग्यं, योग्य, संपर्की, संसर्गी। घितीति किम् ? पचनं, त्यजनम्।

२२. न्यङ्क्कूद्गमेघादयः।

न्यङ्क्वादयः कृतकत्वा, उद्गादय कृतगत्वा, मेघादय कृतघत्वा निपात्यन्ते। न्यञ्चेरुप्रत्यये न्यङ्कु। तञ्चिवञ्चिशुचीनां रकि तक्र, वक्रं, शुक्र। श्वपाक, मांसपाक, पिण्डपाक, कपोतपाक., उलूकपाक। पचे 'कर्मण्यण्' [५/२/१] इत्यणि सति। अणभावे श्वपच इत्यादि। नीचेपाक, दूरेपाक, फलेपाक, क्षणेपाक। पचेर्नीचे, पच्यते, नीचे, पच्यते स्वयमेवेति कर्मकर्तर्यचि दीर्घत्वं निपातनात्। 'तत्पुरुषे कृति' [३/२/२२] इति बहुलाधिकारात् सप्तम्या अलुक्। उकारान्ता अपि गणे पठ्यन्ते। नीचेपाकु, दूरेपाकु, फलेपाकु, क्षणेपाकु। अत एव निपातनादुकार। नीचेपाका, दूरेपाका, फलेपाका, क्षणेपाका इत्याबन्ता अपि। अनुब्रवीतीत्यच्—अनुवाक। सोम प्रवक्तीत्यण्—सोमप्रवाक। उचे न्युच्यति समवैतीति लिहाद्यचि न्योको वृक्ष. शकुन्तो वा। उब्जेर्घञि उद्ग.। समुद्ग, न्युद्ग, अभ्युद्ग.। निपातनाद् उपधाया दत्वम्। सृजेः कर्तर्यचि सर्ग। विसर्ग, अवसर्ग, उपसर्ग। षञ्जेरचि व्यतिषङ्ग, अनुषङ्ग। मस्जेरु—मद्गु। भ्रस्जे कु सलोपश्च। भृगु। युजे 'कर्मण्यण्' [५/२/१] इत्यणि गोयोग। मिहेरचि सञ्ज्ञाया ह्रस्य घत्वम्। मेघ.। अन्यत्र मेहः। वहेरनुपसर्गस्य वस्योकारश्च। वहतीत्योघ प्रवाह। अन्यत्र प्रवह, विवह, परिवह, संवह, उद्वह, अभिवह, निवह.। सञ्ज्ञायामिति किम् ? वह.। दहेरवनिभ्यां घञि अवदाघ केवलपानीयपक्वोऽपूप, निदाघ ऋतुविशेष। सञ्ज्ञायामिति किम् ? अवदाह, निदाह। अर्हतेर्घञि अर्घो मूल्य पूजाद्रव्य च। सञ्ज्ञायामिति किम् ? अर्ह। एवमविहितलक्षणानि कत्वगत्वघत्वानि द्रष्टव्यानि।

२३. न क्वादिव्रजाम्।

कवर्गादीनां, अजि, व्रजि—इत्येतयोश्च धात्वोश्चकारजकारयो प्राप्तौ ककारगकारौ न भवत.। सङ्कोचः,

---

१ आढ्येन सता दुःखेन भूयते इत्यर्थ।

२. अनाढ्य इत्येवंरूपाया।

३. अनुपसर्गयुध्यादिसाहचर्यात् न आङः शास इति।

४ दुःखेन युध्यते अन्तर्भूतण्यर्थ, सूत्रे शास इति निरनुबन्धता यङ्लुक्यपि दुःशासन इति प्रयोगार्था।

कूजः, खर्जः, गर्जः, खर्ज्य, गर्ज्य, समाजः, उदाज, परिव्राजः. परिव्राज्यम्। अजेस्तु वीभावस्य घ्यणिविधानात् नास्ति उदाहरणम्।

२४. वञ्चेर्गतौ ।

वञ्चेर्गतौ वर्तमानस्य कत्व न भवति। वञ्चेर्यम्। वञ्च वञ्चति। गन्तव्यं गच्छतीत्यर्थः।

'पश्यैते व्याधवार्केण्यसंकुले वित्तवत्तमाः ।
रात्रावपि महारण्ये वञ्चं वञ्चन्ति वाणिजाः' ॥

गताविति किम् ? वङ्कं काष्ठम्। कुटिलमित्यर्थः।

२५. यजेर्यज्ञाङ्गे ।

यज्ञाङ्गे वर्तमानस्य यजेर्जस्य गत्व न भवति। पञ्च प्रयाजा। त्रयोऽनुयाजा। एकादशोपयाजा। उपांशुयाजा। पत्नीसंयाजा। ऋतुयाजा। यज्ञाङ्ग इति किम् ? प्रयाग, अनुयाग, याग। याज इत्यप्यन्ये।

२६. घ्यण्यावश्यके ।

आवश्यकोपाधिके घ्यणि परे धातोश्चजो कगौ न भवत। अवश्यपाच्यम्। अवश्यरेच्यम्। अवश्यरञ्ज्यम्। अवश्यभञ्ज्यम्। आवश्यके इति किम् ? पाक्यं, रेक्यं, रङ्ग्य, भङ्ग्यम्।

२७. त्यजि-यजि-रुचि-शुचि-याचि-प्रवचर्चः ।

एषां चकारजकारयो. कगौ न भवत घ्यणि परे। त्याज्यं, याज्यं, रोच्यं, शोच्यं, याच्यं, प्रवाच्यं, अर्च्यम्।

२८. वचोऽशब्दसंज्ञायाम् ।

अशब्दसंज्ञायां गम्यमानायां वचेश्चकारस्य ककारो न भवति घ्यणि परे। वाच्यमाह, अवाच्यमाह। अशब्द-संज्ञायामिति किम् ? वाक्यं—विशिष्ट. पदसमुदाय.।

२९. अधिवाक्यं दिनविशेषे ।

अधिपूर्वकस्य वचेर्घ्यणि कत्वे अधिवाक्यमिति दिनविशेषेऽभिधेये निपात्यते। अधिवाक्यं नाम दशरात्रस्य[1] यज्ञस्य यद्दशममह.। यस्मिन् याज्ञिका अधिब्रुवते तस्मिन्नेवाभिधानम्। अधिवाच्यमन्यत्र।

३०. निप्राभ्यां युजेः शक्ये ।

निप्राभ्यां परस्य युजेर्जकारस्य शक्येऽर्थे गम्यमाने घ्यणि परे गो न भवति। नियोक्तुं शक्यः नियोज्यः। प्रयोज्य.। शक्य इति किम् ? नियोग्य., प्रयोग्यः।

३१. भुजो भक्ष्ये ।

भुजो भक्ष्येऽर्थे घ्यणि परे गो न भवति। भोज्यमन्नम्। भोज्या यवागू.। भोज्यं पयः। भक्ष्य इति किम् ?

---

१. दशानां रात्रीणां समाहारो दशरात्रः। दशरात्रनिष्पाद्यो यज्ञोऽपि दशरात्र उपचारात्।

भोग्य कम्बल.। प्रावरणीय इत्यर्थ.। भोग्या अपूपा.। पालनीया इत्यर्थ.। भक्ष्यमभ्यवहार्यमात्र न खरविशदमेव[1]। यथा अब्भक्ष्यो वायुभक्ष्य[2] इति।

३२. भुजन्युब्जौ पाणिरोगयोः।

भुजेर्निपूर्वस्य उब्जेश्च घञन्तस्य पाणौ रोगे चार्थे यथासख्य भुजन्युब्जौ निपात्येते। भुज्यतेऽनेनेति भुज. पाणिः। न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जो नाम रोगविशेष। **'हसाद् घञ'** [६/१/११] इति गत्वाभावो भुजेर्गुणाभावश्च निपात्यते। पाणिरोगयोरिति किम्? भोग., न्युद्ग.।

३३. वीरुन्न्यग्रोधौ।

विपूर्वस्य रुहे क्विपि न्यक्पूर्वस्य च अचि वीरुध्न्यग्रोधशब्दौ धकाराऽकारान्तौ निपात्येते। विरोहतीति वीरुत्। न्यग्रोहतीति न्यग्रोध। अवरोध इत्यप्यन्ये।

३४. कालसमयवेलाभ्यस्तुम् वाऽवसरे।

काल, समय, वेला—इत्येतेभ्य. परात् धातोस्तुम् प्रत्ययो वा भवति अवसरे गम्यमाने। कालो भोक्तुम्। समयो भोक्तुम्। वेला भोक्तुम्। वावचनाद् यथाप्राप्त च। कालो भोक्तव्यस्य। ऊर्ध्व मुहूर्तात् कालो भोक्तु, ऊर्ध्व मुहूर्ताद् भोक्तु स्म काल, अङ्ग स्म राजन् भोक्तु काल.—इत्येतेषु परत्वात्[3] तुमेव। अवसरे इति किम्? काल पचति भूतानि। कालोऽत्र द्रव्यं न त्ववसर.।

३५. इच्छार्थेष्वेककर्तृकेषु कर्मणः।

इच्छार्थेषु धातुषु एककर्तृकेषूपपदेषु कर्मभूताद् धातोस्तुम् प्रत्ययो भवति। अक्रियार्थोपपदार्थमारम्भ। इच्छति भोक्तुम्। वाञ्छति भोक्तुम्। वष्टि भोक्तुम्। कामयते भोक्तुम्। एककर्तृकेष्विति किम्? देवदत्त भुञ्जानमिच्छति यज्ञदत्त। कर्मण इति किम्? इच्छन् करोति। अत्र करोतीच्छत्योर्लक्ष्यलक्षणभावो न तु कर्मक्रियाभाव।

३६. शक-धृष-ज्ञा-ग्ला-घट-रभ-लभ-सहार्हास्ति-समर्थार्थेषु।

शकाद्यर्थेषु धातुषु समर्थार्थेषु च नामसूपपदेषु कर्मभूताद् धातोस्तुम् प्रत्ययो भवति। शक्नोति पारयति वा भोक्तुम्। धृष्णोति अध्यवस्यति वा भोक्तुम्। जानाति वेत्ति वा भोक्तुम्। ग्लायति म्लायति वा भोक्तुम्। घटते युज्यते वा भोक्तुम्। आरभते प्रक्रमते वा भोक्तुम्। लभते विन्दते वा भोक्तुम्। सहते क्षमते वा भोक्तुम्। अर्हति प्राप्नोति वा भोक्तुम्। अस्ति विद्यते वा भोक्तुम्। समर्थोऽल प्रभवति ईष्टे वा भोक्तुम्। समर्थार्थप्रतीतावपि भवति—द्रष्टु चक्षु, योद्धु धनु.। शक्त्या भुज्यते, सामर्थ्येन भुज्यते इत्यादौ त्वनभिधानात् न भवति। समर्थार्थत्वादेव सिद्धे शकग्रहणमसमर्थार्थम्।

३७. अर्हे तृच्।

अर्हे कर्तरि वाच्ये धातोस्तृच् प्रत्ययो भवति। भवान् कन्याया वोढा। भवान् खलु छेदसूत्रस्य वोढा। सामान्येनैव तृचि सिद्धे **'शक्तार्हयोः कृत्यश्च'** [४/४/१०६] इति अर्हे बाधा मा भूदिति पुनर्विधानम्।

१-२ कठोरप्रत्यक्षमित्यर्थ। अखरविशदमपि भक्ष्य दृष्टमिति दृष्टान्तमाह···अब्भक्ष्येति। आपो द्रव रूप न कठिन प्रत्यक्ष त्वऽस्ति वायुस्तु कठिनो न प्रत्यक्षः तस्यानुमानेन गम्यत्वात्, तेन भोज्य पय इत्यादि सिद्धम्।

३. ऊर्ध्वं मुहूर्तात् कालो भोक्तुमित्यादिप्रयोगत्रये। ननु तुम् विकल्पेन भवति, तत्कथ तुमेवेत्युक्तम्? उच्यते। विकल्पेन तुमेव भवति नाऽन्डादय·। **'वाकाविश्चोर्ध्वमौहूर्तिके'** [४/४/१०५] इति, **'स्मे तुबादि:'** [४/४/१०६] इति, **'अधीष्टौ'** [४/४/१०७] इति च यथाक्रम प्रवर्त्तत एव।

३८. आवश्यकाधमर्ण्ययोर्णिन् कृत्याः ।

अवश्यंभाव आवश्यकम् । ऋणेऽधमोऽधमर्णः, तस्य भाव आधमर्ण्यम् । आवश्यके आधमर्ण्ये च गम्यमाने कर्तरि वाच्ये धातोर्णिन् कृत्यसंज्ञकाश्च प्रत्यया भवन्ति । अवश्य करोतीति कारी । हारी । यदा तु अवश्यमोऽपि प्रयोग उभाभ्यामपि द्योतनात् तदा मयूरव्यसकादित्वात्समास । अवश्यकारी, अवश्यंहारी । अवश्यशब्दप्रयोगे तु अवश्यकारी । अकारान्तोऽपि हि अनव्ययमवश्यशब्दोऽस्ति । अवश्य गेयो गाथको गीतस्य । अवश्य भव्यश्चैत्र । आधमर्ण्ये—शत दायी । सहस्रं दायी । कारी मे कटमसि । हारी मे भारमसि । गेयो गाथानाम् । कृत्त्वात् कर्तरि णिनो विधानात् कृत्यानामपि कर्तर्येव[1] विधानम् । भावकर्मणोस्तु सामान्येन विधानात् सिद्धा एव बाधकाभावात्[2] ।

३९. अलंखलुभ्यां प्रतिषेधे क्त्वा वा ।

प्रतिषेधवाचिभ्या अल, खलु—इत्येताभ्या परात् धातो क्त्वा प्रत्ययो वा भवति । अल कृत्वा, खलु कृत्वा—न कर्तव्यमित्यर्थ । पक्षे यथाप्राप्तम् । अल वत्स ! रोदनेन, अल रुदितेन, अल रुदितम् । क्त्वाप्रत्यये एव परे खलुशब्द. प्रतिषेधवाची नान्यत्रेति पक्षे खलुशब्दो नोदाह्रियते । अन्ये तु खलु कृतेन, खलु भोजनेन, खलु भोजनमित्यपि उदाहरन्ति । प्रतिषेधे इति किम् ? अलंकार स्त्रिया. । सिद्ध खलु । अलखलुभ्यामिति किम् ? मा कारि भवता ।

४०. पराऽवरयोः ।

परे अवरे च गम्यमाने धातो क्त्वा प्रत्ययो वा भवति । अतिक्रम्य नदी पर्वत । नद्या पर पर्वत इत्यर्थः । बाल्यमतिक्रम्य यौवनम् । अवरे—अप्राप्य नदी पर्वत । नद्या अर्वाक् पर्वत इत्यर्थ । अप्राप्य यौवन बाल्यम् । नदीपर्वतयो-र्बाल्ययौवनयोर्वा परावरत्वमात्रं[3] प्रतीयते अस्ति प्राप्यत इति वा न द्वितीया क्रियेति एककर्तृकक्रियान्तराभावात् **'पूर्वकाले'** [६/१/४३] इति न सिध्यतीति वचनम् । वावचनाद् यथाप्राप्त च । नद्यतिक्रमेण पर्वत., नद्यप्राप्त्या पर्वत ।

४१. मेङ एककर्तृके ।

एको धात्वर्थान्तरेण कर्ता यस्य स एककर्तृक । एककर्तृकवचनेन अन्यस्य धातो. सम्बन्ध प्रतीयते । धातो. सबन्धे सति एककर्तृकेऽर्थे वर्तमानात् मेङ्धातो क्त्वा प्रत्ययो भवति । परकालार्थ आरम्भ । स्वभावात् मेङ् व्यतिहारे एव वर्तते[4] । अपमित्य अपमाय वा याचते । अपमित्य अपमाय वा हरति । अपमातु प्रतिदातुमित्यर्थ । पूर्व हि असौ याचते हरति वा पश्चाद् अपमयत इति । याचेस्तु पूर्वकालेऽपि क्त्वा न भवति, मेङ परकालभाविन्या क्त्वया याचिपूर्वकालस्योक्त-त्वात् । पक्षे याचित्वा अपमयते । अपमातु याचते । एककर्तृके इति किम् ? चैत्रस्यापमाने मैत्रो याचते ।

४२. व्यादानादेः ।

एककर्तृकेऽर्थे वर्तमानेभ्यो व्यादानादिभ्य धातो सबन्धे क्त्वा प्रत्ययो वा भवति । मुख व्यादाय स्वपिति । अक्षिणी निमील्य हसति । पादौ प्रसार्य पतति । दन्तान् प्रकाश्य जल्पति । शिशुरय मातर भक्षयित्वा उपजात. । पक्षे मुखं व्याददते स्वपिति इत्यादि यथासम्भवम् । एककर्तृके इति किम् ? मुख व्याददाने चैत्रे मैत्र स्वपिति । समानकालार्थ आरम्भ ।

---

१. ये पूर्वं 'भव्यगेय···' [५/१/७] इत्यादिषु कर्तरि विहितास्त एवेह ज्ञायन्ते इत्यर्थः । यद्वा भावकर्मणोरपि ये विहितास्तेऽत्र कर्तरि भवन्तीत्यर्थ. ।

२. कर्तर्येव णिना बाध्यन्ते न भावकर्मणो ।

३ क्रियाद्वये विद्यमानेऽपि परावरत्वमात्र जिज्ञासितम् ।

४. अपरे धातवो व्यतिपूर्वा व्यतिहारे वर्तन्ते अय तु स्वभावात् केवलोऽपीति, नान्यैरिव व्यतिहारग्रहणमस्य विशेषक कर्तव्यमित्यर्थ. ।

४३. पूर्वकाले ।

एककर्तृकेऽर्थे पूर्वकाले धात्वर्थे वर्तमानाद्धातो धातो सबन्धे क्त्वा प्रत्ययो वा भवति। आसित्वा[1] भुङ्क्ते। भुक्त्वा व्रजति। भुक्त्वा पुनर्भुङ्क्ते। स्नात्वा, भुक्त्वा, पीत्वा व्रजति। पक्षे आस्यते भोक्तुमित्यपि भवति। एककर्तृके इति किम्? भुक्तवति गुरौ शिष्यो व्रजति। पूर्वकाले इति किम्? भुज्यते पीयते चाऽनेन। अथ यदनेन भुज्यते ततोऽय पचति, यदनेनाऽधीयते ततोऽयं शेते—इत्यत्र कथ क्त्वा न भवति? उच्यते—यत्र यच्छब्देन सह ततः शब्द प्रयुज्यते तत्र ततः-शब्देनैव पूर्वकालताभिधीयते इत्युक्तार्थत्वात् क्त्वा न भवति। यदनेन भुक्त्वा गम्यते ततोऽय अधीते—इत्यत्र तु भोजन-गमनयोः क्रमे क्त्वा, गमनाध्ययनयोस्तु ततःशब्देन क्रमस्याभिधानात् गमेर्न भवति। 'पूर्वकाले' इत्युत्तरत्र यथासंभव-मभिधानतोऽनुवर्तनीयम्।

४४. णम् चाभीक्ष्ण्ये ।

आभीक्ष्ण्ये गम्यमाने परकालेन एककर्तृके पूर्वकालेऽर्थे वर्तमानाद् धातोर्धातो सबन्धे णम् चकारात् क्त्वा च प्रत्ययो भवति। भोजं भोज व्रजति। भुक्त्वा भुक्त्वा व्रजति। पाय पाय गच्छति। पीत्वा पीत्वा गच्छति। अग्रे भोज भोजं व्रजति। अग्रे भुक्त्वा भुक्त्वा व्रजति। अत्र क्त्वाणमोर्हिस्वादिवत् प्रकृत्यर्थोपाधिद्योतने सामर्थ्य नास्तीति आभीक्ष्ण्या-भिव्यक्तये द्विर्वचनं भवति। इह कस्मात् णम् न भवति—यदय[2] पुनः पुनर्भुक्त्वा व्रजति, अधीते एव ततः परम्? आभीक्ष्ण्यस्य स्वशब्देनैवोक्तत्वात्। क्त्वापि तर्हि न प्राप्नोति। मा भूदाभीक्ष्ण्ये पूर्वकाले भविष्यति। वाधिकारेणैव पक्षे क्त्वाप्रत्ययस्य सिद्धौ चकारेण तस्य विधान तिबादिप्रत्ययान्तरनिषेधार्थम्[3]। णकारो वृद्ध्यर्थ।

४५. पूर्वाग्रेप्रथमेभ्यः ।

पूर्व, अग्रे, प्रथम—इत्येतेभ्य परात् परकालेन एककर्तृके पूर्वकालेऽर्थे वर्तमानाद् धातोर्धातो सबन्धे णम् प्रत्ययो वा भवति। अनाभीक्ष्ण्यार्थ[4] वचनम्। पूर्वं भोज व्रजति। पूर्व भुक्त्वा व्रजति। अग्रे भोज व्रजति। अग्रे भुक्त्वा व्रजति। प्रथम भोजं व्रजति। प्रथम भुक्त्वा व्रजति। तिबादयोऽपि—पूर्व भुज्यते ततो व्रजति। अग्रे भुज्यते ततो व्रजति। प्रथम भुज्यते ततो व्रजति। पूर्वादयश्चात्र[5] व्यापारान्तरापेक्षे पूर्वकाले व्रज्यापेक्षे तु क्त्वाणमावििति नोक्तार्थता। ततश्चायमर्थोऽन्य-भोक्तृभुजिक्रियाभ्य. स्वक्रियान्तरेभ्यो वा पूर्व भोजनं कृत्वा व्रजतीत्यर्थ। पूर्वप्रथमसाहचर्यात् अग्रेशब्द कालवाची।

४६. अन्यथैवंकथमित्थंस्वऽनर्थकात् कृञः ।

एककर्तृके पूर्वकालेऽर्थे अन्यथा, एव, कथ, इत्थ—इत्येतेषूपपदेषु कृञोऽनर्थकात् धातो सबन्धे णम् प्रत्ययो वा भवति। अन्यथाकार[6] भुङ्क्ते। एवकार भुङ्क्ते। कथकार भुङ्क्ते। इत्थकार भुङ्क्ते। पक्षे[7] क्त्वैव। अन्यथा कृत्वा, एव कृत्वा, कथं कृत्वा, इत्थ कृत्वा वा भुङ्क्ते। एवमुत्तरत्रापि। आनर्थक्य करोतेरन्यथादिभ्य पृथगर्थाऽभावात्। यावदुक्त भवति अन्यथा भुङ्क्ते तावदुक्त भवति अन्यथाकार भुङ्क्ते इति। अनर्थकादिति किम्? अन्यथा कृत्वा शिरो भुङ्क्ते। अत्रान्यथाशब्द. शिर प्रकारे करोतेश्च शिर. कर्म तन्न करोतिना विना गम्यते इति।

---

१ आसिक्रियाया वर्तमानत्वेऽपि भुजिक्रियाऽपेक्षया पूर्वकाल। अत एव क्त्वा विकल्पपक्षे आस्यते भोक्तुमित्यत्र तिबादि।

२ ननु भृशाभीक्ष्ण्ये वर्तमानस्य धातोर्द्विवचन भवति, इह तु कथम्? सत्यम्। क्रियाविशेषणमपि क्रिया।

३. तेन अग्रे भुङ्क्ते भुङ्क्ते व्रजितुमित्यादि न भवति।

४. एतच्चोपलक्षण पक्षे तिबादिप्राप्त्यर्थ च।

५. नन्वनेन पूर्वकाले क्त्वा पूर्वकालश्च पूर्वादिभिरेवोक्त इति क्त्वा न प्राप्नोतीत्याशङ्का।

६ अत्र कृञोऽनर्थकत्वात् पूर्वकालाऽसभवोऽनुवर्तन तु प्रवाहादेव। एवमुत्तरत्रापि सभव एव पूर्वकालो ग्राह्य।

७ **'पूर्वकाले'** [६/१/४३] इत्यनेन।

४७. यथातथयोरीर्ष्योत्तरे ।

एककर्तृके पूर्वकालेऽर्थे यथा, तथा—इत्येतयोरुपपदयोरनर्थकात् कृन्धातोर्धातोः सबन्धे णम् प्रत्ययो वा भवति, ईर्ष्यश्चेत् पृच्छते उत्तरं ददाति । कथं भवान् भोक्ष्यत इति पृष्टोऽसूयया त प्रत्याह—यथाकारमहं भोक्ष्ये तथाकारमहं भोक्ष्ये किं तवानेन । किं ते मया यथाहं भोक्ष्ये तथाहं भोक्ष्ये इत्यर्थः । विकल्पेन ईर्ष्या न गम्यते इति नित्यमेव विधानम् । एवमुत्तरत्रापि । ईर्ष्योत्तरे इति किम् ? यथा कृत्वाहं भोक्ष्ये तथा द्रक्ष्यसि । अनर्थकादिति किम् ? यथा कृत्वाहं शिरो भोक्ष्ये तथा कृत्वाहं शिरो भोक्ष्ये किं तवानेन ।

४८. आक्रोशे कर्मणि खणम् ।

अनर्थकादिति निवृत्तम् । कर्मण्युपपदे एककर्तृके पूर्वकालेऽर्थे वर्तमानात् करोतेर्धातोः सबन्धे खणम् प्रत्ययो वा भवति आक्रोशे गम्यमाने । खकारो मुमर्थः । णकारो वृद्ध्यर्थः । चौरकारमाक्रोशति । करोतिरिहोच्चारणे । चौरं कृत्वा चौरशब्दमुच्चार्याक्रोशति । चौरोऽसि इत्याक्रोशतीत्यर्थः । एवं दस्युकारमाक्रोशति । व्याधंकारमाक्रोशति । आक्रोश इति किम् ? चौरं कृत्वा हेतुभिः कथयति ।

४९. अदीर्घे स्वाद्वर्थे ।

दीर्घान्तवर्जिते स्वाद्वर्थे कर्मण्युपपदे एककर्तृके पूर्वकालेऽर्थे करोतेर्धातोः संबन्धे खणम् प्रत्ययो वा भवति । स्वादुंकारं भुङ्क्ते । सपन्नंकारं भुङ्क्ते । मिष्टंकारं भुङ्क्ते । लवणंकारं भुङ्क्ते । पक्षे स्वादु कृत्वा, सपन्नं कृत्वा, मिष्टं कृत्वा, लवणं कृत्वा वा भुङ्क्ते । अदीर्घे इति किम् ? स्वाद्वीं कृत्वा, स्वादूकृत्य, संपन्ना कृत्वा यवागू भुङ्क्ते । स्वादुंकारं यवागू भुङ्क्ते, अस्वादु स्वादु कृत्वा स्वादुंकारं भुङ्क्ते इत्यत्र तु ईप्च्व्योर्विकल्पितत्वात् न दीर्घ इति भवति । संपन्नंकारं यवागू भुङ्क्ते इति तु सामान्येन पदं निष्पाद्य पश्चाद् यवाग्वा सबन्धे भविष्यति ।

५०. दृशिविदिभ्यो णम् साकल्ये ।

साकल्यविशिष्टे कर्मण्युपपदे एककर्तृके पूर्वकालेऽर्थे वर्तमानेभ्यो दृशिविदिभ्यो धातुभ्यो धातोः सबन्धे णम् प्रत्ययो वा भवति । कन्यादर्शं वरयति । या या कन्या पश्यति ता ता सर्वा वरयतीत्यर्थः । विदतेरकर्मकत्वात् तद्वर्जास्त्रयो विदयो गृह्यन्ते । अतिथिवेदं भोजयति । य य अतिथिं जानाति लभते विचारयति वा त त सर्वं भोजयतीत्यर्थः । बहुवचनात् त्रयाणामपि विदीनां ग्रहणम् । अन्यथा निरनुबन्धग्रहणे न[१] सानुबन्धकस्य इत्युपतिष्ठेत । साकल्ये इति किम् ? कन्यां दृष्ट्वा वरयति । अतिथिं विदित्वा भोजयति ।

५१. यावति विन्दजीवः ।

साकल्यविशिष्टे यावच्छब्दे कर्मण्युपपदे एककर्तृके पूर्वकालेऽर्थे वर्तमानाभ्यां विन्द, जीव—इत्येताभ्यां धातोः सबन्धे णम् प्रत्ययो वा भवति । विन्देति नुमानिर्देशात् लाभार्थस्य ग्रहणम् । यावद् वेदं भुङ्क्ते । यावल्लभते तावद् भुङ्क्ते इत्यर्थः । यावज्जीवमधीते । यावज्जीवति तावदधीते इत्यर्थः । जीवे[२] पूर्वकालाऽसभवात् अपूर्वकाले एव विधिः ।

५२. चर्मोदरयोः पूरेः ।

चर्म, उदर—इत्येतयोः कर्मणोरुपपदयोः एककर्तृके पूर्वकालेऽर्थे पूरयतेर्धातोः संबन्धे णम् प्रत्ययो वा भवति ।

---

१. ततो विद्लृ नृज् लाभे इत्यस्य न स्यात् ।

२. विशेषणयावत्योगे जीवनादुत्तरकाल दानस्यासभवात् द्वयोरपि युगपदुपपत्तौ जीवतेरपूर्वकाल एव प्रत्ययः । एतच्चोपलक्षण विदेरप्य-पूर्वकाल एव, तथाहि—भोजनक्रियायामारब्धायामपरिसमाप्तायां परिवेषणादिना भोजनार्हलाभस्य [समानकालत्वात् यद्यपि भोजनादौ भोजनार्हद्रव्यलाभस्य पूर्वकालत्वमपि सभवति तथापि न विवक्षितमिति स्पष्टतया नोक्तम् । अत एव पक्षे क्त्वा प्रत्ययो न दर्शितः । तस्य पूर्वकाल एव विधानात् ।

चर्मपूरमास्ते । चर्म पूरयित्वा आस्ते इत्यर्थः । उदरपूरं शेते । उदरं पूरयित्वा शेते इत्यर्थः ।

५३. वर्षामान ऊलोपश्चास्य वा ।

कर्मण्युपपदे एककर्तृके पूरयतेर्धातोः सबन्धे णम् प्रत्ययो वा भवति अस्य च पूरयतेरूकारस्य वा लोपो भवति, समुदायेन चेद् वर्षाया मान वृष्टीयत्ता गम्यते । गोष्पदप्रं वृष्टो मेघः । गोष्पदपूरं वृष्टो मेघः । सीताप्रं सीतापूरं वा वृष्टो मेघः । यावता गोष्पदादिपूरणा भवति तावद् वृष्ट इत्यर्थः । अस्येति ग्रहणात् उपपदस्य न भवति । मूषिकबिलपूरं वृष्टो मेघः । गोष्पदप्रमिति प्रातेर्धातो **'आतो डोऽह्वावामः'** [५/२/५] इति डेन गोष्पदपूरमित्यणा च क्रियाविशेषणत्वे सिध्यति । एवं सर्वे णमन्ता प्रयोगाः[१] । तत्र णम्विधानमव्ययत्वेन तरामाद्यर्थमनुस्वारश्रवणार्थं च, तेन गोष्पदप्रतरा, गोष्पदप्रतमा, गोष्पदप्ररूप, गोष्पदप्रकल्प, देश्य, देशीय, गोष्पदपूरंतरा, तमा, रूप, कल्प, देश्य, देशीयमित्यादि सिद्ध भवति । अन्यथा हि गोष्पदप्रतर, गोष्पदपूरतरमित्याद्येव स्यात् । गोष्पदप्रेण गोष्पदप्रीभवति, गोष्पदपूरेण गोष्पदपूरीभवतीत्यादिप्रयोगास्तु ड्यणादिप्रत्ययान्ता द्रष्टव्या ।

५४. चेलार्थे क्नोपेः ।

चेलार्थे कर्मण्युपपदे क्नोपयतेरेककर्तृकेऽर्थे वर्षामाने गम्यमाने धातोः सबन्धे णम् प्रत्ययो वा भवति । चेलक्नोपं वृष्टो मेघः । वस्त्रक्नोपं, वसनक्नोपम् । यावता चेलं क्नूयते आर्द्रीभवति तावद् वृष्ट इत्यर्थः । अर्थग्रहणादत्र स्वरूपपर्याय-विशेषाणां त्रयाणामपि ग्रहणम्, तेन पटिकाक्नोपं, कम्बलक्नोपमित्यादौ चेलविशेषादपि भवति । अयमप्यपूर्वकाले विधिः ।

५५. गात्रपुरुषयोः स्नः ।

गात्र, पुरुष—इत्येतयोः कर्मणोरुपपदयोरेककर्तृकेऽर्थे वर्तमानाद् अन्तर्भूतण्यर्थात्[२] स्नातेर्वर्षामाने गम्यमाने धातोः सम्बन्धे णम् प्रत्ययो वा भवति । गात्रस्नायं वृष्टो मेघः । पुरुषस्नायं वृष्टो मेघः । यावता गात्रं पुरुषश्च स्नाप्यते तावद् वृष्ट इत्यर्थः । इद केचिदेवेच्छन्ति ।

५६. निमूले कषस्तस्यैव ।

निमूले कर्मण्युपपदे कषस्तस्यैव धातोः सबन्धे सति णम् प्रत्ययो वा भवति । निमूलमिति यत्राव्ययेऽव्ययीभावः । निर्गतानि मूलान्यस्येति बहुव्रीहिर्वा । निमूलकाषं[३] कषति । निमूलं कषतीत्यर्थः । निमूलकाषं कषितः । निमूलकाषं कषितव्यः । निमूलकाषं कष्यते । क्तादिभिरुक्तेऽपि कर्मणि तदुपपदताऽस्त्येव[४] । प्रयोगानुप्रयोगक्रिययोरैक्यादेककर्तृकत्व पूर्वकालत्वं च नास्तीत्यत्र प्रकरणे पक्षे क्त्वा न भवति । घञादय एव तु भवन्ति । निमूलस्य काषं कषति ।

५७. समूले हनश्च ।

समूले कर्मण्युपपदे हन्तेश्चकारात् कषश्च तस्यैव धातोः सबन्धे सति णम् प्रत्ययो वा भवति । समूलमिति साकल्येऽव्ययीभावो बहुव्रीहिर्वा । समूलघातं हन्ति—समूलं हन्तीत्यर्थः । समूलकाषं कषति—समूलं कषतीत्यर्थः ।

५८. शुष्कचूर्णरूक्षेषु पिषेः ।

शुष्क, चूर्ण, रूक्ष—इत्येतेषु कर्मसूपपदेषु पिषेर्णम् प्रत्ययो वा भवति तस्यैव धातोः सबन्धे सति । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । एवं चूर्णपेषं, रूक्षपेषम् ।

---

१ एतत्सूत्रोपात्ता सीताप्रमित्यादयः ।

२ एतेन उपपदयोः कर्मत्वमानीतम् ।

३ निमूलकाषमित्यादिक्रियाविशेषणस्य **'अव्ययस्य'** [३/२/७] इत्यमो लुक् ।

४. निमूललक्षणविशेषकर्मोपपदता ।

५९. जीवाऽकृतयोर्ग्रहिकृञ्भ्याम् ।

जीव, अकृत—इत्येतयोः कर्मणोरुपपदयोर्यथासंख्यं गृह्णातिकरोतिभ्यां तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । जीवग्राहं गृह्णाति—जीवन्तं गृह्णातीत्यर्थः । अकृतकारं करोति—अकृतं करोतीत्यर्थः ।

६०. साधनेषु हनः ।

साधने कारके उपपदे हन्धातोस्तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । पाणिघातं कुड्यमाहन्ति । पादघातं शिलां हन्ति । पाणिना पादेन वा हन्तीत्यर्थः । बहुवचनं व्याप्त्यर्थम्, तेन साधनपूर्वाद् हिंसार्थादपि हन्तेः अनेनैव[1] णम् । अस्युपघातमरीन् हन्ति । शरोपघातं मृगान् हन्ति । तथा च सति नित्यसमासः[2] तस्यैव धातोरनुप्रयोगश्च सिध्यति ।

६१. हस्तार्थे ग्रहवर्तिवृतः ।

हस्तार्थे साधने उपपदे ग्रहवर्तिवृद्भ्यो धातुभ्यस्तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । हस्तग्राहं गृह्णाति । एवं करग्राहं, पाणिग्राहं—हस्तेन गृह्णातीत्यर्थः । वर्तिवृत इति वर्ततेर्ण्यन्तस्याऽण्यन्तस्य च ग्रहणम् । हस्तवर्तं वर्तयति । करवर्तं, पाणिवर्तं—हस्तेन वर्तयतीत्यर्थः । हस्तवर्तं वर्तते । करवर्तं, पाणिवर्तं—हस्तेन वर्तत इत्यर्थः । अण्यन्तान्नेच्छन्त्येके ।

६२. स्वस्नेहनार्थयोः पुषपिषिभ्याम् ।

आत्मा आत्मीयं ज्ञातिर्धनं च स्वम् । स्निह्यते मिच्यते येनोदकादिना तत्स्नेहनम् । स्वार्थे स्नेहनार्थे च साधने उपपदे यथासंख्यं पुषपिषिभ्यां धातुभ्यां तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । स्वपोषं पुष्णाति पुष्यति पोषति वा । एवमात्मपोषं, गोपोषं, महिषीपोषं, पितृपोषं, मातृपोषं, धनपोषं, रैपोषम् । स्वादिभिः पुष्णातीत्याद्यर्थः । स्नेहनार्थे—उदपेषं पिनष्टि । एवं घृतपेषं, तैलपेषं, क्षीरपेषम् । उदकादिना पिनष्टीत्यर्थः ।

६३. बन्धेः संज्ञायाम् ।

साधने उपपदे बध्नातेर्धातोस्तस्यैव धातोः संबन्धे सति णम् प्रत्ययो भवति संज्ञाया विषये । क्रौञ्चबन्धं बद्धः । मयूरिकाबन्धं बद्धः । मर्कटबन्धं बद्धः । गोबन्धं बद्धः । महिषीबन्धं बद्धः । अट्टालिकाबन्धं बद्धः । चण्डालिकाबन्धं बद्धः । क्रौञ्चाद्याकारो बन्धः क्रौञ्चादिरित्युच्यते । तेन बन्धेन बद्ध इत्यर्थः । बन्धविशेषाणां संज्ञा एताः । संज्ञात्वान्नित्यो विधिः ।

६४. आधारे ।

आधारे कारके उपपदे बन्धेस्तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । चक्रबन्धं बद्धः । चारकबन्धं बद्धः । कूटबन्धं बद्धः । गुप्तिबन्धं बद्धः । चक्रादिषु बद्ध इत्यर्थः । ग्रामेबद्धः, हस्तेबद्ध इति बहुलाधिकारान्न भवति ।

६५. कर्त्रोर्जीवपुरुषयोर्नशिवहिभ्याम् ।

कर्तृवाचिनो जीव, पुरुष—इत्येतयोरुपपदयोर्यथासंख्यं नशिवहिभ्यां धातुभ्यां तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । जीवनाशं नश्यति—जीवन्नश्यतीत्यर्थः । पुरुषवाहं वहति—पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः । कर्त्रोरिति किम् ? जीवेन नश्यति । पुरुषं वहति ।

६६. ऊर्ध्वे शुषिपूरेः ।

ऊर्ध्वे कर्तर्युपपदे शुषिपूरिभ्यां धातुभ्यां तस्यैव धातोः संबन्धे सति णम् प्रत्ययो वा भवति । ऊर्ध्वशोषं शुष्यति ।

---

१. न तु **'हिंसार्थादेकर्मणः'** [६/१/७०] इत्यनेन ।

२. **'हिंसार्थादेकर्मणः'** [६/१/७०] इत्यनेन तु प्रत्यये **'तृतीयाप्रभृतीन्यन्यतरस्याम्'** [३/१/६६] इति वा समासः स्यात् ।

ऊर्ध्वं शुष्यतीत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वः पूर्यत इत्यर्थः।

६७. कर्मणि चोपमाने।

उपमीयतेऽनेन इति उपमानम्। उपमाने कर्मणि कर्तरि चोपपदे धातोस्तस्यैव धातोः संबन्धे णम् प्रत्ययो वा भवति। सुवर्णनिधाय निहितः। सुवर्णमिव निहित इत्यर्थः। एवं रत्ननिधायं, घृतनिधायम्। शककलेशं क्लिष्टः। ओदनपाचं पक्वः। कर्तरि—काकनाशं नष्टः। काक इव नष्ट इत्यर्थः। अभ्रविलायं विलीनः। अभ्रमिव विलीन इत्यर्थः।

६८. उपे किरो लवने।

लवन इति वचनात् तस्यैव[1] इति निवृत्तम्। उप उपपदे किरतेर्लवनेऽर्थे वर्तमानस्याऽन्दस्य धातोः संबन्धे सति णम् प्रत्ययो वा भवति। उपस्कारं मद्रका लुनन्ति। विक्षिपन्तो लुनन्तीत्यर्थः[2]। लवन इति किम्? उपकीर्य गच्छति।

६९. दंशेस्तृतीयायाम्।

तृतीयान्ते उपपदे एककर्तृकेऽर्थे उपपूर्वाद् दशेरन्यस्य धातोः सबन्धे सति णम् प्रत्ययो वा भवति। मूलकेनोपदंशं भुङ्क्ते। मूलकोपदंशं भुङ्क्ते। आर्द्रकेणोपदंशं भुङ्क्ते। आर्द्रकोपदशं भुङ्क्ते। **'तृतीयादीनि वा'** [३/१/६६] इति विकल्पेन समासः। मूलकाद्युपदशेः कर्मापि प्रधानस्य भुजेः साधनमिति तृतीयैव भवति। पक्षे मूलकेनोपदश्य भुङ्क्ते। आर्द्रकेणोपदश्य भुङ्क्ते।

७०. हिंसार्थादेककर्मणः।

तृतीयान्ते उपपदे एककर्तृकेऽर्थे वर्तमानेभ्यो हिंसार्थेभ्य एककर्मभ्यो धातुभ्यो धातोः सबन्धे णम् प्रत्ययो वा भवति। दण्डेनोपघातं गाः सादयति। दण्डोपघातं गाः सादयति। खड्गेन प्रहारं, खड्गप्रहारं शत्रून् विजयते। दण्डेनाताडं, दण्डाताडं गाः कलयति। पक्षे दण्डेनोपहत्येत्यादि। हिंसार्थादिति किम्? चन्दनेनानुलिम्प्य बाला भूषयति। एककर्मण इति किम्? दण्डेनाहत्य चौरं गोपालको गाः खेटयति।

७१. सप्तम्यां च प्रमाणसमासत्त्योः।

आयाममानं प्रमाणम्। सरम्भपूर्वकः संनिकर्षः समासत्तिः। सप्तम्यन्ते चकारात् तृतीयान्ते चोपपदे एककर्तृकेऽर्थे वर्तमानाद् धातोः सबन्धे सति णम् प्रत्ययो वा भवति प्रमाणे समासत्तौ च गम्यमानायाम्। द्वयङ्गुले उत्कर्षं—द्वयङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति। द्वयङ्गुलेनोत्कर्षं—द्वयङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति। समासत्तौ—केशेषु ग्राहं—केशग्राहं युध्यन्ते। केशैर्ग्राहं—केशग्राहं युध्यन्ते। एवं हस्तग्राहम्। अरयपनोदं युध्यन्ते। युद्धसंरम्भादत्यन्तं संनिकृष्य युध्यन्ते इत्यर्थः। पक्षे द्वयङ्गुले उत्कृष्य, द्वयङ्गुलेनोत्कृष्य गण्डिकाश्छिनत्ति। केशेषु गृहीत्वा, केशैर्गृहीत्वा युध्यन्ते।

७२. उपपीडरुधकर्षस्तयोः[3]।

तयोरिति सप्तम्यन्ते तृतीयान्ते चोपपदे एककर्तृकेऽर्थे वर्तमानेभ्य उपपूर्वेभ्यः पीडरुधकर्षतिभ्यो धातुभ्यो धातोः संबन्धे णम् प्रत्ययो वा भवति। पार्श्वयोरुपपीडं शेते—पार्श्वोपपीडं शेते। पार्श्वाभ्यामुपपीडं शेते—पार्श्वोपपीडं शेते। व्रजे उपरोधं—व्रजोपरोधं गाः स्थापयति। व्रजेनोपरोधं—व्रजोपरोधं गाः सादयति। पाणावुपकर्षं—पाण्युपकर्षं धाना गृह्णाति। पाणिनोपकर्षं—पाण्युपकर्षं धाना पिनष्टि। कर्ष इति अब्निर्देशाद् भौवादिकस्य कर्षन्ति शाखां ग्राममिति द्विकर्मकस्या-

---

१. इत ऊर्ध्वं तस्यैवान्यस्य वेति कामचारः, परं यत्र तस्यैव तत्र क्रियाविशेषणमेव।

२. पूर्वं विक्षिपन्तः पश्चाल्लुनन्तीत्यर्थः।

३. पीडश्च रुधश्च कर्षश्च पीडरुधकर्षम्। उपः पूर्वो यस्मात् तदुपपूर्वम्। उपपूर्वं च तत् पीडरुधकर्षं चेति कर्मधारयस्तस्मात्। निर्देशस्य सौत्रत्वात् कर्षशब्दाऽकारलोपः।

कर्षणार्थस्य ग्रहणं न तु तौदादिकस्य पञ्चभिर्हलैः कृषतीति विलेखनार्थस्य, तेन भूमावुपकृष्य तिलान् वपति, हलेनोपकृष्य वपतीत्यत्र न भवति। उपेति किम्? पार्श्वेन निपीड्य तिष्ठति। अन्ये तु उपपूर्वादेव पीडेरिच्छन्ति, शेषाभ्यां तु कामचारेण[1]। तेन व्रजरोधं, व्रजोपरोधं, व्रजानुरोधं वा गाः स्थापयति। एवं पाणिकर्षं, पाणौ कर्षं, पाणिना कर्षं वा धाना गृह्णाति इत्याद्यपि भवति।

७३. पञ्चम्यां त्वरायाम्।

त्वरा परीप्सा औत्सुक्यमिति यावत्। पञ्चम्यन्ते उपपदे एककर्तृकेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे णम् प्रत्ययो वा भवति त्वरायां गम्यमानायाम्। शय्याया उत्थायं—शय्योत्थायं धावति। एतादृक् त्वरते यदावश्यकादिकमपि नापेक्षते। शय्योत्थानमात्रमेवाद्रियते इत्यर्थः। स्तनरन्ध्रादपकर्षं—स्तनरन्ध्रापकर्षं पयः पिबति। एतादृक् त्वरते यत्पात्रे दुग्धागमनमपि अप्रतीक्ष्य मुखे एव स्तनं लगयतीत्यर्थः। पक्षे शय्याया उत्थाय धावति। त्वरायामिति किम्? आसनादुत्थाय गच्छति।

७४. द्वितीयायाम्।

द्वितीयान्ते उपपदे एककर्तृकेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे सति णम् प्रत्ययो वा भवति त्वरायां गम्यमानायाम्। लोष्ठान् ग्राहं—लोष्ठग्राहं युध्यन्ते। यष्टीग्राहं—यष्टिग्राहं युध्यन्ते। दण्डमुद्यामं—दण्डोद्यामं धावति। एवं नाम योद्धुं त्वरन्ते यदायुधग्रहणमपि नाद्रियन्ते, यत्किंचिल्लोष्ठादिकमासन्नं भवति तदेव गृह्णन्तीत्यर्थः। पक्षे लोष्ठान् यष्टीर्वा गृहीत्वा युध्यन्ते। त्वरायामिति किम्? खड्गं गृहीत्वा युध्यन्ते। योगविभाग उत्तरार्थः।

७५. अध्रुवे स्वाङ्गे।

अविकारोऽद्रवं मूर्तमित्यादिलक्षणं स्वाङ्गम्। यस्मिन्नङ्गे छिन्ने भिन्ने वा प्राणी न म्रियते तदऽध्रुवम्। अध्रुवे स्वाङ्गे द्वितीयान्ते उपपदे एककर्तृकेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे णम् प्रत्ययो वा भवति। भ्रुवौ विक्षेपं—भ्रूविक्षेपं जल्पति। अक्षिणी निकाणमक्षिनिकाणं हसति। केशान् परिधायं—केशपरिधायं नृत्यति। पक्षे भ्रुवौ विक्षिप्य जल्पतीत्यादि। अध्रुवे इति किम्? शिर उत्क्षिप्य कथयति। स्वाङ्गे इति किम्? कफमुन्मूल्य जल्पति।

७६. परिक्लिश्यमाने।

परि समन्तात् क्लिश्यमानं परिक्लिश्यमानम्। परिक्लिश्यमाने स्वाङ्गे द्वितीयान्ते उपपदे एककर्तृकेऽर्थे वर्तमानाद् धातोर्धातोः संबन्धे णम् प्रत्ययो वा भवति। ध्रुवार्थोऽयमारम्भः। उरांसि प्रतिपेषं—उरःप्रतिपेषं युध्यन्ते। शिरांसि छेदं—शिरश्छेदं युध्यन्ते। उरांसि परितः पीडयन्तः शिरांसि छिन्दन्तो युध्यन्ते इत्यर्थः। पक्षे उरांसि प्रतिपिष्य, शिरांसि छित्त्वा।

७७. विशि-पति-पदि-स्कन्दिभ्यो वीप्साभीक्ष्ण्ययोः।

श्रुतत्वात् विश्यादिक्रियाभिः साकल्येनोपपदार्थानां व्याप्तुमिच्छा वीप्सा। प्रकृत्यर्थस्य पौनःपुन्येन आसेवनं आभीक्ष्ण्यम्। आभीक्ष्ण्यं तिबाद्यव्ययकृतां धर्मः। द्वितीयान्ते उपपदे एककर्तृकेऽर्थे वर्तमानेभ्यो विशादिभ्यो धातुभ्यो वीप्सायामाभीक्ष्ण्ये च गम्यमाने धातोः संबन्धे सति णम् प्रत्ययो वा भवति। गेहं गेहमनुप्रवेशं गेहानुप्रवेशमास्ते। गेहमनुप्रवेशमनुप्रवेशं गेहानुप्रवेशमास्ते। गेहं गेहमनुप्रपातं गेहानुप्रपातमास्ते। गेहमनुप्रपातमनुप्रपातं गेहानुप्रपातमास्ते। गेहं गेहमनुप्रपादं गेहानुप्रपादमास्ते। गेहमनुप्रपादमनुप्रपादं गेहानुप्रपादमास्ते। गेहं गेहमवस्कन्दं गेहावस्कन्दमास्ते। गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते। पक्षे गेहं गेहमनुप्रविश्यास्ते। गेहमनुप्रविश्याऽनुप्रविश्यास्ते इत्यादि। वीप्सायामुपपदस्याभीक्ष्ण्ये तु धातोर्द्विर्वचनम्। गेहानुप्रवेशमास्ते इत्यादौ तु वीप्साभीक्ष्ण्ययोः शब्दशक्तिस्वाभाव्यात् समासेनैवोक्त इति द्विर्वचनं न

---

१. निरुपसर्गाभ्यामुपपूर्वाभ्यामन्योपसर्गपूर्वाभ्यां चेत्यर्थः।

भवति । आभीक्ष्ण्ये णम् सिद्ध एव[1] । विकल्पेन[2] उपपदसमासार्थं वचनम् । तेन हि समासाऽभावः स्यात् । वीप्साभीक्ष्ण्ययोरिति किम् ? गेहमनुप्रविश्यास्ते ।

७८. असूतृषः क्रियान्तरे काले ।

द्वितीयायामित्यनुवर्तते । क्रियामन्तरयतीति क्रियान्तरः क्रियाव्यवधायकः । द्वितीयान्तेषु कालवाचिषूपपदेषु क्रियान्तरे वर्तमानाभ्यामस्यतितृषिभ्यां धातुभ्यां धातोः सबन्धे सति णम् प्रत्ययो वा भवति एककर्तृकेऽर्थे । द्व्यहमत्यासं द्व्यहात्यासं गावः पिबन्ति । द्व्यहं तर्षं द्व्यहतर्षं गावः पिबन्ति । अत्यासेन तर्षेण च गवां पानक्रिया व्यवधीयते । अद्य पीत्वा द्व्यहमतिक्रम्य पिबन्तीत्यर्थः । अन्तर्मुहूर्तमत्यासमन्तर्मुहूर्तात्यासं सम्यक् पश्यन्ति । सम्यग् दृष्ट्वा अन्तर्मुहूर्तं मिथ्यात्व-मनुभूय पुनः सम्यग्दृष्टयो भवन्ति इत्यर्थः । पक्षे द्व्यहमत्यस्य तर्षित्वा वा गावः पिबन्ति । असूतृष इति किम् ? द्व्यहमुपोष्य भुङ्क्ते । क्रियान्तरे इति किम् ? अहरत्यस्येषून्[3] गतः । इहात्यासेनाहरिषवश्च व्याप्यन्ते न तु गतिक्रिया व्यवधीयते । काले इति किम् ? योजनमत्यस्य गावः पिबन्ति । योजनं तर्षित्वा गावः पिबन्ति ।

७९. नाम्न्यादिशिग्रहः ।

द्वितीयायामित्यनुवर्तते । नामशब्दे द्वितीयान्ते उपपदे एककर्तृकेऽर्थे वर्तमानादादिशेर्ग्रहेश्च धातोर्धातोः सबन्धे सति णम् प्रत्ययो वा भवति । नामान्यादेशं नामादेशं ददाति । नामानि ग्राहं नामग्राहमाह्वयति । नामानि[4] देवदत्तो ग्राहं नामग्राहं देवदत्त आह्वयति । पक्षे नामादिश्य दत्ते । नाम गृहीत्वा दत्ते ।

८०. अव्ययेऽनिष्टोक्तौ कृञः क्त्वाणमौ ।

द्वितीयायामिति निवृत्तमसंभवात् । अव्यये उपपदे एककर्तृकेऽर्थे वर्तमानात् करोतेर्धातोरनिष्टायामुक्तौ गम्यमानायां धातोः संबन्धे सति क्त्वा, णम् इत्येतौ प्रत्ययौ भवतः । ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! नीचैः कृत्वा नीचैःकृत्य कथयसि । किं तर्हि नीचैर्वृषल ! कारं वृषल ! नीचैःकारं कथयसि । उच्चैर्नाम प्रियमाख्येयम् । ब्राह्मण ! कन्या ते गर्भिणी, किं तर्हि वृषल ! उच्चैः कृत्वा उच्चैःकृत्य कथयसि । किं तर्हि उच्चैर्वृषल ! कारं वृषलोच्चैःकारं कथयसि । नीचैर्नामाऽप्रियमाख्येयम् । अनिष्टोक्ताविति किम् ? उच्चैः कृत्वाचष्टे ब्राह्मण ! पुत्रस्ते जात इति । नीचैः कृत्वाचष्टे ब्राह्मण ! कन्या ते गर्भिणी जातेति । अव्यये इति किम् ? ब्राह्मण ! पुत्रस्ते जातः, किं तर्हि वृषल ! मन्दं कृत्वा कथयसि । ब्राह्मण ! कन्या ते गर्भिणी जातेति किं तर्हि वृषल ! तारं कृत्वा कथयसि । विकल्पाधिकारेणैव पक्षे क्त्वासिद्धौ समासार्थं तद्विधानम् । अन्यथा हि णम एव पाक्षिकः समासः स्यात् न तु क्त्वः । क्त्वा चेत्यकृत्वा णम्विधानमुत्तरत्रप्रत्ययद्वयानु-वर्तनार्थम् ।

८१. तिर्यच्यपवर्गे ।

अपवर्गः क्रियासमाप्तिः समाप्तिपूर्वको वा विरामः त्यागो वा । तस्मिन् गम्यमाने तिर्यक्शब्दे उपपदे एककर्तृकेऽर्थे वर्तमानात् करोतेर्धातोर्धातोः सबन्धे सति क्त्वा, णम् इत्येतौ प्रत्ययौ भवतः । तिर्यक्कृत्वा, तिर्यक्कृत्य[5], तिर्यक्कारमास्ते । समाप्य विरम्य वा उत्सृज्य वास्ते इत्यर्थः । अपवर्गे इति किम् ? तिर्यक्कृत्वा काष्ठं गतः ।

---

१. **'णम् चाभीक्ष्ण्ये'** [६/१/४४] इत्यनेन ।
२ **'तृतीयायोनि वा'** [३/१/६६] इत्यनेन ।
३. अत्यसनेन गतेर्व्यवधानं नास्ति, नहि गत्वा पुनरेकमहरत्यस्य गच्छतीत्येवंविधोऽर्थोऽत्र प्रतिपाद्यते किं तर्हि अहरिषूनत्यस्य गत इति ।
४. **यस्य येनाभिसंबन्धो दूरस्थस्यापि तेन सः** इति न्यायात् देवदत्तपदेन व्यवधानेऽपि भवति ।
५. समाप्त्यादिद्योतकात् तिर्यक्शब्दात् प्रथमा । वाचकाद् द्वितीया । तिर्यक् समाप्तिं कृत्वा । द्योतकपक्षे समुदायेनार्थः कथ्यते तिर्यक्कार लक्षणेन ।

८२. स्वाङ्गे तसि भुवश्च ।

चकारात् कृञ इत्यनुवर्तते । पूर्वोक्तलक्षणं स्वाङ्गम् । तस्प्रत्ययान्ते स्वाङ्गवाचिनि शब्दे उपपदे एककर्तृकेऽर्थे वर्तमानात् भवतेः करोतेश्च धातोर्धातोः सबन्धे सति क्त्वा, णम् इत्येतौ प्रत्ययौ भवतः । मुखतो भूत्वा, मुखतोभूय, मुखतोभावमास्ते । मुखतः कृत्वा, मुखतःकृत्य, मुखतःकारमास्ते । पार्श्वतो भूत्वा, पार्श्वतोभूय, पार्श्वतोभावं शेते । पार्श्वतः कृत्वा, पार्श्वतःकृत्य, पार्श्वतःकारं शेते । पृष्ठतो भूत्वा, पृष्ठतोभूय, पृष्ठतोभावं गतः । पृष्ठतः कृत्वा, पृष्ठतःकृत्य, पृष्ठतःकारं गतः । स्वाङ्ग इति किम् ? सर्वतो भूत्वास्ते । सर्वतः कृत्वा गतः । तसीति किम् ? मुखीभूय गतः, मुखे भूत्वा गतः । मुखीकृत्य गतः, मुखे कृत्वा गतः ।

८३. नानाविनाधार्थे च्व्यर्थे कृञश्च ।

च्व्यर्थे नाना, विना—इत्येतयोर्धार्थप्रत्ययेषु चोपपदेषु एककर्तृकेऽर्थे वर्तमानात् करोतेश्चकाराद् भवतेश्च धातोर्धातोः संबन्धे सति क्त्वा, णम् इत्येतौ प्रत्ययौ भवतः । अनाना नाना भूत्वा गतः—नाना भूत्वा, नानाभूय, नानाभावं गतः । अनाना नाना कृत्वा गतः—नाना कृत्वा, नानाकृत्य, नानाकारं गतः । एवं विना भूत्वा, विनाभूय, विनाभावं गतः । विना कृत्वा, विनाकृत्य, विनाकारं गतः । धार्था धाध्यमुञ्धमुञेधाः । द्विधा भूत्वा, द्विधाभूय, द्विधाभावमास्ते । द्विधा कृत्वा, द्विधाकृत्य, द्विधाकारं गतः । ऐकध्यं भूत्वा, ऐकध्यभूय, ऐकध्यभावमास्ते । ऐकध्यं कृत्वा, ऐकध्यंकृत्य, ऐकध्यंकारं गतः । द्वैधं भूत्वा, द्वैधंभूय, द्वैधंभावमास्ते । द्वैधं कृत्वा, द्वैधंकृत्य, द्वैधंकारं गतः । द्वेधा भूत्वा, द्वेधाभूय, द्वेधाभावमास्ते । द्वेधा कृत्वा, द्वेधाकृत्य, द्वेधाकारं गतः । धणस्तु प्रकारविचालवदर्थत्वेन अधार्थत्वात्[1] अव्ययाधिकाराच्च[2] निरासः । अस्यापि ग्रहणमित्यन्ये । च्व्यर्थे इति किम् ? नाना कृत्वा भक्ष्याणि भुङ्क्ते । द्विधा कृत्वा काष्ठानि गतः ।

८४. भुवस्तूष्णीमि ।

तूष्णीशब्दे उपपदे एककर्तृकेऽर्थे वर्तमानाद् भवतेर्धातोर्धातोः सबन्धे सति क्त्वा, णम् इत्येतौ प्रत्ययौ भवतः । तूष्णीं भूत्वा, तूष्णींभूय, तूष्णींभावमास्ते । तूष्णींशब्दो मौने तद्वति च, तेन अयमर्थो मौनेन सह भूत्वा मौनवान् वा भूत्वास्त इत्यर्थः । भूग्रहणं कृञो निवृत्त्यर्थम् ।

८५. अन्वच्यानुलोम्ये ।

आनुलोम्यमनुकूलता परचित्ताराधनम् । अन्वगिति अव्यये उपपदे एककर्तृकेऽर्थे वर्तमानात् भवतेर्धातोर्धातोः संबन्धे सति आनुलोम्ये गम्यमाने क्त्वा, णम् इत्येतौ प्रत्ययौ भवतः । अन्वग्भूत्वा, अन्वग्भूय, अन्वग्भावमास्ते । अनुकूलो भूत्वा तिष्ठतीत्यर्थः । आनुलोम्य इति किम् ? अन्वग्भूत्वा विजयते शत्रुः । पश्चाद् भूत्वा इत्यर्थः ।

---

१. धार्थो हि प्रकारो विचालो वाऽयं तु तद्वति ।
२. अव्ययत्वाभावश्चास्य 'अधण्तस्वा...' [१/१/५०] इत्यत्र वर्जनात् ।

द्वितीयश्चरणः

१. तद्धिताः[1] ।

अधिकारोऽयम् । इतो वक्ष्यमाणाः प्रत्ययाः अणादयस्तद्धितसञ्ज्ञका वेदितव्याः । तद्धितसञ्ज्ञाप्रयोजनं तु **'ऋतो रस्तद्धिते ये'** [१/२/३३] इत्यादि ।

२. वा ।

अधिकारोऽयं आ तद्धितपरिसमाप्तेः । ते च वक्ष्यमाणाः अणादयः प्रत्ययाः विकल्पेन भवन्ति, तेन पक्षे वाक्यसमासावपि । औपगवः, उपगोरपत्यं, उपग्वपत्यमित्यादि ।

३. वंश्ये जीवति प्रपौत्राद्यस्त्री युवा ।

वंशे भवो वंश्यः[2], पित्रादिरात्मोत्पत्ते कारणम् । प्रपौत्रः पौत्रापत्यम् । वंश्ये जीवति सति स्त्रीवर्जितं प्रपौत्राद्यपत्यं युवसञ्ज्ञं भवति । गार्ग्यायणः, वात्स्यायनः । वंश्य इति किम् ? अन्यस्मिन् जीवति गार्ग्यः । जीवतीति किम् ? मृते गार्ग्यः । प्रपौत्रादीति किम् ? पौत्रो गार्ग्यः । अस्त्रीति किम् ? स्त्री गार्गी । युवसंज्ञाप्रयोजनं तु **'यूनि लुक्'** [६/२/१४७] इत्यादि ।

४. भ्रातरि ज्यायसि ।

ज्यायान् भ्राता वयोऽधिक एकपितृकः एकमातृको वा । ज्यायसि भ्रातरि जीवति सति स्त्रीवर्जितं प्रपौत्राद्यपत्यं युवसञ्ज्ञं भवति । गार्ग्यस्य द्वौ पुत्रौ, तयोः कनीयान् मृते पित्रादौ वंश्ये जीवति च ज्यायसि भ्रातरि युवसञ्ज्ञो भवतीति भावार्थः । अवश्यार्थोऽयमारम्भः । पूर्वजाः पित्रादयो वंश्या इत्युच्यन्ते । भ्राता तु न वंश्यः अकारणत्वात् । गार्ग्ये ज्येष्ठ-भ्रातरि जीवति अस्य[3] गार्ग्यायणः, कनीयान् भ्राता वात्स्यायनः, दाक्षायणः । ज्यायसीति किम् ? कनीयसि भ्रातरि जीवति ज्येष्ठो भ्राता गार्ग्यः ।

५. सपिण्डे वयःस्थानाधिके जीवद्वा ।

ययोरेकः पूर्वः सप्तमः पुरुषस्तौ अन्योन्यस्य सपिण्डौ । वयो यौवनादि । स्थानं पिता पुत्र इत्यादि । मूलपुरुषस्य स्त्रीवर्जितं प्रपौत्राद्यपत्यं वयःस्थानाभ्यां द्वाभ्यामप्यधिके सपिण्डे जीवति जीवदेव युवसंज्ञं वा भवति । पितृव्ये[4] पितामहस्य

---

१. तस्मै लौकिकवैदिकशब्दसन्दर्भाय ताभ्यः प्रकृतिविकृतिभ्यो वा हितः । **'हितादिभिः'** [३/१/५७] इति समासः ।

२. आदिपुरुषे रूढिवशाद् वर्त्तते ।

३. ज्येष्ठभ्रातुः ।

४. न वाच्यं पितृव्ये वाच्ये वंश्यद्वारा **'वंश्ये जीवति'**...' [६/२/३] इत्यादिनैव भविष्यति । पितृव्यस्य वंश्यताया अभावात् । पित्रादिरात्मनः कारणमिति ह्युक्तम् ।

भ्रातरि वा वयोऽधिके जीवति जीवद् गार्ग्यस्यापत्यं गार्ग्यः गार्ग्यायणो वा। वात्स्यः वात्स्यायनो वा। सपिण्ड इति किम् ? अन्यत्र मातुलादौ गार्ग्यः। वयःस्थानाधिक इति किम् ? द्वाभ्यामन्यतरेण वा न्यूने गार्ग्यः। जीवदिति किम् ? मृतो गार्ग्यः। जीवतीति किम् ? मृते गार्ग्यः। प्रपौत्रादीति किम् ? पौत्रो गार्ग्यः। अस्त्रीति किम् ? स्त्री गार्गी।

६. युवपौत्रादी कुत्साऽर्चयोः।

वेत्यनुवर्तते। युवसंज्ञकं स्त्रीवर्जित पौत्रादिश्चापत्यं यथासंख्यं कुत्सायामर्चायां च विषये युवसंज्ञं वा भवति। यूनः कुत्सायां पक्षे युवत्व' निवर्त्यते, तत्र पौत्रादिप्रत्ययेनाभिधानं भवति। गार्ग्यस्यापत्यं युवा कुत्सितः गार्ग्यः गार्ग्यायणो वा जाल्मः। गुर्वायत्तो भूत्वा स्वतन्त्रो यः स एवमुच्यते। कुत्साया अन्यत्र गार्ग्यायण एव। पौत्रादेश्चाऽर्चायां पक्षे युवत्व प्राप्यते। तत्र युवप्रत्ययेनाभिधान भवति। गर्गस्यापत्यं पौत्रार्चितं तत्रभवान् गार्ग्यायणः गार्ग्यो वा। अर्चाया अन्यत्र गार्ग्य एव। अस्त्रीति किम् ? गर्गस्यापत्य पौत्रादि स्त्री गार्गी।

७. जनपदशब्दात्क्षत्रियोऽपत्ये रूढः।

जनपदशब्दो यः क्षत्रियवाची सोऽपत्ये विवक्षिते रूढसंज्ञो भवति। रूढत्वाऽस्य। विदेहस्य राज्ञोऽपत्य—वैदेहः। ऐक्ष्वाकः, पाञ्चालः। जनपदशब्द इति किम् ? दशरथस्यापत्यं—दाशरथिः। क्षत्रिय इति किम् ? पञ्चालस्य ब्राह्मणस्यापत्य—पाञ्चालि। रूढसंज्ञाप्रयोजन तु **'रूढादण्'** [६/२/१२३] इत्यादि।

८. क्षत्रियशब्दजनपदो राजनि।

क्षत्रियशब्दो यः जनपदवाची स च राजनि विवक्षिते रूढसंज्ञको भवति। विदेहानां जनपदस्य राजा—वैदेहः। पाञ्चालः। क्षत्रियशब्द इति किम् ? सुराष्ट्राणां राजा—सौराष्ट्रकः। पञ्चालस्य ब्राह्मणस्य राजा—पाञ्चालः। **'तस्येदं'** [७/१/११२] इत्यण्। जनपद इति किम् ? दशरथस्य राजा—दाशरथः। **'तस्येदं'** [७/१/११२] इत्यण्। सत्स्वपि प्रत्युदाहरणरूपेषु सदृशेषु अन्निमित्तकः सघाङ्कादिभेदो भविष्यति।

९. संज्ञा वृद्धं वा।

या संज्ञा व्यवहाराय नियुज्यते सा वृद्धसंज्ञका वा भवति। देवदत्तीया, दैवदत्ताः। सिद्धसेनीयाः, सैद्धसेनाः। वृद्धसंज्ञाप्रयोजन तु **'वृद्धादीयः'** [६/४/३२] इत्यादि।

१०. त्यदादिः।

सर्वाद्यन्तर्गतास्त्यदादयः शब्दाः वृद्धसंज्ञका भवन्ति। त्यदीय, तदीयं, यदीयं, इदमीयं, अदसीयं, एतदीयं, एकीयं, द्वीयं, युष्मदीयं, अस्मदीय, किमीयम्। त्यादायनिः, यादायनिः, भावतायनिः—**'वृद्धादपौत्रादेर्वा'** [६/२/८४] इति आयनिञ्।

११. वृद्धिर्यस्य स्वरेष्वादिः।

यस्य शब्दस्य स्वरेषु मध्ये आदिस्वरो वृद्धिसंज्ञोऽस्ति स शब्दः वृद्धसंज्ञको भवति। आम्रगुप्तायनिः, आम्बष्ठ्यः, शालीयः, मालीयः, ऐतिकायनीयः, औपगवीयः। वृद्धिरिति किम् ? दत्तस्येमे—दात्ताः। यस्येति संज्ञिनिर्देशार्थम्। अनेन हि स इति निर्दिश्यते। यद्यपि वृद्धिः स्वराणामेव भवति तथापि स्वरेषु इति ग्रहणं हसादेरपि स्यादित्येवमर्थम्। केवलमादिवृद्धिग्रहणेन तु स्वरादिरेव गृह्येत। आदिरिति किम् ? सभासन्नयने भवः—साभासन्नयनः।

---

१. **'वंश्ये जीवति....'** [६/२/३] इत्यादिना नित्यं प्राप्तम्।

१२. एवोद्देश एवेयादौ ।

देश एव वर्तमानस्य यस्य शब्दस्य स्वरेष्वादि स्वर एकार ओकारो वा स्यात् स ईयादौ[1] प्रत्यये विधातव्ये वृद्धसञ्ज्ञको भवति । सैपुरिका[2], सैपुरिकी । स्कौनगरिका, स्कौनगरिकी । सेपुर स्कोनगर च वाहीकग्रामौ । देश इति किम् ? दैववाचकं नन्द्यध्ययनम् । एवकारोऽन्यत्र वृत्तिव्यवच्छेदार्थ , तेन देशे अन्यत्र च वर्तमानस्य न भवति । क्रोड नामोदग्ग्रामस्तत्र भव. - क्रौड: । देवदत्त नाम वाहीकग्रामस्तत्र भव —दैवदत्त । क्रोडशब्द स्वाङ्गेऽपि वर्तते । देवदत्तशब्द. पुस्यपि क्रियाशब्दश्च । ईयादाविति किम् ? आयनिञादौ न भवति ।

१३. प्राग्देशे ।

प्राग्देशे वर्तमानस्य यस्य शब्दस्य स्वरेष्वादि स्वर एकार ओकारो वा भवति स ईयादौ प्रत्यये विधातव्ये वृद्धसंज्ञको भवति । क: पुन: प्राग्देश. ? य शरावत्या सरित पूर्वोत्तरेण वहन्त्या पूर्वतो दक्षिणतो वा भवति । यस्तु पश्चिमत उत्तरतो वा स उदक् । यदाहु —

प्रागुदञ्चौ विभजते हस क्षीरोदके यथा ।
विदुषां शब्दसिद्धयै या सा व: पातु शरावती ॥

एणीपचने भव:– एणीपचनीय । गोनर्दीय., भोजकटीय., काशवृक्षीय., गोमयह्रदीय , एकचक्रक । क्रोड नाम प्राग्ग्रामस्तत्र भव —क्रोडीय । देवदत्त नाम प्राग्ग्रामस्तस्य काश्यादिपाठात् णिकेकणौ—दैवदत्तिका, दैवदत्तिकी । पूर्वसूत्रस्य देशग्रहणमेवकारेण सबद्धमिति पुनरिह देशग्रहणम् । देश एवेति नियमनिवृत्त्यर्थ वचनम् ।

१४. प्राग्दीव्यतेरण् ।

'तेन दीव्यतिखनतिजयतिजितेषु' [७/२/२] इति वक्ष्यते, तत प्राग् येऽर्था अपत्यादयस्तेष्वपवादविषय परित्यज्य अण् प्रत्ययो वा भवति । उपगोरपत्य—औपगव । मञ्जिष्ठया रक्त वस्त्र—माञ्जिष्ठम् । भिक्षाणा समूह —भैक्षम् । अश्मनो विकार —आश्मन । स्रुघ्ने भव —स्रौघ्न । णकारो वृद्ध्यर्थ । अधिकार. परिभाषा विधिर्वाऽयम्[3] ।

१५. धनादे: पत्यु ।

धनादेर्गणात् परो य पतिशब्दस्तदन्ताद् धनपतीत्येवमादे. प्राग्दीव्यतीयेऽर्थे अण् प्रत्ययो वा भवति । धनपतेरपत्य, तत्र भवस्तत आगतो वा धानपत । आश्वपत । राष्ट्रपतेरिद—राष्ट्रपतम् । धान्यपत, प्राणपतम् । धनादिगणो यथा—धन, अश्व, गज, शत, गण, कुल, गृह, पशु, धर्म, धन्वन्, सभा, सेना, क्षेत्र, अधि, राष्ट्र, धान्य, प्राण इति धनादि: । पत्युत्तरलक्षणस्य ञ्यस्य राष्ट्रादिषु त्रिषु **'वृद्धादीय:'** [६/४/३२] इतीयस्य चाऽपवादोऽयम् ।

१६. अनिदम्यऽणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्य: ।

दिति, अदिति, आदित्य, यम—इत्येतेभ्य. पत्युत्तरपदात् च प्राग्दीव्यतीयेऽर्थे इदमर्थवर्जिते अपत्यादावर्थे योऽणोऽपवाद प्रत्ययस्तद्विषये च ञ्य प्रत्ययो भवति । अण स्थाने अणपवादानां च स्थाने ञ्य एव, किन्तु तस्येदमितीदमर्थे तु अण: स्थान एवाय ञ्य: न तु अणपवादानां स्थाने इति विवेक. । दितेरपत्यं—दैत्य. । अदितेरपत्यमादित्य. ।

---

१ **'स्वसुरीय:'** [६/२/१०६] **'जातेरीय: सामान्यवति'** [८/३/७७] इत्यादेरीयस्य न ग्रहस्तेषु वृद्धसञ्ज्ञानिबन्धनकार्याभावात् ।

२ **'वाहीकेषु ग्रामात्'** [६/४/३६] इतीयबाधकौ णिकेकणौ ।

३. ननु कोऽत्र परिभाषाधिकारयोर्भेद: ? उच्यते—परिभाषा हि एकदेशस्थैव सकल शास्त्रमभिज्वलन्ती व्यवहितेऽपि अनन्तरोत्तरादौ प्रवर्तमाना न प्रतिहतशक्तिर्भवति । अधिकारस्तु नदीस्रोतोरूपतया अनन्तर एव प्रवर्तते न व्यवहिते । विधिरपि युज्यते एव यत: प्राग्दीव्यतेर्ये अर्था तेषामिह बुद्धया सकलस्य निर्देशात् । तेनानेनैव सर्वेष्वर्थेष्वण् विधीयते । अत. पक्षत्रयेऽप्यदोष इति ।

दितिरदितिरादित्यो वा देवताऽस्य दैत्यं, आदित्यं, आदित्यम्[1]। एवं याम्यम् । पत्युत्तरपदात्—बृहस्पतेरपत्यं—**बार्हस्पत्य.** । प्राजापत्य. । बृहस्पतिर्देवताऽस्य बार्हस्पत्यम् । एवं प्राजापत्यम् । **अणपवादे च**—आदित्यस्याऽपत्यमादित्यः[2]। **यमस्यापत्यं**—याम्यः । अत्र परत्वात् **'अत इञ्'** [६/२/३४] इतीञ् स्यात् । वनस्पतीनां समूहः—वानस्पत्यम् । अत्राऽचित्तलक्षण इकण् स्यात् । ण्यो[3] हि प्राग्दीव्यतीयमण बाधित्वा सावकाश इति अणपवादग्रहणम्[4]। अण्ग्रहणं किम् ? वास्तोष्पत्यभार्य । असत्यण्ग्रहणे स्वापवादविषये[5] **'द्यावापृथिवीशुनासीर'''** [६/३/७४] इति येप्यस्य समावेशे सति **'स्वरवृद्धिनिमित्तस्य तद्धितस्य'**[6] [३/२/५६] इत्यादिना पुंवद्भावनिषेधात् वास्तोष्पत्याभार्य इति स्यात् । वास्तोष्पत्यभार्य इति चेष्टम् । **'द्यावापृथिवी-शुनासीर'''** [६/३/७४] इति ये पुंवद्भावनिषेधो न । अनिदमीति किम् ? आदित्यस्येदमादितीयम् । उष्ट्रपतिर्नाम वाहनं, तस्येदं—औष्ट्रपतनम् । **'वाहनात्'** [७/१/११६] इत्यञ् । अकारस्य वृद्धि. **'जिदार्षादणिञोः'** [६/२/१५०] इति च प्रयोजनम् ।

१७. बहिष ईकण् च ।

बहिस्शब्दात् प्राग्दीव्यतीयेऽर्थेऽनिदम्यणपवादे च ईकण् चकारात् ञ्यश्च प्रत्ययो भवति । **बहिर्जातः**—बाहीकः, बाह्य, बाह्या । **'अनाराच्छश्वत्पृथगोऽव्ययस्य'** [८/४/६६] इति टेर्लोप । **'मुख्यात् षिट्टिवणञ्'''** [२/३/२०] इत्यादिना ईप् । बाहीकी ।

१८. पृथिव्या ञाञौ ।

पृथिवीशब्दात् प्राग्दीव्यनीयेऽर्थे अनिदम्यणपवादे च ञ, अञ्—इत्येतौ प्रत्ययौ भवतः । **पृथिव्यां भवः**—पार्थिवः । ञाञो स्त्रियां विशेष. । पार्थिवा, पार्थिवी । अणपवादे च—पृथिव्या अपत्य पार्थिवः । पार्थिवा, पार्थिवी । अत्र एयण् स्यात् । अञ्विधानस्य ईप् बहुषु[7] लुक् संघादिष्वण् इति प्रयोजनम् ।

१९. उत्सादेरञ् ।

उत्सादिभ्य शब्देभ्य प्राग्दीव्यतीयेऽर्थे अनिदम्यणपवादे च अञ् प्रत्ययो भवति । उत्सस्येदं—**औत्सम् ।** औदपानम् । अणपवादे च —उत्सस्यापत्य—औत्स.[8] । औदपान । तरुण्या अपत्य —तारुण.[9] । तालुन । **पञ्चालेषु भवः**—पाञ्चाल[10] । अत्र इञ् एयण् अकञ् च प्राप्नुवन्ति । कुरोरपत्य[11]—कौरव्य इति ञ्यविधौ[12] कुरुशब्दोपादानस्यानवकाश-

---

१ अदितेरपत्य ञ्य । आदित्यो देवतास्येति ञ्य । **'इवर्णावर्णस्य'** [८/४/७१], **'तद्धितेऽनापित्स्वरे'** [८/४/७८] इति यलोप. । **'णपाद्यला:'** [१/३/२८] द्वित्वम् । अथवा अदितिर्देवताऽस्य ञ्यः, आदित्यो देवतास्येति ञ्य., **'इवर्णावर्णस्य'** [८/४/७१] इत्यकारलोप तदा यस्य लुग् न भवत्यनपत्यत्वात् ।

२ अदितिर्देवता तस्याऽपत्ये तु वाच्ये आपत्यस्य यस्य लोप स्यात् । अत्र **'वृद्धाच्चपौत्रादेर्वा'** [६/२/८४] इति आयनिञ., **पक्षे इञ्** प्राप्नोति स बाध्यते ।

३. ननु च ञ्योऽप्यणपवाद इञादयोऽपि, तत्र यदीञादयो ञ्य बाधित्वापि स्यु तदा ञ्यस्य कोऽवकाशः इत्यनवकाशत्वात् परानपि इञादीन् असौ बाधेत ।

४ किमणपवादग्रहणेनेत्याह —अणोऽपवादविषये ञ्यो न स्यात् । तत्राऽणपवाद एव स्यादित्यर्थं ।

५ स्वस्यापवाद स्वापवाद तस्य, तथाहि वास्तोष्पत्यभार्य इत्यत्र वास्तोष्पतिर्देवतास्या इति वाक्ये **'सास्य देवता'** [६/३/६६] इत्यणपवादोऽनेन ञ्य प्राप्तस्तदपवादो **'द्यावापृथिवी '''** [६/३/७४] इति य इति तस्यापवादोऽयं स्यादित्यर्थ. ।

६. ननु ञ्यस्य **'द्यावापृथिवी '''** [६/३/७४] इति यस्य वा को विशेष इत्याह ।

७. **'यञञोऽश्यापर्णान्तगोपवनादेः'** [६/२/१३६] इति ।

८. **'अत इञ्'** [६/२/३४] प्राप्नोति ।

९ **'तस्याऽपत्ये'** [६/२/३१] इत्येतस्य बाधको **'स्त्रीभ्य एयण्'** [६/२/८८] इत्यनेन एयण् स्यात् ।

१०. **'ईतोकञ्'** [६/४/४१] इत्यधिकारे भवार्थे **'बहुविषयेभ्यः'** [६/४/४५] इत्यकञ् प्राप्नोति ।

११. ननु यद्यणपवादेऽप्यञ् भवति, कथ तर्हि कौरव्य इति इत्याह ।

१२. रूढसंज्ञकस्य **'इरकोशलाजादकुरुनादिभ्यः'** [६/२/१२७] इत्यादिना ब्राह्मणवाचकस्य तु **'कुर्वादिभ्यः'** [६/२/७८] ।

त्वाद् भवति । कौरव इति त्वऽपत्यस्यापि इदमर्थे विवक्षायां भविष्यति । उत्तरत्र बष्कयशब्दस्य समासे प्रतिषेधादुत्साद्यन्तस्यापीह प्रत्ययः । तेन गोधेनुभ्य आगतं गौधेनवमिति[1] सिद्धम् । अन्यथा रूप्यमयटौ स्याताम् । उत्सादिगणो यथा - उत्स, उदपान, विकर, विनद, महानद, महानस, महाप्राण, महाप्रयाण, तरुण, तलुन, धेनु, पङ्क्ति, जगती, बृहती, त्रिष्टुभ्, अनुष्टुभ्, जनपद, भरत, उशीनर, पीलुकण, वृषदंश, भल्लकीय, रथन्तर, मध्यदिन, बृहत्, महत्, महिमन्, मिहद्, सत्वत् । सच्छब्दो वत्वन्तः । सत्वतोऽपत्यं तत्र भवो वा सात्वतः । अन्ये तु नुमागममिच्छन्ति । सात्वन्तः । कुरु, पञ्चाल, इन्द्रावसान । उष्णिह्, ककुभ् — अकारान्तावेतावित्यन्ये । सुवर्ण, हंसपथ, वर्धमान इति उत्सादि. ।

२०. **ग्रीष्मावऽवृत्ते ।**

वृत्तं — छन्दः । ग्रीष्मशब्दात् प्राग्दीव्यतीयेऽर्थे अनिदम्यणपवादे च अञ् प्रत्ययो भवति न तु वृत्तेऽभिधेये । ग्रीष्मो नाम कश्चित्, तस्याऽपत्यं — ग्रैष्मः । अवृत्ते इति किम् ? ग्रीष्मे भवा — ग्रैष्मी अनुष्टुप् । अणेव ।

२१. **उदस्थानाद्देशे ।**

देशे वर्तमानात् उदस्थानशब्दात् प्राग्दीव्यतीयेऽर्थे अनिदम्यणपवादे च अञ् प्रत्ययो भवति । उदस्थाने भवः — औदस्थानः । देश इति किम् ? उदस्थानो नाम कश्चित्, तस्यापत्यं — औदस्थानिः । इञेव ।

२२. **बष्कयादऽसमासे ।**

बष्कयशब्दादऽसमासे वर्तमानात् प्राग्दीव्यतीयेऽर्थे अनिदम्यणपवादे च अञ् प्रत्ययो भवति । बष्कयस्याऽपत्य — बाष्कयः । असमासे इति किम् ? सुबष्कयस्याऽपत्यं — सौबष्कयिः । इञेव ।

२३. **देवाद्यञ् च ।**

देवशब्दात् प्राग्दीव्यतीयेऽर्थे अनिदम्यणपवादे च यञ् चकारात् अञ् च प्रत्ययो भवति । देवस्येदं देवादागत वा दैव्यं, दैवम् । यञन्तादञन्ताच्च स्त्रियामीप् । दैवी वाक् । यञन्तात् आयनङपि — दैव्यायनी । केचित्तु ञ्यप्रत्ययमपीच्छन्ति, तन्मते दैव्या ।

२४. **अः स्थाम्नः ।**

स्थामन्शब्दात् प्राग्दीव्यतीयेऽर्थे अनिदम्यणपवादे च अ· प्रत्ययो भवति । अश्वत्थाम्नोऽपत्य[2] — अश्वत्थामः ।

२५. **लोम्नोऽपत्येषु ।**

लोमन्शब्दात् प्राग्दीव्यतीये अपत्यलक्षणेऽर्थे अः प्रत्ययो भवति । उडुलोम्नोऽपत्यानि — उडुलोमाः । शरलोमाः । उडुलोमैः, शरलोमैः । अपत्येष्विति बहुवचनात् एकस्मिन्नपत्ये द्वयोश्च बाह्वादित्वात् इञेव । औडुलोमिः, औडुलोमिभ्याम् ।

२६. **द्विगोरऽनपत्ये यस्वरादेर्लुगद्विः ।**

अपत्यार्थादन्यस्मिन् प्राग्दीव्यतीयेऽर्थे उत्पन्नस्य द्विगोः परस्य यकारादेः स्वरादेश्च प्रत्ययस्य सकृल्लुग् भवति न तु द्विः । द्वयो रथयोर्द्विरथ्या वाय वोढा द्विरथः[3] । 'रथात्सपूर्वाच्च वोढृङ्गे' इत्यर्थे 'यः' [७/१/११४] इति य प्रत्ययः । पञ्चसु कपालेषु पञ्चकपाल्यां वा संस्कृतः पञ्चकपाल । पञ्चेन्द्राण्य. पञ्चेन्द्राणि वा देवताऽस्य पञ्चेन्द्र । चतुरोऽनुयोगान्

१. 'अङ्गलधेनु···' [८/४/१६] इति वोत्तरपदवृद्धि. ।

२ अश्व इव तिष्ठति — 'मन्वन्क्वनिप्···' [५/२/७८] । पृषोदरादित्वात् सस्य तः । इष्टिवशात् तदन्ताद् विधिः । एवमुत्तरत्र ।

३. यदा द्वयो रथयोर्वोढेति वाक्य तदा तद्धितविषये द्विगु. । यदा तु द्विरथ्या वेति तदा समाहारविषये द्विगुः यथासंभवं 'लुक् तद्धितलुकि···' [२/३/११६] इति ईबनिवृत्तिः । एवमन्यत्रापि ।

चतुरनुयोगीं वाधीते चतुरनुयोगः । एवं त्रिवेदः । एष्वण् । द्विगोरिति किम् ? पूर्वशालायां भवः—पौर्वशालः । त्र्यवयवा विद्या त्रिविद्या, तामधीते—त्रैविद्यः । अनपत्ये इति किम् ? द्वैमातुरः, पाञ्चनापितिः । यस्वरादेरिति किम् ? पञ्चभ्यो गर्गेभ्य आगतं—पञ्चगर्गमयम् । अद्विरिति किम् ? पञ्चसु कपालेषु संस्कृतं पञ्चकपालं, तस्येदं—पाञ्चकपालम् । एवं त्रैवेदम् । प्राग्दीव्यतेरिति किम् ? द्वौ रथौ वहति द्विरथ्यः । 'तं वहति रथ···' [७/३/२] इत्यादिना यः । द्वाभ्यां नौभ्यां तरति—द्वैनाविकः[1] ।

२७. प्राग्वतोऽग्निकलेरेयण् ।

'तस्याऽर्हे क्रियायां वत्' [७/३/५२] इति वक्ष्यते, ततः प्राग् येऽर्थास्तेष्वर्थेषु अनिदम्यणपवादे च अग्नि, कलि—इत्येताभ्यामेयण् प्रत्ययो भवति । अग्नेरपत्यमाग्नेयः । कालेयः । अग्नये हितं—आग्नेयम् । कालेयम् । अग्नेर्निमित्तमुत्पातः संयोगो वा आग्नेयः । कालेयः । अणपवादे च—अग्नेरागतमाग्नेयम् । कालेयम् । अत्र 'हेतुमनुष्येभ्य···' [७/१/६७] इति रूप्यमयटौ प्राप्तौ । प्राग्वत इति किम् ? अग्निवत्, अग्नित्वम् । कलिवत्, कलित्वम् ।

२८. स्त्रीपुंसाभ्यां नञ्स्नञौ ।

पूर्वमनुवर्तते । स्त्रीपुंस्शब्दाभ्यां प्राग्वतोऽर्थे अनिदम्यणपवादे च यथासंख्यं नञ्, स्नञ्—इत्येतौ प्रत्ययौ भवतः । स्त्रिया अपत्य—स्त्रैणः । पौंस्नः । स्त्रीभ्यो हितं—स्त्रैणम् । पौंस्नम् । स्त्रीणां समूहः—स्त्रैणम् । पौंस्नम् । स्त्रीषु भवं—स्त्रैणम् । पौंस्नम् । स्त्रीणामियं—स्त्रैणी । पौंस्नी । स्त्रीणां निमित्त संयोग उत्पातो वा स्त्रैणः । पौंस्नः । प्राग्वत इति किम् ? स्त्रिया अर्हं कृत्यं, स्त्रिया तुल्य वर्तत इति वा स्त्रीवत् । पुंवत् । अकारो ञित्कार्यार्थः ।

२९. भावे वा ।

स्त्रीपुंसाभ्यां भावे यथासंख्यं नञ्स्नञौ वा भवतः । स्त्रिया भावः—स्त्रैणं, स्त्रीता, स्त्रीत्वम् । पौंस्नं, पुंस्ता, पुंस्त्वम् । अधिकारेणैव विकल्पे सिद्धे पुनर्वाग्रहणं प्रत्ययविकल्पार्थम् ।

३०. गोः स्वरे यः ।

गोशब्दात् स्वरादितद्धितप्रसङ्गे यः प्रत्ययो भवति । गोरिदं—गव्यम् । गोरपत्य—गव्यः । गवि भवं—गव्यम् । गौर्देवताऽस्य गव्यः । गवा चरति—गव्यः । स्वर इति किम् ? गोभ्यो हेतुभ्य आगत गोरूप्यं, गोमयम् ।

३१. तस्याऽपत्ये ।

तस्येति षष्ठ्यन्तान्नाम्नोऽपत्येऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति । उपगोरपत्यमौपगवः । धानपतः, दैत्यः, औत्सः, आग्नेयः, कालेयः, स्त्रैणः, पौंस्नः । अपत्य इत्यपत्यमात्र विवक्षितं न लिङ्गसंख्यादि[2], तेन द्वयोर्बहुषु स्त्रीलिङ्गादौ च भवति । औपगवौ, औपगवाः, औपगवी, औपगव्यौ, औपगव्यः । तस्येति किम् ? देवदत्तेऽपत्यम् । अपत्य इति किम् ? भानोरयं भानवीयः । श्यामगवीयः । 'तस्येदं' [७/१/११२] इत्येवाणादिसिद्धौ अपत्यविवक्षायां तदपवादबाधनार्थं[3] वचनम् । तेन भानोरपत्यं—भानवः । श्यामगवः । अत्र 'वृद्धादीयः' [६/४/३२] इतीयो न भवति । कम्बल उपगोः अपत्यं चैत्रस्य इत्यत्र तु असामर्थ्यान्न[4] भवति ।

---

१. अस्मिन्नेव वाक्ये 'नावः' [८/३/२२] इति टः समासान्तः 'तरति' [७/२/१०] इत्यनेन इकण् च ।

२. आदिशब्दाद् विद्यमानाविद्यमानादि ब्राह्मणत्वादि वा ।

३. तस्य—'तस्येदं' [७/१/११२] इत्यणोऽपवादो 'वृद्धादीयः' [६/४/३२] इत्यादिस्तस्य बाधनार्थम् । अन्यथा वृद्धसंज्ञकादपत्यविवक्षायामपि ईय एव स्यात् ।

४. अयमर्थः—उपगोरित्यस्य कम्बलेन संबन्धित्वान्न तत्संबन्धित्वेनापत्यं वक्तुमण् प्रत्ययः समर्थः ।

३२. आद्यात् ।

अनन्तरपौत्रादियुवभ्योऽपि प्रत्यय प्राप्नोतीति नियमार्थ आरम्भ । आदौ भव: आद्य: । गोत्रस्यादिपुरुष.[1] तस्मादेवाऽपत्येऽर्थे यथाप्राप्तमणादय: प्रत्यया भवन्ति । उपगोरपत्य—औपगव । तस्याऽप्यौपगव । युवप्रत्ययान्तस्यौपगवेरप्यौपगव. । गर्गस्याऽपत्यं पौत्रादि गार्ग्य: । गार्ग्यरपि गार्ग्य: । तत्पुत्रोऽपि गार्ग्य । गार्ग्यायणस्यापि गार्ग्य । अपतनादपत्यं यो व्यवधानेनापि जनित: सोऽपि प्रथमप्रकृतेरपत्यं भवत्येव ।

३३. पौत्रादेर्यूनि ।

यून्यपत्यविवक्षिते य: प्रत्यय: स आद्यात् पौत्रादिप्रत्ययान्तादेव भवति । पूर्वापवाद । यूनि प्रत्यये विधातव्ये पौत्रादिप्रत्ययान्त एव आद्य इत्यर्थ । गर्गस्याऽपत्यं पौत्रादि गार्ग्य:, तस्याऽपत्यं युवा—गार्ग्यायण । दक्षस्याऽपत्य पौत्रादि दाक्षि:, तस्याऽपत्य युवा—दाक्षायण । नडस्याऽपत्य पौत्रादि नाडायन, तस्याऽपत्य युवा—नाडायनि । यूनीति किम् ? गार्ग्य, नाडायन । आद्यादिति किम् ? उपगोरपत्यं पौत्रादि औपगव, तस्याऽपत्य युवा—औपगवि[2] । गार्ग्यायणस्याऽपत्यं युवा गार्ग्यायण: । अत्र आयनण् इञ् च न भवति[3] ।

३४. अत इञ् ।

तस्येत्यनुवर्तते । अकारान्तात् षष्ठ्यन्तान्नाम्नोऽपत्येऽर्थे इञ् प्रत्ययो भवति । अणोऽपवाद: । दक्षस्याऽपत्य—दाक्षि: । प्लाक्षि । तपरकरण किम् ? विश्वप: अपत्य—वैश्वप । कथ **'प्रदीयतां दाशरथाय मैथिली'** [महानाटक, अक ६, श्लोक ३३-३५] ? तस्येदमिति विवक्षायामण् भविष्यति । अपत्यविवक्षायां तु दाशरथि इत्येव भवति । अथ काकबकशुकादे: कस्मान्न भवति ? जात्यैव अपत्यार्थस्याऽभिहितत्वात् । यत: सर्वोऽपि लोक काक दृष्ट्वा काकोऽसौ इत्येव व्यवहरति न काकापत्यमिति । व्यक्तिविवक्षाया तु भविष्यति । यथा—**'कुतश्चरति मायूरि:, केन कापिञ्जलि: कृश:'** । क्रौञ्च, कौकिल:, गौधेर, चाटकैर—एते जातिशब्दा अपि यथाकथचिद् व्युत्पाद्यन्ते, परन्तु अपत्यविवक्षाफल किमपि नास्ति । यथा—क्षत्र क्षत्रिय., राजा राजन्य, मनु मनुष्यो मानुष इति । शत-सर्व-वृद्ध-कारक-राजपुरुष-माथुर-कुररादिभ्योऽनभिधानान्न भवति । अकारो ञित्कार्यार्थ ।

३५. बाह्वादिभ्यो गोत्रे ।

प्रथमपुरुषाणामृषीणामनृषीणां वा पौत्राद्यपत्यं गोत्रम् । बाह्वादिभ्य. षष्ठ्यन्तेभ्यो गोत्रेऽपत्येऽर्थे इञ् प्रत्ययो भवति । अनकारान्तार्थो बाधकबाधनार्थश्चारम्भ । बाहोरपत्यं—बाहवि । औपबाहवि:, औपवाकवि, नैवाकवि: । गोत्र इति किम् ? बाहुर्नाम कश्चित्, तस्याऽपत्यं—बाहव । सभवापेक्ष च गोत्रग्रहणम् । तेन पञ्चाना अपत्य—पाञ्च । साप्ति, आष्टि: इत्यादि सिद्धम् । बाह्वादिगणो यथा—बाहु, उपबाहु, उपवाकु, निवाकु, शिवाकु, अवाकु, वटाकु, विवाकु, चटाकु, चाटाकु, उपबिन्दु, उपनिन्दु, बिन्दु, वृकला, कृकला, वृक, वृषली, चूडा, बलाका, जङ्घा, वगला, भगला, लगहा, ध्रुवका, धुवका, मूषिका, सुमित्रा, दुर्मित्रा । वृकलादिभ्यो यथासंभवमेयणो मानुषीनामलक्षणस्य चाऽणोपवादोऽयमिञ् । युधिष्ठिर, अर्जुन, राम, संकर्षण, कृष्ण, गद, प्रद्युम्न, शाम्ब, सत्यक, शूर, असुर, अजीगर्त, मध्यंदिन—एषु ऋष्यादिलक्षणस्याऽणोपवाद. । सुधावन्, स्वधावन्, पुष्करसद्, अनुरहत्, अनडुह्, पञ्चन्, सप्तन्, अष्टन्, क्षेमधन्विन्, माषशिरोविन्, शृङ्खलतोदिन्, खरनादिन्, प्राकारमर्दिन्, नगरमर्दिन्, इन्द्रशर्मन्, मद्रशर्मन्, अग्निशर्मन्, देवशर्मन्, उपदञ्च, उदञ्च, कुनामन्, सुनामन्, सुदामन् । शिरस्, लोमन्—एतौ तदन्तौ । हस्तिशिरसोऽपत्यं—हास्तिशीर्षि । औडुलोमि:, शारलोमि । इत्याकृतिगणोऽयम् । तेन सख्युरपत्य—साखि: । सवेशिन. सांवेशि, उदङ्कस्य औदङ्कि. । एवमौद्दालकि., वाल्मीकि:, आरुणि: इत्यादि सिद्ध

---

१ गर्गादिरूपान्न गार्गिरित्यादिरूपादित्यर्थ ।

२. पुन: पौत्रादिप्रत्ययान्तलक्षणात् परमप्रकृतेरिञ्, नेञन्तादन्यो युवार्थप्रत्यय इत्यर्थ ।

३ ननु 'पौत्रादेर्यूनि' [६/२/३३] इति वचनात् पौत्रप्रत्ययान्तादेव यूनि प्रत्ययो न तु युवप्रत्ययान्तादित्यत्र प्राप्तिरेव नास्ति । सत्यम् । अत्र औपगव्यादि यत् युवसञ्ज्ञमपत्य तत्पौत्रादेरिति सामान्येन भणनात् पौत्रमप्यस्तीति प्राप्ति: ।

भवति । यत्र गोत्रमगोत्रं च सभवति तत्र तनो गोत्रादन्यत्र इञ्प्रतिषेधः । यत्र गोत्रं न सभवन्येव तत्रागोत्रेऽपीञ् ।

३६. वर्मणोऽचक्रात् ।

चक्रशब्दवर्जितात् परो यो वर्मन्शब्दस्तदन्तादपत्येऽर्थे इञ् प्रत्ययो भवति। इन्द्रवर्मणोऽपत्य—ऐन्द्रवर्मिः । अचक्रादिति किम् ? चाक्रवर्मणः ।

३७. अजादिभ्यो धेनोः ।

अजादिभ्यः परो यो धेनुशब्दस्तदन्तादपत्येऽर्थे इञ् प्रत्ययो भवति । आजधेनविः[1], बाष्कधेनविः । अजादिगणो यथाप्रयोग द्रष्टव्य ।

३८. ब्राह्मणाद्वा ।

ब्राह्मणशब्दात् परो यो धेनुशब्दस्तदन्तादपत्येऽर्थे इञ् प्रत्ययो वा भवति । ब्राह्मणधेनवि , ब्राह्मणधेनवः ।

३९. भूयःसंभूयोऽम्भोऽमितौजसां सलोपश्च ।

भूयस्, सभूयस्, अम्भस्, अमितौजस्—इत्येतेभ्यो अपत्येऽर्थे इञ् प्रत्ययो भवति सकारलोपश्चैषाम् । भूयसोऽपत्य—भौयि. । एव साभूयि , आम्भि , आमितौजिः । केचिदऽकृतसोऽपि पठन्ति । आकृतिः । भूयसो नेच्छन्त्यन्ये ।

४०. शालङ्क्यौदि-पाडि-वाड्वलयः ।

शालङ्कि, औदि, पाडि, वाड्वलि—इत्येते शब्दा अपत्येऽर्थे इञ्प्रत्ययान्ता निपात्यन्ते । शलङ्कोरपत्य—शालङ्कि । अत्रेञ् प्रत्यय उकारलोपश्च निपात्यते। उदकस्यौदिः। अत्रेञ् कलोपश्च। पण्णां पाडिः । अत्रेञ् अन्त्यस्य च डत्वम् । वाच वदति वाग्वादस्तस्यापत्य—वाड्वलिः । अत्रेञि वाचोऽन्तस्य डत्वं वलभावश्चोत्तरपदस्य ।

४१. सुधातृ-व्यास-वरुट-निषाद-चण्डाल-बिम्बेभ्योऽक् चाऽन्त्यस्य ।

सुधातृ, व्यास, वरुट, निषाद, चण्डाल, बिम्ब—इत्येतेभ्योऽपत्येऽर्थे इञ् प्रत्ययो भवति तत्सनियोगे चैषामक् इत्यन्तादेशो भवति। सुधातुरपत्य—सौधातकिः। व्यासस्याऽपत्य—वैयासकिः। वरुटस्य वारुटकि.। निषादस्य नैषादकि । पौत्रादौ तु परत्वाद् बिदादिलक्षणोऽञ् । नैषाद. । चण्डालस्य चाण्डालकिः। बिम्बस्य बैम्बकिः। सुधातृव्यासाभ्यामणोऽपवादः । वरुटात् कारुभ्यस्याऽपवाद. । शेषेभ्योऽस्त्येव । कर्मारव्याघ्राग्निशर्मभ्योऽपीच्छन्त्येके। कार्मारकिः, वैयाघ्रकिः, आग्निशर्मकिः । अन्त्यग्रहणमनेकवर्णत्वात् प्राप्तस्य सर्वादेशस्य बाधनार्थम् ।

४२. शिवादेरण् ।

शिवादिभ्यः षष्ठ्यन्तेभ्योऽपत्येऽर्थे अण् प्रत्ययो भवति । इञादेरपवादः । शिवस्याऽपत्य—शैवः । प्रौष्ठः, प्रौष्ठिक., गाङ्गः । यथायथं प्राप्ता अपि प्रत्यया भवन्ति । गङ्गाशब्दस्तिकादिगणे पठ्यते, तेन आयनिञपि भवति—गाङ्गायनिः । शुभ्रादिपाठात् एयण् अपि—गाङ्गेयः । शिवादिगणो यथा—शिव, प्रौष्ठ, प्रौष्ठिक, वण्ट, चण्ड, जम्ब, जम्भ, ककुभ, कुथार, अनभिम्लान, ककुस्थ, कोहड, कहूय, रोध, पिलधर, वतण्ड, तृण, कर्ण, क्षीरह्रद, जलह्रद, परिषिक, शिलिन्द, गोफिल, गोहिल, कपिलक, जटिलक, बधिरक, मञ्जिरक, वृष्णिक, खञ्जार, खञ्जाल, रेख, लेख, आलेखन, वर्तन, ऋक्ष, वर्तनर्क्ष, विकट, पिटाक, तृक्षाक, नभाक, ऊर्णनाभ, सुपिष्ट, पिष्टकर्णक, पर्णक, मसूरकर्ण, मसुरकर्ण, खडूरक,

१. अजा चासौ धेनुश्चेति कार्यम्। 'पोटायुवति...' [३/१/११५] इति समासः । न त्वजा धेनुर्यस्येति तदा 'स्वाङ्गाच्चोपो जातेश्च...' [३/२/६०] इति पुंवन्निषेधः स्यात् ।

गडेरक, यस्क, लह्य, द्रुह्य, अयस्थूण, भलन्द, भलन्दन, विरूप, विरूपाक्ष, भूरि, संधि, भूमि, मुनि, कुञ्चा, कोकिला, इला, सपत्नी, जरत्कारु, उत्क्षेपा, काथ्या, सुरोहिका, पीठीनासा, महित्री, आर्यश्वेता, ऋष्टिषेण, गङ्गा, पाण्डु, विपाश्, तक्षन् इति शिवादिः। अत्र विरूपाक्षादिञोऽपवाद । भूर्यादीनामा आर्यश्वेताया एयण., ऋष्टिषेणस्य सेनान्तञ्येञो. ।

४३. अवृद्धान्नदीमानुषीनाम्नः ।

एयणोऽपवादः[1] । वृद्धसंज्ञकवर्जितात् नदीनाम्नो मानुषीनाम्नश्चाऽपत्येऽर्थे अण् प्रत्ययो भवति। नदी—यमुनाया अपत्यं यामुनः प्रणेतः। ऐरावतः उद्ध्यः। वैतस्तः पलाशशिरा। नार्मदो नील.। मानुषी—दैवदत्त.[2], सौदर्शनः, सौतारः, स्वायंप्रभः, चैन्तितः, शैक्षितः। अवृद्धादिति किम्? चन्द्रभागौ नाम नगौ, ताभ्यां प्रभवति, अण्—चान्द्रभागी। तस्या अपत्यं—चान्द्रभागेयः। वासवदत्तेयः, जाह्नवेय। नदीमानुषीति किम्? विनताया अपत्य—वैनतेयो गरुड। सौपर्णेयः। देव्यावेते इत्येके। पक्षिण्यावित्यन्ये। नामग्रहणं किम्? शोभनेय। शोभनाशब्दो नद्यां मानुष्यां च वर्तते न तु नामधेयत्वेन।

४४. ऋष्यन्धकवृष्णिकुरुभ्यः ।

इञोऽपवाद.। ऋषयो लौकिका वशिष्ठादय। अन्धका वृष्णय कुरवश्च प्रसिद्धा वंशाख्याः क्षत्रियाः। ऋष्यादिवाचिभ्य. शब्देभ्योऽपत्येऽर्थे अण् प्रत्ययो भवति। ऋषि—वाशिष्ठः, वैश्वामित्र., गौतम। अन्धक—श्वाफल्कः, रान्धसः, चैत्रक। वृष्णि—वासुदेवः, आनिरुद्ध, वाभ्र, औदार। कुरु—नाकुल, साहदेवः, दौःशासन, दौर्योधन। अश्व्यादिभ्यस्तु परत्वात् एयण् ञ्येञौ च भवतः। आत्रेय, जातसेन्य, जातसेनि, औग्रसेन्यः, औग्रसेनि., भैमसेन्यः, भैमसेनि.। कथं दौर्योधनि.? क्रियाशब्दत्वात् दुःखेन युध्यते इति दुर्योधनस्तस्याऽपत्यमिति। यौधिष्ठिरि, आर्जुनि इत्यत्र तु बाह्वादित्वादिञेव।

४५. त्रिवेण्यास्त्रिवणश्च ।

त्रिवेणीशब्दादपत्येऽर्थे अण् प्रत्ययो भवति तत्संनियोगे चास्य त्रिवणादेश। त्रिवेण्या अपत्यं—त्रैवणः। एयणोऽपवादः।

४६. कन्यायाः कनीनश्च ।

कन्याशब्दादपत्येऽर्थे अण् प्रत्ययो भवति तत्संनियोगे चास्य कनीनादेश। कन्याया अपत्य—कानीनो व्यासः कर्णो वा।

४७. संख्यासंभद्रेभ्यो मातुर्मातुर् च ।

सख्यावाचिन. सम्, भद्र—इत्येताभ्या च परो यो मातृशब्दस्तदन्तादपत्येऽर्थे अण् प्रत्ययो भवति तत्संनियोगे मातुश्च मातुर् इत्यादेशः। द्वयोर्मात्रोरपत्यं—द्वैमातुर.। षाण्मातुर.। शतस्य माता शतमाता, तस्या अपत्य—शातमातुरः भरतः। संगता माता संमाता, तस्या अपत्यं—सांमातुरः। भद्राया भद्रस्य वा माता भद्रमाता, तस्या अपत्यं—भाद्रमातुरः। **'संबन्धिनां संबन्धे'** [८/४/१३३] इति वचनात् धान्यमातुर्न भवति, तेन द्वयोर्मात्रोरपत्यं—द्वैमात्र.[3]। अत्रादेशो न भवति। सख्यासंभद्रेभ्य इति किम्? सौमात्रः। शुभ्रादिपाठात् द्वैमात्रेय।

---

१. **'स्त्रीभ्य एयण्'** [६/२/८८] इत्यस्य।

२ अवृद्धादेवेति मावधारणव्याख्यानात् या नित्य वृद्धसंज्ञा सैवात्र गृह्यते न **'संज्ञा वृद्धं वा'** [६/२/६] इति वैकल्पिकी, तेन दैवदत्त इत्यादि सिद्धम्। अन्यथाऽत्र सदेहः स्यात्। अत एव व्यावृत्त्युदाहरणे नित्या वृद्धसंज्ञा उदाहृता।

३ नन्वत्र ञ्णिति तद्धिते **'नामिनोऽहलिकलेर्ञ्णिति'** [४/२/२०] इति वृद्धिः कथ न भवति? उच्यते—तक्रकौण्डिन्यन्यायेन ञ्णिति तद्धिते **'वृद्धिः स्वराणामादेः....'** [८/४/१] इति आदेरेव वृद्धिः न तु **'नामिनोऽहलिकलेर्ञ्णिति'** [४/२/२०] इत्यस्तस्य यद्वाख्यातकृत्प्रकरणमेकमेव तत्साहचर्यात् अत्र प्रकरणे यत्सूत्रं तद्विहितप्रत्ययो गृह्यते। अय तु भिन्नप्रकरणविहितः।

४८. शुङ्गाभ्यां भारद्वाजे ।

शुङ्गशब्दात् पुंलिङ्गात् स्त्रीलिङ्गाच्च भारद्वाजेऽपत्ये अण् प्रत्ययो भवति। शुङ्गस्य शुङ्गाया वा अपत्यं—शौङ्गो भारद्वाज । शौङ्गिः, शौङ्गेयश्चान्य.। **नामग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति** सिद्धे परत्वात् **'द्विस्वरादनद्याः'** [६/२/८६] इत्येयण् प्राप्नोति तद्बाधनार्थं द्विवचनेन स्त्रीलिङ्गः शुङ्गाशब्द उपादीयते ।

४९. विकर्णच्छगलाद् वात्स्यात्रेये ।

विकर्ण, छगल—इत्येताभ्यां यथासंख्य वात्स्ये आत्रेये चाऽपत्येऽण् प्रत्ययो भवति। वैकर्णो वात्स्यः। वैकर्णिरन्यः। छागल आत्रेयः। छागलिरन्यः ।

५०. णश्च विश्रवसो विश्लोपश्च वा ।

विश्रवसोऽपत्ये अण् प्रत्ययस्तत्संनियोगे णकारश्चान्तादेशो भवति णसंनियोगे विश्शब्दलोपश्चास्य वा। विश्रवसोऽपत्य—वैश्रवण । विश्लोपे तु रावणः। अण्सिद्ध एवादेशार्थं वचनम्।

५१. साल्वापीलाभ्यां वा ।

साल्वा, पीला—इत्येताभ्यामपत्येऽर्थे अण् प्रत्ययो वा[1] भवति। साल्वाया अपत्य—साल्वः, साल्वेयः। पैलः, पैलेय.। द्विस्वरत्वात् नित्यमेयणि प्राप्ते विकल्पार्थ वचनम्।

५२. मण्डूकादेयण् च ।

वेत्यनुवर्तते। मण्डूकशब्दादपत्येऽर्थे एयण् चकारादण् च वा भवति। त्रैरूप्यम्। माण्डूकेयः, माण्डूकः, माण्डूकिः। नित्यमिञि प्राप्ते विकल्पार्थं वचनम् ।

५३. दितेः ।

दितिशब्दादपत्येऽर्थे एयण् प्रत्ययो वा भवति। पक्षे ञ्यः। दैतेयः, दैत्यः। **'इतोऽनिञः'** [६/२/९०] इत्येव एयणि सिद्धे **'अनिदम्यणपवादे च…'** [६/२/१६] इति तस्य बाधायां विधानार्थं वचनम्।

५४. पुनर्भू-पुत्र-दुहितृ-ननान्दृभ्योऽनन्तरेऽञ् ।

पुनर्भू, पुत्र, दुहितृ, ननान्दृ—इत्येतेभ्यः अनन्तराऽपत्येऽर्थे अञ् प्रत्ययो भवति। पुनर्भ्वा अनन्तरमपत्यं—पौनर्भव। पौनर्भवौ, पौनर्भवा.। पौत्रः, दौहित्रः, नानान्द्रः। अनन्तर इति किम्? पौत्रादावञ् न भवति। अणैव सिद्धेऽञो विधानं **'ञिदार्षादणिञोः'** [६/२/१५०] इति लुगर्थम्। पुत्रशब्दात् अञ्प्रत्ययान्तात् ततोऽपत्यविवक्षायां **'अत इञ्'** [६/२/३४] इति इञि **'ञिदार्षादणिञोः'** [६/२/१५०] इति तस्य लुकि पौत्र इति भवति। यथा—बैदः पिता, बैदः पुत्रः।

५५. परस्त्रियाः परशुश्चाऽसावर्ण्ये ।

वर्णो ब्राह्मणादिः। परस्त्रीशब्दादनन्तराऽपत्येऽर्थे अञ् प्रत्ययो भवति तत्संनियोगे परस्त्रीशब्दस्य परशुभावश्च असावर्ण्ये—न चेत् पुरुषेण सह समानो वर्णो ब्राह्मणत्वादिस्तस्या भवति। परा पुरुषाद् भिन्नवर्णा स्त्री परस्त्री। तस्या अनन्तरापत्यं पारशवः। असावर्ण्य इति किम्? परस्य स्त्री परस्त्री, तस्या अनन्तरापत्यं—पारस्त्रैणेयः। कल्याण्यादिपाठादेयण् अन्तस्य चेनादेशः। अनुशतिकादिपाठाद् उभयपदवृद्धिश्च।

---

१. प्राक्तनः शब्दांशलोपविकल्पः प्रत्ययं न विकल्पयेत् इति पुनर्विकल्पारम्भः ।

५६. गोत्रे बिदादेः पौत्रादौ ।

गोत्रे वर्तमानेभ्यो बिदादिभ्यः पौत्रादावपत्येऽर्थे अञ् प्रत्ययो भवति । बिदस्य पौत्राद्यपत्य—बैदः । बैदौ, बिदाः । और्वः, और्वौ, उर्वाः । काश्यपः, काश्यपौ, कश्यपाः । भारद्वाजः, भारद्वाजौ, भरद्वाजाः । अथेन्द्रहू सप्तम काश्यपानां, भारद्वाजानां कतमोऽसि—इत्यत्र बहुषु लुक् कस्मान्न भवति ? नायमञ्, किंतु अस्येदमिति विवक्षायां अण् । सर्वेषामपि हि पितरोऽभेदोपचारेण कश्यपाः । यथा—बभ्रुः, मण्डुः, लमकः इति । गोत्रे इति किम् ? बिदो नाम कश्चित्, तस्याऽपत्य पौत्रादि—बैदिः । पौत्रादाविति किम् ? बिदस्याऽपत्यमनन्तरं—बैदिः । बिदादिगणो यथा—बिद, उर्व, कश्यप, कुशिक, भरद्वाज, उपमन्यु, किलात, कीदर्भ, विश्वानर, ऋष्टिषेण, ऋतभाग, हर्यश्व, प्रियक, पियक, अपस्तम्भ, कुवाचर, कूवाचर, शरद्वत्, शुनक, धेनु । उत्सादिष्वपि धेनुशब्दः पठ्यते । स प्रत्यग्र[1]-प्रसव-गव्यादिवाचकः । अयं ऋषिवचनः । अश्व, शङ्ख, गोपवन, शिग्रु, बिन्दु, ताजम, अश्वावतान, श्यामाक, श्यापर्ण, हरित, किन्दाम, वम्यस्क, अर्कलुश, वध्योग, विष्णुवृद्ध, वृष्णिवृद्ध, प्रतिबोध, रथीतर, रथतर, गविष्ठिर, गविष्ठिल, शबर, मठर, निषाद, सृदाकु, पृदाकु । केचित् एतौ हरितादेः प्राक् पठन्ति । तन्मते **'हरितादेरञः'** [६/२/७४] इत्यायनण् न भवति । इति बिदादिः ।

५७. गर्गादेर्यञ् ।

गोत्रे वर्तमानेभ्यो गर्गादिभ्यः षष्ठ्यन्तेभ्य पौत्रादावपत्येऽर्थे यञ् प्रत्ययो भवति । गर्गस्यापत्य पौत्रादि—गार्ग्यः । वात्स्यः । गोत्रे इति किम् ? गर्गो नाम कश्चित्, तस्याऽपत्य पौत्रादि—गार्गिः । पौत्रादाविति किम् ? गर्गस्याऽपत्यमनन्तरं—गार्गिः । ननु मनोरत्र पाठात् लोहितादित्वात् स्त्रियां नित्यं डायनटि ईपि च मानव्यायनीति स्यात्, तत्कथं मानवी प्रजेति ? उच्यते—अपत्यसामान्यविवक्षायां **'तस्याऽपत्ये'** [६/२/३१] इत्यणि भविष्यति । कथमनन्तरो रामो जामदग्न्यः, व्यासः पाराशर्यः । पुत्रेऽपि पौत्रादिकार्यकरणात् तथोच्यते । अनन्तरापत्यविवक्षायां जामदग्नि, पाराशरि । कथं पाराशरः ? तस्येदमिति विवक्षायां भविष्यति । गर्गादिगणो यथा—गर्ग, वत्स, वाज, अज, मकृति, व्याघ्रपाद्, विदभृत्, पितृबध, प्राचीनयोग, पुलस्ति, रेभ, अग्निवेश, शङ्ख, शट, धूम, अवट, नमस, चमस, धनंजय, तृक्ष, विश्वावसु, जरमाण, कुरुकत, अनडुह्, लोहित, संशित, वक्र, बभ्रु, बभ्लु, मण्डु, मङ्क्षु, मङ्खु, शम्भु, शङ्कु, लगु, लिगु, गूहलु, जिगीषु, मनु, तन्तु, मनुतन्तु, मनायी । अणेयणो प्राप्तावस्य पाठः । पुंवद्भावस्तु **'कौण्डिन्यागस्त्ययोः···'** [६/२/१३७] इति कौण्डिन्यनिर्देशाद् अनित्य इति न भवति । सूनु, स्रुव, कच्छक, ऋक्ष, रुक्ष, रूक्ष, तरुक्ष, तलुक्ष, तण्डिन्, वतण्ड, कपि, कत, शकल, कण्व, वामरथ, गोकक्ष, कुण्डिनी, यज्ञवल्क, पर्णवल्क, अभयजात, विरोहित, वृषगण, रहोगण, शण्डिल, मुद्गर, मुद्गल, मुसर, मुसल, पराशर, जतूकर्ण, मन्द्रित, अश्मरथ, शर्कराक्ष, पूतिमाष, स्थूर, स्थूरा, अरराका, पिङ्ग, पिङ्गल, कृष्ण, गोलुन्द, उलूक, तितिम्भ, भिष, भिषज, भिष्णज, भण्डित, भडित, दल्भ, चिकित, देवहू, इन्द्रहू, यज्ञहू, एकलू, पिप्पल्लु, पत्यलू, वृहलू, पप्फलू, बृहदग्नि, जमदग्नि, सुलाभिन, कुटीगु, उक्थ, कुटल, चणक, चुलुक, कर्कट, अलापिन्, सुवर्ण, सुलाभिन् इति गर्गादि ।

५८. मधुबभ्रोर्ब्राह्मणकौशिके ।

मधु, बभ्रु—इत्येताभ्यां यथासंख्यं ब्राह्मणे कौशिके च गोत्रे पौत्रादावपत्येऽर्थे यञ् प्रत्ययो भवति । मधोरपत्य—माधव्यः ब्राह्मणः । माधवोऽन्यः । बाभ्रव्यः कौशिकः । बाभ्रवोऽन्यः । बभ्रोर्गर्गादिपाठाद् यञि सिद्धे कौशिके नियमार्थं वचनम् । गर्गादिपाठस्तु लोहितादिकार्यार्थं, तेन बाभ्रव्यायणीति नित्यं डायनट् ।

५९. कपिबोधादाङ्गिरसे ।

कपि, बोध—इत्येताभ्यां आङ्गिरसे गोत्रे पौत्रादावपत्येऽर्थे यञ् प्रत्ययो भवति । कपेरपत्य—काप्यः आङ्गिरसः । कापेयोऽन्यः । एवं बौध्यः आङ्गिरसः । बौधिरन्यः । कपिशब्दो गर्गादिषु पठ्यते, तस्येहोपादानं नियमार्थम् ।

---

१. नूतनम् ।

आङ्गिरस एव यञ् नान्यत्रेति । लोहितादिकार्यार्थश्च गणपाठः । काप्यायनी । मधुबोधयोस्तु यञन्तयोरुभयम्[1] । माधवी, माधव्यायनी । बौधी, बौध्यायनी ।

६०. वतण्डात् ।

वतण्डशब्दादाङ्गिरसे गोत्रे पौत्रादावपत्येऽर्थे यञेव प्रत्ययो भवति । वतण्डस्याऽपत्यं—वातण्ड्यः आङ्गिरसः । आङ्गिरसादन्यत्र गर्गादिशिवादिपाठाद् यञ् अण् च भवतः । वातण्ड्यः, वातण्डः । गर्गादिपाठादेव यञि सिद्धे वचनमाङ्गिरसे शिवाद्यण्बाधनार्थम् । शिवादिपाठोऽप्यस्य पौत्रादावेवाण्विधानार्थः । अन्यत्र हि ऋषित्वादेव अण्सिद्धः ।

६१. स्त्रियां लुक् ।

वतण्डशब्दादाङ्गिरसे पौत्राद्यपत्यविशेषे स्त्रियां यञो लुग् भवति । वतण्डस्य पौत्राद्यपत्यं स्त्री—वतण्डी आङ्गिरसी । जातिलक्षण ईप् । अनाङ्गिरसे तु शिवादिपाठात् वातण्डी । लोहितादिपाठाद् वातण्ड्यायनी ।

६२. कुञ्जादेर्ञायन्यः ।

कुञ्जादिभ्य षष्ठयन्तेभ्यो गोत्रे पौत्रादावपत्येऽर्थे ञायन्यः प्रत्ययो भवति । कुञ्जस्याऽपत्यं पौत्रं—कौञ्जायन्यः । कौञ्जायन्यौ । ब्राध्नायन्यः, ब्राध्नायन्यौ । पौत्रादाविति किम्? कुञ्जस्याऽपत्यमनन्तरं—कौञ्जिः । कुञ्जादिगणो यथा—कुञ्ज, ब्रध्न, गण, भस्मन्, लोमन्, लौमायन्य । तदन्तादेव केचित् । औडुलोमायन्यः । शट । अयं गर्गादिष्वपि । शाक, शुण्डा, शुभा, विपाश् । अयं शिवादिष्वपि । स्कन्ध, स्कम्भ, शङ्ख । अयं गर्गादावश्वादौ बिदादौ च । इति कुञ्जादिः । ञकारो ञित्कार्यार्थः ।

६३. स्त्रीबहुष्वायनञ् ।

कुञ्जादिभ्यो बहुत्वविशिष्टे गोत्रे पौत्रादावपत्येऽर्थे स्त्रियां चाऽबहुत्वेऽपि आयनञ् प्रत्ययो भवति । कुञ्जस्याऽपत्यं स्त्री—कौञ्जायनी । ब्राध्नायनी । कुञ्जस्याऽपत्यानि—कौञ्जायनाः । ब्राध्नायनाः । ञकारो ञित्कार्यार्थः ।

६४. अश्वादेः ।

अश्वादिभ्यो गोत्रे पौत्रादावपत्येऽर्थे आयनञ् प्रत्ययो भवति । अश्वस्य पौत्राद्यपत्यं—आश्वायनः । शाङ्खायनः । पौत्रादाविति किम् ? आश्विः । गोत्र इति किम् ? अश्वो नाम कश्चित्, तस्याऽपत्यं पौत्रादि—आश्विः । अश्वादिगणो यथा—अश्व, शङ्ख, जन, उत्स, ग्रीष्म, अर्जुन, वैल्य, अश्मन्, विद, कुट, पुट, स्फुट, रोहिण, खर्जुल, खर्जूर, पिञ्जूर, भदिल, भटिल, भडिल, भण्डिल, भटक, भडित, भण्डित, प्रादृत, राम, उद, क्षान्ध, ग्रीव, रामोद, रामोदक्ष, अन्धग्रीव, काश, काण, गोल, आह्न, गोलाह्न, अर्क, स्वन, अर्कस्वन, शुन, वन, पत, पद, चक्र, कुल, ग्रीवा, श्रविष्ठा, पावित्, पवित्रा, पावित्र, पविन्दा, गोमिन्, श्याम, धूम, धूम्र, वस्त्र, वाग्मिन्, विश्वानर, विश्वतर, वत, सनख, मन, खड, जड, गद, जण्ड, अर्ह, अर्थ, वीक्ष, विशम्प, विशाल, गिरि, चपल, गिरिचपल, चुप, दासक, चुपदासक, धाय्या, धन्य, धर्म्य, पुंसिजात, शूद्रक, सुमनस्, दुर्मनस्, आतव, उत्सातव, कितव, किव, शिव, खिव, खिप, खदिर, आनडुह्य । आनडुह्यायन इति यञन्तादायनणापि सिध्यति, प्राग्दीव्यतीयस्वरादौ तु 'यूनि लुक्' [६/२/१४७] इति नित्यलुगर्थमस्योपादानम्[2] । इत्यश्वादिः । अश्वशब्दाद् बिदादिषु पाठादञ्, इह्ययनञ् । आश्वः, आश्वायनः । शङ्खशब्दाद् बिदादिष्वञ्, गर्गादिषु यञ्, कुञ्जादिषु ञायन्यः, इहायनञ् । शाङ्खः, शाङ्ख्यः, शाङ्खायन्यः, शाङ्खायनः । जनशब्दात् नडादिष्वायनण्, इहायनञ् । तत्र यूनि प्रत्यये विधेये विशेषः । जानायनिः जानायनो वा युवा । उत्सग्रीष्मयोरुत्सादिषु पाठोऽनन्तरार्थोऽनपत्यार्थश्च । इह तु पौत्रादौ अयमेव यथा स्यादित्येवमर्थः । औत्सायनः, ग्रैष्मायणः । अर्जुनशब्दस्य बाह्वादिषु पाठोऽनन्तरार्थः । पौत्रादौ त्वयमेव । आर्जुनायनः ।

---

१. 'यञो डायनुक् च वा' [२/३/२१] इत्यनेन विकल्प इत्यर्थः ।

२. अन्यथा 'आयनणायनिञोर्वा' [६/२/१४८] इति विकल्पः स्यात् ।

वैल्येति विलिशब्दो ञ्यान्तस्ततो यूनि प्रत्ययः। वैल्यायनो युवा।

६५. भरद्वाजशपादात्रेये।

भरद्वाज, शप—इत्येताभ्यामात्रेये गोत्रे पौत्रादावपत्येऽर्थे आयनञ् प्रत्ययो भवति। भारद्वाजायनः, शापायनः आत्रेयश्चेत्। आत्रेय इति किम्? भारद्वाजः, भारद्वाजौ। बिदादौ। शापिः।

६६. आत्रेयाद् भारद्वाजे।

आत्रेयशब्दाद् भारद्वाजे गोत्रे पौत्रादावपत्येऽर्थे आयनञ् प्रत्ययो भवति। आत्रेयायणो भारद्वाजः। आत्रेयोऽन्यः। 'बिदार्षाद्‌दणिञोः' [६/२/१५०] इति इञो लुक्।

६७. भर्गात् त्रैगर्ते।

भर्गशब्दात् त्रैगर्ते गोत्रे पौत्रादावपत्येऽर्थे आयनञ् प्रत्ययो भवति। भार्गायणः त्रैगर्तः। भार्गिरन्यः।

६८. नडादिभ्य आयनण्।

नडादिभ्यः षष्ठ्यन्तेभ्यो गोत्रे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो भवति। नडस्य पौत्राद्यपत्य—नाडायनः। चारायणः, आमुष्यायणः। पौत्रादाविति किम्? नडस्याऽपत्यमनन्तर— नाडिः। णकारो वृद्ध्यर्थः। नडादिगणो यथा— नड, चर, बक, मुञ्ज, इतिक, इतिश, उपक, लमक, सप्तल, सत्तल, सत्वल, व्याज, वाज, प्राण, नर, सायक, दाश, मित्र, दाशमित्र, द्वीपा, द्वीप, पिङ्गर, पिङ्गल, किंकर, किंकल, कातर, काथल, काश्यप, काश्य, नाव्य, ताव्य, अज, अमुष्य, लिगु, चित्र, अमित्र, कुमार, लोह, स्तम्ब, स्तम्भ, अग्र, शिंशपा, तृण, शकट, मिकट, मिमत, सुमत, जन, ऋच्, इन्ध, ऋगिन्ध, मित, जनंधर, जलंधर, युगंधर, हंसक, दण्डिन्, हस्तिन्, पञ्चाल, चमसिन्, सुकृत्य, स्थिरक, ब्राह्मण, चटक, अश्वल, खरप, बदर, शोण, दण्डम, छाग, दुर्ग, अलोह, आलोह, कामुक, कामक, ब्रह्मदत्त, उदुम्बर, सण, लङ्क, केकर, ककर, काव्य, आलाह, ऋग, वृषगण, अध्वर, बालिश, दण्डप। आकृतिगणोऽयम्।

६९. शलङ्कोः शलङ्कश्च।

शलङ्कुशब्दाद् गोत्रे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो भवति तत्संनियोगे शलङ्कुशब्दस्य शलङ्कादेशश्च। शलङ्कोः पौत्राद्यपत्यं—शालङ्कायनः।

७०. अग्निशर्मणो वृषगणे।

अग्निशर्मन्शब्दाद् गोत्रे वृषगणे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो भवति। आग्निशर्मायणो वृषगणः। आग्निशर्मिरन्यः।

७१. कृष्णरणाद् ब्राह्मणवाशिष्ठे।

कृष्ण, रण— इत्येताभ्यां यथासंख्य ब्राह्मणवाशिष्ठयोर्गोत्रे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो भवति। कार्ष्णायनो ब्राह्मणः। कार्ष्णिरन्यः। राणायनो वाशिष्ठः। राणिरन्यः।

७२. क्रोष्टोः क्रोष्ट्रश्च।

क्रोष्टुशब्दाद् गोत्रे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो भवति तत्संनियोगे क्रोष्टुशब्दस्य क्रोष्ट्रादेशश्च। क्रोष्टोः पौत्राद्यपत्यं—क्रौष्ट्रायनः।

७३. यञिञः ।

पौत्रादाविति यञिञोर्विशेषणम् । पौत्रादौ विहितौ यौ यञिञौ तदन्ताद् यून्यपत्ये आयनण् प्रत्ययो भवति । 'पौत्रादेर्यूनि' [६/२/३३] इति वचनाद् यूनीति लभ्यते । गार्ग्यस्याऽपत्यं युवा—गार्ग्यायण । वात्स्यायन । दाक्षेरपत्यं युवा—दाक्षायणः । प्लाक्षायण । पौत्रादिविहितस्य इञो ग्रहणादिह न भवति—उदुम्बराणां राजा औदुम्बरि, तस्याऽपत्यं—औदुम्बरः, औदुम्बरायणिर्वा । 'वृद्धादपौत्रादेर्वा' [६/२/८४] इति पक्षे आयनिञ् । गार्ग्या अपत्यं गार्गेयः, दाक्षेयः—इत्यत्र परत्वात् 'स्त्रीभ्य एयण्' [६/२/८८] इत्येयण् भवति ।

७४. हरितादेरञः ।

बिदाद्यन्तर्गणो हरितादि । पौत्रादौ विहितो योऽञ् तदन्तेभ्यो हरितादिभ्यो यून्यपत्ये आयनण् प्रत्ययो भवति । हारितस्याऽपत्यं युवा—हारितायन । कैन्दासायन । हरितादेरिति किम् ? बैदस्याऽपत्य युवा—बैदः । अत्रेञो लुक् । अञ इति किम् ? हरितस्याऽपत्यं पौत्रादि—हारित ।

७५. शरद्वच्छुनकदर्भाद् भृगुवत्साग्रायणेषु ।

शरद्वत्, शुनक, दर्भ—इत्येतेभ्यो यथासंख्यं भृगु, वत्स, आग्रायण इत्येतेष्वर्थेषु गोत्रे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो भवति । शरद्वच्छुनकशब्दौ बिदाद्यन्तर्गतौ । शारद्वतायनो भार्गव । शारद्वतोऽन्य । शौनकायनो वात्स्य । शौनकोऽन्य । दार्भायण आग्रायण । दार्भिरन्य ।

७६. पर्वतजीवन्ताद् वा ।

पर्वत, जीवन्त—इत्येताभ्यां गोत्रे पौत्रादावपत्येऽर्थे आयनण् प्रत्ययो वा भवति । पार्वतायन, पार्वतिः । जैवन्तायनः, जैवन्ति ।

७७. द्रोणात् ।

योगविभागाद् गोत्रे पौत्रादाविति निवृत्तम् । द्रोणशब्दादपत्यमात्रे आयनण् प्रत्ययो वा भवति । द्रौणायन, द्रौणिः ।

७८. कुर्वादिभ्यः ।

कुरु इत्येवमादिभ्य षष्ठ्यन्तेभ्योऽपत्येऽर्थे ञ्य प्रत्ययो भवति । कुरोरपत्य—कौरव्यः । अक्षत्रियवचनस्येह कुरोर्ग्रहणम् । क्षत्रियवचनात् तु 'दुनादिकुर्वित्कोशलाजादाञ्ञ्यः' [६/२/१२७] इति ञ्यः । अनयोश्चायं विशेषः । परञ्यस्तु रूढस्थस्तेन बहुषु लुक् । कुरवः । अस्य तु बहुवचने कौरव्या, ततो यूनि तिकादिपाठादायनिञ । कौरव्यायणिः । अस्माच्चात्[1] इञ् । तस्य 'ञिदार्षादणिञोः' [६/२/१५०] इति लुक् । कौरव्य । कुरुशब्दश्च तिकादिष्वपि पठ्यते । कौरवायणिः । उत्सादाञ् तु ञ्यायनिञ्भ्यां बाधितः कुरुशब्दादपत्ये न भवति । शङ्कु—शाङ्कव्य । बहुषु—शाङ्कव्या । स्त्री—शाङ्कव्या । लोहितादौ पाठात् पौत्रादौ यञि शाङ्कव्यः । बहुषु लुक्—शङ्कव । स्त्री—शाङ्कव्यायनी । कुर्वादिगणो यथा—कुरु, शङ्कु, शकन्धु, शाकभू, पथिकारिन्, मतिमत्, पितृमत्, पितृमन्तु, वाच्, हन्तृ, हृदिक, शलाका, कालाका, एरका, पदका, खदाका, केशिनी, मति, कवि, हन्ति, पिण्डी, ऐन्द्रजाली, धातुजि, वैराजकि, दामोष्णीषि, गाण, करि, कैशोरि, कापिञ्जलादि, गर्गर, हनू, मञ्जूष, अविमारक, अजमारक, चफट्टक, कुट, कुटल, मुर, दभ्र, सूर्पणाय, श्यावनाय, श्यावरथ, श्यावप्रथ, श्याप्रथ, श्यापत्र, श्यापुत्र, सत्यंकार, वलभीकार, कर्णकार, पथिकार, बृहतीकार, वान्तवृक्ष, आर्द्रवृक्ष, मूढ, शाक, इन, रथकार, नापित, तक्षन्, शुभ्र इति कुर्वादि । अत्र हन्त्रन्तानां सामान्याणो हृदिकस्य तु वृष्ण्यणोऽपवादो ञ्य ।

---

१. 'कुर्वादिभ्यः' [६/२/७८] इति ञ्यान्तात् ।

शलाकादीनां केशिन्यन्तानामेयणः । मानुषीनामत्वेऽणोऽपि । केशिनीशब्दस्य स्त्रीलिङ्गपाठादेव पुंवद्भावो न भवति । कैशिन्यः । मति-कवि-हन्ति-पिण्डीनामेयण. । ऐन्द्रजाल्यादीनां कापिञ्जलाद्यन्तानामायनणः । गर्गरादीनामिञ. । तक्षन्-शब्दस्य शिवाद्यणा समावेशार्थ. पाठः, शुभ्रस्यैयणा ।

७९. सम्राजः क्षत्रिये ।

सम्राज् इत्येतस्मात् क्षत्रियेऽपत्ये ञ्य. प्रत्ययो भवति । साम्राज्यः क्षत्रियः । साम्राजोऽन्यः । बाह्वादित्वात् साम्राजिरित्यपि केचित् ।

८०. सेनान्तलक्ष्मणकारुभ्य इञ् च ।

सेनशब्दान्तेभ्यो लक्ष्मणशब्दात् कारवस्तन्तुवायादयस्तद्वाचिभ्यश्च अपत्येऽर्थे इञ् चकारात् ञ्यश्च प्रत्ययो भवति । सेनान्त—हारिषेणि, हारिषेण्य । वारिषेणि., वारिषेण्य । लक्ष्मण—लाक्ष्मणिः, लाक्ष्मण्य. । कारु—तान्तुवायिः, तान्तुवाय्य. । तौन्नवायि, तौन्नवाय्यः । वार्धकिः, वार्धक्य. । कौम्भकारिः, कौम्भकार्य्यः । रथकार-नापित-तक्षन्शब्देभ्यो ञ्य एव, नेञ् कुर्वादिपाठात् । कुर्वादौ जातिवाचिन एव पाठात् रथकारात् इञपीत्येके । ऋष्यन्धकवृष्णिकुरुभ्योऽण् स्त्रीभ्यस्त्वेयण् परत्वान्तरङ्गत्वात् आभ्यां बाध्यते । जातसेनिः, जातसेन्य । वैष्वक्सेनि, वैष्वक्सेन्यः । औग्रसेनि., औग्रसेन्यः । भैमसेनिः, भैमसेन्य. । तन्तुवाय्या अपत्य—तान्तुवायि., तान्तुवाय्य इत्यादि ।

८१. तिकादेरायनिञ् ।

तिकादिभ्यः षष्ठयन्तेभ्योऽपत्येऽर्थे आयनिञ् प्रत्ययो भवति । इञादेरपवाद । तैकायनिः, कैतवायनिः । तिकादिगणो यथा—तिक, कितव, संज्ञा, बाल, शिखा, बालशिख, उरश, शाठ्य, सैन्धव, यमुन्द, रूप्य, पूर्णिक, ग्राम्य, नील, अमित्र, गोकक्ष्य, कुरु, देवर, दैवर, धेवर, धैवर, देवरथ, तैतित, शैलाल, औरश, कौरव्य, भौरिकि, भौलिकि, चौपयत, चैतयत, चैटयत, शैकयत, क्षैतयत, ध्वाज, वत, ध्वाजवत, चन्द्रमस्, शुभ, श्रुभ, गङ्ग, गङ्गा, वरेण्य, वन्ध्या, बिम्बा, अरद्ध, अरद्धा, आरद्ध, वह्यका, खल्य, लोमका, उदन्य, यज्ञ, नीड, आरथ्य, लङ्कव, भीत, उतथ्य, सुयामन्, उखा, खल्वका, शल्यका, जाजल, वसु, उरस् इति तिकादिः । शाठ्यशब्दो यलन्तो घ्यणन्तो वा । शाठ्यायनिः । यलन्तादायनण् एवेत्येके । शाठ्यायनः । औरशशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात् कौरव्यशब्द क्षत्रियप्रत्ययान्त एव गृह्यते । अन्यस्मात् इञेव । तस्य च 'जिदार्षादणिञोः' [६/२/१५०] इति लुक् । कौरव्य. पिता । कौरव्य पुत्र । आयनिञस्तु 'अब्राह्मणात्' [६/२/१५१] इति प्राप्तोऽपि लुग् न भवति विधानसामर्थ्यात्[१] । नहीञ आयनिञो वा लुकि कश्चिद् विशेष. । कौरव्यः पिता । कौरव्यायणि. पुत्रः ।

८२. दगु-कोशल-कर्मारच्छाग-वृषेभ्यो युट् च ।

दगु, कोशल, कर्मार, छाग, वृष—इत्येतेभ्योऽपत्येऽर्थे आयनिञ् प्रत्ययो भवति तस्य युडागमश्च । दागव्यायनिः, कौशल्यायनि. । रूढसंज्ञकात् क्षत्रियात् 'इक्ष्वाकुशलाजादकुरुनादिभ्यः' [६/२/१२७] इति ञ्य एव । कौशल्यः । कार्मार्यायणिः, छाग्यायनिः, वार्ष्यायणि. ।

८३. अणो द्विस्वरात् ।

द्विस्वरादणन्तात् अपत्येऽर्थे आयनिञ् प्रत्ययो भवति । इञोऽपवाद. । कर्तुरपत्यं कार्त्रः, तस्यापत्यं—कार्त्रायणिः[२] । हर्तुः हार्त्रः, तस्य हार्त्रायणिः । पौत्रः, पौत्रायणि. । औत्सर्गिकोऽण् । यास्कायनिः । शिवाद्यण् । अण इति किम् ? दाक्षेः

---

१. लुकि हि अक्षत्रियवचनस्य कौरव्यशब्दस्य परिहारे फलं न स्यात् ।

२. ब्राह्मणत्वात् 'अब्राह्मणात्' [६/२/१५१] इति न लुग् । एवमुत्तरेष्वपि ।

दाक्षायणः । प्लाक्षेः प्लाक्षायणः । द्विस्वरादिति किम् ? औपगविः । पौत्राद्यपत्य एवायं विधिः । अनन्तरापत्ये तु उत्तरेण विकल्प एव । अङ्गानां राजा—आङ्गः, तस्याङ्गिः आङ्गायनिर्वा ।

८४. वृद्धादपौत्रादेर्वा ।

अपौत्रादिवाचिनो वृद्धसंज्ञकादपत्येऽर्थे आयनिञ् प्रत्ययो वा भवति । आम्रगुप्तायनिः, आम्रगुप्तिः । शालगुप्तायनिः, शालगुप्तिः । वायुरथायनिः, वायुरथिः । पञ्चालानां राजा पाञ्चालस्तस्याऽपत्य—पाञ्चालायनिः, पाञ्चालिः । नापितस्याऽपत्यं—नापितायनिः, नापित्यः । पक्षे नापितशब्दस्येञ् नास्ति, तद्बाधनार्थं हि तस्य कुर्वादिषु पाठः । रैदत्तायनिः, रैदत्तिः । नौवाहायनिः, नौवाहिः । वृद्धादिति किम् ? अकम्पनस्याऽपत्यं—आकम्पनिः । अपौत्रादेरिति किम् ? दाक्षेः दाक्षायणः । औपगवस्य औपगविः ।

८५. पुत्रान्तात् ।

पूर्वमनुवर्तते । वृद्धसंज्ञकात् पुत्रान्तादपत्येऽर्थे आयनिञ् प्रत्ययो भवति वा । गार्गीपुत्रायणि, गार्गीपुत्रिः । वासवदत्तापुत्रायणिः, वासवदत्तापुत्रिः । पूर्वेणैव सिद्धे उत्तरसूत्रप्राप्तकुगागमाभावार्थम् । उत्तरेण कुगागमोऽपि ।

८६. वाकिन-गारेट-कार्कट्य-काक-लङ्क-चर्मि-वर्मिभ्यश्च कुगऽन्त्यस्वरस्य ।

वाकिन, गारेट, कार्कट्य, काक, लङ्क, चर्मिन्, वर्मिन्—इत्येतेभ्यश्चकाराद् वृद्धसंज्ञकात्पुत्रान्तादपत्येऽर्थे आयनिञ् प्रत्ययो वा भवति तत्संनियोगे चैषामन्त्यस्वरस्य कुगागमो भवति । वाकिनकायनिः, वाकिनिः । गारेटकायनिः, गारेटिः । कर्कटस्याऽपत्यं कार्कट्यः, तस्यापत्यं—कार्कट्यकायनिः, कार्कट्यायनः । यदा तु अव्युत्पन्नः कार्कट्यशब्दस्तदा पक्षे इञेव । कार्कट्यिः । काककायनिः, काकिः । लाङ्ककायनिः, लाङ्किः । केचिल्लङ्काशब्दमाकारान्तमिच्छन्ति । तन्मते लाङ्ककायनिः, लाङ्केयः । चार्मिकायणिः, चार्मिणः । वार्मिकायणि, वार्मिणः । 'संयोगादिनः' [८/४/५४] इति प्रतिषेधादणि टिलोपो न भवति । गार्गीपुत्रकायणिः, गार्गीपुत्रि । अन्त्यस्वरस्य कुग्विधानं चर्मिवर्मिणोर्नकारलोपार्थम्[1] । काकान्तानां शब्दानां पूर्वेणैव आयनिञ्सिद्धे कुगागमार्थं, लङ्कादीनां कुगागमार्थं प्रत्ययार्थं च वचनम् ।

८७. अवृद्धाद्वायनिः प्रायः ।

वृद्धसंज्ञकवर्जितादपत्येऽर्थे आयनिः प्रत्ययो वा भवति प्रायः । ग्लुचुकायनिः, ग्लौचुकिः । अहिचुम्बकायनिः, आहिचुम्बकि । त्रिपृष्टायनिः, त्रैपृष्टिः । श्रीविजयायनिः, श्रैविजयि । अवृद्धादिति किम् ? औपगविः, रामदत्तिः, रामदत्तायनिः पिता, रामदत्तायनि पुत्रः । आयनिञन्तादणो लुक् । प्रायोग्रहणात् क्वचिन्न—दाक्षिः, प्लाक्षिः ।

८८. स्त्रीभ्य एयण् ।

स्त्रीग्रहणेनेह आबादिप्रत्ययान्ता शब्दा ग्राह्याः । स्त्रीप्रत्ययान्तेभ्योऽपत्येऽर्थे एयण् प्रत्ययो भवति । विनताया अपत्यं—वैनतेयः । सौपर्णेयः, यौवतेयः, कामण्डलेयः ।

८९. द्विस्वरादनद्याः ।

पूर्वमनुवर्तते । द्विस्वरात् स्त्रीप्रत्ययान्ताद् अनदीवाचिनोऽपत्येऽर्थे एयण् प्रत्ययो भवति । दात्तेयः[2], गौप्तेयः । अनद्या इति किम् ? सीताया अपत्य—सैतः । सान्ध्यः, सैप्रः, रैवः, शौद्धः, कौलः, माहः । सीतादयो नद्यः । अवृद्धान्नदी-मानुषीनाम्नोऽपवादोऽयम् ।

---

१. 'नोऽपदस्य तद्धिते' [८/४/६२] इति टेर्लोपे वक्तव्येऽपि विधानसामर्थ्यात् कुगोऽलोपे नकारस्यैव लोप. ।

२. स्त्रीभ्य एयण् बाधकस्य 'अवृद्धान्नदी ··' [६/२/४३] इत्यणो बाधकोऽनेनैयण् ।

९०. इतोऽनिञः।

इञन्तवर्जितात् द्विस्वरादिकारान्तादपत्येऽर्थे एयण् प्रत्ययो भवति। नाभेरपत्य—नाभेय.। आत्रेय., आहेयः, दौलेयः, वालेयः, नैधेयः। इत इति किम्? दाक्षि.। अनिञ इति किम्? दाक्षायण.। द्विस्वरादिति किम्? मरीचेरपत्यं—मारीच.। कथ अजबस्तेरपत्यं—आजबस्तेयः, शाकन्धेय, पारिधेय, शाकुनेय, आतिथेय. इति? शुभ्रादित्वाद् भविष्यति।

९१. शुभ्रादिभ्यः।

शुभ्रादिभ्यः षष्ठ्यन्तेभ्योऽपत्येऽर्थे एयण् प्रत्ययो भवति। यथायोगमिञादीनामपवादः। शौभ्रेयः, वैष्टपुरेयः। शुभ्रादिगणो यथा—शुभ्र, विष्टपुर, विष्टपर, ब्रह्मकृत, शतद्वार, शताहार, शालाथल, किट, टीक, शालूक, कृकलास, प्रवाहण, भाग, भारत, भारम, कुदत्त, कर्पूर, इतर, अन्यतर, आलीढ, सुदत्त, सुदक्ष, तुद, अकशाप, वादन, शतल, शकल, शवल, शक, खडूर, कुशम्ब, शुक, विप्र, बीज, अश्व, बीजाश्व, अजिर, मवक्र, मखण्डु, मकष्टु, मघष्टु, सृकण्डु, मृकण्डु, जिह्मासिन्, अजबस्ति, शकन्धि, परिधि, अणीचि, कणीचि, शकुनि, अतिथि, अनुदृष्टि, शलाकाभ्रू, लेखाभ्रू, रोहिणी, रुक्मिणी, किकशा, विवशा, गन्ध, पिङ्गला, षडोन्मता, कुमारिका, कुबेरिका, अम्बिका, अशोका, श्वन्, गङ्गा, पाण्डु, विमातृ, विधवा, कद्रू, गोधा, सुदामन्, सुनामन्। इति आकृतिगणोऽयम्। मवक्रान्तानामिञोऽपवाद एयण्, मखण्ड्वादीनां विमात्रन्तानामण, विधवाया एरणः, कद्रूगोधयोश्चतुष्पादेयञ। सुदामन्सुनाम्नोरिञा शुभ्रस्य तु ञ्येन समावेशार्थं पाठ.।

९२. लक्षणश्यामाद् वाशिष्ठे।

लक्षण, श्याम—इत्येताभ्यां वाशिष्ठेऽपत्येऽर्थे एयण् प्रत्ययो भवति। लाक्षणेय श्यामेयो वा वाशिष्ठ। वाशिष्ठ इति किम्? लाक्षणिः, श्यामायन.। अश्वादित्वात् पौत्रादावायनञ्, अनन्तरापत्ये तु श्यामिः।

९३. विकर्णकुषीतकात्काश्यपे।

विकर्ण, कुषीतक—इत्येताभ्यां काश्यपेऽपत्येऽर्थे एयण् प्रत्ययो भवति। वैकर्णेय काश्यप। वैकर्णिरन्य.। कौषीतकेयः काश्यपः। कौषीतकिरन्य।

९४. वडवाया वृषे।

वृषः अपत्योत्पादनसमर्थ। वडवाशब्दाद् वृषेऽपत्येऽर्थे एयण् प्रत्ययो भवति। वाडवेयो वृष। स्त्रीत्वादेव एयणि सिद्धे पुनर्वचनं वृष एवेति नियमार्थम्, तेनाऽपत्यमात्रे तु अणेव। वाडवः।

९५. भ्रुवो भ्रुव् च।

भ्रूशब्दादपत्येऽर्थे एयण् प्रत्ययो भवति तत्संनियोगे चास्य भ्रुवादेशः। भ्रुवोऽपत्य—भ्रौवेय.[1]।

९६. कल्याण्यादेरिन् चाऽन्त्यस्य।

कल्याणी इत्येवमादिभ्योऽपत्येऽर्थे एयण् प्रत्ययो भवति तत्संनियोगे चैषामिन् इत्यन्तादेशो भवति। कल्याण्या अपत्य—काल्याणिनेयः। सौभागिनेय.। कल्याण्यादयो यथा—कल्याणी, सुभगा, दुर्भगा, बन्धकी, जरती, बलीवर्दी, ज्येष्ठा, कनिष्ठा, मध्यमा, परस्त्री, अनुदृष्टी, अनुसृष्टी इति कल्याण्यादि.। परस्त्र्यन्ताना **'स्त्रीभ्य एयण्'** [६/२/८८] इति अनुदृष्टे. **'शुभ्रादिभ्यः'** [६/२/९१] इति एयण्[2] सिद्ध एव इनादेशमात्रं विधीयते। अनुसृष्टेरुभयम्।

---

१. यथा चुनुकस्याऽपत्यसम्भवस्तथा भ्रुवोऽपि।

२. शुभ्रादित्वात् आनुदृष्टेय.। कल्याण्यादिपाठात् आनुदृष्टिनेयः।

९७. कुलटाया वा ।

कुलानि अटति कुलटा । कुलटाशब्दादपत्येऽर्थे एयण् प्रत्ययो भवति तत्संनियोगे इन् च वान्तादेशः । स्त्रीत्वादेव एयणि सिद्धे आदेशार्थं वचनम् । अत एव आदेशस्यैव विकल्पो न तु प्रत्ययस्य । कौलटिनेयः, कौलटेयः । इह कुलटाशब्देन सती भिक्षुकी विज्ञेया, या तु व्यभिचारार्थं कुलान्यटति, शीलं भिनत्ति, तत **'क्षुद्राभ्यो वा'** [६/२/१०४] इति परत्वादेरण् एव । कौलटेरः[1] ।

९८. चतुष्पाद्भ्य[2] एयञ् ।

चतुष्पाद्वाचिभ्य षष्ठयन्तेभ्योऽपत्येऽर्थे एयञ् प्रत्ययो भवति । अणादीनामपवादः । शाबलेयः, बाहुलेयः, धाबलेयः, जाम्बेयः, शैतिबाहेय, माद्रबाहेयः, सौरभेयः, कामण्डलेयः ।

९९. गृष्ट्यादेः ।

गृष्टयादिभ्य शब्देभ्योऽपत्येऽर्थे एयञ् प्रत्यया भवति । अणादीनामपवाद. । गृष्टेरपत्य—गार्ष्टेयः । हार्ष्टेयः । गृष्टिशब्दो यश्चतुष्पाद्वचनस्तत पूर्वेणैव सिद्धे अचतुष्पादर्थमुपादानम् । गृष्टयादयो यथा—गृष्टि, हृष्टि, हलि, बलि, विश्रि, कुद्रि, अजबस्ति, मित्रयु इति गृष्टयादिः । ञकारस्य ञित्कार्यार्थत्वात् मैत्रेयः पिता, मैत्रेयः[3] पुत्रः ।

१००. चटकादैरण् ।

चटकशब्दादपत्येऽर्थे ऐरण् प्रत्ययो भवति । चटकस्याऽपत्यं—चाटकैरः । लिङ्गविशिष्टग्रहणात् चटकाया अपि चाटकैरः ।

१०१. स्त्रियां लुक् ।

चटकशब्दादुत्पन्नस्य ऐरण्प्रत्ययस्य लुग् भवति स्त्रियाम् । चटकस्य चटकाया वा स्त्री अपत्य—चटका । अजादित्वादाप् ।

१०२. जण्टपण्टादाऽऽरण् ।

जण्ट, पण्ट—इत्येताभ्यां शब्दाभ्यामपत्येऽर्थे आरण् प्रत्ययो भवति । जाण्टारः, पाण्टारः । केचित् पक्षस्याऽपत्यं पाक्षार इत्यपीच्छन्ति ।

१०३. दुष्टे गोधाया एरण् च ।

गोधाशब्दाद् दुष्टेऽपत्येऽर्थे एरण् चकारात् आरण् च प्रत्ययो भवति । गोधाया अपत्यं दुष्टं—गौधेरः, गौधारः । योऽहिना गोधायां जन्यते । अन्यत्र गौधेयः । शुभ्रादित्वादेयण् ।

१०४. क्षुद्राभ्यो वा ।

अङ्गहीना अनियतपुंस्का वा स्त्रिय क्षुद्रा उच्यन्ते । बहुवचनं क्षुद्रार्थपरिग्रहार्थम् । क्षुद्रावाचिभ्यः शब्देभ्यः स्त्रीलिङ्गेभ्योऽपत्येऽर्थे एरण् प्रत्ययो वा भवति । अणेयणोरपवाद[4] । काणाया अपत्यं—काणेरः, काणेयः । दासेरः, दासेयः ।

---

१. **'क्षुद्राभ्यो वा'** [६/२/१०४] इति । पक्षे कौलटेय इत्यपि ।

२. चत्वारः पादा यासां स्त्रीणामिति कर्त्तव्य न तु येषां । यतः स्त्रीलिङ्गानामेवेष्यते न पुंलिङ्गानामिति ।

३. **'सारवैक्ष्वाक…'** [८/४/८२] इत्यादिनाऽयुलोपः । तत इञ् । तस्य **'ञिवार्षाणिञोः'** [६/२/१५०] इति लोपः ।

४. **'अवृद्धान्नदीमानुषी…'** [६/२/४३] इत्यणः, **'स्त्रीभ्य एयण्'** [६/२/८८] **'द्विस्वरादनद्याः'** [६/२/८९] इत्येताभ्यामेयणः ।

नाटेरः, नाटेयः । कार्दनेरः[1], कार्दनेयः ।

१०५. मातृपितुः स्वसुर्णीयडेयणौ ।

मातृपूर्वकस्य पितृपूर्वकस्य च स्वसुरपत्येऽर्थे णीयडेयणौ प्रत्ययौ भवतः । वचनभेदो यथासङ्ख्यनिवृत्त्यर्थः। मातृष्वस्रीयः[2], मातृष्वसेयः । पैतृष्वस्रीयः, पैतृष्वसेयः । डेयणि डित्त्वात् टिलोपः । मातृपितृशब्दयोर्ऋकारान्तयोर्निर्देशान्नेह— मातुःस्वस्रः, पैतुःस्वस्रः । मातुःष्वस्रः, पैतुःष्वस्रः । अत्र **'अलुकि वा'** [२/२/२२] इति वा षत्वम् ।

१०६. स्वसुरीयः ।

स्वसृशब्दादपत्येऽर्थे ईयः प्रत्ययो भवति । स्वस्रीयः ।

१०७. भ्रातुर्व्यश्च ।

भ्रातृशब्दादपत्येऽर्थे व्यः चकारात् ईयश्च प्रत्ययो भवति । भ्रातुरपत्यम्—भ्रातृव्यः । शत्रुरपि भ्रातृव्य उच्यते स उपचारात् । एकद्रव्याऽभिलाषश्चोपचारनिमित्तम् । भ्रात्रीयः ।

१०८. रेवत्यादेरिकण् ।

रेवती इत्येवमादिभ्योऽपत्येऽर्थे इकण् प्रत्ययो भवति । रैवतिकः, आश्वपालिकः । रेवत्यादिगणो यथा—रेवती, अश्वपाली, मणिपाली, द्वारपाली, वृकवञ्चिन्, वृकग्राह, कर्णग्राह, दण्डग्राह, कुक्कुटाक्ष इति रेवत्यादिः । द्वारपाल्यन्ताना-मेयणोऽपवादः । यदा मानुषीनाम तदाऽणोऽपि । वृकवञ्चिनोऽण, शेषाणामिञ ।

१०९. पौत्रादेः स्त्रियाः कुत्सिते णश्च ।

पौत्रादिप्रत्ययान्तात् स्त्र्यभिधानादपत्येऽर्थे णः प्रत्ययः चकारात् इकण् च प्रत्ययो भवति कुत्सिते गम्यमाने । पितुरसंविज्ञाने मात्रा व्यपदेशोऽपत्यस्य कुत्सा । गार्ग्या अपत्यं युवा गार्गः[5] गार्गिको वा जाल्मः । ग्लुचुकायन्या ग्लौचुकायनो ग्लौचुकायनिको वा जाल्मः । **'पौत्रादेर्यूनि'** [६/२/३३] इति यूनीमौ प्रत्ययौ । पौत्रादेरिति किम् ? कारिकेयो[4] जाल्मः । स्त्रिया इति किम् ? औपगविर्जाल्मः । कुत्सिते इति किम् ? गार्गेयो माणवकः[5] । मातुः संविज्ञानार्थमिदमुच्यते[6] ।

११०. भागवित्तितार्णबिन्दवाकशापेयेभ्यः सौवीरेष्विकण् वा ।

कुत्सित इत्यनुवर्तते । भागवित्ति, तार्णबिन्दव, आकशापेय—इत्येतेभ्यः सौवीरगोत्रेषु पौत्रादौ वर्तमानेभ्यो यून्यपत्ये इकण् प्रत्ययो वा भवति कुत्सिते गम्यमाने । भागवित्तेरपत्यं युवा—भागवित्तिको जाल्मः । पक्षे **'यञिञः'** [६/२/७३] इत्यायनण् । भागवित्तायनो जाल्मः । तार्णबिन्दविकः, तार्णबिन्दविर्वा जाल्मः । आकशापेयिकः, आकशापेयिर्वा जाल्मः । कुत्सित इति किम् ? अन्यत्र भागवित्तायनः, तार्णबिन्दविः, आकशापेयिः इत्येव भवति ।

१११. यामुन्दायनि-सौयामायनि-वार्ष्यायणिभ्य ईयश्च ।

एभ्य आयनिञन्तेभ्य सौवीरेषु पौत्रादौ वर्तमानेभ्यो यून्यपत्ये ईयश्चकारादिकण् च प्रत्ययो वा भवति कुत्सिते

---

१. कर्दना वशोपरि नर्तकी ।

२ **'स्वसृपत्योर्वा'** [३/२/३८] इति वालुकि ।

३. **'ञितद्धितस्वरे…'** [३/२/५३] इति पुंवद्भावेऽल्लोपे **'तद्धितेऽनातियस्वरे'** [८/४/७८] इति यलोपः ।

४. कारिकाया अपत्यम् । **'स्त्रीभ्य एयण्'** [६/२/८८] । **'णकतद्धितकोपधायाः'** [३/२/५७] इति पुंवत्त्वाभावः ।

५. नन्विह क्षेपोऽस्त्येवान्यथा माणव इत्यत्र णत्वं न स्यात् । सत्यम् । व्याख्यानात् पितुरसंविज्ञाने यत्र मात्रा व्यपदेशः स इह क्षेपो गृह्यते । यस्तु अन्यथा स नहि ।

६. पिता प्रख्यात एव परं पत्नीबाहुल्ये कस्या अयमित्याह ।

गम्यमाने। पक्षे अण्। यमुन्दस्यापत्यं—यामुन्दायनिः। तिकादित्वाद् आयनिञ्। तस्यापत्यं युवा—यामुन्दायनीयः, यामुन्दायनिकः, यामुन्दायनिर्वा जाल्मः। अणो लुक्। सुयाम्नोऽपत्यं सौयामायनिः, तस्याऽपत्यं युवा—सौयामायनीयः, सौयामायनिक, सौयामायनिर्वा जाल्मः। वृषस्यापत्यं वार्ष्यायणि, तस्यापत्यं—वार्ष्यायणीय, वार्ष्यायणिकः, वार्ष्यायणिर्वा जाल्मः। कश्चित् तु अन्येभ्योऽपि इच्छति। तैकायनेरपत्यं युवा—तैकायनीयः। कुत्सिते इति किम्? अन्यत्र यामुन्दायनिः, सौयामायनिः, वार्ष्यायणिर्युवा। अणेव। 'त्रिदार्षादणिञोः' [६/२/१५०] इति तस्य लुक्।

११२. सुयाम्न आयनिञ्।

सौवीरेष्वित्यनुवर्तते। सौवीरगोत्रे वर्तमानात् सुयामन्शब्दादपत्येऽर्थे आयनिञ् प्रत्ययो भवति। सौयामायनिः। सौवीरेभ्योऽन्यत्र सौयामः।

११३. पाण्टाहृतिमिमताण्णश्च।

सौवीरगोत्रे वर्तमानादिञन्तात् पाण्टाहृतिशब्दात् मिमतशब्दाच्च अपत्येऽर्थे णश्चकारात् आयनिञ् च प्रत्ययो भवति। पाण्टाहृतेरपत्य युवा सौवीरगोत्र —पाण्टाहृत, पाण्टाहृतायनिर्वा। मिमतस्य मैमत, मैमतायनिर्वा। सौवीरेष्विति किम्? पाण्टाहृतायन। 'यञिञः' [६/२/७३] इत्यायनण्। मैमतायन। नडादित्वादायनण्। अनन्तरो मैमतिः।

११४. श्वशुराद्यः।

श्वशुरशब्दादपत्येऽर्थे यः प्रत्ययो भवति। श्वशुरस्याऽपत्यं—श्वशुर्यः। 'संबन्धिनां संबन्धे' [८/४/१३३] इतीह न भवति। श्वशुरो नाम कश्चित्, तस्याऽपत्यं—श्वाशुरिः।

११५. राज्ञो जातौ।

राजन्शब्दादपत्येऽर्थे यः प्रत्ययो भवति जातौ गम्यमानायाम्। राज्ञोऽपत्य—राजन्यः[१] क्षत्रियश्चेत्। जाताविति किम्? राजनोऽन्यः[२]।

११६. क्षत्त्रादियः।

क्षत्त्रशब्दादपत्येऽर्थे इयः प्रत्ययो भवति जातौ गम्यमानायाम्। क्षत्त्रस्याऽपत्यं—क्षत्त्रियो जातिश्चेत्। क्षात्त्रिरन्य।

११७. मनोर्याऽणौ षुक् च।

मनुशब्दादपत्येऽर्थे य, अण्—इत्येतौ प्रत्ययौ भवतः तत्संनियोगे च मनुशब्दस्य षुगागमः जातौ गम्यमानायाम्। मनोरपत्यानि—मनुष्याः, मानुषाः। मानुषी। जाताविति किम्? मानवः, मानवा। मानवीः प्रजाः पश्य। अत्र हि मनोरपत्यमित्येतावानेवार्थो विवक्षितो न जातिस्तेन षुगागमो न भवति। पौत्राद्यपत्यविवक्षायां तु गर्गादिपाठाद्यञेव। मानव्यः, मानव्यौ। मनवः। मानव्यायनी। मनुष्यमानुषशब्दाभ्यां सत्यसति चाऽपत्येऽर्थे अनभिधानाद् अपत्ये पुनरन्यः प्रत्ययो न भवति।

११८. माणवः कुत्सायाम्।

माणव इति मनुशब्दस्यौत्सर्गिके अण्प्रत्यये कुत्सायां गम्यमानायां नकारस्य णकारादेशे निपात्यते। मनोरपत्यं

---

१. 'अनोऽत्ये ये' [८/४/५२] इति टिलोपो न।

२. राज्ञः स्वामिनोऽपत्यं वारणो वा। 'अणि' [८/४/५३] इति टिलोपो न।

कुत्सितं मूढं माणवः।

११९. कुलादीनः।

कुलशब्दान्तात् केवलाच्च कुलशब्दादपत्येऽर्थे ईन प्रत्ययो भवति। कुलस्याऽपत्यं—कुलीनः। ईषदऽपरिसमाप्तं कुल बहुकुलं, तस्याऽपत्यं—बहुकुलीनः। क्षत्रियकुलीनः। एषु अत इञः अवृद्धादेः आयनेश्चापवाद। आढ्यकुलीनः, राजकुलीनः। अत्र **'वृद्धाद्यपौत्राद्वेर्वा'** [६/२/८४] इत्यायनिञः अत इञश्च। उत्तरसूत्रे समासे प्रतिषेधादिह कुलान्तः केवलश्च गृह्यते।

१२०. यैयकञावऽसमासे वा।

कुलशब्दान्तात् केवलाच्च कुलशब्दादपत्येऽर्थे य, एयकञ्—इत्येतौ प्रत्ययौ वा भवतः ताभ्यां मुक्ते ईनश्च, न चेत् कुलशब्दः समासे वर्तते। कुल्यः, कौलेयकः, कुलीनः। बहुकुल्यः, बाहुकुलेयकः, बहुकुलीनः। असमास इति किम्? आढ्यकुलीनः।

१२१. महाकुलादञीनञौ।

महाकुलशब्दादपत्येऽर्थे अञ्, ईनञ्—इत्येतौ प्रत्ययौ वा भवतः ताभ्यां मुक्ते ईनश्च। माहाकुलः, माहाकुलीनः, महाकुलीनः। महेत्याकारनिर्देशात् महतां कुलं महत्कुलं, तस्याऽपत्य—महत्कुलीन इति ईन एव भवति।

१२२. दुष्कुलादेयण्।

दुष्कुलशब्दादपत्येऽर्थे एयण् प्रत्ययो वा भवति। पक्षे ईनः। दौष्कुलेयः, दुष्कुलीनः।

१२३. रूढादञ्।

रूढसंज्ञकादञ् प्रत्ययो भवति। अनुवर्तमानेऽपि अपत्याधिकारे रूढसंज्ञायां राजाऽपत्ययोरुभयार्थयोर्वर्तमानायां रूढसंज्ञकात् राजापत्ययोरर्थयो प्रत्ययो भवति। पञ्चालाना जनपदस्य राजा पञ्चालस्य राज्ञोऽपत्यं वा पाञ्चालः। पाञ्चालौ, पञ्चालाः। बहुत्वे **'बहुष्वस्त्रियां पुरोऽश्च'** [६/२/१३४] इति लुक्। एवं वैदेहः, वैदेहौ, विदेहाः। ऐक्ष्वाकः, ऐक्ष्वाकौ, इक्ष्वाकवः। रूढादिति किम्? पञ्चालस्य ब्राह्मणस्य राजा। पाञ्चालः। **'तस्येदं'** [७/१/११२] इत्यण्। अपत्ये तु पाञ्चालिः। आदर्शस्य राष्ट्रस्य राजा—आदर्शकः। दशरथस्य क्षत्रियस्याऽपत्य—दाशरथिः। त्रिपृष्ठस्य त्रैपृष्ठिः।

१२४. गान्धारि-साल्वेयात्।

गान्धारि, साल्वेय—इत्येताभ्यां रूढसंज्ञकाभ्यां अञ् प्रत्ययो भवति। गान्धारीणां राजा गान्धारेरपत्यं वा गान्धारः। गान्धारौ, गान्धारयः। बहुष्वञो लुक्। एवं साल्वेयः, साल्वेयौ, साल्वेयाः। जनपदसमाननामानौ क्षत्रियवाचिनौ इञेयणन्तौ शब्दावेतौ। एकत्वद्वित्वयोस्तु अपत्यार्थविवक्षायां **'अब्राह्मणात्'** [६/२/१५१] इति लुग् न भवति विधानसामर्थ्यात्। अन्यथा ञ्यविधावेवानयोः[१] प्रतिषेध क्रियेत। तथा पूर्वेणैव अञ् सिध्यति। वृद्धलक्षणस्य ञ्यस्याऽपवादः।

१२५. द्विस्वर-मगध-कलिङ्ग-शूरमसादण्।

रूढसंज्ञकेभ्यो द्विस्वरेभ्यो मगध, कलिङ्ग, शूरमस—इत्येतेभ्यश्च अण् प्रत्ययो भवति। अञोऽपवादः। द्विस्वर—अङ्गानां राजा अङ्गस्याऽपत्यं वा आङ्गः। अङ्गाः। वाङ्गः, वङ्गाः। सौह्मः, सुह्माः। पौण्ड्रः, पुण्ड्राः। दारदः, दरदः। भार्गः,

---

१. अगान्धारिसाल्वेयवृद्धाद् ञ्य इत्यनया युक्त्या प्रतिषेधे कृते **'रूढादञ्'** [६/२/१२३] इत्यनेनाञ् भविष्यतीत्यर्थः।

भर्गाः । साल्वः, साल्वाः । मगधानां राजा मगधस्याऽपत्यं वा मागधः । मागधौ, मगधाः । एवं कालिङ्गः, कालिङ्गौ, कलिङ्गाः । शौरमसः, शौरमसौ, शूरमसाः । सर्वत्र बहुषु लुक् । अत्रैव सिद्धेऽण्विधानं सङ्घाद्यण्बाधनार्थम् । तेनाऽकञ् भवति । आङ्गकं[1], मागधकं, कालिङ्गकं, शौरमसकम् । अत्रन्ताद् हि गोत्रात् **'सङ्घाङ्कघोषलक्षणेष्वञ्यञिञः'** [७/१/१२६] इत्यण् बाधकः स्यात् ।

१२६. वृद्धाद् ञ्यः ।

रूढसंज्ञकात् वृद्धाद् ञ्यः प्रत्ययो भवति । आम्बष्ठानां राजा आम्बष्ठस्याऽपत्यं वा आम्बष्ठ्यः । आम्बष्ठाः । सौवीराणां सौवीरस्य वा सौवीर्यः । सौवीराः । एवं काम्बव्यः, काम्बवाः । दार्व्यः, दार्वाः । द्विस्वरलक्षणोऽण् परत्वादनेन बाध्यते । प्रत्यये ञकारोऽग्रिमसूत्रे वृद्ध्यर्थः ।

१२७. इत्कोशलाजाद-कुरु-नादिभ्यः ।

नकार आदिर्यस्य स नादिः । रूढसंज्ञकादिदन्तात् कोशलाजादाभ्यां कुरुशब्दात् नकारादिभ्यश्च ञ्यः प्रत्ययो भवति । इदन्त—अवन्तीनामऽवन्तेर्वा आवन्त्यः । अवन्तयः । कौन्त्यः, कुन्तयः । चैद्यः, चेदयः । काश्यः, काशयः । कोशलानां कोशलस्य वा कौशल्यः । कोशलाः । अजादानामजादस्य वा आजाद्यः । अजादाः । कुरूणां कुरोर्वा कौरव्यः । कुरवः । नादि—निषधानां निषधस्य वा नैषध्यः । निषधाः । नैचक्यः, निचकाः । नैप्यः, नीपाः । एभ्य इति किम् ? कुमारी नाम जनपदः क्षत्रिया च, ततो अत्रैव भवति । कौमारः ।

१२८. पाण्डोर्ड्यण् ।

रूढात् पाण्डुशब्दात् ड्यण् प्रत्ययो भवति । पाण्डूनां राजा पाण्डोरपत्यं वा पाण्ड्यः । पाण्ड्यौ, पाण्डवः । कथं पाण्डवाः यस्य दासाः ? उच्यते—महाभारतस्थो यो युधिष्ठिरपिता पाण्डुनामा स जनपदवाची न, ततः शिवाद्यण् । रूढसंज्ञकस्तु अनादिरेव । डकारष्टिलोपार्थः । णकारो वृद्धिनिमित्तपुंवद्भावप्रतिषेधार्थः । पाण्ड्याभार्यः ।

१२९. साल्वाऽवयव-प्रत्यग्रथ-कलकूटाश्मकादिञ् ।

साल्वो जनपदस्तदवयवा उदुम्बरादयस्तेभ्यः प्रत्यग्रथ, कलकूट, अश्मक—इत्येतेभ्यश्च रूढसंज्ञकेभ्य इञ् प्रत्ययो भवति । अत्रोऽपवादः । उदुम्बराणां राजा उदुम्बरस्याऽपत्यं वा औदुम्बरिः । उदुम्बराः । एवं तैलखलिः, तिलखलाः । माद्रकारिः, मद्रकाराः । यौगन्धरिः, युगन्धराः । भौलिङ्गिः, भुलिङ्गाः । शारदण्डिः, शरदण्डाः । आजमीढिः, अजमीढाः । आजकुन्दिः, अजकुन्दाः । बौधिः, बुधाः । इति साल्वावयवाः । प्रात्यग्रथिः, प्रत्यग्रथाः । कालकूटिः, कलकूटाः । आश्मकिः, अश्मकाः । सर्वत्र बहुषु लुक् ।

उदुम्बरास्तिलखलाः मद्रकारा युगन्धराः ।
भुलिङ्गाः शरदण्डाश्च साल्वावयवसंज्ञिकाः ॥

अजमीढाजकुन्दबुधास्तु उदुम्बरादिविशेषाः । तेऽपि साल्वावयव एव । प्रत्यग्रथादिग्रहणं असाल्वावयवार्थम् ।

१३०. कम्बोजादिभ्यो लुक् ।

रूढादित्यनुवर्तते । कम्बोजादेर्गणात् परस्य रूढादुत्पन्नस्य प्रत्ययस्य लुग् भवति । कम्बोजानां राजा कम्बोजस्याऽपत्यं वा कम्बोजः । एवं शकः, यवनः, जर्तः, चोलः, केरलः, आधारयः, विधारयः, उपधारयः, अपधारयः,

---

१. अङ्गस्यापत्यानि अण्, लुक् । अङ्गानां संघादि **'गोत्रादवत्'** [७/१/१२६] इत्यकञ्विषये **'न प्राग्जीयतीये स्वरे'** [६/२/१४७] इति अणो लुक् निवर्तते ।

मुरलः, खसः। इत्याकृतिगणोऽयम्।

१३१. स्त्रियां कुन्त्यवन्तिभ्याम्।

कुन्ति, अवन्ति—इत्येताभ्यां परस्य रूढादुत्पन्नस्य प्रत्ययस्य लुग् भवति स्त्रियामभिधेयायाम्। कुन्तेरपत्यं स्त्री—कुन्ती। एवं अवन्ती। स्त्रियामिति किम्? कौन्त्यः, आवन्त्यः।

१३२. कुरोर्वा।

कुरुशब्दात्परस्य रूढादुत्पन्नस्य प्रत्ययस्य लुग् वा भवति स्त्रियाम्। कुरोरपत्यं स्त्री—कुरू। कौरव्यायणी। **'कौरव्यासुरिमाण्डूकात्'** [२/३/२४] इति डायनुक् च।

१३३. अञणोरप्राच्यभर्गादेः।

प्राच्यान् भर्गादींश्च वर्जयित्वा अन्यस्मात् रूढादुत्पन्नयोरञणो स्त्रियां लुग् भवति। अञ्—शूरसेनस्याऽपत्यं स्त्री—शूरसेनी। एवमपाच्या[1]। अण्—मद्री, मत्सी, दरत्, पर्शु, रक्षा, असुरी। पर्शु, रक्षस्, असुरि इति रूढा। एषामपत्य सघ. स्त्रीत्वविशिष्टो विवक्षित इति अञणो. **'कम्बोजादिभ्यो लुक्'** [६/२/१३०] इति लुकि पुनः **'पर्श्वादेरण्'** [७/४/८१] इति स्वार्थिकोऽण्। तस्यापि स्त्रियामनेन लुक्। रूढादिति किम्? औत्सी, औपगवी। अञणोरिति किम्? औदुम्बरी। साल्वावयवादिञ्। अप्राच्यभर्गादेरिति किम्? पाञ्चाली, वैदेही, पैप्पली, मागधी, कालिङ्गी, वैदर्भी, आङ्गी, वाङ्गी, सौह्मी, पौण्ड्री, शौरमसी। इमे प्राच्या रूढा.। भर्गादि—भार्गी, कारूषी। भर्ग, करुष, करूश, केकय, कश्मीर माल्व, मुस्थाल, उरश, यौधेय, शौक्रेय, शौभ्रेय, घार्तेय, धार्तेय, ज्यावानेय, त्रिगर्त, भरत, उशीनर इति भर्गादिः। यौधेयादिज्यावानेयान्तानां स्वार्थिकस्याऽञो[2] रूढस्य लुक्[3] प्रतिषिध्यते। यौधेयीनां सघादि यौधेयमिति सघाद्यणर्थम्। लुकि हि सति अञन्तत्वाऽभावात् संघाद्यण् न स्यात्। प्रकृतस्य[4] तु अञः[5] प्रसङ्गाऽभावान्न प्रतिषेध। भरतोशीनरशब्दौ उत्सादिषु पठ्येते। तयोरिहोपादानात् सत्यऽपि अणपवादे चेत्यस्मिन् उत्साद्यञ बाधित्वा रूढसंज्ञक[6] एवाञ् भवतीति ज्ञाप्यते। तेन[7] भरताना राजानो भरता, उशीनराणामुशीनरा इति राजनि विहितस्याऽञ उत्तरसूत्रेण[8] लुक् सिद्धो भवति। उत्साद्यञस्तु रूढसंज्ञाया अभावान्न स्यात्। नाऽपि[9] **'यञञोऽश्यापर्णान्त…'** [६/२/१३६] इत्यादिना प्राप्ति. राज्ञामगोत्रत्वात्।

१३४. बहुष्वस्त्रियां पुरोश्च।

बहुषु वर्तमानस्य पुरोरुत्पन्नस्य रूढादुत्पन्नस्य च प्रत्ययस्य लुग् भवति न तु स्त्रियाम्। पुरोरपत्यानि—पुरवः। औत्सर्गिकोऽण्। तस्य च लुक्। पञ्चालाना राजानः पञ्चालस्याऽपत्यानि वा पञ्चाला.। अङ्गाः। लोहध्वज एव

---

१ **'द्युप्रागपागुदक्प्रतीचो यः'** [६/४/४] रूढादञ् [६/२/१२३] इति च।

२. **'यौधेयादेरञ्'** [७/४/७६] इति विहितस्य।

३ स किमर्थमित्याह।

४. **'रूढाञ्'** [६/२/१२३] इति विहितस्य।

५. अमीषां रूढसंज्ञत्वाऽभावे प्राप्त्यभावादित्यर्थ।

६ प्रथमं **'प्राग्दीव्यतोऽण्'** [६/२/१४] प्राप्नोति, तस्य बाधको **'रूढाञ्'** [६/२/१२३] इत्यञ्। इदं द्वयमपि बाधित्वा उत्सादित्वादञ् प्राप्नोति, अणपवादे चेति वचनादिति स्थिते गणपाठात् **'रूढाञ्'** [६/२/१२३] इत्यनेव भवति।

७ तेनेत्यादिना ज्ञापकसिद्धं फल दर्शयति।

८. **'बहुष्वस्त्रियां पुरोश्च'** [६/२/१३४] इत्यनेन। न च तस्याप्यनेन निषेधः। अत्र स्त्रियामिति अधिकारात्।

९. अयमर्थ.—उत्साद्यञोपि **'यञञोऽश्यापर्णान्त…'**, [६/२/१३६] इत्यादिना लुग् भविष्यतीति न वाच्यम्। तत्र गोत्राधिकारादपत्यस्यैव लुग् भवति, न राजनि विहितस्येति।

लौहध्वज्य:। लौहध्वज्यौ, लोहध्वजा.। बहुष्विति किम्? पौरव., पाञ्चाल:। प्रियो वाङ्गो येषां ते प्रियवाङ्गा:--इत्यत्र तु अण् प्रत्ययो न बहुषु किं तर्हि समास इति लुग् न भवति। 'प्रत्ययः प्रकृत्यादेः' [८/४/१२७] इति नियमात् हि समासोऽणन्तो न भवति। पञ्चालस्याऽपत्यं पाञ्चालस्तस्य तयोर्वाऽपत्यानि पाञ्चाला:--इत्यत्र तु इञि लुप्ते अञन्तमेव बहुषु वर्तते इति अञोऽपि लुक्। अस्त्रियामिति किम्? पुरोरपत्यानि स्त्रियः--पौरव्य:। पञ्चालस्याऽपत्यानि स्त्रिय.--पाञ्चाल्य:। लौहध्वज्या स्त्रिय:। पञ्चभिः पाञ्चालीभिः क्रीतः पञ्चपञ्चाल.--इत्यत्र तु इकणो लुक. पित्त्वात् पुंवद्भावेन स्त्रीत्वनिवृत्तेर्लुग् भवत्येव। पुरुग्रहणमरूढार्थम्। अस्ति राजा पुरुर्नाम न तु जनपदः।

१३५. यस्कादिभ्यो गोत्रे।

यस्कादिभ्यो बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य प्रत्ययस्य लुग् भवति न तु स्त्रियाम्। यस्कस्याऽपत्य--यास्क:। यास्कौ, यस्का:। लाह्य:, लाह्यौ, लह्या:। शिवादित्वादण्। यस्कादेरिति किम्? उपगोरपत्यं--औपगवः। औपगवौ, औपगवा। यास्कायनयः, लाह्यायनयः। गोत्रे इति किम्? यास्काश्छात्रा:। अस्त्रियामिति किम्? यास्क्य. स्त्रिय:। यस्कादिगणो यथा--यस्क, लह्य, द्रुह्य, अयस्थूण, तृणकर्ण, भलन्दन। एभ्यः शिवाद्यणो लुक्। खरप। अस्मान्नडाद्यायनणः। भडिल, भण्डिल, भडित, भण्डित। एभ्योऽश्वाद्यायनञः। सदामत्त, कम्बलहार, पर्णाढक, कर्णाढक, पिण्डीजङ्घ, बकसक्थ, रक्षोमुख, जङ्घारथ, उत्काश, कटुमन्थ, कदुकमन्थ, विषपुट, निकष, कषक, उपरिमेखल, कद्दम, कृश, पटाक, क्रोष्टुपाद, क्रोष्टुमाय, शीर्षमाय, स्थगल, पदक, वर्म्मक। एभ्योऽत इञ:। पुष्करसद्। अस्माद् बाह्वादीञ.। विश्रि, कुद्रि, अजबस्ति, मित्रयु। एभ्यो गृष्ट्याद्येयञ:। इति यस्कादि.।

१३६. यञञोऽश्यापर्णान्तगोपवनादेः।

बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानयो. यञ्, अञ्--इत्येतयोरस्त्रियां लुग् भवति गोपवनादिभ्यः श्यापर्णान्तेभ्यो विहित वर्जयित्वा। गोपवनादिर्बिदाद्यन्तर्गण.। गार्ग्य., गार्ग्यौ, गर्गा:। वात्स्य:, वात्स्यौ, वत्सा:। बैद, बैदौ, बिदा:। और्व, और्वौ, उर्वा.। गर्गमयं, गर्गरूप्यम्। अश्यापर्णान्तगोपवनादेरिति किम्? गौपवना, शैग्रवा:, बैन्दवा:, ताजमा:, आश्ववताना:, श्यामाका, श्यापर्णा:। केचित् तु मठरराजमाऽश्वतानाऽञ्श्यामाकशब्दानपि गोपवनादिषु पठन्ति। माठरा इत्यादि। श्यापर्णान्तग्रहण किम्? हारित, हारितौ, हरिता:। गोपवनादिग्रहणं किम्? धैनव, धैनवौ, धेनव। बहुष्विति किम्? गार्ग्य, बैद। बैदस्य बैदयोर्वाऽपत्यानि बिदा--इत्यत्र तु अञि[१] लुप्तेऽञन्त न बहुष्विति लुक्। बिदानामपत्यं बैद:, बैदो--इत्यत्र त्विञि लुप्तेऽञन्तं न बहुष्विति लुग् न भवति। इञ्प्रत्ययविषयेऽपि अञो लुक् न भवति 'न प्राग्दीव्यतीये स्वरे' [६/२/१४५] इति प्रतिषेधात्। अस्त्रियामिति किम्? गार्ग्य स्त्रिय:। बैद्य: स्त्रिय:। पञ्चभिर्गार्गीभिः क्रीतः पञ्चगर्ग., दशगर्ग. पट.--इत्यत्र तु इकणो लुक पित्त्वात् पुंवद्भावेन स्त्रीत्वनिवृत्तेर्लुक्। गोत्रे इति किम्? औत्साश्छात्रा:। उत्सादेरञ्। पौनर्भवा., पौत्रा, दौहित्रा., नानान्द्रा:। 'पुनर्भूपुत्रदुहितृननान्दुभ्योऽनन्तरेऽञ्' [६/२/५४]। प्रियो गार्ग्यो गार्ग्यौ वा येषां ते प्रियगार्ग्या:--इत्यत्र तु न यञ् प्रत्ययो बहुषु किं तर्हि समास इति लुग् न भवति। प्रिया गर्गा यस्य स प्रियगर्ग:--इत्यत्र तु प्रत्ययस्य बहुत्वाद् भवत्येव।

१३७. कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च।

कौण्डिन्य, आगस्त्य--इत्येतयोर्बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानयोर्यञोऽणश्चाऽस्त्रियां लुग् भवति तयोश्च **कुण्डिनी-अगस्त्यशब्दयोः** कुण्डिन, अगस्ति इत्येतावादेशौ भवतः। आगस्त्यशब्दस्य ऋष्यणन्तत्वात् यञञौ[२] न संभवतः। कुण्डिन्या अपत्यं, गर्गादित्वाद्यञ्। अत एव निर्देशात् पुंवद्भावाऽभावः। कौण्डिन्य, कौण्डिन्यौ, कुण्डिना.। आगस्त्य., आगस्त्यौ, अगस्तयः। प्रत्ययलुकं कृत्वा आदेशकरणं अगस्तीनां इमे आगस्तीया इत्येवमर्थम्। प्रत्ययान्तादेशे हि कृते अगस्तिशब्दस्या-

---

१. 'त्रिकार्षाणिभ्यो:' [६/२/१५०] इत्यनेन।

२. तेनास्याण एव लुगित्यर्थ:।

देराकारस्याऽभावात् **'वृद्धिर्यस्य स्वरेष्वादिः'** [६/२/११] इति वृद्धसंज्ञा न स्यात्। तदऽभावे च तन्निमित्तो **'वृद्धादीयः'** [६/४/३२] इतीयः प्रत्ययोऽपि न स्यात्। यदा तु प्रत्ययस्य लुग् विधीयते तदा स्वरादौ ईयप्रत्यये भाविनि **'न प्राग्दीव्यतीये स्वरे'** [६/२/१४५] इति प्रतिषेधात् प्रत्ययस्य लुग् न भवति तथा च सति वृद्धसंज्ञत्वादीय. सिद्धो भवति। कुण्डिन्यामविशेष.[1]। प्रत्ययान्तादेशे हि कुण्डिनशब्दादऽवृद्धसंज्ञकात् **'तस्येदं'** [७/१/११२] इत्यणा भवितव्यम्। प्रत्ययस्य तु लुकि **'न प्राग्दीव्यतीये स्वरे'** [६/२/१४५] इति लुक्प्रतिषेधे सत्यपि वृद्धसंज्ञायामीयप्रत्ययाऽपवाद, शकलादित्वादणेव स्यात् अतो न विशेषः। अस्त्रियामिति किम्? कौण्डिन्य:, आगस्त्य. स्त्रियः।

१३८. भृग्वत्रि-कुत्स-वसिष्ठ-गोतमाङ्गिरसः।

भृगु, अत्रि, कुत्स, वसिष्ठ, गोतम, अङ्गिरस्—इत्येतेभ्यो बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य प्रत्ययस्याऽस्त्रिया लुग् भवति। भार्गव., भार्गवौ, भृगव। एवमत्रय, कुत्सा, वसिष्ठाः, गोतमा, अङ्गिरस.। अत्रिशब्दाद्यणो लुक्, इतरेभ्योऽण। अस्त्रियामिति किम्? भार्गव्य., आत्रेय्य, आङ्गिरस्यः स्त्रिय। बहुष्विति किम्? भार्गव, आत्रेयः। गोत्रे इति किम्? भार्गवाश्छात्रा.। भृग्वादीन् यस्कादिषु अपठित्वेदं वचन **'द्वयेकेषु षष्ठयास्तत्पुरुषे यञादेः'** [६/२/१४४] इत्येवमर्थम्। अन्यथा भृगुकुलं[2], भार्गवकुलं इति न[3] सिध्येत्।

१३९. प्राच्यभरते बहुस्वरादिञः।

बहुस्वरान्नाम्न प्राच्यगोत्रे भरतगोत्रे च वर्तमानो य इञ् प्रत्ययस्तस्य लुग् भवति बहुत्वे न तु स्त्रियाम्। प्राच्य—पान्नागारि, पान्नागारी, पन्नागारा। क्षैरकलम्भि, क्षैरकलम्भी, क्षीरकलम्भा। मान्थरेषणि, मान्थरेषणी, मन्थरेषणा। सर्वेष्वत इञ। भरत—यौधिष्ठिरिः, यौधिष्ठिरी, युधिष्ठिरा। आर्जुनि, आर्जुनी, अर्जुना। औद्दालकि., औद्दालकी, उद्दालका। एभ्यो बाह्वादीञ.। बहुस्वरादिति किम्? चैङ्क्य, पौष्पय, काशय, वाशय। इञ इति किम्? शान्तनवा। प्राच्यभरते इति किम्? बालाकय., हास्तिदासयः। बहुत्वे इति किम्? आर्जुनि, आर्जुनी। कथ तौल्वलय, तैल्वलय, तैल्वकय—इत्यादिषु लुग् न भवति? उच्यते—यस्कादिषु पुष्करसच्छब्दपाठात्[4]। अस्य हि बहुस्वरत्वात् अनेनैव इञ्लोपे सिद्धे तदर्थो यस्कादिपाठो ज्ञापयति तौल्वल्यादीनामिञो लुग् न भवतीति। भरता प्राच्या एव तेषां पृथगुपादान प्राच्यग्रहणेनाऽग्रहणार्थम्[5], तेन यौधिष्ठिरि. पिता, यौधिष्ठिरायण पुत्र—इत्यत्र **'प्राच्येञोऽतौल्वल्यादेः'** [६/२/१५३] इति लुग् न भवति।

१४०. वोपकादेः।

उपकादिभ्य परस्य गोत्रप्रत्ययस्य बहुत्वे लुग् वा भवति न तु स्त्रियाम्। उपका, औपकायना। लमका, लामकायना। अस्त्रियामिति किम्? औपकायिन्य स्त्रिय। उपकादिगणो यथा— उपक, लमक। आभ्या नडाद्यायनणो लुक्। भ्रष्टक, कपिष्ठल, कृष्णाजिन, कृष्णसुन्दर, पिङ्गलक, कृष्णपिङ्गल, कलशीकण्ठ, दामकण्ठ, जनुक, कनक, मदाघ, अपजग्ध, अडारक, वटारक, प्रतिलोम, अनुलोम, प्रतान, अनुपद, अभिहित, अनभिहित, खारीजङ्घ, कणकृत्स्न, शलाथल, कमन्दक, कमन्तक, कवन्तक, पिञ्जूलक, अडड्डक, अवव्वक, पतञ्जल, पदञ्जल, वर्णक, पर्णक, कठेरित। एभ्योऽत इञ।

---

१ ईयप्रत्ययापेक्षमिदमुक्त, अविशेष इति न प्रत्ययान्तरे। यतः प्रत्ययलोपेऽपि हि **'न प्राग्दीव्यतीये…'** [६/२/१४५] इति लोपनिषेधे यञन्तात् कुण्डिनानामय सर्षादि इति विवक्षायामण् भवति, तथा च कौण्डिनमिति भवति। सप्रत्ययादेशे हि अयञन्तात् **'गोत्रादवण्ड…'** [७/१/१२६] इत्यकञ् स्यात्, तदा कौण्डिनकमिति भवत्यतो विशेष।

२ भृगोरपत्यमपत्ये वा ऋष्यण्। भार्गवस्य भार्गवयोर्वा कुलम्।

३. तदाऽयञादित्वात् तत्र हि यञादेर्वा इत्युक्तम्। ततश्च **'यञञोऽश्यापर्णान्त…'** [६/२/१३६] इत्यारभ्य येषां बहुत्वे लुक् तेषामेकत्वद्वित्वयोरपि लुग्।

४ अय शब्दस्तौल्वल्यादिषु पठ्यते।

५ अयमर्थ—अन्यत्र सूत्रे प्राग्ग्रहणेन भरताग्रहणमिति।

कुषीतक। अत्र काश्यपेऽर्थे **'विकर्णकुषीतकात्काश्यपे'** [६/२/९३] इत्येयण। अन्यत्रेञ्। लेखाभ्रू। अत्र शुभ्रादीयण्। पिष्ट, सुपिष्ट, मसुरकर्ण, कर्णक, पर्णक, जटिलक, बधिरक। एभ्य. शिवाद्यण्। कठेलिति, पतञ्जलि, खरीखन। एभ्य औत्सर्गिकाण्। इत्युपकादिः।

१४१. तिककितवादेर्द्वंद्वे।

तिककितवादिभ्य परस्य गोत्रप्रत्ययस्य बहुत्वे लुग् भवति द्वद्वसमासे न तु स्त्रियाम्। तैकायनयश्च कैतवायनयश्च—तिककितवा। तिकाद्यायनिञो लुक्। औब्जयश्च काकुभाश्च—उब्जककुभा। उब्जादिञ्, ककुभाच्छिवाद्यण्। औरशायनयश्च लाङ्कटयश्च—उरशलङ्कटा। उरशात्तिकाद्यायनिञ्, लङ्कटादिञ्। अग्निवेशाश्च दाशेरकयश्च—अग्निवेशदशेरका। शण्डिलाश्च काशकृत्स्नयश्च—शण्डिलकशकृत्स्ना। अग्निवेशशण्डिलाभ्यां गर्गादियञ्. दशेरककशकृत्स्नाभ्या तु **'अत इञः'** [६/२/३४]। **'वान्येन'** [६/२/१४३[इति यञो लुग्विकल्पे प्राप्ते नित्यार्थः पाठ। औपकायनाश्च लामकायनाश्च - उपकलमका। अत्र नडाद्यायनण। भ्राष्ट्रकयश्च कापिष्ठयलश्च—भ्रष्ट्रककपिष्ठला। कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च - कृष्णाजिनकृष्णसुन्दरा। वाह्वरयश्च भाण्डीरथयश्च—वह्वरभण्डीरथा। पाहकयश्च नारकयश्च—पहकनरका। बाकनखयश्च स्वागुदपारिणद्धयश्च—बकनखस्वगुदपरिणद्धा। अन्येषा बाकनखयश्च स्वागुदयश्च पारिणद्धयश्चेति त्रिपदो द्वन्द्व। लाङ्कयश्च शान्तमुखयश्च—लाङ्कशान्तमुखा। एषु सर्वेष्वत इञ। उपकलमका, भ्रष्ट्रककपिष्ठलाः, कृष्णाजिनकृष्णसुन्दरा —इत्येतेषा उपकादिष्वद्वन्द्वार्थ पाठ, द्वन्द्वे तु अयमेव नित्यो विधि.।

१४२. रूढादेस्तथा।

द्वद्वे वर्तमानानां रूढादीनामबहुत्वे[1] प्रत्ययस्य लुग् भवति तथा—यथापूर्वम्[2]। आङ्गश्च वाङ्गश्च सौह्मश्च—अङ्गवङ्गसुह्मा। अत्र द्विस्वरलक्षणस्याणो लुक्। एवं गर्गवत्सवाजा। अत्र यञ.। विदगर्गयस्का। अत्राञो यञोऽणश्च। तथेति किम्? यास्कलाह्याश्छात्रा। अत्र **'तस्येदं'** [७/१/११२] इत्यणो लुग् न भवति **'यस्कादेर्गोत्रे'** [६/२/१३५] इत्यत्र गोत्रे उत्पन्नस्येति प्रत्ययस्य विशेषणात्। गार्गीवत्सवाजा। अत्र वत्सवाजयोरेव यञो लुक् न गार्गी इत्यत्र तत्राऽस्त्रियामिति प्रतिषेधात्। शैग्रवगौपवना। अत्र '...**अश्वापर्णान्तगोपवनादेः**' [६/२/१३६] इति प्रतिषेधात् अञो लुग् न भवति। बालाकिहार्मितदासयः। अत्र प्राच्यभरते इति वचनात् अप्राच्यभरते न भवति। रूढादिग्रहणमगोत्रेऽपि यथा स्यादित्येवमर्थम्। अबह्वर्थं वचनम्।

१४३. वाऽन्येन।

बहुष्वर्थेषु रूढादीनामन्येन सह द्वन्द्वे प्रत्ययस्य तथा लुग् वा भवति यथा पूर्वम्। अङ्गवङ्गदाक्षयः, आङ्गवाङ्गदाक्षय। गर्गवत्सौपगवा, गार्ग्यवात्स्यौपगवा.। भृगुवत्साग्रायणा., भार्गववात्स्याग्रायणा। गर्गकश्यपगालवा., गार्ग्यकाश्यपगालवा। पूर्वेण नित्ये प्राप्ते विकल्पार्थं[3] वचनम्।

१४४. द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेः।

वेत्यनुवर्तते। षष्ठीतत्पुरुषे यत्पदं तस्या षष्ठ्या विषये द्वयोरेकस्मिंश्च वर्तते तस्य यो यञादिः प्रत्ययस्तस्य

---

१. **'बहुष्वस्त्रियां पुरोश्च'** [६/२/१३४] इत्यारभ्य येभ्यो लुगुक्तस्ते रूढादयो ज्ञेयाः। **'अञाणोरप्राच्यभर्गादेः'** [६/२/१३३] इत्यनेन तु एकत्वद्वित्वबहुत्वसामान्ये लुगुक्तः, अनेनापि तथैवेति, न तत्रास्य कश्चिदुपयोगोऽतो **'बहुष्वस्त्रियां पुरोश्च'** [६/२/१३४] इत्यारभ्य उदाह्रियते।

२ यथापूर्वमिति पूर्वं बहुत्वे यस्य लुग् भवति, द्वन्द्वे बहुत्वेऽपि तस्यैव भवति। यस्य न भवति तस्य न भवत्येव, यस्यादेशेन सह तस्यादेशेन सहैव, यस्य विकल्पस्तस्य विकल्प एवेत्यर्थः।

३ पूर्वेण **'रूढादेस्तथा'** [६/२/१४२] इति सामान्यवचनादत्रापि सिद्धे यञाऽन्येन सह द्वंद्व तत्रानेन विकल्प एवेत्यर्थः।

तथा लुग् वा भवति यथा पूर्वम् । गार्ग्यस्य गार्ग्ययोर्वा कुलं गर्गकुलं, गार्ग्यकुलम् । एवं बिदकुलं, बैदकुलम् । अगस्तिकुलं, आगस्त्यकुलम् । भृगुकुलं, भार्गवकुलम् । द्वयेकेष्विति किम् ? गर्गाणां कुलं — गर्गकुलम् । षष्ठ्या इति किम् ? गार्ग्यहितं, परमगार्ग्यः । षष्ठ्या इति तत्पुरुषस्य विशेषणेन प्रतिपदोक्तस्यैव षष्ठीतत्पुरुषस्य परिग्रहादिह न भवति । गार्ग्यस्य गार्ग्ययोर्वा अन्तर्गतः – अन्तर्गार्ग्यः । **'निरादयो' गताद्यर्थे पञ्चम्या'** [३/१/९६] इत्यनेन बहुलत्वात् षष्ठ्यन्तेनाऽपि समासः । द्वयेकेष्वित्यस्य षष्ठ्या इति विशेषणं किम् ? देवदत्तस्य गार्ग्यः—देवदत्तगार्ग्यः । देवदत्तगार्ग्यौ । तत्पुरुष इति किम् ? गार्ग्यस्य समीपमुपगार्ग्यम् । यञादेरिति किम् ? आङ्गकुलं, यास्ककुलम् ।

१४५. न प्राग्दीव्यतीये स्वरे ।

गोत्रे उत्पन्नस्य प्रत्ययस्य बहुत्वे यो लुगुक्तः स प्राग्दीव्यतीयेऽर्थे यो विधीयते स्वरादिस्तद्धितस्तस्मिन् विषयभूते न भवति । गर्गाणां छात्राः—गार्गीयाः । वात्सीयाः, आत्रेयीयाः, आगस्तीयाः, खाग्पायणीयाः, हारितीयाः । प्राग्दीव्यतीये इति किम् ? गर्गेभ्यो हितं—गर्गीयम् । वत्सीयं, अत्रीयं, अगस्तीयम् । स्वर इति किम् ? गर्गेभ्य आगतं—गर्गमयम् । गर्गरूप्यम् । बिदानामपत्यं युवा बैदः, बैदौ—इत्यत्र तु इञि विषयभूतेऽनेन प्रतिषेधः । इञस्तु लुकि सति अञन्तं न बहुषु वर्तते इति लुक्प्राप्तिरेव नास्ति । यत्र त्वस्ति तत्र भवत्येव । बिदानामपत्यानि—बिदाः । अथेह कस्मान्न लुक्प्रतिषेधः—अत्रीणां भरद्वाजानां च विवाहः अत्रिभरद्वाजिका, वसिष्ठकश्यपिका, भृग्वङ्गिरसिका ? उच्यते—**'गर्गभार्गविका'** [६/२/१४६] इत्युत्तरसूत्रं नियमार्थम् । गर्गभार्गविकाया अन्यत्र द्वंद्वे प्रतिषेधो न भवति । गोत्रे इति किम् ? कुवलया फलं कुवलं, तस्येदं—कौवलम् ।

१४६. गर्गभार्गविका ।

गर्गभार्गविकेति द्वद्वात् प्राग्दीव्यतीये विवाहे यो विधीयतेऽकल् प्रत्ययस्तस्मिन् अणो लुक्प्रतिषेधो निपात्यते । गर्गाणां पौत्रादीनां भृगूणां पौत्रादीनां यूनां च विवाहो गर्गभार्गविका । अत्रिभरद्वाजिकादिवदप्राप्तः प्रतिषेधो निपात्यते ।

१४७. यूनि लुक् ।

यून्यपत्ये विहितस्य प्रत्ययस्य प्राग्दीव्यतीये स्वरादौ प्रत्यये विषयभूतेऽनुत्पन्न एव लुग् भवति । लुकि सति यो यतः प्राप्नोति स ततः उत्पद्यते । पाण्टाहृतस्याऽपत्यं पाण्टाहृतिः, तस्याऽपत्यं युवा पाण्टाहृतः । **'पाण्टाहृतिमिमताण्णश्च'** [६/२/११३] इति णः । तस्य छात्रा इति प्राग्दीव्यतीये स्वरादौ विवक्षिते णस्य लुक् । तत इञन्तं प्रकृतिरूपं सम्पन्नमिति **'पौत्रादेरञः'** [६/४/२८] इत्यञ् भवति । पाण्टाहृताः । भगवित्तस्याऽपत्यं भागवित्तिः, तस्याऽपत्यं युवा— भागवित्तिकः । **'भागवित्तितार्णबिन्दव···'** [६/२/११०] इत्यादिना इकण् । तस्य छात्रा इति पूर्ववदिकणि निवृत्तेऽञ् । भागवित्ताः । वृषस्याऽपत्यं वार्ष्यायणिः, तस्याऽपत्यं युवा—वार्ष्यायणीयः । **'यामुन्दायनिसौयामायनि···'** [६/२/१११] इत्यादिनेयः । तस्य छात्रा इति पूर्ववदीयस्य लुकि **'वृद्धादीयः'** [६/४/३२] इतीयः । वार्ष्यायणीयाः । ग्लुचुकस्याऽपत्यं ग्लुचुकायनिः, तस्याऽपत्यं युवा—ग्लौचुकायनः । औत्सर्गिकोऽण् । तस्य छात्रा इति पूर्ववदणो लुकि पुनः शैषिकोऽणेव भवति । ग्लौचुकायनाः । स्वरे इति किम् ? पाण्टाहृतरूप्यं, पाण्टाहृतमयम् । प्राग्दीव्यतीये इति किम् ? भागवित्तिकाय हितं—भागवित्तिकीयम् ।

१४८. आयनणायनिञोर्वा ।

पूर्वेणैव सिद्धे विकल्पार्थं वचनम् । यून्युत्पन्नयोः आयनण्, आयनिञ्—इत्येतयोः प्रत्यययोः प्राग्दीव्यतीये स्वरादौ प्रत्यये विषयभूते लुग् वा भवति । गर्गस्याऽपत्यं गार्ग्यः, तस्याऽपत्यं युवा – गार्ग्यायणः । **'यञिञः'** [६/२/७३] इत्यायनण् । तस्य छात्रा गार्गीयाः, गार्ग्यायणीया वा । **'वृद्धादीयः'** [६/४/३२] इतीयः । एवं वात्सीयाः, वात्स्यायनीयाः वा

---

१. बाहुलकात् षष्ठ्यन्तेन समासः । यतस्तत्र पञ्चम्यन्तान्तैरेव समास उक्तः ।

छात्राः । आयनिञ्—होतुरपत्यं हौत्रः, तस्यापत्यं युवा हौत्रायणिः । **'अणो द्विस्वरात्'** [६/२/८३] इत्यायनिञ् । तस्य छात्राः हौत्रीयाः, हौत्रायणीया वा । **'वृद्धाद्दोयः'** [६/४/३२] इतीयः । एव यास्कीयाः, यास्कायनीया वा छात्राः । आयनणो णित उपादानात् ञित पूर्वेण नित्यमेव लुक् । अत्रेरपत्यमात्रेयः, तस्यापत्यं भारद्वाजो युवा—आत्रेयायणः । **'आत्रेयाद् भारद्वाजे'** [६/२/६६] इत्यायनञ् । तस्य छात्रा आत्रेयीयाः ।

१४९. रूढेञः ।

वेत्यनुवर्तते । प्राग्दीव्यतीये स्वरे इति तु निवृत्तम् । रूढसंज्ञकात् परो य इञ् तदन्तात् परस्य युवप्रत्ययस्य लुग् वा भवति । उदुम्बरस्याऽपत्यं—औदुम्बरिः । **'साल्वावयव···'** [६/२/१२६] इत्यादिनेञ् । तस्याऽपत्य युवा—औदुम्बरि, औदुम्बरायणो वा । **'यञिञः'** [६/२/७३] इत्यायनण् । रूढग्रहणं किम् ? दाक्षेरपत्यं—दाक्षायणः । इञ इति किम्? अङ्गस्याऽपत्यमाङ्गः । **'द्विस्वरमगध···'** [६/२/१२५] इत्यादिनाऽण् । तस्याऽपत्यमिति **'अणो द्विस्वरात्'** [६/२/८३] इत्यायनिञ् । तस्य **'अब्राह्मणात्'** [६/२/१५१] इति नित्यं लुक् । आङ्गः पिता । आङ्गः पुत्रः । **'अब्राह्मणात्'** [६/२/१५१] इति नित्य लुकि प्राप्ते विकल्पार्थं वचनम् ।

१५०. ञिदार्षादणिञोः ।

ञित्प्रत्ययान्तात् आर्षप्रत्ययान्ताच्च परस्य युवप्रत्ययस्य अण इञश्च लुग् भवति । वचनभेदाद् यथासंख्याऽभावः । ञितः—तिकस्याऽपत्यं—तैकायनिः । **'तिकादेरायनिञ्'** [६/२/८१] । तस्याऽपत्यम् । औत्सर्गिकोऽण् । तस्य लुक् । तैकायनिः पिता । तैकायनि पुत्रः । विदस्याऽपत्यं—बैदः । बिदादित्वादञ् । तस्यापत्यम् । **'अत इञ्'** [६/२/३४] इतीञ् । तस्य लुक् । बैदः पिता । बैद पुत्रः । कुरोरपत्यं—कौरव्यः । **'कुर्वादेर्ञ्यः'** [६/२/७८] । तस्याऽपत्यम् । **'अत इञ्'** [६/२/३४] । तस्य लुक् । कौरव्य पिता । कौरव्य पुत्रः । तिकादिषु औरशशब्दसाहचर्यात् कौरव्यशब्दः क्षत्रियगोत्रवृत्तिर्विज्ञायते, अयं तु ब्राह्मणगोत्रवृत्तिरिति, अत आयनिञ् न भवति । आर्षात्—वासिष्ठः पिता । वासिष्ठः पुत्रः । वैश्वामित्र पिता । वैश्वामित्र पुत्र । ऋष्यणन्तादिञ् । तस्य लुक् । आत्रेयः पिता । आत्रेय पुत्र । **'इतोऽनिञः'** [६/२/६०] इत्येयणन्तादिञ् । तस्य लुक् । ञिदार्षादिति किम्? औपगवः पिता । औपगविः पुत्रः । औत्सर्गिकाणन्तादिञ् । कौहडः पिता । कौहडि पुत्र । शिवाद्यणन्तादिञ् । अणिञोरिति किम् । दाक्षेरपत्यं—दाक्षायणः ।

१५१. अब्राह्मणात् ।

अब्राह्मणवाचिनः पौत्रादिप्रत्ययान्ताद् यूनि विहितस्य प्रत्ययस्य लुग् भवति । अङ्गस्याऽपत्यं—आङ्गः । **'द्विस्वरमगध···'** [६/२/१२५] इत्यादिनाऽण् । तस्याऽपत्यम् । **'अणो द्विस्वरात्'** [६/२/८३] इत्यायनिञ् । तस्य लुक् । आङ्गः पिता । आङ्गः पुत्रः । एवं सौह्मः पिता । सौह्मः पुत्रः । मगधस्याऽपत्यं—मागधः । **'द्विस्वरमगध···'** [६/२/१२५] इत्यादिनाऽण् । तस्यापत्यम् । **'अत इञ्'** [६/२/३४] । तस्य लुक् । मागधः पिता । मागधः पुत्रः । एव कालिङ्गः पिता । कालिङ्गः पुत्रः । शौरमसः पिता । शौरमसः पुत्रः । तथा नाकुलः पिता । नाकुलः पुत्रः । साहदेवः पिता । साहदेवः पुत्रः । वासुदेवः पिता । वासुदेवः पुत्रः । आनिरुद्धः पिता । आनिरुद्धः पुत्र । रान्धसः पिता । रान्धसः पुत्रः । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । एभ्यः **'ऋष्यन्धकवृष्णिकुरुभ्यः'** [६/२/४४] इत्यण् । तत इञो लुक् । मायूरिः पिता । मायूरिः पुत्रः । कार्णखारिः पिता । कार्णखारिः पुत्रः । कापिञ्जलिः पिता । कापिञ्जलिः पुत्रः । अत्र **'अत इञ्'** [६/२/३४] इतीञ् । तत आयनणो लुक् । श्वशुर्यः पिता । श्वशुर्यः पुत्रः । कुलीनः पिता । कुलीनः पुत्रः । अत्रेञो लुक् । अब्राह्मणादिति किम्? गार्ग्यः पिता । गार्ग्यायण पुत्रः ।

१५२. पैलादेः ।

पैलादिभ्यो यूनि विहितस्य प्रत्ययस्य लुग् भवति । ब्राह्मणार्थमप्राच्यार्थं वचनम् । पीलाया अपत्यं—पैलः । **'साल्वापीलाभ्यां वा'** [६/२/५१] इत्यण् । तस्याऽपत्यम् । **'अणो द्विस्वरात्'** [६/२/८३] इत्यायनिञ् । तस्य लुक् । पैलः पिता । पैलः पुत्रः । शलङ्कोरपत्यं—शालङ्किः । **'शालङ्क्यौदिषाडि···'** [६/२/४०] इत्यादिना निपातनात् ।

तस्यापत्यम् । **'यञिञः'** [६/२/७३] इत्यायनण् । तस्य लुक् । शालङ्किः पिता । शालङ्कि: पुत्र । पैलादयो यथा—पैल, शालङ्कि, सात्यकि, सात्यंकामि, औदन्यि, औदञ्चि, औदमज्जि, औदव्रजि, औदभृज्जि, औदमेघि, औदशुद्धि, औदकशुद्धि, दैवस्थानि, पैङ्गलोदयनि, राणि, राहक्षिति, भौलिङ्गि, औद्गाहमानि, औज्जिहानि, औज्जहानि इति पैलादि ।

१५३. प्राच्येञोऽतौल्वल्यादेः ।

ब्राह्मणार्थं वचनम् । प्राच्यगोत्रे य इञ् तदन्तात् तौल्वल्यादिवर्जितात् यून्यपत्ये विहितस्य प्रत्ययस्य लुग् भवति । पान्नागारिः पिता । पान्नागारि पुत्र । मान्थरेषणिः पिता । मान्थरेषणि पुत्र. । क्षैरकलम्भि पिता । क्षैरकलम्भि पुत्र. । **'अत इञ्'** [६/२/३८] । ततो **'यञिञः'** [६/२/७३] इत्यायनण् । तस्य लुक् । प्राच्यग्रहण किम् ? दाक्षि. पिता । दाक्षायण पुत्र । इञ इति किम् ? राघवः पिता । राघवि. पुत्र । तौल्वल्यादिवर्जन किम् ? तौल्वलि पिता । तौल्वलायनि पुत्रः । तैल्वलि. पिता । तैल्वलायनः पुत्र. । दालीपिः पिता । दालीपायन पुत्र । अत्र दिलीपशब्दस्याऽत एव निपातनादिञि वृद्धिराकार । अपरे दलीप इति प्रकृत्यन्तरमाहु । तौल्वल्यादयो यथा—तौल्वलि, तैल्वलि, तैल्वकि, धारणि, रामणि, दालीपि, दैवोति, दैमवति, दैवयज्ञि, प्राटाहति, प्रादाहति, चाफट्टकि, आसुरि, पौष्करसादि, आनुराहति, आनुति, नैमिश्रि, नैमिशिल, नैमिशि, आशि, बान्धकि, यासि, बाद्धकि, आसिनासि, आसिबद्धकि, चैङ्कि, पौष्पि, आहिसि, वैरकि, वैलकि, वैशीति, वैहति, वैकर्णि, वार्कलि, कारेणुपालि इति तौल्वल्यादि ।

तृतीयश्चरणः

१. तेन रक्तं रागात्।

तेनेति तृतीयोपलक्षणम्। शुक्लस्य[1] वर्णान्तरापादनं इह रञ्जेरर्थः। रज्यतेऽनेनेति रागः कुसुम्भादिः। तृतीयान्तात् रागविशेषवाचिनो नाम्नो रक्तेऽर्थे यथाविहितं अणादयः प्रत्यया भवन्ति। कुसुम्भेन रक्तं वस्त्रं—कौसुम्भम्। एवं काषायं, कौङ्कुमं, माञ्जिष्ठं, हारिद्रम्। वाधिकारात्पक्षे वाक्य समासश्च भवति। कुसुम्भेन रक्तं, कुसुम्भरक्त-मित्यादि। रागादिति किम्? चैत्रेण रक्तम्। पाणिना रक्तम्। रागशब्देन प्रसिद्धा एव कुसुम्भादयो रागा गृह्यन्ते, तेनेह न—कृष्णेन रक्तं, लोहितेन रक्तं, पीतेन रक्तमिति। एते हि वर्णा द्रव्यवृत्तयो[2] न[3] तु रागाख्याः। कथं काषायौ गर्दभस्य कर्णौ, हारिद्रौ कुक्कुटस्य पादाविति? काषायाविव काषायौ, हारिद्राविव हारिद्रौ इत्युपमानोपमेयभावेन तद्गुणाध्यारोपाद् भविष्यति।

२. लाक्षारोचनाभ्यामिकण्।

पूर्वमनुवर्तते। लाक्षा, रोचना—इत्येताभ्यां तृतीयान्ताभ्यां रागवाचिभ्यां रक्तेऽर्थे इकण् प्रत्ययो भवति। अणोऽपवादः। लाक्षया रक्तं—लाक्षिकम्। रोचनया रक्तं—रौचनिकम्।

३. शकलकर्दमाद्[4] वा।

शकल, कर्दम—इत्येताभ्यां तृतीयान्ताभ्यां रागवाचिभ्यां रक्तेऽर्थे इकण् प्रत्ययो वा भवति। पक्षेऽण्। शकलेन रक्तं—शाकलिकं, शाकलम्। कार्दमिकं, कार्दमम्।

४. नीलपीताभ्यामकौ।

नील, पीत—इत्येताभ्यां तृतीयान्ताभ्यां रागवाचिभ्यां रक्तेऽर्थे यथासंख्यं अ, क इत्येतौ प्रत्ययौ भवतः। नीलेन लिङ्गविशिष्टग्रहणात् नील्या वा रक्तं नीलम्। पीतेन रक्तं—पीतकम्। केचित्[5] तु पीतकशब्दादपि अप्रत्यय-मिच्छन्ति। पीतकेन कुसुम्भप्रथमनिर्यासेन रक्तं पीतकम्। स्वार्थिकेनैव केन सिद्धे अणपवादार्थं वचनम्।

५. चन्द्रयुक्तान्नक्षत्राद्युक्ते काले।

तृतीयान्ताच्चन्द्रयुक्तान्नक्षत्रवाचिनो युक्तेऽर्थे यथाविहितं प्रत्ययो भवति स चेद् युक्तोऽर्थः कालो भवति। अधिकारत्वादण्। पुष्येण चन्द्रयुक्तेन युक्तं दिनं—पौष दिनम्। एवं पौषी रात्रिः। पौषोऽहोरात्रः। पौषः कालः। माघमहः।

---

१. उपलक्षणमिदमन्येषामपि वर्णानां वर्णान्तरापादनमिह रञ्जेरर्थः।

२. द्रव्येषु कुसुम्भादिषु वृत्तिर्येषां, द्रव्याश्रयी गुण इति कृत्वा।

३. रज्यते अनेनेति रागशब्दव्युत्पत्तेरघटनात्।

४. शकलं रक्तचन्दनं कर्बुरवर्णो वा, कर्दमस्तु मृत्तिकाविशेषः।

५. ते हि 'नीलपीतकात्' 'पीतात्क' इति द्वे सूत्रे विरचयन्ति।

माघी रात्रिः । माघोऽहोरात्रः । माघः कालः । चन्द्रयुक्तादिति किम् ? शुक्रयुक्तेन पुष्येण युक्तः कालः । नक्षत्रादिति किम् ? चन्द्रयुक्तेन शुक्रेण युक्तः कालः । काल इति किम् ? चन्द्रयुक्तेन पुष्येण युक्तो ग्रहः ।

६. लुगऽप्रयुक्ते ।

पूर्वेण विहितस्य प्रत्ययस्य लुग् भवति अप्रयुक्ते काले । दिनरात्र्यादिप्रयुक्ते सति तु लुग् नेति भावः । अद्य पुष्यः । अद्य मघाः । अद्य कृत्तिका । अद्य फल्गुन्यः[1] । पुष्ये[2] पायसमश्नीयात् । मघासु पललौदनम् । अप्रयुक्ते इति किम् ? पौषमहः । पौषी रात्रिः । पौषोऽहोरात्रः । पौषः कालः ।

७. श्रवणाऽश्वत्थात्संज्ञायामः ।

चन्द्रयुक्तात् तृतीयान्तान्नक्षत्रवाचिनः श्रवणशब्दात् अश्वत्थशब्दाच्च युक्ते काले अः प्रत्ययो भवति संज्ञायां विषये । श्रवणेन चन्द्रयुक्तेन युक्ता—श्रवणा रात्रिः । श्रवणा पौर्णमासी । श्रवणो मुहूर्तः । अश्वत्थेन चन्द्रयुक्तेन युक्ता—अश्वत्था रात्रिः । अश्वत्था पौर्णमासी । अश्वत्थो मुहूर्तः । सत्यपि अन्वर्थयोगे न कालमात्रमेव उच्यते, अपि तु कालविशेष एवेति संज्ञात्वम् । संज्ञायामिति किम् ? श्रावणमहः, श्रावणी रात्रिः । आश्वत्थमहः, आश्वत्थी रात्रिः ।

८. द्वंद्वादीयः ।

तृतीयान्ताच्चन्द्रयुक्तान्नक्षत्रवाचिद्वंद्वात् युक्ते काले ईयः प्रत्ययो भवति । राधानुराधाभिश्चन्द्रयुक्ताभिर्युक्तमहः —राधानुराधीयमहः । अद्य राधानुराधीयम् । एवं तिष्यपुनर्वसवीया रात्रिः । अद्य तिष्यपुनर्वसवीयम् ।

९. उदितगुरोरऽब्दे ।

नक्षत्राद् युक्ते इत्यनुवर्तते । उदितो गुरुर्बृहस्पतिर्यस्मिन् नक्षत्रे तद्वाचिनस्तृतीयान्तात् युक्तेऽर्थे यथाविहित-प्रत्यया भवन्ति स चेत् युक्तोऽर्थोऽब्दः संवत्सरः स्यात् । पुष्येणोदितगुरुणा युक्तं वर्षं—पौषं वर्षम् । फल्गुनीभिरुदित-गुरुभिः युक्तः—फाल्गुनः संवत्सरः । उदितगुरोरिति किम् ? उदितशनैश्चरेण पुष्येण युक्तं वर्षमित्यत्र न भवति । नक्षत्रादिति किम् ? उदितगुरुणा पूर्वरात्रेण युक्तं वर्षम् । अब्द इति किम् ? मासे दिवसे वा न भवति ।

१०. तस्य समूहे ।

तस्येति षष्ठ्या उपलक्षणम् । षष्ठ्यन्तान्नाम्नः समूहेऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति । गोत्रादकञ् वक्ष्यते अचित्तादिकण् केदाराण्ण्यश्चेत्येवमादयः । ततः अन्यत् इह उदाहरणं द्रष्टव्यम् । चाषाणां समूहः—चाषम् । एवं काकं, बाकं, शौकं, भैक्षुकं, वाडवम् । वनस्पतीनां समूहः—वानस्पत्यम् । स्त्रैणं, पौंस्नम् । पञ्चानां कुमाराणां समूहः पञ्चकुमारी इत्यत्र तु समूहः[3] समाहार एव । स च समासार्थः समासेनैव च गतः इति तद्धितो नोत्पद्यते । यदि उत्पद्येत को दोषः स्यात् ? उत्पन्नस्यापि हि अस्य **'द्विगोरनपत्ये यस्वरादेर्लुगद्विः'** [६/२/२६] इति लुका भवितव्यं, तथा चाऽविशेषः । नैवम् । **'लुक् तद्धितलुक्यगोणीसूच्योः'** [२/३/११६] इति ईब्निवृत्तिः[4] स्यात् । **'तस्येदं'** [७/१/११२] इत्येव अणादिसिद्धौ समूहविवक्षायां तदपवादबाधनार्थो[5] योगः ।

---

१. **'फल्गुनीप्रोष्ठपदानां नक्षत्रे'** [१/१/६६] इति बहुवद्भावः ।

२. पयसि संस्कृतं **'संस्कृते भक्ष्ये'** [६/३/१०७] अण् । पयसा संस्कृतमिति तु कृते **'संस्कृते'** [७/२/८] इति अनेन इकण् स्यात् ।

३. द्वयोरपि एकार्थत्वात् समूह एव समाहार इत्यर्थः ।

४. तद्धितलुकि सतीति शेषः ।

५. ईयादीनामित्यर्थः ।

११. भिक्षादेः।

भिक्षादिभ्यः षष्ठ्यन्तेभ्यः समूहेऽर्थे यथाविहितं प्रत्ययो भवति। भिक्षाणां समूहः—भैक्षम्। गार्भिणं[1], यौवतम्। अचित्तेकणो बाधनार्थं वचनम्। औलूक्यशब्दस्य गोत्राऽकञो बाधनार्थः पाठः। युवतेरण् सिद्ध एव। पुंवद्भावबाधनार्थस्तु पाठः। अन्ये तु युवतिशब्दं न पठन्ति। तन्मते पुंवद्भावे सति युवतीनां समूहो यौवनमित्येव भवति।

सुरूपमतिनेपथ्यं, कलाकुशलयौवनम्।
यस्य पुण्यकृतः प्रैष्यं, सफलं तस्य यौवनम्॥

भिक्षादिगणो यथा—भिक्षा। भिक्षशब्दः अकारान्तोऽपीत्येके। गर्भिणी, युवति, क्षेत्र, करीष, अङ्गार, चर्मन्, वर्मन्, चर्मिन्, वर्मिन्, पद्धति, सहस्र, अथर्वन्, दक्षिणा, खण्डिक, युग, वरत्रा, युगवरत्रा, हल, बन्ध, हलबन्ध, औलूक्य इति भिक्षादिः।

१२. क्षुद्रकमालवात्सेनासंज्ञायाम्।

क्षुद्रकमालवशब्दात् षष्ठ्यन्तात्समूहेऽर्थे यथाविहितमण् प्रत्ययो भवति सेनाया सञ्ज्ञायाम्। क्षुद्रकाश्च मालवाश्च क्षुद्रकमालवास्तेषां समूहः—क्षौद्रकमालवी। एवंनामा काचित्सेना। सेनासंज्ञायामिति किम्? क्षौद्रकमालवकमन्यत्। गोत्रादकञ्बाधनार्थं वचनम्। समूहाधिकारे हि तदन्तस्याऽपि[2] ग्रहणं 'खेनोरनञः' [६/३/१६] इति प्रतिषेधात्।

१३. गोत्रोक्षोष्ट्रोरभ्र[3]-राज-राजन्य-राजपुत्र-वत्साज-मनुष्य-वृद्धादकञ्।

स्वापत्यसंतानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्याऽपत्यं गोत्रम्। गोत्रप्रत्ययान्तेभ्य उक्षादिभ्यश्च तस्य समूहेऽर्थे अकञ् प्रत्ययो भवति। अणोऽपवादः। गोत्र—औपगवानां समूहः—औपगवकम्। कापटवक, गार्गकं, वात्सकं, गार्ग्यायणक, वात्स्यायनकम्। उक्षन्—औक्षकम्। उष्ट्र—औष्ट्रकम्। उरभ्र—औरभ्रकम्। राजन्—राजकम्। राजन्य—राजन्यकम्। राजपुत्र—राजपुत्रकम्। वत्स—वात्सकम्। अज—आजकम्। मनुष्य—मानुष्यकम्। वृद्ध—वार्धकम्।

१४. केदाराण्ण्यश्च।

केदारशब्दात् तस्य समूहेऽर्थे ण्यः चकारात् अकञ् इत्येतौ प्रत्ययौ भवतः। अचित्तेकणोऽपवादः। कैदार्यं, कैदारकम्।

१५. कवचिहस्त्यचित्ताच्चेकण्।

कवचिन्, हस्तिन्—इत्येताभ्यामचित्तवाचिभ्यः केदाराच्च तस्य समूहेऽर्थे इकण् प्रत्ययो भवति। कवचान्येषां सन्तीति कवचिनः, तेषां समूहः—कावचिकम्। हस्तिनां लिङ्गविशिष्टस्यापि ग्रहणात् हस्तिनीनां वा समूहः—हास्तिकम्। अचित्तात्—आपूपिकं, शाष्कुलिकम्। केदारात्—कैदारिकम्। एवं केदारस्य त्रैरूप्यं भवति। ण्याकञ्भ्यां बाधा मा भूदिति केदारात् इकण्विधानम्[4]।

---

१. अत्र गर्भिणीशब्दो मेषमालाशालिपङ्क्त्यादिवाचकत्वादऽचित्तविशेषवचन इतीकण्प्राप्तौ तद्बाधकोऽनेनाण्। ततो 'जितद्धितयस्वरे' [३/२/५३] इति पुंवद्भावे 'संयोगादिनः' [८/४/५४] इत्यन्तलोपप्रतिषेधः। गर्भवतीस्त्रीवचनात् तु इकणोऽप्राप्तेः औत्सर्गिक एवाण्।

२. अन्यथा 'प्रत्ययः प्रकृत्यादेः' [८/४/१२७] इति न्यायात् समुदायस्याऽगोत्रत्वात् क्षौद्रकमालवकमिति न सिध्येत्।

३. राजन्यमनुष्यशब्दौ औणादिकौ इति पृथगुपादानम्। अपत्यप्रत्ययान्तयोस्तु गोत्रद्वारेण सिद्धम्।

४. अन्यथा अचित्तद्वारा सिध्यतीत्याशङ्क्याह।

१६. धेनोरनञः ।

धेनुशब्दात् तस्य समूहेऽर्थे इकण् प्रत्ययो भवति न चेत् स धेनुशब्दो नञः परो भवति । धेनूनां समूहः—धैनुकम् । अनञ इति किम् ? अधेनूनां समूहः—आधैनवम् । उत्सादित्वादञ् । 'धेनोरनञः' इति प्रतिषेधो लिङ्ग[1], समूहे तदन्तस्याऽपि भवतीति । तेन क्षौद्रकमालवक, ब्राह्मणराजन्यकं[2], वानरहस्तिकं, गौधेनुकम् ।

१७. केशाण्ण्यो वा ।

केशशब्दात् तस्य समूहेऽर्थे ण्यः प्रत्ययो वा भवति । अचित्तत्वात् इकण्येव प्राप्ते वचनम् । केशानां समूहः—कैश्यं, कैशिकम् ।

१८. गणिकायाः ।

गणिकाशब्दात् तस्य समूहेऽर्थे ण्यः प्रत्ययो भवति । गाणिक्यम् । योगविभागाद् वा इति निवृत्तम् ।

१९. ब्राह्मणमाणववाडवाद्यः ।

ब्राह्मणादिभ्यस्तस्य समूहेऽर्थे यः प्रत्ययो भवति । ब्राह्मण्य, माणव्य, वाडव्यम् । ण्येऽनुवर्तमानेऽपि यविधान पुंवद्भावार्थम् । ब्राह्मणाः प्रकृता अस्यां यात्रायाम् । 'तयोः समूहवच्च बहुषु' [८/२/१७] इति यः प्रत्यय । ब्राह्मण्या यात्रा यस्य स ब्राह्मण्ययात्रः । ण्ये हि स्वरवृद्धिनिमित्तत्वात् पुंवद्भावो[3] न स्यात् । यथा गाणिक्यायात्रः ।

२०. अश्वादीयो वा ।

अश्वशब्दात् तस्य समूहेऽर्थे ईयः प्रत्ययो वा भवति । पक्षेऽण् । अश्वानां समूह.—अश्वीयं, आश्वम् ।

२१. पर्श्वा ड्वण् ।

पर्शूशब्दात्[4] तस्य समूहेऽर्थे ड्वण् प्रत्ययो भवति । अचित्तेकणोऽपवाद. । डित्वात् टिलोपः । पर्शूनां समूह.—पार्श्वम् ।

२२. ईनोऽह्नः क्रतौ ।

अहन्शब्दात् तस्य समूहेऽर्थे क्रतौ वाच्ये ईन प्रत्ययो भवति । अह्ना समूहः—अहीन क्रतु. । क्रताविति किम् ? आह्नमन्यत् । श्वादिपाठादञ् ।

२३. पृष्ठाद्यः ।

पृष्ठशब्दात् तस्य समूहेऽर्थे क्रतौ वाच्ये य प्रत्ययो भवति । पृष्ठाना समूह—पृष्ठ्यः क्रतुः । पृष्ठशब्दोऽह.पर्यायः । क्रताविति किम् ? पार्ष्ठिकम् ।

२४. गो-रथ-वातात् त्रल्कटयलूलम् ।

गो, रथ, वात—इत्येतेभ्यस्तस्य समूहेऽर्थे यथासंख्यं त्रल्, कटयल्, ऊल इत्येते प्रत्यया भवन्ति । गवां समूहः—गोत्रा । रथाना रथकट्या । लकारौ स्त्रीत्वार्थौ । वातानां वातूलः ।

---

१ ज्ञापकम् ।

२ 'राजन्यमनुष्ययुवामके' [८/४/५१] इति यलोपाभाव ।

३ 'स्वरवृद्धिनिमित्तस्य…' [३/२/५६] इति निषेधात् ।

४. पार्श्वास्थिवाचिनः पर्शुशब्दादूङ् ।

२५. पाशादेश्च ल्यः ।

पाशादिभ्यो गोरथवातशब्देभ्यश्च तस्य समूहेऽर्थे ल्य प्रत्ययो भवति। इकणादेरपवादः । पाशाना समूहः—पाश्या। तृण्या, खल्या। लकारः स्त्रीत्वार्थः। गव्या, रथ्या, वात्या। पाशादयो यथा—पाश, तृण, खल, धूम, अङ्गार, पोटगल, पिटक, पिटाक, शकट, हल, नल, वन इति । भिक्षादिपाठादङ्गारहलाभ्यामणपि । आङ्गारं, हालम् ।

२६. श्वादिभ्योऽञ् ।

श्वादिभ्यः शब्देभ्यस्तस्य समूहेऽर्थे अञ् प्रत्ययो भवति । शुनां समूहः—शौवम् । अह्नामाह्नम्। दण्डिनां दाण्डम् । चक्रिणां चाक्रम् । अणैव सिद्धे 'नोऽपदस्य तद्धिते' [८/४/६२] इति टिलोपार्थमत्रवचनं[1] अणपवादबाधनार्थं[2] च । श्वादयः प्रयोगगम्याः ।

२७. खलादिभ्यो लिन् ।

खलादिभ्यः शब्देभ्यस्तस्य समूहेऽर्थे लिन् प्रत्ययो भवति । लकार स्त्रीत्वार्थः। खलानां समूहः—खलिनी । पाशादित्वात् ल्योऽपि—खल्या । ऊकिनी, डाकिनी, कुण्डलिनी, कुटुम्बिनी । खलादयः प्रयोगगम्याः ।

२८. चरणेभ्यो धर्मवत् ।

चरणं कठकालापादि, तस्माद्यथा धर्मे प्रत्यया भवन्ति तथा समूहेऽपि। वत्सर्वसादृश्यार्थः । तेन यकाभ्य. प्रकृतिभ्यो यः प्रत्ययो यथा धर्मे भवति ताभ्य एव प्रकृतिभ्यः स एव प्रत्ययस्तथैव इह भवति। यथा कठानां धर्मः—काठकम् । कालापकं, छान्दोग्य, औक्थिक्यं, बाह्वृच्यं, आथर्वणम्[3] । तथा समूहेऽपि काठकमित्यादि ।

२९. ग्राम-जन-बन्धु-गज-सहायेभ्यस्तल् ।

एभ्यः समूहेऽर्थे तल् प्रत्ययो भवति। लकार स्त्रीत्वार्थः । ग्रामाणा समूहः—ग्रामता। जनता, बन्धुता, गजता, सहायता ।

३०. पितृमातृभ्यां[4] व्यड्डुलौ भ्रातरि ।

पितृमातृशब्दाभ्यां षष्ठ्यन्ताभ्यां भ्रातरि वाच्ये यथासङ्ख्यं व्यड्डुलौ प्रत्ययौ भवतः । पितुर्भ्राता—पितृव्यः । मातुर्भ्राता—मातुलः । डित्वात् टिलोपः ।

३१. पित्रोर्डामहट् ।

पितृमातृशब्दाभ्यां षष्ठ्यन्ताभ्यां मातापित्रोर्वाच्ययोः डामहट् प्रत्ययो भवति। पितुः पिता—पितामहः । पितुर्माता—पितामही। मातुः पिता—मातामहः । मातुर्माता—मातामही। द्विवचनटित्वाभ्यां मात्रापित्रोरिति विज्ञायते । डित्वात् टिलोपः । टित्वादीप् ।

३२. अवेर्दुग्धे सोढदूसमरीसाः ।

अविशब्दात् षष्ठ्यन्तात् दुग्धेऽर्थे सोढ, दूस, मरीस—इत्येते प्रत्यया भवन्ति । अवेर्दुग्धं—अविसोढम् ।

---

१. अन्यथा 'अनि' [८/४/५३] इत्यादिभिः सूत्रैः टिलोपनिषेधः स्यात् ।

२. सूत्राभावे अहन्शब्दात् क्तोरन्यत्र समूहेऽचित्तत्वादणोपवाद इकण् स्यात् ।

३. अथर्वाणं वेत्त्यधीते वा 'व्याथावेरिकण्' [६/३/८६], 'अथर्वण इकणि' [८/४/५०] इति टिलोपाभावः ।

४. विकल्पाद्येकशेषः सूत्रत्वाद्वा 'आ द्वंद्वे' [३/२/३६] इति च न ।

अविदूसं, अविमरीसम् ।

३३. विकारे ।

षष्ठचन्तात् विकारेऽर्थे यथाविहितं प्रत्यया भवन्ति । द्रव्यस्याऽवस्थान्तरं विकारः । अश्मनो विकारः—आश्मनः, आश्मः । 'वाश्मनो विकारे' [८/४/६४] इति वा टेर्लोपः । भस्मनो भास्मनः । मृत्तकायाः मार्तिकः । अर्धस्य आर्धः । हलस्य हालः । सीरस्य सैरः । चेदीनां चैदः । वृजीनां वार्जः । त्रिगर्तानां त्रैगर्तः । रङ्कूणां राङ्कवः । 'तस्येदं' [७/१/११२] इत्येवाणादिसिद्धौ अर्धादिषु विकारे अणपवादबाधनार्थं वचनम् ।

३४. अवयवे च प्राण्यौषधिवृक्षेभ्यः ।

प्राणिन्, औषधि, वृक्ष—इत्येतद्वाचिभ्य षष्ठचन्तेभ्योऽवयवे विकारे चार्थे यथाविहितं प्रत्यया भवन्ति । प्राणिभ्यः—कापोतं सक्थि । कापोतं मांसम् । मायूरं सक्थि । मायूरं मांसम् । आविकं सक्थि । आविकं मांसम् । अविशब्दादनभिधानान्न भवति । औषधिभ्यः—दौर्वं काण्डम् । दौर्वं भस्म । मौर्वं काण्डम् । मौर्वं भस्म । वृक्षेभ्यः—कारीरं काण्डम् । कारीरं भस्म । बैल्वं काण्डम् । बैल्वं भस्म । प्राण्यौषधिवृक्षेभ्य इति किम् ? पाटलिपुत्रस्याऽवयवः—पाटलिपुत्रकः प्राकारः । 'तस्येदं' [७/१/११२] इति विवक्षायामकञ् । एवं पाटलिपुत्रकः प्रासादः । इतः परं विकारे अवयवे च प्राण्यौषधिवृक्षेभ्य इति द्वयमप्यधिक्रियते । तेनोत्तरे प्रत्ययाः प्राण्यौषधिवृक्षेभ्योऽवयवविकारयोरन्येभ्यस्तु विकारमात्रे भवन्तीति वेदितव्यम् । प्राणिनश्चेतनावन्तः । औषधयः फलपाकान्ताः । वृक्षाः पुष्पवन्तः फलवन्तश्च । वृक्षविशेषत्वात्[1] वनस्पतिवीरुधामपि वृक्षग्रहणेन ग्रहणम् । प्राणिग्रहणेनैव चेतनावत्त्वेन वृक्षौषधिग्रहणे सिद्धे तदुपादानमिह शास्त्रे प्राणिग्रहणेन त्रसा एव गृह्यन्ते, न स्थावरा इति ज्ञापनार्थम् ।

३५. तालाद् धनुषि ।

तालशब्दाद् धनुषि विकारे यथाविहितमण् प्रत्ययो भवति । वृद्धलक्षणस्य मयटोऽपवादः । तालस्य[2] विकारः—तालं धनुः । धनुषीति किम् ? तालमयं काण्डम् ।

३६. त्रपुजतुनोः षुक् च ।

त्रपु, जतु—इत्येताभ्यां विकारे यथाविहितमण् प्रत्ययो भवति तयोः षुगागमश्च । त्रपुणो विकारः—त्रापुषम् । जतुनो विकारः—जातुषम् । अण् सिद्ध एव षुगागमार्थं वचनम् । चकारः सनियोगार्थः ।

३७. शम्याष्टलञ् ।

शमीशब्दाद् विकारेऽवयवे चार्थे टलञ् प्रत्ययो भवति । शम्या विकारोऽवयवो वा शामीलं भस्म । शामीली शाखा । टित्वादीप् ।

३८. पयोद्रोर्यः ।

पयस्, द्रु—इत्येताभ्यां विकारेऽर्थे यः प्रत्ययो भवति । पयसोऽणोऽपवादः । द्रोरेकस्वरमयटः । पयसो विकारः—पयस्यम् । द्रोर्दारुणो विकारः—द्रव्यम् ।

---

१. एकदेशेन फलवत्तया ऐक्यं, न तु पुष्पवत्तया ।

२. तालस्य तालवृक्षकाष्ठस्य विकारः यतो धनुर्दारोः संभवति न वृक्षात् । यदा तु तालशब्दो वृक्ष इति व्याख्यायते तदावयवार्थोऽपि घटते पारंपर्येण धनुरवयवो भवति वृक्षस्यापि ।

३९. उष्ट्राद्वञ्कञ् ।

उष्ट्रशब्दाद् विकारेऽवयवे चार्थे अकञ् प्रत्ययो भवति। उष्ट्रस्य उष्ट्र्या वा विकारोऽवयवो वा—औष्ट्रकं मांसम् । औष्ट्रिका जङ्घा ।

४०. उमोर्णाद् वा ।

उमा, ऊर्णा—इत्येताभ्यां यथासंभवं विकारेऽवयवे चार्थे अकञ् प्रत्ययो वा भवति । उमा—अतसी। तस्य विकारोऽवयवो वा—औमकं, औमम् । ऊर्णाया विकारः—और्णकः, और्णः कम्बलः ।

४१. एण्या एयञ् ।

एणीशब्दाद् विकारेऽवयवे चार्थे एयञ् प्रत्ययो भवति । अणोऽपवादः । एण्या विकारोऽवयवो वा—ऐणेयं मांसम् । ऐणेयी जङ्घा । स्त्रीलिङ्गनिर्देशात् पुंलिङ्गादणेव । ऐणं मांसम् । ऐणी जङ्घा ।

४२. कोशाद् वस्त्रसूत्रयोः ।

कोशशब्दाद् विकारेऽर्थे एयञ् प्रत्ययो भवति वस्त्रसूत्रयोरभिधेययोः । कोशस्य विकारः— कौशेयं वस्त्रं सूत्रं वा । वस्त्रसूत्रयोरिति किम् ? कोशस्य विकारः—कौशं भस्म ।

४३. कंसीयपरशव्याभ्यां ञ्याणावीययोर्लुक् च ।

कंसाय इदं कंसीयम् । परशवे इदं परशव्यम् । कंसीयपरशव्यशब्दाभ्यां यथासंख्य विकारेऽर्थे ञ्याणौ प्रत्ययौ भवत तत्सनियोगे यथासंख्येन च एतयोरीययोर्लुक् च। कंसीयस्य विकारः—कांस्यम् । परशव्यस्याऽयसो विकारः—पारशवम् ।

४४. हेमार्थान्माने ।

हेमवाचिन शब्दात् माने विकारे वाच्ये यथाविहितमण् प्रत्ययो भवति । वृद्धमयटोऽपवादः । हाटकस्य विकारः—हाटको निष्कः । हाटक कार्षापणम् । जातरूपो निष्क । जातरूपं कार्षापणम् । हैमो[1] निष्कः, हैमं कार्षापणं—इत्यत्र परत्वात् हेमादिलक्षणोऽञेव । अर्थग्रहण स्वरूपविधिव्युदासार्थम् । माने इति किम् ? हाटकमयी यष्टिः ।

४५. द्रोर्वयः ।

द्रुशब्दान्माने विकारेऽर्थे वय. प्रत्ययो भवति । यस्याऽपवादः[2] । द्रोर्विकारः—द्रुवयं मानम् ।

४६. मानात् क्रीतवत् ।

मीयते परिच्छिद्यते येन तन्मानम् । इयत्तापरिच्छित्तिहेतु संख्यादिरुच्यते । मानवाचिनः शब्दाद् विकारेऽर्थे क्रीतवत् प्रत्ययविधिर्भवति । शतेन क्रीतं—शत्यं, शतिकम् । शतस्य विकारः—शत्यः, शतिक. । एवं साहस्रः, नैष्किकः । वत्सर्वविधिसादृश्यार्थः । तेन लुगादिकस्याप्यतिदेशो भवति । द्विशतः, त्रिशतः, द्विसहस्र., द्विसाहस्रः, द्विनिष्कः द्विनैष्किकः ।

---

१. हेम्नो विकार । 'हेमादिभ्योऽञ्' [६/३/४७] । 'नोपधस्य तद्धिते' [८/४/६२] इति टिलोपः । यदि अनेन अण् स्यात् तदा 'अणि' [८/४/५३] इति टिलोपाभावः स्यात् । अकारान्तात् तु अनेनैवाण् । हैमः ।

२. 'पयोद्रोर्यः' [६/३/३८] इति प्राप्तस्य । मानादन्यत्र सोऽपि चरितार्थ इति ।

४७. हेमादिभ्योऽञ् ।

हेमन् इत्येवमादिभ्यो यथायोगं विकारे अवयवे चार्थे नित्यमञ् प्रत्ययो भवति । हेम्नो विकार:—**हैमं शरासनम्** । हैमी यष्टिः । रजतस्य राजतः । हेमादयो यथा —हेमन्, रजत, उदुम्बर, नीवुदार, रोहीतक, बिभीतक, कण्डकार, गवीधुका, पाटली, श्यामाक, बार्हिण । इत्याकृतिगणोऽयम् । हेम्नोऽण्बाधनार्थमञ्वचनम् । अणि हि सति 'अणि' [८/४/५३] इति टेर्लोपो न स्यात् । पाटलीश्यामाकबार्हिणानां वृद्धलक्षणस्य, शेषाणां तु वैकल्पिकस्य मयटो बाधनार्थम् ।

४८. अभक्ष्याच्छादने मयड् वा ।

षष्ठ्यन्ताद् भक्ष्याच्छादनवर्जिते विकारेऽवयवे चार्थे यथायोगं मयट् प्रत्ययो वा भवति । भस्मनो विकारः—भस्ममयं, भास्मनम् । अश्मनो विकारः—अश्ममयं, आश्मम् । कपोतस्य विकारोऽवयवो वा—कपोतमयं, कापोतम् । दूर्वाया विकारोऽवयवो वा—दूर्वामयं, दौर्वम् । मूर्वामयं, मौर्वम् । करीरमय, कारीरम् । शिरीषमय, शैरीषम् । अभक्ष्याच्छादन इति किम् ? मौद्ग सूपः । कार्पास. पटः । **'तालाद् धनुषि'** [६/३/३५] इत्यादौ परत्वादनेन मयट् पक्षे च तेषां प्रवृत्ति. । तालमयं धनु., त्रपुमयं, जतुमयं, शमीमयं, पयोमयं, द्रुमयं, उष्ट्रमय, उमामयं, ऊर्णामय, एणीमय. कोशमयं, कंसीयमय, परशव्यमयं, शतमयम् ।

४९. शर-दर्भ-कूदी-तृण-सोम-बल्वजात् ।

शरादिभ्यो यथायोगं भक्ष्याच्छादनवर्जिते विकारेऽवयवे चार्थे मयट् प्रत्ययो भवति । अणोऽपवादः । शरमयं, दर्भमय, कूदीमयं, तृणमयं, सोममय, बल्वजमयम् ।

५०. एकस्वरात् ।

एकस्वरान्नाम्नो यथासंभव भक्ष्याच्छादनवर्जिते विकारेऽवयवे चार्थे मयट् प्रत्ययो भवति । वाङ्मयं, त्वङ्मयं, मृण्मयं, स्रुङ्मयं, गीर्मयं, धूर्मयम् ।

५१. वृद्धादऽप्राणिनः ।

वृद्धसंज्ञकादप्राणिवाचिनो यथायोग भक्ष्याच्छादनवर्जिते विकारेऽवयवे चार्थे मयट् प्रत्ययो भवति । अणोऽपवादः । आम्रमयं, शालमयं, शाकमयं, काशमयं, तन्मय, यन्मयम् । अप्राणिन इति किम् ? श्वाविधो विकारोऽवयवो वा—शौवाविध, श्वाविन्मयम् । चाष, चाषमयम् । भास, भासमयम् ।

५२. गोः पुरीषे ।

गोशब्दात् पुरीषेऽर्थे मयट् प्रत्ययो भवति । गो पुरीष—गोमयम् । पुरीष इति किम् ? गव्यं पयः । गव्यं सक्थि । **'गोः स्वरे यः'** [६/२/३०] इति य । यद्यपि पुरीष विकारत्वेन[1] न प्रसिद्ध तथापि दोषधातुमलमूलं शरीरमिति विवक्षायां तात्स्थ्यात् तद्वदुपचार इति गो. पुरीष पयश्च विकारो भवति । **'एकस्वरात्'** [६/३/५०] इत्येव सिद्धे पुरीषे नियमार्थं वचनम् ।

५३. व्रीहेः पुरोडाशे ।

व्रीहिशब्दात् पुरोडाशे विकारेऽर्थे मयट् प्रत्ययो भवति । अणोऽपवाद । व्रीहिमय पुरोडाश । पुरोडाश इति किम् ? व्रैह ओदन । व्रैह भस्म ।

---

१. गोर्विकारत्वेन न प्रसिद्ध, किन्तु आहारादिविकार इति ।

५४. तिलयवादसंज्ञायाम् ।

तिल, यव—इत्येताभ्यां विकारेऽवयवे चार्थे मयट् प्रत्ययो भवति असंज्ञायां विषये । अणोऽपवाद । तिलमयं, यवमयम् । असंज्ञायामिति किम् ? तैलम् । यवानां विकारो यावः, स एव यावकः ।

५५. पिष्टात् ।

पिष्टशब्दाद् विकारेऽर्थे मयट् प्रत्ययो भवति असंज्ञायाम् । अणोऽपवादः । पिष्टमयम् ।

५६. संज्ञायां कः ।

पिष्टशब्दात् संज्ञायां विकारे क. प्रत्ययो भवति । पिष्टस्य विकार:—पिष्टिका ।

५७. ह्योगोदोहादीनञ् हियङ्गुश्चास्य ।

ह्योगोदोहशब्दाद् विकारे संज्ञायां ईनञ् प्रत्ययो भवति तत्सन्नियोगे च प्रकृतेर्हियङ्गु इत्यादेशः । ह्योगोदोहस्य विकार —हैयङ्गवीनं[1] नवनीतं[2] घृत वा । संज्ञायामिति किम् ? ह्योगोदोहस्य विकार इदं उदश्वित् ह्यौगोदोहमित्यणेव भवति ।

५८. अपो यञ् वा ।

अप्शब्दाद् विकारे यञ् प्रत्ययो वा भवति । एकस्वरमयटोऽपवादः । अपां विकार:—आप्य, अम्मयम् ।

५९. लुग् बहुलं पुष्पमूले ।

विकारावयवयोर्विहितस्य प्रत्ययस्य पुष्पे मूले वा विकारतया अवयवतया वा विवक्षिते बहुलं लुग् भवति । मल्लिकाया विकारोऽवयवो वा पुष्पं—मल्लिका । यूथिका, नवमालिका, मालती । एषु अणो[3] मयटो वा लुकि **'लुक् तद्धितलुक्यगोणी सूच्योः'** [२/३/११६] इति स्त्रीप्रत्ययनिवृत्तौ लुगन्तस्य स्त्रीत्वात् पुनः स्त्रीप्रत्यय । जातेर्जाति । पाटल्याः पाटलाया वा—पाटलं पाटला वा । यदाहुः—पुष्पे क्लीबेऽपि[4] पाटला । पाटलीत्यपि । कुन्दं, सिन्दुवारं, कदम्बं, करवीरं अशोकं, चम्पकं, कर्णिकारं, कोविदारं, विदार्या मूलं विदारी, अंशुमती, बृहती, हरिद्रा, माधवी, मुस्ता । क्वचिन्न भवति—वरणस्य पुष्पाणि वारणानि । एरण्डस्य मूलानि—ऐरण्डानि । बिल्वस्य बैल्वानि । क्वचिद् विकल्पः—शिरीषस्य पुष्पाणि शिरीषाणि, शैरीषाणि । ह्रीबेरस्य मूलानि ह्रीबेराणि, ह्रैबेराणि । क्वचित् पुष्पमूलाभ्यामन्यत्रापि भवति । आमलकस्य विकारो वृक्ष—आमलकी । बदरी । व्रीहेर्विकार. स्तम्ब —व्रीहि ।

६०. फले ।

विकारेऽवयवे वा फले विवक्षिते प्रत्ययस्य लुग् भवति । आमलक्या विकारोऽवयवो वा फलं—आमलकम् । बदर्या बदरम् । कुवल्या. कुवलम् । भल्लातक्या भल्लातकम् । व्रीहिः, यव, मुद्ग, माषः, गोधूम, निष्पाव., तिल., कुलत्थः, हरीतकी, पिप्पली, कोशातकी, श्वेतपाकी, अर्जुनपाकी, कर्कटी, नखरजनी, शष्कण्डी, दण्डी, दोडी, दाडी, पथ्या, अम्लिका, चिञ्चा, द्राक्षा, ध्रुक्षा, ध्वाङ्क्षा, मृद्वीका, कणा, वला, एला, शाला, काला, गर्गरिका, कण्टकारिका, शेफालिका,

---

१. न ह्योगोदोहविकारमात्रं, किंतु किंचिदेवेत्याह··· नवनीतम् ।

२. तेनाभ्यामन्यत्र न भवतीति प्रत्युदाहरति ।

३. मालत्या वृक्षमयटोऽन्येभ्यस्तु 'अवयवे च प्राण्यौषधि···' [६/३/३४] इत्यण । अभक्ष्याच्छादनविवक्षायां तु मयटो लुक् । पुनर्गौरादित्वादीप् ।

४. न केवलं पुष्पे वर्त्तमानः स्त्रीलिङ्ग ।

ओषधिः, कर्कारु । हरीतक्यादिभ्यो लुकि प्रकृतिलिङ्गमेव। तत्र पूर्वस्य स्त्रीप्रत्ययस्य लुकि पुनः स एव स्त्रीप्रत्ययः। यद्यपि आमलकादीनि प्रकृत्यन्तराणि सन्ति तथापि आमलक्यादिभ्यः प्रत्ययश्रुतिनिवृत्त्यर्थं लुग्वचनम्।

६१. प्लक्षादेरऽण्।

प्लक्षादिभ्यः शब्देभ्यो विकारेऽवयवे वा फले विवक्षिते अण् प्रत्ययो भवति। मयटोऽपवादः। विधानसामर्थ्यात् चास्य लुग् न भवति। प्लक्षस्य विकारोऽवयवो फलं—प्लाक्षम्। एवं नैयग्रोधम्। प्लक्षादयो यथा—प्लक्ष, न्यग्रोध, अश्वत्थ, इङ्गुदी, वेणु, बृहती, सगु, रुकु, ककतु इति।

६२. जम्ब्वा वा।

जम्बूशब्दाद् विकारेऽवयवे वा फले विवक्षिते अण् प्रत्ययो वा भवति। पक्षे यथाप्राप्त प्रत्ययस्तस्य च लुक्। जम्ब्वा विकारोऽवयवो वा फलं—जाम्बवम्। पक्षे—जम्बू, जम्बु। लुकि स्त्रीनपुंसकते।

६३. न द्विरऽद्रुवयगोमयफलात्।

द्रुवयं गोमयं फलवाचि च वर्जयित्वा अन्यस्मात् नाम्नो विकारावयवयोर्द्विवार प्रत्ययो न भवति। कपोतस्य विकारोऽवयवो वा—कापोतः। कापोतस्य विकारोऽवयवो वेति 'वृद्धावऽप्राणिनः' [६/३/५१] इति मयट् न भवति। एवं बैल्व, ऐणेयः, शामील, औष्ट्रक, कास्य, पारशव। अद्रुवयगोमयफलादिति किम्? द्रौवय खण्डम्। गौमयं भस्म। कापित्थो रसः। कथं कपोतस्य मांसं कापोत, तस्य विकारः—कापोतो रसः, पलाशस्यावयवः पालाशी शाखा, तस्या अवयवः पालाशी समित् इति? विकारेऽपि प्रकृतिशब्दो वर्तते। यथा—मुद्गैः शालीन् भुङ्क्ते। मुद्गविकारैः शालिविकारान् इति गम्यते। गोभिः सन्नद्धो वहति। गोविकारैश्चर्मभिरिति गम्यते। अवयवेष्यवयविशब्दो वर्तते। यथा—पूर्वे पञ्चालाः, उत्तरे पञ्चालाः, ग्रामो दग्धः, पटो दग्ध इति। तत्र विकारवृत्तेः प्रकृतिशब्दादवयववृत्तेरवयविशब्दाच्च प्रत्ययो भविष्यति। विकारविकारोऽपि वा विकार एव, अवयवाऽवयवोऽप्यवयव इति।

६४. पुरुषात् कृत-हित-वध-विकार-समूहेष्वेयञ्।

पुरुषशब्दात् कृते हिते वधे विकारे समूहे चार्थे एयञ् प्रत्ययो भवति। कृतादौ यथाभिधानं विभक्तियोगः। पुरुषेण कृतः—पौरुषेयो ग्रन्थः। पुरुषाय हितं—पौरुषेयमार्हतं शासनम्। पुरुषस्य वधः—पौरुषेयो वधः। पुरुषस्य विकारः—पौरुषेयो विकारः। पुरुषाणां समूहः—पौरुषेयम्।

६५. निष्फले तिलात् पिञ्जपेजौ।

तिलशब्दात् निष्फलेऽर्थे वर्तमानात् पिञ्ज, पेज—इत्येतौ प्रत्ययौ भवतः। निष्फलस्तिलः—तिलपिञ्जः, तिलपेजः।

६६. साऽस्य देवता।

सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमान्तं देवता चेत् सा भवति। अर्हन् देवता अस्य—आर्हतः जैनः। आग्नेयो ब्राह्मणः, ऐन्द्रं हविः, ऐन्द्रः पुरोडाशः, आदित्यः, बार्हस्पत्यः, गव्यं, द्वैन्द्रम्।

६७. पैङ्गाक्षीपुत्रादिभ्य ईयः।

पैङ्गाक्षीपुत्रादिभ्यः शब्देभ्यः सास्य देवतेत्यस्मिन् विषये ईयः प्रत्ययो भवति। अणोऽपवादः। पैङ्गाक्षीपुत्रो देवताऽस्य—पैङ्गाक्षीपुत्रीयं हविः। तार्णबिन्दवो देवताऽस्य—तार्णबिन्दवीयं हविः। एवं पैङ्गीपुत्रीयम्। पैङ्गाक्षीपुत्रादयः प्रयोगगम्याः।

६८. शुक्राद्घः ।

शुक्रशब्दादियः प्रत्ययो भवति सास्य देवतेत्यस्मिन् विषये । शुक्रियं हविः । शुक्रियोऽध्यायः ।

६९. शतरुद्रात् तौ ।

शतरुद्रशब्दात् तौ ईय, इय—इत्येतौ प्रत्ययौ भवत सास्य देवतेत्यस्मिन् विषये । शतसङ्ख्या रुद्राः शतरुद्राः, ते देवता अस्य—शतरुद्रीय, शतरुद्रियम् । शत रुद्रा देवतास्येति द्विगावपि विधानसामर्थ्यात् लुग् न भवति ।

७०. अपोनपादपान्नपातस्तु चातः ।

अपोनपात्, अपान्नपात्—इत्येनाभ्या तौ ईय इयश्च प्रत्ययौ भवतः सास्य देवतेत्यस्मिन् विषये, तत्संनियोगे चानयोः आतस्तृ इत्ययमादेशो भवति । अपोनपात् देवताऽस्य—अपोनप्त्रीयं[1], अपोनप्त्रियम् । अपान्नप्त्रीय, अपान्नप्त्रियम् ।

७१. महेन्द्राद् वा ।

महेन्द्रशब्दात् सास्य देवतेत्यर्थे तौ—ईय इयश्च प्रत्ययौ वा भवत । महेन्द्रीय, महेन्द्रियम् । पक्षेऽण् । माहेन्द्रं हविः ।

७२. कसोमाभ्यां टयण् ।

कशब्दात् सोमशब्दाच्च सास्य देवतेत्यर्थे टयण् प्रत्ययो भवति । अणोऽपवादः । टकार ईबर्थ । कः प्रजापतिः देवतास्य—कायं[2] हवि । कायी इष्टि । कशब्दं[3] प्रति णित्त्वस्य वैयर्थ्यादातो लोपो न । सोमो देवतास्य—सौम्य हविः । सौमी ऋक् ।

७३. ऋतु-वायु-पित्रुषसो यः ।

ऋतु, वायु, पितृ, उषस्—इत्येतेभ्य शब्देभ्य सास्य देवतेत्यर्थे य. प्रत्ययो भवति । अणोऽपवादः । ऋतुर्देवतास्य—ऋतव्यम् । एव वायव्य, पित्र्य, उषस्यम् ।

७४. द्यावापृथिवी-शुनासीर-मरुत्वदग्नीषोम-वास्तोष्पति-गृहमेधादीयश्च ।

एभ्यः सास्य देवतेत्यर्थे ईय चकाराद् यश्च प्रत्ययौ भवत । अणोऽपवादः । द्यौश्च पृथिवी च द्यावापृथिव्यौ, ते देवतेऽस्य—द्यावापृथिवीय, द्यावापृथिव्यम् । शुनश्च वायुः सीरश्चादित्य शुनासीरौ, तौ देवता अस्य—शुनासीरीयं, शुनासीर्यम् । मरुत्वान् देवता अस्य—मरुत्वतीय, मरुत्वत्यम् । अग्निश्च सोमश्च अग्नीषोमौ, तौ देवता अस्य—अग्नीषोमीय, अग्नीषोम्यम् । वास्तोष्पतिर्देवता अस्येति वास्तोष्पतीय, वास्तोष्पत्यम् । गृहमेधो देवतास्य—गृहमेधीय, गृहमेध्यम् ।

७५. महाराज-प्रोष्ठपदादिकण् ।

महाराज, प्रोष्ठपद—इत्येताभ्यां सास्य देवतेत्यर्थे इकण् प्रत्ययो भवति । अणोऽपवाद । महाराजो देवतास्य—माहाराजिकः । माहाराजिकी । प्रौष्ठपदिक । प्रौष्ठपदिकी ।

---

१ न पातीति शतृ., नभ्राडित्यादिनाऽदभाव. । ततोऽप कर्मतापन्नानपात् । अत एव निर्देशादलुक् । यद्वाऽपकृष्टमूनमपोन तत्पातयति, क्विप । अपकृष्टमन्नमपान्न तत्पातयति, क्विप् ।

२ *अथ कायमित्यत्र सौवरस्वरादेशः इति न्यायेन लोपात्पूर्व वृद्धौ कृतायां पश्चादाकारलोप कस्मान्न भवतीत्याह ।*

३. अकारस्याकारस्य वा लोपे विशेषाभावात् । यद्वा सकृद्गते स्पर्धे यद् बाधितं तद् बाधितमेव इति उपतिष्ठते ।

७६. कालाद् भववत् ।

कालविशेषवाचिभ्यः शब्देभ्यो यथा भवेऽर्थे प्रत्यया वक्ष्यन्ते तथा सास्य देवतेत्यर्थे भवन्ति । वत्सर्वसादृश्यार्थः । यथा मासे भवं—मासिकं, सांवत्सरिकं, हैमन, वासन्त, प्रावृषेण्यं, तथा मासो देवतास्य—मासिक, सांवत्सरिकं, हैमनं, वासन्त, प्रावृषेण्यम् ।

७७. पौर्णमासीति संज्ञायाम् ।

सास्येत्यनुवर्तते । देवतेति निवृत्तम् । सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहित प्रत्ययो भवति सज्ञायां विषये तत्प्रथमान्तं चेत् पौर्णमासी भवति । इतिकरणो विवक्षार्थ । तेन मासार्धमासयोरेव संवत्सरपर्वणो प्रत्यय । पौषी पौर्णमासी अस्य—पौषो मासः । पौषोऽर्धमास. । एव माघ, वैशाख, आषाढ । संज्ञायामिति किम् ? पौषी पौर्णमासी अस्य पञ्चरात्रस्य दशरात्रस्य भृतकमासस्य वेति वाक्यमेव । पौर्णमासीति पूर्णो माश्चन्द्रोऽस्यामस्तीति **'पूर्णमासोऽण्'** [८/१/७३] इत्यण् ।

७८. आग्रहायण्यश्वत्थाविकण् ।

आग्रहायणी, अश्वत्था—इत्येताभ्यां सेति प्रथमान्ताभ्या अस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति संज्ञायां विषये तत्प्रथमान्त चेत् पौर्णमासी भवति । आग्रहायणी पौर्णमासी अस्य—आग्रहायणिको मासोऽर्धमासो वा । अश्वत्था[1] पौर्णमासी अस्य—आश्वत्थिको मासोऽर्धमासो वा । आग्रहायणी मार्गशीर्षी । अश्वत्था आश्वयुजी । अन्ये तु अश्वत्थशब्दमप्रत्ययान्त पौर्णमास्यामपि पुंलिङ्गमिच्छन्ति । अश्वत्थः पौर्णमासी ।

७९. चैत्री-कार्तिकी-फाल्गुनी-श्रवणाद् वा ।

एभ्य इकण् प्रत्ययो भवति सास्य पौर्णमासी इति अस्मिन् विषये सज्ञायाम् । चैत्री पौर्णमासी अस्य—चैत्रिक., चैत्रो वा मासोऽर्धमासो वा । एवं कार्तिक्या. कार्तिकिक, कार्तिक. । फाल्गुन्या. फाल्गुनिक, फाल्गुन । श्रवणायाः श्रावणिकः, श्रावण ।

८०. आदेश्छन्दसः प्रगाथे ।

सेति प्रकृतिरस्येति प्रत्ययार्थश्चानुवर्तते । तयो यथाक्रमं विशेषणे आदेश्छन्दस इति प्रगाथे इति च । सेति प्रथमान्तादादिभूतात् छन्दसोऽस्येति षष्ठ्यर्थे प्रगाथेऽभिधेये यथाविहित प्रत्ययो भवति। यत्र द्वे ऋचौ प्रग्रन्थनेन[2] प्रकर्षगानेन[3] वा तिस्रः क्रियन्ते स मन्त्रविशेष प्रगाथ । पङ्क्तिरादिरस्य प्रगाथस्य स पाङ्क्त प्रगाथ । एवमानुष्टुभ,जागत । आदेरिति किम् ? अनुष्टुब् मध्यमस्य प्रगाथस्य । छन्दस इति किम् । उदित्ययं शब्द आदिरस्य प्रगाथस्य । प्रगाथ इति किम् ? पङ्क्तिरादिरस्य अनुवाकस्य[4] ।

८१. सग्रामे प्रयोजनयोद्धृभ्यः ।

सेति प्रथमान्तेभ्य प्रयोजनवाचिभ्य योद्धृवाचिभ्यश्च अस्येति षष्ठ्यर्थे सग्रामेऽभिधेये यथाविहितं प्रत्ययो भवति । प्रयोजनं प्रवृत्तिसाध्य फलम् । सुभद्रा प्रयोजनमस्य सग्रामस्य—सौभद्र सग्राम । एव सौतारः संग्राम. । योद्धृभ्य.—विद्याधरा योद्धार अस्य संग्रामस्य—वैद्याधर सग्राम । एव दैवासुरः, भारत. । संग्रामे इति किम् ? सुभद्रा प्रयोजनमस्य

---

१. अश्वत्थेन अश्विनीनक्षत्रेण युक्ता ।

२. प्रकृष्टरचनाविशेषेण ।

३ उच्चारणविशेषेणेत्यर्थ ।

४ अनुवाकः पाठविशेष ।

वैरस्य । प्रयोजनयोद्धृभ्य इति किम् ? सुभद्राप्रेक्षिकाऽस्य सङ्ग्रामस्य ।

८२. भावघञोऽस्यां णः ।

सेति प्रकृतिविशेषणमनुवर्तते। भावे यो घञ् तदन्तात् प्रथमान्तादस्यामिति स्त्रीलिङ्गे सप्तम्यर्थे ण प्रत्ययो भवति। प्रपातोऽस्यां वर्तते तिथौ– प्रापाता[1]। एव दाण्डाघाता, मौसलपाता भूमिः। भावग्रहणं किम् ? प्राकारोऽस्यां, प्रासादोऽस्याम् । घञ इति किम् ? श्येनपतनमस्याम् । स्त्रीलिङ्गग्रहणादिह न भवति—दण्डपातोऽस्मिन् दिवसे । इतिकरणानुवृत्तेः[2] क्वचिन्न भवति। द्रोणपाकोऽस्यां स्थाल्याम् ।

८३. श्यैनंपाता तैलंपाता ।

श्येनशब्दस्य तिलशब्दस्य च भावघञन्ते पातशब्दे परे मुमागमो निपात्यते। प्रत्ययस्तु पूर्वेणैव सिद्धः। श्येनपातोऽस्यां वर्तते—श्यैनंपाता। तिलपातोऽस्यां वर्तते—तैलंपाता तिथिः क्रियाभूमिः क्रीडा वा ।

८४. प्रहरणात् क्रीडायां णः ।

प्रहरणवाचिन प्रथमान्तादस्यामिति सप्तम्यर्थे क्रीडायां ण प्रत्ययो भवति। दण्ड प्रहरणमस्यां क्रीडायां—दाण्डा। एव मौष्टा, पादा क्रीडा। प्रहरणादिति किम् ? मालाभूषणमस्या क्रीडायाम् । क्रीडायामिति किम् ? खड्गः प्रहरणमस्यां सेनायाम्। यत्राऽद्रोहेण घातप्रतिघातौ स्यातां सा क्रीडा। **'भावघञोऽस्यां णः'** [६/३/८२] इत्यनन्तरो णो नानुवर्तते क्रीडाया अर्थान्तरत्वात् । यथा पूर्वसूत्रोपात्ता विकाराद्यर्थेषु[3] ततो यथाविहितमेव प्रत्ययो भवेदितीह पुनर्णग्रहणम् ।

८५. तद्वेत्त्यधीते ।

तदिति द्वितीयान्तात् वेत्ति अधीते वा इत्येतयोरर्थयोर्यथाविहित प्रत्ययो भवति। सूत्रं वेत्ति—सौत्रः। छन्दोऽधीते—छान्दसः। व्याकरण वेत्त्यधीते वा—वैयाकरण । नैरुक्त । घट वेत्ति, पटं वेत्ति—इत्यादौ अनभिधानान्न भवति। केचित्तु वेदनाध्ययनयोरेकविषयतायामेवेच्छन्ति। तन्मते अग्निष्टोम[4] यज्ञ वेत्ति इत्यादावपि प्रत्ययो न भवति।

८६. न्यायादेरिकण् ।

न्यायादिभ्यो द्वितीयान्तेभ्यो वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययो भवति। न्याय वेत्त्यधीते वा—नैयायिकः। नैयासिकः, मौहूर्तिकः, नैमित्तिकः। न्यायादयो यथा—न्याय, न्यास, मुहूर्त, निमित्त, लोकायत, पुनरुक्त, परिषद्, चर्चा, क्रमेतर, श्लक्ष्ण, सहिता, पदे, पद, क्रम, सघट, सघटा, वृत्ति, सग्रह, आयुर्वेद, गण, गुण, स्वागम, इतिहास, पुराण, भारत, ब्रह्माण्ड, आख्यान, द्विपदा, ज्योतिष, गणित, अनस्त, लक्ष्य, लक्षण, अनुलक्ष्य, सुलक्ष्य, वसन्त, वर्षा, शरद्, वर्षाशरद्, हेमन्त, शिशिर, प्रथम, चरम, प्रथमगुण, चरमगुण, अनुगुण, अथर्वन्, आथर्वण इति। केचित्तु मुहूर्तनिमित्तशब्दौ न्यायादौ न पठन्ति। तन्मते मौहूर्तः, नैमित्तः।

८७. सूत्रान्तादकल्पात् ।

सूत्रान्ताच्छब्दाद् वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययो भवति कल्पशब्द आदौ चेन्न भवति । वार्तिमूत्रिकः,

---

१. यद्यपि **'प्रत्ययः प्रकृत्यादेः'** [८/४/१२७] इति न्यायेन पात इत्येतदेव घञन्तं, न समुदायः । तथापि **'कृत्सगतिकारकस्यापि'** [८/४/१२६] इति प्रपातादिः समुदायो घञन्त एव ।

२. **'पौर्णमासीति संज्ञायां'** [६/३/७७] इत्यत. ।

३. **'अवेर्दुग्धे सोढदूसमरीसः'** [६/३/३२] इत्यत्रोपात्ताः सोढादिप्रत्ययाः, **'विकारे'** [६/३/३३] इत्यत्र यथा नानुवर्तन्ते । अन्यथा **'भावघञोऽस्यां णः'** [६/३/८२] इत्यतोऽधिकारायातेनैव सिध्यति ।

४. यज्ञो हि क्रियास्तस्य च ज्ञानमेव घटते, नाध्ययनम् । ते च यत्र ज्ञानाध्ययने द्वे अपि घटेते तत्रैव प्रत्ययमिच्छन्ति, नान्यत्र ।

सांग्रहसूत्रिकः । अकल्पादिति किम् ? काल्पसूत्रः । अन्तग्रहणं किम् ? सौत्रः[1] ।

८८. लक्षणपदकल्पान्तात् ।

लक्षणान्तेभ्यः पदान्तेभ्यः कल्पान्तेभ्यश्च द्वितीयान्तेभ्यो वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययो भवति । गौलक्षणिकः, आश्वलक्षणिकः, हास्तिलक्षणिकः, आनुलक्षणिकः, सौलक्षणिकः । लाक्षणिक इति न्यायादित्वात् सिद्धम् । पदान्त—पौर्वपदिकः, औत्तरपदिकः, आनुपदिकः । बहुप्रत्ययपूर्वात्पदशब्दान्न भवत्यनभिधानात्[2] । कल्पान्त—मातृकल्पिकः, पैतृकल्पिकः, पाराशरकल्पिकः, श्राद्धकल्पिकः ।

८९. विद्यान्तादनङ्गसंसर्गत्रिक्षत्रधर्मात् ।

अङ्गादिवर्जिताद् विद्यान्तात् तद्वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययो भवति । सार्पविद्यिकः, वायसविद्यिकः । अनङ्गादेरिति किम् ? आङ्गविद्यः, सासर्गविद्यः । त्र्यवयवा विद्या त्रिविद्या, ता वेत्त्यधीते वा—त्रैविद्यः । अत्र त्रिविद्याशब्दस्य कर्मधारयस्यैव ग्रहणं, न द्विगोः । तत्र लुकि सति अणिकणोर्विशेषाभावात् । क्षात्रविद्यः, धार्मविद्यः । अन्तग्रहणात् केवलादपि न—वैद्यः ।

९०. याज्ञिकौक्थिकलौकायितिकम् ।

याज्ञिकादयः शब्दास्तद्वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययान्ता निपात्यन्ते । याज्ञिकेति यज्ञशब्दात् याज्ञिक्यशब्दाच्चेकण् इकयलोपश्च निपात्यते । यज्ञं याज्ञिक्यं वा वेत्त्यधीते वा—याज्ञिकः । औक्थिकेति उक्थशब्दः केषुचिदेव सामसु रूढः । यज्ञायज्ञीयात् परेण यानि गीयन्ते न च तेषु वर्तमानात् प्रत्ययः इष्यते, किं तर्हि तद्व्याख्याने औक्थिक्ये उपचारेण वर्तमानात् । उक्थमधीते—औक्थिकः । औक्थिक्यमधीते इत्यर्थः । औक्थिक्यशब्दात् तु प्रत्ययो न भवति अनभिधानात् । तस्मादपीच्छन्त्येके । औक्थिक्यमधीते—औक्थिकः । लौकायितिकेति लोकायतशब्दादिकण् यकाराकारस्य चेकारो निपात्यते । लोकायतं वेत्त्यधीते वा—लौकायितिकः । लौकायतिका इति तु न्यायादिपाठात् सिद्धम् ।

९१. आख्यानाख्यायिकाक्रतुभ्यः ।

आख्यानवाचिभ्यः आख्यायिकावाचिभ्यः क्रतुवाचिभ्यश्च शब्देभ्यस्तद्वेत्त्यधीते वेत्यर्थे इकण् प्रत्ययो भवति । आख्यानं नाम कथाप्रबन्धस्तद्वाचिभ्यः—यवक्रीतमधिकृत्य[3] कृतमाख्यानमुपचारात् यावक्रीतम् । तद्वेत्त्यधीते वा यावक्रीतिकः । एवं प्रैयंगविकः । आख्यायिकावाचिभ्यः—वासवदत्तां वेत्त्यधीते वा—वासवदत्तिकः । सौमनोहरिकः । क्रतुवाचिभ्यः—अग्निष्टोमः यज्ञविषयग्रन्थः वेत्त्यधीते वा—आग्निष्टोमिकः । एवं वाजपेयिकः, ज्यौतिष्टोमिकः, राजसूयिकः ।

९२. शतषष्टेः पथ इकट् ।

शत, षष्टि—इत्येताभ्यां परात् पथिन्शब्दात् तद्वेत्त्यधीते वेत्यर्थे इकट् प्रत्ययो भवति । शतपथिकः, शतपथिकी । षष्टिपथिकः, षष्टिपथिकी ।

९३. पदोत्तरपदेभ्य[4] इकः ।

पदशब्द उत्तरपदं यस्य तस्मात् पदशब्दात् पदोत्तरपदशब्दाच्च तद्वेत्त्यधीते वेत्यर्थे इक प्रत्ययो भवति । पूर्वपदिकः, उत्तरपदिकः । पूर्वपदिका, उत्तरपदिका । पद—पदिकः, पदिका । पदोत्तरपदिकः, पदोत्तरपदिका । बहुवचन

१ अकल्पादिति पर्युदासेन पूर्वपदाभावे न भवति ।

२. यथा ईषदपरिसमाप्तं पदं बहुपदं, तद्वेत्त्यधीते वा ।

३. यवैः क्रीतः यवाः क्रीता अस्मिन्निति वा यवक्रीतनामाख्यानम् ।

४. पदशब्द उत्तरपदं यस्य पदोत्तरपदश्च पदश्च पदोत्तरपदश्च सूत्रत्वादेकशेषः ।

सर्वभङ्गपरिग्रहार्थम् ।

९४. पद-क्रम-साम-शिक्षा-मीमांसाम्योऽकः ।

पदादिभ्यः शब्देभ्यस्तद्वेत्त्यधीते वेत्यर्थे अकः प्रत्ययो भवति । पदकः, क्रमकः, सामकः, शिक्षकः, मीमांसकः । उपनिषच्छब्दादपीच्छति कश्चित् । उपनिषदकः । के सति शिक्षाका, शिक्षिका, शिक्षका । मीमांसाका, मीमांसिका मीमांसकेति रूपत्रयं[1] स्यात् । शिक्षिका, मीमांसिकेति चेष्यते । तदर्थमकवचनम् ।

९५. अनुब्राह्मणादिन् ।

अनुब्राह्मणशब्दात् तद्वेत्त्यधीते वेत्यर्थे इन् प्रत्ययो भवति । ब्रह्मणा प्रोक्तो ग्रन्थो ब्राह्मणम् । ब्राह्मणसदृशो ग्रन्थोऽनुब्राह्मणम् । सदृशार्थेऽव्ययीभाव । तद्वेत्त्यधीते वा—अनुब्राह्मणी । अनुब्राह्मणिनौ, अनुब्राह्मणिन । मत्वर्थीयेनैव इना सिद्धे अनभिधानाच्च इकस्याप्रवृत्तावण्बाधनार्थमिनो विधानम् ।

९६. सर्वसाद्याल्लुक् ।

सर्वश्च सश्च सर्वसौ, तौ आद्यौ यस्य तस्मात् सर्वाद्यात् साद्याच्च तद्वेत्त्यधीते वेत्यर्थे विहितस्य प्रत्ययस्य लुग् भवति । सर्ववेदानधीते—सर्ववेद । सर्वतन्त्र । अत्राण । सर्वविद्य । अत्रेकण । सवार्तिकमधीते—सवार्तिकः । ससग्रह । अत्राण । सकल्प । अत्रेकण । कथं द्विवेद पञ्चव्याकरण इति ? **'द्विगोरनपत्ये यस्वरादेर्लुगद्विः'** [६/२/२६] इति लुकि भविष्यति ।

९७. संख्याकात् सूत्रे ।

सख्याया परो य क प्रत्ययो विहितस्तदन्तात् सूत्रे वर्तमानान्नाम्नो वेत्त्यधीते वेत्यर्थे उत्पन्नस्य प्रत्ययस्य लुग् भवति । अप्रोक्तार्थ[2] आरम्भ । अष्टावध्याया परिमाणमस्य अष्टक सूत्रम् । तद्विदन्ति अधीयते वा—अष्टकाः पाणिनीया । आपिशलीयाः । त्रिका[3] काशकृत्स्ना । दशका[4] उमास्वातीया । द्वादशका आर्हता । संख्याग्रहणं किम् ? माहावार्तिक , कालापक । कादिति किम् ? चतुष्टय सूत्रमधीयते—चातुष्टया ।

९८. प्रोक्तात् ।

प्रोक्तार्थविहित प्रत्यय उपचारात् प्रोक्त इत्युच्यते । प्रोक्तप्रत्ययान्तात् वेत्त्यधीते वेत्यर्थे उत्पन्नस्य प्रत्ययस्य लुग् भवति । गोतमेन प्रोक्तं—गौतमम् । तद्वेत्त्यधीते वा—गौतम । सुधर्मेण सुधर्मणा वा प्रोक्तं—सौधर्मं, सौधर्मणम् । तद्वेत्त्यधीते वा—सौधर्मः, सौधर्मणः । एव भाद्रबाहव, पाणिनीय, आपिशलः । स्त्रियां विशेष—गौतमा, सौधर्मा, सौधर्मणा स्त्री इत्यादि । अणो लुक्यऽणन्तत्वाऽभावादीप् न भवति ।

९९. तेन छन्ने रथे ।

छन्न इति प्रत्ययार्थो रथ इति तस्य विशेषणम् । तेनेति तृतीयान्तात् छन्ने रथेऽभिधेये यथाविहितं प्रत्ययो भवति । वस्त्रेण छन्नो रथ—वास्त्रः । काम्बल, चार्मणः । द्वैपेन चर्मणा द्वैपः । वैयाघ्रेण[5] वैयाघ्रः । रथ इति किम् ?

---

१. **'ह्रस्वश्चाऽभावितपुंस्कात्'** [२/३/१०४] इत्यनेन।

२. अन्यथोत्तरेणैव सिध्यति ।

३-४. त्रयो दश चाध्याया मानमस्य **'संख्याडते ·'** [७/२/६२] इति क । त्रिकं दशक च विदन्त्यधीयते वा—त्रिकाः, दशकाः ।

५. व्याघ्रस्य विकारः **'अवयवे च प्राण्योषधिवृक्षेभ्यः'** [६/३/३४] इत्यण् । इदमर्थे तु ईय स्यात् ।

वस्त्रेण छन्नः कायः । छन्नशब्देन समन्ताद् वेष्टितं व्याप्तमुच्यते । तेनेह न भवति—पुत्रैः परिवृतो रथः । इह कथमण्[1] भवति—न विद्यते पूर्वं पतिर्यस्याः सा अपूर्वा कुमारी, तादृशीं कुमारीमुपपन्नः कौमारः पतिरिति ? तत्र 'भवे' [७/१/३१] इत्यण् भविष्यति । कुमार्यां भवः कौमारः पतिः, भर्तृयोगे तु कौमारी भार्येत्यपि सिद्धम् ।

१००. पाण्डुकम्बलादिन् ।

पाण्डुकम्बलशब्दात् तृतीयान्तात् छन्ने रथे वाच्ये इन् प्रत्ययो भवति । अणोऽपवादः । पाण्डुकम्बलेन छन्नः—पाण्डुकम्बली रथः ।

१०१. दृष्टे साम्नि संज्ञायाम् ।

दृष्ट इति प्रत्ययार्थस्तस्य साम्नीति विशेषणम् । तेनेति तृतीयान्तात् दृष्टं साम इत्यस्मिन्नर्थे यथाविहित प्रत्ययो भवति प्रत्ययान्त चेत् साम्न सञ्ज्ञा भवति । वसिष्ठेन दृष्टं साम—वासिष्ठम् । क्रुञ्चेन[2] क्रौञ्चम् । मायूर, तैत्तिरं, वैश्वामित्रं, आग्नेय, कालेयम् । एवंनामानि सामानि ।

१०२. डिद्वाऽण् ।

दृष्टं साम इत्यस्मिन्नर्थे योऽण् प्रत्ययो विहितः स डिद्वा भवति । उशनसा दृष्टं साम—औशनं, औशनसम् ।

१०३. वामदेवाद्यः ।

वामदेवशब्दात् तृतीयान्तात् दृष्टे सामनि यः प्रत्ययो भवति । वामदेवेन दृष्टं साम—वामदेव्यम् ।

१०४. गोत्रादिदंवत् ।

गोत्रवाचिनस्तृतीयान्तात् दृष्टं साम इत्यस्मिन्नर्थे इदमर्थवत् प्रत्ययो भवति । 'तस्येदं' [७/१/११२] इति वक्ष्यति, तत्र गोत्रचरणात् अकञिति । यथा औपगवानामयः—औपगवक । कापटवक । तथा औपगवेन दृष्टं साम—औपगवकम् । कापटवकम् ।

१०५. तत्रोद्धृते पात्रेभ्यः ।

तत्रेति सप्तम्यन्तात् पात्रवाचिनः उद्धृत इत्यस्मिन्नर्थे यथाविहित प्रत्ययो भवति । शरावेषु उद्धृत ओदनः—शारावः । माल्लकः, कार्पर । पात्रेभ्य इति किम् ? पाणावुद्धृत ओदन । बहुवचन पात्रविशेषपरिग्रहार्थम् ।

१०६. स्थण्डिलाच्छेते व्रती ।

स्थण्डिलशब्दात् सप्तम्यन्तात् शेते इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, योऽसौ शेते स चेद् व्रती भवति । तत्र शयनव्रतोऽन्यत्र शयनान्निवृत्त इत्यर्थ । स्थण्डिले एव शेते—स्थाण्डिलो भिक्षु । व्रती इति किम् ? स्थण्डिले शेते बालः ।

१०७. संस्कृते भक्ष्ये ।

संस्कृत इति प्रत्ययार्थः । तस्य विशेषणं भक्ष्य इति । तत्रेति सप्तम्यन्तात् संस्कृते भक्ष्ये यथाविहितं प्रत्ययो

---

१. परैस्तावदत्र कौमारापूर्ववचन इति कौमारशब्दोऽणन्तो वृत्तिप्रदर्शितेऽर्थे निपात्यते । स्वमते तु अस्मिन्नर्थे अण्विधायकसूत्राभावात् कथमित्याशङ्का ।

२. नडादिगणपाठात् क्रुञ्चाशब्दस्य ह्रस्वः ।

भवति । सत उत्कर्षाधानं संस्कारः । भ्राष्ट्रे संस्कृता—भ्राष्ट्र्या अपूपाः । एवं कैलासाः, पात्राः । भक्ष्ये इति किम् ? फलके संस्कृता माला ।

१०८. शूलोखाद्यः ।

शूल, उखा—इत्येताभ्यां सप्तम्यन्ताभ्यां संस्कृते भक्ष्ये यः प्रत्ययो भवति । शूले संस्कृतं—शूल्यं मांसम् । उखायां उख्यम् ।

१०९. दध्न इकण् ।

दधिशब्दात् सप्तम्यन्तात् संस्कृते भक्ष्ये इकण् प्रत्ययो भवति । दध्नि संस्कृतं भक्ष्यं—दाधिकम् । ननु च संस्कृतार्थे इकण् वक्ष्यते, तेनैव सिध्यति, किमनेन ? उच्यते—दध्ना हि यत्संस्कृतं तत्र तु दध्नैव प्रधानत्वेन संस्कारः । इह तु दधि केवलमाधारभूतं संस्कारस्तु लवणादिना क्रियते ।

११०. उदश्वितो वा ।

उदश्विच्छब्दात् सप्तम्यन्तात् संस्कृते भक्ष्ये इकण् प्रत्ययो वा भवति । उदकेन श्वयति उदश्वित् । अत एव निर्देशात् सम्प्रसारणाऽभावः । उदश्विति संस्कृतः—औदश्वित, औदश्वित्कम् ।

१११. क्षीरादेयण् ।

क्षीरशब्दात् सप्तम्यन्तात् संस्कृते भक्ष्ये एयण् प्रत्ययो भवति । क्षीरे संस्कृतं भक्ष्यं—क्षैरेयम् । क्षीरे संस्कृता—क्षैरेयी यवागूः ।

११२. तस्य देशे ।

तस्येति षष्ठ्यन्तान्नाम्नो देशेऽभिधेये यथाविहितमण् प्रत्ययो भवति । शिबीनां देशः—शैबः । एवं गान्धारः, आङ्गः, वाङ्गः, सौह्मः । अङ्गादिभ्यो नेच्छन्त्येके । तन्मते अङ्गानां देश इति वाक्यमेव ।

११३. राजन्यादिभ्योऽकञ् ।

षष्ठ्यन्तेभ्यो राजन्यादिभ्यः शब्देभ्यो देशेऽभिधेये अकञ् प्रत्ययो भवति । अणोऽपवादः । राजन्यानां देशः—राजन्यकः । मालवकः । राजन्यादयो यथा—राजन्य, मालव, दैवयातव, देवयान, आवृत, आब्रीतक, वाभ्रव, बाभ्रव्य, शालङ्कायन, जालन्धरायण, जानन्धरायण, कौन्ताल, आत्मकामेय, अम्बरीपुत्र, आम्बरीपुत्र, अम्बरीषपुत्र, बैल्ववन, शैलूपज, उदुम्बर, औदुम्बर, तैतल, सप्रिय, दाक्षि, ऊर्णनाभ, ऊर्णनाभि, आर्जुनायन, विराट, त्रिगर्त । इत्याकृतिगणोऽयम् ।

११४. वसातेर्वा ।

षष्ठ्यन्ताद् वसातिशब्दात् देशेऽभिधेये अकञ् प्रत्ययो वा भवति । वसातीनां देशः—वासातकः, वासातः ।

११५. भौरिक्याद्यैषुकार्यादेर्विधः ।

भौरिक्यादिभ्यः षष्ठ्यन्तेभ्यो देशेऽभिधेये विधः प्रत्ययो भवति । भौरिकीणां देशः—भौरिकिविधः । भौलिकिविधः । भौरिक्यादयो यथा—भौरिकि, भौलिकि, चौपयत, चौटयत, चैटयत, चैकयत, सैकयत, क्षैतयत, काणेय, वालिकाद्य, वाणिजक इति ।

११६. ऐषुकार्यादेर्भक्तः ।

ऐषुकार्यादिभ्यः षष्ठ्यन्तेभ्यो देशेऽभिधेये भक्तः प्रत्ययो भवति । ऐषुकारीणां देशः—ऐषुकारिभक्तः ।

सारसायनभक्तः । ऐषुकार्यादयो यथा—ऐषुकारि, सारसायन, चान्द्रायण, ताक्ष्यायण, द्व्याक्षायण, त्र्याक्षायण, द्व्यक्षायण, त्र्यक्षायण, औलायन, सौवीर, दासमित्रि, दासमित्रायण, शौद्रकायण, शयण्ड, शाण्ड, शायाण्ड, शायण्डायन, खादायन, गौलुकायन, मालुकायन, विश्व, वैश्व, धेनव, वैश्वधेनव, वैश्वमाणव, वैश्वदेव, तुण्ड, देव, तुण्डदेव, शायाण्डी, शायण्डी, वायौविद इति ।

११७. निवासाऽदूरभवयोरिति संज्ञायाम् ।

तस्य देशे इत्यनुवर्तते । षष्ठ्यन्तान्नाम्नो निवास, अदूरभव—इत्येतयोरर्थयोर्यथाविहितं प्रत्ययो भवति प्रत्ययान्तं चेद् देशस्य संज्ञा स्यात् । इतिकरणो विवक्षार्थ । तेनानुवृत्तौ व्यवहारमनुपतितायां संज्ञायां विशेयं न संगीतायाम् । निवसन्त्यस्मिन्निति निवासः । तत्र ऋजुनाव[1] ऋजुनावानां[2] वा निवासः—आर्जुनावः । शिबीनां शैबः । उपुष्टस्य औषुष्टः । शकलाया. शाकल. । अदूरभवे—विदिशाया अदूरभवं—वैदिश नगरम् । वैदिशो जनपदः । वरणास्योः[3] वारणसी । व्रीहिमत्या व्रैहिमतम् । यवमत्या यावमतम् । इह केचिदङ्गाना निवास—अङ्गाः । वङ्गाः, कलिङ्गाः, सुह्माः, मगधाः, पुण्ड्राः, कुरव, पञ्चाला, मत्स्याः । वरणानामदूरभवं—वरणा नगरम् । शृङ्गशाल्मलीनां शृङ्गशाल्मलयो ग्राम । गोदयोर्ह्रदयोर्गोदौ ग्राम । आलन्यायनपर्णाना—आलन्यायनपर्णा ग्रामा. । शफण्डया: शफण्डी । जालपदाया जालपदा । मथुरायाः मथुरा । उज्जयन्या उज्जयनी । गयानां गया । उरशायाः उरशा । तक्षशिलायाः तक्षशिला । कटुकबदर्याः कटुकबदरी । खलतिकस्य खलतिक वनानि—इत्यादिषु प्रत्यय उत्पाद्य लुग् आरभन्ते । सति च लुकि प्रकृतिवल्लिङ्गवचने च मन्यन्ते । तदयुक्तम् । अत्र हि प्रकृतिमात्रमेव देशनाम न प्रत्ययान्त, प्रत्ययान्तस्य च देशनामत्वे प्रत्ययो विधीयते इति न भवति । तस्य निवास इत्यादिविवक्षायां तु वाक्यमेव । प्रत्ययाभावाच्च लुगपि न वक्तव्यः । अङ्गवरणादीनां च क्षत्रियवृक्षादिवत् जनपदनगरादौ स्वत एव वृत्तिर्न प्रत्यययोगात् लिङ्गसंख्योपादानं च स्वगतमेवेति ।

११८. तदऽत्राऽस्ति ।

तदिति प्रथमान्तादत्रेति सप्तम्यर्थे यथाविहित प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेदस्तीति भवति, प्रत्ययान्तं चेद् देशस्य संज्ञा भवति । अत्रापि इतिकरणो विवक्षाऽर्थोऽनुवर्तत एव । तेन परोऽपि मत्वर्थीयोऽनेन बाध्यते । उदुम्बराः सन्ति अस्मिन् देशे—औदुम्बरं नगरम् । औदुम्बरो जनपद. । औदुम्बर. पर्वत. ।

११९. तेन निर्वृत्ते च ।

तेनेति तृतीयान्तात् निर्वृत्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति प्रत्ययान्तं चेद् देशस्य संज्ञा भवति । कुशाम्बेन निर्वृत्ता—कौशाम्बी । ककन्देन काकन्दी । मकन्देन माकन्दी । सगरैः सागरः । सहस्रेण निर्वृत्ता—साहस्री परिखा । चकारश्चतुर्णां योगानामुत्तरत्रानुवृत्त्यर्थ. । तेनोत्तरे प्रत्यया यथायोग चतुर्ष्वर्थेषु भवन्ति ।

१२०. अरीहणादेरऽकण् ।

अरीहणादिभ्यः तस्य निवास., तस्यादूरभवः, तदत्रास्ति, तेन निर्वृत्तं चेत्येष्वर्थेषु यथायोगमकण् प्रत्ययो भवति देशे संज्ञायाम् । अणोऽपवाद । आरीहणकं, खाण्डवकम् । अरीहणादयो यथा—अरीहण, खण्ड, खण्डू, द्रुघण, किरण, खदिर, भगल, भलन्दन, उलुन्द, खावुरायण, खापुरायण, खानुरायण, कौष्टायन, कौद्रायण, भास्त्रायण, त्रैगर्तायन, रैवत, रायस्पोष, विपथ, विपाश, उद्दण्ड, उदञ्चन, ऐडायत, जाम्बवत, जाम्बवत्, शिंशपा, वीरण,

---

१ ऋजवो नावो यस्य ।

२. ऋजु आर्जवयुक्तं नुवन्ति 'कर्मण्यण्' [५/२/१] ।

३. वारणा च असिश्च वरणासी । तयोरदूरभवा पृषोदरादित्वाद् वस्य दीर्घो णस्य तु ह्रस्वः ।

धौमतायन, यज्ञदत्त, सुयज्ञ, बधिर, बिल्व, जम्बू, साम्बुरायण, सौशायन, सौमायन, शाण्डिल्यायन, श्वित्रायणि, साम्बरायण, कश, कृत्स्न, सुशर्मन् इति ।

१२१. कृशाश्वादेरीयण् ।

कृशाश्वादिभ्यश्चातुर्रथिक ईयण् प्रत्ययो भवति देशे सञ्ज्ञायाम् । कार्शाश्वीयः, आरिष्टीयः । कृशाश्वादयो यथा—कृशाश्व, अरिष्ट, अरिष्य, वेष्य, विशाल, रोमक, लोमक, रोमश, शवल, शिवल, कूट, चर्चुल, पूगर, पूकर, शूकर, धूकर, संदृश, सदृश पुरगा, पूरवा, धूम, धूम्र, विनीत, आविनन, विकूच्या, अयस्, सायस्, इरस्, उरस्, अरुष्य, ऐरास, इर, आस, मुद्गल, मौद्गल्य, सुवर्चल, प्रतर, अजिन, अभिजन, अवनत, विकुठ्याङ्कुश, पराशर इति ।

१२२. ऋश्यादेः कः ।

ऋश्यादिभ्यश्चातुर्रथिकः कः प्रत्ययो भवति देशे संज्ञायाम् । ऋश्यकः, न्यग्रोधकः । ऋश्यादयो यथा—ऋश्य, न्यग्रोध, शर, निलीन, निवात, विनद्ध, सित, शित, नद्ध, निनद्ध, परिगूढ, उपगूढ, उत्तर, अश्मन्, उत्तराश्मन्, स्थूल, बाहु, स्थूलबाहु, खदिर, अरदु, अनडुह्, परिवश, खण्डु, वीरण, कर्दम, शर्करा, निबन्ध, अशनि, खण्ड, दण्ड, वेणु, परिवृत, वेश्मन्, अंशु इति ।

१२३. कुमुदादेरिकः ।

कुमुदादिभ्यश्चातुर्रथिक इकः प्रत्ययो भवति देशे सञ्ज्ञायाम् । कुमुदिकं, इक्कटिकं, बल्वजिकम् । कुमुदादयो यथा—कुमुद, इक्कट, निर्यास, कङ्कट, संकट, गर्त, परिवाप, यवाष, कूप, विकङ्कत, बल्वज, अश्वत्थ, न्यग्रोध, बीज, दशा, शाल्मलि, मुनि, स्थल, ग्राम इति ।

१२४. काशादेरिलः ।

काशादिभ्यश्चातुर्रथिक इलः प्रत्ययो भवति देशे संज्ञायाम् । काशिल, वाशिलम् । काशादयो यथा—काश, वाश, अश्वत्थ, पलाश, पीयूक्षा, पाश, विश, तृण, नल, वन, नलवन, कर्दम, कर्पूर, बर्बर, वर्तूल, शीपाल, कण्टक, गुहा, कपित्थ इति ।

१२५. तृणादेः सल् ।

तृणादिभ्यश्चातुर्रथिकः सल् प्रत्ययो भवति देशे संज्ञायाम् । तृणसा, नदसा । लित्वात्स्त्रीत्वम् । तृणादयो यथा—तृण, नद, जन, पर्ण, वर्ण, अर्णस्, वरण, बिल, तुस, वन, पुल इति ।

१२६. प्रेक्षादेरिन् ।

प्रेक्षादिभ्यश्चातुर्रथिक इन् प्रत्ययो भवति देशे सञ्ज्ञायाम् । प्रेक्षी, फलकी । प्रेक्षादयो यथा—प्रेक्षा, फलका, बन्धुका, ध्रुवका, धुवका, क्षिपका, कूप, पुक, धुक, इक्कट, कङ्कट, संकट, मह, गर्त, न्यग्रोध, परिवाप, यवाष, हिरण्य इति ।

१२७. रोऽश्मादेः ।

अश्मादिभ्यश्चातुर्रथिको रः प्रत्ययो भवति देशे संज्ञायाम् । अश्मरः, यूषरः । अश्मादयो यथा—अश्मन्, यूष, ऊष, यूथ, मीन, गुद, दर्भ, कूट, गुहा, वृन्द, नग, कण्ड, गह्व, कन्द, पामन् इति ।

१२८. सख्यादेरेयण् ।

सख्यादिभ्यश्चातुर्रथिक एयण् प्रत्ययो भवति देशे संज्ञायाम् । साखेयः, साखिदत्तेयः । सख्यादयो यथा—सखि, सखिदत्त, अग्नि, दत्त, अग्निदत्त, वायुदत्त, वायुदत्ता, गोफिल, भल्ल, भल्लिपाल, चक्र, चक्रवाक, छगल, अशोक,

सीरक, सरक, वीर, चीर, सरस, समल, रोह, तमाल, कदल, करवीर, कुशीरक, सुरसा, सरम, सपूल इति ।

१२९. सुपन्थ्यादेर्ञ्यः ।

सुपन्थ्यादिभ्यश्चातुर्रथिको ञ्य प्रत्ययो भवति देशे सञ्ज्ञायाम् । सौपन्थ्यः, सौवन्थ्य । सुपथिन्शब्दस्यात एव निपातनात् नुमागम पकारस्य च वा वकार । सांकाश्य, काम्पील्यम् । सुपन्थ्यादयो यथा—सुपन्थिन्, सुवन्थिन्, सकाश, कम्पील, सुपरि, यूप, अश्मन्, अश्व, अङ्ग, नाथ, कुण्ट, कुट, कूट, मादित, मृष्टि, आगस्त्य, शूर, विरन्त, विकर, नासिका, प्रगदिन्, मगदिन्, कटिद, कटिप, कटिव, चूदार, मदार, मजार, कोविदार, कश्मीर, शूरसेन, कुम्भ, सीर, सरक, समल, अस, नामा, रोमन्, लोमन्, तीर्थ, पुलिन, मलिन, अगस्ति, सुपथिन्, दश, नल, सकर्ण, कलिव, खडिव, गडिव इति ।

१३०. बलादेर्यः ।

बलादिभ्यश्चातुर्रथिको य प्रत्ययो भवति देशे सञ्ज्ञायाम् । बल्य, पुल्यम् । बलादयो यथा—बल, पुल, मुल, उल, कुल, दुल, नल, दल, उरल, लकुल, वन इति ।

१३१. अहरादिभ्योऽञ् ।

अहन्नित्येवमादिभ्यश्चातुर्रथिकोऽञ् प्रत्ययो भवति देशे सञ्ज्ञायाम् । आह्नं, लौमम् । तेन निर्वृत्तमिति अर्थे अह् शब्दात् देशे सञ्ज्ञायां विहितोऽयमञ् विशेषविहितत्वात् निर्वृत्त इति सामान्यविहितस्य कालेकणोऽपवाद । अहरादयो यथा—अहन्, लोमन्, वेमन्, गङ्गा । इत्याकृतिगणोऽयम् ।

१३२. पन्थ्यादेरायनण् ।

पन्थ्यादिभ्यश्चातुर्रथिक आयनण् प्रत्ययो भवति देशे सञ्ज्ञायाम् । पान्थायन । पथिन्शब्दस्य प्रत्यययोगे अत एव निपातनान्नुमागम । पाक्षायण, तौषायण । पन्थ्यादयो यथा—पन्थिन्, पक्ष, तुप, अण्डक, वलिक, पाक, चित्र, चित्रा, अतिश्व, कुम्भ, सीरक, लोमन्, रोमन्, लोमक, हसक, सकर्ण, सकर्णक, सरक, सहक, सरस, समल, अणुक, कुण्ड, यमल, बिल, हस्त, हस्तिन्, सिहक इति ।

१३३. कर्णादेरायनिञ् ।

कर्णादिभ्यश्चातुर्रथिक आयनिञ् प्रत्ययो भवति देशे सञ्ज्ञायाम् । कार्णायनि, वासिष्ठायनि । कर्णादयो यथा—कर्ण, वसिष्ठ, अर्क, लुम, अर्कलुस, द्रुपद, आनडुह्य, पाञ्चजन्य, स्फिग्, स्फिज, कुलिश, आकनीकुम्भ, जित्वन्, जित्य, जैत्र, आण्डीवत्, जीवन्त इति ।

१३४. सुतंगमादेरिञ् ।

सुतगमादिभ्यश्चातुर्रथिक इञ् प्रत्ययो भवति देशे सञ्ज्ञायाम् । सौतगमि, मौनिवित्ति । सुतगमादयो यथा—सुतगम, मुनिवित्त, विप्रवित्त, महावित्त, महापुत्र, शुक्र, श्वेत, विग्र, श्वन्, विग्रश्वन्, अर्जुन, अजिर, गदिक, बीज, वाप, बीजवाप, बाजवाप, कर्ण इति ।

१३५. वराहादेः कण् ।

वराहादिभ्यश्चातुर्रथिक कण् प्रत्ययो भवति । वाराहक, पालाशक । वराहादयो यथा—वराह, पलाश, विनद्ध, निबद्ध, स्थूल, बाहु, स्थूलबाहु, खदिर, विदग्ध, विजग्ध, विभग्न, विभक्त, पिनद्ध, निमग्न इति ।

१३६. गोमठादेरिकण् ।

गोमठादिभ्यश्चातुर्रथिक इकण् प्रत्ययो भवति देशे सञ्ज्ञायाम् । गौमठिक, कौमुदिक । गोमठादयो यथा—

गोमठ, कुमुद, अश्वत्थ, रथकार, दाश, ग्राम, घास, कुन्द, शाल्मलि मुनि, स्थल, मुनिस्थल, कुट, मुचुकर्ण, मुचुकूर्णि, कुण्डल, शुचिकर्ण इति।

१३७. नद्यां मतुवतू यथास्वम्।

नद्यामभिधेयाया देशे सञ्ज्ञाया नामभ्य चातुर्थिको मतु, वतु—इत्येतौ प्रत्ययौ यथास्वमिति स्वस्वविषये भवत। एतयो स्वस्वविषयो मत्वर्थीयेष्वनुसंधेय। अणोऽपवाद। इक्षव अस्या सन्ति—इक्षुमती नदी। द्रुमती। उदुम्बरा अस्यां सन्ति—उदुम्बरावती। मशकावती, वीरणावती, पुष्करावती, शरावती, इरावती। अमतुवत्वन्तान्येव नदीनामानीति नेह मनुवतू। भागीरथेन निर्वृत्ता—भागीरथी। भैमरथी, जाह्नवी, सौवास्तवी।

१३८. मध्वादेः।

मध्वादिभ्यश्चातुर्थिको मतुवतू यथास्व भवत देशे सञ्ज्ञायाम्। अणोऽपवाद। अनद्यर्थश्चारम्भ। मधुमान्, विसवान्। मध्वादयो यथा—मधु, बिस, स्थाणु, ऋषि, इक्षु, वेणु, कर्कन्धु, कर्कन्धू, शमी, करीर, हिम, किसर, सार्पण, रुवत्, पार्दा, कौशरु, इष्टका, पार्दाकी, शरु, शुक्ति, आसुति, सुत्या, आसन्दी, शकली, वट, पीडा, अक्षशिल, अक्षशिला, तक्षशिला, आसिपी इति।

१३९. कुमुद-नड-महिष-वेतसेभ्यो डित्।

कुमुदादिभ्यश्चातुर्थिकौ मतुवतू प्रत्ययौ डित्सञ्ज्ञकौ यथास्व भवत देशे सञ्ज्ञायाम्। अणाद्यपवाद। कुमुद्वान्, नड्वान्, महिष्मान्, वेतस्वान्। डित्त्वात् टिलोप।

१४०. नडशादाद् वलः।

नड, शाद—इत्येताभ्या चातुर्थिको वल प्रत्ययो डित्सञ्ज्ञको भवति देशे सञ्ज्ञायाम्। अणाद्यपवाद। नड्वल, शाद्वलम्।

१४१. शिखायाः।

शिखाशब्दाच्चातुर्थिको वल प्रत्ययो भवति देशे सञ्ज्ञायाम्। अणोऽपवाद। पृथग्योगात् डिदिति निवृत्तम्। शिखावल नाम नगरम्। मतुप्रकरणे शिखाया वलं वक्ष्यति, तद्देशार्थं वचनम्।

१४२. उत्करादेरीयः।

उत्करादिभ्यश्चातुर्थिक ईय प्रत्ययो भवति देशे सञ्ज्ञायाम्। उत्करीय, सकरीय। उत्करादयो यथा—उत्कर, संकर, संपर, संपल, सफर, सफल, सफुल, पिप्पल, मूल, पिप्पलमूल, अर्क, अश्मन्, सुवर्ण, सुपर्ण, पर्ण, सुपर्णपर्ण, हिरण्यपर्ण, इडा, अजिर, इडाजिर, अग्नि, तिक, कितव, आतप, अनेक, पलाश, तिककितव, वातपान, एकपलाश, अनेकपलाश, अशक, तैवण, पिचुक, अश्वत्थ, काश, क्षुद्रा, काशक्षुद्रा, भस्त्रा, विशाल, शाला, अरण्य, अजिन, अरण्याजिन, जन्यजनक, आर्जक, खण्डा, जिन, चल्यण, उत्क्रोश, क्षान्ध, रुण्ड, खदिर, सूपर्णाय, श्यावनाय, नैवाकव, नितान्त, वृक्ष, नितान्तवृक्ष, आर्द्रवृक्ष, इन्द्रवृक्ष, अग्निवृक्ष, मन्त्रणाहं, अरीहण, वातागर, विजगीष, सस्रव, रोहिद्गर्त, नीवापक, अणक, निशान्त, खल, जिन, वैराणक, अवरोहित, जन्य, इन्द्रवर्म, गर्त इति।

१४३. नडादेः कीयः।

नडादिभ्यश्चातुर्थिक कीय प्रत्ययो भवति देशे संज्ञायाम्। नडकीय, प्लक्षकीय। नडादयो यथा—नड, प्लक्ष, बिल्व, वेणु, वेत्र, वेतस, त्रि, तक्षन्, इक्षु, काष्ट, कपोत, कुञ्च। कुञ्चशब्दस्य अत एव गणपाठात् ह्रस्वत्वमिति।

१४४. शिरीषादिककणौ ।

शिरीषशब्दाच्चातुर्थिकौ इक, कण्—इत्येतौ प्रत्ययौ भवत देशे संज्ञायाम्। शिरीषाणामदूरभवो ग्रामः—शिरीषिकः, शैरीषकः ।

१४५. शर्कराया इकणीयाणश्च ।

शर्कराशब्दाच्चातुर्थिका इकण्, ईय, अण् चकारात् इक, कण्—इत्येते प्रत्यया भवन्ति देशे संज्ञायाम्। शर्करा अस्मिन् देशे सन्ति—शार्करिक., शर्करीय , शार्कर·, शर्करिक , शार्करक· । शिरीषा शर्करा इति प्रत्यययोगमन्तरेणापि देशे प्रवृत्तिरिति पूर्ववत् प्रत्ययो न भवति। इतिकरणात् यथादर्शन प्रत्ययव्यवस्थाया अर्थप्रकृत्युपादान प्रपञ्चार्थम् ।

१४६. क्वचित् ।

अपत्यादिभ्योऽन्यत्राप्यर्थे क्वचिद् यथाविहित प्रत्ययो भवति। चक्षुषा गृह्यते इति चाक्षुष रूपम् । श्रावण· शब्द । रासनो रस । दृषदि पिष्टा.—दार्षदा सक्तव । उदूखले क्षुण्णा.—औदूखला यावका. । चतुर्दश्या दृश्यते—चातुर्दश रक्षः । चतुर्भिरुह्यते—चातुर शकटम् । अश्वैरुह्यते—आश्वो रथः। सप्रति युज्यते—साप्रत, साप्रत ।

चतुर्थश्चरणः

१. शेषे।

अधिकारोऽयम्। अत ऊर्ध्वं यान् प्रत्ययान् वक्ष्यामः ते शेषेऽर्थे वेदितव्याः। अपत्यादिभ्यश्चातुरर्थिकपर्यन्तेभ्यो योऽन्योऽर्थः स शेषः। तस्येदंविशेषा[1] हि अपत्यसमूहादयस्तेषु[2] वक्ष्यमाणा इयादयो मा भूवन्निति शेषाधिकारः क्रियते। शेषाधिकारः **'तेन दीव्यति…'** [७/२/२] इति यावत्।

२. राष्ट्रादियः।

राष्ट्रशब्दाच्छेषेऽर्थे इयः प्रत्ययो भवति। राष्ट्रे जातो भवः क्रीतः कुशलो वा—राष्ट्रियः। शेषे इति किम्? राष्ट्रस्यापत्यं—राष्ट्रिः।

३. पारावारेभ्य ईनः।

पारावारशब्दाच्छेषेऽर्थे ईनः प्रत्ययो भवति। बहुवचनं समस्तव्यस्तविपर्यस्तपरिग्रहार्थम्। अवारः समुद्रः। तस्य पारं, राजदन्तादित्वात् पारावारः। तत्र भवो जातो वा—पारावारीणः। पारीणः। अवारीणः। अवारपारीणः।

४. द्युप्रागपागुदक्प्रतीचो यः।

दिव्, प्राच्, अपाच्, उदच्, प्रत्यच्—इत्येतेभ्यः अव्ययानव्ययेभ्यः शेषेऽर्थे यः प्रत्ययो भवति। दिवि भवं—दिव्यम्। प्राचि प्राग् वा भवं—प्राच्यम्। एवं अपाच्यं, उदीच्यं, प्रतीच्यम्। दिग्देशवृत्तेः प्रागादेरयं विधिः कालवृत्तेस्तु अव्ययात् परत्वात् **'सायंचिरं…'** [६/४/९०] इत्यादिना तनट्। अनव्ययात् तु **'वर्षाकालेभ्यः…'** [६/४/९१] इत्यादिना इकण्। प्राक्तनं, प्राचिकमित्यादि।

५. ग्रामादीनञ् च।

ग्रामशब्दाच्छेषेऽर्थे ईनञ् चकाराद् यश्च प्रत्ययो भवति। ग्रामीणः, ग्राम्यः। ञकारः पुंवद्भावप्रतिषेधार्थः। ग्रामीणा भार्या अस्य ग्रामीणाभार्यः।

६. कत्र्यादेश्चैयकञ्।

कत्र्यादिभ्यश्चकारात् ग्रामशब्दाच्च शेषेऽर्थे एयकञ् प्रत्ययो भवति। कात्त्रेयकः, पौष्करेयकः। ग्राम—

---

१. इयादयश्च तस्येदमित्यर्थे विहिताः, ततश्चापत्यसमूहादिष्वपि प्राप्नुवन्ति तद्विशेषत्वात् तेषाम्।

२. अपत्यसमूहादिषु अन्यत्रोपयुक्तत्वात् तेषाम्।

ग्रामेयक.। एव च ग्रामशब्दस्य त्रैरूप्य भवति। कत्र्यादयो यथा—कत्त्रि[1], पुष्कर, पुष्कल, पौदन, उम्पि, उम्भि, औम्भि, कुम्भी, कुण्डिना, नगर, महिष्मती, वर्मवती, चर्मण्वती इति। नगरशब्दो महिष्मत्यादिसाहचर्यात् सञ्ज्ञायामेयकञमुत्पादयति, अन्यत्र अणमेव।

७. कुण्ड्यादिभ्यो यलोपश्च।

कुण्ड्यादिभ्य. शब्देभ्य. शेषेऽर्थे एयकञ् प्रत्ययो भवति तत्सनियोगे चैषा यलोप·। कौण्डेयक, कौणेयक.। कुण्ड्यादयो यथा—कुण्ड्या, कुण्या, उक्ष्या, भाण्ड्या, ग्रामकुड्या, तृण्या, वन्या, पल्या, पुल्या, मुल्या। इत्याकृतिगणोऽयम्।

८. कुल-कुक्षि-ग्रीवाभ्यः श्वाऽस्यऽलङ्कारेषु।

कुल, कुक्षि, ग्रीवा—इत्येतेभ्यो यथासख्य श्वन्, असि, अलङ्कार इत्येतेष्वभिधेयेषु शेषेऽर्थे एयकञ् प्रत्ययो भवति। अणोऽपवाद। कुले शुद्धान्वये भवो जातो वा—कौलेयक श्वा। कौलोऽन्य.। कौक्षेयकोऽसि[2]। कौक्षोऽन्य.। ग्रैवेयकोऽलङ्कार[3]। ग्रैवोऽन्य।

९. नद्यादेरेयण्।

नद्यादिभ्य शब्देभ्य शेषेऽर्थे एयण् प्रत्ययो भवति। नद्या जातो भवो वा—नादेय.। माहेय, वानेय। वन्य इयि तु माधीय। शेष इति किम्? नदीना समूह—नादिकम्। नद्यादयो यथा—नदी, मही, वाराणसी, श्रावस्ती, कौशाम्बी, वनकौशाम्बी, वनवासी, काशफरी, खादिरी, पूर्वनगर, पूर्वनगरी, पुर, वन, गिरि, पुर्, वनगिरि, पूर्वनगिरि, पावा, मावा, माल्वा, दार्वा, सेतकी, सेतवी इति।

१०. दक्षिणापश्चात्पुरसस्त्यण्।

एभ्य शेषेऽर्थे त्यण् प्रत्ययो भवति। अणोऽपवाद। दक्षिणा दिक्, तस्या भव—दाक्षिणात्यः। पाश्चात्य., पौरस्त्य। पश्चात्पुर.शब्दसाहचर्यात् दक्षिणाशब्दोऽव्ययमव गृह्यते, तेनेह न—दक्षिणाया भवानि दाक्षिणानि जुहोति। अत्र दक्षिणाशब्दो गवादिवचन.।

११. कापिशीवाह्लिपर्द्वादिभ्यः षायनण्।

एभ्य शेषेऽर्थे षायनण् प्रत्ययो भवति। षकार ईवर्थं। कापिशायन मधु। कापिशायनी द्राक्षा। वाह्लायन, वाह्लायनी। पार्दायनः, पार्दायनी। औदायन., औदायनी।

१२. रङ्कोः प्राणिनि वा।

रङ्कुशब्दात् प्राणिविशिष्टे शेषेऽर्थे षायनण् प्रत्ययो वा भवति। राङ्कवायण·। पक्षेऽण्। राङ्कवो गौ। प्राणिनीति किम्? राङ्कव कम्बल·। मनुष्ये तु प्राणिन्यपि कच्छादिपाठात् '**मनुष्यतत्स्थयोरकञ्**' [६/४/५६] इति परत्वादकञेव भवति। राङ्कवको मनुष्य.।

१३. कन्थाया इकण्।

कन्था ग्रामविशेष:। कन्थाशब्दाच्छेषेऽर्थे इकण् प्रत्ययो भवति। कान्थिक।

---

१. कुत्सितास्त्रयो धर्मार्थकामा यस्य कत्त्रि·।

२. कुक्षौ उदरपार्श्वभागे जातो बद्ध इति। भवेऽर्थे तु '**दृतिकुक्षिकलशि**···' [७/१/३५] इत्यादिना एयणि कौक्षेय.।

३. एवं ग्रीवाया अपि '**ग्रीवातोऽण् च**' [७/१/३७] इति अणेयणो ग्रैव, ग्रैवेयम्।

१४. वर्णाविकञ् ।

वर्णुर्नाम ह्रद. । तस्य समीपो देशोऽपि वर्णुस्तत्र या कन्था तत. शेषेऽर्थेऽकञ् प्रत्ययो भवति । इकणोऽपवादः । कान्थक. ।

१५. क्वामेहत्रतसस्त्यप् ।

क्व, अमा, इह—इत्येतेभ्य. त्रतस्प्रत्ययान्तेभ्यश्च शेषेऽर्थे त्यप् प्रत्ययो भवति । क्वत्यः, अमात्यः, इहत्य । तत्रत्य', यत्रत्य' । ततस्त्य , यतस्त्य , कुतस्त्य. । आविस्शब्दाद् अपि इच्छति कश्चित् । आविष्टच' । पकारस्त्यणत्ययोः सामान्यग्रहणाविघातार्थ.[1] ।

१६. नेर्ध्रुवे ।

निशब्दात् ध्रुवेऽर्थे त्यप् प्रत्ययो भवति । नित्य—ध्रुवम् ।

१७. निसो गते ।

निस्शब्दात् गतेऽर्थे त्यप् प्रत्ययो भवति । निर्गतो वर्णाश्रमेभ्यो निष्टयश्चण्डाल. ।

१८. ऐषमोह्यःश्वसो वा ।

ऐषमस्, ह्यस्, श्वस्—इत्येतेभ्य शेषेऽर्थे त्यप् प्रत्ययो वा भवति । ऐषमस्त्य, ऐषमस्तनम् । ह्यस्त्य, ह्यस्तनम् । श्वस्त्य, श्वस्तनम् । '**श्वसस्तुट् च**' [६/४/८५] इति इकणपि भवति । शौवस्तिकम् ।

१९. दूरादेत्यः ।

दूरशब्दाच्छेषेऽर्थे एत्य. प्रत्ययो भवति । दूरे भव'—दूरेत्य. ।

२०. उत्तरादाहञ् ।

उत्तरशब्दाच्छेषेऽर्थे आहञ् प्रत्ययो भवति । औत्तराह' । औत्तराहा स्त्री । कथमौत्तराही स्त्री ? उत्तराहि-शब्दात् भवार्थेऽणि भविष्यति ।

२१. णोऽरण्यात् ।

अरण्यशब्दाच्छेषेऽर्थे णः प्रत्ययो भवति । आरण्या' सुमनसः । आरण्याः पशव. ।

२२. रूप्योत्तरपदात् ।

रूप्योत्तरपदशब्दाच्छेषेऽर्थे ण प्रत्ययो भवति । वार्करूप्य', वार्करूप्या । शैविरूप्यं, शैवरूप्यम् । माणिरूप्ये जातो माणिरूप्यक इत्यत्र तु वृद्धसंज्ञकत्वेन परत्वात् '**प्रस्थवहपुरान्त**···' [६/४/४३] इत्यादिना योपधलक्षणोऽकञेव भवति । अन्तग्रहणेनैव सिद्धे उत्तरपदग्रहणं बहुप्रत्ययपूर्वनिवृत्त्यर्थम् । बाहुरूप्यी ।

२३. दिक्पूर्वादसंज्ञायाः ।

दिक्पूर्वपदान्नाम्नोऽसंज्ञाविषयाच्छेषेऽर्थे णः प्रत्ययो भवति । अणोऽपवादः । पौर्वशालः, पौर्वशाला । आपरशाल', आपरशाला । असंज्ञाया इति किम् ? पूर्वेषुकामशमी नाम ग्राम । तस्यां भव—पूर्वेषुकामशमः । एवमपरेषुकामशम , पूर्वकार्ष्णमृत्तिका, अपरकार्ष्णमृत्तिका । '**प्राग्ग्रामाणां**' [८/४/८] इत्युत्तरपदवृद्धिः ।

---

१. *अन्यथा '**यकाबापोऽधातुस्यात्**' [२/३/१०२] इत्यादौ त्यग्रहणे निरनुबन्धत्वादस्यैव ग्रह स्यात् ।*

२४. मद्रादञ् ।

मद्रान्ताद् दिक्पूर्वपदाच्छेषेऽर्थेऽञ् प्रत्ययो भवति । पूर्वेषु मद्रेषु भवः—पौर्वमद्रः । पौर्वमद्री । **'बहुविषयेभ्यः'** [६/४/४५] इत्यकञ् प्राप्तस्तदपवादे **'वृजिमद्राद् देशात्कः'** [६/४/३८] इति के प्राप्तेऽञ्वचनम् । केवलादेव मद्रादकञ्-कविधिरिति चेत् तर्हि इदमेव ज्ञापकं सुमर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधेः । तेन सुपाञ्चालकः, सर्वपाञ्चालकः, अर्धपाञ्चालकः, पूर्वपाञ्चालकः, अपरपाञ्चालकः, सुमागधकः, सर्वमागधकः, सुवृजिकः, सुमद्रकः इत्यादि सिद्धम् ।

२५. उदग्ग्रामाद्यक्कल्लोम्नः ।

उदग्ग्रामवाचिनो यक्कल्लोमन्शब्दाच्छेषेऽर्थे अञ् प्रत्ययो भवति । याक्कल्लोमः । उदग्ग्रामादिति किम् ? अन्यस्मादणेव । याक्कल्लोमनः । यक्कल्लोम्न इति किम् ? प्रेक्षिणि भवः—प्रैक्षिणः । कौष्टिन्यां भवः—कौष्टिनः ।

२६. वाहीकादेः ।

वाहीकादिभ्यः शेषेऽर्थे अञ् प्रत्ययो भवति । वाहीकः, वाहीकी, गौष्टः, गौष्टी । वाहीकादयो यथा—वाहीक, गौष्टी, तैकी, नैकेती, गोमती, शूरसेन, रोमक, पटच्चर इति । तत्र वाहीकरोमकाभ्यां **'वृद्धादीयः'** [६/४/३२] इति ईयः प्राप्तः, गौष्टीतैकीनैकेतीभ्यो **'वाहीकेषु ग्रामात्'** [६/४/३६] इति णिकेकणौ प्राप्तौ, गोमती इत्येतस्मात् **'ईतोऽकञ्'**, [६/४/४१] इति अकञ्प्राप्तः, शूरसेनात् **'जनपदेभ्यः'** [६/४/४४] इत्यकञ्प्राप्तः, पटच्चराद् **'रोपधात्'** [६/४/४२] इत्यकञ्प्राप्तः, तस्मादञ्विहितः ।

२७. शकलादेर्यञः ।

शकलादिभ्यो यञ्प्रत्ययान्तेभ्यः शेषेऽर्थे अञ् प्रत्ययो भवति । ईयाऽपवादः । गर्गाद्यन्तर्गणः शकलादिः । शकलस्याऽपत्यं—शाकल्यः । तस्य छात्राः—शाकलाः । एवं काण्ठाः, गौकक्षाः, वामरथाः । यञ इति किम् ? शकलो देवताऽस्येति शाकलः । तस्येदं शाकलीयम् । कण्ठादागतः—काण्ठः । तस्य छात्राः—काण्ठीयाः ।

२८. पौत्रादीञः ।

पौत्रादौ य इञ् विहितस्तदन्तात् शेषेऽर्थे अञ् प्रत्ययो भवति । ईयाऽपवादः । दक्षस्याऽपत्यं पौत्रादि—दाक्षिः । तस्य छात्राः—दाक्षाः । प्लाक्षाः । पौत्रादीति किम् ? सुतंगमेन निर्वृत्ता—सौतंगमी नगरी । तस्यां भवः—सौतंगमीयः । शालङ्केरपत्यं युवा—शालङ्किः । **'यञिञः'** [६/२/७३] इत्यायनणः । पैलादिपाठात् लुक् । तस्य छात्राः शालङ्काः इत्यत्र तु आयनणि लुप्ते यद्यपीञन्तं यूनि वर्तते तथापीञ् पौत्रादिरिति अञेव भवति ।

२९. न द्विस्वरात् प्राग्भरतात् ।

प्राच्यगोत्रवाचिनो भरतगोत्रवाचिनश्च नाम्नः पौत्रादीञन्ताद् द्विस्वरादञ् प्रत्ययो न भवति । पूर्वेण प्राप्तस्य प्रतिषेधः । प्राचः—चैङ्कीयाः, पौष्पीयाः । चिङ्कपुष्पशब्दौ आबन्तावपि, तत्र बाह्वादित्वादिञ् । भरतात्—काशीयाः, वाशीयाः । द्विस्वरादिति किम् ? पन्नागारेश्छात्राः—पान्नागाराः । मान्थरेषणाः । प्राग्भरतादिति किम् ? दाक्षाः प्लाक्षाः । प्राग्ग्रहणे भरतानां ग्रहणं न भवतीति स्वशब्देन ग्रहणम् ।

३०. भवतोरिकणीयसौ ।

भवतुशब्दाच्छेषेऽर्थे इकण्, ईयस्—इत्येतौ प्रत्ययौ भवतः । ईयापवादौ । भवतः भवत्या वा इदं—भावत्कं, भावत्की । भवदीयः, भवदीया । सकारो **'नाम सिदयव्ये'** [१/१/२३] इति पदत्वार्थः । उकारान्तग्रहणात् शत्रन्तान्न भवति । भवत इदं—भावतम् ।

३१. परजनराज्ञोऽकीयः ।

पर, जन, राजन्—इत्येतेभ्य. शेषेऽर्थेऽकीय प्रत्ययो भवति। परकीय., जनकीय., राजकीय. । अकारः पुवद्भावार्थः । राज्ञ्या इदं—राजकीयम्। स्वकीय, देवकीय इति तु स्वकदेवकयोर्गहादित्वात् सिद्धम् । ये तु स्वदेवशब्दाभ्या अकीयमिच्छन्ति तेषां मते स्वस्येदं—सौवं, दैवमायुः, दैवी वाक् इत्यादि न सिध्यति।

३२. वृद्धादीयः।

वृद्धसंज्ञकाच्छेषेऽर्थे ईयः प्रत्ययो भवति । देवदत्तीय', जिनदत्तीय', तदीय', यदीय., गार्गीयः, वात्सीय., शालीय., गोनर्दीयः, भोजकटीयः,। वृद्धादिति किम्? सभासन्नयने भवः—साभासन्नयनः । अणपवादो योगः ।

३३. उष्णादिभ्यः कालात् ।

उष्णादिपूर्वपदात् कालान्ताच्छेषेऽर्थे ईयः प्रत्ययो भवति । उष्णकालीय.। उष्णादयः प्रयोगगम्या.।

३४. व्यादिपूर्वाण्णिकेकणौ ।

वि इत्येवमादिभ्य. परो य. कालशब्दस्तदन्तात् शेषेऽर्थे णिक, इकण्—इत्येतौ प्रत्ययौ भवतः। उभयो. स्त्रियां विशेषः। वैकालिक., वैकालिका, वैकालिकी। आनुकालिक., आनुकालिका, आनुकालिकी । व्यादयो यथा—वि, अनु, इद, धूम, आपद्, सपत्, कूप, क्रोध, ऊर्ध्व, पूर्व, तत्, क्रूर । आकृतिगणोऽयम्।

३५. काश्यादेः।

वृद्धादित्यनुवर्तते। पूर्वयोगस्तु न सबध्यते फलाऽभावात्। काशीत्येवमादिभ्यो वृद्धसंज्ञकेभ्यः शेषेऽर्थे णिक, इकण्—इत्येतौ प्रत्ययौ भवतः। काशिकः, काशिका, काशिकी। चैदिक, चैदिका, चैदिकी। वृद्धादिति किम्? देवदत्त नाम वाहीकग्राम.। तत्र जातो दैवदत्त.। देवदत्तशब्दस्य प्राग्देशे एव वृद्धसंज्ञा न वाहीकेष्विति न भवति। नापि उत्तरेण। तत्रापि वृद्धादित्यनुवर्तनात्। प्राग्ग्रामेषु तु वृद्धसंज्ञकत्वेन काश्यादित्वाद् भवत्येव। दैवदत्तिका, दैवदत्तिकी। येषां तु काश्यादीनां वृद्धसंज्ञा न सम्भवति तेषां पाठसामर्थ्याद् भविष्यति। चेदिशब्दसाहचर्यात् च काशिशब्दो जनपद एव वर्तमान इमौ प्रत्ययौ उत्पादयति, नान्यत्र। काशीयाश्छात्राः। काश्यादिगणो यथा—काशि, चेदि, देवदत्त, सायाति, सांवाह, अच्युत, मोदमान, श्वकुलाल, शकुलाद, हस्तिकर्षू, कौनाम, हिरण्यकरण, हैहिरण्य.[1] करण, अरिंदम, सधमित्र, दाशमित्र, सिन्धुमित्र, दासमित्र, छागमित्र, दासग्राम, शौवावतान, गौवाशन, गौवासन, तारङ्कि, भारङ्कि, युवराज, उपराज, देवराज इति।

३६. वाहीकेषु ग्रामात् ।

वाहीकदेशे ग्रामवाचिभ्यो वृद्धसंज्ञकेभ्यः शेषेऽर्थे णिक, इकण्—इत्येतौ प्रत्ययौ भवतः। कारन्तपिक, कारन्तपिका, कारन्तपिकी। शाकलिक', शाकलिका, शाकलिकी । मान्थविक, मान्थविका, मान्थविकी। आरात्क', आरात्का, आरात्की। सैपुरिकः, सैपुरिका, सैपुरिकी। स्कौनगरिक., स्कौनगरिका, स्कौनगरिकी। नापितवास्तुकः इत्यत्र तु परत्वात् **'उवर्णादिकण्'** [६/४/३६] इति इकण्। वातानुप्रस्थक', कौक्कुटीवहकः, नान्दीपुरकः, दासरूप्यकः—इत्येतेषु **'प्रस्थवहपुरान्तयोपधधन्वार्थात्'** [६/४/४३] इति परत्वादकञ्। सौसुकीयः इत्यत्र कोपधलक्षण ईयोऽपवादत्वाच्च[2] भवति। कथं मौञ्जीयम्? मौञ्जं नाम वाहीकावधिरन्यदीयो ग्रामो न वाहीकग्राम.। अन्ये तु दश द्वादश वा ग्रामा विशिष्टसंनिवेशावस्थाना मौञ्जं नामेति ग्रामसमूह एवायं न ग्रामः, नापि जनपदो येन जनपदलक्षणोऽकञ् स्यादिति मन्यन्ते। वृद्धादिति किम्? देवदत्तं नाम वाहीकग्रामः, तत्र जातो दैवदत्तः।

---

१. हे इति संबोधनम्। हिरण्यं सुवर्णम्। करणं क्रिया। हेहिरण्य इति अत्र करणेऽस्ति इति हैहिरण्यं करणम्।

२. न केवल परत्वादेव।

३७. उशीनरेषु ।

उशीनरेषु जनपदे यो ग्रामस्तद्वाचिनो वृद्धसञ्ज्ञकात् शेषेऽर्थे णिकेकणौ प्रत्ययौ वा भवत. । आह्वजालिक, आह्वजालिका, आह्वजालिकी । सौदर्शनिक, सौदर्शनिका, सौदर्शनिकी । पक्षे—आह्वजालीय., सौदर्शनीय. ।

३८. वृजिमद्राद् देशात्कः ।

वृद्धादिति निवृत्तम् । वृजिमद्रशब्दाभ्या देशवाचिभ्या शेषेऽर्थे क प्रत्ययो भवति । जनपदाऽकञोऽपवाद । वृजिक., मद्रक. । सुसर्वार्धदिक्शब्देभ्यो जनपदवाचिन प्रत्ययो भवति । तत्र मद्रात् दिक्पूर्वात् **'मद्रादञ'** [६/४/२४] इत्यञ् विहित., शेषपूर्वपदात् तु अय भवति । सुमद्रक., सर्वमद्रक, अर्धमद्रक, सुवृजिक, सर्ववृजिक, अर्धवृजिक., पूर्ववृजिक., अपरवृजिक. । देशादिति किम् ? मनुष्यवृत्तेर्वाज, माद्र ।

३९. उवर्णादिकण् ।

उवर्णान्ताद् देशवाचिन शेषेऽर्थे इकण् प्रत्ययो भवति । अणोऽपवाद । परत्वादीयणिकेकणोऽपि बाधते । शबरजम्ब्वा भव:—शाबरजम्बुक: । निषादकर्ष्वां भव—नैषादकर्षुक । एव दाक्षिकर्षुक, प्लाक्षिकर्षुक: । नापित-वास्तुर्वाहीकग्रामस्तत्र भवो नापितवास्तुक । यस्तु प्राग्ग्रामस्तस्मादुत्तरेण भवति । आत्रीनमायौ भव—आत्रीनमायवक । जिह्नुषु जैह्नवक इत्यत्र तु परत्वाद् योपधलक्षणो जनपदलक्षणश्चाकञ् । ऐक्ष्वाक इत्यत्र तु कोपधलक्षणोऽण् । उवर्णादिति किम् ? दैवदत्त । देशादिति किम् ? पटोश्छात्रा—पाटवा ।

४०. वृद्धादेव प्राच्यात् ।

शरावत्या नद्या: प्राच्या दिशि देश प्राग्देश । तद्वाचिन उवर्णान्ताद् वृद्धसञ्ज्ञकादेव शेषेऽर्थे इकण् प्रत्ययो भवति । आषाढजम्ब्वां भव.—आषाढजम्बुक । नापितवास्तौ जात—नापितवास्तुक । पूर्वेण सिद्धे नियमार्थं वचनम् । इह न भवति—मल्लवास्तु. प्राग्ग्रामो माल्लवास्तव । एवकार इष्टावधारणार्थ । वृद्धात् प्राच्यादेवेति नियमो मा भूत् ।

४१. ईतोऽकञ् ।

पूर्वमनुवर्तते । ईकारान्तात् प्राग्देशवाचिनो वृद्धसञ्ज्ञकाच्छेषेऽर्थेऽकञ् प्रत्ययो भवति । ईयाऽपवाद. । काकन्द्या भव.—काकन्दक. । एव माकन्दक । प्राच्यादिति किम् ? दात्तामित्र्या भव—दात्तामित्रीय. ।

४२. रोपधात् ।

पूर्वमनुवर्तते । रकारोपधात् प्राग्देशवाचिनो वृद्धसञ्ज्ञकाच्छेषेऽर्थे अकञ् प्रत्ययो भवति । ईयाऽपवाद. । पाटलि-पुत्रक, ऐकचक्रक ।

४३. प्रस्थ-वह-पुरान्त-योपध-धन्वार्थात् ।

वृद्धाद्देशादित्यनुवर्तते । प्रस्थ, वह, पुर—इत्येतदन्तात् यकारोपधात् धन्ववाचिनश्च देशवाचिनो वृद्धसञ्ज्ञकात् शेषेऽर्थेऽकञ् प्रत्ययो भवति । ईयाऽपवाद. । धन्वन्शब्दो मरुदेशवाची । प्रस्थान्त—मालाप्रस्थक, शौणप्रस्थक., काञ्ची-प्रस्थक, वातानुप्रस्थक । वहान्त—पैलुवहक, फाल्गुनीवहक, कौक्कुटीवहक. । पुरान्त—आनन्दपुरक, नान्दीपुरक, वार्तीपुरक । योपध—सांकाश्यक, काम्पील्यक, माणिरूप्यक:, दासरूप्यक, आत्रीतमायवक । धन्ववाचि—पारेधन्व, अपारेधन्व । पारेधन्वनि भव.—पारेधन्वक । आपारेधन्वक, ऐरावतक । पुरग्रहणमप्राच्यार्थम् । प्राच्यात् हि रोपधत्वेनैव सिद्धम् । अत एव हि प्राच्यादिति नानुवर्तते ।

४४. जनपदेभ्यः ।

वृद्धाद्देशादित्यनुवर्तते । जनपदेभ्यो देशेभ्यो वृद्धसंज्ञकेभ्य शेषेऽर्थे अकञ् प्रत्ययो भवति । ईयाऽपवाद । आभिसारे

भवः—आभिसारक.। आदर्शे आदर्शक.। औपुष्टश्यामायनौ जनपदावधी अपि जनपदौ। औपुष्टे औषुष्टक.। श्यामायने श्यामायनकः। बहुवचनमकञ् प्राधान्यद्योतनार्थम्। तेनाऽपवादविषयेऽपि भवति। आभिसारगर्तक। अत्र गर्तोत्तरपदलक्षण ईयो न भवति। जनपदशब्देन जनपदसमुदायो न गृह्यते, तेनेह न भवति—काशिकोशलीय।

४५. बहुविषयेभ्यः।

वृद्धादिति निवृत्त योगविभागात्। देशादिति तु वर्तते। जनपदेभ्यो देशेभ्यो बहुत्वविषयेभ्य शेषेऽर्थे अकञ् प्रत्ययो भवति। अणाद्यपवाद[1]। अङ्गेषु जात—आङ्गक। वङ्गेषु जात—वाङ्गक। दार्वेषु दार्वक.। काम्बवेषु काम्बवक। जिह्नुषु जैह्नवक। अजमीढेषु आजमीढक.। अजकुन्देषु आजकुन्दक। कालञ्जरेषु कालञ्जरक.। वैकुलिशेषु वैकुलिशकः। विषयग्रहणमनन्यत्र भावार्थम्[2]। तेन य एकत्वद्वित्वयोरपि वर्तते, ततो मा भूत्। वर्तनी च वर्तनी च वर्तनी च वर्तन्य.। तासु भव—वार्तन। अत्र हि देशभेदाद् बहुवचनम्। बहुवचनमपवादविषयेऽपि प्रापणार्थम्। त्रिगर्तेषु त्रैगर्तक। अत्र गर्तोत्तरपदलक्षण ईयो बाध्यते।

४६. कच्छाग्नि-वक्त्र-वर्तोत्तरपदात्।

देशादित्यनुवर्तते। कच्छ, अग्नि, वक्त्र, वर्त—इत्येतदुत्तरपदात् देशवाचिन शेषेऽर्थेऽकञ् प्रत्ययो भवति। ईयाणोरपवाद.। भारुकच्छ भव.—भारुकच्छक। पैप्पलीयकच्छक। अग्नि—काण्डाग्नौ भव—काण्डाग्नक। वैभुजाग्नक। वक्त्र—इन्दुवक्त्रे भव—ऐन्दुवक्त्रक। सैन्धुवक्त्रक। वर्त—बाहुवर्ते भव.—बाहुवर्तकः। चाक्रवर्तक.। उत्तरपदग्रहणमबहुप्रत्ययपूर्वार्थम्। ईषदसमाप्त. कच्छ—बहुकच्छो देश., ततोऽकञ् न भवति।

४७. धूमादेः।

धूमादिभ्यो देशवाचिभ्य. शेषेऽर्थेऽकञ् प्रत्ययो भवति। धौमक. पाडण्डक.। धूमादयो यथा—धूम, पडण्ड, पडाण्ड, अवतण्ड, तण्डक, वतण्डव, शशादन, अर्जुन, आर्जुनाव, दाण्डायन, स्थली, दाण्डायनस्थली, मानकस्थली, आनकस्थली, माहकस्थली, मद्रकस्थली, माषस्थली, घोषस्थली, राजस्थली, अट्टस्थली, मानस्थली, माणवकस्थली, राजगृह, सत्रासाह, साक्षासाह, भक्ष्यादी, भक्ष्यली, भक्ष्याली, भद्राली, मद्रकुल, अञ्जीकुल, द्व्याहाव, त्र्याहाव, द्वियाहाव, त्रियाहाव, संस्फीय, बर्बर, गर्त, वर्ज्य, शकुन्ति, विनाद, इमकान्त, विदेह, आनर्त, वाढूर, खाडूर, माठर, पाठेय, पाथेय, घोष, घोषमित्र, शिष्य, वणिय, पल्ली, अराज्ञी, आराज्ञी, धार्तराज्ञी, धार्तराष्ट्री, धार्तराष्ट्र, अवया, तीर्थकुक्षि, समुद्रकुक्षि, द्वीप, अन्तरीप, अरुण, उज्जयनी, दक्षिणापथ, साकेत इति।

४८. कूलात् सौवीरेषु।

सौवीरेषु देशवाचिन. कूलशब्दाच्छेषेऽर्थे अकञ् प्रत्ययो भवति। कौलकः सौवीरेषु। कौलोऽन्यत्र।

४९. समुद्रान्नौमनुष्ययोः।

समुद्रशब्दाद् देशवाचिन. शेषेऽर्थे अकञ् प्रत्ययो भवति स चेत् प्रत्ययान्तो नौः मनुष्यो वा भवति। सामुद्रिका नौ। सामुद्रको मनुष्य। नौमनुष्ययोरिति किम्? सामुद्र लवणम्।

५०. नगरात् कुत्साप्रावीण्ययोः।

देशवाचिनो नगरशब्दात् शेषेऽर्थे अकञ् प्रत्ययो भवति कुत्सायां प्रावीण्ये च गम्यमाने। कुत्सा—निन्दा।

---

१. आदिशब्दात् जिह्नोः उवर्णादिकण.।

२. न विद्यते बहुत्वविषयादन्यत्र भावो यस्य स तथा सोऽर्थ प्रयोजनं यस्य।

प्रावीण्यं—नैपुण्यम् । नागरकाश्चौराः । नागरकाः प्रवीणाः । कुत्साप्रावीण्ययोरिति किम् ? नागरा ब्राह्मणाः ।

५१. पथि-न्यायाध्याय-हस्ति-नर-विहारेष्वरण्यात् ।

अरण्यशब्दाद् देशवाचिनः शेषेऽर्थे अकञ् प्रत्ययो भवति पथ्यादिषु वाच्येषु । आरण्यकः पन्थाः, न्यायः, अध्यायः, हस्ती, नरः, विहारो वा । पथ्यादिष्विति किम् ? आरण्याः पशवः । आरण्याः सुमनसः ।

५२. वा गोमये ।

अरण्यशब्दाद् देशवाचिनः शेषेऽर्थे अकञ् प्रत्ययो वा भवति गोमये वाच्ये । आरण्यका गोमयाः । आरण्यानि गोमयानि । केचित्तु हस्तिन्यामपि विकल्पमिच्छन्ति । आरण्या आरण्यका वा हस्तिनी । एके तु नरवर्जं पूर्वसूत्रेऽपि विकल्पमाहुः । आरण्यः, आरण्यकः पन्था इत्यादि ।

५३. कुरु-युगंधराभ्याम् ।

वेत्यनुवर्तते । कुरु, युगंधर—इत्येताभ्यां देशवाचिभ्यां शेषेऽर्थे अकञ् प्रत्ययो वा भवति । कुरुषु भवः—कौरवकः, कौरवः । युगंधरेषु भवः—यौगंधरकः, यौगंधरः । जनपदशब्दावेतौ बहुविषयौ च तत्र युगंधरात् **'बहुविषयेभ्यः'** [६/४/४५] इति नित्यमकञि प्राप्ते विकल्पः । कुरोस्त्वकञ् कच्छाद्यणा बाधितस्य प्रतिप्रसवार्थं वचनम् । तथा च विकल्पः सिद्ध एव । युगंधरार्थात् तु विभाषा । मनुष्यतत्स्थयोस्तु कुरोः परत्वादकञेव । कौरवको मनुष्यः । कौरवकमस्य हसितम् ।

५४. कोपधादण् ।

देशवाचिनः ककारोपधात् शेषेऽर्थे अण् प्रत्ययो भवति । जनपदाकञोऽपवादः । ऋषिका जनपदः, तेषु जातः—आर्षिकः । महिषकेषु माहिषकः । अश्मकेषु आश्मकः । इक्ष्वाकुषु ऐक्ष्वाकः ।

५५. कच्छादेः ।

अकञादेरपवादः । देशवाचिभ्यः कच्छादिभ्यः शेषेऽर्थे अण् प्रत्ययो भवति । काच्छः, सैन्धवः, वार्णवः । कच्छादयो यथा—कच्छ, सिन्धु, वर्ण, मधुमत्, कम्बोज, साल्व, कुरु, अनुषण्ड, अनूषण्ड, कश्मीर, विजापक, द्वीप, अनूप, अजवाह, कुलूत, रङ्कु, गन्धार, साल्वेय, यौधेय, सस्थाल, सिन्धवन्त इति ।

५६. मनुष्यतत्स्थयोरकञ् ।

कच्छादिभ्य इत्यनुवर्तते । कच्छादिभ्यो देशवाचिभ्यो मनुष्ये मनुष्यस्थे च शेषेऽर्थे अकञ् प्रत्ययो भवति । अणोऽपवादः । कच्छे जातः—काच्छको मनुष्यः । काच्छकमस्य हसितं, स्मितं, जल्पितं, ईक्षितं वा । काच्छिका चूला । सैन्धवको मनुष्यः । सैन्धवकमस्य हसितम् । सैन्धविका चूला । मनुष्यतत्स्थयोरिति किम् ? काच्छो गौः ।

५७. साल्वाद् गोयवाग्वोः ।

देशवाचिनः साल्वशब्दात् गवि यवाग्वां च शेषेऽर्थे अकञ् प्रत्ययो भवति । साल्वको गौः । साल्विका यवागूः । गोयवाग्वोरिति किम् ? साल्वा व्रीहयः, साल्वको मनुष्यः, साल्वकमस्य हसितं इत्यादिस्तु पूर्वसूत्रेणैव सिद्ध्यति ।

५८. न पदातौ ।

देशवाचिनः साल्वशब्दात् पदातौ शेषेऽर्थे अकञ् प्रत्ययो न भवति । साल्वः पदातिः । कच्छादित्वादणो मनुष्यतत्स्थयोः इत्यपवादस्तस्यायं निषेधः ।

५९. गर्तोत्तरपदादीयः ।

गर्तोत्तरपदाद् देशवाचिनः शेषेऽर्थे ईयः प्रत्ययो भवति । अणोऽपवादः । वृकगर्तीयः, शृगालगर्तीयः, रोहिद्-

गर्तीयः। श्वाविद्गर्तीयः इत्यत्र तु वाहीकग्रामलक्षणौ णिकेकणौ परत्वाद् बाधते। आभिसारगर्तकः, त्रैगर्तकः इत्यत्राकन् 'जनपदेभ्यः' [६/४/४४] इति 'बहुविषयेभ्यः' [६/४/४५] इति बहुवचनसामर्थ्यात् भवतीत्युक्तम्। उत्तरपदग्रहण बहुप्रत्यय-पूर्वनिरासार्थम्। बाहुगर्तः।

६०. कटपूर्वात् प्राच्यात्।

कटपूर्वपदात् प्राग्देशवाचिनो नाम्नः शेषेऽर्थे ईयः प्रत्ययो भवति। अणोऽपवादः। कटनगरीयः, कटग्रामीयः, कटघोषीयः, कटवर्तकीयः, कटपल्वलीयः। प्राच्यादिति किम्? काटनगरः।

६१. कखोपध-कन्था-पलद-नगर-ग्राम-ह्रदोत्तरपदाद् वृद्धात्।

वृद्धसञ्ज्ञकात् ककारखकारोपधात् कन्था, पलद, नगर, ग्राम, ह्रद इत्येतदुत्तरपदाच्च देशवाचिनः शेषेऽर्थे ईयः प्रत्ययो भवति। बाधकबाधनार्थ आरम्भः। कोपधात् कोपधलक्षणेऽणि प्राप्ते आरोहणकीयः, द्रौघणकीयः, आश्वत्थिकीयः, शाल्मलिकीयः, सौसुकीयः, आष्टकीयः, ब्राह्मणकीयः। खोपधात् वाहीकग्रामलक्षणयोर्णिकेकणोः[1] कौटशिखीयः, माटिशिखीयः, अयोमुखीयः। कन्थापलदोत्तरपदात् तयोरेव। दाक्षिकन्थीयः, माहकिकन्थीयः, दाक्षिपलदीयः, माहकिपलदीयः। नगरोत्तरपदाद् रोपधलक्षणेऽकञि दाक्षिनगरीयः, माहकिनगरीयः। ग्रामह्रदोत्तरपदात् णिकेकणोरेव। दाक्षिग्रामीयः, माहकिग्रामीयः, दाक्षिह्रदीयः, माहकिह्रदीयः। वृद्धादिति किम्? आर्षिकः, माडनगरः।

६२. पर्वतात्।

देशवाचिनः पर्वतशब्दात् शेषेऽर्थे ईयः प्रत्ययो भवति। अणोऽपवादः। पर्वतीयो राजा। पर्वतीयः पुमान्।

६३. अनरे वा।

देशवाचिनः पर्वतशब्दात् नरवर्जिते शेषेऽर्थे ईयः प्रत्ययो वा भवति। पर्वतीयानि पार्वतानि फलानि। पर्वतीयं पार्वतं उदकम्। अनर इति किम्? पर्वतीयो मनुष्यः।

६४. कृकणपर्णाद् भारद्वाजात्।

कृकण, पर्ण—इत्येताभ्यां भारद्वाजदेशवाचिभ्यां शेषेऽर्थे ईयः प्रत्ययो भवति। अणोऽपवादः। कृकणीयः, पर्णीयः। भारद्वाजादिति किम्? कार्कणः, पार्णः।

६५. गहादिभ्यः।

देशादित्यनुवर्तते। नद्गहादीनां यथासंभव विशेषणम्। गहादिभ्यो यथासंभव देशवाचिभ्यः शेषेऽर्थे ईयः प्रत्ययो भवति। अणाद्यपवादः। गहीयः, अन्तस्थीयः। गहादयो यथा—गह, अन्तस्थ, अन्तस्था, अन्य, सम, विषम, उत्तम, अङ्गमगध, शुक्लपक्ष, पूर्वपक्ष, अपरपक्ष, कृष्णशकुन, अधमशाख, उत्तमशाख, समानशाख, एकशाख, समानग्राम, एकग्राम, एकवृक्ष, एकपलाश, इष्वग्र, दन्ताग्र, इष्वनीक, अवस्यन्द, कामप्रस्थ, सौप्रध्य, खाडायनि, काठेरणि, काठेरिणि, लावेरणि, लावेरिणि, लावीरणि, शैशिरि, शौङ्गि, शौङ्गिशैशरि, आसुरि, आहिंसि, आमित्रि, व्याडि, भौङ्गि, भौजि, भौजि, आध्यश्वि, आश्वत्थि, औद्गाहमानि, औपबिन्दवि, आग्निशर्मि, दैवशर्मि, श्रौति, बाटारिक, वाल्मीकि, धैमधृत्वि, उत्तर, अन्तर, मुखतस्, पार्श्वतस्, एकतस्, अनन्तर, आनृशंसि, साटि, सौमित्रि, परपक्ष, स्वक, देवक। इत्याकृतिगणोऽयम्।

६६. पृथिवीमध्यान्मध्यमश्चाऽस्य।

पृथिवीमध्यशब्दाद् देशवाचिनः शेषेऽर्थे ईयः प्रत्ययो भवति मध्यमादेशश्चास्य पृथिवीमध्यशब्दस्य भवति। पृथिवीमध्ये जातो भवो वा—मध्यमीयः।

---

१. 'वाहीकेषु ग्रामात्' [६/४/३६] इति सूत्रेण प्राप्तौ सत्यां एदत् विधानम्। अग्रेऽपि यथास्थानं विज्ञेयम्।

६७. निवासाच्चरणेऽण् ।

पृथिवीमध्यान्निवासभूताद् देशवाचिनः शेषेऽर्थे चरणे गम्ये अण् प्रत्ययो भवति मध्यमादेशश्चास्य । पृथिवीमध्य निवास एषा चरणाना—माध्यमाश्चरणा. । त्रय. प्राच्या, त्रय. उदीच्याः, त्रयो माध्यमा. । निवासादिति किम् ? पृथिवीमध्यादागत —मध्यमीय. कठः । चरण इति किम् ? पृथिवीमध्य निवासोऽस्य—मध्यमीयः शूद्र. ।

६८. वेणुकादिभ्य ईयण् ।

वेणुकादिभ्यो यथायोग देशवाचिभ्य. शेषेऽर्थे ईयण् प्रत्ययो भवति । अणोऽपवाद । वैणुकीय., वैत्रकीय, औत्तरपदीयः, औत्तरीय., औत्तरकीयः, प्रास्थीयः, प्रास्थकीय., माध्यमकीय.[1], माध्यमिकीय[2], नैपुणकीय[3] । आकृतिगणोऽयम् ।

६९. वा युष्मदस्मदोऽञीनञौ युष्माकास्माकौ च ।

देशादिति निवृत्तम् । युष्मद्, अस्मद्—इत्येताभ्या शेषेऽर्थे अञ्, ईनञ् इत्येतौ प्रत्ययौ वा भवत तत्सनियोगे च यथासख्यं युष्मदस्मदोः युष्माक, अस्माक इत्येतावादेशौ भवत । प्रत्ययौ प्रति यथासख्य नास्ति वचनभेदात् । युष्माकमय युवयोर्वा—यौष्माक, यौष्माकीण । अस्माकमय आवयोर्वा—आस्माक, आस्माकीन. । पक्षे त्यदादित्वेन वृद्धसज्ञकत्वादीय । युष्मदीय, अस्मदीय ।

७०. तवकममका वेकत्वे ।

एकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदो. शेषेऽर्थे अञि ईनञि च प्रत्यये परे यथासख्य तवक, ममक—इत्येतावादेशौ भवत. । तवाय तावक. । ममाय मामक. । तावकीन., मामकीन । पक्षे—त्वदीय, मदीय ।

७१. अर्धाद्यः ।

अर्धशब्दाद् शेषेऽर्थे य. प्रत्ययो भवति । अणोऽपवाद । अर्ध्यम् ।

७२. सपूर्वादिकण् ।

विद्यमानपूर्वपदादर्धशब्दाद् शेषेऽर्थे इकण् प्रत्ययो भवति । पौष्करार्धिक, वैजयार्धिक., बालेयार्धिकः, गौतमार्धिक, क्षैत्रार्धिक, यौवनार्धिक ।

७३. दिक्पूर्वात्तौ ।

दिक्पूर्वपदाद् अर्धशब्दात् शेषेऽर्थे तौ य, इकण्—इत्येतौ प्रत्ययौ भवत । पूर्वार्ध्य, पौर्वार्धिकम् । दक्षिणार्ध्य, दाक्षिणार्धिकम् । पश्चार्ध्य, पाश्चार्धिकम् ।

७४. ग्रामजनपदांशादञिकणौ ।

ग्रामजनपदैकदेशवाचिनोऽर्धशब्दाद् दिक्पूर्वात् शेषेऽर्थे अञ्, इकण्—इत्येतौ प्रत्ययौ भवत । यापवादौ । ग्रामस्य जनपदस्य वा पूर्वार्धे भव—पौर्वार्ध, पौर्वार्धिक । दाक्षिणार्ध, दाक्षिणार्धिकः ।

७५. परावराधमोत्तमादेर्यः ।

पर, अवर, अधम, उत्तम—इत्येतत्पूर्वाद् अर्धशब्दात् शेषेऽर्थे यः प्रत्ययो भवति । इकणोऽपवाद । परार्ध्य,

---

१. मध्यम एव मध्यमक, स्वार्थे क ।

२. मध्यममस्यास्ति मध्यमिक, 'अतोऽनेकस्वरात्' [८/१/१३] इतीक ।

३. अल्पो निपुणो निपुणकः, 'कुत्सिताल्पाज्ञातेषु' [८/२/४७] इति कप् ।

अवरार्ध्यं, अधमार्ध्यं, उत्तमार्ध्यम् । परावरयोः दिक्शब्दत्वेऽपि परत्वादयमेव यः ।

७६. अन्तादिमध्यान्मः ।

अन्त, आदि, मध्य—इत्येतेभ्यः शेषेऽर्थे मः प्रत्ययो भवति । अणोऽपवादः । अन्तमः, आदिमः, मध्यमः ।

७७. अधोवसोऽमः ।

अधस्, अवस्—इत्येताभ्यां शेषेऽर्थे अमः प्रत्ययो भवति । अधमः, अवमः । प्रत्ययस्य स्वरादित्वमपदत्वार्थम् । तेन **'अमाराच्छछ्वत्पृथणोऽव्ययस्य'** [८/४/६६] इति टिलोपः ।

७८. पश्चादऽग्रान्तादिमः ।

पश्चात्, अग्र, अन्त—इत्येतेभ्यः शेषेऽर्थे इमः प्रत्ययो भवति । पश्चिमः, अग्रिमः, अन्तिमः ।

७९. मध्यादः सांप्रतिके ।

मध्यशब्दात् सांप्रतिकेऽर्थे वर्तमानात् शेषेऽर्थे अः प्रत्ययो भवति । मापवादः । सांप्रतिकं *न्याय्यं* युक्तमुचितं समं चोच्यते । नात्युत्कृष्टो नात्यपकृष्टो मध्यपरिमाणो मध्यो वैयाकरणः । मध्या गुणाः । मध्या स्त्री । नातिदीर्घं नातिह्रस्वं मध्यप्रमाणं मध्यं काष्ठम् । नातिस्थूलो नातिकृशो मध्यः कायः । यद्यपि मध्यशब्दो मध्यपरिमाणवाचिन्यपि वर्तते तथापि अवस्थावस्थावतोः स्याद्वादाद् भेदविवक्षायां अवस्थावाचिप्रकृतेरवस्थावति प्रत्ययार्थे मो मा भूदिति वचनम् ।

८०. द्वीपादऽनुसमुद्रं ण्यः ।

समुद्रसमीपे यो द्वीपः तद्वाचिनः शेषेऽर्थे *ण्यः* प्रत्ययो भवति । कच्छाद्यकञणोरपवादः । द्वैप्यो मनुष्यः । द्वैप्यमस्य हसितम् । द्वैप्यम् । अनुसमुद्रमिति किम् ? अनुनदि यो द्वीपस्तस्मात् द्वैपको व्यासः । द्वैपकमस्य हसितम् । द्वैपम् ।

८१. वर्षाकालेभ्य इकण् ।

वर्षाशब्दात् कालविशेषवाचिभ्यश्च शेषेऽर्थे इकण् प्रत्ययो भवति । अणपवादः । वृद्धादीयमपि परत्वाद् बाधते । वर्षासु भवः—वार्षिकः । **'अंशादृतोः'** [८/४/५] इति निर्देशात् ऋत्वन्तादपि भवति । पूर्ववार्षिकः, अपरवार्षिकः । एवमुत्तरत्रापि । कालवाचि—मासिकः, अर्धमासिकः, सांवत्सरिकः, आह्निकः, दैवसिकः । वर्षाग्रहणमृत्वणबाधनार्थम् । कालशब्दः कालविशेषवाची[1] । **'ऋतुनक्षत्रसन्ध्यादेरण्'** [६/४/८६] इत्यत्र सन्ध्यादिग्रहणात् । सरूपग्रहणे हि काललक्षणेकण्-बाधकः सध्यादिग्रहणमनर्थकं स्यात् । बहुवचनं तु यथाकथंचित्[2] कालवृत्तिभ्यः प्रत्ययप्रापणार्थम् । निशासहचरित-मध्ययनं निशा, प्रदोषसहचरितं प्रदोषः । तत्र जयी—नैशिकः, प्रदोषिकः । कदम्बपुष्पसहचरितः कालः—कदम्बपुष्प, व्रीहिपलालसहचरितः कालः—व्रीहिपलालम् । तत्र देयमृणं—कादम्बपुष्पिकं, व्रैहिपलालिकम् । कालवाचिशब्दात् कालार्थादकालार्थाच्चापि भवति, अकालवाचिशब्दात् तु कालार्थादेव भवतीति विवेकः । आ पादपरिसमाप्तेः कालाधिकारः ।

८२. शरदः श्राद्धे कर्मणि ।

शरच्छब्दात् कालवाचिनः श्राद्धे कर्मणि पितृकार्ये शेषेऽर्थे इकण् प्रत्ययो भवति । ऋत्वणोऽपवादः । शारदिकं श्राद्धं कर्म । कर्मणीति किम् ? शारदः श्राद्धः—श्रद्धावानित्यर्थः । श्राद्धे इति किम् ? शारदं विरेचनम् ।

---

१. गृह्यत इति शेषः । मासाद्यपेक्षया कालशब्दोपि कालविशेषवाची, तेन कालिक इत्यपि ।

२. यथाकथंचित् गुणवृत्त्या मुख्यवृत्त्या वा ये काले वर्तन्त इत्यर्थः ।

८३. रोगातपयोर्वा ।

शरच्छब्दात् कालवाचिनो रोगे आतपे चाभिधेये शेषेऽर्थे इकण् प्रत्ययो वा भवति । ऋत्वणोऽपवादः । शारदिकः शारदो वा रोगः । शारदिकः शारदो वा आतपः । रोगातपयोरिति किम् ? शारदं दधि ।

८४. निशाप्रदोषात् ।

निशाप्रदोषशब्दाभ्यां कालवाचिभ्यां शेषेऽर्थे **'वर्षाकालेभ्य'**···' [६/४/८१] इत्यादिना नित्यं प्राप्त इकण् प्रत्ययो वा भवति । नैशिकः, नैशः । प्रादोषिकः, प्रादोषः ।

८५. श्वसस्तुट् च ।

कालवाचिनः श्वस्शब्दाच्छेषेऽर्थे इकण् प्रत्ययो वा भवति तस्य च तुडागमः । शौवस्तिकः । पक्षे **'ऐषमोह्यःश्वसो वा'** [६/४/१८] इति त्यप् । श्वस्त्यम् । तत्रापि वाग्रहणात् पक्षे **'सायंचिरं'**··· ' [६/४/९०] इत्यादिना तनट् । श्वस्तनम् ।

८६. ऋतु-नक्षत्र-संध्यादेरण् ।

ऋतुवाचिभ्यो[1] नक्षत्रवाचिभ्यः सध्यादिभ्यश्च कालवाचिभ्यः शेषेऽर्थे अण् प्रत्ययो भवति । इकणोऽपवादः । ऋतु—ग्रैष्मः, शैशिरः, वासन्तः । ऋतोर्ञ्णित् प्रत्ययस्तदवयवादेरपि भवति । पूर्वग्रैष्मः, अपरशैशिरः । **'अंशादृतोः'** [८/४/५] इत्युत्तरपदवृद्धिः । नक्षत्र—पुष्येण चन्द्रयुक्तेन युक्तः कालः—पुष्यः । **'चन्द्रयुक्तान्नक्षत्राद्युक्ते काले'** [६/३/५] इत्यादिनाऽण् । तस्य लुक् । पुष्ये भवः—पौषः । एवं तैषः, आश्विनः, रौहिणः, सौवातः । संध्यादि—साध्यः, सांधिवेलः, आमावास्यः । एकदेशविकृतस्य[2] अनन्यत्वाद् अमावस्याशब्दादपि भवति । आमावस्यः । कालेभ्य इति किम् ? स्वातेरिदमुदयस्थान—स्वातीयम् । आर्द्रीयम् । **'तोऽशश्वदकस्मात्'** [८/४/८१] इति निर्देशात् शश्वच्छब्दादिकणपि । शाश्वतं, शाश्वतिकम् । संध्यादयो यथा—संध्या, सधिवेला, अमावास्या, त्रयोदशी, चतुर्दशी, पञ्चदशी, पौर्णमासी, प्रतिपत्, शश्वत् इति ।

८७. संवत्सरात् फलपर्वणोः ।

कालवाचिनः संवत्सरशब्दात् फले पर्वणि च शेषेऽर्थे अण् प्रत्ययो भवति । सांवत्सरं फलम् । सांवत्सरं पर्व । फलपर्वणोरिति किम् ? सांवत्सरिकं श्राद्धम् ।

८८. हेमन्ताद् वा तलोपश्च ।

कालवाचिनः हेमन्तशब्दात् शेषेऽर्थे अण् प्रत्ययो वा भवति तत्संनियोगे च तकारस्य लोपो वा भवति । नित्यमणि प्राप्ते विभाषा । तथा च त्रैरूप्यम् । हैमन, हैमन्त, हैमन्तिकम् । तदन्तविधिना पूर्वहैमनम् । सूत्रेऽणनुवर्तनाद् अणि एव तलोपो भवति ।

८९. प्रावृष एण्यः ।

कालवाचिनः प्रावृष्शब्दात् शेषेऽर्थे एण्य प्रत्ययो भवति । अणोऽपवादः । प्रावृषि भवः—प्रावृषेण्यः । जाते तु परत्वादिक एव । प्रावृषि जात —प्रावृषिकः ।

---

१. ऋतुनक्षत्रशब्दयोः संध्यादावपठनं तद्वाचिग्रहणार्थम् ।

२. **'अमावास्यामावस्ये तिथौ'** [५/१/५७] इति पक्षे ह्रस्वत्वादेकदेशविकृतत्वम् ।

९०. सायं-चिरं-प्राह्णे-प्रगेऽव्ययेभ्यस्तनट् ।

सायं, चिरं, प्राह्णे, प्रगे—इत्येतेभ्योऽव्ययेभ्यश्च कालवाचिभ्य शेषेऽर्थे तनट् प्रत्ययो भवति। साये भवं—सायन्तनम्। चिरे चिरन्तनम्। अत एव निर्देशात् मान्तत्वं निपात्यते। प्राह्णेतन, प्रगेतन—अनयोरेकारान्तत्वम्। अव्यय—दिवातनं, दोषातनं, नक्तंतनं, पुनस्तन, प्रातस्तनं, प्राक्तनम्। कालेभ्य इति किम्? स्वर्भवं—सौवम्। सायंचिरंप्राह्णेप्रगे इत्यव्ययेभ्योऽव्ययेभ्य इत्येव सिद्धे एभ्योऽनव्ययेभ्यस्तनट्विधानं कालेकण्बाधनार्थम्।

९१. पूर्वाह्णापराह्णाद् वा।

पूर्वाह्ण, अपराह्ण—इत्येताभ्यां कालवाचिभ्यां शेषेऽर्थे तनट् प्रत्ययो वा भवति। **'वर्षाकालेभ्य'**··· [६/४/८१] इत्यादिना नित्यं इकणि प्राप्ते विकल्प, तेन पक्षे सोऽपि भवति। पूर्वाह्णे जातो भवो वा पूर्वाह्णेतन., पूर्वाह्णतन.। अपराह्णेतनः, अपराह्णतन। **'कालात्तरतम'**··· [३/२/२४] इत्यादिना सप्तम्या वा अलुक्। पूर्वाह्णे जयी—पूर्वाह्णतन.। अपराह्णतनः। अत्र जयिनि वाच्य तत्र व्यवस्थितविभाषा विज्ञानात् नित्य सप्तम्या लुक्। पक्षे—पौर्वाह्णिक, आपराह्णिक.। टकार ईबर्थ। पूर्वाह्णेतनी, अपराह्णेतनी।

९२. चिर-परुत्-परारेस्त्नः।

वेत्यनुवर्तते। चिर, परुत्, परारि—इत्येतेभ्य कालवाचिभ्यः शेषेऽर्थे त्न. प्रत्ययो वा भवति। चिरत्न, परुत्न, परारित्नम्। पक्षे **'सायंचिरं'**··· [६/४/९०] इत्यादिना तनट्। चिरतन, परुत्तन, परारितनम्। परारे रिलोपमिच्छन्त्यन्ये। परात्न। केचित् तु परुत्परार्योर्मुमागममिच्छन्ति। परुन्तन, परारिन्तनम्।

९३. पुरो नः।

कालवाचिनः पुराशब्दात् शेषेऽर्थे न प्रत्ययो वा भवति। पुरा भवं—पुराणं, पुरातनम्।

९४. स्थामाऽजिनान्तेभ्यो लुक्।

स्थामन्शब्दान्ताद् अजिनान्ताच्च परस्य शैषिकस्य प्रत्ययस्य लुक् भवति। अश्वत्थामनि भवो जातो वा अश्वत्थामा। **'अः स्थाम्नः'** [६/२/२४] इत्य प्रत्यय। तस्य लुक्। सिंहाजिने भवो जातो वा सिंहाजिन। उलाजिन., वृकाजिनः। भवार्थस्यैव लुकमिच्छन्त्यन्ये। तन्मते अश्वत्थाम्नोऽय तत आगतो वा अश्वत्थाम। एव सैंहाजिन., वार्काजिन. इत्यादौ न भवति।

फले प्रांशुग्राह्ये भवति विफलं वामनमनो,
न च प्राप्तुं शक्तो यमनियमहीनः शिवपदम्।
गुणोऽयं श्रीकालोर्जिनवचनसद्गौरवगुरो-
र्मुदा षष्ठाध्याये भवसि[1] सफलो यत् कविरघो ! ।।

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं षष्ठोऽध्यायः।

---

१. तद्वामनेन यमनियमहीनेन च सदृशस्त्वम्।

सप्तमोऽध्यायः

प्रथमश्चरणः

१. तत्र जाते ।

अणादय इयादयश्च सविशेषणा अनुवर्तन्ते । तत्रेति सप्तम्यन्तात् जातेऽर्थे यथाविहितमणादयः इयादयश्च प्रत्यया भवन्ति । स्रुघ्ने जातः—स्रौघ्नः । एवं माथुरः, बाह्यः, बाहीकः, औत्सः, औदपानः, आग्नेयः, कालेयः, स्त्रैणः, पौंस्नः, राष्ट्रियः, पारावारीणः, ग्राम्यः, ग्रामीणः, कात्त्रेयकः, नादेयः । तत्रेति किम् । चैत्रात् जातः । जाते इति किम् ? शयने शेते, आसने आस्ते । स्वयमुत्पत्तिर्जातस्यार्थ इति कृतादिभ्यो भेदः ।

२. प्रावृष इकः ।

पूर्वमनुवर्तते । सप्तम्यन्तात् प्रावृष्शब्दात् जातेऽर्थे इकः प्रत्ययो भवति । एण्यस्याऽपवादः । प्रावृषि जातः—प्रावृषिकः ।

३. संज्ञायां शरदोऽकञ् ।

शरच्छब्दात्सप्तम्यन्तात् जातेऽर्थेऽकञ् प्रत्ययो भवति संज्ञायां विषये । ऋत्वणोऽपवादः । शारदका दर्भाः । शारदका मुद्गाः । दर्भविशेषाणां मुद्गविशेषाणां चेयं संज्ञा । संज्ञायामिति किम् ? शारदं सस्यम् । संज्ञायामित्यधिकारः **'कृतलब्धक्रीतसंभूतेषु'** [७/१/१७] इति सूत्रं यावत् । अन्ये तु संज्ञायामित्यधिकारं नेच्छन्ति ।

४. पूर्वाह्णापराह्णार्द्रमूलप्रदोषावस्करादकः ।

सप्तम्यन्तेभ्यः पूर्वाह्णादिभ्यः शब्देभ्यो जातेऽर्थे अकः प्रत्ययो भवति संज्ञायाम् । इकणादेरपवादः । पूर्वाह्णे जातः—पूर्वाह्णकः । अपराह्णकः, आर्द्रकः, मूलकः, प्रदोषकः, अवस्करकः । संज्ञायामिति किम् ? पौर्वाह्णिकं, पूर्वाह्णेतनं, आपराह्णिकं, अपराह्णेतनं, आर्द्रं, मौलं, प्रादोषिकं, प्रादोषं, आवस्करम् । केनैव सिद्धेऽकविधानमार्द्रिका[1] इत्येवमर्थम् । अन्यथा खट्वाका, खट्वका, खट्विका इतिवत् के रूपत्रयं[2] स्यात् ।

५. पथः पन्थ च ।

पथिन्शब्दात् तत्र जात इत्यर्थेऽकः प्रत्ययो भवति पथिन्शब्दस्य च पन्थादेशः संज्ञायां विषये । अणोऽपवादः । पथि जातः—पन्थकः ।

६. अमावास्याया अश्च वा ।

अमावास्याशब्दात् तत्र जात इत्यर्थे अश्चकाराद् अकश्च प्रत्ययौ वा भवतः संज्ञायां विषये । अमावास्यायां जातः—अमावास्यः, अमावास्यकः । पक्षे संध्याद्यण् । आमावास्यः । एकदेशविकृतस्याऽनन्यत्वाद् अमावस्याशब्दादपि

---

१. **'अत इवनित्काप्य…'** [२/३/६५] इत्यादिना ।
२. **'ह्रस्वश्चाऽथवितपुंस्कात्'** [२/३/१०४] इत्यनेन ।

भवति । अमावस्य., अमावस्यक', आमावस्य: । संज्ञायामिति किम् ? आमावास्य: ।

७. सिन्ध्वपकराभ्यां कः ।

वेत्यनुवर्तते । सिन्धु, अपकर—इत्येताभ्यां तत्र जातेऽर्थे कः प्रत्ययो वा भवति सज्ञायां विषये । सिन्धौ जातः—सिन्धुक. । अपकरे कच्चरे जातः—अपकरकः । पक्षे कच्छादिपाठादण् । सैन्धवः, आपकर' । संज्ञायामिति किम् ? सैन्धवको मनुष्यः । **'मनुष्यतत्स्थयोरकञ्'** [६/४/५६] इत्यकञ् ।

८. सोदर्यसमानोदर्यौ ।

सोदर्यसमानोदर्यशब्दौ यप्रत्ययान्तौ तत्र जातेऽर्थे निपात्येते । समानोदरे जात—सोदर्यः, समानोदर्यः । निपातनात् पक्षे समानस्य सभाव । तत एव जातार्थमात्रत्वेऽपि भ्रातृष्वेवाऽभिधान न कृमिमलादिषु । संज्ञाया-मित्यधिकाराद् वा ।

९. फल्गुन्याष्टो वा ।

फल्गुनीशब्दात् तत्र जातेऽर्थे ट' प्रत्ययो वा भवति । पक्षे नक्षत्राण् । फल्गुन्योर्जातः—फल्गुन । फल्गुनी स्त्री । अणि—फाल्गुन' ।

१०. स्थानाऽन्तगोशालखरशालाल्लुक् ।

स्थानान्तान्नाम्नो गोशाल, खरशाल—इत्येताभ्यां च तत्र जातेऽर्थे विहितस्य प्रत्ययस्य लुग् भवति संज्ञायां विषये । गोस्थाने जात.—गोस्थानः । अश्वस्थान. । गोशाले गोशाल । खरशाले खरशाल । लिङ्गविशिष्टस्यापि ग्रहणाद् गोस्थान्यां गोस्थान. । गोशालाया गोशाल' । खरशालायां खरशाल । **'लुक् तद्धितलुक्यगोणीसूच्योः'** [२/३/११६] इति स्त्रीप्रत्ययस्याऽपि लुक् ।

११. अनुराधा-स्वाति-पुष्यार्थ-पुनर्वसु-हस्त-विशाखा-बहुलाभ्यः ।

अनुराधादिभ्यो नक्षत्रेभ्यस्तत्र जातेऽर्थे विहितस्य प्रत्ययस्य लुग् भवति सज्ञायां विषये । अनुराधायां जात.—अनुराध. । स्वातौ स्वाति. । पुष्यार्थ—पुष्ये पुष्य. । तिष्ये तिष्य । सिध्ये सिध्य । पुनर्वसौ पुनर्वसु । हस्ते हस्तः । विशाखायां विशाख' । बहुलाः—कृत्तिका' । ताभिश्चन्द्रयुक्ताभिर्युक्त कालो बहुला , तासु जातो बहुल ।

१२. चित्रा-रेवती-रोहिणीभ्यः स्त्रियाम् ।

चित्रादिभ्यो नक्षत्रेभ्यस्तत्र जातेऽर्थे विहितस्य प्रत्ययस्य स्त्रिया लुग् भवति सज्ञायाम् । चित्रायां जाता—चित्रा माणविका । रेवत्या रेवती । रोहिण्या रोहिणी । स्त्रियामिति किम् ? पुंसि वक्ष्यमाण विकल्प एव । चित्र , चैत्र । रेवत., रैवत. । रोहिण', रौहिण. ।

१३. वत्सशालाभिजिदश्वयुग्मृगशिरोभ्यश्च वा ।

स्त्रियामिति नानुवर्तते पृथग्योगात् । वत्सशालादिभ्यः चकारात् चित्रादिभ्यश्च परस्य तत्र जातेऽर्थे विहितस्य प्रत्ययस्य लुग् वा भवति । वत्सशालायां जातः—वत्सशाल', वात्सशाल । अभिजित्, आभिजित । अश्वयुग्, आश्वयुज' । मृगशिराः, मार्गशीर्षः । चित्रः, चैत्र' । रेवतः, रैवत. । रोहिण', रौहिण' ।

१४. अश्विन्यादिभ्यो बहुलम् ।

अश्विन्यादिभ्यो नक्षत्रवाचिभ्य' परस्य तत्र जातेऽर्थे विहितस्य प्रत्ययस्य बहुल लुग् भवति संज्ञायाम् ।

क्वचिन्नित्यं—अश्वनीषु जातः—अश्विनः। अश्विनी। राधः, राधा। श्रवणः, श्रवणा। उत्तरः, उत्तरा। क्वचिद् विकल्पः—कृत्तिकासु जातः कृत्तिकः, कार्तिकः। क्वचिन्न—मघासु माघः। अश्वत्थे आश्वत्थः। प्रोष्ठपदासु प्रोष्ठपादः। भद्रपादः। 'जातेप्रोष्ठभद्राल्पवस्य' [८/४/११] इत्युत्तरपदवृद्धिः।

१५. शतभिषजो वा डण् च।

शतभिषज्शब्दात् तत्र जातेऽर्थे डण् प्रत्ययो वा भवति सञ्ज्ञायां चकारात् लुक् च। पक्षे चाण्। शतभिषजि जातः—शातभिषः। डित्त्वात् टिलोपः। अणि—शातभिषजः। लुकि—शतभिषक्। एवं त्रैरूप्यम्।

१६. श्रविष्ठाषाढादीयण्लुकौ।

श्रविष्ठा, अषाढा—इत्येताभ्यां तत्र जातेऽर्थे ईयण् प्रत्ययो लुक् च वा भवति संज्ञायाम्। वचनभेदो यथासंख्य-निवृत्त्यर्थः। पक्षे चाण्। श्रविष्ठा—धनिष्ठा। तासु जातः—श्राविष्ठीयः। अणि—श्राविष्ठः। लुकि—श्रविष्ठः। एवमाषाढीयः, आषाढः, अषाढः।

१७. कृतलब्धक्रीतसंभूतेषु।

तत्रेत्यनुवर्तते। संज्ञायामिति तु निवृत्तम्। सप्तम्यन्तात् नाम्नः कृते लब्धे क्रीते संभूते चार्थे यथाविहितमणादय इयादयश्च प्रत्यया भवन्ति। यदन्येनोत्पादितं तत्कृतम्। यत् प्रतिग्रहादिना प्राप्तं तल्लब्धम्। यन्मूल्येन स्वीकृतं तत् क्रीतम्। यत् संभाव्यते तत् संभूतम्। स्रुघ्ने कृतो लब्धः क्रीतः सभूतो वा—स्रौघ्नः। माथुरः, बाह्यः, बाह्लीकः, औत्सः, राष्ट्रियः, पारावारीणः, नादेयः। तत्रेति किम्? देवदत्तेन क्रीतः। कृतलब्धक्रीतसंभूतेष्विति किम्? शयने शेते। आसने आस्ते।

१८. कुशले।

तत्रेति सप्तम्यन्तात् कुशलेऽर्थे यथाविहितमणादय इयादयश्च प्रत्यया भवन्ति। स्रुघ्ने कुशलः—स्रौघ्नः। माथुरः, राष्ट्रियः, नादेयः। योगविभाग उत्तरार्थः।

१९. पथोऽकः।

सप्तम्यन्तात् पथिन्शब्दात् कुशलेऽर्थे अकः प्रत्ययो भवति। अणोऽपवादः। पथि कुशलः—पथकः।

२०. कोऽशन्यादेः।

अशन्यादिभ्यः सप्तम्यन्तेभ्यः कुशलेऽर्थे कः प्रत्ययो भवति। अणादेरपवादः। अशनौ कुशलः—अशनिकः। अश्मकः, आकर्षकः। अशन्यादय उपचारात् तद्विषयायां क्रियायां वर्तमानाः प्रत्ययं उत्पादयन्ति। तत्रैव कुशलार्थयोगात्। प्रत्ययान्तरकरणमिकारोकारान्तशब्दार्थम्। अन्यथा तेषु अनिष्ट रूपमापद्येत। अशन्यादिगणो यथा—अशनि, अश्मन्, आकर्ष, त्सरु, पिशाच, पिण्ड, पाद, शकुनि, निचय, जय, नय, ह्लाद, ह्लाद इति।

२१. कालात् साधु-पुष्प्यत्-पच्यमानेषु।

तत्रेत्यनुवर्तते। सप्तम्यन्तेभ्यः कालविशेषवाचिभ्यः साधौ पुष्प्यति पच्यमाने चार्थे यथाविहितं प्रत्यया भवन्ति। हेमन्ते साधु—हैमनमनुलेपनम्[१]। हैमन्तं, हैमन्तिकम्[२]। वसन्ते पुष्प्यन्ति—वासन्त्यः कुन्दलताः। ग्रैष्म्यः पाटलाः।

---

१. 'हेमन्ताद् वा तलोपश्च' [६/४/८८] इति वाऽञ् प्रत्ययः तकारलोपश्च।

२. 'वर्षाकालेभ्य इकण्' [६/४/८१]।

शरदि पच्यन्ते—शारदाः शालयः । शैशिरा मुद्गाः ।

२२. उप्ते ।

तत्रेति सप्तम्यन्तात् कालवाचिन उप्तेऽर्थे यथाविहित प्रत्ययो भवति । शरदि उप्ता —शारदा यवा । हैमन्ते हैमनाः । ग्रैष्माः, नैदाघाः । योगविभाग उत्तरार्थः ।

२३. आश्वयुज्या अकञ् ।

आश्वयुजीशब्दात् सप्तम्यन्तात् उप्तेऽर्थे अकञ् प्रत्ययो भवति । इकणोऽपवादः । अश्विनीभिश्चन्द्रयुक्ताभिर्युक्ता या पौर्णमासी सा आश्वयुजी । अश्विनीपर्यायोऽश्वयुक्शब्द । आश्वयुज्यां[1] कौमुद्या उप्ता—आश्वयुजका माषा ।

२४. ग्रीष्मवसन्ताद् वा ।

आभ्यां सप्तम्यन्ताभ्यामुप्तेऽर्थे अकञ् प्रत्ययो वा भवति । ऋत्वणोऽपवाद । ग्रैष्मकं ग्रैष्मं वा सस्यम् । वासन्तकं वासन्तं वा सस्यम् ।

२५. देये ऋणे ।

कालादित्यनुवर्तते । सप्तम्यन्तात् कालविशेषवाचिनो देयेऽर्थे यथाविहित प्रत्ययो भवति यत् तद्देयं ऋणं चेद् भवति । मासे देयमृण—मासिकम् । आर्धमासिक, सावत्सरिकम् । मासादिके गते देयमित्यर्थ । ऋणे इति किम् ? मासे देया भिक्षा । स्वातौ देयं स्वस्तिवाचनम् ।

२६. कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः ।

कलापिन्, अश्वत्थ, यवबुस, उमाव्यास, ऐषमस्—इत्येतेभ्य कालवाचिभ्य सप्तम्यन्तेभ्यो देय ऋणे अकः प्रत्ययो भवति । इकणादेरपवाद.[2] । यस्मिन् काले मयूरा केदारा इक्षव. कलापिनो भवन्ति स कालस्तत्साहचर्यात् कलापी, तत्र देयमृणं—कलापकम् । यस्मिन् कालेऽश्वत्था फलन्ति स कालोऽश्वत्थफलसहचरितोऽश्वत्थ., तत्र देयमृण—अश्वत्थकम् । यस्मिन् काले यवाना बुस भवति स कालो यवबुसं, तत्र देयमृण—यवबुसकम् । उमा[3] व्यस्यन्ते विक्षिप्यन्ते यस्मिन् स काल उमाव्यासः, तत्र देयमृण—उमाव्यासकम् । ऐषमोऽस्मिन् संवत्सरे देयमृण -ऐषमकम्[4] ।

२७. ग्रीष्मावरसमाभ्यामऽकञ् ।

ग्रीष्म, अवरसमा—इत्येताभ्यां कालवाचिभ्या सप्तम्यन्ताभ्यां देये ऋणे अकञ् प्रत्ययो भवति । अणिकणोरपवादः । ञकारो वृद्ध्यर्थ. । ग्रीष्मे देयमृण—ग्रैष्मकम् । अवरा समा अवरसमा. समाया अवरत्वमित्यवरसम वा । तत्रावरसमकम् । आपरसमकमित्यपि कश्चित् ।

२८. संवत्सराग्रहायणीभ्यामिकण् च ।

संवत्सर, आग्रहायणी—इत्येताभ्यां कालवाचिभ्यां सप्तम्यन्ताभ्यां देये ऋणे इकण् चकारात् अकञ् च प्रत्ययौ भवतः । अणिकणोरपवाद । संवत्सरात् हि फले पर्वणि च ऋणेऽण् प्राप्नोति । संवत्सरे देयमृण फलं पर्व वा—सांवत्सरिकं,

१. अत एव निर्देशात् 'लुबऽप्रयुक्ते' [६/३/६] इति न लुक् ।

२. आदिशब्दात् 'ऐषमोह्यःश्वसो वा' [६/४/१८] इति त्यप्तनटौ ।

३. अतसी धान्यविशेष. ।

४. 'असाराच्छवत्पृक्तोऽव्ययस्य' [८/४/६६] इति टेर्लोप. ।

सांवत्सरकम् । आग्रहायणिकं, आग्रहायणकम् । वेत्यकृत्वा इकण् चेति विधानं **'संवत्सरात् फलपर्वणोः'** [६/४/८७] इति अणूबाधनार्थम् ।

२९. व्याहरति मृगे ।

तत्रेत्यनुवर्तते कालादिति च । सप्तम्यन्तात् कालवाचिनो व्याहरत्यर्थे यथाविहितं प्रत्ययो भवति व्याहरंश्चेद् मृगो भवति । निशायां व्याहरति—नैशिको नैशो वा मृगः । प्रादोषिकः प्रादोषो वा शृगालः[1] । मृगे इति किम् ? वसन्ते व्याहरति कोकिलः ।

३०. जयिनि च ।

जयः प्रसहनमभ्यासः । सोऽस्यास्तीति जयी । तत्रेति सप्तम्यन्तात् कालवाचिनो जयिनि वाच्ये यथाविहितं प्रत्ययो भवति । निशासहचरितमध्ययनं निशा । तत्र जयी साभ्यासः—नैशिकः, नैशः । प्रादोषिकः, प्रादोषः वासन्तः, वार्षिकः । केवलस्य कालविषयस्य जयस्याऽयोगात्[2] निशादिसहचरिताध्ययनादिवृत्तयो निशादयः शब्दाः प्रत्ययमुत्पादयन्ति । चकारः कालादित्यनुकर्षणार्थः, तेन चानुकृष्टत्वान्नोत्तरत्रानुवर्तते ।

३१. भवे ।

तत्रेत्यनुवर्तते । सप्तम्यन्तान्नाम्नो भवेऽर्थे यथाविहितमणादय इयादयश्च प्रत्यया भवन्ति । सत्ता भवत्यर्थो गृह्यते, न जन्म जात इत्यनेन गतार्थत्वात् । स्रुघ्ने भवः—स्रौघ्नः । माथुरः, औत्सः, राष्ट्रियः, पारावारीणः, ग्राम्यः, ग्रामीणः, नादेयः ।

३२. दिगादेर्यः ।

दिगादिभ्यः सप्तम्यन्तेभ्यो भवेऽर्थे यः प्रत्ययो भवति । दिशि भवः—दिश्यः । वर्ग्यः । अप्सु भवोऽप्सव्यः । **'अपो ययोनिमतिचरेषु'** [३/२/२८] इति सप्तम्यलुक् । दिगादिगणो यथा—दिश्, वर्ग, पूग, गण, यूथ, पक्ष, धाय्या, मित्र, धाय्यमित्र, मेधा, न्याय, अन्तर्, पथिन्, रहस्, अलीक, उख, उखा, साक्षिन्, आदि, अन्त, मुख, जघन, मेघ, वश, अनुवश, देश, काल, वेश, आकाश, अप् इति । **'शरीरावयवात्'** [७/१/३३] इति वक्ष्यमाणसूत्रेणैव यप्रत्यये सिद्धे मुखजघनवशानुवशानामिहोपादानमशरीरावयवार्थम् । सेनाया यन्मुखं तत्र भवो मुख्यः । सेनाया यज्जघनं तत्र भवो जघन्यः । वर्गोऽन्वयस्तत्र भवो वश्यः । एवमनुवंश्यः ।

३३. शरीरावयवात् ।

शरीरावयववाचिनः सप्तम्यन्तान्नाम्नो भवेऽर्थे यः प्रत्ययो भवति । दन्ते भवः—दन्त्यः । एवं कण्ठ्यः, ओष्ठ्यः, पाण्यः, पद्यः, तालव्यः, मुख्यः, जघन्यः, मूर्धन्यः । **'अनोऽट्ये ये'** [८/४/५२] इत्यनो लोपाभावः । तदन्तादपीच्छन्त्येके—कण्ठतालव्यः, दन्तोष्ठ्यः ।

३४. उदकात् संज्ञायाम् ।

उदकशब्दात् सप्तम्यन्ताद् भवेऽर्थे यः प्रत्ययो भवति सञ्ज्ञायां विषये । उदक्या रजस्वला । संज्ञायामिति किम् ? औदको मत्स्यः ।

---

१. उपलक्षणत्वात् शृगालोऽपि मृग एव ।

२. जयो हि क्रिया सा च केवलस्य न संभवतीत्यर्थः ।

३५. दृति-कुक्षि-कलशि-वस्त्यहेरेयण् ।

एभ्यः सप्तम्यन्तेभ्यो भवेऽर्थे एयण् प्रत्ययो भवति । अणादीनामपवादः । दृतौ चर्मखल्वाया भव—दार्तेयं जलम् । कुक्षौ शरीरावयवे भवः—कौक्षेयो व्याधिः । देशार्थादपि भवे परत्वादयमेव[1] न धूमाद्यकञ् । असावप्ययमेव[2] न कुलकुक्ष्याद्येयकञ् । असि कौक्षेयमुद्यम्य । कलश्या मन्थन्या भव—कालशेयं तक्रम् । वस्तौ मूत्राशये भवं—वास्तेयं मूत्रम् । अहौ भव—आहेयं विषम् ।

३६. आस्तेयम् ।

अस्तिशब्दात् तिबन्तप्रतिरूपकाद् अव्ययाद् धनविद्यमानपर्यायात् तत्र भवेऽर्थे एयण् प्रत्ययो निपात्यते । असृज्शब्दस्य वा अस्त्यादेशः । धने वा विद्यमाने वा असृजि वा भव—आस्तेयम् ।

३७. ग्रीवातोऽण् च ।

ग्रीवाशब्दात् तत्र भवेऽर्थे अण् चकारात् एयण् च प्रत्ययो भवतः । यापवादः । ग्रीवायां ग्रीवासु वा भव—ग्रैवं, ग्रैवेयम् । ग्रीवाशब्दो यदा शिरोधमनीवचनस्तदा तासां बहुत्वाद् बहुवचनम् ।

३८. चतुर्मासात् संज्ञायाम् ।

चतुर्मासशब्दात् तत्र भवेऽर्थेऽण् प्रत्ययो भवति संज्ञायां विषये । चतुर्मासेषु भवा—चातुर्मासी आषाढी कार्तिकी फाल्गुनी च पौर्णमासी भण्यते । अत्र विधानसामर्थ्यात् 'द्विगोरनपत्ये···' [६/२/२६] इत्यादिना प्रत्ययस्य लुग् न भवति । संज्ञायामिति किम् ? चतुर्मासेषु भवः—चतुर्मासः । अत्र 'वर्षाकालेभ्य इकण्' [६/४/८१] इति इकण्, तस्य लुक् ।

३९. यज्ञे ञ्यः ।

चतुर्मासशब्दात् तत्र भवे यज्ञेऽर्थे ञ्यः प्रत्ययो भवति । चतुर्मासेषु भवानि—चातुर्मास्यानि यज्ञकर्माणि ।

४०. गम्भीर-पञ्चजन-बहिर्देवात् ।

गम्भीर, पञ्चजन, बहिस्, देव—इत्येतेभ्यः तत्र भवेऽर्थे ञ्यः प्रत्ययो भवति । अणाद्यपवादः । गम्भीरे भवः—गाम्भीर्यः । पाञ्चजन्यः, बाह्यः, दैव्यः । भवादन्यत्र गाम्भीरः, पाञ्चजनः । द्विगौ त्वणो लुकि पञ्चजनः । बाहीकः, दैवः । भवेऽपि बाहीक इत्येके ।

४१. परिमुखादेरव्ययीभावात् ।

परिमुखादिभ्योऽव्ययीभावेभ्यः तत्र भवेऽर्थे ञ्यः प्रत्ययो भवति । अणोऽपवादः । परितः सर्वतो मुखं—परिमुखम् । अत एव वचनादव्ययीभावः । वर्जनार्थो वा परिः । मुखात् परि—परिमुखम् । 'पर्यपाङ्बहिरञ्चवः···' [३/२/२६] इत्यादिनाऽव्ययीभावः । परिमुखे भवः—पारिमुख्यः । पारिहनव्यः, पार्योष्ठ्यः । परिमुखादेरिति किम् ? औपकूलं, औपमूलं, औपशालं, औपकुम्भं, औपखलं, आनुकुम्भं, आनुकूलं, आनुखलम् । अव्ययीभावादिति किम् ? परिग्लानो मुखाय—परिमुखः । तत्र भवः—पारिमुखः । परिमुखादयो यथा—परिमुख, परिहनु, पर्योष्ठ, पर्युलूखल, परिरथ, परिसिर, परिसीर, उपसीर, अनुसीर, उपस्थूण, उपस्थूल, उपकलाप, उपकपाल, अनुपथ, अनुगङ्ग, अनुतिल, अनुसीत, अनुमाष, अनुयव, अनुयूप, अनुवंश, अनुपद इति । अनुवंशशब्दाद् दिगादित्वाद् योऽपि । अनुवंश्यः ।

---

१. भवादन्यत्र जातादावर्थे तस्य चरितार्थत्वात् ।

२. खड्गेऽपि इत्यर्थः ।]

४२. अनुपरिभ्यां ग्रामाविकण् ।

अनु, परि—इत्येताभ्यां परो यो ग्रामशब्द. तदन्तादव्ययीभावात् तत्र भवेऽर्थे इकण् प्रत्ययो भवति । अणोऽपवाद. । ग्रामस्य समीप—अनुग्रामम् । ग्रामात् परि परिग्रामम् । तत्र भव:—आनुग्रामिक:, पारिग्रामिक । अव्ययीभावादिति किम् ? परिगतो ग्राम परिग्रामस्तत्र भव.—पारिग्राम । आनुग्राम: ।

४३. अध्यात्मादिभ्यः ।

अध्यात्मादिभ्योऽव्ययीभावेभ्य. तत्र भवेऽर्थे इकण् प्रत्ययो भवति । आत्मानमधिकृत्य अध्यात्म, तत्र भव—आध्यात्मिकम् । एवं आधिदविक, आधिभौतिकम् । अनुशतिकादित्वाद् अनयोरुभयपदवृद्धि: । और्ध्वदमिक·, और्ध्वदेहिक:, और्ध्वदमिक., और्ध्वदेहिक । अत एव पाठात् ऊर्ध्वशब्दस्य दमदेहयो: परयोविकल्पेन मुमागम. । केचिद् अनुशतिकादौ मत्वा अनयोरप्युभयपदवृद्धिमिच्छन्ति । और्ध्वदामिक·, और्ध्वदैहिक । ऊर्ध्वमौहूर्तिक.—अत्र **'यावादिरचोर्ध्वमौहूर्तिके'** [८/४/७४] इति ज्ञापकात् उत्तरपदस्यैव वृद्धि: । अकस्मात् हेतुशून्य: कालस्तत्रभवं—आकस्मिकम् । अमुष्मिन् परलोके भव—आमुष्मिकम् । एव[1] आमुत्रिक, पारत्रिकम् । इह भवं—ऐहिकम् । शैपिकम् । पाठसामर्थ्यात् सप्तम्या अलुक् । अध्यात्मादय. प्रयोगगम्या. ।

४४. उपाज्जानु-कर्ण-नीविभ्यः प्रायेण ।

उपात् परे ये जान्वादय. शब्दास्तदन्तादव्ययीभावात् इकण् प्रत्ययो भवति प्रायेण तत्र भवे । यस्तत्र बाहुल्येन भवति अन्यत्र च कदाचिद् भवति तस्मिन्नित्यर्थ । जानुन: समीपं—उपजानु । तत्र प्रायेण भवति—औपजानुक: सेवक: । औपजानुक शाटकम् । औपकर्णिक. सूचक. । औपनीविक ग्रीवादाम । प्रायेणेति किम् ? नित्यं भवे मा भूत् । औपजानव मासम् । औपजानव गडु । जानुशब्द शरीरावयवो नोपजानुशब्द इति यो न भवति ।

४५. अन्तःपूर्वात् ।

अन्त शब्दपूर्वपदादव्ययीभावात् तत्र भवे इकण् प्रत्ययो भवति । अणोऽपवाद. । अगारस्यान्त:—अन्तरगारम् । तत्र भव—आन्तरगारिकम् । आन्तर्गेहिकं, आन्तर्वेश्मिक, आन्त:पुरिकम् । अव्ययीभावादिति किम् ? अन्तर्गतमगारस्य अन्त स्थ वागारं—अन्तरगारम् । तत्र भव—आन्तरगारम् । आन्त पुर, आन्त करणम् ।

४६. समानपूर्वलोकोत्तरपदात् ।

समानपूर्वपदेभ्यो लोकशब्दोत्तरपदेभ्यश्च तत्र भवेऽर्थे इकण् प्रत्ययो भवति । समानग्रामे भव:—सामानग्रामिक: । सामानदेशिक: । इहलोके भव:—ऐहलौकिक.[2] । पारलौकिक:, सार्वलौकिक. ।

४७. समानात् ।

समानशब्दात् तत्र भवेऽर्थे इकण् प्रत्ययो भवति । समाने भव.—सामानिक. ।

४८. मध्यादिनण्णेया मुम् चाऽस्य ।

मध्यशब्दात् तत्र भवेऽर्थे दिनण्, ण, ईय—इत्येते प्रत्यया भवन्ति तत्सनियोगे अस्य मध्यशब्दस्य च मुमागमो भवति । मध्ये भवा—माध्यंदिना उद्गायन्ति । माध्यम:, मध्यमीय । अन्ये तु दिनं णित नेच्छन्ति । मध्यंदिन: ।

---

१. एवंशब्द: परलोकलक्षणं सादृश्यमवगमयति द्वयो: ।

२. अनुशतिकादित्वादुभयपदवृद्धि: ।

४९. ईयो मत्वर्थजिह्वामूलाङ्गुलिभ्यश्च ।

मत्वर्थ, जिह्वामूल, अङ्गुलि—इत्येतेभ्यश्चकारात् मध्यशब्दाच्च तत्र भवेऽर्थे ईय प्रत्ययो भवति। मत्वर्थे भव.—मत्वर्थीयः । जिह्वामूलीय , अङ्गुलीय., मध्यीय. । चकारेण मध्यशब्दानुकर्षण मुमागमाभावार्थम् ।

५० वर्गान्तात् ।

वर्गशब्दान्तात् तत्र भवेऽर्थे ईय. प्रत्ययो भवति । अणोऽपवाद. । कवर्गीयः, पवर्गीय ।

५१. ईनयौ चाऽशब्दे ।

वर्गशब्दान्तात् तत्र भवेऽर्थे ईन, य—इत्येतौ चकारात् ईयश्च प्रत्यया भवन्ति न चेत्स भवार्थ शब्दो भवति । भरतवर्गीण , भरतवर्ग्य , भरतवर्गीय । बाहुबलिवर्गीण , बाहुबलिवर्ग्य , बाहुबलिवर्गीय । युष्मद्वर्गीण , युष्मद्वर्ग्य , युष्मद्वर्गीयः । अस्मद्वर्गीण , अस्मद्वर्ग्य , अस्मद्वर्गीय. । अशब्द इति किम् ? कवर्गीय. ।

५२. रूढावन्तःपुरादिकः ।

अन्तःपुरशब्दात् तत्र भवेऽर्थे इक प्रत्ययो भवति रूढौ—स चेदन्त पुरशब्द क्वचिद् रूढो भवति । क्व चाय रूढ ? एकपुरुषपरिग्रहे स्त्रीसमुदाये । उपचारात्तन्निवासेऽपि । अन्त पुरे भवा—अन्तःपुरिका स्त्री । रूढाविति किम् ? पुरस्यान्तर्गत[1]—अन्त.पुरम् । यथाऽन्तरङ्गुलो नख इति । तत्र भव – आन्त पुर । पुरस्यान्तरन्त पुरमिति अव्ययीभावात् तु इकण् भवति । आन्त पुरिक इति ।

५३. कर्ण-ललाटात् कल् ।

रूढावित्यनुवर्तते । सेह रूढिः प्रकृतिप्रत्ययसमुदायस्य विशेषणम् । कर्णललाटशब्दाभ्या तत्र भवेऽर्थे कल् प्रत्ययो भवति रूढौ प्रकृतिप्रत्ययसमुदायश्चेत् क्वचिद् रूढो भवति। कर्णिका कर्णाभरणविशेष पद्माद्यवयवश्च । ललाटिका ललाटमण्डनम् । रूढाविति किम् ? कर्णे भव—कर्ण्यम् । ललाट्यम् । लकार स्त्रीत्वार्थ ।

५४. तस्य व्याख्याने च ग्रन्थात् ।

ग्रन्थ शब्दसदर्भ । स व्याख्यायते अवयवश. कथ्यते येन तद् व्याख्यानम् । तस्येति षष्ठ्यन्ताद् व्याख्यानेऽर्थे तत्रेति सप्तम्यन्ताद् भवेऽर्थे ग्रन्थवाचिनो यथाविहित प्रत्ययो भवति । चकारस्तत्र भवे इत्यस्यानुकर्षणार्थ । वाक्यार्थसमीपे चकार श्रूयमाण पूर्ववाक्यार्थमेव समुच्चिनोति। कृता व्याख्यान कृत्सु भव वा कार्तम्। तेङ, प्रातिपदिकीयम् । ननु च तस्य व्याख्यानेऽर्थे **'तस्येदं'** [७/१/११२] इत्यनेनैव प्रत्ययविधि सिद्धः चकारानुकृष्टेऽपि तत्र भवेऽर्थे पूर्वमेव प्रत्ययविधिरुक्तस्तत् किमनयोर्युगपदुपादानम् ? उच्यते—वक्ष्यमाण सकलोऽप्यपवादविधि. अनयोरर्थयोर्यथा स्यात् इत्येवमर्थम् । उत्तरेणैकयोगत्वे चानुकृष्टत्वात् तत्र भव इत्यस्य तत पर नानुवृत्ति स्यात् । योगविभागे तु इहानुवृत्तिरनर्थिकेति द्वयोरुत्तरत्रानुवृत्तिर्भवति । उदाहरणोपन्यासस्तु अनुवादमात्रम्[2]। ग्रन्थादिति किम् ? पाटलिपुत्रस्य व्याख्यानी[3] सुकोसला । पाटलिपुत्रमेव सन्निवेशमिति सुकोसलया प्रतिच्छन्दकभूतया व्याख्यायते न तु पाटलिपुत्र ग्रन्थ इत्युत्तरेणाऽपवादिक इकण्[4] न भवति ।

---

१. पुरस्य शरीरस्य अन्तर्गत गृहस्य वान्तर्गतम् ।

२. ननु कथमनर्थकत्व भवानुवर्तनस्य ? यदि हि भव इति नानुवर्त्तेत तदा प्रातिपदिकीयमित्यत्रापवादभूत इकण् प्राप्नोति । नैवम् । तत्र प्रायोग्रहणादेव न भविष्यति । तर्हि किमर्थं तदुदाहरण दर्श्यते इत्याह ।

३. व्याख्यायते अनया वाच्यलिङ्गः ।

४. किंतु **'रोपधात्'** [६/४/४२] इत्यकञ् ।

५५. प्रायो बहुस्वरादिकण् ।

पूर्वमनुवर्तते । बहुस्वराद् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थे प्राय इकण् प्रत्ययो भवति । अणादेरपवादः । षत्वणत्वयोर्व्याख्यान तत्र भवं वा षात्वणत्विकम् । एवं नातानतिकम् । उदात्तानुदात्तयो स्वरयोरेते नतानतसञ्ज्ञे । आत्मनेपदपरस्मैपदिक, आव्ययीभावतत्पुरुषिकं, नामाख्यातिकं, आख्यातिक, ब्राह्मणिकं, प्राथमिकं, आध्वरिक, पौरश्चरणिकम् । प्रायोवचनात् क्वचिन्न भवति—सांहितं, प्रातिपदिकीयम् ।

५६. ऋगृद्द्विस्वरसर्वयागेभ्यः ।

ऋच् इत्येतस्मात् ऋकारान्तात् द्विस्वरात् सर्वयागवाचिशब्देभ्यश्च ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चार्थे इकण् प्रत्ययो भवति । अणादेरपवाद । ऋचां व्याख्यानमृक्षु भवं वा आर्चिकम् । ऋकारान्त—चतुर्षु होतृषु भव इत्यणो लुकि चतुर्होता ग्रन्थः । तस्य व्याख्यानं तत्र भवं वा—चातुर्होतृकम् । एव पाञ्चहोतृकम् । द्विस्वर—आह्निकं, पौर्विकं सौत्रिक, तार्किक, नामिकम् । याग—आग्निष्टोमिक, राजसूयिकं, वाजपेयिक, पाकयज्ञिकं, नावयज्ञिक, पाञ्चौदनिकं, दाशौदनिकम् । ऋग्यागग्रहण[1] पूर्वस्यैव[2] प्रपञ्चः । यागेनैव सिद्धे सर्वयागवचन ससोमकानां अग्निष्टोमादीनां असोमकाना पञ्चौदनादीनां च परिग्रहार्थम् । अन्यथा गौणमुख्ययोरिति न्यायेन मुख्यानामेव ग्रहणं स्यात् ।

५७. ऋषेरध्याये ।

ऋषिशब्देभ्यो ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चाऽध्याये इकण् प्रत्ययो भवति । वसिष्ठस्य ग्रन्थस्य[3] व्याख्यानस्तत्र भवो वा वासिष्ठिकोऽध्याय । वैश्वामित्रिकोऽध्याय । अध्याय इति किम् ? वसिष्ठस्य व्याख्यानी तत्र भवा वा वासिष्ठी ऋक् । '**प्रायो बहुस्वराद्**···' [७/१/५५] इति प्रायोग्रहणादप्राप्तिकल्पनायां विध्यर्थं, प्राप्तिकल्पनायां[4] अध्याये एवेति नियमार्थ वचनम् ।

५८. पौरोडाश-पुरोडाशादिकेकटौ ।

पौरोडाश, पुरोडाश—इत्येताभ्या ग्रन्थवाचिभ्यां तस्य व्याख्याने तत्र भवे चार्थे इक, इकट् इत्येतौ प्रत्ययौ भवतः । ईयाणोरिकणश्चाऽपवाद[5] । वचनभेदाद् यथासख्याऽभाव । इकेकटो. स्त्रियां विशेष. । पुरोडाशा. पिष्टपिण्डाः । तेषामय तत्र भवो वा पौरोडाश., तत्सस्कारको मन्त्रस्तस्य व्याख्यान तत्र भवो वा पौरोडाशिक. । पौरोडाशिका, पौरोडाशिकी । पुरोडाशसहचरितो मन्त्र पुरोडाशस्तस्य व्याख्यानस्तत्र भवो वा पुरोडाशिकः । पुरोडाशिका, पुरोडाशिकी ।

५९. छन्दसो यः ।

छन्द.शब्दाद् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे च यः प्रत्ययो भवति । द्विस्वरेकणोऽपवाद. । छन्दसो व्याख्यानस्तत्र भवो वा छन्दस्यः ।

---

१. ऋदन्तानां यागवाचिना च द्विस्वराणा द्विस्वरेत्यशेन बहुस्वराणा तु '**प्रायो बहुस्वराद्** ··' [७/१/५५] इति सिध्यति एकस्वरास्तु न संभवन्त्येव तत् किमर्थमिदमित्याह ।

२. '**प्रायो बहुस्वराद्**····' [७/१/५५] इत्यस्येत्यर्थः ।

३. वसिष्ठादिसाहचर्यात् ग्रन्थोपि तथोच्यते ।

४. प्रायोग्रहस्य यादृच्छिकत्वात् ।

५. पौरोडाशात् '**वृद्धाच्छः**' [६/४/३२] इतीयस्य, पुरोडाशात् '**भवे**' [७/१/३१] इत्यणः, द्वाभ्यामपि च प्राप्तस्य प्रायो बहुस्वरादिकणोऽपवादोयम् ।

६०. शिक्षादेश्चाऽण् ।

शिक्षादिभ्यश्चकाराच्छन्दःशब्दाच्च ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चार्थे अण् प्रत्ययो भवति । इकणोऽपवादः । शिक्षाया व्याख्यानस्तत्र भवो वा शैक्षः । आर्गयनः । छन्दस्—छान्दसः । एवं छन्दस्शब्दस्य द्वैरूप्यं भवति । अण्ग्रहणमीयबाधनार्थम्[1] । नैयायः, वास्तुविद्यः । शिक्षादयो यथा—शिक्षा, ऋगयन, पद, व्याख्यान, पदव्याख्यान, छन्दोव्याख्यान, छन्दोमान, छन्दोभाष, छन्दोविचिति, छन्दोविचिती, छन्दोविजिति, न्याय, पुनरुक्त, निरुक्त, व्याकरण, निगम, वास्तुविद्या, अङ्गविद्या, क्षत्रविद्या, त्रिविद्या, विद्या, उत्पात, उत्पाद, संवत्सर, मुहूर्त, निमित्त, उपनिषद्, ऋषि, यज्ञ, चर्चा, क्रमेतर, श्लक्ष्ण इति । बहुस्वराणामवृद्धसंज्ञकानामुपादानं प्रायोग्रहणस्य प्रपञ्चः[2] ।

६१. तत आगते ।

तत इति पञ्चम्यन्तादागतेऽर्थे यथाविहितं अणादय इयादयश्च प्रत्यया भवन्ति । स्रुघ्नादागतः—स्रौघ्नः । माथुरः, दैत्यः, बाह्यः, औत्सः, आग्नेयः, कालेयः, स्त्रैणः, पौंस्नः, गव्यः, राष्ट्रियः, ग्रामीणः, ग्राम्यः, नादेयः । मुख्यापादानपरिग्रहात् स्रुघ्नादागच्छन् वृक्षमूलादागतः इत्यत्र वृक्षमूलादान्तरीयकापादानान्न भवति ।

६२. विद्यायोनिसंबन्धिनोऽकञ् ।

विद्याकृतो योनिकृतश्च संबन्धो येषां तद्वाचिभ्यः पञ्चम्यन्तेभ्य आगतेऽर्थे अकञ् प्रत्ययो भवति । अणोऽपवादः । ईयं तु परत्वाद् बाधते । विद्यासबन्धः—आचार्यादागतमाचार्यकम् । औपाध्यायकं, शैष्यकं, आर्त्विजकं, आन्तेवासकम् । योनिसबन्धः—पैतामहकं, मातामहकं, पैतृव्यकं, मातुलकम् ।

६३. ऋत इकण् ।

ऋकारान्ताद् विद्यायोनिसंबन्धवाचिनः पञ्चम्यन्तादागतेऽर्थे इकण् प्रत्ययो भवति । अकञोऽपवादः । होतुरागतं—हौतृकम् । पौतृकं, प्राशास्तृकं, प्रातिहर्तृकं, शास्तृकम् । योनिसंबन्धः—मातृकं, भ्रातृकं, स्वामृकं, दौहितृकं, जामातृकं, नानान्दृकम् । मातुरागता—मातृकी विद्या । इकणन्तत्वादीप् ।

६४. आयस्थानात् ।

स्वामिग्राह्यो भाग आयः, स यस्मिन्नुत्पद्यते तदायस्थानम् । तद्वाचिनः पञ्चम्यन्तादागतेऽर्थे इकण् प्रत्ययो भवति । अणोऽपवादः । एत्य तरन्त्यस्मिन्नित्यातरो नदीतीर्थम् । तत आगतं—आतरिकम् । शौल्कशालिकं, आपणिकं, दौवारिकम् । आयस्थानत्वेनाऽप्रसिद्धादपि तादृरूप्येण विवक्षिताद् भवतीति कश्चित् । स्रौघ्निकः ।

६५. पितुर्यो वा ।

पितृशब्दाद् योनिसंबन्धवाचिनः पञ्चम्यन्तादागतेऽर्थे यः प्रत्ययो वा भवति । इकणोऽपवादः । पितुरागतं—पित्र्यम् । **'ऋतो रस्तद्धिते ये'** [१/२/३३] इति रत्वम् । पक्षे पैतृकम् ।

६६. शुण्डिकादेरण् ।

शुण्डिकादिभ्यः पञ्चम्यन्तेभ्य आगतेऽर्थे अण् प्रत्ययो भवति । इकणादेरपवादः । शुण्डः शुण्डा वा सुरा, ततो मत्वर्थीये शुण्डिकः शुण्डिका वा सुरापणः सुराविक्रयी चोच्यते । तत आगतं—शौण्डिकम् । औदपानं, कार्कणम् । सामान्ये

---

१. ननु किमर्थमत्राण्ग्रहणम् ? योऽन्येन बाधितो न प्राप्नोतीति न्यायात् अणेव भविष्यतीत्याशङ्का ।

२. ननु वृद्धसंज्ञकानामीयबाधनार्थं क्रियतां पाठः । ये तु बहुस्वरा अवृद्धसंज्ञकास्तेषामुपादानं कथं कृतम् ? यतः **'प्रायो बहुस्वरात्'** [७/१/५५] इति सूत्रे प्रायोग्रहणादेषां न भविष्यतीकण्, किंतु अणेवेत्याशङ्का ।

एव अणि सिद्धे पुनरण्विधानं बाधकबाधनार्थम्, तेन शुण्डिकाया आयस्थानत्वादिकण्, तीर्थात् धूमादित्वादकञ्, कृकणपर्णाभ्यामीयण्च न भवति। यदा तु शुण्डिकादीनि सर्वाण्यायस्थानान्येव तदेकण्बाधनार्थं वचनम् । उदपानात् उत्सादित्वादणपवादे इकणि अञ्विधीयमानत्वात् अञणोर्न कोऽपि विशेषः । शुण्डिकादयो यथा—शुण्डिका, उदपान, पर्ण, कृकण, उलप, तृण, तीर्थ, स्थण्डिल, उपल, उदक, भूमि, पिप्पल इति ।

६७. हेतुमनुष्येभ्यो रूप्यमयटौ वा।

हेतुवाचिभ्यो मनुष्यवाचिभ्यश्च पञ्चम्यन्तेभ्य आगतेऽर्थे रूप्य, मयट्—इत्येतौ प्रत्ययौ वा भवतः । ताभ्यां मुक्ते यथाप्राप्तम् । वचनभेदाद्यथासंख्याऽभावः । हेतुः कारणम् । मनुष्यग्रहणमहेत्वर्थम् । हेतु—समादागतं[1]—समरूप्यं, सममयम् । विषमरूप्यं, विषममयम् । पक्षे गहादिपाठात् ईयः । समीयं, विषमीयम् । पापरूप्यं, पापमयम् । पक्षे **'वृद्धादीयः'** [६/४/३२]। पापीयम् । अत्र हेतौ पञ्चमी[2]। मनुष्य—देवदत्तादागतं—देवदत्तरूप्यं, देवदत्तमयं, दैवदत्तम् । अत्राऽपादाने पञ्चमी । टकार ईबर्थः । सममयी, जिनदत्तमयी । बहुवचनं स्वरूपव्युदासार्थम् ।

६८. गोत्रादिवंवत् ।

गोत्रवाचिन शब्दात् पञ्चम्यन्तादागतेऽर्थे इदमर्थवत्प्रत्ययविधिर्भवति। यथा भवति बिदानामयं बैदः, गार्गः, दाक्षः इति **'संघाङ्कघोष'''** [७/१/१२६] इत्यादिनाऽण् तथेहापि बिदेभ्य आगत बैदं, गार्गं, दाक्षम् । यथा भवति औपगवानामयमौपगवक, कापटवकः, नाडायनकः, गार्ग्यायणकः इति **'गोत्राददण्ड'''**] ७/१/१२६] इत्यादिनाऽकञ् तथेहापि औपगवेभ्य आगतः औपगवकः, कापटवकः, नाडायनकः, गार्ग्यायणकः । एवं **'रैवतिकादेरीयः'** [७/१/१२७]। रैवतिकेभ्य आगतं—रैवतिकीयम् । गौरग्रीवीयम् । **'कौपिञ्जलहास्तिपदादण्'** [७/१/१२८] । कौपिञ्जलादागतं—कौपिञ्जलम् । हास्तिपदम् ।

६९. प्रभवति।

तत इत्यनुवर्तते। तत इति पञ्चम्यन्तात् प्रभवति—प्रथम प्रकाशमानेऽर्थे यथाविहितं प्रत्यया भवन्ति । प्रथमं उपलभ्यमानता प्रभवः। अन्ये प्रभवति—जायमाने इत्याहुः । **'तत्र जाते'** [७/१/१] इति भूते सप्तम्यन्तात् प्रत्ययः, अयं तु पञ्चम्यन्ताद् वर्तमाने इति विशेषः। हिमवतः प्रभवति—हैमवती गङ्गा। दारदी सिन्धुः। काश्मीरी वितस्ता । कश्मीरशब्दात् **'बहुविषयेभ्यः'** [६/४/६५] इति अकञोऽपवादः कच्छाद्यण् ।

७०. वैडूर्यः।

विडूरशब्दात् पञ्चम्यन्तात् प्रभवत्यर्थे ञ्यः प्रत्ययो निपात्यते। विडूरात् प्रभवति—वैडूर्यो मणिः । विडूरग्रामे हि अयं संस्क्रियमाणो मणितया ततः प्रथमं प्रभवति । वालवायात् तु पर्वतात् असौ प्रभवन्न मणिः, किंतु पाषाणः।

७१. त्यदादेर्मयट् ।

त्यदादिभ्यः पञ्चम्यन्तेभ्यः प्रभवत्यर्थे मयट् प्रत्ययो भवति । तन्मयं, तन्मयी । भवन्मयं, भवन्मयी ।

७२. तं गच्छति पथिदूतयोः ।

तमिति द्वितीयान्ताद् गच्छत्यर्थे यथाविहितं प्रत्ययो भवति योऽसौ गच्छति स चेत् पन्था दूतो वा भवति। स्रुघ्नं गच्छति—स्रौघ्नः पन्था दूतो वा। माथुरः, राष्ट्रियः, नादेयः। पथिस्थेषु गच्छत्सु तद्धेतुः पन्था अपि गच्छतीत्युच्यते । स्रुघ्नादिप्राप्तिर्वा पथो गमनम् । पथिदूतयोरिति किम् ? स्रुघ्नं गच्छति साधुः । पाटलिपुत्रं गच्छति नौः पण्यं वणिग्वा ।

---

१. यदा समत्वमृणं तदा **'ऋणाद्धेतोः'** [२/४/८२] इति पञ्चमी । अथ गुणवाचकस्तदा **'गुणादस्त्रियां वा'** [२/४/८३] इत्यनेन ।

२. **'हेत्वर्थेस्तृतीयाद्याः'** [२/४/१२७] इति ।

७३. अभिनिष्कामति द्वारे ।

द्वितीयान्तादऽभिनिष्क्रामति अभिनिर्गच्छत्यर्थे यथाविहितं प्रत्ययो भवति तच्चेदऽभिनिष्क्रामद् द्वारं भवति । स्रुघ्नमभिनिष्क्रामति—स्रौघ्नं कान्यकुब्जद्वारम् । माथुरं, राष्ट्रियं, नादेयं द्वारम् । साधनभूतस्यापि द्वारस्याऽभिनिष्क्रमण-क्रियायां स्वातन्त्र्यविवक्षा । यथा साध्वसिश्छिनत्तीति । द्वार इति किम् ? स्रुघ्नमभिनिष्क्रामति चैत्रः ।

७४. अधिकृत्य कृते ग्रन्थे ।

द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽर्थे यथाविहित प्रत्ययो भवति । अधिकृत्य प्रस्तुत्य उद्दिश्येत्यर्थः । तदपेक्षा द्वितीया । सुभद्रामधिकृत्य कृतो ग्रन्थः—सौभद्रः । भद्रा भाद्रः, सुतारां सौतारः । भीमरथामधिकृत्य कृताख्यायिका—भैमरथी । ग्रन्थ इति किम् ? सुभद्रामधिकृत्य कृतः प्रासादः । कथं वासवदत्तामधिकृत्य कृताख्यायिका वासवदत्ता, उर्वशी, सुमनोहरा, बलिबन्धनं, सीताहरणमिति ? उपचाराद्[1] ग्रन्थे तच्छब्द्य[2] भविष्यति ।

७५. शिशुक्रन्दादिभ्य ईयः ।

शिशुक्रन्दादिभ्यो द्वितीयान्तेभ्योऽधिकृत्य कृते ग्रन्थेऽर्थे ईयः प्रत्ययो भवति । शिशुक्रन्दमधिकृत्य कृतो ग्रन्थः—शिशुक्रन्दीयः । यमसभीयः, इन्द्रजननीयः, प्रद्युम्नप्रत्यागमनीयः, प्रद्युम्नोदयनीयः, सीताहरणीयः, सीतान्वेषणीयः । शिशु-क्रन्दादयः प्रयोगतोऽनुसर्तव्याः । शिशुक्रन्दशब्दात् केचिन्नेच्छन्ति । शैशुक्रन्दम् ।

७६. द्वंद्वादऽदेवासुरादिभ्यः ।

द्वंद्वसमासाद् द्वितीयान्ताद् देवासुरादिवर्जिताद् अधिकृत्य कृते ग्रन्थेऽर्थे ईय प्रत्ययो भवति । अणोऽपवादः । किरातार्जुनीयः, श्येनकपोतीयः, वाक्यपदीयः, द्रव्यपर्यायीयः, शब्दार्थसबन्धीयः । अदेवासुरादिभ्य इति किम् ? दैवासुरं, राक्षसुरं, गौणमुख्यम् । देवासुरादयः प्रयोगगम्याः ।

७७. ज्योतिषम् ।

ज्योतिःशब्दाद् द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽर्थेऽण् प्रत्ययो वृद्ध्यभावश्च निपात्यते । ज्योतींष्यधिकृत्य कृतो ग्रन्थः—ज्योतिषम् ।

७८. सोऽस्य निवासः ।

स इति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहित प्रत्ययो भवति यत्तत् प्रथमान्तं निवासश्चेत् भवति । निवसन्ति अस्मिन्निति निवासो देश उच्यते । स्रुघ्नो निवासोऽस्य स्रौघ्नः । माथुरः, राष्ट्रियः, नादेयः ।

७९. आभिजनः ।

पूर्वमनुवर्तते । प्रथमान्तात् षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत् प्रथमान्तं चेदाभिजननिवासो भवति । अभिजनाः पूर्वबान्धवाः । तेषामयम्—आभिजनः । स्रुघ्नोऽस्य आभिजनो निवासः स्रौघ्नः । माथुरः, राष्ट्रियः, नादेयः ।

८०. गिरिभ्य ईयः शस्त्रजीविषु ।

गिरिवाचिभ्यः सोऽस्याभिजन इत्यर्थे शस्त्रजीविषु अभिधेयेषु ईयः प्रत्ययो भवति । हृद्गोलः पर्वत आभिजनो येषां ते हृद्गोलीया शस्त्रजीविनः । एवं भोजकटीयाः, रोहितगिरीयाः, अन्धश्मीयाः । गिरिभ्य इति किम् ? सांकाश्यकाः

---

१. अन्यैः प्रत्ययमुत्पाद्य लुगुक्तः, तस्त्वमते कथमित्याह ।

२. स चासौ शब्दश्च तस्य भावः । अयमर्थः । स एव वासवदत्तादिशब्दो ग्रन्थे वर्त्तते ।

शस्त्रजीविनः। 'प्रस्थवहपुरान्त···' [६/४/४३] इत्यादिनाऽकञ्। शस्त्रजीविष्विति किम्? ऋक्षोदः पर्वत आभिजनो येषा ते आर्क्षोदा द्विजाः। पृथुः पर्वत आभिजनो येषा ते पार्थवाः।

८१. शण्डिकादेर्ण्यः।

शण्डिकादिभ्यः शब्देभ्यः सोऽस्याभिजन इत्यर्थे ण्यः प्रत्ययो भवति। अणाद्यपवादः। शण्डिक आभिजनोऽस्य शाण्डिक्यः। कौचवार्यः। शण्डिकादयो यथा—शण्डिक, कूचवार, सर्वसेन, सर्वकेश, शङ्क, शक, शट, रक, चरण, शंकर, बोध इति।

८२. सिन्ध्वादेरञ्।

सिन्ध्वादिभ्यः शब्देभ्य सोऽस्य आभिजन इत्यर्थे अञ् प्रत्ययो भवति। सिन्धुराभिजनोऽस्य सैन्धवः। वार्णवः। सिन्ध्वादिगणो यथा—सिन्धु, वर्ण, मधुमत्, कम्बोज, कुलूज, गन्धार, कश्मीर, सल्व, किष्किन्ध, गब्दिक, उरस्, दरद्, ग्रामणी, काण्डवरक इति। सल्वान्तेभ्यो 'मनुष्यतत्स्थयोः···' [६/४/५६] इत्यकञोऽपवादोऽञ्, शेषेभ्यो 'बहुविषयेभ्यः' [६/४/४५] इत्यकञो, ग्रामणीकाण्डवरकाभ्यामीयस्य। तक्षशिलादिभ्यस्तु अञ् नोच्यते, उत्सर्गेणैव सिद्धत्वात्।

८३. तूदीवर्मतीभ्यामेयण्।

तूदीवर्मतीभ्यां सोऽस्य आभिजन इत्यर्थे एयण् प्रत्ययो भवति। तूदी आभिजनोऽस्य तौदेयः। वार्मतेयः।

८४. सलातुरादीयण्।

सलातुरशब्दात् सोऽस्याभिजन इत्यर्थे ईयण् प्रत्ययो भवति। सलातुर आभिजनोऽस्य सालातुरीयः पाणिनिः।

८५. भक्तिः।

सोऽस्येत्यनुवर्तते। भज्यते सेव्यते इति भक्तिः। सति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहित प्रत्ययो भवति यत्तत् प्रथमान्त भक्तिश्चेद् भवति। स्रुघ्नो भक्तिरस्य स स्रौघ्नः। माथुरः, राष्ट्रियः नादेयः।

८६. अचित्तादऽदेशकालाट्टिकण्।

देशकालवर्जित यदचित्तमचेतन तद्वाचिनः सोऽस्य भक्तिरित्यर्थे इकण् प्रत्ययो भवति। अणाद्यपवादः। अपूपा भक्तिरस्य आपूपिकः। शाष्कुलिकः, मौदकिकः, पायसिकः। अचित्तादिति किम्? दैवदत्तः। अदेशकालादिति किम्? स्रौघ्नः, हैमनः।

८७. महाराजात्।

महाराजशब्दात् सोऽस्य भक्तिरित्यर्थे इकण् प्रत्ययो भवति। महाराजो भक्तिरस्य स माहाराजिकः।

८८. वासुदेवार्जुनाभ्यामकः।

आभ्यां सोऽस्य भक्तिरित्यर्थे अकः प्रत्ययो भवति। ईयाऽकञोरपवादः। वासुदेवो भक्तिरस्य वासुदेवकः। यदा वासुदेवशब्दः संज्ञाशब्दोऽक्षत्रियवचनस्तदा उत्तरेणाऽकञ् न प्राप्नोति, किंतु 'वृद्धादीयः' [६/४/३२] इतीयः स्यात् इति तद्ग्रहणम्। अर्जुनकः। अर्जुनशब्दः क्षत्रियवाचीत्युत्तरेणाऽकञ् स्यादिति केनैव सिद्धेऽकविधानं वासुदेवो भक्तिरस्येति वासुदेवकः[1], अर्जुनो भक्ति अस्य इति अर्जुनकः इत्येवमर्थम्।

---

१. कप्रत्यये 'ङ्यापोबहुलं नाम्नि के' [२/४/१०६] इति ह्रस्वत्वं स्यात्। अकप्रत्यये तु 'जितद्धितयस्वरे जातेश्च' [३/२/५३] इति पदं भवति।

८९. गोत्रक्षत्रियेभ्योऽकञ् बहुलम् ।

गोत्रवाचिभ्यः क्षत्रियवाचिभ्यश्च सोऽस्य भक्तिरित्यर्थेऽकञ् प्रत्ययो बहुलं भवति । अणाद्यपवाद. । ग्लुचुकायनि-भक्तिरस्य ग्लौचुकायनकः । औपगवकः, दाक्षक., गार्गक., गार्ग्यायणक. । क्षत्रिय—नाकुलक , साहदेवक , दौर्योधनक., दौःशासनक. । बहुवचनं क्षत्रियविशेषपरिग्रहार्थम् । बहुलमिति किम् ? पणिनोऽपत्य पाणिन., सोऽस्य भक्ति पाणिनीयः । पौरवीयः ।

९०. जनपदवत्सर्वं सप्रत्ययरूढस्य ।

'रूढावम्' [६/२/१२३] इत्यादिविहितप्रत्ययसहिताना रूढाना सोऽस्य भक्तिरित्यर्थे सर्वं प्रत्ययः प्रकृतिश्च जनपदवद् भवति । जनपदवाचिनी या प्रकृतिर्वृजि इत्यादिस्ततश्च य. प्रत्ययो **'वृजिमद्राद्देशात् कः'** [६/४/३८] इत्यादिना विहित. तदुभयं वार्ज्य[1] इत्येवमादेः रूढस्य प्रत्ययान्तस्य भक्तिरिति विषये भवतीत्यर्थः । वार्ज्य , वार्ज्यौ, वृजयो वा भक्तिरस्येति वृजिकः । माद्रः[2], माद्रौ, मद्रा वा भक्तिरस्येति मद्रक । अत्र कः प्रत्यय । पाण्डय., पाण्डयौ, पाण्डवो वा भक्तिरस्येति पाण्डवक । आङ्गक., वाङ्गकः, पाञ्चालकः, वैदेहकः, औदुम्बरक , तैलखलक । अत्र **'बहुविषयेभ्यः'** [६/४/४५] इत्यकञ् । कौरवक , कौरव. । यौगन्धरक., यौगन्धरः । अत्र **'कुरुयुगन्धराभ्यां'** [६/४/४३] इति वाऽकञ् । ऐक्ष्वाक । अत्र **'कोपधादण्'** [६/४/४४] इत्यण् । सप्रत्ययरूढस्येति किम् ? पौरवीयम् । अत्र पुरु राजा अनुखण्डो जनपद इति रूढत्व नास्ति । पञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चाल. । अत्र **'बहुविषयेभ्यः'** [६/४/४५] इत्यकञ् न भवति । सर्वग्रहण प्रकृत्यतिदेशार्थम्, तेन वृजिक , मद्रकः, पाण्डवक. इति सिद्धम् । अन्यथा पाण्डयक. इत्यादौ यकारश्रुति.[3] स्यात् । तच्च वार्ज्यमाद्रपाण्डयकौरव्याः प्रयोजयन्ति । अन्यत्र हि नास्ति[4] विशेष. ।

९१. तेन प्रोक्ते ।

तेनेति तृतीयान्तान्नाम्न प्रोक्त इत्यर्थे यथाविहित प्रत्यया भवन्ति । प्रकर्षेण व्याख्यातमध्यापित वा प्रोक्त न तु कृत । तत्र कृते इत्येव गतत्वात् । भद्रबाहुना प्रोक्तानि—भाद्रबाहवानि उत्तराध्ययनानि । गणधरप्रत्येकबुद्धादिभि कृतानि, तेन व्याख्यातानीत्यर्थः । याज्ञवल्क्येन याज्ञवल्क्यानि ब्राह्मणानि । पाणिनिना पाणिनीयम् । आपिशलिना आपिशलम्[5] । काशकृत्स्निना काशकृत्स्नम् । उशनसा औशनसम् । बृहस्पतिना वार्हस्पत्यम् ।

९२. वेद वेत्त्यऽधीते ।

पूर्वमनुवर्तते । तेनेति तृतीयान्तात् प्रोक्त वेदं वेत्त्यधीते वेत्यर्थयोर्यथाविहित प्रत्यया भवन्ति । मैत्रावरुणेन प्रोक्तं वेदं वेत्ति अधीते वा—मैत्रावरुणीय । चारायणीयः । ननु **'तेन प्रोक्ते'** [७/१/९१] इति प्रत्यये तस्य च **'प्रोक्तात्'** [६/३/९८] इति लुकि **'तद्वेत्त्यधीते'** [६/३/८५] इति मैत्रावरुणेन प्रोक्तं वेदं वेत्त्यधीते वेत्यर्थसिद्धि. स्यात्, किमनेन ? उच्यते— स्वातन्त्र्यस्य उपाध्यन्तरयोगस्य वाक्यस्य च निवृत्त्यर्थं वचनम् । तेन मैत्रावरुणेन प्रोक्त वेत्त्यधीते वेत्यर्थरहित स्वातन्त्र्यं नोपयुज्यते । मैत्रावरुणेन प्रोक्त शोभनं वेदं वेत्त्यधीते वेति विशेषणरूपः उपाध्यन्तरयोगो न भवति । मैत्रावरुण वेद वेत्त्यधीते वेति वाक्य च न भवति ।

---

१. **'इरकोसलाजाव···'** [६/२/१२७] इत्यादिना ञ्यः ।

२ **'द्विस्वरमगध···'** [६/२/१२५] इत्यादिना अण् ।

३ न वाच्य **'तद्धितेनातिपरस्वरे'** [८/४/७८] इति यलोपप्राप्ति अनापत्यत्वात् यकारस्य ।

४ आङ्गक इत्यादि लिखितापेक्षया एतदुक्त, यावता आवन्तक इत्यादावस्त्येव विशेष । अनापत्यत्वादावन्त्य इति स्थिते यलोपाप्रसङ्गात् ।

५. **'शकलादेर्यञः'** [६/४/२७] इत्यञ् ।

६ **'पौलादेरणः'** [६/४/२८] इत्यण् ।

९३. मौदादिभ्यः ।

तृतीयान्तेभ्यो मौदादिभ्य प्रोक्तं वेदं वेत्त्यधीते वेत्यर्थयोर्यथाविहितं प्रत्ययो भवति । **'वृद्धाच्छः'** [६/८/३२] इत्यस्यापवाद. । मुदेन ऋष्यणि मौद । मौदेन प्रोक्त वेदं विदन्त्यधीयते वा मौदा । एवं पैप्पलादा , जाजलाः । माथुरेण प्रोक्ता—माथुरी वृत्तिः । सौलभानि ब्राह्मणानि । मौदादयः प्रयोगगम्याः ।

९४. तित्तिरि-वरतन्तु-खण्डिकोखादीयण् ।

तित्तिरि, वरतन्तु, खण्डिक, उख—इत्येतेभ्यस्तेन प्रोक्तं वेदं वेत्त्यधीते इत्यर्थयोरीयण् प्रत्ययो भवति । अणोऽपवाद । तित्तिरिणा प्रोक्त वेदं वेत्त्यधीते वा—तैत्तिरीयः । वारतन्तवीय., खाण्डिकीयः, औखीय.,। वेदमिति किम् ? तित्तिरिणा प्रोक्तं श्लोकं वेत्त्यधीते वा ।

९५. काश्यपकौशिकाभ्यामृषिभ्यां कल्पमपि णिन् ।

ऋषिवाचिभ्या काश्यपकौशिकाभ्यां तेन प्रोक्तं कल्पं वेद च वेत्त्यधीते वेत्यर्थयोर्णिन् प्रत्ययो भवति । काश्यपेन प्रोक्त कल्प वेद च विदन्ति अधीयते वा—काश्यपिन । कौशिकिन । ईयापवाद । ऋषिभ्यामिति किम् ? इदानीतनेन गोत्रकाश्यपेन प्रोक्तः कल्प —काश्यपीय. । कल्पमपीति किम् ? काश्यपीया पुराणसंहिता । णकार उत्तरत्र वृद्ध्यर्थः । चकारेण एव वेदानुवृत्तौ सिद्धायामपिशब्द उत्तरत्र वेदकल्पेति द्वयस्याप्यनुवर्तनार्थ. । चानुकृष्ट तु उत्तरत्र नानुवर्तते ।

९६. शौनकादिभ्यः ।

शौनकादिभ्य शब्देभ्यस्तेन प्रोक्तं वेदं कल्पं वा वेत्त्यधीते वा इत्यर्थयोर्णिन् प्रत्ययो भवति । अणाद्यपवादः । शौनकेन प्रोक्तं वेदं कल्प वा विदन्त्यधीयते वा—शौनकिनः । शार्ङ्गरविण , वाजसनेयिन । कल्पमपीति किम् ? शौनकीया शिक्षा । शौनकादयो यथा—शौनक, शार्ङ्गरव, वाजसनेय, शापेय, काकेय, शाष्पेय, शाल्फेय, स्कन्ध, स्कम्भ, देवदर्श, रज्जुभार, रज्जुनार, रज्जुकण्ठ, दामकण्ठ, कठ, शाठ, कुशाठ, कुशाप, कुशायन, आग्वपञ्चम, तलवकार, पुरुषांसक, पुरुपासक, हारिद्र, तुम्बुरु, उपलप, आलम्बि, पलिङ्ग, कमल, ऋचाभ, आरुणि, ताण्डय, श्यामायन, खादायन, कषायतल, स्तम्भ । इत्याकृतिगणोऽयम् । तेन भाल्लविना प्रोक्त ब्राह्मण विदन्त्यधीयते वा भाल्लविनः, शाटयायनिनः, ऐतरेयिणः इत्यादि सिद्ध भवति । ब्राह्मणमपि वेद एव । उक्तं च—मन्त्रब्राह्मण हि वेदः ।

९७. छगलिनो ण्येयिन् ।

छगलिन्शब्दात् तेन प्रोक्त वेदं कल्प वा वेत्त्यधीते वा इत्यर्थयोर्ण्येयिन् प्रत्ययो भवति । छगलिना प्रोक्त वेद कल्प वा विदन्त्यधीयते वा—छागलेयिनः ।

९८. कठादिभ्यो लुक् ।

कठादिभ्यः शब्देभ्यस्तेन प्रोक्तं वेदं कल्पं वा वेत्त्यधीते वेत्यर्थयोः विहितस्य प्रत्ययस्य लुग् भवति । कठेन प्रोक्तं वेदं कल्पं वा विदन्त्यधीयते वा—कठाः । चरकाः, कर्कराः, धेनुकण्ठाः, गोगडाः । कठादय. प्रयोगगम्याः ।

९९. कर्मन्दकृशाश्वाद् भिक्षुनटसूत्रमिन् ।

आभ्यां तेन प्रोक्ते यथासंख्य भिक्षुसूत्र नटसूत्रं च विदन्त्यधीयते वेत्यर्थयोरिन् प्रत्ययो भवति । कर्मन्देन प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा—कर्मन्दिनो भिक्षवः । कृशाश्वेन प्रोक्त नटसूत्रं विदन्त्यधीयते वा—कृशाश्विनो नटाः । अतिदेशाद् वेदिलध्येतृविषयता चरणादकञ् च भवति । कार्मन्दकं, कार्शाश्वकम् । नटसूत्रे कापिलेयशब्दादपीच्छन्त्येके । कापिलेयिनो नटाः । कापिलेयक आम्नायः ।

१००. पाराशर्यशिलालेर्णिन् ।

भिक्षुनटसूत्रमित्यनुवर्तते । आभ्यां तेन प्रोक्ते यथासङ्ख्यं भिक्षुसूत्रं नटसूत्रं च विदन्त्यधीयते वा इत्यर्थयोर्णिन् प्रत्ययो भवति । पाराशर्येण प्रोक्तं भिक्षुसूत्रं विदन्त्यधीयते वा—पाराशरिणो भिक्षवः । शिलालिना प्रोक्तं नटसूत्रं विदन्त्यधीयते वा—शैलालिनो नटाः । अतिदेशादकञ् च भवति । पाराशर्याणां धर्मः आम्नायः सघो वा—पाराशरकम् । शैलालकम् । भिक्षुनटसूत्रमिति किम् ? अन्यत्र पाराशरं, शैलालम् ।

१०१. पुराणे कल्पे ।

वेत्त्यधीते इति निवृत्तम् । तेनेति तृतीयान्तात् प्रोक्तेऽर्थे पुराणे कल्पेऽभिधेये णिन् प्रत्ययो भवति । अणाद्यपवादः । पिङ्गेन प्रोक्तः कल्पः पुराणः—पैङ्गी कल्पः । तृणपिङ्गेन तार्णपिङ्गी कल्पः । अरुणपराजेन आरुणपराजी कल्पः । येऽपि पैङ्गिनं कल्पं विदन्त्यधीयते वा तेऽपि पैङ्गिनः । आरुणपराजिनः । प्रोक्ताद्धि लुगुक्त एव । पुराण इति किम् ? आश्मरथः कल्पः । आश्मरथ्येन प्रोक्तः कल्प उत्तरकल्पेभ्यो नवीन इति श्रूयते ।

१०२. एकदिशि ।

तेनेत्यनुवर्तते । तेनेति सहार्थतृतीयान्ताद् एकदिश्यर्थे यथाविहितं प्रत्ययो भवति । एका दिक् आधारात्मिका यस्य तदेकदिग् । तुल्यदिगित्यर्थः । सुदाम्ना एकदिक्—सौदामनी विद्युत् । सुदामा नाम पर्वतो यस्या दिशि तस्या विद्युत्, तेन सा सुदाम्ना सहैकदिगुच्यते । सूर्येण सहैकदिक्—सौरी बलाका[1] । हिमवता एकदिक्—हैमवती गङ्गा । त्रिककुदा एकदिक्—त्रैककुदी लङ्का ।

१०३. तसिः ।

तेनेति तृतीयान्तात् एकदिश्यर्थे तसिरित्ययं प्रत्ययो भवति । पूर्वेण यथास्वमणादय इयादयश्च विहिताः प्रत्ययान्तरमिदं सर्वप्रकृतिविषयं विधीयते । सुदाम्ना एकदिक्—सुदामतः । सूर्यतः, हिमवत्तः, त्रिककुत्तः, पीलुमूलतः, पार्श्वतः, पृष्ठतः । इकार 'त्विसात्त्राडाचतसि···' [१/१/५१] इति विशेषणार्थः ।

१०४. उरसो यश्च ।

उरस्शब्दात् तृतीयान्तात् एकदिश्यर्थे य चकारात् तसिश्च प्रत्ययौ भवतः । अणोऽपवादः । उरसा एकदिक्—उरस्यः, उरस्तः ।

१०५. उपज्ञाते ।

तेनेत्यनुवर्तते । प्रथमत उपदेशेन विना वा ज्ञातं उपज्ञातम् । तस्मिन्नर्थे तृतीयान्ताद् यथाविहितं प्रत्ययो भवति । पाणिनेन पाणिनिना वोपज्ञातं—पाणिनीयमकालकं[2] व्याकरणम् । काशकृत्स्नं गुरुलाघवम्[3] ।

१०६. कृते ।

तेनेति तृतीयान्तात् कृते उत्पादितेऽर्थे यथाविहितं प्रत्यया भवन्ति । शिवेन कृतो ग्रन्थः—शैवः । वाररुचानि

---

१. पक्षिविशेषः ।

२. न विद्यते कालः कालाधिकारो यत्र तदकालकमिति । पाणिनेः पूर्वे आचार्याः कालपरिभाषां कुर्वन्ति स्म आ न्याय्यादुत्थानादा न्याय्याच्च संवेशनादेषोऽद्यतनः काल । अन्ये पुनराहुः—उभयतोऽर्धरात्रं वेति । तत्पाणिनिः प्रत्याचष्टे । तदशिष्यं लोकतोऽर्थगतेस्तदेवं कालपरिभाषारहितमकालकं व्याकरणं पाणिनिना प्रथमं ज्ञातं स्वयमेव वोपदेशेन विना ज्ञातं प्रथमतः कृतं वेत्यर्थः ।

३. गुरुस्य गुरुत्वं लाघवं च गुरोर्लाघवं चेति वा 'आते प्रोष्ठपदात् पदस्य' [८/४/११] इत्यत्र दर्शयिष्यते ।

वाक्यानि। जलूकेन जलूकया वा कृताः—जालूका श्लोकाः। सिद्धसेनीयः स्तवः। इष्टकाभिः कृतः प्रासादः—ऐष्टकः। नारदेन कृतं गीतं—नारदीयम्। मनसा कृता—मानसी कन्या। तक्ष्णा कृतः प्रासादः इत्यादावनभिधानान्न भवति। कृते ग्रन्थे एवेच्छन्त्यन्ये।

१०७. मक्षिकादिभ्यः संज्ञायाम्।

मक्षिकादिभ्यस्तृतीयान्तेभ्यः कृतेऽर्थे यथाविहितं प्रत्ययो भवति संज्ञायां विषये। मक्षिकाभिः कृतं—माक्षिकं मधु। सरघाभिः सारघम्। गर्मुद्भिर्गार्मुतम्। नर्मुकाभिर्नार्मुकम्। संज्ञायामिति किम्? मक्षिकाभिः कृतं शकृत्। मक्षिकादयो यथा—मक्षिका, सरघा, गर्मुत्, नर्मुका, पुत्तिका, क्षुद्रा, भ्रमर, वटर, वातप। इत्याकृतिगणोऽयम्।

१०८. कुलालादेरकञ्।

कुलालादिभ्यस्तृतीयान्तेभ्यः कृतेऽर्थेऽकञ् प्रत्ययो भवति संज्ञायां विषये। कुलालेन कृतं—कौलालकम्। वारुटकम्। संज्ञायामित्यभिधेयनियमार्थम्, तेन घटघटीशरावोदञ्चनाद्येव भाण्ड कौलालकं न यत्किञ्चित् कुलालकृतम्। शूर्पपिटकपटलिकापिच्छिकाद्येव भाण्ड वारुटकं नाऽन्यत्। एवमन्यत्राप्यभिधेयनियमः। कुलालादयो यथा—कुलाल, वरुट, कर्मार, निषाद, चण्डाल, सेना, सिरन्ध्र, देवराजन्, देवराज, परिषद्, वधू, भद्र, अनडुह्, ब्रह्मन्, कुम्भकार, अश्वपाक, रुरु इति।

१०९. सर्वचर्मण ईनेनञौ।

सर्वचर्मन्शब्दात् तेन कृतेऽर्थे ईन, ईनञ्—इत्येतौ प्रत्ययौ भवतः। संज्ञायामित्यधिकारादभिधेयनियमः। सर्वश्चर्मणा कृतः—सर्वचर्मीणः, सार्वचर्मीणः। अत्र सर्वशब्दस्य कृतापेक्षस्य चर्मशब्देनायोगिनापि **'नाम नाम्नैकार्थ्ये···'** [३/१/१८] इत्यादिना समासः।

११०. उरसो याऽणौ।

उरस्शब्दात् तेन कृतेऽर्थे य, अण्—इत्येतौ प्रत्ययौ भवतः संज्ञायां विषये। उरसा कृतः—उरस्यः, औरसः।

१११. छन्दस्यः।

छन्दस्शब्दात् तेन कृतेऽर्थे यः प्रत्ययो निपात्यते संज्ञायां विषये। छन्दसा इच्छया कृतश्छन्दस्यः। न तु प्रवचनेन गायत्र्यादिना वा। संज्ञायामित्यधिकारादभिधेयव्यवस्था। निपातनात् क्वचिदन्यत्रापि भवति। यथानुष्टुबादिरक्षर-समूहश्छन्दस्तथा सप्तदशानामक्षराणां समूहश्छन्दस्य उच्यते। ओम् श्रावयेति चतुरक्षरं, अस्तु श्रौषट् इति चतुरक्षरं, ये यजामहे इति पञ्चाक्षरं, यजेति द्व्यक्षरं, द्व्यक्षरो वषट्कारः, एष वै सप्तदशाक्षरश्छन्दस्यो यज्ञमनुविहितः। स्वार्थे यः प्रत्ययः।

११२. तस्येदम्।

तस्येति षष्ठ्यन्तादिदमित्यर्थे यथाविहितमणादय इयादयश्च प्रत्यया भवन्ति। उपगोरिदं—औपगवम्। कापटवं, स्रौघ्नं, माथुरं, दैत्यं, बार्हस्पत्यं, औत्सं, आग्नेयं, कालेयं, स्त्रैणं, पौंस्नं, गव्यं, राष्ट्रियं, पारावारीण, नादेयं, भानवीयः, श्यामगवीयः, पाटलिपुत्रकः प्राकारः। इह तु अनभिधानान्न भवति—देवदत्तस्यानन्तरः। ग्रामस्य समीपम्। विंशतेरवयव एकः। शतस्य द्वौ। सहस्रस्य पञ्च। तस्येति षष्ठ्यर्थमात्रमिदमिति षष्ठ्यर्थसंबन्धिमात्रं च विवक्षितम्। यदन्यलिङ्गसंख्याप्रत्यक्षपरोक्षत्वादिकं तदविवक्षितम्।

११३. रथात्सपूर्वाच्च वोढ्रङ्गे ।

नियमसूत्रमेतत्[1]। रथात् केवलात् सपूर्वाच्च षष्ठ्यन्तादिदमर्थे य प्रत्यय स रथस्य वोढरि रथाङ्गे एव च भवति। रथस्याय वोढा—रथ्योऽश्वः। रथस्येदं—रथ्यं चक्रम्। रथ्यं युग्यम्। सपूर्वात्—द्वयो रथयोर्वोढा—द्विरथः। त्रिरथः। 'द्विगोरनपत्ये यस्वरादे···' [६/२/२६] इत्यादिना यलुक्। अन्ये तु स्वरादेरेव लुगमिच्छन्ति। तन्मते द्विरथ्य, त्रिरथ्यः। परमरथस्येदं—परमरथ्यम्। उत्तमरथ्यम्। आश्वरथं चक्रम्। वोढ्रङ्गे एवेति नियमात् अन्यत्र वाक्यमेव न प्रत्यय.। रथस्येदं स्थानम्। अश्वरथस्य स्वामी।

११४. यः ।

रथात् केवलात् सपूर्वाच्च षष्ठ्यन्तादिदमर्थे य. प्रत्ययो भवति। अणाद्यपवादः। रथस्यायं वोढा—रथ्य। द्वयो रथयोर्वोढा—द्विरथः। त्रिरथ.। रथ्यं, परमरथ्यं, काष्ठरथ्यं चक्रम्।

११५. पत्रपूर्वादञ् ।

पत्रं—वाहनम्। तत्पूर्वाद् रथशब्दात् षष्ठ्यन्तादिदमर्थे अञ् प्रत्ययो भवति। याऽपवाद। अश्वरथस्येदं—आश्वरथं चक्रम्। आश्वरथ युगम्। औष्ट्ररथं, रासभरथम्।

११६. वाहनात् ।

वाहनवाचिनस्तस्येदमित्यर्थे अञ् प्रत्ययो भवति। अणादेरपवाद.। उष्ट्रस्याय—औष्ट्र। रासभ, हास्तो रथ।

११७. वाह्यपथ्युपकरणेषु ।

नियमसूत्रमिदम्[2]। वाहनाद्योऽञ् प्रत्यय उक्त. स वाह्ये पथि उपकरणे एव चेदमर्थे भवति नान्यत्र। अश्वस्याय—आश्वो रथः। आश्व. पन्था। आश्वं पल्ययनम्। आश्वी कशा। वाह्यपथ्युपकरणेष्वेवेति नियमादन्यत्र वाक्यमेव न प्रत्यय। अश्वानां घासः।

११८. वोढुर्वहित् च ।

वोढृशब्दात् तस्येदमित्यर्थेऽञ् प्रत्ययो भवति वहित् इत्यादेशश्चास्य शब्दस्य। संवोढुः सारथेरिदं—सांवहित्रम्।

११९. हलसीरादिकण् ।

आभ्यां तस्येदमित्यर्थे इकण् प्रत्ययो भवति। अणोऽपवाद.। हालिकं, सैरिकम्।

१२०. द्वंद्वादऽकल् विवाहे ।

द्वन्द्वसमासात्तस्येदमित्यर्थे विवाहेऽभिधेये अकल् प्रत्ययो भवति। अणोऽपवाद। अत्रिभरद्वाजानां विवाहः—अत्रिभरद्वाजिका। वशिष्ठकश्यपिका। भृग्वङ्गिरसिका। कुत्सकुशिकिका। गर्गभार्गविका। कुरुवृष्णिका। कुरुकाशिका। लकारः स्त्रीत्वार्थः।

---

१ प्रत्ययमनूसरेणैव तर्हि एक एव योगः क्रियताम्। नैवम्। रथात्सपूर्वाच्च वोढ्रङ्गे य इति कृते विधिसूत्रं स्यात्। ततश्च वोढ्रङ्गे इत्यस्य व्यावृत्तौ रथस्येदं स्थानमिति कृते अण् प्राप्येत। नियमे वाक्यमेव।

२ यदि पूर्वेण सह एकयोगं कुर्वीत तदानीं वाहनवाचिनो वाह्यपथ्युपकरणेषु अञेवाऽन्यत्र यथाप्राप्तमेव स्यात्। पृथग्योगे तु नियमार्थम्।

१२१. अदेवासुरादिभ्यो वैरे।

द्वंद्वात् षष्ठ्यन्ताद् देवासुरादिवर्जितादिदमर्थे वैरेऽकञ् प्रत्ययो भवति । अणोऽपवादः। ईयं तु परत्वाद् बाधते। बाभ्रवशालङ्कायनानामिदं वैर—बाभ्रवशालङ्कायनिका। काकोलूकस्येदं वैरं—काकोलूकिका । श्वावराहिका, श्वश्रृगालिका, अहिनकुलिका। अदेवासुरादिभ्य इति किम् ? दैवासुरं, राक्षःसुरम् । देवासुरादय. प्रयोगगम्याः ।

१२२. नटान्नृत्ये ञ्यः।

नटशब्दात् तस्येदमित्यर्थे नृत्येऽभिधेये ञ्यः प्रत्ययो भवति। नटानामिदं नृत्यं—नाटयम्। नृत्य इति किम् ? नटानामिदं गृहम् ।

१२३. छन्दोगौक्थिक-याज्ञिक-बह्वृचेभ्यश्च धर्माम्नायसंघेषु।

एभ्यश्चरणेभ्यो नटशब्दाच्च तस्येदमित्यर्थे धर्मादिष्वभिधेयेषु ञ्यः प्रत्ययो भवति। छन्दोगादिभ्यश्चरणाकञो नटादणोऽपवाद । छन्दोगाना धर्म आम्नाय संघो वा—छान्दोग्यम्। औक्थिक्यं, याज्ञिक्यं, बाह्वृच्य, नाटयम् । धर्मादिष्विति किम् ? छन्दोगानां गृहं छान्दोगम्।

१२४. आथर्वणिकादऽणिकलोपश्च।

आथर्वणिकशब्दात् तस्येदमित्यर्थे धर्मादिष्वभिधेयेषु अण् प्रत्ययो भवति इकलोपश्चास्य। अथर्वणा प्रोक्तं वेद वेत्त्यधीते वा—आथर्वणिक । न्यायादित्वादिकण्। अत एव निपातनाद् गणपाठसामर्थ्याद् वा प्रोक्ताल्लुग् न भवति। आथर्वणिकाना धर्म आम्नायः संघो वा—आथर्वणः। चरणादकञि प्राप्ते वचनम्।

१२५. चरणादऽकञ्।

चरणशब्दो वेदशाखावचनस्तद्योगात् तदध्यायिषु वर्तते । चरणवाचिनस्तस्येदमित्यर्थे धर्मादिष्वभिधेयेषु अकञ् प्रत्ययो भवति। अणोऽपवाद.। ईयं तु परत्वाद् बाधते। कठानां धर्म आम्नायः संघो वा—काठक । चरकाणां चारकः। कलापानां कालापक । पैप्पलादानां पैप्पलादाकः। मौदानां मौदकः। आर्चाभिनामार्चाभिक.। वाजसनेयिना वाजसनेयक ।

१२६. गोत्रादऽदण्डमाणवशिष्येषु।

गोत्रवाचिनस्तस्येदमित्यर्थे दण्डमाणवशिष्यवर्जितेष्वभिधेयेषु अकञ् प्रत्ययो भवति। अणोऽपवादः। ईयाञौ तु परत्वाद् बाधते। औपगवस्येदं—औपगवकम्। कापटवक, दाक्षकं, प्लाक्षकं, गार्गकं, गार्ग्यायणकं, ग्लौचुकायनकं, म्लौचुकायनकम् । अदण्डमाणवशिष्येष्विति किम् ? शाकल्यस्येमे—शाकला दण्डमाणवाः शिष्या वा। एवं गौकक्षाः । 'शकलादेर्यञः' [६/४/२७] इत्यञ् । दाक्षेरिमे दाक्षाः । प्लाक्षाः, माहकाः । 'पौत्रादीञः' [६/४/२८] इत्यञ्। दण्डप्रधाना माणवा.—दण्डमाणवा., आश्रमिणां रक्षापरिचरणार्थाः। शिष्या अध्ययनार्था अन्तेवासिनः।

१२७. रैवतिकादेरीयः।

रैवतिकादिभ्यो गोत्रवाचिभ्यस्तस्येदमित्यर्थे ईयः प्रत्ययो भवति। अकञादेरपवादः। रैवतिकस्येदं—रैवतिकीयं शकटम्। रैवतिकीयः संघादिः। रैवतिकीया दण्डमाणवशिष्याः। गौरग्रीवीयं शकटम्। गौरग्रीवीयः संघादिः। गौरग्रीवीया दण्डमाणवशिष्याः। रैवतिकादयो यथा—रैवतिक, गौरग्रीवि, स्वापिशिष्य, क्षेमधृति, औदमेधि, औदवाहि, बैजवापि इति।

१२८. कौपिञ्जलहास्तिपदादण्।

आभ्यां गोत्रवाचिभ्यां तस्येदमित्यर्थेऽण् प्रत्ययो भवति । अकञादेरपवादः। सूत्रे निपातनादेव आभ्यामपत्ये

अण् प्रत्यय. पादस्य च पद्भाव । तयोरिद कौपिञ्जलं शकटम् । कौपिञ्जला दण्डमाणवशिष्याः । हास्तिपदं शकटम् । हास्तिपदा दण्डमाणवशिष्या. । यथाविहितमित्येव अणि सिद्धे अकञ्बाधनार्थं पुनरणविधानम् । अनयोर्वृद्धे. प्रयोजनाऽभावात् प्रत्यये णानुबन्ध पुंवद्भावाऽभावार्थं ईबर्थश्च । कौपिञ्जलीस्थूण. । हास्तिपदीस्थूण. ।

१२९. संघाङ्कघोषलक्षणेष्वञ्यञिञः ।

गोत्रादित्यनुवर्तते । अञन्तात् यञन्तात् इञन्ताच्च गोत्रवाचिनस्तस्येदमित्यर्थे संघादिष्वभिधेयेषु अण् प्रत्ययो भवति । अकञोऽपवाद । अञ्—बिदानामय—बैद संघ , अङ्क , घोषो वा । बैद लक्षणम् । यञ्—गर्गाणामयं—गार्ग सघः, अङ्क , घोषो वा । गार्ग लक्षणम् । इञ्—दाक्षीणामयं—दाक्ष. संघः, अङ्कः, घोषो वा । दाक्ष लक्षणम् । संघादिष्विति किम् ? बिदानां गृहम् । अञ्यञिञ इति किम् ? औपगवकः सघादि । गोत्रादिति किम् ? सौतंगमीय. सघादि । अथाङ्क-लक्षणयो को विशेष ? लक्षण लक्ष्यस्यैव स्वम् । यथा शिखादि । अङ्कस्तु स्वामिविशेषविज्ञापकः । स्वस्तिकादिर्गवादिस्थो न गवादीनामेव स्व भवति ।

१३०. शाकलादकञ् च ।

गोत्रादिति निवृत्तम् । शाकलशब्दात् तस्येदमित्यर्थे संघादिष्वभिधेयेषु अकञ् चकारादण् च प्रत्ययौ भवत । शाकल्येन प्रोक्तं वेद विदन्त्यधीयते वा—शाकला । तेषा संघोऽङ्को घोषो वा—शाकल, शाकलक । शाकलं, शाकलकं लक्षणम् ।

१३१. आग्नीध्रं गृहे ।

अग्नीध् ऋत्विग्विशेष । अग्नीध इदमर्थे गृहेऽभिधेये रणप्रत्ययान्तमाग्नीध्रमिति निपात्यते । अग्नीध इदं—आग्नीध्रं गृहम् । निपातनादेव दत्वाऽभाव ।

१३२. समिध आधाने टेन्यण् ।

आधीयते येन समित् तदाधानम् । समिध् इत्येनस्मात् तस्येदमित्यर्थे आधानेऽभिधेये टेन्यण् प्रत्ययो भवति । अणोऽपवाद । टकार ईबर्थ । समिधामाधानो मन्त्र.—सामिधेन्यो मन्त्र । सामिधेनी ऋक् । सामिधेनीरन्वाह । पञ्चदश सामिधेन्य. ।

द्वितीयश्चरणः

१. इकण् ।

अण् पूर्णोऽवधि । अधिकारोऽयं आपादपरिसमाप्ते । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र इकण् इत्येतदपवाद-विषय परिहृत्याऽधिकृत वेदितव्यम् ।

२. तेन दीव्यति-खनति-जयति-जितेषु ।

तेनेति तृतीयान्ताद् दीव्यति, खनति, जयति, जित—इत्येतेष्वर्थेषु इकण् प्रत्ययो भवति । अक्षैर्दीव्यति—आक्षिक. । शालाकिक । कुद्दालेन खनति—कौद्दालिक । आभ्रिकः । अभ्री काष्ठमयी तीक्ष्णाग्रा । अक्षैर्जयति—आक्षिक. । शालाकिक. । अक्षैर्जित—आक्षिकम् । शालाकिकम् । इह तेनेति साधने तृतीया वेदितव्या नान्यत्राऽनभिधानात्, तेन देवदत्तेन जितमित्यत्र न भवति । कुद्दालेन खनन्नङ्गुल्या खनति इत्यत्र तु सत्यपि अङ्गुलेः साधनत्वे मुख्यसाधनभावः कुद्दालस्यैव नाङ्गुलेरित्यङ्गुलिशब्दान्न भवति । यथा—स्रुघ्नादागच्छन् वृक्षमूलादागत इति । दीव्यत्यादिषु त्रिषु कालो न[1] विवक्षित., जिते तु विवक्षित. ।

३. संसृष्टे ।

तेनेति तृतीयान्तात् संसृष्टेऽर्थे इकण् प्रत्ययो भवति । द्रव्यान्तरेण मिश्रीभूतं संसृष्ट, संस्कृतार्थाद् भिन्नम् । दध्ना समृष्ट—दाधिकम् । शाङ्गवेरिक, पैप्पलिक, वैषिका भिक्षा. ।

४. चूर्णादिन् ।

तृतीयान्तात् चूर्णशब्दात् संसृष्टेऽर्थे इन् प्रत्ययो भवति । चूर्णैः संसृष्टाश्चूर्णिनोऽपूपाः । चूर्णिन्यो धानाः । मत्वर्थीयेनाऽपि सिद्धे इकण्बाधनार्थ वचनम् ।

५. लवणादः ।

लवणशब्दात् तेन संसृष्टेऽर्थे अः प्रत्ययो भवति । लवणेन संसृष्टो लवणः सूपः । लवणः शाकः । लवणा यवागूः । लवणशब्दो द्रव्यशब्दो गुणशब्दश्च । तत्र द्रव्यवाची लवणशब्द प्रत्यय प्रयोजयति न गुणवाची । गुणेन विश्लेषपूर्वकस्य संसर्गस्याऽभावात् ।

६. मुद्गादण् ।

मुद्गशब्दात् तेन संसृष्टेऽर्थे अण् प्रत्ययो भवति । मुद्गैः संसृष्टः—मौद्गः ओदनः । मौद्गी यवागूः ।

---

१. कर्त्ता तु विवक्षितोऽत एव जयतिग्रहणे सत्यपि कर्मण्यपि इकण्प्रत्ययार्थं जितग्रहणम् । अयमर्थः । जयतीत्युक्ते जयति जेष्यति अजैषीदिति लभ्यते, किं जितग्रहणेन ? उच्यते—भूते कर्मण्यपि वाच्ये यथा स्यादित्येवार्थम् ।

७. व्यञ्जनेभ्य उपसिक्ते ।

तेनेत्यनुवर्तते । व्यञ्जनवाचिनस्तृतीयान्तात् उपसिक्तेऽर्थे इकण् प्रत्ययो भवति । सूपेन उपसिक्तः—सौपिक ओदन । दाधिक ओदन । घार्तिक. सूपः । तैलिक शाकम् । व्यञ्जनेभ्य इति किम् ? उदकेन उपसिक्तः ओदन. । व्यञ्जनशब्दो रूढ्या सूपादौ वर्तते । उपसिक्ते इति किम् ? सूपेन समृष्टा स्थाली । उपसिक्तमिति यद् भोजनार्थमुपादीयते भोज्यादि तदुच्यते न स्थाल्यादि । उपसिक्तं संसृष्टमेव तत्र 'संसृष्टे' [७/२/३] इत्येव सिद्धे नियमार्थं वचनम् । व्यञ्जनैः संसृष्टे उपसिक्त[1] एव उपसिक्ते च व्यञ्जनैरेव[2] । बहुवचन स्वरूपविधेर्निरासार्थम् ।

८. संस्कृते ।

तेनेति तृतीयान्तात् संस्कृतेऽर्थे इकण् प्रत्ययो भवति । सत उत्कर्षाधान संस्कार , संसृष्टार्थाद् भिन्नः । दध्ना संस्कृत—दाधिकम् । मारिचिकम् । उपाध्यायेन संस्कृतः—औपाध्यायिकः शिष्य । विद्यया संस्कृत —वैद्यिक. ।

९. कुलत्थकोपधादण् ।

कुलत्थशब्दात् ककारोपधाच्च तेन संस्कृतमित्यर्थेऽण् प्रत्ययो भवति । इकणोऽपवाद । कुलत्थैः संस्कृत—कौलत्थम् । कोपध—तिन्तिडीकेन तिन्तिडीकाभिर्वा संस्कृतं—तैन्तिडीकम् । दर्दुरूकेण दार्दुरूकम् । मण्डूकेन माण्डूकम् । अन्ये तु कवर्गोपधादपीच्छन्ति । मौद्गं, सारघम् ।

१०. तरति ।

तेनेति तृतीयान्तात् तरत्यर्थे इकण् प्रत्ययो भवति । उडुपेन तरति—औडुपिक । काण्डप्लविक., शारप्लविकः, गौपुच्छिकः ।

११. नौद्विस्वरादिकः ।

नौशब्दाद् द्विस्वराच्च नाम्नस्तेन तरत्यर्थे इक प्रत्ययो भवति । नावा तरति—नाविक । नाविका । द्विस्वर—घटिक., प्लविक', दृतिकः, बाहुक., बाहुका ।

१२. चरति ।

तेनेति तृतीयान्ताच्चरत्यर्थे इकण् प्रत्ययो भवति । चरतिरिह गत्यर्थो भक्ष्यार्थश्च गृह्यते । गत्यर्थ—हस्तिना चरति—हास्तिकः । शाकटिकः, घाण्टिकः । भक्ष्यर्थ—दध्ना चरति—दाधिक । शाङ्गवेरिक. ।

१३. पर्पादेरिकट् ।

पर्पादिभ्यः शब्देभ्यस्तेन चरत्यर्थे इकट् प्रत्ययो भवति । पर्पेण चरति—पर्पिक । पर्पिकी । अश्विकः, अश्विकी । पर्पादयो यथा—पर्प, अश्व, अश्वत्थ, रथ, अर्घ्य, व्याल, व्यास इति ।

१४. पदिकः ।

पादशब्दात् तेन चरत्यर्थे इकट् प्रत्ययो भवति अस्य पद्भावश्च निपात्यते । पादाभ्यां चरति—पदिक ।

१५. श्वगणाद् वा ।

श्वगणशब्दात् तेन चरत्यर्थे इकट् प्रत्ययो वा भवति । श्वगणेन चरति—श्वगणिकः । श्वगणिकी । पक्षे

---

१ सूपेन समृष्टा स्थालीत्यनुपसिक्ते संसृष्टे प्रत्ययो न भवतीति प्रत्ययार्थव्यवस्था ।

२. उदकेनोपसिक्त ओदन इत्युदकादव्यञ्जनान्न भवतीति प्रकृतिव्यवस्था ।

इकण् । श्वागणिकः, श्वागणिकी । 'श्वादेरिति' [८/४/२८] इति वृद्धिप्रतिषेध औडागमश्च न भवति ।

१६. **वेतनादेर्जीवति ।**

तेनेत्यनुवर्तते । वेतनादिभ्यस्तेन जीवत्यर्थे इकण् प्रत्ययो भवति । वेतनेन जीवति—वैतनिक । वाहिक. । वेतनादयो यथा—वेतन, वाह, अर्धवाह, धनुस्, दण्ड, धनुर्दण्ड, जाल, वेश, उपवेश, प्रेषण, भृति, उपवेष, उपस्था, उपास्ति, उपस्थान, सुख, शय्या, सुखशय्या, शक्ति, उपनिषत्, उपरिजन, स्फिज, स्फिग, वाल, पुतचाल, उपदेश, पाद, उपहस्त इति ।

१७. **व्यस्ताच्च क्रयविक्रयादिकः ।**

व्यस्तात्समस्ताच्च क्रयविक्रयशब्दात्तेन जीवत्यर्थे इकः प्रत्ययो भवति । क्रयेण जीवति—क्रयिक । विक्रयिकः, क्रयविक्रयिकः ।

१८. **वस्नात् ।**

वस्नशब्दात् तेन जीवत्यर्थे इक. प्रत्ययो भवति । वस्नं मूल्य, तेन जीवति—वस्निक ।

१६. **आयुधादीयश्च ।**

आयुधशब्दात् तेन जीवत्यर्थे ईयः चकाराद् इकश्च प्रत्ययौ भवतः । आयुधीय , आयुधिकः, आयुधिका । आयुधादिकेकणोः स्त्रियां[1] विशेष. ।

२०. **व्रातादीनञ् ।**

व्रातशब्दात् तेन जीवत्यर्थे ईनञ् प्रत्ययो भवति । नानाजातीया अनियतवृत्तय. शरीरायासजीविनः सघाः व्राताः । तत्साहचर्यात् तत्कर्मापि व्रातम् । तेन जीवति—व्रातीन. । ञकारो वृद्ध्यर्थः । तेन '**स्वरवृद्धिनिमित्तस्य**…' [३/२/५६] इत्यादिना पुवद्भावो न भवति । व्रातीनाभार्य. ।

२१. **हरत्युत्सङ्गादेः ।**

उत्सङ्गादिभ्यस्तृतीयान्तेभ्यो हरत्यर्थे इकण् प्रत्ययो भवति । उत्सङ्गेन हरति—औत्सङ्गिकः । उत्रुपेन औत्रुपिक. । उडुपेन औडुपिक । उत्सङ्गादयो यथा—उत्सङ्ग, उत्रुप, उडुप, उत्पुत, उत्पुट, पिटक, पिटाक इति ।

२२. **भस्त्रादेरिकट् ।**

भस्त्रादिभ्यस्तेन हरत्यर्थे इकट् प्रत्ययो भवति । भस्त्रया हरति—भस्त्रिकः । भस्त्रिकी । भरटिक., भरटिकी । भस्त्रादयो यथा—भस्त्रा, भरट, भरण, शीर्षभार, शीर्षेभार, अङ्गभार, अङ्गेभार, अंसभार, असेभार इति ।

२३. **विवधवीवधाद् वा ।**

विवध, वीवध—इत्येताभ्यां तेन हरत्यर्थे इकट् प्रत्ययो वा भवति । विवधेन हरति—विवधिक. । विवधिकी । वीवधिकः, वीवधिकी । पक्षे इकण्[2] । वैवधिकः, वैवधिकी । विवधवीवधशब्दौ समानार्थौ भारे वर्तेते ।

---

१. नन्वायुधादीयो वेति क्रियतां, पक्षे इकणापि सेत्स्यतीत्याशङ्का ।

२ अत्र वाग्रहणसामर्थ्यात् अन्येनाप्राप्तोपि पक्षे इकण् । अन्यथा वाग्रहणमनर्थकं स्यात् ।

२४. **कुटिलिकाया अण् ।**

कुटिलिकाशब्दात् तेन हरत्यर्थे अण् प्रत्ययो भवति। कुटिलिकाशब्देनाग्रेवक्रा लोहादिमयी अङ्गाराकर्षणी यष्टिर्वा कुटिला गतिर्वा पलालोत्क्षेपणोऽग्रेवक्रो दण्डो वा परिव्राजकोपकरणविशेषो वा चौराणां नौगृहाद्यारोहणार्थं दामाग्रप्रतिबद्ध आयसोऽर्धाङ्कुशो वोच्यते। कुटिलिकया हरति अङ्गारान्—कौटिलिकः कर्मारः। कुटिलिकया हरति व्याधं—कौटिलिको मृगः। कुटिलिकया हरति पलालं—कौटिलिकः कर्षकः। कुटिलिकया हरति पुष्पाणि—कौटिलिकः परिव्राजकः। कुटिलिकया हरति नावं—कौटिलिकश्चौरः।

२५. **निर्वृत्तेऽक्षद्यूतादेः ।**

अक्षद्यूतादिभ्यस्तृतीयान्तेभ्यो निर्वृत्तेऽर्थे इकण् प्रत्ययो भवति। अक्षद्यूतेन निर्वृत्त—आक्षद्यूतिकं वैरम्। जाङ्घाप्रहतिकं वैरम्। अक्षद्यूतादयो यथा—अक्षद्यूत, जङ्घाप्रहत, जङ्घाप्रहृत, जङ्घाप्रहार, पादस्वेद, पादस्वेदन, कण्टकमर्द, कण्टकमर्दन, शर्करामर्दन, गत, आगत, गतागत, यात, उपयात, यातोपयात, गतानुगत, अनुगत इति।

२६. **भावादिमः ।**

भाववाचिनस्तेन निर्वृत्तेऽर्थे इम प्रत्ययो भवति। पाकेन निर्वृत्तं—पाकिमम्। सेकिम, त्यागिम, रोगिम, कुट्टिम, सम्मूर्छिमम्।

२७. **अपमित्ययाचिताभ्यां कण् ।**

आभ्यां तेन निर्वृत्तेऽर्थे कण् प्रत्ययो भवति। अपमित्येति यवन्तम्। अपमित्य प्रतिदानेन निर्वृत्त—आपमित्यकम्। याचितेन याञ्चया निर्वृत्त—याचितकम्।

२८. **ओजःसहोऽम्भसो वर्तते ।**

तेनेत्यनुवर्तते। ओजस्, सहस्, अम्भस्—इत्येतेभ्यस्तृतीयान्तेभ्यो वर्तते इत्यर्थे इकण् प्रत्ययो भवति। वृत्तिरात्मयापना चेष्टा वा। ओजसा बलेन वर्तते—औजसिकः। सहसा प्रसहनेन पराभिभवेन वा—साहसिकः। अम्भसा जलेन—आम्भसिकः।

२९. **तं प्रत्यनोरीप-लोम-कूलात् ।**

तेनेति निवृत्तम्। तमिति द्वितीयान्तात् प्रति अनु—इत्येताभ्यां परो य ईपशब्दः लोमशब्दः कूलशब्दश्च तदन्तात् वर्तते इत्यर्थे इकण् प्रत्ययो भवति। प्रतिगता आपो यस्मिन्निति प्रतीपम्। प्रतीपं वर्तते—प्रातीपिकः। आन्वीपिकः। प्रातिलोमिकः, आनुलोमिकः। प्रातिकूलिकः, आनुकूलिकः। अकर्मकस्यापि वृत्तेर्योगे प्रतीपादेः क्रियाविशेषणत्वात् द्वितीया। तमिति पुलिङ्गनिर्देशोऽसंदेहार्थः[1]।

३०. **परेर्मुखपार्श्वात् ।**

परिशब्दाद् यो मुखशब्दः पार्श्वशब्दश्च तदन्तात् द्वितीयान्तात् वर्तते इत्यर्थे इकण् प्रत्ययो भवति। परिमुखं वर्तते—पारिमुखिकः। पारिपार्श्विकः। परिर्वर्जने सर्वतोभावे वा। स्वामिनो मुखं वर्जयित्वा वर्तमानोऽथवा यतो यतः स्वामिमुखं ततस्ततो वर्तमानः पारिमुखिकः सेवकः। एवं पारिपार्श्विकः।

---

१ तदिति कृते हि प्रथमान्तस्यैतद्रूपं द्वितीयान्तस्य वेति संदेहः। यतः स्यमोरपि नपुंसके साधारणं तदिति रूपम्।

३१. अवृद्धेर्गृह्णाति गर्ह्ये ।

तमित्यनुवर्तते । द्वितीयान्ताद् वृद्धिशब्दवर्जितात् गृह्णात्यर्थे इकण् प्रत्ययो भवति गर्ह्येऽभिधेये । अल्पं दत्त्वा अधिक गृह्णन् अन्यायकारी निन्द्यते । द्विगुण गृह्णाति—द्वैगुणिकः । त्रैगुणिक । वृधुषी[१] वृद्धि गृह्णाति—वार्धुषिकः । अवृद्धेरिति किम् ? वृद्धि गृह्णातीति वाक्यमेव । गर्ह्ये इति किम् ? दत्त गृह्णाति ।

३२. कुसीदादिकट् ।

तमिति द्वितीयान्तात् कुसीदशब्दात् गृह्णात्यर्थे इकट् प्रत्ययो भवति गर्ह्येऽभिधेये । कुसीदं वृद्धिस्तदर्थं द्रव्यमपि कुसीदम् । तद् गृह्णाति – कुसीदिकः । कुसीदिकी । टित्वादीप् ।

३३. दशैकादशादिकश्च ।

द्वितीयान्तात् दशैकादशशब्दात् गृह्णात्यर्थे इक चकारात् इकट् च प्रत्ययो भवति गर्ह्येऽभिधेये । दशभिरेकादश दशैकादशाः । तान् गृह्णाति—दशैकादशिकः, दशैकादशिका । दशैकादशिकी । दशैकादशादित्यत एव निपातनाद् अकारान्तत्वम् । तच्च वाक्ये प्रयोगार्थम् । दशैकादशान् गृह्णाति । अन्ये दशैकादश गृह्णातीति विगृह्णन्ति । तदपि अबाधकान्यपि निपातनानि भवन्तीति न्यायादुपपद्यते ।

३४. अर्थ-पद-पदोत्तरपद-ललाम-प्रतिकण्ठेभ्यः ।

गर्ह्ये इति निवृत्तम् । अर्थात्, पदात्, पदशब्द उत्तरपदं यस्य तस्मात्, ललामात् प्रतिकण्ठाच्च द्वितीयान्तात् गृह्णातीत्यर्थे इकण् प्रत्ययो भवति । अर्थं गृह्णाति—आर्थिकः । पद पादिक । पदोत्तरपद—पूर्वपद पौर्वपदिक । औत्तरपदिकः, आदिपदिक , आन्तपदिकः । ललामं लालामिकः । प्रतिकण्ठ प्रातिकण्ठिक । अव्ययीभावसमासाश्रयणादिह न भवति—प्रतिगत. कण्ठं प्रतिकण्ठ , तं गृह्णाति । उत्तरपदग्रहणाद् बहुप्रत्ययपूर्वान्न भवति । बहुपदं गृह्णाति ।

३५. उञ्छति रक्षति ।

तमिति द्वितीयान्ताद् उञ्छति रक्षति चार्थे इकण् प्रत्ययो भवति । बदराणि उञ्छति—बादरिकः । श्यामाकिकः, नैवारिक । समाज रक्षति—सामाजिकः । सामवायिकः, नागरिकः, सांनिवेशिकः ।

३६. संज्ञायां शब्ददर्दराभ्यां करोति ।

द्वितीयान्ताभ्यां शब्ददर्दराभ्यां करोतीत्यर्थे इकण् प्रत्ययो भवति संज्ञायां विषये । शब्दं करोति—शाब्दिकः । यः कश्चित् शब्दं करोति न स सर्वोऽपि शाब्दिकः, कि तर्हि य. शब्द जानाति वैयाकरणः स एवाविनष्टं शब्दमुच्चारयन् शाब्दिक उच्यते । एवं दार्दरिकः । दर्दरो घटो वादित्र च, तत्र वादित्रं कुर्वन्नेवमुच्यते ।

३७. ललाटकुक्कुटीभ्यां पश्यति ।

संज्ञायामित्यनुवर्तते । द्वितीयान्ताभ्यां ललाटकुक्कुटीभ्यां पश्यतीत्यर्थे इकण् प्रत्ययो भवति संज्ञायां विषये । ललाटं पश्यति—लालाटिकः । ललाटदर्शनेन दूरावस्थानं लक्ष्यते, तेन च कार्येष्वनुपस्थानम् । य. सेवको दृष्टं स्वामिनो ललाटमिति दूरतो याति न स्वामिकार्येषूपतिष्ठते, स एवमुच्यते । ललाटमेव वा कोपप्रसादलक्षणाय यः पश्यति स लालाटिकः । कुक्कुटीं पश्यति—कौक्कुटिकः । कुक्कुटीशब्देन कुक्कुटीपातो लक्ष्यते, तेन च देशस्याऽल्पता । यो हि भिक्षुरविक्षिप्तदृष्टि. पादविक्षेपे देशे चक्षुः संयम्य पुरो युगमात्रदेशप्रेक्षी गच्छति, स एवमुच्यते । यो वा तथाविधमात्मानमतथाविधोऽपि सदर्शयति सोऽपि कौक्कुटिकः । दाम्भिकचेष्टा वा मिथ्याशौचादिः कुक्कुटी । तामाचरन् कौक्कुटिकः । हृदयावयवो

---

१. प्रयुक्तं धनं पुष्णातीति प्रयुक्तधनपोषी, तस्य पृषोदरादित्वात् वृधुषीशब्द आदेशः ।

वा कुक्कुटी, तां पश्यति कौक्कुटिकः भिक्षुः। निभृत[1] इत्यर्थः।

३८. पक्षि-मत्स्य-मृगाख्येभ्यो हन्ति।

आख्यशब्दः प्रत्येकं सबध्यते। तमिति द्वितीयान्तेभ्यः पक्ष्याख्येभ्यो मत्स्याख्येभ्यो मृगाख्येभ्यश्च हन्तीत्यर्थे इकण् प्रत्ययो भवति। आख्यशब्देन पर्यायाणां विशेषाणां च ग्रहणम्। पक्षिणो हन्ति—पाक्षिकः। शाकुनिकः, मायूरिकः, तैत्तिरिकः। मत्स्य—मात्स्यिकः, मैनिकः, शाफरिकः, शाकुलिकः। मृग—मार्गिकः, हारिणिकः, सारङ्गिकः सौकरिकः[2], नैयङ्कुकः। अथ जिह्मगान् हन्ति, अनिमिषान् हन्ति—इत्यत्र कस्मान्न भवति? नैतद् मत्स्येत्यस्य स्वरूपं न विशेषो न पर्यायः, अपि तु असाधारणं विशेषणं, यथा—जिह्मगा भुजगाः, अनिमिषा देवा इति।

३९. परिपन्थात् तिष्ठति च।

परिपन्थशब्दाद् द्वितीयान्तात् तिष्ठति हन्ति चार्थे इकण् प्रत्ययो भवति। परिपन्थं तिष्ठति हन्ति वा—पारिपन्थिकश्चौरः। अत एव निर्देशात् परिपथशब्दस्येकणोऽन्यत्रापि वा परिपन्थादेशः, तेन परिपन्थं गच्छति, परिपन्थं पश्यति—इत्याद्यपि भवति।

४०. परिपथात्।

तिष्ठतीत्यनुवर्तते। परिपथशब्दाद् द्वितीयान्तात् तिष्ठत्यर्थे इकण् प्रत्ययो भवति। परिर्वर्जने सर्वतोभावे वा। पथः परि सर्वतः पन्थानं वा परिपथम्। परिपथं तिष्ठति—पारिपथिकः। पन्थानं वर्जयित्वा व्याप्य वा तिष्ठतीत्यर्थः।

४१. माथोत्तरपद-पदव्याक्रन्देभ्यो धावति।

तमित्यनुवर्तते। माथ उत्तरपदं यस्य तस्मान्नाम्नः पदवीशब्दाद् आक्रन्दशब्दाच्च द्वितीयान्ताद् धावत्यर्थे इकण् प्रत्ययो भवति। दण्डमाथं धावति—दाण्डमाथिकः। शौल्कमाथिकः। माथशब्दः पथिपर्यायः। दण्ड इव माथो दण्डमाथः[3], ऋजुमार्ग उच्यते। पदवीं धावति—पादविकः। आक्रन्दन्ति यत्र स देश आक्रन्दः, आक्रन्द्यते इति वा आक्रन्दः आर्तायनं[4] शरणमुच्यते। आक्रन्दं धावति—आक्रन्दिकः। उत्तरपदग्रहणाद् बहुप्रत्ययपूर्वान्न भवति। बहुमाथं धावति।

४२. पश्चात्यनुपदात्।

पश्चातीति प्रकृतिविशेषणम्। पश्चादर्थः पश्चात्। पश्चादर्थे वर्तमानादनुपदशब्दाद् द्वितीयान्तात् धावत्यर्थे इकण् प्रत्ययो भवति। पदस्य पश्चादनुपदम्। अनुपदं धावति— आनुपदिकः। प्रत्यासत्त्या धावतीत्यर्थः। पश्चातीति किम्? अनुपदं धावति। अत्र समीपे समासः।

४३. धर्माऽधर्माभ्यां चरति।

धर्म, अधर्म—इत्येताभ्यां द्वितीयान्ताभ्यां चरत्यर्थे इकण् प्रत्ययो भवति। चरतिस्तात्पर्येणानुष्ठाने। धर्मं चरति—धार्मिकः। आधर्मिकः।

---

१. अचपलः

२. उपलक्षणत्वात् सूकरोऽपि मृगाख्य एव।

३. मथ्यते अवगाह्यते पादैः पथि माथः।

४. अयनं पन्थाः।

४४. समूहार्थात्समवैति ।

समूहवाचिभ्यो द्वितीयान्तेभ्य समवैतीत्यर्थे इकण् प्रत्ययो भवति । समूह समवैति—सामूहिक. । सामाजिक., सांसदिक·, सामवायिक , गौष्ठिक । समवैति—आगत्य तस्य समाजस्य एकदेशी भवतीत्यर्थ· ।

४५. परिषत्पर्षद्भ्यां ण्यः ।

परिषद्, पर्षद्—इत्येताभ्यां द्वितीयान्ताभ्यां समवैतीत्यर्थे ण्यः प्रत्ययो भवति । परिषदं समवैति—पारिषद्य· । पार्षद्य ।

४६. सेनाया वा ।

द्वितीयान्तात् सेनाशब्दात् समवैतीत्यर्थे ण्य· प्रत्ययो वा भवति । पक्षे इकण् । सेनां समवैति—सैन्य·, सैनिकः । सेनैव सैन्य इति तु चतुर्वर्णादित्वात् स्वार्थे टयण् ।

४७. परदारादिभ्यो गच्छति ।

परदारादिभ्यो द्वितीयान्तेभ्यो गच्छतीत्यर्थे इकण् प्रत्ययो भवति । परदारान् गच्छति—पारदारिक । गौरुदारिक , गौरुतल्पिक । सभर्तृकां गच्छति—साभर्तृकिक । भ्रातृजायिकः । परदारादयः प्रयोगगम्या· ।

४८. प्रतिपथादिकश्च ।

द्वितीयान्तात् प्रतिपथशब्दात् गच्छतीत्यर्थे इक. प्रत्ययो भवति । चकाराद् यथाप्राप्त इकण् । पन्थानं पन्थान प्रति पथोऽभिमुखमिति वा प्रतिपथम् । तद् गच्छति—प्रतिपथिक , प्रातिपथिको वा ।

४९. सुस्नातादिभ्यः पृच्छति ।

सुस्नातादिभ्यो द्वितीयान्तेभ्य. पृच्छतीत्यर्थे इकण् प्रत्ययो भवति । सुस्नात पृच्छति—सौस्नातिक. । सौखरात्रिक , सौखशायनिकः[1], सौखशाय्यिकः । सुस्नातादय. प्रयोगगम्या. ।

५०. प्रभूतादिभ्यो ब्रवीति ।

द्वितीयान्तेभ्यः प्रभूतादिभ्यो ब्रवीतीत्यर्थे इकण् प्रत्ययो भवति । प्रभूत ब्रूते—प्राभूतिक । पर्याप्त ब्रूते—पार्याप्तिक. । वैपुलिक., वैचित्रिक·, नैपुणिकः । क्रियाविशेषणादयमिष्यते, तेनेह न भवति—प्रभूतमर्थ ब्रूते, पर्याप्तमर्थ ब्रूते । क्वचिदक्रियाविशेषणादपि । स्वर्गमन ब्रूते—सौवर्गमनिकः । स्वागतिकः[2], सौवस्तिक । प्रभूतादयः प्रयोगगम्या ।

५१. माशब्द इत्यादिभ्यः ।

माशब्द इत्यादिभ्यो ब्रवीत्यर्थे इकण् प्रत्ययो भवति । इतिशब्दो वाक्यपरामर्शार्थ. । मा शब्द इति ब्रूते—माशब्दिक । मा शब्दः क्रियतामिति ब्रूते इत्यर्थः । कार्यः शब्द इति ब्रूते—कार्यशब्दिक. । नित्य शब्द इति ब्रूते—नैत्यशब्दिक. । माशब्द इत्यादय. प्रयोगगम्या. । वाक्यात्[3] प्रत्ययविधानार्थं वचनम् ।

५२. तस्य धर्म्ये ।

तस्येति षष्ठ्यन्ताद् धर्म्येऽर्थे इकण् प्रत्ययो भवति । धर्मो न्यायोऽनुवृत्त आचारस्तस्मादनपेतं धर्म्यम् ।

---

१. 'अनुशतिकादीनां' [८/४/१९] इति उभयपदवृद्धिः ।
२. 'स्वागतादेः' [८/४/२७] इति वृद्धिप्रतिषेधस्य प्रतिषेधादौट् न ।
३. पूर्वेण हि पदात्प्रत्यय इत्यर्थः ।

शुल्कशालाया धर्म्यं—शौल्कशालिकम् । आपणिकं, गौल्मिकं, आतरिकम् ।

५३. ऋन्नरादेरण् ।

ऋकारान्तेभ्यो नरादिभ्यश्च षष्ठ्यन्तेभ्यो धर्म्येऽर्थे अण् प्रत्ययो भवति । नुर्धर्म्यं—नारम् । स्त्रियां नारी । मातुर्मात्रम् । पितुः पैत्रम् । शास्तुः शास्त्रम् । विकर्तुः वैकर्त्रम् । होतुर्हौत्रम् । पोतुः पौत्रम् । उद्गातुः औद्गात्रम् । नरादि—नरस्य धर्म्यं नारम् । स्त्रियां नारी । नृशब्देनैव रूपद्वये सिद्धे नरशब्दादिकण् मा भूदिति तद्ग्रहणम् । महिष्या माहिषम् । नरादिगणो यथा—नर, महिषी, प्रजावती, प्रजापति, विलेपिका, प्रलेपिका, अनुलेपिका, वर्णक, पेषिका, वर्णकपेषिका, मणिपाली, पुरोहित, अनुचारक, अनुवाक, यजमान, होतृयजमान इति नरादि ।

५४. विभाजयितृ-विशसितुर्णीटो लोपश्च ।

आभ्यां षष्ठ्यन्ताभ्यां धर्म्येऽर्थे अण् प्रत्ययो भवति तत्संनियोगे च विभाजयितुर्णेर्लोपः विशसितुश्चेटो लोपो भवति । विभाजयितुर्धर्म्यं—वैभाजित्रम् । विशसितुर्वैशस्त्रम् ।

५५. अवक्रये ।

अवक्रीयते येनेच्छानियमितेन द्रव्येण कियन्तमपि कालमापणादि सोऽवक्रयः । भोगनिर्वेशो भाटकमिति यावत् । तस्येति षष्ठ्यन्तान्नाम्नोऽवक्रयेऽर्थे इकण् प्रत्ययो भवति । आपणस्यावक्रयः—आपणिकः । शौल्कशालिकः, आतरिकः, गौल्मिकः । लोकपीडया धर्मातिक्रमेणापि अवक्रयो भवतीत्ययं धर्म्याद् भिद्यते[1] ।

५६. तदस्य पण्यम् ।

तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति तच्चेत् प्रथमान्तं पण्यं विक्रेयं भवति । अपूपाः पण्यमस्य आपूपिकः । पण्यार्थो वृत्तावन्तर्भूत इति पण्यशब्दस्याऽप्रयोगः । एवं शाष्कुलिकः, मौदकिकः, लावणिकः ।

५७. किशरादेरिकट् ।

किशरादिभ्यः शब्देभ्यस्तदस्य पण्यमित्यस्मिन् विषये इकट् प्रत्ययो भवति । किशरादयो गन्धद्रव्यविशेषवचनाः । किशरं किशरो वा पण्यमस्य किशरिकः । किशरिकी स्त्री । तगरिकः । तगरिकी स्त्री । किशरादयो यथा—किशर, तगर, स्थगर, उशीर, हरिद्रा, हरिद्रु, हरिद्रुपर्णी, गुग्गुलु, गुग्गुल, नलद इति किशरादि । टकार ईबर्थः ।

५८. शलालुनो वा ।

शलालुशब्दाद् गन्धविशेषवाचिनस्तदस्य पण्यमित्यस्मिन् विषये इकट् प्रत्ययो वा भवति । शलालु पण्यमस्य शलालुकः । शलालुकी । पक्षे इकण् । शालालुकः, शालालुकी ।

५९. शिल्पम् ।

तदस्येत्यनुवर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति तच्चेत् प्रथमान्तं शिल्पं भवति । शिल्पं—कौशलं, विज्ञानप्रकर्षः । अनेन तन्निर्वर्त्यः क्रियाविशेषो लक्ष्यते । नृत्तं शिल्पमस्य नार्तिकः । एवं गैतिकः, वादनिकः । मृदङ्गो मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः । एवं पाणविकः, मौरजिकः, वैणिकः । मृदङ्गादिशब्दा वादनार्थवृत्तयः प्रत्ययमुत्पादयन्ति न द्रव्यवृत्तयः[2] । उत्पादनार्थवृत्तिभ्यः तु अनभिधानान्न भवति । अत एव

---

१. तत 'तस्य धर्म्ये' [७/२/५२] इत्यनेन न सिध्यतीति पृथग् योग इत्यर्थः ।

२. द्रव्यस्य शिल्पायोगात् तद्विषयायाः क्रियायाः शिल्पत्वमिति वादनार्थवृत्तय इत्युक्तम् ।

कुम्भकारादावभिधेये[1] मृदङ्गकरणादिभ्य[2] एव प्रत्ययः । मृदङ्गकरणं शिल्पमस्य मार्दङ्गकरणिकः कुम्भकारः । वैणाकरणिकः । मृदङ्गवादनादिभ्योऽप्यनभिधानान्न भवति । शिल्पार्थो वृत्तावन्तर्भूत इति शिल्पशब्दस्याऽप्रयोगः ।

६०. मड्डुक-झर्झराद् वाऽण् ।

मड्डुक, झर्झर— इत्येताभ्यां तदस्य शिल्पमित्येतस्मिन् विषये अण् प्रत्ययो वा भवति । मड्डुकवादनं शिल्पमस्य माड्डुकः । झार्झरः । पक्षे इकण् । माड्डुकिकः, झार्झरिकः ।

६१. आयुधम् ।

तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति तच्चेत् प्रथमान्तमायुधं भवति । असिरायुधमस्य आसिकः । प्रासिकः, चाक्रिकः, मौष्टिकः, धानुष्कः, मौद्गरिकः, मौसलिकः । चरतीत्यत्र व्यापारसाधनात् प्रत्ययः, यथा— अश्वेन चरतीति । शिल्पमित्यत्र तु विज्ञानातिशये, यथा—नृत्तं शिल्पमस्येति । अनेन तु व्यापाराभावेऽपि परिज्ञानमात्रे प्रत्ययः ।

६२. परश्वधाद्वाऽण् वा ।

परश्वधशब्दात् तदस्यायुधमित्यर्थे अण् प्रत्ययो वा भवति । परश्वध आयुधमस्य पारश्वधः । पक्षे इकण् । पारश्वधिकः ।

६३. शक्तियष्टिभ्यामीकण् ।

आभ्यां तदस्यायुधमित्यर्थे ईकण् प्रत्ययो भवति । शक्तिरायुधमस्य शाक्तीकः । शाक्तीकी । याष्टीकः, याष्टीकी । कथं शाक्तिकः ? शक्त्या जीवतीति वेतनादीकणा भविष्यति ।

६४. इष्ट्यादिभ्यो वा ।

इष्ट्यादिभ्यः शब्देभ्यस्तदस्य आयुधमित्यर्थे ईकण् प्रत्ययो वा भवति । पक्षे 'आयुधं' [८/२/६१] इति इकण् । इष्टिरायुधमस्य ऐष्टीकः । ऐष्टीकी । ऐष्टिकः, ऐष्टिकी । एवमैषीकः, ऐषिकः, दाण्डीकः, दाण्डिकः, काम्पनीकः, काम्पनिकः, आम्भसीकः, आम्भसिकः । इष्ट्यादयः प्रयोगगम्याः ।

६५. नास्तिकास्तिक-दैष्टिकम् ।

एते शब्दास्तदस्य इत्यस्मिन् विषये इकण्प्रत्ययान्ता निपात्यन्ते । निपातनं रूढ्यर्थम् । नास्ति परलोकः पुण्यं पापमिति वा मतिरस्य नास्तिकः । अस्ति परलोकः पुण्यं पापमिति वा मतिरस्य आस्तिकः । नास्त्यस्तिशब्दौ तिबादिप्रतिरूपके अव्यये । निपातनादेव वा तदिति प्रथमाधिकारेऽपि आख्यातान्नास्तीति पदसमुदायाच्च प्रत्ययः । दिष्टं दैवं, तत्प्रमाणमिति मतिरस्य दिष्टा वा प्रमाणानुपातिनी मतिरस्य दैष्टिकः ।

६६. शीलम् ।

तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति तच्चेत्प्रथमान्तं शीलं भवति । शील—प्राणिनां स्वभावः । फलनिरपेक्षा प्रवृत्तिरिति यावत् । अपूपा अपूपभक्षणं शीलमस्य आपूपिकः । शाष्कुलिकः, मौदकिकः, ताम्बूलिकः । परुषवचनं शीलमस्य पारुषिकः । एवमाक्रोशिकः । मृदङ्गादिवदपूपादयः शब्दाः क्रियावृत्तयः प्रत्ययमुत्पादयन्ति । शीलार्थो वृत्तावन्तर्भूत

---

१. केषुचिद् ग्रामेषु मृन्मया मृदङ्गा भवन्ति । तेषां कुम्भकारादुत्पत्तिः ।

२. न तु मृदङ्गशब्दादित्यर्थः ।

इति शीलशब्दस्याऽप्रयोगः ।

६७. ङस्थोऽञ् ।

ङप्रत्ययान्तात्तिष्ठतेस्तदस्य शीलमित्यर्थे अञ् प्रत्ययो भवति । आस्था शीलमस्य आस्थः । सास्थः, आवस्थः, सामास्थः, नैष्ठः, वैष्ठः । 'आत उपसर्गे' [५/४/१०६] इति ङप्रत्ययः ।

६८. छत्रादेः ।

छत्रादिभ्यः शब्देभ्यस्तदस्य शीलमित्यर्थे अञ् प्रत्ययो भवति । इकणोऽपवादः । छत्रं शीलमस्य छात्रः । छत्रशब्देन गुरुकार्येष्ववहितस्य शिष्यस्य छत्रक्रियातुल्या गुरुच्छिद्राच्छादनाऽपायरक्षणादिका क्रियोच्यते उपचारात् । शिष्यो हि छत्रवद् गुरुच्छिद्रावरणादिप्रवृत्तश्छात्र इत्युच्यते । अभ्यासापेक्षाऽपि क्रिया शीलमित्युच्यते । यथा - शीलिता विद्येति । चुराशीलः चौरः । तपःशीलः तापसः । कर्मशीलः कार्मः । स्त्रियां—छात्री, चौरी, तापसी । छत्रादिगणो यथा—छत्र, चुरा, तपस्, कर्मन्, शिक्षा, चुक्षा, चिक्षा, भिक्षा, भक्षा, तितिक्षा, बुभुक्षा, विश्वधा, उदस्थान, उपस्थान, पुरोडा, कृषि, मन्द्र, मन्थ, अनृत, विशिख, विशिखा, प्ररोह इति छत्रादि ।

६९. तूष्णीकः ।

तूष्णीशब्दात् तदस्य शीलमित्यर्थे कः प्रत्ययो मकारलोपश्च निपात्यते । तूष्णीभावः शीलमस्य तूष्णीकः ।

७०. वृत्तोऽपपाठः परीक्षायाम् ।

तदस्येत्यनुवर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति तच्चेत् प्रथमान्तं परीक्षाविषये वृत्तोऽपपाठो भवति । एकोऽन्योऽपपाठः परीक्षायां वृत्तोऽस्य[1] ऐकान्यिकः । द्वैयन्यिकः, त्रैयन्यिकः । सङ्ख्यान्यशब्दयोस्तद्धिते विषयभूते समासः । ततस्तद्धितः । अपपाठ इति किम् ? एकमन्यदस्य दुःखं परीक्षायां वृत्तम् । परीक्षायामिति किम् ? स्वतन्त्राध्ययने मा भूत् । अन्ये तु अपपाठादन्यत्रापि अध्ययनमात्रे प्रत्ययमिच्छन्ति । एकं रूपमध्ययने वृत्तमस्य ऐकरूपिकः । ऐकग्रन्थिकः ।

७१. बहुस्वरपूर्वपदादिकः ।

बहुस्वरं पूर्वपदं यस्य तस्मान्नाम्नः प्रथमान्तादस्येति षष्ठ्यर्थे इकः प्रत्ययो भवति वृत्तोऽपपाठः परीक्षायामिति विषये । एकादशान्यान्यपपाठरूपाणि परीक्षायामस्य वृत्तानि एकादशान्यिकः । एकादशान्यिका स्त्री । द्वादशान्यिकः । द्वादशान्यिका स्त्री । त्रयोदशान्यिकः, त्रयोदशान्यिका । चतुर्दशान्यिकः, चतुर्दशान्यिका । अत्राप्यन्ये पूर्ववदन्यत्रापि इच्छन्ति । द्वादश रूपाण्यध्ययने वृत्तान्यस्य द्वादशरूपिकः ।

७२. भक्ष्यं हितमऽस्मै ।

तदित्यनुवर्तते । अस्येति निवृत्तम् । तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे इकण् प्रत्ययो भवति तच्चेत् प्रथमान्तं भक्ष्यं हितं भवति । अपूपा भक्ष्यं हितमस्मै आपूपिकः । शाष्कुलिकः, मौदकिकः, गौडधानिकः । भक्ष्यमिति किम् ? देवदत्तो हितोऽस्मै । हितमिति किम् ? अपूपा भक्ष्यमहितमस्मै । हितार्थो भक्षणक्रिया च तद्धितवृत्तावेवान्तर्भवति ।

७३. नियुक्तं दीयते ।

तदिति अस्मै इति चानुवर्तते । तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे इकण् प्रत्ययो भवति तच्चेत् प्रथमान्तं

---

१. वृत्तः—जातः ।

नियुक्तमव्यभिचारेण नित्य वा दीयते । अग्रभोजनमस्मै नियुक्त दीयते—आग्रभोजनिकः । आग्रफलिक., मासिकः, आपूपिकः, शाष्कुलिक, ग्रामिक., आग्रहारिक । अस्मै इति किम् ? रजकस्य वस्त्र नित्य दीयते । अर्प्यते इत्यर्थ. ।

७४. ओदनाद् वेकट् ।

ओदनशब्दादस्मै नियुक्त दीयते इत्यर्थे इकट् प्रत्ययो वा भवति । ओदनमस्मै नियुक्त दीयते—ओदनिक, औदनिक । ओदनिकी, औदनिकी । पक्षे इकण् ।

७५. भक्तादऽण् ।

वेत्यनुवर्तते । भक्तशब्दादस्मै नियुक्त दीयते इत्यर्थे अण् प्रत्ययो वा भवति । भक्तमस्मै नियुक्त दीयते—भाक्त, भाक्तिक । पक्षे इकण् ।

७६. श्राणामांसौदनाभ्यामिकः ।

वेत्यनुवर्तते । श्राणा, मांसौदन—इत्येताभ्या तदस्मै नियुक्त दीयते इत्यर्थे इक. प्रत्ययो वा भवति । श्राणा नियुक्तमस्मै दीयते—श्राणिक । श्राणिका । मांसौदनिक, मांसौदनिका । पक्षे इकण् । श्राणिकी, मांसौदनिकी । इकेकणोः स्त्रिया विशेषः । अन्ये त्विक नेच्छन्ति ।

७७. नवयज्ञादिभ्योऽस्मिन् वर्तन्ते ।

नवयज्ञादिभ्यः प्रथमान्तेभ्योऽस्मिन् वर्तन्ते इति विषये इकण् प्रत्ययो भवति । नवा यज्ञा अस्मिन् वर्तन्ते—नावयज्ञिक । पाकयज्ञिक । नवयज्ञादयः प्रयोगगम्या ।

७८ तत्र नियुक्ते ।

तत्रेति सप्तम्यन्तान्नियुक्तेऽर्थे इकण् प्रत्ययो भवति । नियुक्तोऽधिकृतो व्यापारित इत्यर्थ । पूर्वकस्य नियुक्तमित्यस्य क्रियाविशेषणरूपस्याऽव्यभिचारो नित्यमिति चार्थ. । प्रत्ययार्थश्चायम् । शुल्कशालाया नियुक्तः—शौल्कशालिक. । आपणिक., आतरिक, दौवारिक, आक्षपटलिक. ।

७९. अगारान्तादिकः ।

अगारशब्दान्तात् तत्र नियुक्तेऽर्थे इक. प्रत्ययो भवति । देवागारिक., देवागारिका, भाण्डागारिक., आयुधागारिक., कोष्ठागारिक ।

८०. अदेशकालादऽधीते ।

तत्रेत्यनुवर्तते । अध्ययनस्य यौ प्रतिषिद्धौ देशकालौ तावदेशकालौ । अदेशकालवाचिनः सप्तम्यन्तादधीते इत्यर्थे इकण् प्रत्ययो भवति । अदेश—अशुचावधीते—आशुचिक. । श्माशानिक, श्मशानाभ्यासिकः । अकाल—सान्ध्यिक, औत्पातिक., आनध्यायिकः । अदेशकालादिति किम् ? स्वाध्यायभूमावधीते । पूर्वाह्णेऽधीते ।

८१. प्रस्तार-संस्थान-तदन्त-कठिनान्तेभ्यो व्यवहरति ।

प्रस्तार, सस्थान—इत्येताभ्या प्रस्तारान्तात् सस्थानान्तात् कठिनान्ताच्च सप्तम्यन्तात् व्यवहरतीत्यर्थे इकण् प्रत्ययो भवति । व्यवहरतिरिह क्रियातत्त्वे क्रियाया अविपरीतस्वभावे । यथा लौकिको व्यवहार. । प्रस्तारे व्यवहरति—

प्रास्तारिक.[1] । सास्थानिक । तदन्त—कांस्यप्रस्तारिक:, लौहप्रस्तारिक, गौसस्थानिक, आश्वसस्थानिक । कठिनान्त—वाशकठिनिक, वार्धकठिनिक । कठिनं तापसभाजनं पीठ वा । प्रस्तारसस्थानाभ्या तदन्ताभ्या केचिन्नेच्छन्ति ।

८२. निकटादिषु वसति ।

निकटादिभ्य. सप्तम्यन्तेभ्यो वसतीत्यर्थे इकण् प्रत्ययो भवति । निकटे वसति—नैकटिकः । आरण्यकेन भिक्षुणा ग्रामात् क्रोशे वस्तव्यमिति यस्य शास्त्रितो वासः स एवोच्यते । वृक्षमूले वसति—वार्क्षमूलिक । श्माशानिकः, आवसथिक., आभ्यवकाशिकः । निकटादयः प्रयोगगम्याः ।

८३. सतीर्थ्यः ।

सतीर्थ्य इति समानतीर्थशब्दात् तत्र वसतीत्यर्थे यः प्रत्ययो निपात्यते समानशब्दस्य च सभाव. । समानतीर्थे वसति—सतीर्थ्यः । तीर्थमिह गुरुरुच्यते ।

८४. संख्यादेश्चाऽलुकः ।

इत ऊर्ध्वं या प्रकृतिरुपादास्यते तस्या. केवलायास्तदन्तायाश्च सख्यापूर्वाया वक्ष्यमाण प्रत्ययो भवतीति वेदितव्यं न चेत्सा लुगन्ता भवति । कसेन क्रीतं—कसिकम् । द्वाभ्यां कंसाभ्यां क्रीत—द्विकंसिकम् । कार्षापणेन क्रीतं—कार्षापणिकम् । द्वाभ्यां कार्षापणाभ्यां क्रीत—द्विकार्षापणिकम् । चन्द्रायण चरति—चान्द्रायणिक. । द्वे चन्द्रायणे चरति—द्वैचन्द्रायणिक. । पारायणमधीते—पारायणिक । द्वे पारायणे अधीते—द्वैपारायणिक । सख्यादेरिति किम्? परमपारायणमधीते । महापारायणमधीते । चकार केवलार्थः । अलुक इति किम्? द्वाभ्या शूर्पाभ्यां क्रीत—द्विशूर्पम् । अत्र '**शूर्पाद् वाञ्**' [७/२/८६] इत्यञ् । '**द्विगोः प्लुगद्विः**' [७/२/६६] इति लुक् । द्विशूर्पेण क्रीत—द्विशौर्पिकम् । त्रिशौर्पिकम् । पुनरपि '**शूर्पाद् वाञ्**' [७/२/८६] इत्यञ् न भवति । सामान्यविहित इकण् तु भवत्यव । तस्य च अद्विरिति वचनान्न लुक् । अधिकारोऽय आ पादपरिसमाप्तेः ।

८५. आऽर्हात् ।

अधिकारोऽयम् । आ अर्हशब्दात् ये अर्थास्तेषु वक्ष्यमाणप्रत्ययविधिर्भवतीति वेदितव्यम् । अभिविधौ चायमाकार, तेन अर्हतीत्यर्थेऽपि भवति । उदाहरणानि च यथास्थान विज्ञेयानि ।

८६. कंसार्धादिकट् ।

कस, अर्ध—इत्येताभ्यामार्हदर्थे इकट् प्रत्ययो भवति । कसेन क्रीत—कसिकम् । कसिकी । अर्धिक, अर्धिकी । टित्त्वादीप् ।

८७. कार्षापणात् प्रतिश्चाऽस्य वा ।

कार्षापणशब्दादार्हदर्थे इकट् प्रत्ययो भवति अस्य च कार्षापणशब्दस्य प्रतिरित्यादेशो वा भवति । कार्षापणेन क्रीत—कार्षापणिकं, कार्षापणिकी । प्रतिक, प्रतिकी । चकार आदेशस्य प्रत्ययसंनियोगशिष्टत्वार्थः । अत एव द्विगोर्लुकि प्रत्यादेशो न भवति । द्विकार्षापण, अध्यर्धकार्षापणम् । अस्येति स्थानिप्रतिपत्त्यर्थम् । अन्यथा प्रति प्रत्ययान्तरं विज्ञायेत ।

८८. अर्धात् पलकंसकर्षात् ।

अर्धशब्दपूर्वाद् पल. कंस, कर्ष—इत्येवमन्तात् नाम्न आर्हदर्थे इकट् प्रत्ययो भवति । अर्धपलिकं, अर्धपलिकी ।

---

१. व्यवहर्तविनिमर्यविवादविक्षेपक्रियातत्त्वेषु वर्तते । तत्रत्यस्येह क्रियातत्त्वस्य ग्रहणम् । प्रस्तारस्तृणाटवी, तत्र या क्रिया यथा कर्तव्या तां तथैव करोतीत्यर्थः ।

अर्धकंसिकं, अर्धकसिकी । अर्धकर्षिकं, अर्धकर्षिकी ।

८९. शूर्पाद् वाञ् ।

शूर्पशब्दादार्हदर्थे अञ् प्रत्ययो वा भवति । पक्षे इकण् । शौर्पं, शौर्पिकम् ।

९०. शतमान-विंशतिक-सहस्र-वसनात् ।

शतमानादिभ्य शब्देभ्य आर्हदर्थे अञ् प्रत्ययो भवति । शतमानेन क्रीत—शातमानः । विंशतिर्मानमस्य विंशतिकम् । तेन क्रीतं—वैंशतिकम् । सहस्रेण साहस्र. । वसनेन वासनम् । केकणोरपवादः ।

९१. शतात् केवलादतस्मिन् येकौ ।

केवलाच्छतशब्दादार्हदर्थे य, इक— इत्येतौ प्रत्ययौ भवत. अतस्मिन्निति न चेत्तदेव शतमभिधेयं भवति । कापवादौ । शतेन क्रीतं—शत्य, शतिकम् । शतमर्हति—शत्यः, शतिक । शतं वर्षाणि मानमस्य शत्यः, शतिक. पुरुषः । केवलादिति किम् ? द्व्युत्तरं शत द्विशतम् । तेन क्रीत—द्विशतकम् । 'संख्याडेश्चालुक:' [७/२/८४] इति प्राप्नोति । अतस्मिन्निति किम् ? शतं मानमस्य शतक स्तोत्रम् । शतक निदानम् । अत्र हि प्रकृत्यर्थ एव श्लोकाध्यायशतं प्रत्ययान्तेनाभिधीयते । अन्यस्मिंस्तु शते भवत्येव । शतेन क्रीत शाटकशतं—शत्यं, शतिकम् ।

९२. संख्याडतेरशत्तिष्टेः कः ।

शदन्तत्यन्तष्टयन्तवर्जिताया संख्याया डतिप्रत्ययान्ताच्च शब्दादार्हदर्थे कः प्रत्ययो भवति । इकणोऽपवादः । संख्या—द्वाभ्यां क्रीतं द्विकम् । त्रिक, पञ्चक, बहुक, गणकं, यावत्क, तावत्क, अध्यर्धकं, अर्धपञ्चकम् । डति—कतिभिः क्रीत कतिकम् ? त्यन्तनिषेधे प्राप्ते डतेरुपादानम् । अन्यथा संख्याग्रहणेनैव सिद्ध्यति । अशत्तिष्टेरिति किम् ? चात्वारिंशत्कं, पाञ्चाशत्कं, साप्ततिक, आशीतिक, नावतिक, षाष्टिकम् ।

९३. अतोरिड् वा ।

अत्वन्तायाः संख्याया परस्य पूर्वसूत्रविहितस्य कप्रत्ययस्य इडागमो वा भवति । यावतिक , यावत्क । तावतिकः, तावत्क ।

९४. विंशतित्रिंशद्भ्याम् ।

विंशतित्रिंशत्शब्दाभ्यामार्हदर्थे क प्रत्ययो भवति । अशत्तिष्टेरिति प्रतिषेधे प्राप्ते वचनम् । विंशतिकं, त्रिंशत्कम् ।

९५. असंज्ञायां डकः ।

पूर्वमनुवर्तते । विंशतित्रिंशद्भ्यामार्हदर्थे डकः प्रत्ययो भवति असंज्ञायां विषये । कापवाद । विंशत्या क्रीतं—विंशकम् । 'विंशतेस्तेर्डिति' [८/४/६८] इति तिलोप । त्रिंशता क्रीतं—त्रिंशकम् । असंज्ञायामिति किम् ? विंशतिकं, त्रिंशत्कम् ।

९६. द्विगोः प्लुगर्द्धिः ।

असंज्ञायामित्यनुवर्तते । द्विगो. समासादार्हदर्थे उत्पन्नस्य प्रत्ययस्य प्लुग् भवति असंज्ञायां विषये न तु द्विवारम् । द्वाभ्यां कंसाभ्यां द्विकस्या वा क्रीतं—द्विकंसम् । त्रिकंसं, अध्यर्धकंसं, अर्धपञ्चमकंसम् । द्विशूर्पं, त्रिशूर्पं, अध्यर्धशूर्पं, अर्धपञ्चमशूर्पम् । अद्विरिति किम् ? द्वाभ्यां शूर्पाभ्यां क्रीतं—द्विशूर्पम् । अञ् लुक् । द्विशूर्पेण क्रीतं द्विशौर्पिक इति पुनर्लुग्

न भवति। द्विगोरिति किम्? एकादशक.। असंज्ञायामिति किम्? पञ्च लोहित्यः परिमाणमस्य पाञ्चलोहितिकम्। **'प्रितद्धितयस्वरे जातेश्च'** [३/२/५३] इति पुंवद्भाव.। पञ्च कलाया परिमाणमस्य पाञ्चकलायिकम्। परिमाण-विशेषसंज्ञे एते। अत एव **'मानसंवत्सरस्याऽशाणकुलिजस्याऽसंज्ञायाम्'** [८/४/१०] इति नोत्तरपदवृद्धि। पिदनुबन्धो लुक् पुंवद्भावार्थम्। पञ्चभि गार्गीभि क्रीत पञ्चगर्ग इत्यत्रेकण प्लुकि पुंवद्भावो[१] भवति। सख्यान्तात् द्विगो प्लुक नेच्छन्त्यन्ये। द्वाभ्या षष्टिभ्या क्रीतं—द्विषाष्टिकम्। त्रिषाष्टिकम्।

९७. कार्षापण-सहस्र-सुवर्ण-शतमानाद् वा।

पूर्वमनुवर्तते। कार्षापण, सहस्र, सुवर्ण, शतमान—इत्येतदन्तात् द्विगो परस्य आर्हदर्थे उत्पन्नस्य प्रत्ययस्य वा प्लुग् भवति न तु द्वि.। द्विकार्षापण, द्विकार्षापणिकम्। अप्लुक् पक्षे प्रतिरादेशोऽपि—द्विप्रतिकम्। अध्यर्धकार्षापण, अध्यर्धकार्षापणिक, अध्यर्धप्रतिकम्। द्विसहस्र, द्विसाहस्रम्। अध्यर्धसहस्र, अध्यर्धसाहस्रम्। द्विसुवर्ण, द्विसौवर्णिकम्। अध्यर्धसुवर्ण, अध्यर्धसौवर्णिकम्। द्विशतमान, द्विशातमानम्। अध्यर्धशतमान, अध्यर्धशातमानम्। **'मानसंवत्सरस्य···'** [८/४/१०] इत्यादिना उत्तरपदवृद्धि.।

९८. द्वि-त्रि-बहोर्निष्क-विस्तात्।

द्वि, त्रि, बहु—इत्येतेभ्य परौ यौ निष्कविस्तशब्दौ तदन्तात् द्विगो. परस्य आर्हदर्थे उत्पन्नस्य प्रत्ययस्य प्लुग् वा भवति न तु द्वि। द्विनिष्क, द्विनैष्किकम्। त्रिनिष्क, त्रिनैष्किकम्। बहुनिष्क, बहुनैष्किकम्। द्विविस्त, द्विवैस्तिकम्। त्रिविस्त, त्रिवैस्तिकम्। बहुविस्त, बहुवैस्तिकम्।

९९. विंशतिकादीनः।

विंशतिकशब्दान्तात् द्विगोरार्हदर्थे ईन प्रत्ययो भवति। अत्रोपवाद.। विधानसामर्थ्यान्न प्लुक्। द्विविंशतिकीन, त्रिविंशतिकीन, अध्यर्धविंशतिकीनं, अध्यर्धपञ्चमविंशतिकीनम्।

१००. खारीकाकणीभ्यः कप्।

खारी, काकणी—इत्येवमन्तात् द्विगोर्बहुवचनात् केवलाभ्या च खारीकाकणीभ्यामार्हदर्थे कप् प्रत्ययो भवति। विधानसामर्थ्यान्न प्लुक्। द्विखारीक, त्रिखारीक, अध्यर्धखारीकम्। द्विकाकणीक, त्रिकाकणीक, अध्यर्धकाकणीकम्। केवलाभ्यां—खारीक, काकणीकम्। पकारो **'न कपि'** [२/३/११०] इत्यत्र विशेषणार्थ।

१०१. पण-पाद-माषाद्यः।

पण, पाद, माष—इत्येवमन्तात् द्विगोरार्हदर्थे य प्रत्ययो भवति। विधानसामर्थ्यान्न प्लुक्। द्वाभ्यां पणाभ्यां क्रीत—द्विपण्यम्। त्रिपण्य, अध्यर्धपण्यम्। द्विपाद्य, त्रिपाद्य, अध्यर्धपाद्यम्। माषपणसाहचर्यात् पाद परिमाण गृह्यते न प्राण्यङ्गम्, तेन **'हिमकाषिहतिघेषु पद्'** [३/२/११५] इति पद्भावो न भवति, तत्र प्राण्यङ्गस्यैव ग्रहणात्। यद्वा पादसबन्धी यकारस्तत्र गृह्यते, अयं तु द्विगुसबन्धीति न भवति। द्विमाष्य, त्रिमाष्य, अध्यर्धमाष्यम्।

१०२. शताद् वा।

शतान्ताद् द्विगोरार्हदर्थे य प्रत्ययो वा भवति। पक्षे सख्यालक्षण क.। तस्य प्लुग् भवति। अस्य तु विधान-सामर्थ्यात् न भवति। द्विशत्य, द्विशतम्। अध्यर्धशत्य, अध्यर्धशतम्।

---

१. **'भानिक्ययुक्त···'** [३/२/४९] इत्यादिना पुंवद्भावे कृते **'यञञोऽश्यापर्णान्त···'** [६/२/१३६] इत्यादिना यञो लुक्।

१०३. शाणात् ।

वेत्यनुवर्तते । शाणान्ताद् द्विगोरार्हदर्थे य प्रत्ययो वा भवति । पक्षे इकण् । तस्य ल्लुक् । असंज्ञ तु न भवति विधानसामर्थ्यात् । पञ्चशाण्य, पञ्चशाणम् । अध्यर्धशाण्य, अध्यर्धशाणम् । योगविभाग उत्तरार्थः ।

१०४. द्वित्र्यादेरऽण् च ।

द्वि, त्रि—इत्येतत् पूर्वो य शाणशब्दस्तदन्ताद् द्विगोरार्हदर्थे अण् चकाराद्यश्च प्रत्ययो वा भवत. । पक्षे इकण् । तस्य ल्लुक् । अनयोस्तु विधानसामर्थ्यान्न । द्वाभ्या शाणाभ्यां क्रीतं—द्वैशाण, द्विशाण्यं, द्विशाणम् । एव त्रैशाण, त्रिशाण्य, त्रिशाणम् । एवं च त्रैरूप्य भवति ।

१०५. मूल्यैः क्रीते ।

पूर्व ये प्रत्यया विहितास्तेषामित प्रभृति विभक्तय प्रत्ययार्थाश्च निर्दिश्यन्ते । मूल्यवाचिनो निर्देशादेव तृतीयान्तात् क्रीतेऽर्थे यथाविहितमिकणादय. प्रत्यया भवन्ति । प्रस्थेन क्रीत—प्रास्थिकम् । साप्ततिक, आशीतिकं, नैष्किक, पाणिकं, पादिकं, विंशक, त्रिंशक, द्विक, त्रिक, शत्य, शतिकम् । मूल्यैरिति किम् ? देवदत्तेन क्रीतम् । पाणिना क्रीतम् । प्रत्यये सति न विज्ञायते वृत्तिर्द्विवचनेन बहुवचनेन वा कृता इति सङ्ख्याविशेषस्याऽनवगमात् द्विवचनबहुवचनान्तान्न भवति । प्रस्थाभ्या प्रस्थैर्वा क्रीतमिति । यत्र तु सङ्ख्याविशेषावगमे प्रमाणमस्ति तत्र भवत्येव । द्वाभ्यां क्रीत —द्विकम् । त्रिकम् । द्वाभ्या प्रस्थाभ्या क्रीत—द्विप्रस्थम् । त्रिप्रस्थम् । यथा मुद्गैं क्रीत—मौद्गिकम् । माषिकम् । न ह्येकेन मुद्गेन माषेण वा क्रय सभवति ।

१०६. तस्य वापे ।

तस्येति षष्ठ्यन्ताद् वापेऽर्थे यथाविहितमिकणादय प्रत्यया भवन्ति । उप्यतेऽस्मिन्निति वाप. क्षेत्रम् । प्रस्थस्य वाप —प्रास्थिकम् । द्रौणिकं, मौद्गिक, शत्य, शतिक, खारीकम् ।

१०७. वात-पित्त-श्लेष्म-संनिपाताच्छमन-कोपनयोः ।

वातादिभ्य. षष्ठ्यन्तेभ्य शमने कोपने चार्थे यथाविहित प्रत्ययो भवति । शाम्यति येन तच्छमनम् । कुप्यति येन तत्कोपनम् । वातस्य शमनं कोपन वा—वातिकम् । पैत्तिकं, श्लैष्मिक, सांनिपातिकम् । पथ्यमपथ्य च द्रव्याद्येवमभिधीयते प्रकरणात् तु विशेषगतिः ।

१०८. निमित्ते संयोगोत्पाते ।

सयोग —सबन्ध. । प्राणिनां शुभाशुभसूचको महाभूतपरिणाम. उत्पात. । तस्येति षष्ठ्यन्तान्निमित्तेऽर्थे यथाविहितं प्रत्ययो भवति योऽसौ निमित्त स चेत् सयोग उत्पातो वा भवति । शतस्य निमित्त धनपतिसयोग —शत्यः, शतिक । साहस्र. । उत्पात—सोमग्रहणस्य निमित्तमुत्पात —सोमग्रहणिको भूमिकम्प । साग्रामिकमिन्द्रधनु । मौभिक्षिक. परिवेष.[1] । शतस्य निमित्त दक्षिणाक्षिस्पन्दन—शत्य, शतिकम् । साहस्रम् । संयोगोत्पाते इति किम् ? शतस्य निमित्तं चैत्र ।

१०९. द्विस्वरब्रह्मवर्चसादऽसंख्यापरिमाणाऽश्वादेर्यः ।

पूर्वमनुवर्तते । संख्यापरिमाणाश्वादिवर्जिताद् द्विस्वरान्नाम्नो ब्रह्मवर्चसशब्दाच्च षष्ठ्यन्तात् निमित्तेऽर्थे यः प्रत्ययो भवति स चेन्निमित्त सयोग उत्पातो वा भवति । इकणादीनामपवादः । धनस्य निमित्त सयोग उत्पातो वा—धन्य. ।

---

१. सूर्यं परितो मण्डलाकार ।

यशस्यः, आयुष्यः । वात्या विद्युत् । ब्रह्मवर्चसस्य[1] निमित्तं संयोग उत्पातो वा—ब्रह्मवर्चस्यः । कथं गोर्निमित्तं संयोग उत्पातो वा गव्यः ? द्विस्वराऽभावात् **'गोः स्वरे यः'** [६/२/३०] इति भविष्यति । द्विस्वरेति किम् ? विजयस्य निमित्त संयोग उत्पातो वा—वैजयिकः । आभ्युदयिकः । ब्रह्मवर्चसग्रहणमद्विस्वरार्थम् । असंख्यापरिमाणाश्वादेरिति किम् ? सङ्ख्या—पञ्चानां निमित्तं संयोग उत्पातो वा—पञ्चकः । सप्तकः । परिमाण—प्रास्थिकः, खारीकः ।

ऊर्ध्वमानं किलोन्मानं, परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात्, संख्या बाह्या तु सर्वतः ।।

इति सङ्ख्यापरिमाणयोर्विशेषः[2] । अश्वादि—आश्विकः, गाणिकः, वासुकः । अश्व, गण, वसु, वस्त्र, ऊर्णा, उमा, भङ्गा, वर्षा, अश्मन् इत्यश्वादिः ।

११०. पुत्रादीयश्च ।

तस्येति षष्ठयन्तात् पुत्रशब्दान्निमित्तेऽर्थे ईयश्चकाराद्यश्च प्रत्ययौ भवतः स चेन्निमित्तं संयोग उत्पातो वा भवति । पुत्रस्य निमित्तं संयोग उत्पातो वा—पुत्रीयः, पुत्र्यः ।

१११. पृथिवी-सर्वभूमेरीश-ज्ञातयोश्चाञ् ।

षष्ठ्यन्ताभ्यां पृथिवीसर्वभूमिभ्यां ईश, ज्ञात इत्येतयोरर्थयोः निमित्तं, संयोग, उत्पात—इत्यस्मिन् विषये चाञ् प्रत्ययो भवति । ईशः स्वामी । पृथिव्या ईशः—पार्थिवः । सर्वभूमेः सार्वभौमः । सर्वभूमेरनुशतिकादित्वादुभयपदवृद्धिः । पृथिव्याः ज्ञातः—पार्थिवः । कर्तरि षष्ठी संबन्धविवक्षायां वा । एवं सार्वभौमः । पृथिव्या निमित्त संयोग उत्पातो वा—पार्थिवः । सार्वभौमः ।

११२. लोकसर्वलोकाद् ज्ञाते ।

षष्ठ्यन्ताभ्यां लोकसर्वलोकशब्दाभ्यां ज्ञातेऽर्थे यथाविहितमिकण् प्रत्ययो भवति । लोकस्य ज्ञात —लौकिकः । सार्वलौकिकः । सर्वलोकशब्दस्यानुशतिकादित्वादुभयपदवृद्धिः ।

११३. तदऽस्मिन्नऽस्मै वृद्धयायलाभशुल्कोपदा दीयते ।

तदिति प्रथमान्तादस्मिन्निति सप्तम्यर्थे अस्मै इति चतुर्थ्यर्थे वा दीयते इत्यस्मिन् विषये यथाविहितं प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेद् वृद्धिरायो लाभः शुल्कमुपदा वा भवति । अधमर्णेनोत्तमर्णाय गृहीतधनातिरिक्तं देयं वृद्धिः । ग्रामादिषु स्वामिग्राह्यो भाग आयः । पटादीनामुपादान मूल्यातिरिक्त प्राप्तं द्रव्यं लाभः । वणिजां रक्षानिर्वेशो राजभागः शुल्कम् । उपदा उत्कोचः[3] । पञ्चास्मिन् शते वृद्धिर्दीयते—पञ्चकं शतम् । पञ्चास्मिन् ग्रामे आयः—पञ्चको ग्रामः । पञ्चास्मिन् पटे लाभः—पञ्चकः पटः । पञ्चास्मिन् शते शुल्कः—पञ्चकं शतम् । पञ्चास्मिन् व्यवहारे उपदा—पञ्चको व्यवहारः । एवं शतमस्मिन् वृद्धिरायो लाभः शुल्कमुपदा वा दीयते—शत्यं, शतिकम् । साहस्रं, प्रास्थिकं, द्रौणिकम् । अस्मै—पञ्चास्मै देवदत्ताय वृद्धिरायो लाभः शुल्कमुपदा वा दीयते—पञ्चको देवदत्तः । शत्यः, शतिकः, साहस्रः, प्रास्थिकः, द्रौणिकः । वृद्धयादिग्रहणं किम् ? पञ्च मूल्यमस्मिन्नस्मै वा दीयते ।

---

१. ब्राह्मणस्तपःस्वाध्यायादेर्वर्चसस्तेजो ब्रह्मवर्चसम् ।

२. इह सङ्ख्याग्रहणं किमर्थम् ? परिमाणग्रहणेनैव सङ्ख्या गृह्यते । सङ्ख्या हि परिमाणं भवति । परिमीयते परिच्छिद्यते इयत्तावधार्यते येन तद्धि परिमाणं सङ्ख्ययापि च इयत्तावधार्यते इत्याह ।

३. लञ्च इति यावत् ।

११४. पूरणार्धाट्ठिकः ।

पूरणप्रत्ययान्तादर्धशब्दाच्च तदिति प्रथमान्तादस्मिन्नस्मै वा दीयते इत्यर्थे इकः प्रत्ययो भवति यत्तत्प्रथमान्त वृद्ध्यादि चेद् भवति । इकणिकटोरपवादः । द्वितीयमस्मिन्नस्मै वा वृद्धिरायो लाभः शुल्कमुपदा वा दीयते—द्वितीयिकः । तृतीयिकः, पञ्चमिकः, षष्ठिकः । अर्धः—अर्धिकः, अर्धिका स्त्री । अर्धशब्दो रूप्यकार्धे रूढः ।

११५. भागाद्यच्च ।

भागशब्दात् तदस्मिन्नस्मै वा वृद्ध्यायलाभशुल्कोपदा दीयते इत्यर्थे यश्चकारादिकश्च प्रत्ययौ भवतः । इकणोऽपवादौ । भागोऽस्मिन्नस्मै वा वृद्ध्यादीनामन्यतम दीयते—भाग्यः, भागिकः । भागिका स्त्री । भागशब्दोऽपि रूप्यकार्धस्य वाचकः ।

११६. अस्य भृतिवस्नांशाः ।

तदित्यनुवर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितमिकणादयः प्रत्यया भवन्ति यत्तत्प्रथमान्तं चेत् भृतिर्वस्नमंशा वा भवति । भृतिर्वेतनम् । वस्नं नियतकालक्रयमूल्यम् । अंशो भागः । पञ्चास्य भृतिः—पञ्चकः कर्मकरः । पञ्चास्य वस्नं—पञ्चकः पटः । पञ्चास्यांशाः—पञ्चकं नगरम् । एवं सप्तकः, अष्टकः, शत्यः, शतिकः, साहस्रः, प्रास्थिकः ।

११७. मानम् ।

तदस्येत्यनुवर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेन्मानं भवति । मीयते येन तन्मानम् । प्रस्थो मानमस्य प्रास्थिको राशिः । द्रौणिकः, खारीकः, खारीशतिकः, खारीसहस्रिकः । वर्षशतं मानमस्य वार्षशतिको देवदत्तः । वार्षसहस्रिकः । पञ्च लोहितानि पञ्च लोहिन्यो वा मानमस्य पाञ्चलोहितिकम् । पाञ्चकलायिकम् । अनयोः संज्ञाशब्दत्वात् **'द्विगोः ष्लुगनपत्ये'** [७/२/६६] इति ष्लुग् न भवति । अथ मासो मानमस्य, वर्षं मानमस्य—इत्यादौ कस्मात् प्रत्ययो न भवति ? उच्यते—न कालो[1] मानग्रहणेन गृह्यते, **'मानसंवत्सरस्य…'** [८/४/१०] इत्यादौ मानग्रहणे सत्यपि संवत्सरग्रहणात् ।

११८. जीवितस्य सन् ।

जीवितस्य यन्मानं ततः प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति स च सन्—तस्य **'द्विगोः ष्लुगनपत्ये'** [७/२/६६] इति प्राप्तोऽपि ष्लुग् न भवतीत्यर्थः । षष्टिर्जीवितमानमस्य षाष्टिकः । साप्ततिकः, वार्षशतिकः, वार्षसहस्रिकः । द्वे षष्टी जीवितमानमस्य द्विषाष्टिकः । त्रिषाष्टिकः, द्विसाप्ततिकः, त्रिसाप्ततिकः, द्विवार्षशतिकः, त्रिवार्षशतिकः, द्विवार्षसहस्रिकः, त्रिवार्षसहस्रिकः । कथं[2] पुनः षष्ट्यादयो जीवितमानं भवन्ति ? उच्यते—वृत्तौ[3] वर्षशब्दलोपात् । यथा—शतायुर्वै पुरुषः । एवं तर्हि मानमित्यनेनैव सिद्धे किमर्थमिदम् ? नैवम् । प्रास्थिकः इत्यादौ व्रीह्यादय एव मेयाः त एव च प्रत्ययार्थः । अत्र तु जीवितं मेयं पुरुषस्तु प्रत्ययार्थ इत्येतदर्थं[4] लुगभावार्थं च ।

११९. संख्यायाः संघसूत्राऽध्ययनेषु ।

तदस्य मानमित्यनुवर्तते । संख्यावाचिनः प्रथमान्तादस्य मानमित्यर्थे यथाविहितं प्रत्ययो भवति यत्तदस्येति

---

१. मीयते येन अनया व्युत्पत्त्या कालस्यापि ग्रहणं प्राप्नोति ।

२. दिनादीनामपि कथं षष्ट्यादिर्न लभ्यत इत्याह……वृत्तौ वर्षेति ।

३. यथा शतं वर्षाणि आयुः यस्यासौ शतायुः इत्यत्र समासवृत्तौ गतार्थत्वात् वर्षशब्दलोपः ।

४. पूर्वसूत्रे मेयः प्रत्ययार्थोऽत्र मानवाचिनी प्रकृतिः, जीवितं मेयं प्रत्ययार्थस्तु मेयवानित्यर्थः ।

निर्दिष्ट तच्चेत् सघ सूत्रमध्ययन वा भवति । संघ—प्राणिना समूह । सूत्र—शास्त्रग्रन्थ. । अध्ययन—पाठोऽधीति. । पञ्च गावो मानमस्य पञ्चक सघ । सप्तक: । अष्टावध्याया मानमस्य अष्टक पाणिनाय सूत्रम् । दशक वैयाघ्रपदीयम् । शतक निदानम् । अष्टौ रूपाणि वारा वा मानमस्याष्टकमध्ययनम् । सघसूत्राध्ययनेष्विति किम् ? पञ्च वर्णा मानमस्य पञ्चतय पदम् । पद न सघो न सूत्र नाध्ययनमिति को न भवति । अपि तु तयडेव । एव चतुष्टयी शब्दाना प्रवृत्ति. । पञ्चादीना सख्ययानामवयवतया सघादेर्मानत्वान्मानमित्यनेनैव सिद्धयति, परत्वात् तु तयट् प्राप्नोति तद्बाधनार्थं वचनम् । न चातिप्रसङ्ग[1] । अभेदरूपापन्ने सघादौ तयडयटोर्बाधकमिदम् । भेदरूपापन्ने तु तयडेव । चतुष्टयं ब्राह्मणक्षत्रियविट्शूद्रा. । द्वयं दवमनुष्या. । स्याद्वादाश्रयणाच्चात्र भेदाभेदयो. सभव इति ।

१२०. संज्ञायाम् ।

सख्यावाचिनस्तदस्य मानमित्यर्थे यथाविहित प्रत्ययो भवति सज्ञाया विषये । पञ्चेति सख्या मानमेषा पञ्चका शकुनय । त्रिका: शालङ्कायना. । सप्तका ब्रह्मवृक्षा । अष्टका राजपय । योगविभागकरणात् सज्ञाया पञ्चैव पञ्चका , त्रय एव त्रिका. इति स्वार्थे वा प्रत्ययो भवति ।

१२१. विंशत्यादयः ।

विंशत्यादय. शब्दा सज्ञाया विषये तदस्य मानमित्यर्थे साधवा भवन्ति । द्वेर्दशदर्थे[2] विभाव. शतिश्च प्रत्यय. । द्वौ दशतौ मानमेषा सख्येयानामस्य वा सख्यानस्य विंशति । त्रेस्त्रिभाव: शच्च प्रत्यय । त्रयो दशतो मानमेषा सख्येयानामस्य वा सख्यानस्य त्रिंशत् । चतुरश्चत्वारिभाव शच्च प्रत्यय । चत्वारो दशतो मानमेषा सख्येयानामस्य वा सख्यानस्य चत्वारिंशत् । पञ्चन आत्व च—पञ्चाशत् । षषस्ति षष् च—षष्टि । सप्तनस्ति.—सप्तति । अष्टनोऽशीभावश्च—अशीति । नवनस्ति —नवति । दशन शभावस्तश्च प्रत्यय । दश दशतो मानमेषा सख्ययानामस्य वा सख्यानस्य शतम् । दश शतानि मानमेषां सख्येयानामस्य वा सख्यानस्य सहस्रम् । एव दश सहस्राण्ययुतम् । दशायुतानि नियुतम् । दश नियुतानि प्रयुतम् । दश प्रयुतान्यर्बुदम् । दशार्बुदानि न्यर्बुदम् । बहुवचनात् लक्षकोटिखर्वनिखर्वादयो भवन्ति[3] । पञ्च पादा मानमस्या. पङ्क्तिश्छन्द । पिपीलिकापङ्क्तिरित्यादौ तु पचिण् विस्तारे इत्यस्मात् क्त्यन्ताद् भवति । यदत्र लक्षणेनानुक्तन्न तत्सर्व निपातनात् सिद्धम् । लिङ्गसख्यानियमश्च **'विंशत्याद्या शताद् द्वन्द्वे, सा चैक्ये द्वन्द्वमेययोः'**[4] इति लिङ्गानुशासनात् सिद्ध ।

१२२. पञ्चद्दशतौ वर्गे वा ।

पञ्चत्, दशत्—इत्येतौ शब्दौ तदस्य मानमित्येतस्मिन् विषये वर्गेऽभिधेये डत्प्रत्ययान्तौ वा निपात्येते। पक्षे का भवति । पञ्च मानमस्य वर्गस्य—पञ्चद्वर्ग , पञ्चको वर्ग । दशद्वर्ग , दशको वर्गः ।

१२३. त्रैश चात्वारिंशं ब्राह्मणाख्यायाम् ।

त्रिंशत्, चत्वारिंशत्—इत्येताभ्यां तदस्य मानमित्यर्थे डण् प्रत्ययो निपात्यते ब्राह्मणाख्याया सत्याम् । ब्राह्मणो वेदेषु मन्त्रव्यतिरिक्तो भाग । त्रिंशदध्याया मानमेषा त्रैशानि, चात्वारिंशानि कानिचित् ब्राह्मणान्येवमुच्यन्ते ।

१२४. स्तोमे डट् ।

सख्यावाचिन प्रथमान्तादस्य मानमित्यर्थे स्तोमेऽभिधेये डट् प्रत्ययो भवति। ऋगादीना समूह: स्तोम. ।

---

१ संघे वाच्ये क एवेति ।
२ 'पञ्चद्दशतौ वर्गे वा' [७/२/१२२] इति दशच्छब्दो वर्गेऽर्थे निपात्यते ।
३ दशायुतानि लक्ष, दश प्रयुतानि कोटि , दशार्बुदानि खर्वं, दश खर्वाणि निखर्वम् ।
४ श्रीभिक्षुलिङ्गानुशासन, स्त्रीलिङ्गाधिकार , श्लोक ७ ।

पञ्चदश ऋचो मानमस्य पञ्चदशः स्तोमः। विंशः, पञ्चविंशः, त्रिंशः। पञ्चदशी पङ्क्तिः। डित्त्वात् टिलोपः। टित्त्वादीप्।

१२५. तं पचति द्रोणाद् वाञ्।

तमिति द्वितीयान्तात् द्रोणशब्दात् पचतीत्यर्थे अञ् प्रत्ययो वा भवति। पक्षे इकण्। द्रोणं पचति—द्रौणः, द्रौणिकः। द्रौणी, द्रौणिकी स्थाली गृहिणी वा। द्वौ द्रोणौ पचति—द्विद्रोणी। **'द्विगोः प्लुगर्ह्यः'** [७/२/९६] इति अञिकणोर्लुक्।

१२६. संभवत्यवहरति च।

तमिति द्वितीयान्तान्नाम्नः संभवति अवहरति पचति चार्थे यथाविहितं प्रत्यया भवन्ति। तत्राधेयस्य प्रमाणानतिरेकेण धारणं संभवः। अतिरेकेणाऽवहारः। प्रस्थं पचति संभवति अवहरति वा—प्रास्थिकः कटाहः। प्रास्थिकी स्थाली। एवं खारीकः, कौडविकः। संभवतिरकर्मकः[1] सकर्मकश्च संभवति। तत्र सकर्मक इह ग्राह्यः। संभवति अवगृह्णातीत्यर्थः। चकारः पचत्या संभवत्यवहरत्योः समुच्चयार्थः[2], तेनोत्तरत्र अर्थत्रयस्याप्यनुवृत्तिः।

१२७. पात्राचिताढकादीनो वा।

पात्र, आचित, आढक—इत्येतेभ्यो द्वितीयान्तेभ्यः पचति, संभवति, अवहरति इत्येतेष्वर्थेषु ईन प्रत्ययो वा भवति। पक्षे इकण्। पात्रं पचति संभवत्यवहरति वा—पात्रीणः, पात्रिकः। पात्रीणा, पात्रिकी स्थाली। आचितीना, आचितिकी। आढकीना, आढकिकी। पात्रादयः परिमाणशब्दाः।

१२८. द्विगोरिकट् च।

पात्राचिताढकान्तात् द्विगोर्द्वितीयान्तात् पचत्यादिषु त्रिष्वर्थेषु इकट् चकारादीनश्च प्रत्ययौ वा भवतः। पक्षे इकण्। तस्य च **'द्विगोः प्लुगर्ह्यः'** [७/२/९६] इति लुक् नानयोर्विधानसामर्थ्यात्। द्वे पात्रे पचति संभवत्यवहरति वा—द्विपात्रीणः, द्विपात्रिकः, द्विपात्रः। द्विपात्रीणा, द्विपात्रिकी, द्विपात्री। द्व्याचितीना, द्व्याचितिकी। द्व्याचिता—लुकि आचितान्तादीप् न भवति, **'तद्धितलुकि परिमाणादबिस्ताचितकम्बल्यात्'** [२/३/८२] इत्यत्र बिस्तादिप्रतिषेधात्। द्व्याढकीना, द्व्याढकिकी, द्व्याढकी। टित्त्वादीप्। चकारः ईनेन सह इकटः समावेशार्थो न त्वाकर्षणार्थः, तेनोत्तरत्र द्वयोरपि प्रत्यययोरनुवर्तनं भवति।

१२९. कुलिजाद् वा लुक् च।

कुलिजान्ताद् द्विगोर्द्वितीयान्तात् पचत्यादिषु त्रिष्वर्थेषु ईन, इकट्—इत्येतौ प्रत्ययौ वा भवतः। पक्षे इकण्। तस्य लुक् च वा। तेन चातूरूप्यं संपद्यते। द्वे कुलिजे पचति संभवत्यवहरति वा—द्विकुलिजीना, द्विकुलिजिकी। पक्षे द्विकुलिजी, द्वैकुलिजिकी। लुकि **'तद्धितलुकि परिमाणाद्…'** [२/३/८२] इत्यादिना ईप्। अन्ये तु लुग्विकल्पं न मन्यन्ते। तन्मते त्रैरूप्यमेव।

१३०. हरतिवहत्यावहति वंशादेर्भारात्।

वंशादिभ्यः परो यो भारशब्दस्तदन्ताद् द्वितीयान्तान्नाम्नो हरति, वहति, आवहति—इत्येतेष्वर्थेषु यथाविहितं प्रत्ययो भवति। वंशभारं हरति वहति आवहति वा—वांशभारिकः। कौटभारिकः। वंशादेरिति किम्? भारं वहति।

---

१. यथा—प्रस्थोऽत्र संभवति—माति, नातिरिच्यते इत्यकर्मकः। प्रस्थमयं संभवति—अवगृह्णाति, न निर्वमति—नातिरेचयतीति सकर्मकः।

२. न तु आकर्षणार्थः। तेन चानुकृष्टमित्यस्याऽप्रवृत्तिः।

कथं भारवाहस्तु भारिकः। मत्वर्थीयेन इकेन भविष्यति। भारादिति किम्? वंश हरति। अयमर्थः—भारभूतेभ्यो वंशादिभ्यो द्वितीयान्तेभ्यो हरत्यादिष्वर्थेषु यथाविहित प्रत्ययो भवति। भारभूतान् वंशान् हरति वहति आवहति वा—वांशिकः। कौटिक., वाल्वजिक.। भारादिति किम्? एकं वंश हरति। हरति देशान्तर प्रापयति चोरयति वा। वहति उत्क्षिप्य धारयति। आवहति उत्पादयति। वंशादिगणो यथा—वंश, कुट, कुटज, वल्वज, मूल, स्थूणा, अक्ष, अश्मन्, इक्षु, खट्वा, श्लक्ष्ण इति वंशादिः।

१३१. वस्नद्रव्याविककः।

वस्न, द्रव्य—इत्येताभ्यां द्वितीयान्ताभ्यां हरत्यादिष्वर्थेषु यथासख्यं इक, क इत्येतौ प्रत्ययौ भवतः। वस्नं हरति वहति आवहति वा—वस्निकः। एवं द्रव्यकः।

१३२. अर्हति।

तमित्यनुवर्तते। तमिति द्वितीयान्तादर्हतीत्यर्थे यथाविहित प्रत्ययो भवति। श्वेतच्छत्रमर्हति—श्वैतच्छत्रिक.। वैषिकः, वास्त्रिकः, वास्त्रयुगिक, आभिषेचनिकः, बालीवर्दिक., चार्मरिक., शत्य., शतिक., साहस्र.। भोजनमर्हति, पानमर्हति इत्यादौ तु अनभिधानान्न भवति।

१३३. दण्डादेर्यः।

दण्डादिभ्यो द्वितीयान्तेभ्योऽर्हतीत्यर्थे य प्रत्ययो भवति। इकणोऽपवाद.। दण्डमर्हति—दण्ड्य.। मुसल्य। दण्डादयो यथा—दण्ड, मुसल, मेधा, वध, मधुपर्क, अर्घ, मेघ, उदक, इभ, कशा, युग इति दण्डादि.।

१३४. यज्ञादियः।

यज्ञशब्दाद् द्वितीयान्तादर्हतीत्यर्थे इय. प्रत्ययो भवति। यज्ञमर्हति—यज्ञियो देश। यज्ञियो यजमान.। यज्ञो नाम क्रियासमुदायः कश्चित्।

१३५. पात्रात् तौ।

पात्रशब्दाद् द्वितीयान्तादर्हतीत्यर्थे तौ—य, इय इत्येतौ प्रत्ययौ भवत। पात्रमर्हति—पात्र्य., पात्रिय।

१३६. कडङ्गर-दक्षिणा-स्थालीबिलादीययौ।

कडङ्गर, दक्षिणा, स्थालीबिल—इत्येतेभ्यो द्वितीयान्तेभ्योऽर्हतीत्यर्थे ईय, य—इत्येतौ प्रत्ययौ भवत। कडङ्गरं—माषादिकाष्ठम्। तदर्हति—कडङ्गरीय., कडङ्गर्यो गो.। दक्षिणामर्हति—दक्षिणीय., दक्षिण्यो विप्र। स्थालीबिलीया, स्थालीबिल्यास्तण्डुला.। पाकार्हा इत्यर्थ.।

१३७. छेदादेर्नित्यम्।

नित्यमिति अर्हतीत्यस्य विशेषणम्। छेदादिभ्यो द्वितीयान्तेभ्यो नित्यमर्हतीत्यर्थे यथाविहितं प्रत्ययो भवति। छेदं नित्यमर्हति—छैदिकः। भैदिकः। छेदादयो यथा—छेद, भेद, द्रोह, दोह, नर्त, गोनर्त, कर्ष, विकर्ष, प्रकर्ष, विप्रकर्ष, प्रयोग, विप्रयोग, संप्रयोग, प्रेक्षण, संप्रश्न, विप्रश्न इति छेदादिः।

१३८. विरागाद् विरङ्गश्च।

विरागशब्दाद् द्वितीयान्तान्नित्यमर्हतीत्यर्थे यथाविधि प्रत्ययस्तत्संनियोगे च विरागशब्दस्य विरङ्गादेशो भवति। नित्यं विरागमर्हति—वैरङ्गिकः।

१३९. शीर्षच्छेदाद्यो वा ।

शीर्षच्छेदशब्दाद् द्वितीयान्तान्नित्यमर्हतीत्यर्थे यः प्रत्ययो वा भवति । पक्षे इकण् । शीर्षच्छेदं नित्यं अर्हति—शीर्षच्छेद्यश्चोरः, शैर्षच्छेदिकः ।

१४०. शालीनकौपीनार्त्विजीनम् ।

शालीन, कौपीन, आर्त्विजीन—इत्येते शब्दास्तमर्हतीत्यर्थे ईनञ्प्रत्ययान्ता निपात्यन्ते । नित्यमिति निवृत्तं निपातनस्येष्टविषयत्वात् । शालीन इति शालाप्रवेशनशब्दादीनञ् उत्तरपदस्य च लुक् । शालाप्रवेशनमर्हति—शालीनः । अकारस्य वृद्धिनिमित्तत्वात् पुंवद्भावो न भवति । शालीनाभार्य । शालीनशब्दोऽधृष्टपर्यायः । कौपीन इति कूपप्रवेशनमर्हति —कौपीनः । कौपीनशब्द. पापकर्मणि गोपनीयपायूपस्थे तदावरणे च चीवरखण्डे वर्तते । आर्त्विजीन इति ऋत्विज्शब्दात् ऋत्विक्कर्मशब्दाद् वा ईनञ् प्रत्ययः कर्मशब्दलोपश्च निपात्यते । ऋत्विजमर्हति—आर्त्विजीनः यजमान । ऋत्विक्कर्म अर्हति—आर्त्विजीनः ऋत्विगेव । अर्हदर्थस्य पूर्णोऽवधिः ।

१४१. तुरायणपारायणाभ्यां यजमानाधीयानयोः ।

तमित्यनुवर्तते । आभ्यां द्वितीयान्ताभ्यां यथासंख्यं यजमानेऽधीयाने चार्थे इकण् प्रत्ययो भवति । तुरायणं नाम यज्ञस्तं यजते—तौरायणिकः । पारायणमधीते—पारायणिकः ।

१४२. संशयात् प्राप्ते ज्ञेये ।

द्वितीयान्तात् संशयशब्दात् प्राप्तेऽर्थे इकण् प्रत्ययो भवति स चेत् प्राप्तोऽर्थो ज्ञेयो भवति । संशयं प्राप्तः—सांशयिकः । सांशयिकोऽयमूर्ध्वो न जाने स्थाणुरुत पुरुष इति । सांशयिकश्चैत्रो न जाने जीवति उत मृत इति । ज्ञेय इति किम् ? संशयितरि मा भूत् । सोऽपि हि संशयं प्राप्तो भवति । तस्य तत्र भावात् ।

१४३. तस्मात् क्रोशयोजनपूर्वाच्छताद्योजनाच्चाभिगमार्हे ।

तस्मादिति पञ्चम्यन्तात् क्रोशशब्दपूर्वात् योजनशब्दपूर्वाच्च शतात् योजनशब्दाच्च अभिगमार्हेऽर्थे इकण् प्रत्ययो भवति । क्रोशशतादभिगमनमर्हति—क्रौशशतिको मुनि । यौजनशतिकः साधुः । यौजनिको मुनिः ।

१४४. तमेभ्यो गच्छति ।

तमिति द्वितीयान्तेभ्य एभ्यः—क्रोशशत, योजनशत, योजन, इत्येतेभ्यो गच्छतीत्यर्थे इकण् प्रत्ययो भवति । क्रोशशतं गच्छति—क्रौशशतिकः । यौजनशतिकः, यौजनिको वा दूतः । एभ्य इति किम् ? नगरं गच्छति चैत्रः ।

१४५. पथ इकट् ।

द्वितीयान्तात् पथिन्शब्दाद् गच्छतीत्यर्थे इकट् प्रत्ययो भवति । पन्थानं गच्छति—पथिकः । पथिकी स्त्री । टित्त्वादीप् । द्वौ पन्थानौ गच्छति—द्विपथिकः । द्विपथिकी स्त्री । कटमकृत्वा इकड्वचनं समासान्ते कृतेऽपि यथा स्यादित्येवमर्थम् ।

१४६. णो नित्यं पन्थश्च ।

द्वितीयान्तात् पथिन्शब्दान्नित्यं गच्छतीत्यर्थे णः प्रत्ययो भवति पथिन्शब्दस्य च पन्थादेशः । पन्थानं नित्यं गच्छति—पान्थः । पान्था स्त्री । द्वौ पन्थानौ नित्यं गच्छति—द्वैपन्थः । द्वैपन्था स्त्री । नित्यमिति किम् ? पथिकः ।

१४७. अज-शङ्कूत्तर-वारि-जङ्गल-स्थल-कान्तारादेस्तेनाहृते च ।

अजादिपूर्वात् पथिन्शब्दात् तेनेति तृतीयान्तादाहृते चकाराद् गच्छति चार्थे इकण् प्रत्ययो भवति । अजपथेनाहृतो गच्छति वा— आजपथिक । एव शाङ्कुपथिक , औत्तरपथिक., वारिपथिक , जाङ्गलपथिक , स्थालपथिक , कान्तारपथिक ।

१४८. स्थलादेर्मधुकमरिचयोरण् ।

स्थलपूर्वात् पथिन्शब्दात् तृतीयान्तादाहृतेऽर्थे मधुकमरिचयोरभिधेययोरण् प्रत्ययो भवति । स्थलपथेनाहृत मधुक मरिच वा—स्थालपथम् । मधुकमरिचयोरिति किम् ? स्थालपथिकमन्यत् ।

१४९. कालात् परिजय्य-लभ्य-कार्य-सुकरेषु ।

तेनेत्यनुवर्तते । कालविशेषवाचिन· शब्दात् तेनेति तृतीयान्तात् परिजय्ये लभ्ये कार्ये सुकरे चार्थे इकण् प्रत्ययो भवति । मासेन परिजय्य लभ्यं कार्यं सुकर वा—मासिकम् । आर्धमासिक. सांवत्सरिकम् । कालादिति किम् ? चैत्रेण परिजय्यम् ।

१५०. निर्वृत्ते ।

तेनेति कालादिति चानुवर्तते । तेनेति तृतीयान्तात् कालवाचिनो निर्वृत्तेऽर्थे इकण् प्रत्ययो भवति । अह्ना निर्वृत्त — आह्निकम् । मासिक, आर्धमासिक, सांवत्सरिकम् । कालादिति किम् ? चैत्रेण निर्वृतम् ।

१५१. तस्मै भृताधीष्टयोश्च ।

कालादित्यनुवर्तते । तस्मै इति चतुर्थ्यन्तात् कालवाचिनो भृतेऽधीष्टे चार्थे इकण् प्रत्ययो भवति । भृतो वेतनेन क्रीत. । अधीष्ट सत्कृत्य व्यापारित । मासाय भृत·—मासिक. कर्मकर. । मास कर्मणे भृत इत्यर्थ । मासायाधीष्ट — मासिक उपाध्याय. । मासमध्यापनायाधीष्ट इत्यर्थ । एव वार्षिक, सांवत्सरिक । चकारो निर्वृत्ताद्यर्थपञ्चकस्य उत्तरत्रानुवृत्त्यर्थ ।

१५२. तं भूतभाविनोश्च ।

कालादित्यनुवर्तते । तमिति द्वितीयान्तात् कालवाचिनो भूते भाविनि चार्थे इकण् प्रत्ययो भवति । मास भूत — मासिको व्याधि । मास भावी · मासिक उत्सव । एव वार्षिक., सांवत्सरिक· । चकारादित पर निर्वृत्तादिषु पञ्चस्वर्थेषु यथासंभव विधि ।

१५३. षण्मासादऽवयसि ण्येकौ ।

षण्मासशब्दात्कालवाचिनस्तेन निर्वृत्ते, तस्मै भृताधीष्टयोश्च, त भूतभाविनोश्च इत्यस्मिन् विषये अवयसि गम्यमाने ण्य, इक—इत्येतौ प्रत्ययौ भवत । षड्भिर्मासैर्निर्वृत्त , षण्मासेभ्यो भृतोऽधीष्टो वा, षण्मासान् भूतो भावी वा— षाण्मास्य., षाण्मासिक. । अवयसीति किम् ? षण्मासान् भूत —षण्मास्य । **'षण्मासाद्यणिकणः'** [७/२/१६०] इति यः ।

१५४. समाया ईनः ।

समाशब्दात्कालवाचिनो तेन निर्वृत्ते इत्याद्यर्थपञ्चकविषये ईन· प्रत्ययो भवति । समया निर्वृत्त·, समायै भृतोऽधीष्टो वा, समां भूतो भावी वा—समीन· ।

१५५. रात्र्यहःसंवत्सराच्च द्विगोर्वा ।

रात्रि, अहन्, संवत्सर—इत्येतदन्तात् समाशब्दान्ताच्च द्विगोस्तेन निर्वृत्ते इत्याद्यर्थपञ्चकविषये ईनः प्रत्ययो वा

भवति। द्वाभ्यां रात्रिभ्यां निर्वृत्तः, द्वाभ्यां रात्रिभ्यां भृतोऽधीष्टो वा, द्वे रात्री भूतो भावी वा—द्विरात्रीणः। त्रिरात्रीणः। एवं द्व्यहीनः, द्विसंवत्सरीणः, द्विसमीनः। पक्षे इकण्। द्वैरात्रिकः, द्वैयह्निकः। द्वैयहिक इति तु द्व्यहशब्दात् समाहार-द्विगोरिकणि भवति। द्विसांवत्सरिकः। 'मानसंवत्सरस्य···' [८/४/१०] इत्यादिनोत्तरपदवृद्धिः। द्वैसमिकः। रात्र्यन्तादहरन्ताच्च परमपि समासान्तं[1] बाधित्वा अनवकाशत्वादीन्[2] एव भवति। तथा च समासान्तसंनियोगे उच्यमानः 'सर्वांशसंख्याव्ययात्' [८/३/१०] इति अह्लादेशो न भवति। समान्तात्पूर्वेण नित्ये प्राप्ते शेषेभ्योऽप्राप्ते विकल्पः।

१५६. वर्षादश्च।

वर्षशब्दो यः कालवाची तदन्ताद् द्विगोस्तेन निर्वृत्ते इत्याद्यर्थपञ्चकविषये अश्चकारादीनश्च प्रत्ययौ वा भवतः। पक्षे इकण्। एवं त्रैरूप्यं भवति। द्वाभ्यां वर्षाभ्यां निर्वृत्तः, द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा, द्वौ वर्षौ द्वे वर्षे वा भूतो भावी वा—द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः। त्रिवर्षः, त्रिवर्षीणः, त्रिवार्षिकः। 'संख्याधिकाभ्यां वर्षस्याऽभाविनि' [८/४/६] इति उत्तरपदवृद्धिः। भाविनि तु प्रतिषेधात् द्वैवर्षिकः, त्रैवर्षिकः।

१५७. प्राणिनि भूते।

कालवाचिवर्षशब्दान्ताद् द्विगोर्भूतेऽर्थे अः प्रत्ययो भवति स चेत् भूतः प्राणी भवति। द्वे वर्षे भूतः—द्विवर्षो दारकः। त्रिवर्षो वत्सः। प्राणिनीति किम्? द्विवर्षः, द्विवर्षीणः, द्विवार्षिकः सरकः। भूत इति किम्? शेषेष्वर्थेषु पूर्वेण विकल्प एव। द्विवर्षः, द्विवर्षीणः, द्विवार्षिको मनुष्यः। भाविन्यपि केचिदिच्छन्ति। एवमुत्तरेष्वपि त्रिषु। पूर्वेण विकल्पे प्राप्ते नित्यार्थो विधिः।

१५८. मासाद् वयसि यः।

मासशब्दान्ताद् द्विगोर्भूतेऽर्थे यः प्रत्ययो भवति वयसि गम्यमाने। द्वौ मासौ भूतः—द्विमास्यः। त्रिमास्यो दारकः। वयसीति किम्? द्वैमासिको व्याधिः। त्रैमासिको व्याधिः। द्वैमासिको नायकः। भूते इति किम्? द्वौ मासौ भावी—द्वैमासिको युवा।

१५९. ईनञ् च।

द्विगोरिति निवृत्तं योगविभागात्। मासशब्दाद् भूतेऽर्थे ईनञ् चकाराद्यश्च प्रत्ययो भवति वयसि गम्यमाने। मासं भूतः—मासीनः, मास्यो दारकः। ञकारो वृद्धिहेतुत्वेन पुंवद्भावाभावार्थः। मासीना स्वसाऽस्य मासीनास्वसृकः। वयसीति किम्? मासिको नायकः।

१६०. षण्मासाद्ययणिकणः[3]।

षण्मासशब्दात् कालवाचिनो भूतेऽर्थे य, यण्, इकण्—इत्येते प्रत्यया भवन्ति वयसि गम्यमाने। षण्मासान् भूतः—षण्मास्यः, षाण्मास्यः, षाण्मासिकः। भूते इति किम्? षण्मासान् भावी। वयसीति किम्? षाण्मास्यः षण्मासिको वा नायकः। 'षण्मासादवयसि···' [७/२/१५३] इति ण्येकौ।

१६१. षष्टिकः।

तृतीयान्तात् षष्टिरात्रशब्दात् पच्यते इत्यर्थे के प्रत्यये रात्रशब्दलोपे च षष्टिक इति निपात्यते। षष्टिरात्रेण

---

१. रात्रिशब्दात् 'सर्वांशसंख्यातपुण्यवर्षा···' [८/३/५५] इत्यनेन प्राप्तः अह्लस्तु 'सर्वांशसंख्याऽव्ययात्' [८/३/१०] इत्यनेन।

२. अन्यथा रात्र्यन्ताऽहरन्ताऽभावात् न भवति।

३. षण्मासाद्ययणौ चेति सिद्धे इकण्ग्रहणं प्रत्युदाहरणे इकण्निवृत्त्यर्थम्। अत एव प्रत्युदाहरणे वाक्यमेव दर्शितम्।

पच्यते इति षष्टिको धान्यविशेष ।

१६२. महानाम्न्यादीनां ब्रह्मचर्ये ।

महानाम्न्यादिभ्यः सूत्रे निर्देशादेव षष्ठ्यन्तेभ्यो ब्रह्मचर्येऽभिधेये इकण् प्रत्ययो भवति। महानाम्नीनां ऋचां ब्रह्मचर्य—माहानाम्निकम् । गौदानिकं,[1] आदित्यव्रतिकम् । महानाम्न्यादय प्रयोगगम्याः ।

१६३. चन्द्रायणं च चरति ।

चन्द्रायणशब्दान्निर्देशादेव द्वितीयान्तात् महानाम्न्यादिभ्यश्चार्थान् द्वितीयान्तेभ्यश्चरत्यर्थे इकण् प्रत्ययो भवति। चन्द्रायण चरति—चान्द्रायणिक । महानाम्न्यो नाम ऋच, तत्साहचर्यात् तासां व्रतमपि महानाम्न्य । महानाम्नीव्रतं चरति—माहानाम्निक. । गौदानिकः, आदित्यव्रतिकः ।

१६४. देवव्रतादीन् डिन् ।

देवव्रतादिभ्यो निर्देशादेव द्वितीयान्तेभ्यश्चरत्यर्थे डिन् प्रत्ययो भवति। देवव्रत चरति—देवव्रती। तिलव्रती, महाव्रती, अवान्तरदीक्षी । देवव्रतादयः प्रयोगगम्या । डित्करणमुत्तरत्र टिलोपार्थम् ।

१६५. अष्टाचत्वारिंशतं डकश्च वर्षाणां व्रते ।

वर्षाणां सबन्धिनोऽष्टाचत्वारिंशच्छब्दाद् व्रतवृत्तेर्निर्देशादेव द्वितीयान्ताच्चरत्यर्थे डकश्चकारात् डिन् च प्रत्ययौ भवत । अष्टाचत्वारिंशद् वर्षमहितं व्रतं अष्टाचत्वारिंशत्, तच्चरति—अष्टाचत्वारिंशक, अष्टाचत्वारिंशी ।

१६६. चातुर्मास्यं तौ यलोपश्च ।

चातुर्मास्यशब्दाद् व्रतवृत्तेर्निर्देशादेव द्वितीयान्ताच्चरत्यर्थे तौ—डकडिनौ प्रत्ययौ यलोपश्चास्य भवति। चतुर्षु मासेषु भवानि—'**यज्ञे ञ्यः**' [७/१/३६] इति ञ्य, चातुर्मास्यानि नाम यज्ञकर्माणि। तत्सहचरितानि व्रतानि चातुर्मास्यानि, तानि चरति—चातुर्मासक., चातुर्मासी।

१६७. यज्ञानां दक्षिणायाम् ।

यज्ञवाचिभ्यो निर्देशादेव षष्ठ्यन्तेभ्यो दक्षिणायामर्थे इकण् प्रत्ययो भवति। यज्ञकर्मकृतां वेतनादान दक्षिणा। अग्निष्टोमस्य दक्षिणा—आग्निष्टोमिकी । वाजपेयिकी, राजसूयिकी, नावयज्ञिकी, पाञ्चौदनिकी, ऐकादशाहिकी, द्वादशाहिकी, द्वैवाजपेयिकी । बहुवचन स्वरूपविधेर्व्युदासार्थम् ।

१६८. तत्र देये ।

यज्ञवाचिभ्यस्तत्रेति सप्तम्यन्तेभ्यो देयेऽर्थे इकण् प्रत्ययो भवति। अग्निष्टोमे देयं—आग्निष्टोमिकम् । वाजपेयिकं भक्तम् ।

१६९. कालात् कार्येऽपि भववत् ।

तत्रेत्यनुवर्तते। कालवाचिन. सप्तम्यन्ताद् देये अपिशब्दात्[2] कार्ये चाऽर्थे भववत् प्रत्यया भवन्ति। यकाभ्यः

---

1 गाव इति लोम्नामाख्या । गवां लोम्नां दान लवनमित्यर्थ. । यावत् गोदानं न करोति तावद् ब्रह्मचर्यमिति ।

2. चमनुक्त्वा अपिवचनमुत्तरत्र देयकार्ययोर्द्वयोरप्यनुवर्तनार्थम् । चकारे तु चानुकृष्टं नानुवर्तते इति न्याय उत्तरत्र देयानुवर्तनं बाधेत ।

प्रकृतिभ्यो येन विशेषेण ये प्रत्यया भवेऽर्थे भवन्ति ताभ्यः प्रकृतिभ्यस्तेन विशेषेण कार्ये देये चाऽर्थे ते प्रत्यया भवन्ति। वद्धि सर्वसादृश्यार्थः। यथा—वर्षासु भवं वार्षिकं, मासिक, शारदिकं श्राद्ध कर्म, शारदिकः शारदो वा रोग आतपो वा, नैश, नैशिकं, प्रादोषं, प्रादोषिकं, शौवस्तिकं, परुत्न पुराण, पूर्वाह्णेतन, सायतन, चिरन्तनं, पौषं, शैशिरं, सान्ध्यं, सावत्सरं फलं पर्व वा, हैमन्तं, हैमनं, प्रावृषेण्यमिति भवति। एवं वर्षासु देयं कार्यं वा वार्षिकं, मासिकमित्यादि भवति। प्रत्ययस्य भावोऽत्रातिदिश्यते नाऽभाव इति द्विगो. परस्य लुग् न भवति। द्वयोर्मासयोर्देयं कार्यं वा—द्वैमासिकम्। त्रैमासिकम्।

१७०. व्युष्टादिभ्योऽण्।

तत्रेत्यनुवर्तते। सप्तम्यन्तेभ्यो व्युष्टादिभ्यो देये कार्ये चाऽर्थे अण् प्रत्ययो भवति। व्युष्टे देय कार्यं वा—वैयुष्टम्। व्युष्टं—प्रभातम्। नैत्यम्। व्युष्टादयो यथा—व्युष्ट, नित्य, निष्क्रमण, प्रवेशन, तीर्थ, संग्राम, संघात, अग्निपद, पीलुमूल, प्रवास, उपवास। इत्याकृतिगणोऽयम्।

१७१. यथाकथाचाण्णः।

यथाकथाचशब्दोऽव्ययसमुदायोऽनादरे वर्तते। यथाकथाचशब्दाद्देये कार्ये चाऽर्थे णः प्रत्ययो भवति। यथाकथाच दीयते—याथाकथाचम्। याथाकथाचा दक्षिणा।

१७२. तेन हस्ताद्यः।

तेनेति तृतीयान्ताद् हस्तशब्दात् देयं कार्ये चार्थे य. प्रत्ययो भवति। हस्तेन देय कार्य वा—हस्त्यम्।

१७३. शोभते।

तेनेति तृतीयान्तात् शोभते इत्यर्थे इकण् प्रत्ययो भवति। कर्णवेष्टकाभ्या शोभते—कार्णवेष्टकिक मुखम्। एवं वास्त्रयुगिकं शरीरम्। औपानहिकौ पादौ। असमर्थनञ्समासोऽप्यस्मिन् विषये भवति। कर्णवेष्टकाभ्यां न शोभते—अकार्णवेष्टकिकम्। अवास्त्रयुगिकम्।

१७४. कर्मवेशाद्यः।

कर्मन्, वेश—इत्येताभ्या तृतीयान्ताभ्या शोभते इत्यर्थे य. प्रत्ययो भवति। कर्मणा शोभते—कर्मण्यं शौर्यम्। वेशेन शोभते—वेश्यो नटः। वेश्या नर्तकी। अत्रापि पूर्ववन्नञ्समासो भवति। अकर्मण्यः, अवेश्यः। केचिद् वेशस्थाने वेषं पठन्ति। वेष्यो नटः।

१७५. तस्मै प्रभवति संतापादेः।

तस्मै इति चतुर्थ्यन्तेभ्य संतापादिभ्य. प्रभवतीत्यर्थे इकण् प्रत्ययो भवति। संतापाय प्रभवति—सांतापिक। सांग्रामिक। संतापादयो यथा—संताप, संग्राम, सनाह, संयोग, संपराय, संघात, सपाद, संपादन, संक्रम, सपेष, सवेश, संमोदन, निष्पेष, निःसर्ग, निर्घोष, निसर्ग, विसर्ग, उपसर्ग, प्रवास, उपवास, सक्तु, मांस, ओदन, मांसौदन, सक्तुमासौदन इति संतापादिः।

१७६. योगाद्यो वा।

योगशब्दात् तस्मै प्रभवतीत्यर्थे य. प्रत्ययो वा भवति। योगाय प्रभवति—योग्यः। पक्षे इकण्। यौगिकः।

१७७. कर्मण उकञ्।

कर्मन्शब्दात् तस्मै प्रभवतीत्यर्थे उकञ् प्रत्ययो भवति। कर्मणे प्रभवति—कार्मुकम्।

१७८. सोऽस्य प्रयोजनम् ।

स इति प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति तत्प्रथमान्तं चेत्प्रयोजनं भवति । प्रयोजनं फलं कारणं वा । जिनमहः प्रयोजनमस्य जैनमहिकम् । ऐन्द्रमहिकं, आभिषेचनिकं, दैपोत्सविकम् ।

१७९. एकागाराच्चौरे ।

एकागारशब्दात् तदस्य प्रयोजनमित्यर्थे इकण् प्रत्ययो भवति चौरेऽभिधेये । एकमसहायमगार प्रयोजनमस्य ऐकागारिकश्चौरः । ऐकागारिकी । चौरे नियमार्थं वचनं, तेनान्यत्र न भवति । एकागारं प्रयोजनमस्य भिक्षोरिति वाक्यमेव ।

१८०. चूडादिभ्योऽण् ।

चूडादिभ्यस्तदस्य प्रयोजनमित्यर्थे अण् प्रत्ययो भवति । चूडा प्रयोजनमस्य चौडम् । चूला चौलम् । उपनयन औपनयनम् । श्रद्धा श्राद्धम् । चूडादयः प्रयोगगम्या. ।

१८१. विशाखाषाढाभ्यां मन्थदण्डयोः ।

विशाखा, आषाढा—इत्येताभ्या तदस्य प्रयोजनमित्यर्थे अण् प्रत्ययो भवति यथासङ्ख्य मन्थे दण्डे चाभिधेये । मन्थो विलोडनं तद्दण्डो वा । विशाखा प्रयोजनमस्य वैशाखो मन्थ । आषाढा, आषाढे, आषाढा प्रयोजनमस्य आषाढो दण्डः ।

१८२. उत्थापनादेरीयः ।

उत्थापनादिभ्यस्तदस्य प्रयोजनमित्यर्थे ईय प्रत्ययो भवति । उत्थापन प्रयोजनमस्य उत्थापनीय. । उपस्थापनीय । उत्थापनादयो यथा—उत्थापन, उपस्थापन, अनुप्रवचन, अनुवाचन, अनुवदन, अनुवादन, अनुपान, अनुवासन, आरम्भण, समारम्भण इत्युत्थापनादिः ।

१८३. विशि-पूरि-पदि-रुहि-समापिभ्योऽनडन्तसपूर्वपदेभ्यः ।

विश्यादिभ्योऽनट्प्रत्ययान्तेभ्य. सपूर्वपदेभ्यस्तदस्य प्रयोजनमित्यर्थे ईय प्रत्ययो भवति । विशि—गृहप्रवेशन प्रयोजनमस्य गृहप्रवेशनीयम् । सवेशनीय, अनुवेशनीय, अनुप्रवेशनीय, समावेशनीयम् । पूरि—प्रपापूरणीय, महापूरणीयम् । पदि—अश्वप्रपदनीय, गोप्रपदनीयम् । रुहि—प्रासादारोहणीय, प्ररोहणीयं, आरोहणीयं, अनुरोहणीय, अन्वारोहणीयम् । समापि—अङ्गसमापनीय, श्रुतस्कन्धसमापनीयं, व्याकरणसमापनीयम् ।

१८४. स्वर्गादिभ्यो यः ।

स्वर्गादिभ्यस्तदस्य प्रयोजनमित्यर्थे य प्रत्ययो भवति । स्वर्गः प्रयोजनमस्य स्वर्ग्यम् । यशस्य, आयुष्य, काम्यं, धन्यम् । स्वर्गादयः प्रयोगगम्याः ।

१८५. पुण्याहवाचनादिभ्यो लुक् ।

पुण्याहवाचनादिभ्यस्तदस्य प्रयोजनमित्यर्थे विहितस्येकणो लुग् भवति । पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम् । स्वस्तिवाचन, शान्तिवाचनम् । पुण्याहवाचनादयः प्रयोगगम्याः ।

१८६. समयात् प्राप्तः ।

सोऽस्येत्यनुवर्तते । स इति प्रथमान्तात् समयशब्दादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति योऽसौ प्रथमान्तः प्राप्तश्चेत्स भवति । समय. प्राप्तोऽस्य सामयिकं कार्यम् । उपनतकालमित्यर्थः[1] ।

---

१. उपस्थितकालम् ।

१८७. ऋत्वादिभ्योऽण् ।

ऋतु इत्येवमादिभ्यः सोऽस्य प्राप्त इत्यर्थे अण् प्रत्ययो भवति । ऋतुः प्राप्तोऽस्य आर्तवं पुष्पफलम्[1]। उपवस्ता प्राप्तोऽस्य औपवस्त्रम्[2] । प्राशिता प्राप्तोऽस्य प्राशित्रम्[3] । ऋत्वादयः प्रयोगगम्याः ।

१८८. कालाद्यः ।

कालशब्दात् सोऽस्य प्राप्त इत्यर्थे यः प्रत्ययो भवति । कालः प्राप्तोऽस्य काल्यस्तापसः । काल्या मेघाः ।

१८९. दीर्घः ।

कालशब्दात् प्रथमान्तादस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति योऽसौ प्रथमान्तः स चेद्दीर्घो भवति । दीर्घः कालोऽस्य कालिकमृणम् । कालिकं वैरम् । कालिकी संपत् । योगविभागादिकण् । यविधाने हि कालाद्यो दीर्घश्च इत्येकमेव सूत्रं क्रियेत ।

१९०. ब्रह्मचर्यतद्वतोः ।

सोऽस्येत्यनुवर्तते । स इति प्रथमान्तात् कालवाचिनोऽस्येति षष्ठ्यर्थे इकण् प्रत्ययो भवति ब्रह्मचर्ये तद्वति चाभिधेये । यत्तदस्येति निर्दिष्टं तच्चेद् ब्रह्मचर्यं ब्रह्मचारी वा भवतीत्यर्थः । मासोऽस्य ब्रह्मचर्यस्य—मासिकं ब्रह्मचर्यम् । आर्धमासिकं, सांवत्सरिकम् । मासोऽस्य ब्रह्मचारिणः—मासिको ब्रह्मचारी । मासं ब्रह्मचर्यमस्येत्यर्थः । एवं आर्धमासिकः, सांवत्सरिकः ।

१९१. आकालिकमिकश्चाद्यन्ते ।

आकालिकमिति शब्दरूपमिकान्तमिकणन्तं च निपात्यते । आकालशब्दादिक इकण् च भवत्यर्थे भवतीत्यर्थः । आद्यन्ते—आदिरेव यद्यन्तो गम्यते । कथं चादिरेवान्तो भवति ? उच्यते—यस्मिन् काले यत् प्रवृत्तमनध्यायादि तस्मिन्नेव[4] काले प्रत्यावृत्ते यदि तदुपरमेत । यदि वा यस्मिन्नेव काले क्षणादौ विद्युदादेर्जन्म यदि तस्मिन्नेव काले विनश्येन्नात्मलाभकालादूर्ध्वं तिष्ठेदित्यर्थः । आकालं भवति—आकालिकोऽनध्यायः । पूर्वेद्युर्यस्मिन् काले तृतीये चतुर्थे वा यामे प्रवृत्तः पुनरपरेद्युरपि आ तस्मात् कालाद् भवन् आकालिकोऽनध्याय उच्यते । आकालिका आकालिकी वा वृष्टिः । स्त्रियामिकेकणोर्विशेषः । आकालिका आकालिकी वा विद्युत् । आजन्मकालमेव भवन्ती जन्मानन्तरविनाशिनी ऊर्ध्वमननुवर्तमाना एवमुच्यते । एवं च द्वेधाप्यादिरेवान्तो भवति । आद्यन्त इति किम् ? सर्वकालभाविनि मा भूत् । निपातनमादावन्ते चेति द्वन्द्वनिवृत्त्यर्थम्[5] । अथवा निपातनस्येष्टविषयत्वात् समानकालशब्दस्याकालादेशः । आद्यन्त इति च द्वन्द्वः प्रकृतिविशेषणम् । आद्यन्तयोर्वर्तमानात् समानकालशब्दात् प्रथमान्तादस्येति षष्ठ्यर्थे इकेकणौ प्रत्ययौ निपात्येते समानकालशब्दस्य चाकालादेशः । समानकालावाद्यन्तावस्याकालिकोऽनध्यायः । आकालिका, आकालिकी विद्युत् । समानकालताद्यन्तयोः पूर्ववद् वेदितव्या ।

---

१. पुष्पं स्त्रीरजः ।

२. उपोषितपारणके यद् भक्ष्यद्रव्यं तदौपवस्त्रम् । पुरुषस्तूपवस्ता ।

३. बालस्य यत् प्रथमं भोजनं तदुच्यते प्राशित्रम् ।

४. इह यद्यपि गतः कालो न प्रत्यावर्तते तथापि सामान्येन तुल्यः कालः स एवोच्यते । तथा च वक्तारो भवन्ति । अद्य यस्मिन् काले भवानायातः श्वः सोपि तस्मिन्नेव काले समागमिष्यति ।

५. यद्येवं आकालिकमिति निपातनं किमर्थम् ? आकालादिकश्चाद्यन्त इत्युच्यमानेपि सिध्यति । उच्यते—निपातनाभावे आद्यन्त इति द्वन्द्वोपि विज्ञायेत, ततश्चाकालादिकश्च भवति आदौ अन्ते च गम्यमाने इत्यपि स्यात् । ततश्च यत् कुतश्चिदारब्धं आ कुतश्चित् कालाद् भवति तत्रापि प्रत्ययः प्रसज्येत ।

तृतीयश्चरणः

१. यः ।

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामो यावत् प्रत्ययान्तरमीयोऽधिकरिष्यते तावत् तत्र य इत्येतदपवाद-विषयं परिहृत्याधिकृतं वेदितव्यम् ।

२. तं वहति रथ-युग-प्रासङ्गात् ।

तमिति द्वितीयान्तेभ्यो रथ, युग, प्रासङ्ग—इत्येतेभ्यो वहतीत्यर्थे यः प्रत्ययो भवति । रथं वहति—रथ्यः । द्वौ रथौ वहति—द्विरथ्यः । युगं वहति—युग्यः । इहाऽनभिधानान्न भवति—कालसञ्ज्ञकं युगं वहति राजा । '**विपूयविनीय-जित्य**···' [५/१/४५] इत्यादिनिपातनादेव युग्य इति सिद्धे इदमर्थविवक्षायामण्बाधनार्थं युगग्रहणम् । यो हि युगं वहति स युगस्य सबन्धी भवति । प्रसज्यते इति प्रासङ्गः । यत् काष्ठं वत्साना दमनकाले स्कन्धे आसज्यते, तद् वहति यः स प्रासङ्ग्यः । यत्त्वन्यत् यत्प्रसङ्गादागतं प्रासङ्गमिति तद् वहति न भवत्यनभिधानात् । ननु यो रथं वहति स रथस्य वोढा भवति । तत्र '**रथात् सपूर्वाच्च वोढ्रङ्गे यः**' [७/१/११३] इत्येव सिद्धं, तत्किं रथग्रहणेन ? सत्यम् । अलुगर्थं तु तस्य ग्रहणं, तेन हि ये विधीयमाने '**द्विगोरनपत्ये यस्वरादेर्लुगद्विः**' [६/२/२६] इति लुका भवितव्यम् । द्वयो रथयोर्वोढा—द्विरथः । अनेन हि विधीयमाने न भवति अप्राग्दीव्यतीयत्वात् । एवं च द्विगौ रूपद्वयं सपन्नं भवति ।

३. धुरो यैयणौ ।

धुर्शब्दाद् द्वितीयान्तात् वहतीत्यर्थे य, एयण्—इत्येतौ प्रत्ययौ भवतः । धुरं वहति—धुर्यः, धौरेयः । एयण् वेत्यकृत्वा यग्रहणमिदमर्थविवक्षाया वहत्यर्थेऽण्बाधनार्थम् । यो हि यद् वहति स तस्य सबन्धी । कश्चित् तु यङेयकणा-वपीच्छति । तन्मते धुर्यः । स्त्रियां टित्त्वादीप् । धुरी । धौरेयकः ।

४. वामाद्यादेरीनः ।

वाम आदिर्येषा ते वामादयः । तत्पूर्वात् धुर इत्येतदन्ताद् द्वितीयान्ताद् वहतीत्यर्थे ईनः प्रत्ययो भवति । वामा धूर्वामधुरा । समासान्तादाप् । वामधुरां वहति—वामधुरीणः । एवं सर्वधुरीणः, उत्तरधुरीणः, दक्षिणधुरीणः । वामादयः प्रयोगगम्याः । सर्वधुर्यः इत्यत्र यप्रत्ययोऽपीति कश्चित् । धुरीणः इति केवलादपि ईनः इत्यन्यः ।

५. अश्चैकादेः ।

एकशब्दादेर्धुर् इत्येतदन्ताद् द्वितीयान्ताद् वहतीत्यर्थे अः प्रत्ययो भवति चकारादीनश्च । एका एकस्य वा धूः—एकधुरा । एका धूरस्मिन्नेकधुरम् । तां तद्वा वहति—एकधुरः, एकधुरीणः ।

६. हलसीरादिकण् ।

हल, सीर—इत्येताभ्यां द्वितीयान्ताभ्यां वहतीत्यर्थे इकण् प्रत्ययो भवति । हलं वहति—हालिकः । सैरिकः ।

७. शकटादण्।

शकटशब्दाद् द्वितीयान्ताद् वहतीत्यर्थे अण् प्रत्ययो भवति। शकटं वहति—शाकटो गौः। ननु च 'तस्येदं' [७/१/११२] इति शकटादण् 'हलसीराट्ठिकण्' [७/३/६] इति हलसीराभ्यामिकण् च सिद्ध एव। यो हि यद् वहति स तस्य सबन्धी भवति, तत्किमाभ्याम्? सत्यम्। रथवदेव तदन्तार्थमुपादान, तेनात्रापि द्विगौ द्वैरूप्यं भवति। द्वयोः शकटयोर्हलयोः सीरयोर्वा वोढा—द्विशकटः, द्विहलः, द्विसीरः। द्वे शकटे हले सीरे वा वहति—द्वैशकटः, द्वैहलिकः, द्वैसीरिकः।

८. विध्यत्यऽनन्येन।

तमित्यनुवर्तते। तमिति द्वितीयान्ताद् विध्यतीत्यर्थे यः प्रत्ययो भवति, स चेद् विध्यन्नात्मनोऽन्येन साधनेन न विध्यति। पादौ विध्यन्ति—पद्याः शर्कराः। ऊरू विध्यन्ति—ऊरव्याः कण्टकाः। उरो विध्यन्ति—उरस्या वाताः। अनन्येनेति किम्? चौरं विध्यति चैत्रः। अत्र हि चैत्रश्चौरं विध्यन् धनुषा पाषाणेन वा विध्यति। शर्करादयस्तु न साधनेन विध्यन्ति। यच्च मुखतैक्ष्ण्यादि साधनं तत्तेषामात्मनो नाऽन्यत्।

९. धनगणाल्लब्धरि।

धनगणाभ्यां द्वितीयान्ताभ्यां लब्धर्यर्थे यः प्रत्ययो भवति। धनं लब्धा—धन्यः। गणं लब्धा—गण्यः। लब्धेति तृन्नन्तम्।

१०. अन्नाण्णः।

अन्नशब्दाद् द्वितीयान्तात् लब्धर्यर्थे णः प्रत्ययो भवति। अन्नं लब्धा—आन्नः।

११. हृद्य-पद्य-तुल्य-मूल्य-वश्य-पथ्य-वयस्य-धेनुष्या-गार्हपत्य-जन्य-धर्म्यम्।

हृद्यादयः शब्दा यथास्वमर्थविशेषेषु यप्रत्ययान्ता निपात्यन्ते। हृद्य इति हृदयशब्दात् षष्ठ्यन्तात् प्रियेऽर्थे बन्धने च वशीकरणमन्त्रे यः प्रत्ययो निपात्यते। हृदयस्य प्रियं—हृद्यमौषधम्। हृद्यो देशः। हृदयस्य बन्धनः—हृद्यो वशीकरणमन्त्रः। 'हृदयस्य हृल्लेखयदण्लासेषु' [३/२/१०६] इति हृदादेशः। निपातनं रूढ्यर्थम्, तेनेह न भवति—हृदयस्य प्रियः पुत्रः। पद्य इति पदशब्दात् प्रथमान्तात् दृश्यत्वोपाधिकादस्मिन्निति सप्तम्यर्थे यः। पदमस्मिन् दृश्यं—पद्यः कर्दमः। नातिद्रवो नातिशुष्को यत्र प्रतिमुद्रोत्पादनेन पदं द्रष्टुं शक्यते। तुल्य इति तुलाशब्दात् संमितेऽर्थे यः। तुलया संमितं—तुल्यं भाण्डम्। निपातनं रूढ्यर्थम्। तेन न तुलासंमित एवोच्यते, किंतु सदृशार्थोऽपि तुल्यशब्दः। गिरिणा तुल्यो हस्ती। मूल्यमिति मूलशब्दात् प्रथमान्तादस्येति षष्ठ्यर्थे यः। तच्च यद्युत्पाटनयोग्यं भवति। मूलमेषामुत्पाट्यं—मूल्या मुद्गाः। तृतीयान्तात् चानाम्ये समे च। मूलेनानाम्यं—मूल्यम्। मूलं पटाद्युत्पत्तिकारणम्। तेनानाम्यं यत्पटादेर्विक्रयात् प्राप्यते सुवर्णादि तन्मूल्यम्। मूलेन समः—मूल्यः पटः। उपादानेन समानफल इत्यर्थः। वश्य इति वशशब्दाद् द्वितीयान्ताद् गतेऽर्थे यः। वशं गतः—वश्यो गौर्विधेयः। इच्छानुवर्तीति यावत्। निपातनं रूढ्यर्थम्, तेनेह न भवति—वशं गतः, इच्छां प्राप्तः। अभिप्रेतं गत इत्यर्थः। पथ्य इति पथिन्शब्दादनपेते यः। पथोऽनपेतं—पथ्यमोदनादि। निपातनादिह न भवति—पथोऽनपेतं शकटादि। वयस्य इति वयःशब्दात् तृतीयान्तात् तुल्येऽर्थे यः। वयसा तुल्यः—वयस्यः सखा। निपातनादिह न भवति—वयसा तुल्यः शत्रुः। धेनुष्येति धेनुशब्दाद् विशिष्टायां धेनौ यः प्रत्ययः षुगागमश्च। धेनुष्या या गोमता गोपालाय अधमर्णेन चोत्तमर्णाय आ ऋणप्रदानाद् दोहार्थं धेनुर्दीयते सा धेनुरेव धेनुष्या। पीतदुग्धेति यस्याः प्रसिद्धिः। गार्हपत्य इति गृहपतिशब्दात् तृतीयान्तात् संयुक्तेऽर्थे ञ्यः प्रत्ययः। गृहपतिना संयुक्तः—गार्हपत्यः। एवंनामा कश्चिदग्निः। निपातनादन्यत्र न भवति। जन्य इति जनीशब्दाद् वधूवाचिनो द्वितीयान्ताद् वहत्सु अभिधेयेषु जनशब्दाच्च षष्ठ्यन्ताद् जल्पेऽर्थे यः। जनीं वहन्ति—जन्याः। जामातुर्वयस्या उच्यन्ते। जनस्य जल्पः—जन्यः। निपातनादन्यत्र न भवति। धर्म्य इति धर्मशब्दात् तृतीयान्तात् प्राप्येऽर्थे पञ्चम्यन्ताच्चानपेतेऽर्थे यः। धर्मेण प्राप्यं—धर्म्यं सुखम्। धर्मादनपेतं च—धर्म्यम्। यद्धर्ममनुवर्तते।

१२. नौ-विषेण तार्य-वध्ये।

नौ, विष—इत्येताभ्यां निर्देशादेव तृतीयान्ताभ्यां यथासंख्यं तार्ये वध्ये चार्थे यः प्रत्ययो भवति। नावा तार्यं—

नाव्यमुदकम् । नाव्या नदी । विषेण वध्यो वधार्हः—विष्यः ।

१३. न्यायार्थादनपेते ।

न्याय, अर्थ- इत्येताभ्यां निर्देशादेव पञ्चम्यन्ताभ्यामनपेतेऽर्थे यः प्रत्ययो भवति । न्यायादनपेत—न्याय्यम् । अर्थादनपेतं—अर्थ्यम् ।

१४. मतमदस्य करणे ।

मत, मद—इत्येताभ्यां निर्देशादेव षष्ठ्यन्ताभ्यां करणेऽर्थे य. प्रत्ययो भवति । इष्टं साम्य[1] ज्ञान मतिर्वा मतशब्देनोच्यते । मतस्य करणं—मत्यम् । मदस्य करणं—मद्यम् ।

१५. तत्र साधौ ।

तत्रेति सप्तम्यन्तात् साधावर्थे य· प्रत्ययो भवति । साधुः प्रवीणो योग्य उपकारको वा । सामनि साधुः—सामन्यः । वेमनि साधु —वेमन्यः । कर्मणि कर्मण्य । सभायां सभ्य । शरणे शरण्य. ।

१६. पथ्यतिथि-वसति-स्वपतेरेयण् ।

पथिन्, अतिथि, वसति, स्वपति—इत्येतेभ्यस्तत्र साधावर्थे एयण् प्रत्ययो भवति । पथि साधु—पाथेयम् । आतिथेयं, वासतेयं, स्वापतेयम् ।

१७. भक्ताण्णः ।

भक्तशब्दात् तत्र साधौ ण· प्रत्ययो भवति । भक्ते साधु·—भाक्त शालि· । भाक्तास्तण्डुला ।

१८. पर्षदो ण्यणौ ।

पर्षच्छब्दात् तत्र साधौ ण्य, ण—इत्येतौ प्रत्ययौ भवत । पर्षदि साधुः—पार्षद्य , पार्षद· । परिषदोऽपीच्छन्त्यन्ये । पारिषद्य., पारिषद· ।

१९. सर्वजनाण्ण्येनञौ ।

सर्वजनशब्दात् तत्र साधौ ण्य, ईनञ्—इत्येतौ प्रत्ययौ भवतः । सार्वजन्य·, सार्वजनीन ।

२०. प्रतिजनादेरीनञ् ।

प्रतिजनादिभ्यस्तत्र साधौ ईनञ् प्रत्ययो भवति । प्रतिजने साधुः—प्रातिजनीन· । अनुजने साधु.—आनुजनीन. । इदंयुगे साधु —ऐदंयुगीन· । प्रतिजनादयो यथा—प्रतिजन, अनुजन, विश्वजन, पाञ्चजन, महाजन, इदंयुग, संयुग, समयुग, परयुग, परकुल, परस्यकुल[2], अमुष्यकुल इति प्रतिजनादि· ।

२१. कथादेरिकण् ।

कथादिभ्यस्तत्र साधावर्थे इकण् प्रत्ययो भवति । कथायां साधुः—काथिकः । वैकथिकः । कथादयो यथा— कथा, विकथा, विश्वकथा, संकथा, वितण्डा, जनेवाद, जनवाद, जनोवाद, भृशोवाद, जनभृशोवाद, वृत्ति, सग्रह, गुण, गण, आयुर्वेद, गुड, कुल्माष, गुल्मास, इक्षु, सक्तु, वेणु, अपूप, मांस, ओदन, मांसौदन, संग्राम, सघात, संवाह, प्रवास, निवास, उपवास

---

१. मनन मतम् । धातूनामनेकार्थत्वेन मतशब्द· साम्येऽपि । यथा—मतीकृता समीकृतेत्यर्थः ।

२. गणपाठात् षष्ठ्यलुक् । 'षष्ठ्याः क्षेपे' [३/२/३०] इति वा यदा परकुलसबन्धित्वेनाक्षिप्यते ।

इति कथादि ।

२२. **देवतान्तात् तदर्थे ।**

देवतान्तात् शब्दरूपात् तदर्थेऽर्थे य प्रत्ययो भवति । अर्थात् चतुर्थ्यन्तात् प्रत्ययः । अग्निदेवतायै इदं—अग्निदेवत्यम् । पितृदेवत्यं, देवदेवत्यम् । देवताशब्देन देयस्य हविरादेः प्रतिग्रहीता स्वामी दानपात्रमुच्यते ।

२३. **पाद्यार्घ्ये ।**

पाद्य, अर्घ्य—इत्येतौ शब्दौ तदर्थे यप्रत्ययान्तौ निपात्येते । पादार्थमुदकं—पाद्यम् । निपातनादेव ये पदादेशो न भवति । अर्घो मूल्यं पूजनं वा । अर्घार्थं रत्नं—अर्घ्यम् ।

२४. **अतिथेर्ण्यः ।**

अतिथिशब्दात् तदर्थे ण्यः प्रत्ययो भवति । अतिथ्यर्थं—आतिथ्यम् ।

२५. **सादेश्वा तदः ।**

अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्र आ तदन्तदिनि सूत्रं यावत् केवलस्य सादेश्च विधिर्वेदितव्यः ।

२६. **सीतया संगते ।**

सीताशब्दात् केवलात् सादेश्च निर्देशादेव तृतीयान्तात् संगतेऽर्थे य. प्रत्ययो भवति । सीतया संगतं—सीत्यम् । द्वाभ्यां सीताभ्यां संगत—द्विसीत्यम् । त्रिसीत्य, परमसीत्यम् ।

२७. **हलस्य कर्षे ।**

हलशब्दात् केवलात् सादेश्च निर्देशादेव षष्ठ्यन्तात् कर्षेऽर्थे य प्रत्ययो भवति । हलस्य कर्षः—हल्या हल्यो वा । द्वयोर्द्विहल्या । त्रिहल्या, परमहल्या, उत्तमहल्या, बहुहल्य. । यत्र हलं कृष्ट[१] स मार्गः कर्ष । कृष्यते इति कर्ष क्षेत्रमित्यन्ये । यस्य पूर्णोऽवधि ।

२८. **ईयः ।**

आ तद इत्यनुवर्तते । यदित ऊर्ध्वमनुक्रमिष्यामस्तत्रा तदोऽर्थेषु ईय इत्यधिकृतं वेदितव्यम् ।

२९. **उवर्णगवादेर्यः ।**

उवर्णान्तेभ्यो गवादिभ्यश्चा तदोऽर्थेषु य. प्रत्ययो भवति । ईयाऽपवाद । उवर्ण—शङ्कवे इदं शङ्कव्य दारु । पिचव्यः कर्पास. । परशव्यमय. । कमण्डलव्या मृत्तिका । सक्तव्या धाना. । गवादि—गवे इदं गव्यम् । हविष्यम् । सादेश्च इत्यधिकारात् सुगव्यं, अतिगव्यम् । **'गोः स्वरे यः'** [६/२/३०] इत्यनेनैव सिद्धे गोग्रहणं तदन्तार्थम् । इह यग्रहणं बाधकबाधनार्थम् । सनङ्गवे इदं—सनङ्गव्य चर्म । अत्र हि परत्वात् **'चर्मण्वम्'** [७/३/४६] इति प्राप्नोति । गवादयो यथा—गो, हविस्, अक्षर, अष्टका, बर्हिस्, युग, मेधा, स्रुच्, बीज, कूप, क्षर, खद, स्खद, विष, दाश, खर, दर, असुर, अध्वन् इति गवादिः ।

३०. **ऊधसो नश्च ।**

ऊधस्‌शब्दात् आ तदोऽर्थेषु य. प्रत्ययो भवति तत्संनियोगे नोऽन्तादेशश्च । ईयाऽपवादः । ऊधसे हितं—ऊधन्यम् ।

---

१. कृष्ट गतमित्यर्थः । कर्ष इत्याधारे घञ न तु कर्ष इति पलस्य चतुर्थो भाग. परिमाणमिह गृह्यते अनभिधानात् ।

३१. शुनः संप्रसारणं दीर्घश्च वा ।

श्वन्‌शब्दादा तदोऽर्थेषु यः प्रत्ययो भवति तत्संनियोगे सप्रसारणं तस्य दीर्घश्च वा । शुने हित—शुन्य, शून्यम् ।

३२. नाभेर्नभश्चाऽदेहांशात् ।

नाभिशब्दाददेहांशवाचिन आ तदोऽर्थेषु य प्रत्ययो भवति नाभिशब्दस्य च नभादेशो भवति । नाभ्यै नाभये वा हितं—नभ्यमञ्जनम् । नभ्योऽक्ष । नाभये इद—नभ्य दारु । अदेहांशादिति किम् ? नाभये हितं—नाभ्य तैलम् । अत्र नभादेशो न भवति । यस्तु **'शरीरावयवाद्यः'** [७/३/३७] इति भवति ।

३३. कम्बलात् संज्ञायाम् ।

कम्बलशब्दादा तदोऽर्थेषु य प्रत्ययो भवति सज्ञाया विषये । कम्बलाय हित—कम्बल्यमूर्णापलशतम् । सज्ञाया-मिति किम् ? कम्बलीया ऊर्णा ।

३४. हविरन्नभेदाऽपूपादेर्वा ।

हविर्भेदवाचिभ्य. अन्नभेदवाचिभ्य अपूपादिभ्यश्च शब्देभ्य आ तदोऽर्थेषु य प्रत्ययो वा भवति । ईयापवाद । हविर्भेद —आमिक्षायै इद दधि आमिक्ष्य, आमिक्षीयम् । पुरोडाशाय इमे—पुरोडाश्या, पुरोडाशीया तण्डुला । हविस्शब्दात् तु गवादिपाठान्नित्यमेव य । अन्नभेद ओदनाय इमे ओदन्या., ओदनीयास्तण्डुला । कृशरायै कृशर्या, कृशरीयास्तण्डुलाः । मुरायै मुर्या, मुरीयास्तण्डुला । अपूपादि —अपूपाय इद—अपूप्य, अपूपीयम् । तण्डुलाय तण्डुल्य, तण्डुलीयम् । सादेश्चेत्यधिकारात् तदन्तादपि भवति । यवापूप्य, यवापूपीयम् । व्रीहितण्डुल्य, व्रीहितण्डुलीयम् । उवर्णान्तात् तु हविरन्नभेदात् उवर्णगवादिभ्यो य. इति नित्यमेव यो भवति । चरव्यास्तण्डुला , सक्तव्या धाना. । अपूपादयो यथा—अपूप, तण्डुल, ओदन, पृथुक, अभ्यूष, अभ्योष, अवोष, किण्व, मुसल, कटक, शकट, कर्णवेष्टक, ईर्गल, इल्वल, स्थूणा, यूप, सूप, दीप, प्रदीप, अश्व, पत्र इत्यपूपादि । अपूपादिषु येऽन्नभेदशब्दा अपूपादयस्तेषा केनचिदाकारसादृश्येन अर्थान्तरवृत्तौ प्रत्ययार्थ-मुपादानम् ।

३५. तस्मै हिते ।

हित उपकारकः । तस्मै इति चतुर्थ्यन्तात् नाम्नो हितेऽर्थे यथाधिकृत प्रत्ययो भवति । वत्सेभ्यो हित—वत्सीयः । करभीय., पित्रीय., मात्रीय., गव्य., हविष्य , ऊधन्य , शुन्य , शून्य., आमिक्ष्य., आमिक्षीय, ओदन्यः, ओदनीय , अपूप्यः, अपूपीय । वत्सेभ्यो न हित —अवत्सीय. । एवमकरभीय ।

३६. न राजाचार्यब्राह्मणवृष्णः ।

राजन्, आचार्य, ब्राह्मण, वृषन्—इत्येतेभ्यश्चतुर्थ्यन्तेभ्यो हितेऽर्थेऽधिकृतः प्रत्ययो न भवति । राज्ञे हित., आचार्याय हित., ब्राह्मणाय हितः, वृष्णे हित. इति वाक्यमेव ।

३७. शरीराऽवयवाद्यः ।

शरीरावयववाचिभ्यस्तस्मै हितेऽर्थे य प्रत्ययो भवति । दन्तेभ्यो हित—दन्त्यम् । कर्ण्य, कण्ठ्य, ओष्ठ्य, नाभ्य, चक्षुष्यम् । सादेश्चेत्यधिकारात् राजदन्त्य, शङ्खनाभ्यम् ।

३८. खल-यव-माष-तिल-वृष-ब्रह्म-रथात् ।

खलादिभ्य. शब्देभ्यस्तस्मै हितेऽर्थे य प्रत्ययो भवति । खलाय हितं—खल्यम् । एव यव्यं, माष्यं, तिल्यं, वृष्य,

ब्रह्मण्यं, रथ्यम् । सादेश्चेत्यधिकारात् अश्वरथ्या भूमिः ।

३९. अजाविभ्यां थ्यः ।

अज, अवि--इत्येताभ्यां तस्मै हितेऽर्थे थ्य प्रत्ययो भवति । अजेभ्यो हितः—अजथ्यम् । अजाभ्यो हिता—अजथ्या भूमिः । अत्र 'मानिवयङ्क्वतस्त्र···' [३/२/४६] इत्यादिना पुंवद्भावः । अविभ्यो हितः—अविथ्यम् ।

४०. भोगान्तात्मभ्यामीनः ।

भोगान्तात् शब्दात् आत्मन्शब्दाच्च तस्मै हितेऽर्थे ईन प्रत्ययो भवति । पितृभोगाय हितः—पितृभोगीणः । मातृभोगीणः । ग्रामणिभोगीनः, सेनानिभोगीनः, आचार्यभोगीनः—अत्र क्षुभ्नादित्वात् न णत्वम् । आत्मने हितः—आत्मनीनः । अनात्मनीनः । 'अध्वात्मनोरीने' [८/४/८६] इति टेर्लोपो न ।

४१. पञ्चसर्वविश्वाज्जनात् कर्मधारये ।

पञ्च, सर्व, विश्व—इत्येतेभ्यः परात् जनशब्दात् कर्मधारये वर्तमानात् तस्मै हितेऽर्थे ईन प्रत्ययो भवति । ईयाऽपवादः । पञ्चजनेभ्यः पञ्चजनाय वा हितः—पञ्चजनीनः । एवं सर्वजनीनः, विश्वजनीनः । कर्मधारये इति किम् ? पञ्चानां जनः पञ्चजनः, तस्मै हितः—पञ्चजनीयः । एवं सर्वजनीयः, विश्वजनीयः ।

४२. महत्सर्वादिकण् ।

जनादित्यनुवर्तते । महतः सर्वाच्च परात् जनशब्दात् कर्मधारये वर्तमानात् तस्मै हितेऽर्थे इकण् प्रत्ययो भवति । महते जनाय हितः—माहाजनिकः । सर्वस्मै जनाय हितः—सार्वजनिकः । एवं च सर्वजनात् पूर्वेण ईनः अनेन इकण् इति द्वैरूप्यम् । कर्मधारये इति किम् ? महान् जनोऽस्य महाजनः, तस्मै हितः—महाजनीयः । सर्वेषां जनाय हितः—सर्वजनीयम् ।

४३. सर्वाण्णो वा ।

सर्वशब्दात् तस्मै हितेऽर्थे ण प्रत्ययो वा भवति । सर्वस्मै हितः—सार्वः । पक्षे ईयः । सर्वीयः ।

४४. माणवचरकाद्वीनञ् ।

आभ्यां तस्मै हितेऽर्थे ईनञ् प्रत्ययो भवति । माणवाय हितः—माणवीनम् । चारकीणम् ।

४५. तदर्थे विकृतेः प्रकृतौ ।

हित इति निवृत्तम् । प्रकृतिरुपादानकारणम् । विकृतिस्तस्या एव उत्तरमवस्थान्तरम् । तदर्थे या चतुर्थी तदन्ताद् विकृतिवाचिनः शब्दात् प्रकृतावभिधेयायां यथाधिकृतः प्रत्ययो भवति । अङ्गारेभ्य इमानि—अङ्गारीयाणि काष्ठानि । अङ्गारार्थानीत्यर्थः । एवं प्राकारीया इष्टका । शङ्कव्यं दारु । पिचव्यः कर्पासः । आमिक्ष्य, आमिक्षीयं दधि । ओदन्याः, ओदनीयास्तण्डुलाः । अपूप्यं, अपूपीयं पिष्टम् । एषु काष्ठादीनि प्रकृतिद्रव्याणि, अङ्गारादयो विकृतयः । तदर्थे इति चतुर्थीविशेषणं किम् ? मूत्राय यवागूः । उच्चाराय यवान्नम् । पादरोगाय नड्वलोदकम् । अत्र यवाग्वादि मूत्रादितया परिणमति न तु तदर्थम् । तस्मै इति किम् ? सक्तूना धानाः । धानाना यवाः । अत्र सत्यपि तादर्थ्ये संबन्धमात्रविवक्षायां षष्ठी । यथा—गुरोरिदं गुर्वर्थमिति । भवति च सतोऽप्यविवक्षा । यथा—अनुदरा कन्येति । विकृतेरिति किम् ? उदकाय कूपः । प्रकृताविति किम् ? असये कोशी ।

४६. चर्मण्यञ् ।

विकृतेश्चर्मणि प्रकृतौ वाच्यायां तदर्थं चतुर्थ्यन्तादञ् प्रत्ययो भवति । वध्र्यैइदं—वाध्रं चर्म । वरत्रायै इदं—वारत्रं चर्म । सनङ्गवे इदं सनङ्गव्यं चर्म इत्यत्र तु 'उवर्णगवादेर्यः' [७/३/२६] इति यग्रहणाद्य एव भवति ।

सनङ्गुश्चर्मविकार.[1]।

४७. ऋषभोपानहाञ्ञ्यः।

ऋषभ, उपानह्—इत्येताभ्यां तदर्थ चतुर्थ्यन्ताभ्यां विकृते प्रकृतावर्थे ञ्य प्रत्ययो भवति। ईयाऽपवाद.। ऋषभाय अय—आर्षभ्यो वत्सः। औपानह्यो मुञ्ज.। औपानह्य काष्ठम्। औपानह्य चर्मेति चर्मण्यपि परत्वादयमेव।

४८. छदिर्बलेरेयण्।

छदिस्, बलि—इत्येताभ्यां तदर्थ चतुर्थ्यन्ताभ्यां विकृतेः प्रकृतावर्थे एयण् प्रत्ययो भवति। छदि. तृणपटल । तस्मै इमानि—छादिषेयाणि तृणानि। बलये इमे—बालेयास्तण्डुलाः। चर्मण्यपि परत्वादयमेव—छादिषेय चर्म। कथमौपधेय.? उपधीयते इत्युपधेयः, स एव प्रज्ञाद्यणि स्वार्थिके औपधेय.। उपधि रथाङ्गमिति यावत्। अत उपधे स्वार्थे एयणिति नारम्भणीयम्।

४९. परिखाऽस्य स्यात्।

परिखाशब्दान्निर्देशादेव प्रथमान्तात् अस्येति षष्ठ्यर्थे विकृते प्रकृतावर्थे एयण् प्रत्ययो भवति या सा परिखा सा चेत्स्यादिति योग्यतया सभाव्यते। तदित्यनेन यथाधिकृतस्य प्रत्ययस्य विधास्यमानत्वात् इहोत्तरत्र च एयणेवानुवर्तते[2]। परिखा आसामिष्टकाना स्यादिति पारिखेय्य इष्टका.। स्यादिति सभावनं यादादि । इष्टकाना बहुत्वे सभाव्यत एतत्परिखा आसा स्यादिति। स्यादिति किम्? परिखा इष्टकानाम्। विकृते प्रकृताविति किम्? परिखास्य नगरस्य स्यात्।

५०. अत्र च।

परिखाशब्दान्निर्देशादेव प्रथमान्तादत्रेति सप्तम्यर्थे एयण् प्रत्ययो भवति सा चेत् परिखा स्यादिति सभाव्यते। परिखास्यां स्यात्—पारिखेयी भूमिः। योगविभागो विकृते प्रकृतौ इत्यस्येह असबन्धार्थ[3]। चकार उत्तरत्र अस्य स्यादिति विकृते. प्रकृतावत्र स्यादिति चोभयस्याप्यनुवृत्त्यर्थ ।

५१. तद्।

तदिति प्रथमान्तादस्येति षष्ठ्यर्थे विकृते प्रकृतौ अत्रेति सप्तम्यर्थे च यथाधिकृत प्रत्ययो भवति यत्तत् प्रथमान्त तच्चेत्स्यादिति सभाव्यते। प्राकार आसामिष्टकाना स्यात्—प्राकारीया इष्टका। प्रासादीय दारु। परशव्यमय.। प्रासादोऽस्मिन् देशे स्यात्—प्रासादीयो देशः। प्रासादीया भूमि। स्यादिति किम्? प्राकार इष्टकानाम्। विकृते. प्रकृताविति किम्? प्रासादोऽस्य चैत्रस्य स्यात्।

५२. तस्याऽर्हे क्रियायां वत्।

ईयस्य पूर्णोऽवधि.। अर्हतीत्यर्हम्। 'अच्' [५/१/६०] इत्यच्। तस्येति षष्ठ्यन्तादर्हेऽर्थे वत् प्रत्ययो भवति यत् तदर्हं तच्चेत् क्रिया भवति। राज्ञोऽर्हं राजवत् वृत्तमस्य राज्ञ। राजवस्य युक्तमस्य राज्ञो वृत्तमित्यर्थ। राजवत् अवर्तत भरत। राजार्हं[4] वर्तते स्मेत्यर्थ.। एव कुलीनवत्, साधुवत्। **'स शिरांसि द्विषामाजौ चिच्छेद कृतहस्तवत्'**। राज्ञि

---

१. पृषोदरादित्वात् सनङ्गुशब्द आदेश.।

२ एतत्सूत्रोत्तरसूत्रकरणात्। अन्यथा 'तद्' [७/३/५१] इति अनेनैव यथाधिकृतस्य सिद्धत्वादिद सूत्रद्वय व्यर्थम्।

३. तनेह विकृते प्रकृतौ सत्यामसत्यां च भवतीत्यर्थ ।

४ अत्राद्यत्वात् न भरतस्योपमानमन्यो राजाऽस्ति। स एव सर्वेषा राज्ञा उपमानभूतस्तत्र राजवदिति। राज्ञ आत्मन एवार्हं वृत्तमवर्त्ततेत्यर्थ ।

एकस्मिन्नुपमानोपमेयभावाऽसम्भवादुत्तरेण न सिद्ध्यतीति वचनम्। यदा तु राज्ञ सगरादेर्वृत्तस्याहं इदानीतनः कश्चिद् राजेति भेदो विवक्ष्यते तदोत्तरेणैव सिद्धम्। क्रियायामिति किम्? शतस्यार्हो देवदत्त.। राज्ञोऽर्हो मणि।

५३. **स्यादेरिवे।**

स्याद्यन्तादिवार्थे वत् प्रत्ययो भवति। इवशब्द सादृश्य द्योतयति। तच्चेत् सादृश्य क्रियाया क्रियाविषय क्रियागत भवति। क्षत्रिया इव क्षत्रियवत् युध्यन्ते ब्राह्मणाः। अश्ववद् धावति चैत्र। देवमिव देववत् पश्यन्ति मुनिम्। साधुनेव साधुवत् आचरितं मैत्रेण। ब्राह्मणायेव ब्राह्मणवत् दत्त क्षत्रियाय। पर्वतादिव पर्वतवदवरोहति आसनात्। स्यादेरिति किम्? गच्छन्नाम्त इव मन्दत्वादीप्सितदेशस्य असप्राप्ते[१]। अधीयानो नृत्यतीव अङ्गविकारप्रायत्वात्। क्रियायामिति किम्? गौरिव गवय.। देवदत्त इव गोमान्। हस्तीव स्थूल। अत्र द्रव्यगुणविषये सादृश्ये न भवति। कथ देवदत्तवत् स्थूल, यज्ञदत्तवत् गोमान् इति। अत्र तुल्यायामस्तौ भवतौ चाध्याह्रियमाणाया प्रत्ययो भविष्यति।

५४. **तत्र।**

तत्रेति सप्तम्यन्तात् इवार्थे वत् प्रत्ययो भवति। मथुरायामिव मथुरावत् पाटलिपुत्रे प्रासादा। स्रुघ्न इव साकेते परिखा स्रुघ्नवत्। गुरुवद् गुरुपुत्रे वर्तितव्यमित्यादिषु क्रियासादृश्ये पूर्वेणैव सिद्धम्। अक्रियार्थस्तु आरम्भ.।

५५. **तस्य।**

तस्येति षष्ठ्यन्तादिवार्थे वत् प्रत्ययो भवति। चैत्रस्येव मैत्रस्य गावश्चैत्रवत्। ब्राह्मणस्येव क्षत्रियस्य दन्ताः ब्राह्मणवत्। अक्रियाविषयसादृश्यार्थ आरम्भः। योगविभाग उत्तरार्थ.।

५६. **भावे त्वतलौ।**

तस्येति षष्ठ्यन्ताद् भावेऽभिधेये त्व, तल—इत्येतौ प्रत्ययौ भवत। भवतोऽस्मादभिधानप्रत्ययौ[२] इति भावः, शब्दस्य प्रवृत्तिनिमित्त द्रव्यसंसर्गी भेदको गुण.। यदाहु.—यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति। तत्र—

जातिगुणाज्जातिगुणे, समासकृत्तद्धितात्तु सबन्धे।
डित्थादेः स्वे रूपे, त्वतलादीनां विधिर्भवति॥

तत्र जातिवचनेभ्यो जातौ—गो शब्दस्य भावो गोत्व, गोता। अत्र गोशब्दजातिर्भाव। गोरर्थस्य भावो गोत्व, गोता। अत्र गवार्थजातिर्भाव। एवं अश्वत्व, अश्वता। शुक्लस्य गुणस्य भाव शुक्लत्व, शुक्लता इत्यत्र शुक्लगुणजाति.। रूपस्य भावो रूपत्वं, रूपता। एव रसत्वं, रसता। अत्र रूपादिगुणजातिः। कत्वं, खत्वमिति भिन्नवर्णव्यक्तिसमवेता जाति। कवर्गत्वं, चवर्गत्वमिति ककारादिवर्गव्यक्तिसमवेता जाति. सहति.। गुणशब्देभ्यो गुणे—शुक्लस्य पटस्य भाव शुक्लत्व, शुक्लता। अत्र शुक्लो गुणो भावः। एव शुक्लतरत्वं, शुक्लतमत्वमिति स एव प्रकृष्ट.। अणुत्व, महत्त्वमिति परिमाणलक्षणो गुण.। एकत्वं, द्वित्वमिति संख्यालक्षण। पृथक्त्व, नानात्वमिति भेदलक्षण.। उच्चैस्त्व, नीचैस्त्वमिति उच्छ्रयादिलक्षणः। वृत्तौ पृथगादिशब्दाः पृथग्भूताद्यर्थे सत्वे वर्तन्ते इति प्रत्यय, विग्रहस्तु पृथग्भूतस्य भाव इत्यादि। पट्वादयोऽपि गुणा एवेति पटुत्व, मृदुत्वम्। तीक्ष्णत्वमित्यादिष्वपि गुणो भाव.। समासात् सबन्धे—राजपुरुषत्वं, चित्रगुत्वम्। अत्र स्वस्वामिसंबन्धः। कृत. सबन्धे—पाचकत्वं, पक्तृत्वं, कार्यत्व, साधनत्वम्। अत्र क्रियाकारकसबन्धः। तद्धितात् संबन्धे—औपगवत्वं, दण्डित्वं, विषाणित्वम्। अत्रोपगुदण्डादिसबन्ध.। डित्थादेः स्वरूपे—डित्थस्य भावः स्वरूप डित्थत्वम्।

---

१ यथा आसीनोऽभिमतं देशं न प्राप्नोति तथैव गच्छन्नपि।

२. यद्यपि पूर्वं ज्ञानं पश्चाच्छब्द इति क्रमस्तथापि स्वराद्यदन्तत्वात् अभिधानस्य 'स्वराद्यन्तं' [३/१/१७३] इति पूर्वनिपात एवमाह।

डवित्थत्वम् । एव गोजातेर्भावो गोत्व, गोतेति गोशब्दस्य[1] स्वरूपम् । शुक्लजातेर्भाव शुक्लत्व, शुक्लतेति शुक्लशब्दस्य स्वरूपम् । गवादयो हि यदा जातिमात्रवाचिनस्तदा तेषा शब्दस्वरूपमेव प्रवृत्तिनिमित्तम् । तथा ह्यर्थजातौ शब्दार्थयोरभेदेन शब्दस्वरूपमध्यवस्यते यो गोशब्द स एवार्थ इति । एव देवदत्तत्व, चन्द्रत्व, सूर्यत्व, आकाशत्व, अभावत्वमिति स्वरूपमेवोच्यते । **'भावे वा'** [६/२/२९] इति वचनात् स्त्रीपुसाभ्यां पक्षे नञ्स्नञावपि भवत । स्त्रीत्व, स्त्रीता, **स्त्रैणम्** । पुस्त्व, पुस्ता, पौस्नमिति । लकार: स्त्रीत्वार्थ । त्वान्तं तु **त्वाद्यन्तं त्वमभिव्याप्य भावे द्वंद्वकता तथा**[2] इति लिङ्गानुशासनान् नपुसकम् ।

५७. प्राक्त्वादऽगडुलादेः ।

त्वतलावित्यनुवर्तते । **'ब्रह्मणस्त्व.'** [७/३/७८] इत्यत्र यत्त्वसशब्दन तस्मात् प्राक् त्व, तल्- इत्येतौ प्रत्ययावधिकृतौ वेदितव्यौ **गडुलादीन्** वर्जयित्वा । ते उत्तरत्रैवोदाहरिष्यन्ते । अपवादै समावेशार्थ. कर्मणि विधानार्थश्चाधिकार । अगडुलादेरिति किम् ? गाडुल्य, कामण्डलवम् । गडुलादयो यथा— गडुल, विशस्त, दायाद, बालिश, सवादिन्, बहुभाषिन्, शीर्षघातिन्, शीर्षघातिन्, कमण्डलु इति गडुलादि । एषु कमण्डलो. **'लघुपूर्वाद् य्वृवर्णात्'** [७/३/७२] इत्यण्. शेषेभ्यस्तु राजादेराकृतिगणत्वात् टयण् । गडुलादेरपि केचिदिच्छन्ति- -गडुलत्व, गडुलता ।

५८. नञ्तत्पुरुषादऽबुधादेः ।

प्राक्त्वान्नञ्पूर्वात् तत्पुरुषाद् बुधाद्यन्तर्वजितात् त्वतलौ भवत । इत्ययमधिकारो वेदितव्य टयणादिबाधनार्थम् । न शुक्लोऽशुक्लस्तस्य भावोऽशुक्लत्व, अशुक्लता । वर्णलक्षणटयणबाधया त्वतलावेव । अशौक्ल्य, अकाण्र्यमिति च टयणन्तेन समास । समासात् तु टयणि नञो वृद्धि प्रसज्ज्येत । एवमपतेर्भाव. कर्म वा - अपतित्व, अपतिता । अत्र पत्यन्तलक्षणटयणबाधया । अनाधिपत्य, अगाणपत्यमिति टयणन्तेन समास । एवमराजत्व, अराजता । अमूर्खत्व, अमूर्खता । अस्थविरत्व, अस्थविरता । अहायनत्व, अहायनता । अपटुत्व, अपटुता । अरमणीयत्व, अरमणीयता । नञ्ग्रहण किम् ? प्राजापत्य, सैनापत्यम् । इह नियमो न स्यात् । तत्पुरुषादिति किम् ? न विद्यते पतिरस्य अपतिर्ग्राम, तस्य भाव. कर्म वा—आपत्यम् । एव आराज्यं, आहायन. आरमणीयकम् । एषु वक्ष्यमाणाष्टयणादयोऽपि भवन्ति । अबुधादेरिति किम् ? न बुध अबुध , तस्य भाव कर्म वा --आबुधम् । आचतुर्यम् । बुधादयो यथा---बुध, चतुर, गगन, लवण, वड, कत, रस, लस, यथा, तथा, यथातथ, यथापुर, ईश्वर, क्षेत्रज्ञ, सवादिन्, सर्वेशिन्, सभाषिन्, बहुभाषिन्, शीर्षघातिन्, समस्थ, विषमस्थ, पुरस्थ, परमस्थ, मध्यस्थ, मध्यमस्थ, दुष्पुरुष, कापुरुष, विशाल इति बुधादि । एभ्यो नञ्तत्पुरुषेभ्यो राजादित्वात् टयण् । अथ टयणन्तानामेषा नञ्समासो नवा ? बुधस्य भाव कर्म वा बोध्य. न बोध्यमबोध्यमिति भवतीत्येके । न भवतीत्यन्ये ।

५९. पृथ्वादेरिमन् वा ।

पृथु इत्येवमादिभ्यस्तस्य भावे इमन् प्रत्ययो वा भवति । प्राक्त्वादित्यधिकारात् त्वतलौ च । वावचनाद् यश्चाणादि: प्राप्नोति, सोऽपि भवति । पृथोर्भाव —प्रथिमा, पृथुत्व, पृथुता, पार्थवम् । म्रदिमा, मृदुत्व, मृदुता, मार्दवम् । बहुलस्य भाव —बंहिमा । इमनि बहुलस्य **'प्रियस्थिर···'** [८/४/३८] इत्यादिना बहभाव । बहुलत्व, बहुलता, बाहुल्यम् । पृथ्वादयो यथा- -पृथु, मृदु, पटु, महि, तनु, लघु, बहु, साधु, आशु ऊरु, गुरु, खण्डु, पाण्डु, बहुल, चण्ड, खण्ड, अकिंचन, बाल, होड, पाक, वत्स, मन्द, स्वादु, ऋजु, वृष, कटु, ह्रस्व, दीर्घ, क्षिप्र, क्षुद्र, प्रिय, महत्, अणु, चारु, वक्र, वृद्ध, काल, तृप्र इति पृथ्वादि: ।

---

१ कोऽर्थ ? गोजाते स्वरूपमिति हि किलावार्थ. । ननु गोशब्दस्य स्वरूपमित्युक्ते गोजाते स्वरूपमिति कथ लभ्यत इत्याह—शब्दार्थयोरभेदेन । जातिलक्षणोऽर्थस्ततो जातिलक्षणेनार्थेन गोशब्दस्याऽभेद, य एव गोशब्द स एव जातिलक्षणोऽर्थ इति । अत एव शब्दस्वरूप प्रवृत्तिनिमित्तम । कोऽर्थ ? गोशब्दस्य स्वरूप जातिस्तदेव प्रवृत्तिनिमित्तम् ।

२ श्रीभिक्षुलिङ्गानुशासन नपुसकलिङ्गाधिकार , श्लोक १० ।

६०. वर्णदृढादिभ्यष्ट्यण् च ।

वेत्यनुवर्तते । वर्णविशेषवाचिभ्यो दृढादिभ्यश्च तस्य भावे ट्यण् चकारादिमन् च प्रत्ययौ वा भवतः। प्राक्त्वादित्यधिकारात् त्वतलौ च । वावचनाद् यश्चाण् प्राप्नोति, सोऽपि भवति । शुक्लस्य भावः—शौक्ल्य, शुक्लिमा, शुक्लत्व, शुक्लता । कार्ष्ण्य, कृष्णिमा, कृष्णत्वं, कृष्णता । शितेर्भाव —शैत्यं, शितिमा, शितित्व शितिता, शैतम् । वावचनाद् य्वृवर्णान्तस्य पाञ्चत्त्व्यम् । दृढादि—दार्ढ्य, द्रढिमा, दृढत्व, दृढता । वार्ढ्य, व्रढिमा, वृढत्व, वृढता । वैमत्यं, विमतिमा, विमतित्वं, विमतिता, वैमतम् । य्वृवर्णान्तलक्षणोऽण् । टकार ईबर्थ । औचिती, याथाकामी, सामग्री, शैली, पारिख्याती, आनुपूर्वी[१] । दृढादयो यथा —दृढ, वृढ, परिवृढ, कृश, भृश, चुक्र, शुक्र, आम्र, ताम्र, अम्ल, लवण, शीत, उष्ण, तृष्णा, जड, बधिर, मूक, मूर्ख, पण्डित, मधुर, वियात, विलात, विमनस्, विशारद, विमति, समति, समनस् इति दृढादिराकृतिगणः । तेन स्थैर्य, स्थेमा—इत्याद्यपि सिद्धम् ।

६१. पतिराजान्त-गुणाङ्ग-राजादिभ्यः कर्मणि च ।

पत्यन्तेभ्यो राजान्तेभ्यो गुणाङ्गेभ्यो राजादिभ्यश्च तस्येति षष्ठ्यन्तेभ्यो भावे कर्मणि च क्रियाया ट्यण् प्रत्ययो भवति । प्राक्त्वादित्यधिकारात् त्वतलौ च । पत्यन्त—अधिपतेर्भाव कर्म वा—आधिपत्य, अधिपतित्वं, अधिपतिता । एवं नारपत्य, बार्हस्पत्य, प्राजापत्य, सैनापत्यम् । राजान्त—आधिराज्य, अधिराजत्व, अधिराजता । एव सौराज्य, यौवराज्यम् । गुणाङ्ग— द्रव्याश्रयी गुण, गुणोऽङ्गं निमित्त येषां प्रवृत्तौ ते गुणाङ्गा, गुणद्वारेण ये गुणिनि वर्तन्ते न तु गुणवचना एव । मौढ्य, मूढत्व, मूढता । मौर्ख्य, वैदुष्यम् । राजादि—राज्य, राजत्व, राजता । काव्य, कवित्व, कविता । ब्राह्मण्य, ब्राह्मणत्व, ब्राह्मणता । चकारो भावे कर्मणि चेत्युभयसमुच्चयार्थः[२] । राजादयो यथा—राजन्, कवि, ब्राह्मण, माणव, दण्डमाणव, वाडव, चौर, धूर्त, आराधय, विराधय, उपराधय, अपराधय, अनृशम, कुशल, चपल, निपुण, पिशुन, चौक्ष, स्वस्थ, विश्वम्भ, विफल, विगम्य, पुरोहित, ग्रामिक, दण्डिक, खण्डिक, कर्मिक, चर्मिक, वर्मिक, शिलिक, सूतक, अजिनिक, अञ्जनिक, अञ्जलिक, छत्रिक, सूचक, सुहित, बाल, मन्द, होड । इत्याकृतिगणोऽयम् ।

६२. अर्हतो नुम् च ।

अर्हत्शब्दात् तस्य भावे कर्मणि चार्थे ट्यण् प्रत्ययो भवति तत्सन्नियोगे नुमागमश्च । अरिहननात् रजोहननात् रहस्याभावाच्च अर्हन् । पृषोदरादित्वात् । यद्वा पूजामर्हतीति अर्हन् । तस्य भाव कर्म वा – आर्हन्त्यम् । आर्हन्ती । प्राक्त्वादिति त्वतलौ च । अर्हत्त्व, अर्हत्ता ।

६३. सहायाद् वा ।

सहायशब्दात् तस्य भावे कर्मणि च ट्यण् प्रत्ययो वा भवति । वावचनात् पक्षे योपधलक्षणोऽकञ् । प्राक्त्वादिति त्वतलौ च । सहायस्य भाव. कर्म वा—साहाय्य, साहायक, सहायत्वं, सहायता ।

६४. सखि-दूत-वणिग्भ्यो यः ।

सखि, दूत, वणिज्—इत्येतेभ्यस्तस्य भावे कर्मणि च य प्रत्ययो भवति । प्राक्त्वादिति त्वतलौ च । सख्युर्भाव कर्म वा—सख्य, सखित्व, सखिता । दूत्य, दूतत्व, दूतता । वणिज्या, वणिज्य, वणिक्त्व, वणिक्ता । राजादेराकृतिगणत्वात् ट्यणपि । वाणिज्य, दौत्यम् ।

६५. स्तेनान्नलोपश्च ।

स्तेनशब्दात् तस्य भावे कर्मणि च यः प्रत्ययो भवति तत्सन्नियोगे च न इत्येतस्य लोपो भवति । प्राक्त्वादिति

---

१ इमे औचित्यादयः शब्दा आकृतिगणत्वात् दृढादिष्वेव अवगन्तव्याः ।

२. न तु आकर्षणार्थः । तेन चानुकृष्टं नानुवर्तते इति न्यायो न प्रवर्तते ।

त्वतलौ च। स्तेनस्य भावः कर्म वा—स्तेयं, स्तेनत्वं, स्तेनता। राजादिदर्शनात् स्तैन्यमित्यपि भवति।

६६. कपिज्ञातिभ्यामेयण्।

आभ्यां तस्य भावे कर्मणि च एयण् प्रत्ययो भवति त्वतलौ च। कपेर्भावः कर्म वा—कापेयं, कपित्वं, कपिता। ज्ञातेयं, ज्ञातित्वं, ज्ञातिता। कपेरिकारान्तत्वादणि प्राप्ते ज्ञातेश्च प्राणिजातित्वादञि प्राप्ते वचनम्।

६७. प्राणिजातिवयोऽर्थादञ्।

प्राणिजातिवाचिनो वयोवचनाच्च तस्य भावे कर्मणि च अञ् प्रत्ययो भवति त्वतलौ च। अश्वस्य भावः कर्म वा—आश्वं, अश्वत्वं, अश्वता। गार्दभं, माहिषम्। द्वीपिनो द्वैपम्। हस्तिनो हास्तम्। '**नोऽपदस्य तद्धिते**' [८/४/६२] इति टेर्लोपः। वयोऽर्थात्—कुमारस्य भावः कर्म वा कौमारं, कुमारत्वं, कुमारता। कैशोरं, शावं, वार्करं, कालभम्। प्राणिग्रहणं किम्? तृणत्वं, तृणता। जातिग्रहणं किम्? देवदत्तत्वं, देवदत्तता।

६८. युवादेरण्।

युवादिभ्यः शब्देभ्यस्तस्य भावे कर्मणि च अण् प्रत्ययो भवति त्वतलौ च। यूनो लिङ्गविशिष्टस्यापि ग्रहणात् युवतेश्च भावः कर्म वा—यौवनं, युवत्वं, युवता। चौरादिपाठाद् यौवनिकेत्यपि। स्थाविरं, स्थविरत्वं, स्थविरता। युवादिगणो यथा—युवन्, स्थविर, यजमान, कुतुक, श्रमण, श्रमणक, श्रवण, कमण्डलुक, कुस्त्री, दुःस्त्री, सुस्त्री, सुहृदय, दुर्हृदय, सुहृत्, दुर्हृत्, सुभ्रातृ, दुर्भ्रातृ, वृषल, परिव्राजक, सब्रह्मचारिन्, अनृशंस, चपल, कुशल, निपुण, पिशुन, कुतूहल, क्षेत्रज्ञ, उद्गातृ, उन्नेतृ, प्रशास्तृ, प्रतिहर्तृ, होतृ, पोतृ, भ्रातृ, भर्तृ, रथगणक, पत्तिगणक, सुष्ठु, दुष्ठु, अध्वर्यु, कर्तृ, मिथुन, कुलीन, सहस्, सहस्र, कण्डुक, कितव इति युवादि। स्थविर-श्रमण-पिशुन-निपुण-कुशल-चपलाऽनृशंसेभ्यो राजादिदर्शनात् टयणपि भवति। स्थाविर्यं, श्रामण्यमित्यादि। पूर्वत्राऽणि द्वैपादि[1] न सिद्ध्यति। इह तु अञि यौवनादि इत्यञणोरुपादानम्।

६९. हायनान्तात्।

हायनान्तेभ्यः शब्देभ्यस्तस्य भावे कर्मणि चाण् प्रत्ययो भवति त्वतलौ च। द्वैहायनं, द्विहायनत्वं, द्विहायनता। त्रैहायनं, चातुर्हायनम्। अत्राऽवयोवाचित्वात् '**त्रिचतुर्भ्यां हायनस्य वयसि**' [२/२/७८] इति णत्वं न भवति। वयसि तु पूर्वेणाञ्। त्रैहायणं, चातुर्हायणम्।

७०. श्रोत्रियाद्यलोपश्च।

श्रोत्रियशब्दात् तस्य भावे कर्मणि चाण् प्रत्ययो भवति तत्सन्नियोगे च य इत्यस्य लोपो भवति। त्वतलौ च। श्रोत्रियस्य भावः कर्म वा—श्रौत्रं, श्रोत्रियत्वं, श्रोत्रियता। चौरादिपाठाद् अकञपि—श्रौत्रियकम्।

७१. पुरुषहृदयादऽसमासे।

आभ्यां तस्य भावे कर्मणि चाण् प्रत्ययो भवति न चेदनयोः समासो विषयभूतो भवति। त्वतलौ च। पुरुषस्य भावः कर्म वा—पौरुषं पुरुषत्वं, पुरुषता। हृदयस्य भावः कर्म वा—हार्दम्। '**हृदयस्य हृल्लासलेखाणले**' [३/२/१०९] इति हृद्भावः। हृदयत्वं, हृदयता। असमासे इति किम्? परमपुरुषत्वं, परमहृदयत्वं, सत्पुरुषत्वं, सौहृदय्यम्[2]। परमपौरुषं, परमहार्दं इत्यादि मा भूत्। अत एव निषेधात् सापेक्षादपि[3] भावप्रत्ययो विज्ञायते, तेन काकस्य कार्ष्ण्यं, बलाकायाः शौक्ल्य-

---

१. '**अणि**' [८/४/५३] इति टिलोपनिषेधे।

२. कथं सौहृदयम्? युवादिपाठाद् भविष्यति।

३. ननु समासे चिकीर्षिते पुरुषहृदयशब्दौ पदान्तरापेक्षौ भवतस्तत्र सापेक्षत्वादेव न भविष्यति, किं प्रतिषेधेनेत्याह।

मित्यादि सिद्धम्। पौरुषमिति प्राणिजात्यत्रापि भवति। समासविषये प्रतिषेधार्थं पुरुषोपादानम्।

७२. लघुपूर्वाद् य्वृवर्णात्।

लघ्वक्षरपूर्वादिवर्णान्ताद् उवर्णान्ताद् ऋवर्णान्ताच्च तस्य भावे कर्मणि चाण् प्रत्ययो भवति त्वतलौ च। शुचेर्भावः कर्म वा—शौचं, शुचित्वं, शुचिता। शकुनेः शाकुनम्। मुनेर्भावः कर्म वा—मौनम्। समते सांमतम्। कवेर्भावः कर्म वा काव्यमिति तु राजादिपाठात्। पृथोः पार्थवम्। पटोः पाटवम्। लघोर्लाघवम्। पितुः पैत्रम्। लघुपूर्वादिति किम्? पाण्डुत्वं, कण्डूत्वम्। केचित्तु कृशानोर्भावः कर्म वा कार्शानवं, अरातेः आरातं, अरत्नेः आरत्नमित्यादिष्वपीच्छन्ति। तन्मतसंग्रहार्थं लघुपूर्वादिति प्रकृतेर्विशेषणं न य्वृवर्णस्येति व्याख्येयम्। तन्मते सांमनमिति न भवति। य्वृवर्णादिति किम्? घटत्वं, पटत्वम्।

७३. योपधाद् गुरूपोत्तमादऽसुप्रख्यादऽकञ्।

त्रिप्रभृतीनामन्त्यमुत्तमं, तत्समीपमुपोत्तमम्। उपोत्तमं गुर्वर्यस्य तस्मात् यकारोपधात् सुप्रख्यवर्जितात् तस्य भावे कर्मणि चाकञ् प्रत्ययो भवति त्वतलौ च। रमणीयस्य भावः कर्म वा—रामणीयकं, रमणीयत्वं, रमणीयता। दार्शनीयकं, कामनीयकं, औपाध्यायकं, पानीयकम्। गुरुग्रहणादनेकहसव्यवधानेऽपि भवति। आचार्यकम्। गुरुग्रहणं हि दीर्घपरिग्रहार्थं संयोगपरपरिग्रहार्थं च। अन्यथा दीर्घोपोत्तमादित्युच्येत। योपधादिति किम्? कापोतं, विमानत्वम्। गुरूपोत्तमादिति किम्? क्षत्रियत्वं[1], कायत्वम्[2]। असुप्रख्यादिति किम्? सुप्रख्यत्वम्। गुणाङ्गत्वात् टयणपि—सौप्रख्यम्।

७४. चौरादेः।

चौरादिभ्यस्तस्य भावे कर्मणि च अकञ् प्रत्ययो भवति त्वतलौ च। चौरस्य भावः कर्म वा—चौरकम्। धौर्तकम्। चौरिका, धौर्तिका। मानोज्ञकं, प्रैयरूपकम्। चौरत्व, चौरता। चौरादयो यथा—चौर, धूर्त, युवन्, ग्रामपुत्र, ग्रामसण्ड, ग्रामसाण्ड, ग्रामकुमार, ग्रामकुल, ग्रामकुलाल, अमुष्यपुत्र, अमुष्यकुल, शरपत्र, शारपत्र, मनोज्ञ, प्रियरूप, अदोरूप, अभिरूप, बहुल, मेधाविन्, कल्याण, आढ्य, सुकुमार, छान्दस, छात्र, श्रोत्रिय, विश्वदेव, ग्रामिक, कुलपुत्र, सारपुत्र, वृद्ध, अवश्यमिति चौरादि। मनोज्ञादीनामकञन्ताना नपुंसकत्वमेव। पूर्वेषां तु **'चौराद्यमनोज्ञाद्यकञ्, टयण्यणौ तु क्वचित् स्मृतौ'**[3] इति लिङ्गानुशासनात् स्त्रीनपुंसकते। चौर्यं, धौर्त्यं, ग्रामिक्यमिति राजादिपाठात् टयणपि।

७५. द्वंद्वाल्लित्।

द्वन्द्वसमासात् तस्य भावे कर्मणि चाकञ् प्रत्ययो भवति स च लित्। लित्वात् स्त्रीत्वम्। त्वतलौ च। गोपालपशुपालानां भावः कर्म वा—गौपालपशुपालिका। शैष्योपाध्यायिका, कौत्सकुशिकिका। विश्च पक्षी ना च नर विनरोर्भावः कर्म वा—वैनरिका। अत्र **'लघुपूर्वाद् य्वृवर्णात्'** [७/३/७२] इत्यणि प्राप्ते परत्वादकञ्। एवं भारतबाहुबलिका। गोपालपशुपालत्व, गोपालपशुपालता।

७६. गोत्रचरणात् श्लाघाधिक्षेपावगताविगतेषु।

गोत्रवाचिभ्यश्चरणवाचिभ्यश्च तस्य भावे कर्मणि च लिदकञ् प्रत्ययो भवति श्लाघादिषु विषयभूतेषु। त्वतलौ च। विषयभावः पुनः श्लाघादीनां क्रियारूपाणां भावकर्मणी प्रति साध्यत्वात्। गार्ग्यस्य भावः कर्म वा—गार्गिका, तया श्लाघते। काठिकया श्लाघते। अधिक्षेपे—गार्गिकया अधिक्षिपति। काठिकया अधिक्षिपति। अवगते—गार्गिकामवगतवान्।

---

१. अत्र गुरुर्नास्ति।

२. अत्र तु उपोत्तमत्वं नास्ति।

३. श्रीभिक्षुलिङ्गानुशासन, स्त्रीनपुंसकाधिकार, श्लोक ३।

काठिकां विज्ञातवान्। अधिगते—गार्गिकामधिगतवान्। काठिकां प्राप्तवान्। गार्ग्यत्वेन, गार्ग्यतया, कठत्वेन, कठतया श्लाघते। श्लाघादिष्विति किम्? गार्गं, काठम्। प्राणिजातिलक्षणोऽञ्।

७७. ऋत्विग्भ्य ईयः।

ऋत्विग्विशेषवाचिभ्यस्तस्य भावे कर्मणि च ईयः प्रत्ययो भवति त्वतलौ च। मैत्रावरुणस्य भावः कर्म वा—मैत्रावरुणीयं, मैत्रावरुणत्व, मैत्रावरुणता। अग्नीध. अग्नीधीयम्। नेष्टु. नेष्ट्रीयम्। पोतुः पोत्रीयम्। ब्राह्मणाच्छंसीयम्। बहुवचनं स्वरूपविधिनिरासार्थम्।

७८. ब्रह्मणस्त्वः।

ऋत्विग्भ्य इत्यनुवर्तते। ऋत्विग्वाचिनो ब्रह्मन्शब्दात् तस्य भावे कर्मणि च त्व प्रत्ययो भवति। ईयापवाद.[1]। ब्रह्मणो भाव. कर्म वा—ब्रह्मत्वम्। ऋत्विगधिकाराद् ब्राह्मणपर्यायाद् जातिवाचिनो ब्रह्मन्शब्दात् तलपि[2] भवति। ब्रह्मत्वं, ब्रह्मता।

७९. क्षेत्रे शाकटशाकिनौ।

तस्येत्यनुवर्तते। क्षेत्रं धान्यादीनामुत्पत्त्याधारभूमिः। तस्येति षष्ठ्यन्तात् क्षेत्रेऽर्थे शाकट, शाकिन—इत्येतौ प्रत्ययौ भवत। इक्षूणां क्षेत्र—इक्षुशाकट, इक्षुशाकिनम्। मूलकशाकट, मूलकशाकिनम्। शाकशाकटं, शाकशाकिनम्।

८०. धान्येभ्य ईनञ्।

धान्यवाचिभ्य. षष्ठ्यन्तेभ्य क्षेत्रेऽर्थे ईनञ् प्रत्ययो भवति। कुलत्थानां क्षेत्रं—कौलत्थीनम्। मौद्गीन, प्रैयङ्गवीणं, नैवारीणं, कौद्रवीणम्।

८१. व्रीहिशालिभ्यामेयण्।

आभ्यां तस्य क्षेत्रेऽर्थे एयण् प्रत्ययो भवति। ईनञोऽपवाद.। व्रीहे क्षेत्र—व्रैहेयम्। शालेयम्।

८२. यव-यवक-षष्टिकाद्यः।

यव, यवक, षष्टिक—इत्येतेभ्यस्तस्य क्षेत्रेऽर्थे य प्रत्ययो भवति। ईनञोऽपवादः। यवानां क्षेत्र —यव्यम्। यवक्य, षष्टिक्यम्।

८३. अणुमाषाद् वा।

आभ्यां तस्य क्षेत्रेऽर्थे यः प्रत्ययो वा भवति। पक्षे ईनञ्। अणूनां क्षेत्रं—अणव्यं, आणवीनम्। माष्यं, माषीणम्।

८४. भङ्गोमा-तिलात्।

वेत्यनुवर्तते। भङ्गा, उमा, तिल—इत्येतेभ्यस्तस्य क्षेत्रेऽर्थे य. प्रत्ययो वा भवति। पक्षे ईनञ्। भङ्गोमे अपि धान्ये एवेत्येते। भङ्गानां क्षेत्रं—भङ्ग्यं, भाङ्गीनम्। उम्यं, औमीनम्। तिल्यं, तैलीनम्। योगविभाग उत्तरार्थ.।

---

१ ईय इति उपलक्षण तलोऽप्ययमपवादः। अन्यथा ईयस्यैव प्रतिषेधे ब्रह्मणो नेति सूत्रं कुर्यात्।

२. न केवलं 'भावे त्वतलौ' [७/३/५६] इत्यनेन त्वः, किन्तु तलपि। अयमर्थः—ऋत्विग्वचनस्य ब्राह्मणवचनस्य च त्वप्रत्ययः समानः, तेन जातिवचनस्य तलपि भवतीत्यर्थ.। उपलक्षण चेद, तेन ब्रह्मणो भावः कर्म वा प्राणिजात्यञि ब्राह्ममित्यपि।

८५. अलाब्वाश्च कटो रजसि ।

अलाबूशब्दाच्चकाराद् भङ्गोमातिलेभ्यश्च षष्ठ्यन्तेभ्यो रजस्यर्थे कटः प्रत्ययो भवति । अलाबूनां रजः—अलाबूकटम् । भङ्गाकटं, उमाकटं, तिलकटम् ।

८६. अह्ना गम्येऽश्वादीनञ् ।

तस्येति षष्ठ्यन्तादश्वशब्दाद् एकेनाऽह्ना गम्येऽर्थे ईनञ् प्रत्ययो भवति । अश्वस्य एकेनाह्ना गम्यः— आश्वीनोऽध्वा । अह्नेति किम् ? अश्वस्य मासेन गम्यः ।

८७. कुलाज्जल्पे ।

तस्येति षष्ठ्यन्तात् कुलशब्दात् जल्पेऽर्थे ईनञ् प्रत्ययो भवति । कुलस्य जल्पः—कौलीनम् ।

८८. पील्वादेः पाके कुणः ।

पीलु इत्यादिभ्यः षष्ठ्यन्तेभ्यः पाकेऽर्थे कुणः प्रत्ययो भवति । पीलूनां पाकः—पीलुकुणः । कर्कन्धुकुणः । पील्वादयो यथा—पीलु, कर्कन्धु, शमी, करीर, बदर, कुवल, अश्वत्थ, खदिर इति पील्वादि ।

८९. कर्णादेर्मूले जाहः ।

कर्णादिभ्यः षष्ठ्यन्तेभ्यो मूलेऽर्थे जाहः प्रत्ययो भवति । कर्णस्य मूलं—कर्णजाहम् । अक्षिजाहम् । कर्णादयो यथा—कर्ण, अक्षि, आस्य, वक्त्र, नख, मुख, केश, दन्त, ओष्ठ, भ्रू, शृङ्ग, पाद, गुल्फ, पुष्प, फल इति कर्णादिः ।

९०. पक्षात्तिः ।

पक्षशब्दात् षष्ठ्यन्तात् मूलेऽर्थे तिः प्रत्ययो भवति । पक्षस्य मूलं—पक्षतिः[1] ।

९१. हिमादेलुः सहे ।

हिमशब्दात् षष्ठ्यन्तात् सहे सहमानेऽर्थे एलुः प्रत्ययो भवति । हिमस्य सहः हिमं सहमानः हिमेलुः ।

९२. बलवातादूलः ।

आभ्यां षष्ठ्यन्ताभ्यां सहेऽर्थे ऊलः प्रत्ययो भवति । बलस्य सहः बलं सहमानः बलूलः । वातूलः[2] ।

९३. शीतोष्णतृप्रादालुरसहे ।

शीत, उष्ण, तृप्र—इत्येतेभ्यः षष्ठ्यन्तेभ्योऽसहेऽसहमानेऽर्थे आलुः प्रत्ययो भवति । शीतस्याऽसहः शीतमसहमानः शीतालुः । उष्णालुः, तृप्रालुः । तृप्रं दुःखम् ।

९४. यथामुखसंमुखादीनस्तद् दृश्यतेऽस्मिन् ।

यथामुख, संमुख—इत्येताभ्यां तदिति प्रथमान्ताभ्यामस्मिन्निति सप्तम्यर्थे ईनः प्रत्ययो भवति यत्तत् प्रथमान्तं दृश्यते चेत्तद् भवति । यथामुखं दृश्यतेऽस्मिन् यथामुखीनः आदर्शादिः । मुखस्य सदृशोऽर्थो यथामुखं प्रतिबिम्बं उच्यते । अत एव

---

१. मूलेऽप्यभिधेये शब्दशक्तिस्वाभाव्यात् स्त्रीलिङ्गः ।

२. वातसहः । वातासहोऽप्येतदर्थं एवेति शब्दभेदः ।

निपातनात् 'यथाऽसादृश्ये' [३/१/२४] इति प्रतिषेधेऽपि अव्ययीभाव.। सम मुख समुख, समं मुखमस्याऽनेनेति वा संमुख प्रतिबिम्बमेव। अत एव निपातनात् समशब्दस्यान्तलोप । समुख दृश्यतेऽस्मिन्निति संमुखीन.।

९५. सर्वात् पथ्यङ्ग-कर्म-शराव-पत्र-पात्रेभ्यस्त व्याप्नोति ।

सर्वशब्दात् परेभ्य पथिन्, अङ्ग, कर्मन्, शराव, पत्र, पात्र—इत्येतेभ्यस्तमिति द्वितीयान्तेभ्यो व्याप्नोतीत्यर्थे ईन प्रत्ययो भवति। सर्वपथ व्याप्नोति—सर्वपथीनो रथ । सर्वपथान् व्याप्नोति—सर्वपथीनमुदकम्। एव सर्वाङ्गीण-स्ताप । सर्वकर्मीण.पुरुष.। सर्वशरावीण: ओदन। सर्वपत्रीण. सारथि । सर्वपात्रीण ओदनः। सर्वादिति किम् ? पन्थान व्याप्नोति।

९६. आप्रपदात् प्राप्नोति ।

प्रगन पद प्रपदम्। पदाग्रमित्यर्थ । आङ् मर्यादायामभिविधौ वा । आ प्रपदात् आप्रपदम्। 'पर्यपाङ्···' [३/१/२६] इत्यादिना अव्ययीभाव.। आप्रपदाद् द्वितीयान्तात् प्राप्नोतीत्यर्थे ईन प्रत्ययो भवति। आप्रपद प्राप्नोति—आप्रपदीन पट.। अनेन पटस्य प्रमाणमाख्यायते।

९७. अनुपदाद् बद्धायाम्।

अनुपदशब्दाद् द्वितीयान्तात् बद्धा इत्येतस्मिन्नर्थे ईन प्रत्ययो भवति। अनुपद बद्धा—अनुपदीना उपानत्। पदप्रमाणेत्यर्थ:। अनुपदमिति 'अनुरायामे' [३/१/२८] इत्यव्ययीभाव ।

९८. अयानयान्नेये।

द्यूते शाराणा प्रदक्षिणपरिवर्तन अय। प्रसव्यपरिवर्तनं अनय। प्रदक्षिणप्रसव्यगामिनां शाराणा यस्मिन् परशारै पदानामसमावेशोऽयानय स्थलविशेष । अयानयशब्दाद् द्वितीयान्तान्नेयेऽर्थे ईन प्रत्ययो भवति। अयानय नेय—अयानयीन शार.। फलकशिरसि स्थित उच्यते।

९९. सर्वान्नादऽत्ति ।

सर्वान्नशब्दाद् द्वितीयान्ताद् अत्तीत्यस्मिन्नर्थे ईन प्रत्ययो भवति। सर्वशब्द प्रकारकात्स्न्ये। सर्वप्रकारमन्न सर्वान्न, तदत्ति—सर्वान्नीनो भिक्षु. नियमरहित ।

१००. परोवरीण-परंपरीण-पुत्रपौत्रीणम् ।

परोवरीणादय शब्दा अनुभवत्यर्थे ईनप्रत्ययान्ता निपात्यन्ते। परावरशब्दाद् द्वितीयान्तादनुभवत्यर्थे ईन. प्रत्ययोऽवरशब्दाकारस्य चोत्व प्रत्ययसनियोगे निपात्यते । पराश्चावराश्चानुभवति—परोवरीण.। पारोवर्य[1] इत्यत्र अतीतक्रमवाचि परोवरमिति शब्दान्तरम्। परपरीणेति परपरशब्दाद् द्वितीयान्तादनुभवत्यर्थे ईन. परपरभावश्च। परान् परतराश्चानुभवति—परपरीण.। मन्त्रिपरम्परा मन्त्र भिनत्ति—इत्यत्र परम्पराशब्द आबन्तो बाहुल्यार्थ. प्रकृत्यन्तरम्। पुत्रपौत्रीणेति पुत्रपौत्रशब्दात् द्वितीयान्तादनुभवत्यर्थे ईन । पुत्रांश्च पौत्राश्चानुभवति—पुत्रपौत्रीण ।

१०१. पारावारेभ्यो गामी ।

बहुवचन समस्तव्यस्तविपर्यस्ताना परिग्रहणार्थम्। द्वितीयान्तात् पारावारशब्दात् गामी इत्यर्थे ईन. प्रत्ययो भवति। पारावार गामी—पारावारीण.। पारीण, अवारीण, अवारपारीण ।

---

१. यदि प्रत्ययसनियोगे ओत्व तत्कथमत्र तदभावे इत्याशङ्का।

१०२. यथाकामाऽनुकामाऽत्यन्तात् ।

यथाकाम, अनुकाम, अत्यन्त—इत्येतेभ्यो द्वितीयान्तेभ्यो गामी इत्यर्थे ईन प्रत्ययो भवति । यथाकाम गामी—यथाकामीन । अनुकामीन । यथेच्छ गामीत्यर्थ । अत्यन्त गामी—अत्यन्तीन । भृश गन्तेत्यर्थ ।

१०३. अनुगोरऽलम् ।

गामीत्यनुवर्तते । अनुगुशब्दाद द्वितीयान्ताद् अलगामी इत्यर्थे ईन प्रत्ययो भवति । अल पर्याप्तमित्यर्थ । गवा पश्चाद् अनुगु, तदलगामी—अनुगवीनो गोपालक: ।

१०४. अध्वनो यखौ ।

अलंगामीत्यनुवर्तते । द्वितीयान्ताद् अध्वन्शब्दाद् अलगामी इत्यर्थे य, ईन—इत्येतौ प्रत्ययौ भवत. । अध्वानमलगामी—अध्वन्य, अध्वनीन. ।

१०५. अभ्यमित्राछीयश्च ।

अभ्यमित्रशब्दाद् द्वितीयान्ताद् अलगामी इत्यर्थे ईयश्चकारात् य, ईन—इत्येतौ च प्रत्यया भवन्ति । अभ्यमित्रमलंगामी—अभ्यमित्रीय , अभ्यमित्र्य , अभ्यमित्रीण. । अमित्राभिमुख भृश गन्तेत्यर्थ. ।

१०६. समांसमीनाद्यश्वीनाद्यप्रातीनागवीनसाप्तपदीनम् ।

समांसमीनादय शब्दा ईनप्रत्ययान्ता निपात्यन्ते, साप्तपदीन तु ईनञ्प्रत्ययान्त । समासमीनेति समासमामिति वीप्साद्वितीयान्तात् समुदायाद् गर्भ धारयतीत्यर्थे ईन पूर्वपदविभक्तेश्चालुक् । समा समा गर्भ धारयति—समासमीना गौ । समामिति **'कालाध्वनोरत्यन्तसंयोगे'** [२/४/५६] इति द्वितीया । अद्यश्वीनेति अद्यश्व.शब्दयोरर्थे समास. विजनिष्यमाणेऽर्थे विजननस्य प्रत्यासत्तौ गम्यमानायामीन । अद्य श्वो वा विजनिष्यमाणा—अद्यश्वीना गौ । एव नाम प्रत्यासन्नप्रसवेत्यर्थ. । अन्ये तु प्रत्यासत्तौ गम्यमानाया भविष्यत्यर्थे प्रत्ययमाहु । अद्य श्वो वा भविष्यति—अद्यश्वीनो लाभ । अद्यश्वीन मरणम् । एव अद्यप्रात शब्दादीन । अद्यप्रातीना गौ: । अद्यप्रातीनो लाभ । अद्यप्रातीन मरणम् । आगवीनेति आगोप्रतिदानशब्दात् कारिण्यर्थे ईन प्रतिदानशब्दस्य च लुक् । आगोप्रतिदान कारी—आगवीन. कर्मकर. । गवा[1] भृतो य आ तस्या गो: प्रत्यर्पणात् कर्म करोति स आगवीन । रूढिशब्दोऽयम् । यत्किंचिद् आदाय आ तस्य प्रतिदानात् कर्मकर एवमुच्यते इत्यके । साप्तपदीनेति सप्तपदशब्दात् तृतीयान्तात् तदवाप्येऽर्थे ईनञ् यत्तदवाप्यं तच्चेत् सख्य सखा वा भवति । सप्तभि. पदैरवाप्य—साप्तपदीन सख्यम् । साप्तपदीन: सखा । साप्तपदीन मित्रम् ।

१०७. अषडक्षाशितंग्वलंकर्मालंपुरुषादीन: ।

अषडक्ष, आशितगु, अलकर्मन्, अलपुरुष—इत्येतेभ्य. स्वार्थे ईन प्रत्ययो भवति । अविद्यमानानि षडक्षीण्यस्मिन् अषडक्षीणो मन्त्र: । **'बहुव्रीहौ सक्थ्यक्ष्णो: स्वाङ्गे'** [५/४/११३] इति टान्तादीन: । अषडक्षीणा क्रीडा । द्वाभ्यां साध्यत इत्यर्थ. । अषडक्षीण: कन्दुक. । येन द्वौ क्रीडत. । इन्द्रियपर्यायो वाक्षशब्द: । अविद्यमानानि षडक्षाण्यस्याऽषडक्षीणोऽमनस्क । विचारेण विना प्रवर्तते इत्यर्थ. । आशिता गावोऽस्मिन्निति आशितगु । अस्मादेव निपातनात् पूर्वपदस्य मुमागम., तत ईन: । आशितंगवीनमरण्यम् । अल कर्मणे, अल पुरुषाय **'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या'** [२/२/६५] इति समास , तत ईन: । अलंकर्मीण , अलंपुरुषीण: । राजाधीनमिति त्वधीनेन शौण्डादित्वात् सप्तमीसमास: । अस्ति चाधीनशब्द: । **'अस्मास्वधीनं किमु नि:स्पृहाणामिति'** । वाक्यं हि वक्तर्यधीन भवतीति । तदेतत् प्रयोक्तर्यधीनं

१. गोधारक: ।

भवतीति ।

१०८. अदिक्स्त्रियां वाञ्चः ।

अञ्चत्यन्तान्नाम्न ईनः प्रत्ययो वा भवति स्वार्थे न चेत्स दिशि स्त्रिया वर्तते । प्राक् प्राचीनम् । प्रत्यक् प्रतीचीनम् । उदक् उदीचीनम् । अवाक् अवाचीनम् । सम्यङ्ङ समीचीनम् । अदिक्स्त्रियामिति किम् ? प्राची, उदीची दिक् । दिग्ग्रहणं किम् ? प्राचीना शाखा । अवाचीना ब्राह्मणी । स्त्रीग्रहणं किम् ? प्राक् प्राचीन रमणीयम् । दिश्यपि लुगन्तं स्वभावात् नपुंसकम् । 'वा' [६/२/२] इति सूत्रेणैव विकल्पे लब्धे वाग्रहण पूर्वत्र नित्यार्थम्[1] ।

---

१. 'अषडक्ष···' [७/३/१०७] इत्यत्र सूत्रे वाक्यं तु अलौकिकम् ।

चतुर्थश्चरणः

१. तस्य तुल्ये कः संज्ञाप्रतिकृत्योः ।

तस्येति षष्ठयन्तात् तुल्ये सदृशेऽर्थे क. प्रत्ययो भवति संज्ञायां प्रतिकृतौ च विषये । प्रतिकृतिः काष्ठादिमयं प्रतिच्छन्दकम् । अश्वस्य तुल्यः—अश्वकः । उष्ट्रकः, गर्दभक । अश्वादिसदृशस्य संज्ञा[1] एता । प्रतिकृतिः—अश्वकं रूपम् । अश्विका प्रतिमा । अश्वकानि रूपाणि । तुल्ये इति किम् ? इन्द्रदेव । एवंनामा कश्चित् । नात्र सादृश्यम् संज्ञाप्रतिकृत्योरिति किम् ? गोस्तुल्यो[2] गवय । संज्ञाग्रहणमप्रतिकृत्यर्थम् । तुल्यमात्रे प्रत्यय इत्येके । शिव इव शिवकः ।

२. न नृ-पूजार्थ-ध्वज-चित्रेषु ।

नरि—मनुष्ये, पूजार्थे, ध्वजे, चित्रे—चित्रकर्मणि चाभिधेये क प्रत्ययो न भवति । तत्र[3] सोऽयं[4] इत्येवाभिसबन्ध. । संज्ञाप्रतिकृत्योरिति यथासंभवं[5] प्राप्ते प्रतिषेधोऽयम् । नृ—चञ्चा तृणमयः पुरुषो यः क्षेत्ररक्षणाय क्रियते । चञ्चातुल्य. पुरुषश्चञ्चा । एव वर्धिका, खरकुटी । पूजार्थ—अर्हन्, शिव, स्कन्द । पूजनार्थाः प्रतिकृतय उच्यन्ते । ध्वज—गरुड, सिंहः, ताल, ध्वज. । चित्र—दुर्योधन., भीमसेन. ।

३. अपण्ये जीवने ।

जीवन्त्यनेनेति जीवनम् । पण्य विक्रेतव्यम् । पण्यवर्जित यज्जीवनं तस्मिन् कः प्रत्ययो न भवति । वासुदेवसदृश —वासुदेव । शिव, स्कन्द., विष्णु । देवलकानां[6] जीविकार्था प्रतिकृतय उच्यन्ते । अपण्ये इति किम् ? हस्तिकान् विक्रीणीते । जीवने इति किम् ? क्रीडने निषेधो मा भूत् । हस्तिकः ।

४. देवपथादिभ्यः ।

देवपथादिभ्यः शब्देभ्यस्तुल्येऽर्थे कः प्रत्ययो न भवति । देवपथस्य तुल्यः—देवपथः । एवं हंसपथः । देवपथादयो यथा—देवपथ, हसपथ, अजपथ, वारिपथ, राजपथ, शतपथ, शङ्कुपथ, स्थलपथ, सिन्धुपथ, उष्ट्रग्रीवा, वामरज्जु, हस, हस्त, इन्द्र, दण्ड, पुष्प, पुष्प, मत्स्य । इत्याकृतिगणोऽयम् । पूर्वयोगावस्यैव प्रपञ्चः ।

५. वस्तेरेयञ् ।

तस्य तुल्ये इत्यनुवर्तते, न[7] संज्ञाप्रतिकृत्योरिति । वस्तिशब्दात् तस्येति षष्ठ्यन्तात् तुल्येऽर्थे एयञ् प्रत्ययो भवति ।

---

१. एवनामान पशुविशेषा न तु प्रतिबिम्बानि ।
२. नहि गोक इति कप्रत्ययान्तेन संज्ञा प्रतीयते ।
३. निषेधे सतीत्यर्थः ।
४. चञ्चातुल्यः पुरुषोऽभेदोपचारेण चञ्चा । अतश्चञ्चा पुरुष इत्यादौ सामानाधिकरण्यम् ।
५. मनुष्ये संज्ञायां पूजार्थादिषु प्रतिकृतौ प्राप्ति. ।
६. देवपूजकानाम् ।
७. प्रत्ययान्तरोपादानात् ।

वस्तेस्तुल्य—वास्तेयम् । वास्तेयी प्रणालिका ।

६. शिलाया एयच्च ।

शिलाशब्दात् तस्य तुल्येऽर्थे एयच् चकारात् एयञ् च प्रत्ययो भवति । शिलायास्तुल्यं—शिलेयं दधि । शिलेयी इष्टका । शैलेयं दधि । शैलेयी इष्टका । चकारो **'मुख्यात् षिट्टिदणञ्'''** [२/३/२०] इति सूत्रे एयस्य सामान्यग्रहणाविघातार्थः । अन्यथा हि अस्यैव स्यात् ।

७. शाखादेर्यः ।

शाखादिभ्यः शब्देभ्यस्तस्य तुल्येऽर्थे य प्रत्ययो भवति । पुरुषस्कन्धस्य वृक्षस्कन्धस्य वा तिर्यक् प्रसृतमङ्गं शाखेत्युच्यते । तद्यथा शाखा पार्श्वायिता तथा कुलस्य य पार्श्वायितोऽङ्गभूत स शाखायास्तुल्य शाख्य । मुख्य., जघन्य । शाखादयो यथा—शाखा मुख, जघन, स्कन्द स्कन्ध, मेघ, शृङ्ग, चरण, शरण, उरस्, शिरस्, अग्र इति शाखादि. ।

८. द्रोर्भव्ये ।

द्रुशब्दात् तस्य तुल्ये भव्येऽभिधेये य प्रत्ययो भवति । विशिष्टेष्टपरिणामेन भवतीति भव्यम् । अभिप्रेतानामर्थाना पात्रम् । द्रुतुल्यः द्रव्यमय माणवक । द्रव्य कार्षापणम् । यथा द्रुम फलादिभिरर्थिन कृतार्थयति तथाऽयमपि भवितुमर्हतीति । कार्षापणमपि विनियुज्यमान विशिष्टेष्टमालायुपभोगफल भवतीति द्रव्यमुच्यते । भव्ये इति किम् ? द्रुतुल्याऽय न चेतयते ।

९. कुशाग्रादीयः ।

कुशाग्रशब्दात् तस्य तुल्येऽर्थे ईय प्रत्ययो भवति । कुशाग्रस्य तुल्य—कुशाग्रीय शस्त्र तदाकारत्वात् । कुशाग्रीया बुद्धि तीक्ष्णत्वात् ।

१०. काकतालीयादयः ।

काकतालीयादय शब्दा ईयप्रत्ययान्ता साधवो भवन्ति तस्य तुल्येऽभिधेये । काकश्च तालश्च काकतालम् । यथा कथचिद् व्रजत काकस्य निपतता तालेनातर्कितोपनत [1] चित्रीयमाणः सयोगो लक्षणयोच्यते तत्तुल्यं काकतालीयम्[2] । एव खलतिबिल्वीयम् । अन्धकश्च वर्तिका च अन्धकवर्तिकम् । अत्रान्धकस्य वर्तिकाया उपरि अतर्कित पादन्यास उच्यते । अन्धकस्य बाहुक्षेपे वर्तिकाया कर निलयन वा तत्तुल्य अन्धकवर्तिकीयम् । अजया पादेनावकिरन्त्यात्मवधाय कृपाणस्य दर्शनमजाकृपाण, तत्तुल्य अजाकृपाणीयम् । एवविधचित्रीकरणविषया काकतालीयादय । निपातन रूढ्यर्थम् । आकृतिगणोऽयम् । तेन अर्धजरतीयं, घुणाक्षरीयमित्यादि सिद्धम् ।

११. शर्करादेरण् ।

शर्करादिभ्यस्तस्य तुल्येऽर्थे अण् प्रत्ययो भवति । शर्करायास्तुल्यं—शार्करं दधि मधुरत्वात् । शार्करी मृत्तिका कठिनत्वात् । शर्करादयो यथा—शर्करा, कपालिका, कम्बाष्टिका, गोपुच्छ, गोलोमन्, पुण्डरीक, शतपत्र, नराची, नकुल, सिकता, कपाटिका इति शर्करादि. ।

---

१ अचिन्तितोत्पन्न. ।

२ अत्रायं भाव —आगच्छत. काकस्य अकस्मात् तालफलपतनात् यथा वध, एवमजाया आगच्छन्त्याः कृपाणपतनात् यथा वध, तथैव चाऽऽकस्मिकचोरसमागमात् देवदत्तवधः, तत्सदृश मरण काकतालीय, अजाकृपाणीयम् । एवमन्यत्रापि विज्ञेयम् ।

१२. अः सपत्न्याः ।

सपत्नीशब्दात् तस्य तुल्येऽर्थे अः प्रत्ययो भवति । सपत्न्यास्तुल्य.—सपत्नः ।

१३. एकशालाया इकः ।

एकशालाशब्दात् तस्य तुल्येऽर्थे इकः प्रत्ययो भवति । एकशालायास्तुल्य—एकशालिकम् ।

१४. गोण्यादेश्चेकण् ।

गोण्यादिभ्य एकशालाशब्दाच्च तस्य तुल्येऽर्थे इकण् प्रत्ययो भवति । गोण्यास्तुल्य—गौणिकम् । अङ्गुले. अङ्गुल्या वा—आङ्गुलिकम् । एकशालाया ऐकशालिकम् । गोण्यादयो यथा—गोणी, अङ्गुलि, भरुजा, वभ्रु, बभ्रु, वल्गु, मण्डर, मण्डल, शष्कुली, हरि, मण्डु, कपि, भरु, खल, उदश्वित्, तरस्, कुलिश, मुनि, रुरु इति गोण्यादि. ।

१५. कर्कलोहितादीकण् च ।

कर्क, लोहित—इत्येताभ्यां तस्य तुल्येऽर्थे ईकण् चकारादिकण् च प्रत्ययौ भवतः । शुक्लोऽश्व. कर्क । तस्य तुल्य —कार्कीक , कार्किक । लौहितीक , लौहितिक. । स्फटिकादिः अलोहितवर्णोऽप्युपाश्रयवशाद्यस्तथावभासते स एवमुच्यते ।

१६. तेन वित्ते चञ्चुचणौ ।

तेनेति तृतीयान्ताद् वित्तेऽर्थे चञ्चु, चण—इत्येतौ प्रत्ययौ भवत । वित्तो ज्ञात प्रकाश इत्यर्थ । विद्यया वित्त.—विद्याचञ्चु , विद्याचण । केशचञ्चु , केशचणः ।

१७. वेर्विस्तृते शालशङ्कटौ ।

विशब्दाद् विस्तृतेऽर्थे शाल, शङ्कट—इत्येतौ प्रत्ययौ भवत । विशालः, विशङ्कटः—विस्तृत इत्यर्थः । विनानाना इति अव्यये पृथग्भावे वर्तेते इति विनञ्भ्यां नानाञौ प्रत्ययौ न वक्तव्यौ ।

१८. कटः ।

विशब्दाद् विस्तृतेऽर्थे कट प्रत्ययो भवति । विकटः ।

१९. संप्रोन्नेः संकीर्ण-प्रकाशाधिक-समीपे ।

सम्, प्र, उद्, नि—इत्येतेभ्यो यथासंख्य संकीर्णादिष्वर्थेषु कट प्रत्ययो भवति । समः सकीर्णे—संकटः । प्रात् प्रकाशे— प्रकट । उदोऽधिके—उत्कटः । नेः समीपे—निकटम् ।

२०. अवात्ऽवनते कुटारश्च ।

अवशब्दादवनतेऽर्थे कुटारश्चकारात् कटश्च प्रत्ययो भवति । अवकुटार , अवकट ।

२१. नासानति-तद्वतोष्टीट-नाट-भ्रटाः ।

अवशब्दान्नासानतौ तद्वति च वाच्ये टीट, नाट, भ्रट—इत्येते प्रत्यया भवन्ति । नासाया नमनं—अवटीटं, अवनाटं, अवभ्रटम् । सा नासानतिर्विद्यते यस्मिन् स तद्वान् नासा पुरुष । अपकृष्टो वार्थ । तत्र अवटीटा, अवनाटा, अवभ्रटा नासिका । अवटीट , अवनाटः, अवभ्रटः पुरुषः । अवटीटं, अवनाट, अवभ्रटं वा निकृष्टद्रव्यम् । अपकृष्टमपि हि वस्तु दृष्ट्वा लोको नासिकां नामयति ।

२२. नेरिन-पिट-काश्चिक्-चि-चिकश्चास्य ।

निशब्दान्नासानतौ तद्वति चाभिधेये इन, पिट, क—इत्येते प्रत्यया भवन्ति तत्संनियोगे चास्य नेर्यथासख्य चिक्, चि, चिक् इत्येते आदेशा भवन्ति। चिकिन[1], चिपिट, चिक्क नासिकानमनम्। चिकिना, चिपिटा, चिक्का नासिका। चिकिनः, चिपिटः, चिक्कः पुरुषः।

२३. बिडबिरीसौ नीरन्ध्रे च।

निशब्दान्नीरन्ध्रेऽर्थे नासानतितद्वतोश्च बिड, बिरीस—इत्येतौ प्रत्ययौ भवतः। निबिडाः, निबिरीसाः केशाः। निबिड, निबिरीसं वस्त्रम्। नासिकाया नमन—निबिड, निबिरीसम्। निबिडा, निबिरीसा नासिका। निबिड, निबिरीसो मैत्रः। विधानसामर्थ्यात् षत्व न भवति।

२४. क्लिन्नाल्लश्चक्षुषि चिल् पिल् चुल् चास्य।

क्लिन्नशब्दात् चक्षुषि वाच्ये लः प्रत्ययो भवति तत्संनियोगे चास्य चिल्, पिल्, चुल्—इत्येते आदेशा भवन्ति। चिल्लं, पिल्ल, चुल्ल चक्षुः। तद्योगात् पुरुषोऽपि चिल्लः, पिल्लः, चुल्लः।

२५. अवेः संघातविस्तारयोः कटपटौ।

अविशब्दात् सामर्थ्यात् षष्ठ्यन्तात् सघाते विस्तारे चार्थे यथासख्य कट, पट—इत्येतौ प्रत्ययौ भवतः। अवीना संघातः—अविकटः। अवीनां विस्तारः—अविपटः। सघाते सामूहिकाना विस्तारे ऐदमर्थिकानां चापवादो योगः।

२६. पशुभ्यः स्थाने गोष्ठः।

पशुनामभ्य षष्ठ्यन्तेभ्य स्थानेऽर्थे गोष्ठ प्रत्ययो भवति। इदमर्थानामपवाद। गवा स्थानं—गोगोष्ठम्। महिषीगोष्ठ, अश्वगोष्ठम्।

२७. द्वित्वे गोयुगः।

पशुनामभ्य षष्ठ्यन्तेभ्यो द्वित्वेऽर्थे गोयुगः प्रत्ययो भवति। इदमर्थानामपवादः। गवोर्द्वित्व—गोगोयुगम्। अश्वगोयुग, उष्ट्रगोयुगम्।

२८. षट्त्वे षड्गवः।

पशुनामभ्यः षष्ठ्यन्तेभ्य षट्त्वे गम्यमाने षड्गव प्रत्ययो भवति। उष्ट्राणा षट्त्वं—उष्ट्रषड्गवम्। हस्तिषड्गवं, अश्वषड्गवम्। इदमर्थानामपवादः।

२९. तिलादिभ्यः स्नेहे तैलः।

तिलादिभ्य षष्ठ्यन्तेभ्यः स्नेहेऽर्थे तैल प्रत्ययो भवति। विकारप्रत्ययापवादः। तिलाना स्नेहो विकारः—तिलतैलम्। सर्षपतैलं, इङ्गुदतैलं, एरण्डतैलम्।

३०. कर्मणि घटते ठः।

कर्मन्शब्दान्निर्देशादेव सप्तम्यन्ताद् घटतेऽर्थे ठः प्रत्ययो भवति। कर्मणि घटते—कर्मठः।

---

१. नासिकाया नमन शब्दान्तरेण निशब्दस्यार्थकथनम्।

३१. तदस्य संजातं तारकादिभ्य इतः ।

तदिति प्रथमान्तेभ्य तारकादिभ्य. अस्येति षष्ठ्यर्थे इत. प्रत्ययो भवति यत्तत् प्रथमान्त संजात चेत्तद् भवति । तारकाः सजाता. अस्य तारकित नभ. । पुष्पाणि सजातानि अस्य पुष्पितस्तरुः । तारकादयो यथा—तारका, पुष्प, कर्णक, ऋजीष, मूत्र, पुरीष, निष्क्रमण, उच्चार, विचार, प्रचार, आराल, कुड्मल, कुसुम, मुकुल, वकुल, स्तबक, पल्लव, किशलय, वेश, वेग, निद्रा, तन्द्रा, श्रद्धा, बुभुक्षा, पिपासा, अभ्र, श्वभ्र, रोग, अङ्गारक, अङ्गार, पर्णक, द्रोह, सुख, दुःख, उत्कण्ठा, भर, तरङ्ग, व्याधि, व्रण, कण्डूक, कण्टक, मञ्जरी, कोरक, अङ्कुर, हस्तक, पुलक, रोमाञ्च, हर्ष, उत्कर्ष, गर्व, कल्लोल, शृङ्गार, अन्धकार, कन्दल, शैवल, कुतूहल, कुवलय, कलङ्क, कज्जल, कर्दम, सीमन्त, राग, क्षुध्, तृष्, ज्वर, गर, दोह, शास्त्र, पण्डा, मुकुर, मुद्रा, गर्ध, फल, तिलक, चन्द्रक । इत्याकृतिगणोऽयम् ।

३२. गर्भादप्राणिनि ।

गर्भशब्दात् तदस्य सजातमित्यर्थे इत. प्रत्ययो भवति अप्राणिनि—स चेत्षष्ठ्यर्थ. प्राणी न भवति । गर्भः सजातोऽस्य गर्भितो व्रीहि. । गर्भिता शालय. । अप्राणिनीति किम् ? गर्भ. सजातोऽस्या दास्या इति वाक्यमेव ।

३३. प्रमाणान्मात्रट् ।

तदस्येत्यनुवर्तते । तदिति प्रथमान्तात् प्रमाणवाचिनो नाम्नोऽस्येति षष्ठ्यर्थे मात्रट् प्रत्ययो भवति । आयाममान प्रमाणम् । तद् द्विविध—ऊर्ध्वमान तिर्यग्मान[1] च । तत्र ऊर्ध्वमानात्—जानुनी प्रमाणमस्य जानुमात्रं जलम् । जानुमात्री खाता । ऊरुमात्रमुदकम् । ऊरुमात्री परिखा । तिर्यग्मानात्— रज्जुमात्री भूमि. । तन्मात्री, तावन्मात्री । टकार ईबर्थः ।

३४. हस्तिपुरुषाद् वाऽण् ।

तदिति प्रथमान्ताभ्या हस्तिपुरुषशब्दाभ्या प्रमाणवाचिभ्यामस्येति षष्ठ्यर्थे अण् प्रत्ययो वा भवति । पक्षे यथाप्राप्तम् । हस्ती प्रमाणमस्य हास्तिन, हस्तिमात्र, हस्तिदघ्न, हस्तिद्वयस उदकम् । हास्तिनी, हस्तिमात्री, हस्तिदघ्नी, हस्तिद्वयसी खाता । पौरुष, पुरुषमात्र, पुरुषदघ्न, पुरुषद्वयस उदकम् । पौरुषी, पुरुषमात्री, पुरुषदघ्नी, पुरुषद्वयसी खाता । पौरुषी[2], पुरुषमात्री छाया ।

३५. ऊर्ध्वं दघ्नड्द्वयसटौ ।

ऊर्ध्व यत्प्रमाणं तद्वाचिनो नाम्न प्रथमान्ताद् अस्येति षष्ठ्यर्थे दघ्नट्, द्वयसट्—इत्येतौ प्रत्ययौ वा भवत । पक्षे मात्रट् । ऊरु प्रमाणमस्य ऊरुदघ्न, ऊरुद्वयस, ऊरुमात्रमुदकम् । ऊरुदघ्नी, ऊरुद्वयसी, ऊरुमात्री खाता । तद्दघ्नी, तद्द्वयसी, तन्मात्री । तावद्दघ्नी, तावद्द्वयसी, तावन्मात्री । वाग्रहणमण्मात्रटोरबाधनार्थम्[3], तेन पुरुषदघ्नं, पुरुषद्वयसं, पुरुषमात्र, पौरुषमिति पुरुषहस्तिनोश्चातुरूप्य भवति । ऊर्ध्वमिति किम् ? रज्जुमात्री भूमिः ।

३६. मानादसंशये लुक् ।

प्रमाणादित्यनुवर्तते । मानवाच्येव[4] साक्षाद्य प्रमाणशब्दो हस्तवितस्त्यादिः प्रसिद्धो न तु रज्ज्वादिर्यो लक्षणया प्रमाणे वर्तते, तस्मात् प्रस्तुतस्य मात्रडादे. प्रत्ययस्याऽसंशये गम्यमाने लुग् भवति । हस्तः प्रमाणमस्य हस्तः ।

---

१. यद्यपि ऊर्ध्वं मान उन्मानसंज्ञक भवति, तथापि 'ऊर्ध्वं दघ्नड्....' [७/४/३५] इति सूत्रे ऊर्ध्वमित्यस्य प्रमाणविशेषणत्वादिह ऊर्ध्वमानमपि प्रमाणेनैव दर्श्यते ।

२ अत्र तिर्यग्मानमिति ऊर्ध्वे माने विधीयमानौ दघ्नड्द्वयसटौ न भवतः, किंतु मात्रडेव ।

३ अन्यथा ऊर्ध्वमानाऽभावे अण्मात्रटौ सावकाशौ इति तौ बाधित्वा इमावेव स्याताम् ।

४. प्रमाणादित्यधिकारे मानग्रहणमवधारणार्थमिति ।

वितस्ति, दिष्टि[1]। शम[2]---चतुर्विंशतिरङ्गुलानि। मानादिति किम्? ऊरुमात्रमुदकम्। रज्जुमात्री भूमि.। असंशये इति किम्? शम प्रमाणमस्य स्यात्--शममात्रम्। वितस्तिमात्रम्। केचित्तु मानमात्रात् मात्रट्, तस्याऽसंशये लुग्विकल्प चेच्छन्ति। प्रस्थ प्रस्थमात्रो वा व्रीहि.। हस्त हस्तमात्र वा काष्ठम्। पल पलमात्र वा सुवर्णम्। शत शतमात्रा वा गाव.।

३७. द्विगोः संशये च।

मानादित्यनुवर्तते। प्रमाणादिति निवृत्तम्। **'पुरुषाद् वा'** [२/३ ४४] इत्यत्र उपचरितप्रमाणात्[3] पुरुषात् लुकि ईब्विधानात्। तदनुवृत्तौ तु तस्य मानेन विशेषणात् प्रसिद्धादेव हस्तादे लुक्[4] स्यात्। मानान्ताद् द्विगोः संशये चकाराद् असंशये च प्रस्तुतस्य मात्रडादे प्रत्ययस्य लुग् भवति। द्वौ शमौ प्रमाणमस्य द्वौ शमौ प्रमाणमस्य स्यादिति वा द्विशम.[5]। द्विदिष्टि, द्विवितस्ति। द्विकाण्डा क्षेत्रभक्ति, द्विकाण्डी रज्जु। द्विपुरुषी[6], द्विपुरुषा खाता। द्विहस्तिनी, त्रिहस्तिनी। द्वौ प्रस्थौ मानमस्य स्यात्---द्विप्रस्थ। द्विपल, द्विशत। मीयतेऽनेनेति मान प्रमाण उन्मान संख्या चेह गृह्यते। अन्ये तु रूढप्रमाणान्तादेव द्विगोरिच्छन्ति। तन्मते द्विप्रस्थमात्र, द्विपलमात्र, द्विशतमात्र स्यादित्यादौ लुग् न भवति।

३८. मात्रट्।

मानात् संशये इति चानुवर्तते। तदिति प्रथमान्तात् मानशक्तिनो नाम्न षष्ठ्यर्थे मात्रट् प्रत्ययो भवति संशये। प्रस्थो मानमस्य स्यात्---प्रस्थमात्र धान्यम्। प्रस्थमात्रा व्रीहय। कुडवमात्र, पलमात्र, कर्षमात्रम्। पञ्चमात्रा, शतमात्रा। शतमात्र, दिष्टिमात्रम्। मात्रद्दघ्नद्वयसानि नामान्यपि सन्ति। अनुबन्धासञ्जनार्थं तु प्रत्ययविधानम्। तेन च स्त्रिया विशेष। वैश्वदेवमात्रा[7] भिक्षा।

३९. शन्शद्विंशतेः।

शन्नन्तात् शदन्ताच्च संख्याशब्दात् विंशतिशब्दाच्च मानवृत्तेस्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे संशये गम्यमाने मात्रट् प्रत्ययो भवति। डिनोऽपवाद। दश मानमेषा स्यात्---दशमात्रा। पञ्चदशमात्रा। त्रिंशन्मात्रा, त्रयस्त्रिंशन्मात्रा। विंशतिमात्रा।

४०. डिन्।

संशये इति निवृत्त योगविभागात्[8]। शन्नन्तात् शदन्ताच्च संख्याशब्दात् विंशतिशब्दाच्च मानवृत्तेस्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे डिन् प्रत्ययो भवति। पञ्चदशाहोरात्रा परिमाणमस्य पञ्चदशी अर्धमास। पञ्चदशिनौ, पञ्चदशिन। एवं त्रिंशी, त्रिंशिनौ, त्रिंशिन. मासा। त्रयस्त्रिंशिनो देवविशेषा। विंशिनो भवनेन्द्रा।

४१. इदंकिमोऽतुरिय् किय् चास्य।

तदस्य मानादित्यनुवर्तते। तदिति प्रथमान्तात् इदंशब्दात् किंशब्दाच्च मानवृत्तेरस्येति षष्ठ्यर्थे मेये अतु:

---

१ मानविशेष।

२ हस्त इत्यर्थ।

३ पुरुषशब्दस्य हि प्रमाणत्वमुपचरितमेव न साक्षात् प्रमाणमेव।

४ तदऽभावे च ईप् न स्यात।

५ **'मात्रट्'** [७/४/३८] इति मात्रट् संशयविवक्षाया सर्वत्र। अन्यत्र यथासंभव मात्रट्, दघ्नट्, द्वयसट् च। एवं सर्वत्र।

६ अत्र **'हस्तिपुरुषाद् वाऽण्'** [७ ४ ३४] इति न। तत्र तदन्तविधेरनाश्रयणादिति मात्रडादेर्लुक्।

७ वैश्वदेवाभिधस्य य जस्य आहुतिरर्धकर्षप्रमाणा भवति, तत्समानाऽल्पीयसीत्यर्थं।

८ अन्यथा **'शन्शद्विंशतेः'** [७ ४ ३९] **'डिन्'** [७ ४ ४०] वा इत्येक एव योग क्रियेत।

प्रत्ययो भवति तत्संनियोगे च इदंकिमशब्दयोर्यथासंख्य इय्, किय्—इत्येतावादेशौ भवत । चतुर्विध मानम् । तत्र प्रमाणात्—इद मानमस्य इयान् पट । कि मानमस्य कियान् पट । परिमाणात्—इयद् धान्य, कियद् धान्यम् । उन्मानात्—इयत्सुवर्ण, कियत्सुवर्णम् । सख्याया.—इयन्तो गुणिन , कियन्तो गुणिन. । इयती, कियती । उदित्करण दीर्घत्वाद्यर्थम्[1] ।

४२. यत्तदेतदो डावद् च ।

यत्, तद्, एतद्—इत्येतेभ्यस्तदिति प्रथमान्तेभ्यो मानवृत्तिभ्योऽस्येति पष्ठ्यर्थे मेये अतु प्रत्ययो भवति तस्य च डावडागम. । टित्त्वादादौ । यत्, तद्, एतद् वा प्रमाणमस्य यावान् पट , तावान्, एतावान् । यावत्, तावत्, एतावत् धान्यम् । यावत्, तावत्, एतावत् सुवर्णम् । यावन्ति, तावन्ति, एतावन्ति अधिकरणानि । यावती, तावती, एतावती । ननु[2] मात्रडादयोऽपि दृश्यन्ते—इद प्रमाणमस्य इदमात्र, किमात्र, यन्मात्र, तन्मात्र, एतन्मात्र यद्घ्न, यद्द्वयसमित्यादि । सत्यम् । स्वविपये मानविशेपे प्रमाणे मात्रडादयो भवन्ति एव । मानसामान्ये अतुरेवेति विभाग ।

४३. यत्तत्किमः संख्याया डतिर्वा ।

सख्यारूप यन्मान तद्वृत्तिभ्यो यत्, तत्, किम्—इत्येतेभ्य प्रथमान्तेभ्योऽस्येति षष्ठ्यर्थे सख्येये मेये डति प्रत्ययो वा भवति । पक्षे यथाविहित. अतुश्च । या सख्या मानमेषा यति, यावन्त. । सा सख्या मानमेषा तति, तावन्त । का सख्या मानमेषा कति, कियन्त । एतौ[3] अनुडतिप्रत्ययौ स्वभावाद् बहुवचनविषयावेव भवत । सख्याया इति किम् ? कियान्, यावान्, तावान् पट । मानादिति सख्याया विशेपण किम् ? क्षेत्र मा भूत् । का सख्या येषा दशानाम् ।

४४. अवयवात् तयट् ।

तदस्येति सख्याया इति चानुवर्तते । मानादिति निवृत्तम् । अवयवादिति विशेषणान्तरोपादानात् । अवयवे वर्तमानात् सख्यावाचिनो नाम्नस्तदिति प्रथमान्तादस्येति पष्ठ्यर्थे अवयविनि तयट् प्रत्ययो भवति । चत्वारोऽवयवा अस्याः चतुष्टयी शब्दाना प्रवृत्तिः । चतुष्टयी रज्जु । पञ्चतयो यम । सप्ततयी नयप्रवृत्ति. । दशतयो धर्म । द्वादशतयः सिद्धान्त ।

४५. द्वित्रिभ्यामयड् वा ।

द्वि, त्रि—इत्येताभ्या अवयववृत्तिभ्या प्रथमान्ताभ्या अस्येति पष्ठ्यर्थे अवयविनि अयट् प्रत्ययो वा भवति । द्वौ अवयवौ अस्य द्वय, द्वितय तप । त्रय, त्रितय जगत् । त्रय , त्रितयो मोक्षमार्ग । टकार ईवर्थ. । द्वयी, द्वितयी । त्रयी, त्रितयी रज्जु । अवयवा अवयविनि सबद्धा इति सामर्थ्यादवयवी प्रत्ययार्थ इति विज्ञायते । त्रयाणि पानानि यथा तथा पिबादित्यत्र तु देशकालादिभेदेन समुदायाभिधानाद् बहुवचनम्[4] । द्वय पदार्था जीवा अजीवाश्चेत्यत्र तु जीवाऽजीवतया द्विराश्योपादानाद् बहूनामपि द्वाववयवौ भवत. । कथ[5] उभयो मणि , उभये देवमनुष्या., उभयी दृष्टिरिति ? उच्यते—उभयशब्दः सर्वादिषु उभयट् इति पठ्यमानः शब्दान्तरमेव विज्ञेयम् । तथा चास्य **'नेमाल्पप्रथमचरम···'** [१/४/२०] इत्यादिना जस इग्विकल्पो न भवति ।

४६. द्वयादेर्गुणान्मूल्यक्रेये मयट् ।

सख्याया इत्यनुवर्तते । द्वयादेः सख्याशब्दाद् गुणवृत्तेस्तदिति प्रथमान्तादस्येति पष्ठ्यर्थे मयट् प्रत्ययो भवति स

---

१. आदिशब्दात् **'उदृदितो नुम्'** [१/४/५८] इति नुमागमः, **'उदृदितोऽधातोः'** [२/३/८] इति ङीप् च गृह्यते ।

२. मानवाचिनो अतो उच्यमाने कथ मात्रडादय इत्याशङ्का ।

३. अनेन सख्यावृत्तिभ्यो विहितौ, मानवृत्तेस्तु **'इदंकिमोऽतु···'** [७/४/४१] इत्यादिना एकत्वादावपि ।

४. पानस्यैकत्वात् कथ बहुवचनमित्याशङ्कार्थ ।

५ इह केचिद् उभशब्दान्नित्यमयटमिच्छन्ति । उभौ शुक्लकृष्णौ अवयवौ अस्य । तत् स्वमते कथमित्याशङ्का ।

चेत्सख्याशब्दो मूल्ये[1] क्रेये वा वर्तते । यवानां द्वौ गुणौ मूल्यमस्य उदश्वित. क्रेयस्य—द्विमयमुदश्विद्यवानाम् । एव त्रिमयं, चतुर्मयम् । उदश्वितो द्वौ गुणौ क्रेयावेषा यवाना—द्विमया यवा: उदश्वित । एव त्रिमया, चतुर्मया । द्व्यादिपदस्य सापेक्षस्यापि नित्यसापेक्षत्वेन गमकत्वाद् वृत्ति । द्व्यादेरिति किम् ? यवानामेको गुणो मूल्यमस्य उदश्वित. । उदश्वित एको गुण क्रेय एषा यवानाम् । गुणादिति किम् ? द्वौ व्रीहियवौ मूल्यमस्योदश्वित. । द्वे घृतादश्विती क्रेये एषा यवानाम् । मूल्यक्रेय इति किम् ? क्षीरस्य द्वौ गुणौ तैलस्य पाक्यस्य । अपरोऽर्थो वा । मूल्यक्रेय इति प्रत्ययार्थविशेषणम्[2] । तत्र षष्ठ्यर्थो मूल्यं क्रेय वा भवतीति चेत् । द्वौ गुणावेषा मूल्यभूताना यवानामुदश्वित—द्विमया यवा उदश्वितो मूल्यम् । त्रिमया , चतुर्मया । द्वौ गुणावस्योदश्वित क्रेयभूतस्य—द्विमयमुदश्विद्यवाना क्रेयम् । त्रिमय, चतुर्मयम् ।

४७. अधिकं तत्संख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः ।

सख्याया इत्यनुवर्तते तदिति च । तदिति प्रथमान्तात् शति, शद् दशन्—इत्येवमन्तात् सख्याशब्दात् अस्मिन् इति सप्तम्यर्थे शते सहस्रे च ड प्रत्ययो भवति यत्तत् प्रथमान्त तच्चेदधिक तत्सख्य च भवति । सा शतसहस्रलक्षणा सख्या यस्य योजनादेस्तत्तत्सख्य शत सहस्रमिति च यत्सख्यायते तदेव यद्यधिकमपि भवतीत्यर्थ. । योजनाना विशतिर्योजनानि वा विशतिरधिकास्मिन् योजनशते शते वा योजनेषु -विश योजनशत, विश शत योजनानि । एव विश योजनसहस्र, विश सहस्र योजनानि । विश कार्षापणशत, विश शत कार्षापणानि । विश कार्षापणसहस्र, विश सहस्र कार्षापणानि । सख्या-समुदायोऽपि[3] सख्यैव सख्यायतेऽनयेति कृत्वेत्यत्रापि भवति । एकविशति—एकविश, द्वाविश शतम् । शत्—त्रिश शत, त्रिश सहस्र, एकत्रिश, चत्वारिश, पञ्चाशम् । दशन्—एकादश शत, एकादश सहस्रम् । द्वादश, त्रयोदश शत सहस्र वा । योजना-दीनामिव शतानामपि सहस्रे भवति । विशति शतान्यधिकान्यस्मिन् शताना सहस्रे—विश शतसहस्रम् । त्रिश, एकादशम् । एवं सहस्राणामपि शते भवति । विशति सहस्राणि अधिकान्यस्मिन् सहस्राणा शते—विश शतसहस्रम् । त्रिश, एकादशम् । राजदन्तादिषु पाठात् शतशब्दस्य पूर्वनिपात[4] । अधिकमिति किम् ? विशति. त्रिशत् एकादश वा ऊना" अस्मिन् शते । तत्सख्यमिति किम् ? विशतिर्दण्डा अधिका अस्मिन् योजनशते । त्रिशत् पणा अधिका अस्मिन् कार्षापणसहस्रे । एकादश माषा अधिका अस्मिन् कार्षापणशते । अस्मिन्निति किम् ? विशतिरधिकास्मात् शतात् । शतसहस्रे इति किम् ? एकादशाधिका अस्या त्रिशति । शतिशद्दशान्ताया इति किम् ? षडधिका अस्मिन् शत । दशाधिका अस्मिन् सहस्रे । व्यपदेशिवद् भावात् दशान्तत्वे शन्नित्येव क्रियेत न तु दशन्निति । सख्याया इति किम् ? गोविंशति अधिका अस्मिन् गोशते । न गोविशतिशब्द एकविशत्यादिवत् सख्याशब्द. ।

४८. संख्यापूरणे डट् ।

सख्याया इत्यनुवर्तते । सख्या पूर्यते येन तत्सख्यापूरणम् । सख्याशब्दात् सख्यापूरणेऽर्थे डट् प्रत्ययो भवति । अत्र सामर्थ्यात् षष्ठ्यन्तात् प्रत्ययो विज्ञायते । अत एव तदिति निवृत्तम् । एकादशाना पूरण —एकादश । एकादशसख्यापूरण इत्यर्थ. । एव द्वादश., त्रयोदश., चतुर्दश., एकादशी स्त्री । सख्याग्रहण किम् ? एकादशाना घटाना पूरणो जलादि । एकस्य तु पूरणाभावात् न ग्रहणम् । द्व्यादेरित्यनुवृत्तेर्वा ।

४९. विंशत्यादेर्वा तमट् ।

विशत्येवमादिकाया: सख्याया सख्यापूरणे तमट् प्रत्ययो वा भवति । पक्षे डट् । विशते. पूरण.—विशतितम:, विश. । विशतितमी, विशी स्त्री । एकविशतितम , एकविश. । द्वाविशतितम , द्वाविश: । एकान्नत्रिशत्तम:, एकान्नत्रिश. ।

---

१ यदा मूल्ये सङ्ख्याशब्दस्तदा क्रेय प्रत्ययार्थ , क्रेये तु मूल्यं प्रत्ययार्थ ।

२. पूर्वं तु प्रकृतिविशेषणम् ।

३ एकविशत्यादेः समुदायस्य लोके पृथक् सख्यात्वेन रूढत्वादिति भाव: ।

४ सहस्राणां शतमिति कृते 'षष्ठ्ययत्नाच्छेषे' [३.१/६३] इति समासे प्रथमाक्तत्वात् सहस्रस्य पूर्वनिपाते प्राप्ते ।

५. योजनेषु इत्याध्याहार्यमन्यथा तत्सख्यत्व न स्यात् ।

त्रिंशत्तमः, त्रिंशः । चत्वारिंशत्तमः, चत्वारिंशः । द्वाचत्वारिंशत्तमः, द्वाचत्वारिंशः । पञ्चाशत्तमः, पञ्चाशः । अष्टपञ्चाशत्तमः, अष्टपञ्चाशः ।

५०. शतादि-मासार्धमास-संवत्सरात् ।

शतादिभ्यः सङ्ख्याशब्देभ्यो मास, अर्धमास, संवत्सर—इत्येतेभ्यश्च सङ्ख्यापूरणे तमट् प्रत्ययो भवति । शतस्य पूरणः—शततमः । शततमी । एकशततमः, सहस्रतमः, लक्षतमः । मासस्य पूरणः—मासतमो दिवसः । अर्धमासतमः, संवत्सरतमः । षष्ट्यादेरित्येव सिद्धे शतादिग्रहणं संख्याद्यर्थम् ।

५१. षष्ट्यादेरसंख्यादेः ।

सङ्ख्या आदिरवयवो यस्य स संख्यादिः । ततोऽन्यस्मात् षष्ट्यादेः षष्टिप्रभृतिभ्यः सङ्ख्याशब्देभ्यः सङ्ख्यापूरणे तमट् प्रत्ययो भवति । विकल्पापवादः । षष्टेः पूरणः—षष्टितमः । सप्ततितमः, अशीतितमः, नवतितमः । असंख्यादेरिति किम् ? एकषष्टितमः, एकषष्टः । एकसप्ततितमः, एकसप्ततः । विंशत्यादेरिति विकल्प एव ।

५२. नो मट् ।

असंख्यादेः सङ्ख्याशब्दान्नकारान्तात् सङ्ख्यापूरणे मट् प्रत्ययो भवति । डटोऽपवादः । पञ्चानां पूरणः—पञ्चमः । पञ्चमी । सप्तमः, अष्टमः, नवमः, दशमः । न इति किम् ? विंशः । असंख्यादेरिति किम् ? एकादशः, द्वादशः ।

५३. बहु-गण-पूग-संघात् तिथट् ।

बहु, गण, पूग, संघ—इत्येतेभ्यः सङ्ख्यापूरणे तिथट् प्रत्ययो भवति । बहूनां पूरणः—बहुतिथः । बह्वीनां पूरणी—बहुतिथी '**मानिक्यङ्कबतस्त्रतर**···' [३/२/८६] इत्यादिना पुवद्भावः । टित्त्वादीप् । गणतिथः, गणतिथी । पूगतिथः, पूगतिथी । संघतिथः, संघतिथी । संख्याविशेषणं मभवापेक्षम् ।

५४. अतोरिथट् ।

अतुप्रत्ययान्तात् सङ्ख्याशब्दात् सङ्ख्यापूरणे इथट् प्रत्ययो भवति । डटोऽपवादः । इयतां पूरणः—इयतिथः । इयतीनां पूरणी—इयतिथी । कियतिथः, कियतिथी । यावतिथः, यावतिथी । तावतिथः, तावतिथी । एतावतिथः, एतावतिथी ।

५५. द्वेस्तीयः ।

द्विशब्दात् सङ्ख्यापूरणे तीय प्रत्ययो भवति । द्वयोः पूरणः—द्वितीयः । द्वितीया ।

५६. त्रेस्तृ च ।

त्रिशब्दात् संख्यापूरणे तीयः प्रत्ययो भवति तत्संनियोगे च त्रेस्तृ इत्ययमादेशो भवति । त्रयाणां पूरणः—तृतीयः । तिसृणां पूरणी तृतीया ।

५७. चतुरो यैयौ चलोपश्च ।

चतुर् इत्येतस्मात् संख्यापूरणे य, ईय—इत्येतौ प्रत्ययौ भवतः तत्संनियोगे च इत्येतस्य चलोपो भवति । चतुर्णां पूरणः—तुर्यः, तुरीयः । तुर्या, तुरीया ।

५८. षट्-कति-कतिपयाच्च थट् ।

षट्, कति, कतिपय—इत्येतेभ्यश्चकारात् चतुर्शब्दाच्च संख्यापूरणे थट् प्रत्ययो भवति । षण्णां पूरणः—

षष्ठः । षष्ठी । कतीनां पूरणः—कतिथः । कतिथी । कतिपयथः, कतिपयथी । चतुर्णां पूरण —चतुर्थः । चतसृणां पूरणी—चतुर्थी । 'षटि' [१/१/२८] इति पदत्वं न । एवं च चतुर्शब्दस्य त्रैरूप्यं भवति ।

५९. भागेऽष्टमाञ्ञो वा ।

अष्टमशब्दाद् भागेऽर्थे वर्तमानात् ञः प्रत्ययो वा भवति । अष्टमो भागः—आष्टमः, अष्टमः । भागे इति किम् ? अष्टमो जिनचन्द्रप्रभः ।

६०. षष्ठात् ।

षष्ठशब्दाद् भागेऽर्थे ञः प्रत्ययो वा भवति । षष्ठो भागः—षाष्ठः, षष्ठः । भागे इति किम् ? षष्ठो जिनपद्मप्रभः । योगविभाग उत्तरार्थः ।

६१. माने कश्च ।

मीयते येन तन्मानम् । तस्मिन् माने भागे वर्तमानात् षष्ठशब्दात् कश्चकारात् ञश्च प्रत्ययौ वा भवतः । षष्ठो भागः—षष्ठकः, षाष्ठः, षष्ठो वा इति मानं चेत् । माने इति किम् ? षाष्ठः, षष्ठो वा भागोऽन्यः ।

६२. तेन पूरणाद् ग्रन्थं गृह्णाति लुक् चाऽस्य ।

तेनेति तृतीयान्तात् पूरणप्रत्ययान्तात् ग्रन्थं गृह्णातीत्यर्थे कः प्रत्ययो भवति तत्संनियोगे च पूरणप्रत्ययस्य लुग् भवति । द्वितीयेन रूपेण ग्रन्थं गृह्णाति—द्विकः । त्रिकः, चतुष्कः, पञ्चकः, षट्कः वैयाकरणः । ग्रन्थमिति किम् ? पञ्चमेन दिनेन शत्रुं गृह्णाति ।

६३. ग्रहणे वा ।

पूर्वमनुवर्तते । गृह्यतेऽनेनेति ग्रहणं रूपादि । ग्रन्थस्य ग्रहणे वर्तमानात् पूरणप्रत्ययान्तात् शब्दात् स्वार्थे प्रकृत्यर्थे एव अर्थान्तरानिर्देशात् कः प्रत्ययो भवति तत्संनियोगे च पूरणप्रत्ययस्य वा लुग् भवति । वेति लुकैव सम्बध्यते न प्रत्ययेन । पक्षे प्रत्ययाऽनुत्पत्तेर्महाविभाषयैव सिद्धत्वात् । द्वितीयमेव द्विकं ग्रन्थग्रहणमस्य । द्वितीयकं ग्रन्थग्रहणमस्य । एवं त्रिकं, तृतीयकम् । चतुष्कं, चतुर्थकम् । पञ्चकं, पञ्चमकम् । ग्रन्थस्यैव ग्रहणादिह न—द्वितीयं ग्रहणं धान्यस्य ।

६४. एकादाकिन् चाऽसहाये ।

एकशब्दादऽसहायार्थवाचिन आकिन् चकारात् कश्च प्रत्ययौ भवतः । एक एव एकाकी, एककः । असहाय इति किम् ? एके आचार्याः । एको द्वौ बहवः । असहायग्रहणं सङ्ख्यानिवृत्त्यर्थम् । अन्यथा द्वित्वबहुत्वयोर्न स्यात् । एकाकिनौ, एकाकिनः ।

६५. पूर्वमनेन सादेश्चेन् ।

पूर्वमिति क्रियाविशेषणान्निर्देशादेव द्वितीयान्तात् केवलात् सपूर्वाच्च अनेनेति तृतीयार्थे कर्तरि इन् प्रत्ययो भवति । केवलात्— पूर्वमनेन पूर्वी । पूर्विणौ, पूर्विणः । अनेनेति कर्तृपदं, कर्ता च क्रियामन्तरेण न भवतीति कृतं भुक्तं पीतं चेति काञ्चित् क्रियामपेक्षते । विशेषावगमस्तु अर्थात् प्रकरणात् शब्दान्तरसंनिधेर्वा भवति । पूर्वी कटम् । पूर्वी ओदनम् । पूर्वी पयः । सादेः— कृतं पूर्वमनेन कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् । पीतपूर्वी पयः । कृतपूर्वादि समासात् प्रत्ययः क्तान्तं येनैव समानाधिकरणं तस्यैव कर्मता वक्ति । न च वृत्तौ क्तान्तं कटादिना समानाधिकरणमिति कटादिगतं कर्मानुवर्तमिति द्वितीया ।

६६. इष्टादेः ।

इष्टादिभ्यः सामर्थ्यात् प्रथमान्तेभ्योऽनेनेति तृतीयार्थे कर्तरि इन् प्रत्ययो भवति। इष्टमनेन इष्टी यज्ञे। पूर्ती श्राद्धे। **'इष्टादीनः कर्मणि'** [२/४/१०३] इति कर्मणि सप्तमी। इष्टादयो यथा—इष्ट, पूर्त, उपपादित, उपसादित, उपासित, निगदित, परिगदित, निकटित, सकलित, परिकलित, सरक्षित, परिरक्षित, अर्चित, अगणित, अवगणित, अवकीर्ण, अवमुक्त, आयुक्त, गृहीत, अधीत, आम्नात, श्रुत, आसेवित, अवधारित, अवकल्पित, कृत, निराकृत, उपकृत, उपाकृत, अनुयुक्त, अनुगुणित, अनुगणित, गणित, परिगणित, अनुपठित, निपठित, पठित, व्याकुलित, उद्गृहीत, कथित, निकथित, निषादित इति इष्टादि.।

६७. श्राद्धमद्य भुक्तमिकश्च ।

श्राद्धशब्दात् प्रथमान्तादद्य भुक्तमित्येवमुपाधिकादनेनेनि तृतीयार्थे कर्तरि इकश्चकारादिन् इत्येतौ प्रत्ययौ भवतः। श्राद्धशब्दः कर्मनामधेय तत्साधने द्रव्ये वर्तित्वा प्रत्ययमुत्पादयति। श्राद्धमनेनाद्य भुक्तं—श्राद्धिकः, श्राद्धी। अद्यग्रहणाद् अद्य भुक्ते श्राद्धे एव, तेन श्व श्राद्धिकः, श्राद्धी इति न भवति। भुक्तमिति किम् ? श्राद्धमनेनाद्य कृतम्।

६८. अनुपद्यन्वेष्टा ।

अनुपदीति इन्नन्त निपात्यते अन्वेष्टा चेत् प्रत्ययार्थो भवति। अनुपदमन्वेष्टा—अनुपदी उष्ट्राणाम्। अनुपदी गवाम्।

६९. दाण्डाजिनिकायःशूलिकपार्श्वकम् ।

दाण्डाजिनिक, आयःशूलिक—इत्येतौ शब्दौ इकण्प्रत्ययान्तौ पार्श्वकशब्दश्च कप्रत्ययान्तो निपात्यते अन्वेष्टा चेत् प्रत्ययार्थो भवति। दण्डाजिनं दम्भ., तेनान्वेष्टा—दाण्डाजिनिक.। यो मिथ्याव्रती परप्रसादार्थ दण्डाजिनमुपादाय अर्थान् अन्विच्छति स दाम्भिक उच्यते। निपातनं रूढ्यर्थ, तेन शैवभागवतादौ न भवति। तीक्ष्ण उपायोऽय.शूलसाम्यात् अय.शूल, तेनान्वेष्टा—आयःशूलिक। यो मृदुनोपायेनान्वेष्टव्यानर्थान् तीक्ष्णोपायेन अन्विच्छति राभसिकः स एवमुच्यते। केचिदाभ्यामिकमेवाहु। तन्मते दण्डाजिनिक, दण्डाजिनिका। अय.शूलिक., अयःशूलिका। पार्श्वमनृजुरुपायः लञ्चादिः, तेनान्वेष्टा—पार्श्वक.। ऋजुनोपायेनान्वेष्टव्यान् अर्थान् अनृजुनोपायेन योऽन्विच्छति स पार्श्वक उच्यते। यस्तु राज्ञः पार्श्वेन अर्थान् अन्विच्छति स राजपुरुषस्तत्र न भवति।

७०. क्षेत्रियः परक्षेत्रे चिकित्स्यः ।

परक्षेत्रे चिकित्स्य इत्यर्थे क्षेत्रियशब्द इयप्रत्ययान्तो निपात्यते। परक्षेत्रं—जन्मान्तरशरीरम्। तत्र चिकित्स्यः—क्षेत्रियोऽसाध्यव्याधिः कुष्ठप्रभृति.। अथवा क्षेत्रियं विषम्। यत् परक्षेत्रे परशरीरे सक्रमय्य चिकित्स्यते। अथवा क्षेत्रियाणि तृणानि। तानि सस्यक्षेत्रेऽन्यस्मिन्नुत्पन्नानि चिकित्स्यानि नाशयितव्यानि। अथवा क्षेत्रियः पारदारिकः। परदारा.—परक्षेत्रं, तत्र चिकित्स्यो निगृहीतव्यः। दारा.—क्षेत्रम्।

७१. छन्दोऽधीते श्रोत्रियो वा ।

छन्दस्शब्दात् अधीते इत्यस्मिन्नर्थे इयप्रत्यये छन्दसः श्रोत्रादेशे च श्रोत्रिय इति वा निपात्यते। छन्दोऽधीते—श्रोत्रियः। पक्षेऽण्। छान्दसः।

७२. इन्द्रियम् ।

इन्द्रियमिति इन्द्रशब्दादियप्रत्ययो निपात्यते। निपातनं रूढ्यर्थं, तेन यथायोगमर्थकल्पना। इन्द्रः—आत्मा, इन्द्रस्य लिङ्गमिन्द्रियं चक्षुराद्युच्यते। तेन हि साधनेनात्मानुमीयते, नाकर्तृकं साधनमिति। इन्द्रेण दृष्टमिन्द्रियम्। आत्मा

हि चक्षुरादीनि दृष्ट्वा स्वविषये नियुङ्क्ते । इन्द्रेण सृष्टमिन्द्रियम् । आत्मकृतेन हि शुभाशुभेन कर्मणा तथाविधविषयोपभोगाय अस्य चक्षुरादीनि भवन्ति । इन्द्रेण जुष्टमिन्द्रियम्, तद्द्वारेणास्य विज्ञानोत्पादात् । इन्द्रेण दत्तमिन्द्रियम्, विषयग्रहणाय विषयेभ्यः समर्पणात् । इन्द्रस्यावरणक्षयोपशमसाधनमिन्द्रियम् । एवं सति सम्भवेऽन्यापि व्युत्पत्तिः कर्तव्या ।

७३. तीयादीकण् स्वार्थेऽविद्यायाम् ।

तीयप्रत्ययान्तात् स्वार्थे ईकण् प्रत्ययो भवति विद्या चेन्नाऽभिधेया न स्यात् । द्वितीय एव द्वैतीयीकः । तार्तीयीकः । द्वैतीयीकी, तार्तीयीकी । अविद्यायामिति किम् ? द्वितीया विद्या । तृतीया विद्या । मुखतीयः, पार्श्वतीयः इति तीयस्याऽनर्थकत्वान्न भवति ।

७४. पूगादमुख्यकाञ्ञ्यः ।

स्वार्थे इत्यनुवर्तते । नानाजातीया अनियतवृत्तयोऽर्थकामप्रधाना संघा पूगाः । पूगवाचिनो नाम्नः स्वार्थे ञ्यः प्रत्ययो भवति, न चेत् पूगवाचि नाम **'सोऽस्य मुख्यः'** [८/२/९४] इति विहितकप्रत्ययान्तो भवति । लोहध्वज एव लौहध्वज्यः । लौहध्वज्यौ, लोहध्वजाः । शैब्यः, शैब्यौ, शिबयः । वातक्यः, वातक्यौ, वातकाः । **'ञ्याद्यन्ता रूढाः'** [७/४/८३] इति रूढत्वात् **'बहुष्वस्त्रियां पुरोश्च'** [६/२/१३४] इति लुक् । अमुख्यकादिति किम् ? देवदत्तो मुख्योऽस्य देवदत्तकः, इन्द्राग्निलुप्तकः पूगः ।

७५. व्रातादस्त्रियाम् ।

नानाजातीया अनियतवृत्तयः शरीरायासजीविनः संघा व्राताः । व्रातवाचिनो नाम्न स्वार्थे ञ्यः प्रत्ययो भवति न तु स्त्रियाम् । कापोतपाक्यः, कापोतपाक्यौ, कपोतपाकाः । व्रैहिमत्यः, व्रैहिमत्यौ, व्रीहिमताः । अस्त्रियामिति किम् ? कपोतपाका, व्रीहिमता स्त्री ।

७६. शस्त्रजीविसंघाञ्ञ्यड् वा ।

शस्त्रजीविनां यः संघस्तद्वाचिनः स्वार्थे ञ्यट् प्रत्ययो वा भवति । शबराः शस्त्रजीविसंघः । शाबर्यः, शाबर्यौ, शबराः । पौलिन्द्यः, पौलिन्द्यौ, पुलिन्दाः । कुन्तेरपत्यं बहवो माणवकाः कुन्तयः । ते शस्त्रजीविसंघः । कौन्त्यः, कौन्त्यौ, कुन्तयः । पक्षे शबरः, पुलिन्दः । शस्त्रजीविग्रहणं किम् ? मल्लाः संघः । मल्लः, मल्लौ, मल्लाः । संघादिति किम् ? सम्राट्, वागुरः, वागुरौ, वागुराः । नैते श्रेणिबद्धा इति न संघः । टकार ईबर्थः । शाबरी, पौलिन्दी, कौन्ती ।

७७. वाहीकेष्वब्राह्मणराजन्येभ्यः ।

वाहीकेषु यः शस्त्रजीविसंघो ब्राह्मणराजन्यवर्जितः तद्वाचिनः स्वार्थे ञ्यट् प्रत्ययो भवति । कुण्डीविशाः शस्त्रजीविसंघः । कौण्डीविश्यः, कौण्डीविश्यौ, कुण्डीविशाः । क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः । मालव्यः, मालव्यौ, मालवाः । वाहीकेष्विति किम् ? शबराः शस्त्रजीविसंघः । शबरः, शबरौ । पुलिन्दः, पुलिन्दौ । अब्राह्मणराजन्येभ्य इति किम् ? गौपालिः, गौपाली । शालङ्कायनः, शालङ्कायनौ । राजन्यः, राजन्यौ । काम्बव्यः, काम्बव्यौ । स्त्रियां राजन्या, काम्बव्या । ञ्यटि तु ईप् स्यात् । ब्राह्मणप्रतिषेधे ब्राह्मणविशेषप्रतिषेधः । न हि ब्राह्मणशब्दवाच्यो वाहीकेषु शस्त्रजीविसंघोऽस्ति । राजन्ये तु स्वरूपस्य विशेषस्य च प्रतिषेधः । तदर्थमेव बहुवचनम् । शस्त्रजीविसंघादिति किम् ? मल्लः, शयण्डः, सम्राट्, वागुरः ।

७८. वृकाट्टेण्यण् ।

वृकशब्दात् शस्त्रजीविसंघवाचिनः स्वार्थे टेण्यण् प्रत्ययो भवति । वार्केण्यः, वार्केण्यौ, वृकाः । टकार ईबर्थः । वार्केणी स्त्री । शस्त्रजीविसंघादिति किम् ? **'कामक्रोधौ मनुष्याणां खादितारौ वृकाविव'** । वाहीकत्वे नित्यमवाहीकत्वे तु विकल्पेन ञ्यटि प्राप्ते वचनम् । एवमुत्तरसूत्रत्रयमपि ।

७९. यौधेयादेरञ् ।

यौधेयादिभ्यः शस्त्रजीविसंघवाचिभ्यः स्वार्थेऽञ् प्रत्ययो भवति। युधाया अपत्यं बहवः कुमारास्ते शस्त्रजीविसंघः। यौधेयः, यौधेयौ, यौधेयाः। एवं शौभ्रेयः, शौक्रेयः, धार्तेयः, धार्तेयः, ज्यावनेयः। अञ्वचनं '**संघाङ्कघोषलक्षणेऽञ्यञिञः**' [७/१/१२६] इत्यणर्थम्। तेन यौधेयस्य संघादियौधेय इति भवति। ननु यौधेयादयः संघवचना. कथं गोत्रं[1] भवन्ति? उच्यते—भर्गादिरन्तर्गणो यौधेयादिस्तत्र येऽपत्यप्रत्ययान्तास्ते गोत्रं भवन्ति औपगवादिवत्। अपत्यं हि गोत्रम्। अपत्यप्रत्ययान्ताच्च स्वार्थिकोऽप्यपत्यग्रहणेन गृह्यते। अत्र चेदमेव अञ्वचनं लिङ्गम्।

८०. दामन्यादेरीयः।

दामन्यादिभ्यः शस्त्रजीविसंघेभ्यः स्वार्थे ईयः प्रत्ययो भवति। दमनस्यापत्यं बहवः कुमारास्ते शस्त्रजीविसंघः। दामनीयः, दामनीयौ, दामनयः। औलपीयः, औलपीयौ, औलपयः। दामन्यादयो यथा—दामनि, औलपि, औपलि, वैजवापि, औदकि, आच्युतन्ति, काकन्दि, काकन्दकि, कुकुन्दि, कुकुन्दकि, शाकन्तपि, शत्रुन्तपि, सार्वसेनि, बिन्दु, तुलभा, मौञ्जायन, औदमेघि, औपबिन्दि, सावित्रीपुत्र, कौण्ठोपरथ, कौण्डोपरथ, कौण्ठारथ, दाण्डकि, क्रौष्ठकि, जालमानि, जारमाणि, ब्रह्मगुप्त, ब्राह्मगुप्त, जानकि इति दामन्यादि।

८१. पर्श्वादेरण्।

पर्श्वादिभ्यः शस्त्रजीविसंघेभ्यः स्वार्थेऽण् प्रत्ययो भवति। पर्शोरपत्यं बहवो माणवका. पर्शवः। द्विस्वरत्वाद् अण्, तस्य च लुक्। शस्त्रजीविसंघ। पार्शवः, पार्शवौ, पर्शवः। राक्षसः, राक्षसौ, रक्षांसि। स्त्रियां तु '**अब्राह्मणोऽरप्राच्यभर्गादेः**' [६/२/१३३] इति लुक्। पर्शूः। अणि लुकि '**अप्राणिनोऽरज्ज्वादिभ्यः**' [२/३/८२] इत्यूङ्। पर्श्वादिगणो यथा—पर्शु, रक्षस्, असुर, वाह्लिक, वचस्, वसु, मरुत्, सत्वन्, मत्वन्तु, दशार्ह, पिशाच, अशनि, कार्षापण इति पर्श्वादि।

८२. अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रुमद्भ्यो गोत्रेऽणो यञ्।

शस्त्रजीविसंघादिति निवृत्तम्। अभिजित्, विदभृत्, शालावत्, शिखावत्, शमीवत्, ऊर्णावत्, श्रुमत्—इत्येतेभ्यो गोत्रे योऽण् तदन्तेभ्यः स्वार्थे यञ् प्रत्ययो भवति। अभिजितोऽपत्यमाभिजितः, स एव आभिजित्यः। आभिजित्यौ, आभिजिताः। एवं वैदभृत्यः, वैदभृताः। शालावत्यः, शालावताः। शैखावत्यः, शैखावताः। शामीवत्यः, शामीवताः। और्णावत्यः, और्णावताः। श्रौमत्यः, श्रौमताः। श्रीमच्छब्दादपि केचिदिच्छन्ति। श्रैमत्यः, श्रैमताः। गोत्रग्रहणं किम्? अभिजित् देवता अस्य आभिजितः स्थालीपाकः। अपत्यप्रत्ययान्तात् स्वार्थिकोऽपत्य एव वर्तते इति तदाश्रयः प्रत्ययो भवति। आभिजित्यस्यापत्यमाभिजित्यायनः। अत्र '**यञिञः**' [६/२/७३] इत्यायनण्। आभिजितकः—अत्र '**गोत्रादवदण्ड...**' [७/१/१२६] इत्यादिना तस्येदमित्यर्थेऽकञ्। आभिजितकं—अत्र '**गोत्रोक्षोष्ट्रोरभ्र...**' [६/३/१३] इत्यादिना समूहेऽकञ्। आभिजितं—अत्र '**संघाङ्कघोष...**' [७/१/१२६] इत्यादिना संघादावण्।

८३. ञ्याद्यन्ता रूढाः।

'**पूगादमुख्यकात्...**' [७/४/७४] इत्यत आरभ्य यञ्पर्यन्ता ये ञ्यादयः प्रत्ययास्तदन्ताः शब्दा रूढसंज्ञका भवन्ति। उदाहरणानि यथास्थानं विज्ञेयानि। रूढसंज्ञाप्रयोजनं तु '**बहुष्वस्त्रियां पुरोऽस्य**' [६/२/१३४] इत्यादि।

८४. विनयादिभ्य इकण्।

विनयादिभ्यः शब्देभ्यः स्वार्थे इकण् प्रत्ययो भवति। विनय एव वैनयिकम्। समय एव सामयिकम्। विनयादयो यथा—विनय, समय, समाय, कथंचित्, अकस्मात्, उपचार, व्यवहार, समाचार, संप्रदाय, समुत्कर्ष, संगति, संग्राम,

---

१. संघाङ्कादौ गोत्रग्रहणात्।

समूह, विशेष, अव्यय, अत्यय, अनुगादिन् । इत्याकृतिगणोऽयम् ।

८५. उपायाद् ह्रस्वश्च ।

उपायशब्दात् स्वार्थे इकण् प्रत्ययो भवति तत्सनियोगे च ह्रस्व । उपाय एव औपयिकम् ।

८६. वाचः संदिष्टे ।

संदिष्टेऽर्थे वर्तमानात् वाच्शब्दात् स्वार्थे इकण् प्रत्ययो भवति । अन्येनान्योऽन्यस्मै यदाह त्वयेद कर्तव्यमिति तत्संदिष्टम् । वागेव वाचिकं कथयति । संदिष्टा वाच कथयतीत्यर्थ । संदिष्टे इति किम् ? चित्रा वाक् चैत्रस्य । सत्यपि महाविकल्पाधिकारे विशिष्टोऽर्थः प्रत्ययमन्तरेण न प्रतीयते इत्यस्मिन् विषये नित्य एव प्रत्यय ।

८७. कर्मणोऽण् ।

संदिष्टे इत्यनुवर्तते । संदिष्टेऽर्थे वर्तमानात् कर्मन्शब्दात् स्वार्थेऽण् प्रत्ययो भवति । कर्मैव कार्मण करोति । संदिष्ट कर्म करोतीत्यर्थः । वशीकरणमपि वृद्धपरपरोपदेशात् क्रियते इति कार्मणमुच्यते । संदिष्टे इति किम् ? कर्म करोति । अत्रापि पूर्ववन्नित्यो विधि ।

८८. प्रज्ञादिभ्यः ।

प्रज्ञादिभ्य शब्देभ्य. स्वार्थेऽण् प्रत्ययो भवति । प्रजानातीति प्रज्ञ , प्रज्ञ एव प्राज्ञ । प्राज्ञी कन्या । प्रज्ञास्या अस्तीति णे प्राज्ञा कन्या । वणिगेव वाणिजः । प्रज्ञादयो यथा—प्रज्ञ, वणिज, उशिज्, प्रत्यक्ष, विद्वस्, विदत्, विदन्त, द्विदत्, षोडत्, विद्या, मनस्, जुहूत्, चिकीर्षत्, चिकीर्षति, वसु, मरुत्, वसुमत्, सत्वम्, सत्वतु, सर्व, दशार्ह, कुञ्च, वयस्, रक्षस्, असुर, शत्रु, चोर, योध, चक्षुस्, पिशाच, अशनि, कार्षापण देवता, बन्धु, अनुजा, वर, अनुपुक्, चतुष्प्राश्य, रक्षोघ्न, वियात, विकृत, विकृति, व्याकृत, वरिवस्कृत, अग्रायण, अग्रहायण, सतपन, मधुप, द्विधा, चण्डाल, गायत्री, उष्णिह्, अनुष्टुभ्, बृहती, पङ्क्ति, त्रिष्टुभ्, जगती । इत्याकृतिगणोऽयम् । तेन आग्नीध्री आग्नीध्रा वा शाला, साधारणी साधारणा वा भूमिरित्यादि सिद्धम् ।

८९. श्रोत्रौषधि-कृष्णेभ्यः शरीर-भेषज-मृगेषु ।

श्रोत्र, ओषधि, कृष्ण—इत्येतेभ्यो यथासख्य शरीरे भेषजे मृगे च वर्तमानेभ्यः स्वार्थेऽण् प्रत्ययो भवति । श्रोत्राच्छरीरे—श्रोत्रमेव श्रौत्र शरीरम् । श्रोत्रमेवाऽन्यत् । ओषधेर्भेषजे—ओषधिरेवौषध भेषजम् । ओषधिरेवाऽन्यत् । कृष्णान्मृगे—कृष्ण एव कार्ष्णो मृग. । कृष्ण एवान्य ।

९०. विसारिणो मत्स्ये ।

विसारिन्शब्दात् मत्स्ये वर्तमानात् स्वार्थेऽण् प्रत्ययो भवति । विसरतीति विसारी । ग्रहादित्वाण्णिन् । मत्स्यश्चेत् वैसारिणः । मत्स्य इति किम् ? विसारी देवदत्त. ।

९१. अञिनो नित्यम् ।

अ, जिन्—इत्येताभ्या प्रत्ययान्ताभ्या स्वार्थेऽण् प्रत्ययो नित्यं भवति । नित्यग्रहणात् महाविभाषा निवृत्ता । व्यावक्रोशी[1], व्यावलेखी, व्यावहासी वर्तते । जिन्—साकोटिन[2], साराविण, सामार्जिनम् ।

---

१. 'व्यतिहारेऽनीहादिभ्यो ञः' [५/४/११६] इति ञ. । अनेनाऽण् । तत ईप् च ।

२. 'अभिव्याप्तौ भावेऽनजिनौ' [५/४/८६] इति जिन् ।

९२. होत्राया ईयः ।

होत्राशब्दात् स्वार्थे ईयः प्रत्ययो भवति । होत्रैव होत्रीयम् ।

९३. प्रायोऽतोर्द्वयसट्मात्रटौ ।

अतुप्रत्ययान्तात् स्वार्थे द्वयसट्, मात्रट्—इत्येतौ प्रत्ययौ भवतः प्रायः । यावदेव यावद्द्वयसम्, यावन्मात्रम् । तावदेव तावद्द्वयसम्, तावन्मात्रम् । एतावद्द्वयसम्, एतावन्मात्रम् । कियद्द्वयसम्, कियन्मात्रम् । प्रायोग्रहणं प्रयोगानुसरणार्थम् ।

९४. भेषजादिभ्यो यण् ।

भेषजादिभ्यः शब्देभ्यः स्वार्थे यण् प्रत्ययो भवति । भेषजमेव भैषज्यम् । अनन्त एव आनन्त्यम् । आवसथ एव आवसथ्यम् । इतिह एव ऐतिह्यम् । इतिहेति निपातसमुदाय उपदेशपारम्पर्ये वर्तते । आकृतिगणोऽयम् ।

९५. चतुर्वर्णादिभ्यष्ट्यण् ।

चतुर्वर्णादिभ्यः शब्देभ्यः स्वार्थे ट्यण् प्रत्ययो भवति । अनयोः स्त्रियां विशेषः । चत्वार एव वर्णाः चातुर्वर्ण्यम् । चातुराश्रम्यम् । चत्वारो वेदाश्चतस्रो विद्या वा चातुर्वैद्यम् । एवं त्रैवैद्यम् । अनुशतिकादित्वाद् उभयपदवृद्धिः । त्रैलोक्य, त्रैकाल्य, सार्वलौक्य, त्रैशल्य, त्रैस्वर्य, षाड्गुण्य, सैन्य, सान्निध्य, सामीप्य, औपम्य, माणिक्य, सौख्य, राजपौरुष्य, पारिमाण्डल्य, प्रातिभाव्य, आन्यभाव्य, ऐकभाव्य, द्वैभाव्य, सार्ववैद्यम् । **'राजपुरुषादेष्ट्यणि'** [८/४/२०] इति उभयपदवृद्धिः । आकृतिगणोऽयम् ।

९६. देवात् तल् ।

देवशब्दात् स्वार्थे तल् प्रत्ययो भवति । देव एव देवता । लित्करणं स्त्र्यर्थम् ।

९७. मृदस्तिकः ।

मृच्छब्दात् स्वार्थे तिकः प्रत्ययो भवति । मृदेव मृत्तिका ।

९८. सस्नौ प्रशंसायाम् ।

मृच्छब्दात् प्रशंसायां वर्तमानात् स्वार्थे स, स्न इत्येतौ प्रत्ययौ भवतः । रूपापवादः । प्रशस्ता मृत्—मृत्सा, मृत्स्ना । केचित्तु रूपमपीच्छन्ति । प्रशस्ता मृत्—मृद्रूपा । प्रशंसायामिति किम् ? मृत्तिका ।

९९. वर्णाऽव्ययात् स्वरूपे कारः ।

वर्णेभ्योऽव्ययेभ्यश्च स्वरूपार्थवृत्तिभ्यः स्वार्थे कारः प्रत्ययो भवति । अकारः, इकारः, ककारः, खकारः । ककारादिष्वकार उच्चारणार्थः । अव्यय—ओंकारः, स्वाहाकारः, स्वधाकारः, वषट्कारः, हन्तकारः, नमस्कारः, चकारः, हुंकारः, पूत्कारः, सीत्कारः । ननु यथा हुकृतिः, पूत्कृतिः, सूत्कृत, सीत्कृतमिति भवन्ति तथा कारशब्देन घञन्तेन समासे ओंकारादयो भविष्यन्ति । सत्यम् । किन्तु ओंकारमुच्चारयति, वषट्कारमभिधत्ते, हुंकारं करोति—इत्यादि न सिध्यति । स्वरूप इति किम् ? अ—विष्णुः, इ—कामः, क—ब्रह्मा, ओं—ब्रह्म, वषडिन्द्राय, स्वाहाग्नये, स्वधा पितृभ्य इत्यर्थपरतायां न भवति । प्रायोऽनुवृत्तेरन्यत्रापि भवति । मन एव मनस्कारः । अहंकारः ।

१००. रादेफो वा ।

रशब्दात् स्वार्थे एफः प्रत्ययो वा भवति । रेफः । पक्षे कारः । रकारः ।

१०१. नाम-रूप-भागेभ्यो धेयः।

नामन्, रूप, भाग—इत्येतेभ्यः स्वार्थे धेय प्रत्ययो भवति। नामैव नामधेयम्। रूपमेव रूपधेयम्। भाग एव भागधेयम्।

१०२. मर्तादिभ्यो यः।

मर्तादिभ्यः शब्देभ्य स्वार्थे य प्रत्ययो भवति। मर्त एव मर्त्यः। सूर एव सूर्यः। एवं क्षेम्यः, यविष्ठ्यं, भाग्यं, अपराध्यं, रथ्यं, लव्यम्। मर्तादयः प्रयोगगम्याः।

१०३. नवादीन-तन-त्नं च नू चाऽस्य।

नवशब्दात् स्वार्थे ईन, तन, त्न, चकाराद्यश्च प्रत्यया भवन्ति तत्संनियोगे च नवशब्दस्य नू इत्ययमादेशो भवति। नवमेव नवीन, नूतनं, नूत्नं, नव्यम्।

१०४. प्रात् पुराणे नश्च।

प्रशब्दात् पुराणेऽर्थे वर्तमानात् स्वार्थे न प्रत्ययो भवति चकारादीनतनत्नाश्च। प्रगत कालेनेति प्रशब्देन पुराणमुच्यते। प्रण, प्रीणं, प्रतनं, प्रत्नम्।

महद्दंष्ट्रोऽप्याखुः खनति न बिलं शैलशिखरे,
सदर्पं सर्पाणां विशति न मयूरोरसि विषम्।
प्रसादोऽयं कालोर्जिनजनगुरोर्यद्[1] रघुरह,
समाचक्षेऽध्यायं विवरणयुतं सप्तममिमम्॥

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयं सप्तमोऽध्यायः।

---

१. यत्—आखुना सर्पविषेण च तुल्योऽहं शैलेन मयूरोरसा च सदृशमिम सप्तममध्यायमिति।

अष्टमोऽध्यायः

प्रथमश्चरणः

१. तदस्यास्मिन्नस्तीति मतुः।

तदिति प्रथमान्तादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे वा मतुः प्रत्ययो भवति यत्तत्प्रथमान्तमस्तीति चेद् भवति। अस्ति समानाधिकरणं भवतीत्यर्थः। गावोऽस्य सन्ति गोमान्। यवमान्। गावोऽस्मिन् सन्ति गोमान्। यवमान्। अस्तीति वर्तमानकालोपादानात् वर्तमानसत्तायां प्रत्ययो भवति न भूतभविष्यत्सत्तायाम्। गावोऽस्यासन्, गावोऽस्य भवितार इति। अथेह कस्मान्न भवति—चित्रा गावोऽस्य सन्ति चित्रगुः, शबलगुरिति? बहुव्रीहिणैव मत्वर्थस्योक्तत्वात्। अस्तीति किम्? गावोऽस्यानन्तराः, गावोऽस्य समीपाः। अनन्तरादिष्वपि स्यात्। इतिकरणो विवक्षार्थः, तेन मत्वर्थीयाः प्रायो भूमादावेव भवन्ति। उक्तं च—

भूमनिन्दाप्रशंसासु, नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां, प्रायो मत्वादयो मताः॥

भूम्नि—गोमान्, यवमान्। निन्दायां—कुष्ठी, शङ्खोदकी। प्रशंसायां—रूपवती, शीलवती। नित्ययोगे—क्षीरिणो वृक्षाः, कण्टकिन। अतिशायने—उदरिणी कन्या, बलवान् मल्ल। संसर्गे—दण्डी, छत्री। प्रायिकमेतद् भूमादिदर्शनं सत्तामात्रेऽपि प्रत्ययो दृश्यते। व्याघ्रवान् पर्वतः। स्पर्शरसगन्धवर्णवन्तः पुद्गलाः। रूपरसगन्धस्पर्शवती पृथिवी। रूपरसस्पर्शवत्य आपः। रूपस्पर्शवत् तेजः। स्पर्शवान् वायुः। तथा च मत्वर्थीयान्मत्वर्थीयः सरूपो न भवति। उक्तं च—

शैषिकाच्छैषिको नेष्टः, सरूपः प्रत्ययः क्वचित्।
समानवृत्तौ[1] मत्वर्थान्मत्वर्थीयोऽपि नेष्यते॥

गाव एषां सन्तीति गोमन्तः, गोमन्तोऽत्र सन्तीति मतुर्न भवति। दण्ड एषामस्तीति दण्डिकाः, दण्डिका अत्र सन्तीति इको न भवति। विरूपस्तु भवत्येव—दण्डिमती शाला, हस्तिमती उपत्यका। विरूपोऽपि मत्वर्थीयः समानायां[2] वृत्तौ न भवति। दण्ड एषामस्तीति दण्डिकाः, दण्डिन। दण्डिकाः दण्डिनो वा अस्य सन्तीति इन्मतू न भवतः। क्वचिदिति समानायामसमानायां च वृत्तौ। शालायां भवः—शालीयः। **'वृद्धाच्छः'** [६/४/३२] इतीये सति पुनः शालीये भवः शालीयस्यायं वेतीयो न भवति। विरूपस्तु भवति—अहिच्छत्रे भवः आहिच्छत्रः, तत्र भवः—आहिच्छत्रीयः। तथा असंज्ञाभूतात् कर्मधारयात् मत्वर्थीयो न भवति। वीरपुरुषा अस्मिन् ग्रामे सन्ति। अत्र बहुव्रीहिरेव भवति। वीरपुरुषको ग्रामः। संज्ञायास्तु भवत्येव—गौरखरवदरण्य, कृष्णसर्पवान् वल्मीकः, लोहितशालिमान् ग्रामः। कथमेकगविकः[3], सर्वधनीति? **'एकादेः कर्मधारयात्'** [८/१/२५] इत्याद्यारम्भसामर्थ्याद् भविष्यति। तथा गुणे गुणिनि च ये गुणशब्दा वर्तन्ते तेभ्यो मत्वर्थीयो न भवति। शुक्लो वर्णोऽस्यास्तीति, तिक्तो रसोऽस्यास्तीति प्रत्ययमन्तरेणाप्येषां तदभिधाने सामर्थ्यात्। ये तु गुणमात्रे तेभ्यो भवत्येव—रूपवान्, रसवान्, शौक्ल्यवान्, कार्ष्ण्यवानिति।

---

१. पूर्वार्धे यत्सरूप इति पदं तदुत्तरार्धेऽपि योज्य, ततोऽयमर्थः—न केवलं सरूपो मत्वर्थीयो मत्वर्थीयात्समानवृत्तौ न भवति, किंतु मत्वर्थीयोऽपीत्यत्रापिशब्दग्रहणाद् विरूपोऽपि इति। विषमवृत्तौ सरूपो मत्वर्थीयो न भवतीति तु कारिकया न संजगृहे।

२. अत्र एषामस्येति च उभयत्रापि षष्ठ्या सद्भावात् समाना वृत्तिः।

३. अत्राप्यसंज्ञाभूतः कर्मधारयोऽस्ति इति अभिप्रायः।

२. मावर्णान्तोपधाद् वतुः ।

मश्च अवर्णश्च मावर्णौ, तौ प्रत्येकमन्ते उपधायां च यस्य तस्मात् मकारान्तात् मकारोपधात् अवर्णान्ताद् अवर्णोपधाच्च तदस्यास्मिन्नस्तीत्यर्थे वतु प्रत्ययो भवति। पूर्वापवाद । मान्तात्—किमस्यास्मिन् वाऽस्तीति किवान्। इदंवान्, शवान्। मोपधात्—शमीवान्, लक्ष्मीवान्। अवर्णान्तात्—ज्ञानवान्, वृक्षवान्, मालावान्, विद्यावान्। अवर्णोपधात्—अहर्वान्, यशस्वान्, भास्वान्, वार्वान् । मावर्णान्तोपधादिति किम् ? अग्निमान्, वायुमान्, पितृमान्, नृमान् ।

३. झपात् ।

झपप्रत्याहारान्तान्नाम्नस्तदस्यास्मिन्नस्तीत्यर्थे वतु प्रत्ययो भवति। तडित्वान्, उदश्वित्वान्, मरुत्वान्, विद्युत्वान्, समिद्वान् । झपादिति किम् ? आयुष्मान् ।

४. संज्ञायाम् ।

संज्ञायां विषये तदस्यास्मिन्नस्तीत्यर्थे वतु प्रत्ययो भवति । अहीवती, कपीवती, मणीवती, मुनीवती, ऋषीवती । एवंनामानो नद्य । आसन्दीवान् नाम ग्राम. ।

५. चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वन्तः ।

एते शब्दा वतुप्रत्ययान्ता संज्ञायां विषये निपात्यन्ते । चर्मन्शब्दस्य नलोपाभावो णत्व च निपात्यते । चर्मण्वती नाम नदी । अस्थिशब्दस्याष्ठीभाव । अष्ठीवान् जङ्घोरुसंधि. । चक्रशब्दस्य चक्रीभाव । चक्रीवान् नाम गर्दभ । चक्रीवान नाम राजा। कक्ष्याशब्दस्य कक्षीभाव । कक्षीवान् नाम ऋषि । लवणस्य रुमण्भाव । रुमण्वान् नाम पर्वत । संज्ञायामिति किम् ? चर्मवती, अस्थिमान्, चक्रवान्, कक्ष्यावान्, लवणवान् ।

६. उदन्वान् अब्धौ च ।

आपो धीयन्तेऽस्मिन् इति अब्धि । अब्धौ संज्ञायां च उदन्वानिति उदकशब्दस्य वतौ उदन्भावो निपात्यते । उदन्वान् घट । उदन्वान् मेघ. । यस्मिन्नुदक धीयते स एवमुच्यते । संज्ञाया—उदन्वान् समुद्र । उदन्वान् नाम ऋषि । यस्यौदन्वत: पुत्र. । उदन्वान् नाम आश्रम । अब्धौ चेति किम् ? उदकवान् घट । अत्र घटस्य उदकसम्बन्धमात्र विवक्षित, न दधातीत्यर्थ. ।

७. राजन्वान् सुराज्ञि ।

शोभनो राजा यस्य तस्मिन् अभिधेये राजन्वान् इति वतौ नलोपाभावो निपात्यते । राजन्वान् देश. । राजन्वती पृथ्वी । राजन्वत्य. प्रजा: । सुराज्ञीति किम् ? राजवान् देश ।

८. नोर्म्यादिभ्यः ।

ऊर्मि इत्येवमादिभ्यो नामभ्य प्राप्तो वतुर्न भवति । ऊर्मिमान्, दल्मिमान्, भूमिमान्, तिमिमान्, कृमिमान्—एभ्यो मोपधत्वात् प्राप्ते, यवमान्, कुञ्चामान्, द्राक्षामान्, ध्राङ्क्षामान्, वासामान्—एभ्योऽवर्णान्तत्वात् प्राप्ते, हरित्मान्, गरुत्मान्, ध्वजित्मान्, ककुद्मान्—एभ्यो **'झपात्'** [८/१/३] इति प्राप्ते, ज्योतिष्मती, महिष्मान्, गोमती, कान्तिमती, शिम्बीमती, हरिमती, चारुमती, इक्षुमती, बन्धुमती, मधुमती, बिन्दुमती, इन्दुमती, द्रुमती, वसुमती, अंशुमती, हनुमान्, सानुमती, भानुमती—एभ्य. **'संज्ञायां'** [८/१/४] इति प्राप्ते प्रतिषेधोऽयम् । बहुवचनमाकृतिगणार्थम्. तेन वतो: स्थाने यत्र मतु: दृश्यते सोऽस्मिन् गणे द्रष्टव्य. ।

९. अस्तपो-माया-मेधा-स्रजो विन्वा ।

असन्तेभ्यस्तपस्, माया, मेधा, स्रज्—इत्येतेभ्यश्च मत्वर्थे विन् प्रत्ययो वा भवति। पक्षे यथाप्राप्तम्। **असन्त—**

यशस्वी, यशस्वान् । यशस्विनी, यशस्वती । सरस्वी, सरस्वान् । सरस्विनी, सरस्वती । एव तेजस्वी, पयस्वी, वर्चस्वी तपस्वी, तपस्वान् । असन्तत्वेनैव सिद्धे तपसो ग्रहणं ज्योत्स्नाद्यणा बाधो मा भूदित्येवमर्थम् । मायावी, मायावान् । मायी मायिकः इति व्रीह्यादिपाठात् । मेधावी, मेधावान् । स्रग्वी, स्रग्वान् ।

१०. नावादेरिकः ।

नौ इत्येवमादिभ्यो मत्वर्थे इक प्रत्ययो वा भवति । नौरस्यास्मिन् वास्तीति नाविकः, नौमान् । कुमारिक कुमारीमान् । आभ्यामिन केचिदाहुः[1] नावी, कुमारी । नावादयो यथा—नौ, कुमारी, यवखदा, सभा, करण इति नावादिः ।

११. शिखादिभ्य इन् ।

शिखादिभ्यो मत्वर्थे इन् प्रत्ययो वा भवति । शिखी, शिखावान् । माली, मालावान् । शिखादयो यथा—शिखा माला, शाला, मेखला, शाखा, वीणा, सञ्ज्ञा, वडवा, अष्टका, बलाका, पताका, कर्मन्, चर्मन्, वर्मन्, बल, उत्साह, उद्वास उद्भास, उल, मुल, मूल, आयाम, व्यायाम, प्रयाम, आरोह, अवरोह, परिणाह, शृङ्ग, वृन्द, गदा, निचुल, मुकुल, कूल फल, अन्न, मान, मनीषा, व्रत, धन्वन्, चूडा, केका, दंष्ट्रा, सूना, घृणा, करुणा, आयास, आयस, जरा, स्तबक, उपयाम उद्यम इति शिखादिराकृतिगण । केचित् वडवा, अष्टका, कर्मन्, वर्मन्, चर्मन् इत्येतेभ्य इकमपीच्छन्ति[2] ।

१२. व्रीह्यादिभ्यस्तौ ।

व्रीह्यादिभ्यो मत्वर्थे तौ—इक, इन् इत्येतौ प्रत्ययौ वा भवत । व्रीहयोऽस्याऽस्मिन् वा सन्तीति व्रीहिक व्रीही, व्रीहिमान् । मायिक, मायी, मायावान् । मायावीति विन् । व्रीह्यादयः प्रयोगगम्या ।

१३. अतोऽनेकस्वरात् ।

अकारान्तादनेकस्वरात् मत्वर्थे तौ—इक, इन् इत्येतौ प्रत्ययौ वा भवतः । दण्डिकः, दण्डी, दण्डवान् छत्रिकः, छत्री, छत्रवान् । अत इति किम् ? मालावान्, खट्वावान् । अनेकस्वरादिति किम् ? खवान्, स्ववान् ।

१४. अशिरसोऽशीर्षश्च ।

अशिरःशब्दान्मत्वर्थे तौ—इक, इन् इत्येतौ प्रत्ययौ वा भवतः तत्सन्नियोगे चाऽशिरःशब्दस्याऽशीर्ष इत्ययमादेशो भवति । अशीर्षिकः, अशीर्षी, अशीर्षवान् । इकेनोः **'शीर्षःस्वद्धिते स्वरे'** [३/२/१२३] इति शीर्षादेशो विद्यत एव, वतौ तु अनेन विधीयते ।

१५. व्रीह्यर्थतुन्दादेरिलश्च ।

व्रीहिवाचिभ्यस्तुन्दादिभ्यश्च मत्वर्थे इल चकारात् तौ च इकेनौ प्रत्यया वा भवन्ति । व्रीह्यर्थ—कलम अस्यास्मिन् वा सन्तीति कलमिलः, कलमिकः, कलमी, कलमवान् । शालिलः, शालिकः, शाली, शालिमान् । व्रीहिशब्दोऽपि व्रीह्यर्थो भवति, किंतु तस्य पूर्वत्रोपादानाद् इलो न भवति । भवतीत्येके—व्रीहिलः । तुन्दादि—तुन्दिलः, तुन्दिकः, तुन्दी तुन्दवान् । उदरिल, उदरिकः, उदरी, उदरवान् । तुन्दादयो यथा—तुन्द, उदर, पिचण्ड, यव, व्रीह, पङ्क, गुहा, कला काक इति तुन्दादिः ।

---

१. ते ह्यनयोः शिखादौ पाठमिच्छन्ति ।

२. ते ह्येतान् व्रीह्यादौ पठन्ति ।

१६. स्वाङ्गाद् विवृद्धात् ते ।

स्वाङ्गवाचिभ्यो विवृद्धोपाधिकेभ्यो मत्वर्थे ते—इल, इक, इन् इत्येते प्रत्यया वा भवन्ति । पक्षे यथाप्राप्तम् । विवृद्धौ महान्तौ कर्णावस्य स्तः— कर्णिलः, कर्णिकः, कर्णी, कर्णवान् । ओष्ठिलः, ओष्ठिकः, ओष्ठी, ओष्ठवान् । विवृद्धादिति किम् ? अन्यत्र इलो न भवति । **'अतोऽनेकस्वरात्'** [८/१/१३] इति इक-इन्-वत एव भवन्ति ।

१७. धनादिकेनावुत्तमर्णे ।

धनशब्दाद् उत्तमर्णेऽभिधेये मत्वर्थे इक, इन् इत्येतौ प्रत्ययौ वा भवत । **'अतोऽनेकस्वरात्'** [८/१/१३] इत्यनेनैव सिद्धे उत्तमर्णे नियमार्थं वचनम् । धनिकः, धनी, धनवान् । उत्तमर्णे इति किम् ? अन्यत्र धनवान् ।

१८. न द्रव्यादिभ्यः ।

द्रव्यादिभ्यः शब्देभ्यो मत्वर्थे प्राप्तौ इकेनौ प्रत्ययौ न भवत । द्रव्यवान्, कव्यवान्, सस्यवान्, धान्यवान्, माल्यवान्, पुण्यवान्, सत्यवान्, अपत्यवान् । बहुवचनमाकृतिगणार्थम् । 'अतोऽनेकस्वरात्' [८/१/१३] इति प्राप्ते निषेधार्थं वचनम् ।

१९. कृद्भ्योऽकार्यादिभ्यः ।

नेत्यनुवर्तते । कार्यादिशब्दवर्जितेभ्यः कृदन्तेभ्यो मत्वर्थे प्राप्तौ इकेनौ प्रत्ययौ न भवत । अत्रापि पूर्ववत् प्राप्तिः । राप्यवान्, लाप्यवान्, लभ्यवान्, हव्यवान्, कृत्यवान्, भृत्यवान् कारकवान्, हारकवान्, कुम्भकारवान्, धान्यमायवान्, हिस्रवान्, ईश्वरवान्, पाकवान्, स्नेहवान् । कार्यादिवर्जन किम् ? कार्यिक , कार्यी । हार्यिकः, हार्यी । गृहिकः, गृही । दात्रिकः, दात्री । पात्रिकः, पात्री । भोगिकः, भोगी । तरिकः, तरी । विजयिकः, विजयी । सयमिक , सयमी । स्थानिकः, स्थानी । बहुवचनमाकृतिगणार्थम् ।

२०. जातेरऽतण्डुलादिभ्यः ।

जातिवाचिभ्यस्तण्डुलादिवर्जितेभ्यो मत्वर्थे प्राप्तौ इकेनौ प्रत्ययौ न भवत. । प्राप्तिरत्रापि पूर्ववत् । व्याघ्रवान्, सिहवान्, वृक्षवान्, प्लक्षवान् । तण्डुलादिवर्जन किम् ? तण्डुलिक , तण्डुली । कर्पटिक , कर्पटी । बहुवचनमाकृतिगणार्थम् ।

२१. लादावऽबीजादिभ्यः ।

बीजादिवर्जितेभ्यो लप्रत्ययादिविषये मत्वर्थे प्राप्तौ इकेनौ प्रत्ययौ न भवतः । वक्ष्यमाणलादिप्रत्ययविषयिक-विकल्पापवादः । सिध्मलः, सिध्मवान् । फेनिल , फेनवान् । बीजादिवर्जनं किम् ? बीजी, बीजिक. । पर्णी, पर्णिकः । कर्णी, कर्णिक. । पिण्डी, पिण्डिक. । तुण्डी, तुण्डिकः । उदरी, उदरिक. । बहुवचनमाकृतिगणार्थम् ।

२२. सप्तम्याम् ।

मत्वर्थे **'अतोऽनेकस्वरात्'** [८/१/१३] इति विहितौ इकेनौ प्रत्ययौ सप्तम्यर्थे न भवतः । दण्डोऽस्मिन्नस्तीति दण्डवद् गृहम् । वीरवान् ग्रामः । मत्वर्थे इतिकरणो विवक्षार्थस्तेनेह भवत्येव—खलिनी भूमिः । शाद्वलिनी भूमिः ।

२३. गोपूर्वादऽत इकण् ।

गोशब्दपूर्वादकारान्तान्मत्वर्थे इकण् प्रत्ययो भवति । मत्वादीनामपवादः । गौशतिकः, गौसहस्रिकः । अत इति किम् ? गोविंशतिमान् । कथं[1] गौशकटिक. ? शकटीशब्देन समानार्थः शकटशब्दोऽस्ति । शकटीशब्दात् तु मतुरनभिधानान्न[2]

१ अदन्ताद् विहित इकण् कथम् ? शकटीशब्दाद् भवतीत्याशय. ।

२ शकटीशब्दात् तावददन्तत्वाऽभावात् इकण् न भवति, परं मतुर्भवति नो वेत्याह ।

भवति। केचित्तु गवादेरनकारान्तादपीच्छन्ति। गवां समूहो गोत्रा, सा विद्यते यस्य गौत्रिकः। गावो वयांसि[1] वास्य सन्ति गौवयसिकः।

२४. निष्कादेः शतसहस्रात् ।

निष्को य आदिस्ततः परं यच्छत सहस्रं च तदन्तान्मत्वर्थे इकण् प्रत्ययो भवति। नैष्कशतिकः, नैष्कसहस्रिकः। निष्कादेरिति किम्? शती, सहस्री। आदिग्रहणात् सुवर्णनिष्कशतमस्यास्तीत्यत्र[2] न भवति।

२५. एकादेः कर्मधारयात् ।

एकादेः कर्मधारयादकारान्तात् मत्वर्थे इकण् प्रत्ययो भवति। एको गौरेकगवः, सोऽस्यास्त्यैकगविकः। ऐकशतिकः, ऐकसहस्रिकः। कर्मधारयादिति किम्? एकस्य गौरेकगवः, सोऽस्यास्तीति न भवति। अत इति किम्? एकविंशतिरस्यास्तीति न भवति। कथमेकद्रव्यवत्त्वादिति? एकेन द्रव्यवत्त्वमिति समासे[3] भविष्यति।

२६. सर्वादेरिन् ।

सर्वादेरकारान्तात् कर्मधारयात् मत्वर्थे इन् प्रत्ययो भवति। सर्वं धनं सर्वधनं, तदस्यास्तीति सर्वधनी। सर्वबीजी। सर्वकेशी नटः।

२७. द्वंद्व-गर्हित-रोगात् प्राणिस्थादस्वाङ्गात् ।

प्राणिस्थोऽस्वाङ्गवाची अकारान्तो यो द्वन्द्वः समासो यश्च निन्द्यवाची रोगवाची च शब्दस्तस्मान्मत्वर्थे इन् प्रत्ययो भवति। द्वन्द्व—कटकवलयिनी, शङ्खनूपुरिणी। गर्हित—ककुदावर्त्ती,[4] काकतालुकी। रोग—कुष्ठी, किलासी। प्राणिस्थादिति किम्? पुष्पफलवान् वृक्षः। अस्वाङ्गादिति किम्? स्तनकेशवती। अत इति किम्? चित्रकललाटिकावती, काकतालुमती। 'अतोऽनेकस्वरात्' [८/१/१३] इत्येव सिद्धे इकादिबाधनार्थं वचनम्।

२८. वातातीसारपिशाचानां कुक् च ।

वात, अतीसार, पिशाच—इत्येतेभ्यो मत्वर्थे इन् प्रत्ययो भवति तत्संनियोगे चैषां कुगागमः। वातातीसारयो रोगवाचित्वात्पूर्वेणैव सिद्धे कुगागमार्थं वचनम्। पिशाचस्य तु उभयार्थम्। वातकी, अतीसारकी, पिशाचकी।

२९. पूरणाद् वयसि ।

पूरणप्रत्ययान्ताद् वयसि गम्यमाने मत्वर्थे इन्नेव प्रत्ययो भवति। पञ्चमो मासः संवत्सरो वाऽस्यास्तीति पञ्चमी बालकः। दशमी करभः।

३०. सुखादेः ।

सुखादिभ्यो मत्वर्थे इन्नेव प्रत्ययो भवति। सुखी, दुःखी। सुखादयो यथा—सुख, दुःख, तृप्र, कृच्छ्र, अस्र, अलीक, कृपण, सोढ, प्रतीप, प्रणय, हल, आस्र, कक्ष इति सुखादिः।

---

१. पक्षिणः।

२. सुवर्णस्य निष्कास्तेषां शतमिति विग्रहः।

३. 'ऊनार्थपूर्वादिभिः' [३/१/५०] इत्यनेन।

४. ककुदं वृषभस्य अंसशिखरम्। तत्र आवर्तः पयोभ्रमवत् केशचक्रं, स च वृषभपरीक्षकैर्गर्हितो मतः।

३१. मालायाः क्षेपे ।

मालाशब्दात् क्षेपे गम्यमाने मत्वर्थे इन्नेव प्रत्ययो भवति । माली । क्षेपे इति किम् ? मालावान् । मालाशब्दः शिखादिः, तत क्षेपे वतुनिवृत्त्यर्थ वचनम् ।

३२. बाहूर्वादेर्बलात् ।

बाहु, ऊरु—इत्येतत्पूर्वाद् बलान्तान्नाम्नो मत्वर्थे इन्नेव प्रत्ययो भवति । बाहुबली, ऊरुबली ।

३३. धर्म-शील-वर्णान्तात् ।

धर्म, शील, वर्ण—इत्येतदन्तान्मत्वर्थे इन्नेव प्रत्ययो भवति । मुनिधर्मी, यतिशीली, ब्राह्मणवर्णी ।

३४. हस्त-दन्त-कराज्जातौ ।

हस्त, दन्त, कर—इत्येतेभ्यो मत्वर्थे इन्नेव प्रत्ययो भवति समुदायेन चेज्जातिरभिधीयते । हस्तोऽयास्तीति हस्ती । दन्ती, करी । जाताविति किम् ? हस्तवान्, दन्तवान्, करवान् ।

३५. वर्णाद् ब्रह्मचारिणि ।

वर्णशब्दान्मत्वर्थे इन्नेव प्रत्ययो भवति ब्रह्मचारी चेदभिधेयो भवति । वर्णशब्दो ब्रह्मचर्यपर्याय । वर्णो ब्रह्मचर्यमस्यास्तीति वर्णी । ब्रह्मचारीत्यर्थ. । अन्ये तु वर्णशब्दो ब्राह्मणादिवर्णवचन । तत्र ब्रह्मचारीत्यनन शूद्रव्यवच्छेद. क्रियते इति मन्यन्ते, तेन त्रैवर्णिको वर्णीत्युच्यते । स हि विद्याग्रहणार्थ[1] उपनीतो[2] ब्रह्म चरति न शूद्र इति । ब्रह्मचारिणीति किम् ? वर्णवान् ।

३६. अर्थार्थान्ताद्याञ्चायाम् ।

अर्थशब्दादर्थान्ताच्च मत्वर्थे इन्नेव प्रत्ययो भवति याञ्चाया गम्यायाम् । अर्थनमर्थ, सोऽयास्तीति अर्थी । धान्यार्थी याचक । केचिदिकमपीच्छन्ति । अर्थिक , प्रत्यर्थिक । याञ्चायामिति किम् ? अर्थो हिरण्यादिरस्यास्तीति अर्थवान् इति वतुरेव भवति ।

३७. पुष्करादेर्देशे ।

पुष्करादिभ्यो मत्वर्थे इन्नेव प्रत्ययो भवति देशेऽभिधेये । पुष्करिणी, पद्मिनी—एतौ देशविशेषौ । देश इति किम् ? पुष्करवान् हस्ती । पुष्करादयो यथा—पुष्कर, पद्म उत्पल, तमाल, कुमुद, कैरव, नड, कपित्थ, बिस, मृणाल, कर्दम, शालूक, विगर्ह, करीष, शिरीष, यवास, यवाष, यव, माष, हिरण्य, नट, तरङ्ग, कल्लोल इति पुष्करादि । कथ कुमुद्वती सरसी, कुमुद्वान् ह्रदः, नड्वान्, नड्वलमिति ? **'कुमुदनड···'** [६/३/१३६] इत्यादिना चातुरर्थिकेन वतुना **'नडशादाद् वलः'** [६/३/१४०] इति वलेन च भविष्यति ।

३८. मन्माब्जादेः संज्ञायाम् ।

मन्नन्तेभ्यो[3] मशब्दान्तेभ्योऽब्जादिभ्यश्च मत्वर्थे इन्नेव प्रत्ययो भवति समुदायश्चेत् कस्यचित्सज्ञा भवति ।

---

१. एवमुक्तेऽपि वेदविद्याग्रहणार्थमिति व्याख्येयम ।

२ उपनीत —उपनयनसस्कारसस्कृत. ।

३. **प्रत्ययाप्रत्ययो···** इति न्यायात् मन्नन्तेभ्य इत्युक्तेऽपि मन्प्रत्ययान्तेभ्य इति दृश्यम् ।

मन्नन्त—दामिनी, सामिनी, प्रथिमिनी, महिमिनी, धर्मिणी, वर्मिणी, कर्मिणी। मान्त—प्रथमिनी, भामिनी, कामिनी, यामिनी, सोमिनी। अब्जादि—अब्जिनी[1], कमलिनी, सरोरुहिणी, सरोजिनी, अम्भोजिनी, राजीविनी, अरविन्दिनी, पङ्कजिनी, पुटकिनी, नालीकिनी, मृणालिनी, बिसिनी, तामरसिनी, यवासिनी। संज्ञायामिति किम्? सामवान्, सोमवान्, अब्जवान्।

३९. प्राण्यङ्गवातो लो वा।

प्राण्यङ्गवाचिन आकारान्तान्मत्वर्थे लः प्रत्ययो वा भवति। पक्षे यथाप्राप्तम्। चूडालः, जङ्घालः, शिखालः। चूडावान्, जङ्घावान्, शिखावान्। प्राण्यङ्गादिति किम्? जङ्घावान् प्रासादः। शिखावान् प्रदीपः। अङ्गग्रहण किम्? इच्छावान्, वासनावान्। कणिकालः इत्यत्र कणिकाशब्दः प्राण्यङ्गस्यैव[2] वाचक इत्याहुः। आत इति किम्? हस्तवान्, पादवान्।

४०. सिध्मादि-क्षुद्रजन्तु-रोगेभ्यः।

सिध्मादेर्गणात् क्षुद्रजन्तुवाचिभ्यो रोगवाचिभ्यश्च मत्वर्थे लः प्रत्ययो वा भवति। सिध्मान्यस्य सन्ति सिध्मलः[3], सिध्मवान्। वध्मलः, वध्मवान्। अङ्गादित्वान्ने—वध्मन। गडुलः, गडुमान्। क्षुद्रजन्तु—यूकालः, यूकावान्। मक्षिकालः, मक्षिकावान्। आ नकुलात् क्षुद्रजन्तुः। रोग—मूर्च्छालः, मूर्च्छावान्। विचर्चिकालः, विचर्चिकावान्। क्षुद्रजन्तुसाहचर्यादत्र रोगवाचित्वेन गृह्यते न तु स्वेन रूपेण। सिध्मादयो यथा—सिध्म, वध्मन्, गडु तुण्डि, मणि, नाभि, बीज, निष्पाद्, निष्पद्, निष्प, पांशु, हनु, पर्शु, सक्तु, मांस, पत्र, वात, पित्त, श्लेष्मन्, पार्श्व, कर्ण, मक्थि, स्नेह, शीत, कृष्ण, श्याम, पिङ्ग, पक्ष्मन्, पृथु, मृदु, मञ्जु, चटु, कण्डू इति सिध्मादि।

४१. पार्ष्णिधमन्योर्दीर्घश्च।

पार्ष्णि, धमनि—इत्येताभ्यां मत्वर्थे लः प्रत्ययो वा भवति तत्सन्नियोगे चानयोः दीर्घोऽन्तादेशो भवति। पार्ष्णीलः, धमनीलः। पक्षे पार्ष्णिमान्, धमनिमान्।

४२. वत्सांसाभ्यां स्नेहबलिनोः।

वत्स, अंस—इत्येताभ्या मत्वर्थे यथाक्रम स्नेहबलिनोरभिधेययोर्लः प्रत्ययो भवति। वत्सल स्नेहवान् स्वामी पिता वा। असलो बलवान् उपचितमांसः। विकल्पाधिकारेऽपि स्नेहबलिनोस्तु नित्य लः, वतौ तदर्थस्याऽसभवात्। अन्यत्र तु वत्सवती गौः। असवान् दुर्बल।

४३. बल-वात-दन्त-ललाटादूलः।

एभ्यो मत्वर्थे ऊलः प्रत्ययो वा भवति। बलूलः, बलवान्। वातूलः, वातवान्। दन्तूलः, दन्तवान्। ललाटूल, ललाटवान्।

४४. प्रज्ञा-पर्णोदक-फेनाल्लेलौ।

प्रज्ञा, पर्ण, उदक, फेन—इत्येतेभ्यो मत्वर्थे ल, इल इत्येतौ प्रत्ययौ वा भवतः। प्रज्ञालः, प्रज्ञिलः, प्रज्ञावान्।

---

१. अब्जिन्यादयः कमलिनीवाचकाः, यवासिनी त्वौषधि।

२. न तु कर्णाभरणस्येत्यर्थः।

३. ननु सिध्मशब्दस्य रोगद्वारेणैव लः सिद्धः, किं गणपाठेन? सत्यम्। अस्याऽदन्तत्वात् 'द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनः' [८/१/२७] इति इन् स्यात्, तद्बाधनार्थम्। वध्मन्शब्दस्य कण्डूशब्दस्य च तथैव यथाक्रमं 'अङ्गान्नेः' [८/१/५०] 'मध्वादिभ्यो रः' [८/१/६०] इत्येव स्यात्। तथाऽत्र गडुशब्दो गडुलत्वरूपे गुणे वर्तते इति रोगद्वारेण न सिध्यति।

पर्णलः, पर्णिलः, पर्णवान् । उदकलः, उदकिलः, उदकवान् । फेनलः, फेनिलः, फेनवान् ।

४५. काला-जटा-घाटाभ्यः क्षेपे ।

काला, जटा, घाटा—इत्येतेभ्यो मत्वर्थे ल, इल इत्येतौ प्रत्ययौ भवतः क्षेपे—प्रत्ययार्थस्य निन्दायां गम्यमानायाम् । कालालः[1], कालिलः । कालेति डोपधं पठन्ति केचित् । काडालः, काडिलः । जटालः[2], जटिलः । घाटालः[3], घाटिलः । वतुना क्षेपो न गम्यते इति विकल्पाधिकारेऽपि नित्योऽयं विधिः । क्षेपे इति किम् ? कालावान्, जटावान्, घाटावान् ।

४६. वाच आलाटौ ।

वाच् इत्येतस्मान्मत्वर्थे आल, आट—इत्येतौ प्रत्ययौ भवतः क्षेपे गम्यमाने । ग्मिनोऽपवादः । वाचालः, वाचाटः । यो बहु निःसारं भाषते स एव क्षिप्यते । अत्रापि पूर्ववन्नित्यो विधिः । क्षेपे इति किम् ? वाग्मी, वाग्वान् ।

४७. ग्मिन् ।

पृथग्योगात् क्षेप इति निवृत्तम्[4] । वाचो मत्वर्थे ग्मिन् प्रत्ययो वा भवति । वाग्मी, वाग्वान् । प्रत्यये गकारः **'प्रत्यये'** [१/३/२] इति अमनिवृत्त्यर्थः[5] ।

४८. पिच्छादेरिलः ।

पिच्छादिभ्यो मत्वर्थे इलः प्रत्ययो वा भवति । पिच्छिलः, पिच्छवान् । उरसिलः, उरस्वान् । पिच्छादयो यथा—पिच्छ, उरस्, ध्रुवका, ध्रुवका, पक्ष, चूर्ण इति पिच्छादिः ।

४९. लोमादेः शः ।

लोमादिभ्यो मत्वर्थे शः प्रत्ययो वा भवति । लोमशः, लोमवान् । रोमशः, रोमवान् । लोमादयो यथा—लोमन्, रोमन्, बभ्रु, वल्गु, हरि, कपि, मुनि, गिरि, ऊरु, कर्क इति लोमादिः ।

५०. अङ्गादेर्नः ।

अङ्गादिभ्यो मत्वर्थे नः प्रत्ययो वा भवति । अङ्गान्यस्याः सन्ति अङ्गना । रूढिशब्दोऽयम् । कल्याणाङ्गी स्त्री उच्यते । इतिकरणात् अन्यत्राङ्गवती । पामनः, पामवान् । वामनः, वामवान् । अङ्गादयो यथा—अङ्ग, पामन्, वामन्, हेमन्, श्लेष्मन्, सामन्, वर्ष्मन्, वर्मन्, पलाशिन्, ऊष्मन्, कद्रु, बलि इत्यङ्गादिः ।

५१. शाकी-पलाली-दर्द्रूणां ह्रस्वश्च ।

शाकी, पलाली, दर्द्रू—इत्येतेभ्यो मत्वर्थे नः प्रत्ययो वा भवति तत्संनियोगे चैषां ह्रस्वोऽन्तादेशो भवति । महच्छाकं शाकसमूहो वा शाकी । महत्पलालं पलालक्षोदो वा पलाली । दर्द्रूर्नाम व्याधिः । शाकिनः, शाकीमान् । पलालिनः, पलालीमान् । दर्द्रुणः, दद्रूमान् । केचित्तु शाकीपलाल्योर्ह्रस्वत्वं नेच्छन्ति । तन्मते शाकीनः, पलालीनः ।

---

१. कडज् मदे—जिन्, भिदादिङः । **'असंयुक्तानादेङः'** [४/२/८०] इति ले काला—पादस्नायुविशेषः । अस्मान्मत्वर्थे **'प्राण्यङ्गादातो लो वा'** [८/१/३६] इति ले अभ्रादेराकृतिगणत्वाद् अप्रत्यये च प्राप्ते लेनौ ।

२. लोकवञ्चनाय जटा अस्यास्ति ।

३. निन्द्या घाटा कृकाटिकास्यास्ति ।

४. पृथग्योगादितिकरणानुवृत्तेश्च प्रशंसायामेवायं न स्वरूपमात्रे ।

५. द्वितीयगश्रवणं न स्यादिति न वाच्यं, रूपमेव हि भिद्यते न श्रुतिः शब्दस्य श्रोत्रग्राह्यत्वादिति ।

५२. विष्वचो विषुश्च ।

विष्वच्शब्दान्मत्वर्थे नः प्रत्ययो वा भवति तत्संनियोगे विषु इत्ययं चादेशो भवति। विषु अञ्चतीति विष्वग्। विष्वञ्चो रश्मयो विष्वग्गतानि वा अस्य सन्ति इति विषुणः आदित्यः। विषुणः वायुः। विषुशब्दो निपातो नानात्वे वर्तते। विष्वगिति अखण्डमव्ययं वा। नप्रत्ययसंनियोगे आदेशस्य विधानात् वतौ विष्वग्वान्। कथं विषुमानहोरात्रप्रविभाग इति ? विषुर्नाम मुहूर्तस्तस्माद् भविष्यति।

५३. लक्ष्म्या अनः ।

लक्ष्मीशब्दान्मत्वर्थेऽन प्रत्ययो वा भवति। लक्ष्मीरस्यास्तीति लक्ष्मणः। वतौ—लक्ष्मीवान्।

५४. प्रज्ञा-श्रद्धार्चा-वृत्तिभ्यो णः ।

प्रज्ञा, श्रद्धा, अर्चा, वृत्ति—इत्येतेभ्यो मत्वर्थे ण प्रत्ययो वा भवति। प्राज्ञः, प्रज्ञावान्। श्राद्धः, श्रद्धावान्। आर्च, अर्चावान्। वार्त्तः, वृत्तिमान्। स्त्री तु प्राज्ञा, श्राद्धा, आर्चा, वार्ता। प्राज्ञीति स्वार्थिक अणन्तात्।

५५. ज्योत्स्नादिभ्योऽण् ।

ज्योत्स्नादिभ्यो मत्वर्थे अण् प्रत्ययो वा भवति। ज्योत्स्ना अस्मिन्नस्ति ज्यौत्स्नः पक्षः। ज्यौत्स्नी रात्रिः। तामिस्रः पक्षः। तामिस्री रात्रिः। तामिस्राणि गुहामुखानि। वैसर्पो व्याधिः। वैपादिकं कुष्ठम्। कौतुप गृहम्। कौण्डलो युवा। तामस. तपस्वी। साहस्रो देवदत्तः। पक्षे ज्योत्स्नावान्, तमिस्रावानित्यादि। तापस इति रूढिशब्दः, रूढिविषये मतुर्न भवति। कुण्डली, सहस्री चेति शिखादित्वात्। ज्योत्स्नादयः प्रयोगगम्याः।

५६. सिकता-शर्कराभ्याम् ।

आभ्यां मत्वर्थे अण् प्रत्ययो वा भवति। सैकतः, सिकतावान्। शार्करः, शर्करावान्।

५७. इलश्च देशे ।

सिकताशर्कराभ्यां मत्वर्थे इलश्चकारादण् च प्रत्ययौ वा भवतः देशेऽभिधेये। सिकतिलः, सैकतः, सिकतावान् देशः। शर्करिलः, शार्करः, शर्करावान् देशः। सिकताः देशः, शर्कराः देशः इत्यभेदोपचारात्[1]।

५८. कच्छ्वा डुरः ।

कच्छूशब्दान्मत्वर्थे डुरः प्रत्ययो वा भवति। कच्छुरः, कच्छूमान्।

५९. दन्तादुन्नतात् ।

उन्नतत्वोपाधिकाद् दन्तशब्दान्मत्वर्थे डुरः प्रत्ययो भवति। उन्नता दन्ता अस्य सन्ति दन्तुरः। उन्नतादिति किम् ? दन्तवान्।

६०. मध्वादिभ्यो रः ।

मध्वादिभ्यो मत्वर्थे रः प्रत्ययो वा भवति। मधुरो[2] रसः। अत्र मधुशब्दः स्वादुत्वे गुणत्वे गुणसामान्ये वर्तते।

---

१. रूढिवशात् बहुवचनान्त इति।

२. मधुशब्दो माधुर्येऽर्थे पुंलिङ्गः क्षौद्राद्यर्थे तु नपुंसकः। तस्मात्माधुर्येऽर्थे पुंलिङ्गेन वाक्यं कार्यं मधुरस्यास्तीति। स्वादुत्वे इत्यस्य गुणत्व इति गुणसामान्ये इति च पर्यायद्वयम्।

मधुरं मधु, मधुर क्षीरम् । अत्र गुणे । इतिकरणानुवृत्तेः क्षौद्रादिद्रव्यवृत्तेस्तु[1] मतुरेव । मधुमान् घटः । एव[2] खं महत् कण्ठविवरमस्यास्तीति खरः गर्दभः । खवानन्य. । मुख सर्वस्मिन् वक्तव्ये यस्यास्तीति मुखर वाचाल. । मुखवानन्य. । कुञ्जावस्य स्त. कुञ्जरो हस्ती । कुञ्जशब्दोऽत्र हनुपर्याय । कुञ्जवानन्य । नगर पुरम् । नगवदन्यत् । ऊषरं क्षेत्रम् । ऊषवदन्यत् । मुष्करः पशुः । मुष्कवानन्य । शुषिर शुषिमत्काष्ठम् । कण्डूर, कण्डूमान् । पाण्डुर[3], पाण्डुमान् । पांशुर', पांशुमान् । मध्वादय. प्रयोगगम्या. ।

६१. आमयावी ।

आमयशब्दान्मत्वर्थे विनप्रत्यये दीर्घत्वे च आमयावीति वा निपात्यते । आमयावी, आमयवान् ।

६२. द्युद्रुभ्यां मः ।

द्यु इति दिवः कृतोकारस्य निर्देश द्युशब्द. उकारान्तोऽह्नःपर्याय प्रकृत्यन्तर वा । द्यु, द्रु—इत्येताभ्यां मत्वर्थे म. प्रत्ययो वा भवति । द्यौर्द्युर्वाऽस्यास्मिन् वास्तीति द्युम । द्रूणि दारूण्यस्यास्मिन् वा सन्तीति द्रुम । रूढिशब्दाविमौ रूढिविषये च मतुर्न भवति । अन्यत्र मतुरेव—द्युमान्, द्रुमान् ।

६३. तमिस्रार्णवज्योत्स्नाः ।

तमिस्रा, अर्णव, ज्योत्स्ना—इत्येते शब्दा मत्वर्थे वा निपात्यन्ते । तमिस्रेति तमस्शब्दात् र प्रत्यय उपधाया चेत्वम् । तमोऽत्रास्तीति तमिस्रा रात्रि. । तमिस्र तम ममूह । तमिस्राणि गुहामुखानि । अर्णवेति अर्णसो व. प्रत्यय. अन्त्यस्य च लोप. । अर्णव समुद्रः । ज्योत्स्नेति ज्योति शब्दान्न प्रत्यय उपधालोपश्च निपात्यते । ज्योत्स्ना चन्द्रप्रभा । अन्यत्र ज्योतिष्मती रात्रिः । अर्णस्वान् घट । तमस्वान् दिवम । निपातनस्येष्टविषयत्वात् ।

६४. मण्यादिभ्यो वः ।

मण्यादिभ्यो मत्वर्थे व प्रत्ययो वा भवति । मणिव, मणिमान् । सिध्मादिपाठात् मणिल । हिरण्यवः, हिरण्यवान् । बिम्बावं, कुरराव, कुरबावम् । 'घञ्युपसर्गस्य बहुलं' [३/२/८७] इति बाहुलकाद्दीर्घ. । राजीव, इष्टकाव, गाण्डिवं, गाण्डीव, अजकाव, बिम्बाव—इत्यादयो रूढिशब्दा. । रूढिविषये च प्रत्ययान्तर न भवति । विषयान्तरे तु भवत्येव—बिम्बवानित्यादि । मण्यादयो यथा—मणि, हिरण्य, बिम्ब, कुरर, कुरब, राजी, इष्टका, गाण्डि, गाण्डी, अजका इति । मण्यादयः प्रयोगगम्या ।

६५. केशाद्विनिकौ च ।

केशशब्दान्मत्वर्थे इन्, इक—इत्येतौ चकाराद् वश्च प्रत्ययो वा भवति । केशी, केशिक., केशवः, केशवान् । 'अतोऽनेकस्वरात्' [८/१/१३] इत्यनेनैव इनिकौ सिद्धौ लादाविति निषेधबाधनार्थ वचनम् । केशव इति रूढिशब्दोऽपि[4] विष्णुवाची ।

६६. रथादिरश्च ।

रथशब्दान्मत्वर्थे इरश्चकारादिनिकौ च प्रत्ययौ वा भवत. । रथिर, रथी, रथिकः, रथवान् ।

---

१. क्षौद्र मधु ।

२. इतिकरणानुवृत्ते । खर इत्यादिषु अर्थविशेषे रप्रत्ययोऽन्यत्र मतुरेवेत्यर्थ. ।

३ अत्र पाण्डुशब्दः पाण्डुत्वरूपे गुणे वर्तते ।

४ न केवल यस्य केशाः सन्ति स केशवः, किंतु विष्णुरपि ।

६७. मेधायाः ।

मेधाशब्दान्मत्वर्थे इरः प्रत्ययो वा भवति । पक्षे यथाप्राप्तं विन् वतुश्च । मेधिरः, मेधावी, मेधावान् ।

६८. काण्डाण्डभाण्डादीरः ।

काण्ड, आण्ड, भाण्ड—इत्येतेभ्यो मत्वर्थे ईरः प्रत्ययो वा भवति । काण्डीरः, काण्डवान् । आण्डीरः[1], आण्डवान् । भाण्डीरः, भाण्डवान् । आण्डौ मुष्कौ ।

६९. कृष्यादिभ्यो वलः ।

कृष्यादिभ्यो मत्वर्थे वल प्रत्ययो वा भवति । कृषीवल. कुटुम्बी । कृषिमत् क्षेत्रम् । आसुतीवल कल्यपाल.[2] । आसुतिमान् । परिषदवल., परिषद्वान् । पर्षद्वलः, पर्षद्वान् । परिषद्वलं तीर्थम् । परिषद्वत् । रजस्वला स्त्री । रजस्वान् ग्राम । केचित्तु रजस्वलो देश, रजस्वला भूमि., रजस्वान्, रजस्वतीति सर्वत्राविशेषेण वृत्तिमिच्छन्ति । दन्तावलो नाम राजा हस्ती च । शिखावल नगरम् । शिखावलो मयूर । शिखावला स्थूणा । दन्तवान्, शिखावानन्यः । मातृवल, मातृमान् । एव पितृवल, भ्रातृवल, उत्साहवल., पुत्रवल., उत्सङ्गवल इति विशेषः[3], इतिकरणात् सिद्धः । कृष्यादय प्रयोगगम्या ।

७०. ऊर्जो विन् चाऽसुक् च ।

ऊर्जशब्दान्मत्वर्थे विन् चकाराद् वलश्च प्रत्ययौ वा भवत तन्सनियोगे चास्य असुगागमो भवति । ऊर्जस्वी, ऊर्जस्वल । पक्षे ऊर्ग्वान् । कथमूर्जस्वान् ? ऊर्जयते असुप्रत्ययान्तस्य वतौ भविष्यति ।

७१. रूपादाहतप्रशंसयोर्यः ।

अग्रे विकल्पविधानात् नित्योऽय विधिः । आहतप्रशसोपाधिकेऽर्थे वर्तमानात् रूपशब्दान्मत्वर्थे य. प्रत्ययो भवति । आहत रूपमस्यास्तीति रूप्यः कार्षापण. । निघातिकाताडनाद् दीनारादिषु यद् रूपमुत्पद्यते तदाहत रूप्यम् । प्रशस्त रूपमस्यास्तीति रूप्यो गौ । रूप्य. पुरुष । आहतप्रशसयोरिति किम् ? रूपवान् । प्रशसायां वतुरपि भवति । रूपवती कन्या । आहते न भवति इतिकरणात् । कथ रूपिणी कन्या, रूपिको दारक. इति ? व्रीह्यादित्वाद् भविष्यति ।

७२. गुणादिभ्यो वा ।

गुणादिभ्यो मत्वर्थे य. प्रत्ययो वा भवति । गुण्य., गुणवान् पुरुष. । हिम्यः, हिमवान् पर्वत । कथ को गुणिनो नार्थयेत् इतीन् ? शिखादित्वेन भविष्यति । गुणादय. प्रयोगगम्याः ।

७३. पूर्णमासोऽण् ।

पूर्णमास्शब्दान्मत्वर्थे अण् प्रत्ययो भवति । पूर्णो माश्चन्द्रमा अ स्यामस्तीति पौर्णमासी ।

७४. कृपाहृदयाद् वालुः ।

कृपा, हृदय—इत्येताभ्यां मत्वर्थे आलुः प्रत्ययो वा भवति । कृपालुः, कृपावान् । हृदयालु, हृदयी, हृदयिकः, हृदयवान् ।

---

१. एकदेशविकृत ··· इति न्यायात् श्लिष्टनिर्देशाद् वा अण्डीर इत्यपि गौडजयौ ।

२. सुराजीवी ।

३. अर्थविशेषः ।]

७५. वृन्दादारकः ।

वेत्यनुवर्तते । वृन्दशब्दान्मत्वर्थे आरक प्रत्ययो वा भवति । वृन्दारक . वृन्दवान् । शिखादित्वात् वृन्दी ।

७६. शृङ्गात् ।

शृङ्गशब्दान्मत्वर्थे आरकः प्रत्ययो वा भवति । शृङ्गारकः, शृङ्गवान् । शिखादित्वात् शृङ्गी । योगविभाग उत्तरार्थः ।

७७. फलबर्हाच्चेनः ।

फल, बर्ह—इत्येताभ्यां चकारात् शृङ्गशब्दाच्च मत्वर्थे इन प्रत्ययो वा भवति । फलिनः, फलवान् । बर्हिणः, बर्हवान् । शृङ्गिणः, शृङ्गवान् । शिखादित्वात् फली, बर्ही ।

७८. मलादीमसश्च ।

मलशब्दान्मत्वर्थे ईमस इनश्च प्रत्ययौ वा भवत. । मलीमस., मलिन., मलवान् ।

७९. मरुत्पर्वणस्तः ।

मरुत्, पर्वन्—इत्येताभ्या मत्वर्थे त. प्रत्ययो वा भवति । मरुत्त , मरुत्वान् । पर्वत , पर्ववान् ।

८०. स्वामिन्नीशे ।

स्वशब्दान्मत्वर्थे ईशे वाच्ये मिन्प्रत्यये दीर्घादेशे च स्वामिन्निति निपात्यते । स्वमस्यास्तीति स्वामी । ईश इति किम् ? स्ववान् ।

८१. गोमिन् पूज्ये ।

गोशब्दान्मत्वर्थे पूज्येऽभिधेये मिन्प्रत्यये गोमिन्निति निपात्यते । गावोऽस्य सन्ति गोमी पूज्य. । अन्यत्र गोमान् । केचित्तु सामान्येनैवेच्छन्ति । गोमी, गोमान् ।

८२. हीनात् स्वाङ्गादः ।

हीनोपाधिकात् स्वाङ्गान्मत्वर्थे अ प्रत्ययो भवति । खण्ड कर्णोऽस्यास्तीति कर्ण । छिन्ना नासिकाऽस्यास्ति नासिक. । मतुवतुभ्यां हीनता न दृश्यते, अत प्रत्ययो न विकल्प्यते । हीनादिति किम् ? कर्णवान्, नासिकावानित्येव भवति ।

८३. अभ्रादिभ्यः ।

अभ्रादिभ्यो मत्वर्थे अ. प्रत्ययो वा भवति । पक्षे यथादर्शन वतुर्न सर्वत्र इति करणात् । अभ्राण्यस्मिन् सन्ति अभ्र नभ । अर्शांसि अस्य सन्ति अर्शसो देवदत्त । उरस., उरस्वान् । अभ्रादयो यथा—अभ्र, अर्शस्, उरस्, तुन्द, चतुर, पलित, जटा, घाटा, कर्दम, काम, बल, घटा, अम्ल, लवण । इत्याकृतिगणोऽयम् ।

८४. कं-शंभ्यां व-भ-ति-तु-त-यसः ।

कं, शं—इत्येताभ्यां मत्वर्थे व, भ, ति, तु, त, यस् इत्येते प्रत्यया वा भवन्ति । कंव., शंव. । कंभः, शंभः । कंतिः, शंति. । कंतुः, शंतु. । कंत , शंत । कंयः, शंयः । यस सकारो **'नाम सिदयव्हे'** [१/१/२३] इत्यत्र विशेषणार्थः, तेन कय्यः[१]

१. **'मोऽनुस्वार ...'** [१/३/१८] इति सूत्रेण हसस्य सार्वणिक. सानुनासिको यकार ।

शय्यँ इत्यादि सिद्धम् । एवमुत्तरत्रापि ।

८५. युस् ।

पूर्वमनुवर्तते । कशम्या मत्वर्थे युस् प्रत्ययो वा भवति । कयुः, शयुः । कय्युँ, शय्युँ । योगविभाग उत्तरार्थः ।

८६. ऊर्णाहं-शुभमः ।

ऊर्णा, अह, शुभ—इत्येतेभ्यो मत्वर्थे युस् प्रत्ययो वा भवति । ऊर्णायु:—उरभ्र: । इतिकरणात् असंज्ञायां ऊर्णावान् । अहयु:—अहङ्कारी । अहङ्कारवान् । शुभंयु:—कल्याणबुद्धिः ।

८७. तुण्डि-वलि-वटेर्भः ।

तुण्डि, वलि, वटि—इत्येतेभ्यो मत्वर्थे भः प्रत्ययो वा भवति । तुण्डिभः । सिध्मादिपाठात् लः तुण्डिलः । वलिभः । अङ्गादित्वान्नः—वलिनः । वलिवान् । वटिभः ।

८८. सूक्तसाम्नोरीयः ।

सूक्ते साम्नि चाभिधेये मत्वर्थे ईय प्रत्ययो भवति । अग्रिमसूत्रे वाग्रहणान्नित्योऽयं विधिः । मत्वादीनामपवादः । अच्छावाक् शब्दोऽत्र सूक्तेऽस्ति अच्छावाकीयम् । मैत्रावरुणीयम् । साम्नि—यज्ञायज्ञीय, अशनापिपासीय, वारतन्तवीयम् । सूक्तसाम्नी ग्रन्थविशेषौ ।

८९. अध्यायानुवाकयोर्लुग् वा ।

अध्यायेऽनुवाके चाभिधेये य ईयस्तस्य लुग् वा भवति । अत[1] एव लुग्वचनात् अध्यायानुवाकयोरीयोऽनुमीयते । एतावपि ग्रन्थविशेषौ । गर्दभाण्डशब्दोऽस्मिन्नध्यायेऽनुवाके वास्तीति गर्दभाण्डः गर्दभाण्डीयो वाऽध्यायोऽनुवाको वा । एवं दीर्घजीवितः, दीर्घजीवितीयः । पलितस्तम्भः, पलितस्तम्भीयः । पलितः, पलितीयः । स्तम्भः, स्तम्भीयः । उच्छिष्टः, उच्छिष्टीयः । द्रुमपुष्पः, द्रुमपुष्पीयः ।

९०. विमुक्तादेरण् ।

विमुक्तादिभ्यो मत्वर्थेऽध्यायानुवाकयोरभिधेययोरण् प्रत्ययो भवति । विमुक्तशब्दोऽस्मिन्नध्यायेऽनुवाके वास्ति वैमुक्तः । दैवासुरः । विमुक्तादयो यथा—विमुक्त, देवासुर, रक्षोसुर, उपसद्, उपसद, परिसारक, वसु, मरुत्, सत्वत्, सत्वन्तु, दशार्ह, वयस्, हविर्धान, महित्री, सोमापूषन्[2], इडा, इला, अग्नाविष्णू, उर्वशी, दशार्ण, वसुमन्तु, पत्नीवन्तु, वर्हवन्तु, वृत्रहन्, पतत्रिन्, सुपर्ण, इति विमुक्तादिः ।

९१. गोषदादेरकः ।

गोषदादिभ्यो मत्वर्थेऽध्यायानुवाकयोरभिधेययोरकः प्रत्ययो भवति । गोषच्छब्दोऽस्मिन्नस्तीति गोषदकः । घोषदकः, इषेत्वकः । गोषदादयो यथा—गोषद्, घोषद्, इषेत्वा, मातरिश्वन्, देवस्यत्वा, पत्वा, देवीराप, कृष्णोस्य, खरेष्ठा, देवीधीया, रक्षोहण, अञ्जन, प्रतूर्त, उशान, कृशानु, सहस्रशीर्षन्, वाचस्पति, स्वाहा, प्राण इति गोषदादिः । मत्वर्थीयानां पूर्णोऽवधिः ।

---

१ अध्यायानुवाकयोरर्थान्तरत्वात् पूर्वेण न प्राप्नोतीत्याह ।

२. अत्र "देवताद्वन्द्वे च" [३/२/४२] इत्यादिना पूर्वपदस्य आत्वम् ।

९२. प्रकारे[1] जातीयः ।

तदस्येत्यनुवर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे जातीय प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेत् प्रकारो भवति । सामान्यस्य भिद्यमानस्य यो विशेषो विशेषान्तरानुप्रवृत्त[2] स प्रकारः । पटुः प्रकारोऽस्य पटुजातीयः । मृदुजातीयः, यज्जातीयः, तज्जातीयः । नानाभूतः प्रकारोऽस्य नानाजातीयः । एवं प्रकारोऽस्य एवंजातीयः । अस्येति षष्ठ्यर्थे विधानात् प्रकारवति जातीयः प्रत्ययो विज्ञायते । तत प्रकारमात्रभाविथाथमन्तादपि जातीय प्रत्ययो भवति । यथाजातीयः, तथाजातीयः, कथंजातीयः, इत्थंजातीयः ।

९३. स्थूलादेः कः ।

स्थूलादिभ्यस्तदस्य प्रकारे इत्यस्मिन् विषये क प्रत्ययो भवति । पूर्वापवादः । स्थूल प्रकारोऽस्य स्थूलकः पटः । अणुकः पटः । स्थूलका माषाः । अणुका माषाः । माषक हिरण्यम् । इषुका गोलिका । स्थूलादयो यथा—स्थूल, अणु, माष, इषु, इक्षु, वाद्य, तिल, काल, तिलकाल, पत्र, मूल, पत्रमूल, पर्णमूल, कुमारीपुत्र, कुमारी, श्वशुर, मणि, बृहत्, चञ्चत्, चन्द्र, एरण्ड, पुण्ड्र इति स्थूलादि ।

९४. गोमूत्र-सुरावदात-जीर्ण-यव-कृष्णादाच्छादनाहि-सुरा-शालि-व्रीहि-तिले ।

गोमूत्रादिभ्यो यथासंख्य आच्छादनादिषु वाच्येषु तदस्य प्रकार इत्यस्मिन् विषये कः प्रत्ययो भवति । गोमूत्राच्छादने—गोमूत्रप्रकार गोमूत्रकम् । गोमूत्रवर्णमाच्छादनम् । सुराया अहौ—सुराप्रकार सुरावर्ण सुरकोऽहि । अवदातात् सुरायां—अवदातप्रकारा अवदातिका सुरा । जीर्णाच्छालिषु—जीर्ण प्रकार एषा जीर्णका शालय । यवात् व्रीहिषु—यवप्रकारा यवका व्रीहय । कृष्णात्तिलेषु—कृष्णप्रकारा कृष्णका तिला । आच्छादनादिष्विति किम् ? गोमूत्रजातीयोऽन्य इत्यादि ।

९५. भूतपूर्वे चरट् ।

अत पर प्राय स्वार्थिका प्रत्यया । तत्रोपाधि[3] प्रकृतेर्विज्ञायते स प्रत्ययस्य द्योत्यो भवति । पूर्वं भूत — भूतपूर्व । भूतपूर्वेऽर्थे वर्तमानान्नाम्न चरट् प्रत्ययो भवति स्वार्थे । भूतपूर्व आढ्य — आढ्यचर । दर्शनीयचरः । टकार ईबर्थ । भूतपूर्वा आढ्या—आढ्यचरी । दर्शनीयचरी । '**मानिक्यङ्कृत्तस्त्रतरतम**' [३/२/८६] इत्यादिना पुंवद्भाव । भूतशब्दो वर्तमानेप्यस्ति पूर्वशब्दो दिगादावपीति अतिक्रान्तकालप्रतिपत्त्यर्थमुभयोरुपादानम् । प्रत्यासत्ते[4] शब्दप्रवृत्तिनिमित्तस्य भूतपूर्वत्वेऽयं प्रत्यय इतीह न भवति । अर्जुनो माहिष्मत्या भूतपूर्व इति ।

९६. गोष्ठादीनञ् ।

गोष्ठशब्दाद् भूतपूर्वत्वे ईनञ् प्रत्ययो भवति । गोष्ठो भूतपूर्व —गौष्ठीनो देश ।

---

१. सामान्यस्य पुरुषरूपस्य भिद्यमानस्य पटुजडादिभेदेन विशेष्यमाणस्य यो विशेष पटुत्वादिरित्यर्थ ।

२ स विशेषो द्विप्रकारो विशेषान्तरेष्वनुप्रवृत्तोऽनुस्यूत सबद्ध इति यावत्, यथाय पटुर्मृदु, पण्डित इत्यादि । अय हि पटुत्वलक्षणो विशेषो बहूनामपि तथा भावात् सभेदेषु विशेषान्तरेष्वनुप्रवृत्तो भवति । अपरश्चाननुप्रवृत्तो यस्य भेदा न सन्ति, यथा अमूर्तसामान्यस्याकाशमिति भेद । आकाशमिति ह्येकं द्रव्य न तस्य भेदा सन्ति, येन विशेषो विशेषान्तरेष्वनुप्रवृत्त स्यात् । तत्र यो विशेषो विशेषान्तरेष्वनुप्रवृत्त. स प्रकार उच्यते ।

३. तत्र तेषु स्वार्थिकप्रत्ययेषु प्रक्रान्तेषु उपाधिविशेषणं भूतपूर्वादि प्रकृतेरेव सकाशादवसीयते केवलं प्रत्ययेन द्योत्यते न तु उच्यते ।

४. अत्र हि नार्जुनत्वस्यार्जुनशब्दाभिधेयस्य भूतपूर्वत्वम् । नहि अर्जुनो माहिष्मत्यामर्जुनत्वेन भूतपूर्व इत्यत्र विवक्षाऽपि तु राजत्वेनेत्यत्र न भवति ।

९७. षष्ठ्या रूप्यचरटौ ।

षष्ठ्यन्ताद् भूतपूर्वेऽर्थे रूप्य, चरट्—इत्येतौ प्रत्ययौ भवत. । भूतपूर्वं इतीह प्रत्ययार्थः[1] । देवदत्तस्य भूतपूर्वः—देवदत्तरूप्यो गौः । देवदत्तचरः । टकार ईबर्थः । देवदत्तचरी ।

९८. व्याश्रये तसुः ।

षष्ठ्या इत्यनुवर्तते । नानापक्षाश्रयो व्याश्रयः । षष्ठ्यन्ताद् व्याश्रये गम्यमाने तसुः प्रत्ययो भवति । उकारः **'अधण्तस्वाद्येनान्तः'** [१/१/५०] इत्यत्र विशेषणार्थ । देवा अर्जुनतोऽभवन् । आदित्य कर्णतोऽभवत् । अर्जुनकर्णयोर्विवदमानयोरर्जुनस्य पक्षे देवा. कर्णस्य पक्षे आदित्योऽभवदित्यर्थ. । यत्तोऽभवत्—यस्य पक्ष इत्यर्थः । तत्तोऽभवत्—तस्य पक्षे इत्यर्थः । एवं त्वत्तोऽभवत्, मत्तोऽभवत् । व्याश्रय इति किम् ? वृक्षस्य शाखा ।

९९. रोगात् प्रतीकारे ।

रोगवाचिन षष्ठ्यन्तात् प्रतीकारेऽर्थे तसु प्रत्ययो भवति । प्रतीकारश्चिकित्सा । प्रवाहिकातः कुरु । प्रच्छर्दिकात कुरु । अस्य रोगस्य चिकित्सां कुर्वित्यर्थ ।

१००. पर्यभेः सर्वोभये ।

परि, अभि—इत्येताभ्यां यथाक्रमं सर्वोभयार्थे वर्तमानाभ्यां तसु प्रत्ययो भवति । परित—सर्वत इत्यर्थ. । अभित--उभयत इत्यर्थ । सर्वोभये इति किम् ? वृक्ष परि । वृक्षमभि ।

१०१. आद्यादिभ्यः ।

आद्यादिभ्य सभवद्विभक्त्यन्तेभ्यस्तसु प्रत्ययो भवति । आदौ आदेर्वा आदितः । एवं मध्यतः, अन्ततः, अग्रतः, वक्षस्त , पार्श्वतः, पृष्ठत., मुखत , सर्वतः, विश्वत , उभयत, अन्यत, पूर्वत. एकत , इतः । प्रमाणेन प्रमाणाद् वा प्रमाणतः । पृष्ठेन पृष्ठतोऽर्कं सेवेत । एव पार्श्वत । दुष्ट. शब्द स्वरतो वर्णतो वा । शब्दत, अर्थत, अभिधानत । येन यस्मिन् वा यत. । तत । पृषोदरादित्वाद् दलोप । आद्यादयः प्रयोगगम्या ।

१०२. क्षेपातिग्रहाव्यथेष्वकर्तस्तृतीयायाः ।

तृतीयान्तादकर्तृवाचिन क्षेपातिग्रहाव्यथाविषये तसु प्रत्ययो भवति । क्षेपो निन्दा । वृत्तेन क्षिप्त.—वृत्ततः क्षिप्त. । वृत्तेन निन्दित इत्यर्थः । अतिक्रम्य ग्रहणमतिग्रह । वृत्तेनातिगृह्यते—वृत्ततोऽतिगृह्यते । साधुवृत्तोऽन्यानतिक्रम्य वृत्तेन गृह्यते । साध्वाचार इति संभाव्यत इत्यर्थ. । अतिशयेन वा ग्रहणमतिग्रहः । तत्रातिशयेन गृह्यत इत्यर्थ. । अचलनमक्षोभणं अव्यथा अभीतिर्वा । वृत्तेन न व्यथते—वृत्ततो न व्यथते । वृत्तेन न चलति न बिभेति चेत्यर्थः । क्षेपातिग्रहाव्यथेष्विति किम् ? वृत्तेन भिन्न । अकर्तुरिति किम् ? देवदत्तेन क्षिप्तः । तृतीयाया इति किम् ? देवदत्त क्षिपति ।

१०३. पापहीयमानेन ।

अकर्तृवाचिनस्तृतीयान्तात् पापहीयमानाभ्यां[2] योगे तसु प्रत्ययो भवति । वृत्तेन पापः—वृत्ततः पापः । वृत्तेन हीयते—वृत्ततो हीयते । शब्दतो हीनः स्वरतो वर्णतो वा । पापहीयमानेनेति किम् ? चारित्रेण शुद्धः । अकर्तुरिति किम् ? चैत्रेण हीयते । तृतीयाया इति किम् ? ग्रामे हीयते । क्षेपस्याविवक्षायां तस्वाख्याने[3] यथा स्यादिति वचनम् ।

---

१. प्रकृत्यर्थस्तु पूर्वसूत्रेणैव सिद्धः सर्वविभक्त्यन्तत्वात् ।

२. हीयमानमित्यर्थरूप गृह्यते, न तु शब्दरूपमेव ।

३ पापहीयमानाभ्यां योगे क्षेपस्य प्रतीयमानत्वात् पूर्वेणैव सिध्यतीत्याह ।

१०४. प्रतिना पञ्चम्याः ।

प्रतिना योगे या पञ्चमी विहिता तदन्तात् तसु प्रत्ययो भवति । अभिमन्युरर्जुनात् प्रति—अभिमन्युरर्जुनतः प्रति । अर्जुनस्य प्रतिनिधिरित्यर्थः । माषानस्मै तिलेभ्यः प्रति यच्छति— तिलतः प्रति यच्छति । पञ्चम्या इति किम् ? वृक्ष प्रति विद्योतते ।

१०५. अहीयरुहोऽपादाने ।

अपादाने या पञ्चमी विहिता तदन्तात् तसु प्रत्ययो भवति तच्चेदपादानं हीयरुहो सबन्धि न भवति । ग्रामादागच्छति—ग्रामत आगच्छति । चौराद् बिभेति—चोरतो बिभेति । अहीयरुह इति किम् ? सार्थात् हीयते—सार्थाद्धीन. । पर्वतादवरोहति । सार्थादिति कर्तुरपायेऽवधिविवक्षा[1] । सार्थेन हीयते देवदत्त इत्यर्थः । हीयते इति कर्मकर्तरीत्यन्ये । सार्थात् स्वयमेव हीयते देवदत्त इत्यर्थ. । हीयेति यगन्तस्य जहातेर्निर्देशो जिहीते इत्यस्य व्युदासार्थ. । तेन तत्र प्रतिषेधो न भवति । भूमित उज्जिहीते । अपादाने इति किम् ? ऋते धर्मात् कुत सुखम् । आ पाटलिपुत्राद् वृष्टो देव ।

१०६. किमद्व्यादिसर्वाद्यवैपुल्यबहोस्तस् ।

पञ्चम्या इत्यनुवर्तते । किंशब्दात् द्व्यादिवर्जितेभ्य सर्वादिभ्योऽवैपुल्यवाचिनो बहुशब्दाच्च पञ्चम्यन्तात् तस् प्रत्ययो भवति । कि—कस्मात् कुतः[2] । सर्वादि—सर्वत , विश्वत . यत , तत । बहु—बहुभ्य बहुत । किम सर्वादित्वेऽपि द्व्यादिवर्जनान्न प्राप्नोतीति पृथगुपादानम् । द्व्यादिवर्जन किम् ? द्वाभ्यां, त्वत्, मत्, युष्मत्, अस्मत् भवत । कथ द्वित , त्वत्त , मत्त , युष्मत्त , अस्मत्त इति ? 'अहीयरुहोऽपादाने' [८/१/१०५] इति भविष्यति । अनेन हि तस्विधाने 'आ द्वेष्टेरः' [२/१/७७] इत्यत्व स्यात् । बहोर्वैपुल्यप्रतिषेध किम् ? बहो सूपात् । किमद्व्यादिसर्वाद्यवैपुल्यबहोरिति किम् ? वृक्षाद् विना । किसर्वादिबहोश्च तसुविपर्ययेऽपि परत्वादयमेव तस् । यत प्रति, तत प्रति, यत आगच्छति, तत आगच्छति । निरनुबन्धप्रत्ययान्तरकरणमत्वार्थम् । बह्वीभ्यो बहुत । 'मानिक्यङ्कृत्तस्त्यतरतम...' [३/२/४६] इत्यादिना पुवद्भाव । पञ्चम्यन्तमात्रादय[3] विधि. । सर्वतो हीयते । सर्वतो रोहति । सर्वतो हेतो . सर्वत. पूर्व ।

१०७. इतोऽतः कुतः ।

इतस्, अतस् कुतस्—इत्येते शब्दा निपात्यन्ते । इत इति इदमस्तसि इ सर्वादेशो निपात्यते । अस्मादित , इमकस्मादित. । अत इति एतद अ सर्वादेश । एतस्मादत , एतकस्मादत । कुत इति किम. कुरित्यादेश । कस्मात् कुत । इह पञ्चम्या इति नानुवर्तते । लक्षणान्तरेण तसि तसौ वा सिद्धे आदेशमात्र विधीयते । तेन उत्तरसूत्रेण तसि इतोभवान्, अतोभवान् । आद्यादितसौ इत आस्यतामिति भवति ।

१०८. भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैकार्थात् ।

भवतु, आयुष्मत्, दीर्घायुस्, देवानांप्रिय—इत्येतै समानाधिकरणात् किमद्व्यादिसर्वाद्यवैपुल्यबहो सर्वविभक्त्यन्तात् तस् प्रत्ययो भवति । स भवान्—ततोभवान् । तौ भवन्तौ—ततोभवन्तौ । ते भवन्त—ततोभवन्त. । त भवन्तं—ततोभवन्तम् । तेन भवता—ततोभवता । तस्मै भवते—ततोभवते । तस्माद् भवत—ततोभवतः । तस्य भवत—ततोभवत । एवमय भवान् इतोभवान्, को भवान् कुतोभवान् इत्याद्युदाहार्यम् । तथा स आयुष्मान्—तत आयुष्मान् । स दीर्घायु:—ततोदीर्घायु: । स देवानांप्रिय:—ततोदेवानांप्रिय । अयमायुष्मान्—इतआयुष्मान् । क आयुष्मान्—कुतआयुष्मान् । एवं दीर्घायुर्देवानांप्रियाभ्यामपि । भवतु इत्युकार. सर्वादिपरिग्रहार्थ . तेन मतुशत्रन्तव्युदास. ।

---

१. सार्थो देवदत्तं जहाति, स सार्थ एव विवक्षते इव नाह जहामि, किंतु स्वयमेव हीयते । तेन सार्थाज्जहातीति न भवति । सार्थो जहातीति तत्र वक्तव्यमस्ति ।

२. उत्तरसूत्रेण किम कुरित्यादेश. ।

३ न त्वपादान एव विहितपञ्चम्यन्तात् ।

१०९. त्रच ।

भवत्वायुष्मद्दीर्घायुर्देवानांप्रियैः समानाधिकरणात् किमद्व्यादिसर्वाद्यवैपुल्यबहो सर्वविभक्त्यन्तात् त्र प्रत्ययो भवति । स भवान्—तत्रभवान् । तौ भवन्तौ—तत्रभवन्तौ । ते भवन्तः—तत्रभवन्त । त भवन्तं—तत्रभवन्तम् । तेन भवता—तत्रभवता । तस्मै भवते—तत्रभवते । तस्माद् भवतः—तत्रभवत । तस्य भवत.—तत्रभवत. । तस्मिन् भवति—तत्रभवति । एव आयुष्मद्दीर्घायुर्देवानांप्रियैरपि उदाहार्यम् । योगविभागश्चकारेण पुनस्तसुविधानार्थं, तेन सप्तम्यन्तादपि तस् भवति । ततोभवति—तत्रभवति । अन्यथा हि तत 'सप्तम्याः' [८/१/११०] इति परत्वात् त्र एव स्यात् । रूढिशब्दाश्चैते ततोभवदादय समुदायाः पूजावचना यथाकथचित् व्युत्पाद्यन्ते । अत एव पुनस्त्यदादिरनुप्रयुज्यते । स तत्रभवान्, त तत्रभवन्तम् । केचित्तु भवच्छब्दस्यामन्त्रणे भो इत्यादेश कुर्वन्ति । तन्मते ततोभो तत्रभो इत्यत्रापि भवति । केचित्तु भवदाद्ययोगेऽपि त्रतसाविच्छन्ति । क्व गमिष्यसि—कं देशं गमिष्यसीत्यर्थः ।

११०. सप्तम्याः ।

सप्तम्यन्तात् किमद्व्यादिसर्वाद्यवैपुल्यबहोस्त्र. प्रत्ययो भवति । कस्मिन् कुत्र । सर्वत्र, तत्र । बहुषु बहुत्र । बह्वीषु बहुत्र । 'मानिक्यङ्कृचतस्त्रतरतम···' [३/२/४६] इत्यादिना पुवद्भाव ।

१११. कुत्रात्र-क्व-कुहेह ।

कुत्र, अत्र, क्व, कुह, इह—इत्येते शब्दा त्रप्रत्ययान्ता निपात्यन्ते । कुत्रेति किम कुरित्यादेशः । कस्मिन् कुत्र । अत्रेति एतदोऽकारादेश. । एतस्मिन् अत्र । एतकस्मिन् अत्र । क्वेति किम. क्वादेश. तस्याऽकार. । कस्मिन् क्व । कुहेति किम कुरित्यादेश त्रस्य ह । कस्मिन् कुह । इहेति इदम इकारादेश. त्रस्य ह । अस्मिन् इह । इमकस्मिन् इह । एषु 'सप्तम्याः' [८/१/११०] इति त्र । त्रमाते चैते आदेशा विधीयन्ते, तेन भवदादियोगेऽपि भवन्ति । कुत्रभवान्[1] । अत्रभवान् । क्वभवान् । कुहभवान् । इहभवान् । कुत्रायुष्मान् । अत्रायुष्मान् । क्वायुष्मान् । कुहायुष्मान् । इहायुष्मान् । एवं कुत्रदीर्घायुरित्यादि ।

११२. किमन्यैकसर्वयत्तदः काले दा ।

त्रस्याऽपवाद । कि, अन्य, एक, सर्व, यद्, तद्—इत्येतेभ्य. सप्तम्यन्तेभ्य काले वाच्ये दा प्रत्ययो भवति । कस्मिन् काले—कदा । अन्यदा, एकदा, सर्वदा, यदा, तदा । काले इति किम् ? क्व देशे ।

११३. सदाधुनेदानींतदानीमेतर्हि ।

सदा, अधुना, इदानी, तदानी, एतर्हि—इत्येते शब्दाः काले वाच्ये निपात्यन्ते । सदेति सर्वशब्दाद् दा प्रत्ययः सभावश्चास्य । सर्वस्मिन् काले—सदा । सर्वदेत्यपि पूर्वेण । अधुनेति इदमो धुना प्रत्ययोऽकारादेशश्च । अस्मिन् काले—अधुना । इदानीमिति इदमो दानी प्रत्यय. इकारादेशश्च । अस्मिन् काले—इदानीम् । तदानीमिति तदो दानी प्रत्ययः । तस्मिन् काले—तदानीम् । एतर्हीति इदमो र्हिः प्रत्यय. एतादेशश्च । अस्मिन् काले—एतर्हि ।

११४. सद्योऽद्यपरेद्यव्यहनि ।

सद्यस्, अद्य, परेद्यवि—इत्येते शब्दा अहनि काले निपात्यन्ते । सद्य इति समानशब्दात् सप्तम्यन्ताद् अह्नि काले वर्तमानात् द्यस् प्रत्यय. समानस्य च सभावो निपात्यते । समानेऽह्नि—सद्यः । अद्येति इदशब्दात् द्यः प्रत्यय. अकारादेशश्चास्य । अस्मिन्नहनि—अद्य । परेद्यवीति परशब्दात् एद्यवि प्रत्यय. । परस्मिन्नहनि—परेद्यवि । सद्य इति केचित् कालमात्रे निपातयन्ति ।

---

१. 'त्रच' [८/१/१०९] इत्यनेन सर्वविभक्तिद्वारेणापि त्रयोगे क्वाद्यादेशः ।

११५. पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ।

पूर्व, अपर, अधर, उत्तर, अन्य, अन्यतर, इतर—इत्येतेभ्यः सप्तम्यन्तेभ्योऽहनि काले वर्तमानेभ्य एद्युस् प्रत्ययो भवति । पूर्वस्मिन्नहनि—पूर्वेद्युः । अपरेद्युः, अधरेद्युः, उत्तरेद्युः, अन्येद्युः, अन्यतरेद्युः, इतरेद्युः ।

११६. उभयाद् द्युस् च ।

उभयशब्दात् अहनि काले द्युस् चकाराद् एद्युस् च प्रत्ययो भवति । उभयस्मिन्नहनि—उभयद्युः, उभयेद्युः ।

११७. ऐषमः-परुत्-परारि वर्षे ।

ऐषमस्, परुत्, परारि—इत्येते वर्षे संवत्सरे काले निपात्यन्ते । ऐषमसिति इदंशब्दात् सप्तम्यन्ताद् वर्षे वर्तमानात् समसिण् प्रत्यय इदमश्चैकारादेश । अस्मिन् संवत्सरे—ऐषम । इमकस्मिन् संवत्सरे—ऐषमः । परुदिति पूर्वशब्दात् उत् प्रत्ययस्तस्य च पर इत्यादेश । पूर्वस्मिन् संवत्सरे—परुत् । परारीति पूर्वतरशब्दात् आरिप्रत्ययः तस्य च परादेश । पूर्वतरे संवत्सरे—परारि ।

११८. अनद्यतने र्हिर्वा ।

सप्तम्यन्तादनद्यतने काले वर्तमानात् यथासंभव किमद्व्यादिसर्वाद्यवैपुल्यबहो र्हि प्रत्ययो वा भवति । कस्मिन्ननद्यतने काले—कर्हि । यर्हि, तर्हि, अन्यर्हि । एतस्मिन् काले—एतर्हि । एतद मार्को नेष्यते । अमुष्मिन् काले—अमुर्हि । इदमस्तु अनेन[1] नेष्यते । बहुषु[2] कालेषु—बहुर्हि । कियत्तदेतदन्येभ्य एवेच्छन्त्यन्ये । पक्षे कदा, यदा, तदा, अन्यदा, तदानीम् । काले इति किम् ? यस्मिन्ननद्यतने भोजने यत्र । अनद्यतने इति किम् ? यस्मिन् काले—यदा । सप्तम्यर्थमात्र-विवक्षायां त्रोऽपि भवति । अमुत्र काले ।

११९. प्रकारे था ।

सप्तम्या इति निवृत्तम् । यथासम्भव विभक्ति । सामान्यस्य भिद्यमानस्य भेदान्तरानुप्रवृत्तो भेदः प्रकारः । तस्मिन् वर्तमानात् किमद्व्यादिसर्वाद्यवैपुल्यबहो था प्रत्ययो भवति । सर्वेण प्रकारेण—सर्वथा । यथा, तथा, उभयथा, अन्यथा, अपरथा, इतरथा । बहोस्तु परत्वाद् धा भवति[3] । बहुधा ।

१२०. कथमित्थम् ।

कथमित्थमिति प्रकारे निपात्येते । कथमिति किमस्थापवादस्थ निपात्यते । केन प्रकारेण—कथम् । इत्थमिति इदम एतदो वा थ प्रत्यय इदादेशश्च । अनेन एतेन वा प्रकारेण—इत्थम् ।

१२१. तसादिः स्यादिवत् ।

उक्तास्तसादयः प्रत्यया स्यादिवद् भवन्ति । स्यादिवत्करण त्यदादिविध्यर्थम् । यतः, ततः, तर्हि, कदा । 'आ द्वेष्टेरः' [२/१/७७] इत्यत्वम् । तसो निरनुबन्धस्य ग्रहणेन तसुर्न गृह्यते । द्वितः त्वत्तः ।

१२२. संख्याया धा ।

प्रकार इत्यनुवर्तते । संख्यावाचिनो नाम्न प्रकारे वर्तमानाद् धा प्रत्ययो भवति । एकेन प्रकारेण—एकधा । द्विधा, त्रिधा, चतुर्धा, पञ्चधा, शतधा, बहुधा, गणधा, कतिधा, तावद्धा ।

---

१ किंतु 'सदाधुनेदानींतदानीमेतर्हि' [८/१/११३] इति सामान्यकाले भवति ।

२ बहुवचनेनावैपुल्य दर्श्यते ।

३ 'संख्याया धा' [८/१/१२२] इत्यनेन ।

१२३. विचाले च ।

विचलनं विचाल.। द्रव्यस्य पूर्वसंख्याया: प्रच्युति. संख्यान्तरापत्ति: एकस्यानेकीभाव: अनेकस्य चैकीभाव:। तस्मिन् गम्यमाने सख्यावाचिनो नाम्नो धा प्रत्ययो भवति। एको राशिर्द्वौ क्रियते—द्विधा क्रियते। त्रिधा क्रियते। एको राशिर्द्वौ भवति—द्विधा भवति। त्रिधा भवति। एक राशि द्वौ करोति—द्विधा करोति। त्रिधा करोति। शतेन शतधा।

यदि मे यतमानाया, वचनं न करिष्यसि।
उन्मत्त ! शतधा मूर्धा, तवेषोऽद्य फलिष्यति ॥

अनेक एक: क्रियते—एकधा क्रियते। अनेक एको भवति—एकधा भवति। अनेकमेक करोति—एकधा करोति। पञ्च राशयस्त्रयो द्वौ एको वा क्रियन्ते—त्रिधा, द्विधा, एकधा वा क्रियन्ते। एव त्रिधा, द्विधा, एकधा वा भवन्ति। त्रिधा, द्विधा, एकधा वा करोति। एव बहुधा, गणधा, कतिधा, तावद्धा। चकार उत्तरत्र प्रकारे[१] विचाले चेत्युभयो: समुच्चयार्थ:।

१२४. वैकाद् ध्यमुञ् ।

एकशब्दात् सख्यावाचिन.[२] प्रकारे वर्तमानाद् विचाले च गम्यमाने ध्यमुञ् प्रत्ययो वा भवति। एकेन प्रकारेण—ऐकध्य भुङ्क्ते। पक्षे एकधा भुङ्क्ते। अनेकमेक करोति—ऐकध्य करोति, एकधा करोति। वाग्रहण धार्थम्। ञकारो वृद्ध्यर्थ.। उकार उच्चारणार्थ:।

१२५. द्वित्रेर्धमुञेधौ ।

द्वि, त्रि—इत्येताभ्या सख्यावाचिभ्यां प्रकारे वर्तमानाभ्या विचाले च गम्यमाने धमुञ्, एधा—इत्येतौ प्रत्ययौ वा भवत.। वचनभेदाद् यथासख्यं नास्ति। द्वाभ्या प्रकाराभ्या—द्वैधम्। त्रैधम्। द्वेधा, त्रेधा भुङ्क्ते। वावचनाद् द्विधा, त्रिधा। एक राशि द्वौ करोति—द्वैधम्। त्रैधम्। द्वेधा, त्रेधा। द्विधा, त्रिधा करोति।

१२६. तद्वति धण् ।

द्वित्रिभ्या सख्यावाचिभ्या तद्वति प्रकारवति विचालवति चाभिधेये धण् प्रत्ययो भवति। द्वौ प्रकारौ विभागौ वा एषा द्वैधानि। त्रैधानि। राजद्वैधानि, राजत्रैधानि। द्वैधीभाव, त्रैधीभाव:।

१२७. वारे कृत्वस् ।

सख्याया इत्यनुवर्तते। वारो धात्वर्थस्यायौगपद्येन वृत्ति तत्कालो[३] वा। तस्मिन् वर्तमानात् सख्याशब्दात् तद्वति वारवति धात्वर्थे क्रियायामर्थे कृत्वस् प्रत्ययो भवति। पञ्च वारा अस्य पञ्चकृत्वो भुङ्क्ते। षट्कृत्व:। शतकृत्व:, सहस्रकृत्वोऽधीते। बहुकृत्व:, गणकृत्व., कतिकृत्व:, तावत्कृत्व। भुज्यर्थो वारवानिति भुज्यर्थस्य विशेषणम्[४]। तद्वतीति किम् ? भोजनस्य पञ्च वारा.[५]। सख्याया इति किम् ? भूरयो वारा अस्य भोजनस्य।

१२८. द्वि-त्रि-चतुर्भ्य: सुच् ।

द्वि, त्रि, चतुर्—इत्येतेभ्य संख्याशब्देभ्यो वारे वर्तमानेभ्यस्तद्वति सुच् प्रत्ययो भवति। पूर्वापवाद:। द्वौ वारावस्य द्विर्भुङ्क्ते। त्रिर्भुङ्क्ते, चतुर्भुङ्क्ते। उकार उच्चारणार्थ:। चकार: **'सुचो वा'** [२/२/६] इत्यत्र विशेषणार्थ:।

---

१. प्रकारो अवस्थितस्य धर्मिणो भवति। विचाले तु अवस्थित एव धर्मी पृथक्क्रियते।

२ अन्यावावप्यसौ वर्तते इति संख्याविशेषण सार्थकम्।

३ तस्य धात्वर्थस्यायौगपद्येन वृत्ते: काल:।

४. पञ्चकृत्व इत्यादिकम्।

५. इह वारे पञ्चेति संख्याया वृत्तिरस्ति न तु वारवानुच्यते भोजनस्य वारेण संबन्धमात्रस्यैव विद्यमानत्वात्।

१२९. एकात् सकृच्चास्य ।

एकशब्दाद् वारे वर्तमानात् तद्वत्यभिधेये सुच् प्रत्ययः सकृदिति चास्यादेशो भवति । कृत्वसोऽपवादः । एकवारं भुङ्क्ते—सकृद् भुङ्क्ते ।

१३०. बहोरासन्ने धा ।

बहुशब्दात् सङ्ख्यावाचिन आसन्ने अविदूरेऽविप्रकृष्टकाले वारे क्रियाप्रवृत्तौ तत्काले वाऽविप्रकृष्टे वर्तमानात् तद्वति धा प्रत्ययो भवति । बहव आसन्ना वारा अस्य बहुधा भुङ्क्ते । बहुधा पिबति । आसन्न इति किम् ? बहुकृत्वो मासस्य भुङ्क्ते । आसन्नवारेऽपि वारमात्रे द्योत्ये कृत्वस् प्रत्ययो भवत्येव । बहुकृत्वोऽह्नो भुङ्क्ते । आसन्नता तु प्रकरणादिना गम्यते ।

१३१. दिक्शब्दाद्दिग्देशकालेषु[1] प्रथमा-पञ्चमी-सप्तम्याः ।

दिक्शब्दाद् दिशि प्रसिद्धाच्छब्दाद् दिशि देशे काले च वर्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् स्वार्थे धा प्रत्ययो भवति । प्राची दिग् रमणीया—प्राग्[2] रमणीयम् । प्राङ् देशो रमणीयः—प्राग् रमणीयम् । प्राङ् कालो रमणीयः—प्राग् रमणीयम् । प्राच्या दिश आगतः—प्रागागतः । प्राचो देशादागतः—प्रागागतः । प्राचः कालादागतः—प्रागागतः । प्राच्यां दिशि वसति—प्राग्वसति । प्राचि देशे वसति—प्राग्वसति । प्राचि काले वसति—प्राग्वसति । **'लुगञ्चेः'** [८/१/१४१] इति धाप्रत्ययस्य लुक् । लुकि सति **'लुक् तद्धितलुक्यगोणीसूच्योः'** [२/३/११६] इति ईपो लुक् । दिक्शब्दादिति किम् ? ऐन्द्री दिक् । दिग्देशकालेष्विति किम् ? प्राङ् वृक्षः । प्रथमापञ्चमीसप्तम्या इति किम् ? प्राचीं दिशं पश्यति । प्राच्या दिशा प्रज्वलितम् । प्राच्यै दिशे देहि । प्राच्या दिशः स्वम् । वचनभेदो यथासंख्यनिवृत्त्यर्थः ।

१३२. ऊर्ध्वाद्रिरिष्टातावुपश्चास्य ।

ऊर्ध्वशब्दाद् दिग्देशकालेषु वर्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् स्वार्थे रि, रिष्टात्—इत्येतौ प्रत्ययौ धाऽपवादौ भवतः अस्य चोर्ध्वशब्दस्य उपादेशो भवति । ऊर्ध्वा दिग् देशः कालो वा रमणीयः—उपरि रमणीयं, उपरिष्टात् रमणीयम् । एवमुपर्यागतः, उपरिष्टादागतः । उपरि वसति, उपरिष्टाद् वसति ।

१३३. पूर्वावराधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ।

पूर्व अवर, अधर—इत्येतेभ्यः प्रत्येकं दिग्देशकालवृत्तिभ्यः प्रथमापञ्चमीसप्तम्यन्तेभ्यः अस्, अस्तात्—इत्येतौ प्रत्ययौ स्वार्थे भवतः एषां च पूर्वावराधरशब्दानां यथासंख्यं पुर्, अव्, अध् इत्येते आदेशा भवन्ति । पूर्वा दिग् देशः कालो वा रमणीयः—पुरो रमणीयं, पुरस्ताद् रमणीयम् । पुर आगतः, पुरस्तादागतः । पुरो वसति, पुरस्ताद् वसति । अवरा दिग् देशः कालो वा रमणीयः—अवो रमणीयं, अवस्ताद् रमणीयम् । अव आगतः, अवस्तादागतः । अवो वसति, अवस्ताद् वसति । अधरा दिग् देशः कालो वा रमणीयः—अधो रमणीयं, अधस्ताद् रमणीयम् । अध आगतः, अधस्तादागतः । अधो वसति, अधस्ताद् वसति ।

१३४. परावरात् स्तात् ।

पर, अवर—इत्येताभ्यां दिग्देशकालेषु वर्तमानाभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यां स्वार्थे स्तात् प्रत्ययो भवति । परा दिग् देशः कालो वा रमणीयः—परस्ताद् रमणीयम् । परस्तादागतः, परस्ताद् वसति । एवमवरस्ताद् रमणीयं,

---

१ ननु दिग्देशकालेष्विति दिग्ग्रहणं किमर्थं, यो हि दिक्शब्दः स दिशि वर्तत एव । नैवम् । नहि दिक्शब्दो दिश्येव वर्ततेऽपि तु देशादावपि, तत्र दिग्ग्रहणं विना देशकाल इत्युच्यमाने यदा दिक्शब्दो देशे काले वा वर्तते तदैव प्रत्ययः स्यात् । यदा तु दिशि तदा न स्यात् । तेन दिग्देशकालेषु त्रिष्वेव वर्तमाना दिक्शब्दा गृह्यन्ते, तेन केवलाया दिशि ककुभ्प्रभृतिभ्यो न भवति ।

२ एषु क्रियाव्ययविशेषणे इत्यनेनाव्ययविशेषणत्वात् नपुंसकत्वम् ।

अवरस्तादागतः, अवरस्ताद् वसति ।

१३५. दक्षिणोत्तराच्चातस् ।

दक्षिण, उत्तर— इत्येताभ्या चकारात्परावराभ्या च दिग्देशकालेषु वर्तमानाभ्यां प्रथमापञ्चमीसप्तम्यन्ताभ्यां स्वार्थेऽतस् प्रत्ययो भवति। दक्षिणशब्द कालेन संभवतीति दिग्देशवृत्तिर्गृह्यते । दक्षिणा दिग् देशो वा रमणीयः— दक्षिणतो रमणीयम् । दक्षिणत आगत । दक्षिणतो वसति। उत्तरा दिग् देश कालो वा रमणीय.—उत्तरतो रमणीयम्। उत्तरत आगतः । उत्तरतो वसति। परतो रमणीयम्। परत आगत. । परतो वसति। अवरतो रमणीयम्। अवरत आगत.। अवरतो वसति। एव चाऽवरशब्दस्य चातूरूप्य[1] भवति । अकारस्तसोऽस्य भेदार्थ, तेन अस्मात् **'क्वामेहत्रतसस्त्यप्'** [६/४/१५] इति त्यप् न भवति। परतो भव पारतमित्यणेव ।

१३६. अधराऽपराच्चात् ।

अधर, अपर—इत्येताभ्या दिग्देशकालवृत्तिभ्या प्रथमापञ्चमीसप्तम्यन्ताभ्यां चकाराद् दक्षिणोत्तराभ्या च आत् प्रत्ययो भवति । अधरा दिग् देश कालो वा रमणीय -- अधराद् रमणीयम् । अधरादागतः, अधराद् वसति। एव चाऽधरशब्दस्य त्रैरूप्यम्[2] । अपरा दिग् देश. कालो वा रमणीय —पश्चाद् रमणीयम् । पश्चादागत., पश्चाद् वसति । दक्षिणपश्चाद् रमणीय, दक्षिणपश्चादागतः, दक्षिणपश्चाद् वसति । **'पश्चोऽपरस्य'''** [८/१/१४२] इत्यादिना पश्चादेश । दक्षिणाद् रमणीय, दक्षिणादागत., दक्षिणाद् वसति। उत्तराद् रमणीय, उत्तरादागत., उत्तराद् वसति ।

१३७. वा दक्षिणात् प्रथमासप्तम्या आः ।

दक्षिणशब्दाद् दिग्देशवृत्तेः प्रथमान्तात् सप्तम्यन्ताच्च आ. प्रत्ययो वा भवति । दक्षिणा रमणीयम् । दक्षिणा वसति । पक्षे अतसातौ । दक्षिणतो रमणीयम् । दक्षिणतो वसति । दक्षिणाद् रमणीयम् । दक्षिणाद् वसति । पञ्चम्यां सावकाशावतसातावाकारो बाधेतेति वाग्रहणम् । प्रथमासप्तम्या इति किम् ? दक्षिणत आगतः । दक्षिणादागतः ।

१३८. आहो दूरे ।

दिक्शब्दा अवध्यपेक्षा[3] । तत्रावधेर्दूरे दिशि देशे वा वर्तमानात् प्रथमासप्तम्यन्तात् दक्षिणशब्दात् आ, आहि— इत्येतौ प्रत्ययौ भवत. । ग्रामाद् दूरा दक्षिणा दिग् देशो वा रमणीय.—ग्रामाद् दक्षिणा रमणीयं, दक्षिणाहि रमणीयम् । दक्षिणा वसति, दक्षिणाहि वसति । दूरे इति किम् ? दक्षिणत , दक्षिणात्, दक्षिणा रमणीयम् । आहिर्न भवति । आप्रत्ययस्तु पूर्वेण सामान्येन विधानाद् भवत्येव । यद्येवमिहाकारग्रहणं किमर्थम् ? विशेषविहितेनाहिना बाधो मा भूदित्येवमर्थ उत्तरार्थं च । प्रथमासप्तम्या इति किम् ? दक्षिणत आगतः ।

१३९. वोत्तरात् ।

उत्तरशब्दात् प्रथमासप्तम्यन्तात् आ, आहि—इत्येतौ प्रत्ययौ वा भवत. । योगविभागाद् दूर इति नानुवर्तते । उत्तरा रमणीयम् । उत्तरा वसति । उत्तराहि रमणीयम् । उत्तराहि वसति । पक्षे अतसातौ । उत्तरतः, उत्तरात् । प्रथमासप्तम्या इति किम् ? उत्तरतः, उत्तरादागत. ।

१४०. अदूरे एनः ।

वोत्तरादिति नानुवर्तते **'एनेनानञ्चेर्द्वितीयाषष्ठ्यौ'** [२/४/१२३] इत्यत्र अञ्चेर्वर्जनात् । दिक्शब्दाद्

---

१. अवः, अवस्तात्, अवरस्तात्, अवरतः ।

२. अधः, अधस्तात्, अधरात् ।

३. यथायमस्मात् पूर्व इत्यादि ।

दिग्देशकालवृत्ते प्रथमासप्तम्यन्ताद् अवधेरदूरे वर्तमानात् एनः प्रत्ययो भवति। अस्मात् पूर्वा अदूरा दिक् रमणीया देशः कालो वा—पूर्वेणास्य रमणीयम्। पूर्वेणास्य वसति। अपरेणास्य रमणीयम्। अपरेणास्य वसति। एवं दक्षिणेन, उत्तरेण, अवरेण। अदूरे इति किम्? पुरो रमणीयम्। पुरो वसति। प्रथमासप्तम्या इति किम्? पुर आगतः। अन्ये तु दक्षिणोत्तराधरशब्देभ्य एव एनप्रत्ययमिच्छन्ति।

१४१. लुगञ्चेः।

अञ्चत्यन्ताद् दिक्शब्दाद् दिग्देशकालेषु वर्तमानात् प्रथमापञ्चमीसप्तम्यन्तात् यः प्रत्ययो विहितो धा एनो वा तस्य लुग् भवति। प्राची दिग् दूरादूरा वा रमणीया देशः कालो वा—प्राग् रमणीयम्। प्रागागतः। प्राग् वसति। एवं प्रत्यक्, अवाक्, उदक्। लुकि च सति स्त्रीप्रत्ययस्यापि लुग् भवति।

१४२. पश्चोऽपरस्य दिक्पूर्वस्य चाति।

अपरशब्दस्य केवलस्य दिक्पूर्वपदस्य च आति प्रत्यये परे पश्चादेशो भवति। अपरा दिग् देशः कालो वा रमणीयः—पश्चाद् रमणीयम्। पश्चादागतः, पश्चाद् वसति। दिक्पूर्वात्—दक्षिणा च सा अपरा च दक्षिणापरा दिग् देशो वा रमणीयः दक्षिणपश्चाद् रमणीयम्। दक्षिणपश्चादागतः, दक्षिणपश्चाद् वसति। उत्तरपश्चाद् रमणीयं, उत्तरपश्चादागतः, उत्तरपश्चाद् वसति।

१४३. वोत्तरपदेऽर्धे।

अपरशब्दस्य केवलस्य दिक्पूर्वपदस्य च अर्धशब्दे उत्तरपदे पश्चादेशो वा भवति। अपरमर्धं—पश्चार्धं, अपरार्धम्। दक्षिणापरस्या अर्धं—दक्षिणपश्चार्धं, दक्षिणापरार्धं। उत्तरपश्चार्धं, उत्तरापरार्धं। उत्तरपदे इति किम्? अपरा अर्धं शोभते। असमासोऽयम्। पूर्वपदमुत्तरपदमिति हि समासे भवति।

द्वितीयश्चरणः

१. प्रकृष्टे तम ।

प्रकृष्टे प्रकर्षवत्यर्थे वर्तमानान्नाम्नः स्वार्थे तमः प्रत्ययो भवति। प्रकर्षोऽतिशयः। स च गुणक्रिययोरेव न जातिद्रव्ययो । सर्वे इमे शुक्ला:, अयमेषां प्रकृष्ट. शुक्ल —-शुक्लतम । शुक्लतमौ, शुक्लतमाः। एवमाढ्यतम., सुकुमारतमः, कारकतम., साधकतम', प्रकृष्टतम. । जातिद्रव्यवचनेभ्योऽपि गुणक्रियाप्रकर्षविवक्षाया भवति । गौरय य सुसंनद्धः[1] शकट वहति। गोतमोऽय य सुलक्षण शकट सीरं च वहति। गोतमेय या समांसमां[2] विजायते स्त्रीवत्सा[3] च। द्वयोः प्रकर्षे तरस्य विधानात् बहूना प्रकर्षेऽय विधि । कथ[4] तर्हि प्रधानमय ग्राम', प्रधानतमोऽयं ग्रामे, आढ्यं नगर, आढ्यतमोऽयं नगरे? एकस्मिन्नपि निर्दिष्टे समुदाये तदन्तर्गतावयवान्तरापेक्षया प्रकर्षे भविष्यति। प्रकृष्टे इति किम्? महत्सर्षप महान् हिमवानिति। शुक्लतमा शाटी। **'मानिवयङ्कुच्तस्त्रतरतम ··'** [३/२/४६] इत्यादिना पुवद्भाव ।

२. द्वयोर्विभज्ये च तरः ।

द्वयोस्तद्गुणयोरर्थयोर्मध्ये[5] य प्रकृष्टस्तस्मिन् विभज्ये च विभक्तव्ये च प्रकृष्टेऽर्थे वर्तमानान्नाम्नस्तरः प्रत्ययो भवति । तमस्यापवादः । द्वाविमौ पटू, अयमनयोः प्रकृष्ट पटु.—पटुतरः । एवं सुकुमारतर., पाचकतरः । गोतरो य शकट वहति सीर च । गोतरा या समासमा विजायते स्त्रीवत्सा च। दन्ताश्च औष्ठौ च दन्तौष्ठम्। दन्तौष्ठस्य दन्ता स्निग्धतरा । पाणी च पादौ च पाणिपादम्। पाणिपादस्य पाणी सुकुमारतरौ। अत्र यद्यपि विग्रहे बहुत्वसंख्या प्रतीयते तथापि समाहारेऽवयवौ स्वार्थमात्र दन्तत्वादिलक्षण अभेदैकत्वसंख्यायोग्युपाददाते[6] न संख्याभेदमिति द्वयोरेव प्रकर्ष। यदा पुनरितरेतरयोगस्तदा बह्वर्थप्रकर्ष इति तम एव भवति। अस्माकं च देवदत्तस्य च देवदत्तोऽभिरूपतर.। अत्रास्माकमित्येकस्यैव । **'अस्मदो द्वयोश्च'** [१/१/६५] इति बहुवद्भावः । विभज्ये—सांकाश्यकेभ्यः पाटलिपुत्रका आढ्यतरा., अभिरूपतरा, सुकुमारतराः । सांकाश्यकेभ्य. पाटलिपुत्रकेभ्यश्च माथुरा आढ्यतराः, अभिरूपतराः, सुकुमारतरा. । सांकाश्यकादिषु पाटलिपुत्रकादीनामप्रवेशात् विभाग. । विभज्यस्य च विशेषणमपि आढ्याद्यर्थः

---

१ सुसबद्ध इत्यर्थः ।

२. अत्र **'कालाध्वभाव····'** [२/४/१८] इत्याधारस्य कर्मत्वे द्वितीयान्तस्य वीप्सायां द्वित्वम् ।

३. स्त्री वत्सा यस्याः सा तथा । सवत्सेत्युच्यमाने सह वत्सेन वत्सया वा वर्तते इति सशय स्यात्, तन्निरासाय स्त्रीवत्सेत्युक्तम् ।

४ यदि बहूना प्रकर्षेऽय विधिस्तर्हि प्रधानतमोऽय ग्राम इत्यत्र ग्रामपुरुषयोर्द्वयो प्रकर्षे न प्राप्नोतीति कथमर्थ उत्तर तु सुगममेव ।

५. समानगुणयो ।

६. न विद्यते भेदो यस्या सा अभेदा, सा चासावेकत्वसख्या च ।

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः ॥

चैत्रेण चैत्राभ्यां चैत्रैर्वा भूयते इत्यत्र या संख्या सा अभेदैकत्वसंख्येति ।

प्रकृष्टं विभज्यं भवति, ततः प्रत्ययः। द्वयोर्विभज्ये चेति किम् ? गवां[1] कृष्णा सपन्नक्षीरतमा। सांकाश्यकानां[2] पाटलिपुत्रकाणां च पाटलिपुत्रका आढ्यतमाः इत्यत्र राश्यपेक्षया द्वित्वेऽपि शब्देन बहुत्वोपादानात् तरो न भवति। विभज्यग्रहणमद्वित्वार्थम्[3]। प्रकृष्टे इति किम् ? अयमनयोः पटुः। साकाश्यकेभ्यः पाटलिपुत्रका आढ्याः। शुक्लतरा शाटी। **'मानिक्यङ्कृत्तस्त्रतरतम...'** [३/२/४६] इत्यादिना पुवद्भावः।

३. क्वचित् स्वार्थे।

स्वार्थेऽपि तर प्रत्ययो भवति क्वचित्। प्रकृष्टे सिद्ध एव। अभिन्नमेवाभिन्नतरकम्। उपपन्नमेवोपपन्नतरकम्। उच्चैरेवोच्चैस्तराम्। क्वचिद्ग्रहणं शिष्टप्रयोगानुसरणार्थम्।

४. त्यादिकिमेदव्ययेभ्यस्ताभ्यामामद्रव्ये।

त्याद्यन्तात् किंशब्दात् एकारान्तात् अव्ययेभ्यश्च पराभ्यां ताभ्यामिति पूर्वोक्ताभ्यां तमतराभ्यां **अद्रव्यप्रकर्षेऽर्थे** आम् प्रत्ययो भवति। त्यादि—सर्वे इमे पचन्ति, अयमेषां प्रकृष्टं पचति—पचतितमाम्। द्वाविमौ पचतः, अयमनयोरतिशयेन पचति—पचतितराम्। अस्मादेव[4] वचनात् त्याद्यन्तादपि द्व्यर्थप्रकर्षे तरः बह्वर्थप्रकर्षे तमो भवति। किम्—इदमेषामतिशयेन किं पचति—कितमां पचति। इदमनयोरतिशयेन किं पचति—किंतरां पचति। एत्—पूर्वाह्णेतमां भुङ्क्ते। पूर्वाह्णेतरां भुङ्क्ते। अपराह्णेतमां, अपराह्णेतराम्। प्राह्णेतमां, प्राह्णेतराम्। प्रगेतमां, प्रगेतराम्। अग्रेतमां, अग्रेतराम्। एद्ग्रहणसामर्थ्यात् काले द्रव्येऽपि आम् भवति नान्यस्मिन्नेदन्ताभावात्। अग्रेशब्दोऽपि कालवाची। अथवा विभक्त्यर्थो न द्रव्यम्। तत्प्रकर्षेऽत्र तमतरौ। शोभनो हेशब्दो यस्य स गृहेतरः इत्यत्र अनभिधानान्न भवति। क्रियाशब्देभ्यश्च[5]—जयतीति विचि जे जेतरः इत्यादि। अव्यय—नितमां, नितराम्। सुतमां, सुतराम्। अतितमां, अतितराम्। उच्चैस्तमां, उच्चैस्तराम्। त्यादिकिमेदव्ययेभ्य इति किम् ? शीघ्रतरं गच्छति। अद्रव्ये इति किम् ? कितरं दारु। उच्चैस्तमः, उच्चैस्तरो वृक्षः। उत्तमः, उत्तरः।

५. गुणाङ्गादिष्ठेयसू तदर्थे वा।

तयोस्तमतरयोरर्थस्तदर्थः। गुणोऽङ्गं प्रवृत्तिनिमित्तं यस्य स गुणाङ्गः। यः शब्दो गुणमभिधाय द्रव्ये वर्तते। तस्मात्तदर्थे इति तमतरयोर्विषये यथासंख्यं इष्ठ, ईयसु—इत्येतौ प्रत्ययौ वा भवतः। पक्षे यथाप्राप्तं तमतरौ च। तमार्थे इष्ठ.। अयमेषामतिशयेन पटुः—पटिष्ठः, पटुतमः। पटिष्ठौ, पटुतमौ। पटिष्ठाः, पटुतमाः। एवं लघिष्ठः, लघुतमः। गरिष्ठः, गुरुतमः। म्रदिष्ठः, मृदुतमः। तरार्थे ईयसु। अयमनयोरतिशयेन पटुः—पटीयान्, पटुतरः। गरीयान्, गुरुतरः। लघीयान्, लघुतरः। म्रदीयान्, मृदुतरः। माथुरेभ्यः पाटलिपुत्रकाः पटीयांसः, पटुतराः। गुणग्रहणं किम् ? गोतमः, गोतरः। पाचकतमः, पाचकतरः। दन्तौष्ठस्य दन्ताः स्निग्धतराः। अत्र जातिक्रियाङ्गत्वान्न भवति। अङ्गग्रहणं किम् ? शुक्लतमः, शुक्लतरः रूपम्। अत्र हि गुणे एव वृत्तिर्न तदुपसर्जने[6] द्रव्ये इति न भवति। ईयसोरुकार उदित्कार्यार्थः। पटीयसी।

६. त्यादेश्च प्रशंसायां रूपः।

त्याद्यन्ताच्चकारान्नाम्नश्च प्रशंसायां वर्तमानात् रूप प्रत्ययो भवति। प्रशस्तं पचति—पचतिरूपम्। पचतोरूप,

---

१ अत्र यथा द्वयोरर्थयोर्मध्ये प्रकृष्टत्वं नास्ति तथा विभज्योपि नास्ति। स हि भेदरूपमापन्नानां भवति। अत्र तु गोत्वेन सर्वा अपि कृष्णा गावोऽभिन्ना।

२ प्रकर्षद्वारेण विभज्यद्वारेणापि न भवति, षष्ठ्यन्तपदाभ्यां समुदायस्याभिन्नस्यैव प्रतिपादनात्। न तु अत्रापि अपायप्रतिपादिका पञ्चम्यस्ति, अपि तु चकारेणाविभागः प्रतीयते। ननु द्वयोरित्यवतेपि अत्र न भविष्यति किं विभज्यग्रहणेनेत्याह।

३ विभज्ये इत्यसति द्वयोरेव प्रकृष्टे स्यात्। ततश्चासत्यपि हि द्वित्वे विभज्ये यथा स्यादित्येवमर्थम्।

४. नामप्रस्तावात् **'त्यादेश्च प्रशंसायां रूपः'** [८/२/६] इति वचनाच्च नाम्न एव प्राप्नुत इति प्रश्नाशयः।

५. अनभिधानान्न भवति।

६. स गुण उपसर्जनं यत्र तत्र।

पचन्तिरूपम् । त्याद्यन्तानां क्रियाप्रधानत्वात् तस्याश्च साध्यत्वेन लिङ्गसंख्याभ्यामयोगात् रूपान्तस्यौत्सर्गिकमेकवचनं नपुंसकलिङ्गं च भवति । प्रशस्तो वैयाकरणः — वैयाकरणरूपः । पण्डितरूपः । प्रकृतेः प्रवृत्तिनिमित्तस्य वैस्पष्ट्यं परिपूर्णता प्रशंसा । तेनात्रापि भवति । वृषलरूपोऽयमपि पलाण्डुना सुरां पिबेत् । दस्युरूपोऽयमपि अक्ष्णोरञ्जनं हरेत् । पटुतमरूपः, पटुतररूपः । शोभनरूपा, दर्शनीयरूपा । अत्र 'मानिक्यङ्कचत्तस्त्रतरतम···' [३/२/४६] इत्यादिना पुंवद्भावः ।

७. अतमादेरीषदसमाप्ते कल्पदेश्यदेशीयाः ।

त्यादेश्चेत्यनुवर्तते । सम्पूर्णता पदार्थानां समाप्तिः । सा किंचिदूना ईषदसमाप्तिः । तद्विशिष्टेऽर्थे वर्तमानात् त्याद्यन्तान्नाम्नश्च तमाद्यन्तवर्जितात् कल्प, देश्य, देशीय – इत्येते प्रत्यया भवन्ति । ईषदसमाप्तं पचति— पचतिकल्पं, पचतिदेश्यं, पचतिदेशीयम् । पचतःकल्पं, पचतोदेश्यं, पचतोदेशीयम् । पचन्तिकल्पं, पचन्तिदेश्यं, पचन्तिदेशीयम् । एवं पक्ष्यतिकल्पं, अपाक्षीत्कल्पमित्यादि । पूर्ववन्नपुंसकत्वमेकवचनं च । इदमेव त्यादिग्रहणं ज्ञापकं, शेषस्तद्धितो नाम्न एव भवति । ईषदसमाप्तः पटुः— पटुकल्पः, पटुदेश्यः, पटुदेशीयः । कारककल्पः, कारकदेश्यः, कारकदेशीयः । कृतकल्पं, भुक्तदेश्यं, पीतदेशीयम् । ईषदसमाप्तो गुडः— गुडकल्पा द्राक्षा, गुडदेश्या, गुडदेशीया । पयस्कल्पा यवागूः । चन्द्रकल्पं मुखम् । तैलकल्पा प्रसन्ना[1] । गुडादिधर्माणां माधुर्यादीनां द्राक्षादिषु ईषदसमाप्तत्वात् गुडादित्वेनेषदसमाप्ता द्राक्षादय एवमुच्यन्ते । कल्पाद्यन्तमुपमेये वर्तमानमुपमयलिङ्गसंख्यम् । बहुप्रत्ययपूर्वं तु प्रकृतिलिङ्गसंख्यम् । स्वभावाच्छब्दशक्तिभेदाद् यदुत स्वार्थिका केचित् प्रकृतिलिङ्गान्यतिवर्तन्ते । यथा— कुटीरः, शुण्डारः, शमीरुः, शमीरः, दैवतं, औपयिकं, औषधं, वाचिकमिति । केचित् नातिवर्तन्ते । यथा— यावकः, मणिकः, बृहतिका, मृत्तिका, कामुतरी, गोणीतरी, व्यावक्रोशी, व्यावहासीति । अतमादेरिति किम् ? यदा प्रकर्षादिविशिष्टस्येषदसमाप्तिविवक्षा भवति तदा तमादिभ्यः कल्पादयः प्रागनुवर्तन्ति, अतस्ते मा भूवन् । यदा त्वीषदसमाप्तस्य प्रकर्षादयो विवक्ष्यन्ते तदा कल्पाद्यन्तेभ्यस्तमादयो भवन्त्येव । पटुकल्पतमः, पटुकल्पतरः । पटुदेश्यतमः, पटुदेश्यतरः । पटुकल्परूपः, पटुदेश्यरूपः । दर्शनीयकल्पा, दर्शनीयदेश्या । अत्र 'मानिक्यङ्कचत्तस्त्रतरतम···' [३/२/४६] इत्यादिना पुंवद्भावः ।

८. नाम्नः प्राग्बहुर्वा ।

ईषदसमाप्तेऽर्थे वर्तमानान्नाम्नः बहुप्रत्ययो वा भवति स च नाम्नः प्रागेव न तु परतः । ईषदसमाप्तः पटुः— बहुपटुः । बहुमृदुः, बहुभुक्तं, बहुपीतं, बहुगुडो द्राक्षा, बहुतैलं प्रसन्ना, बहुपयो यवागूः, बहुचन्द्रो मुखम् । नामग्रहणं त्याद्यन्तनिवृत्त्यर्थम् । त्याद्यन्तेषु सावकाशाः कल्पादयो बहुना मा बाधिषतेति वावचनम् । तेन पक्षे तेऽपि भवन्ति ।

९. न तमादिः कपोऽच्छिन्नादिभ्यः ।

छिन्नादीन् वर्जयित्वा अन्यस्माद् यः कप् प्रत्ययस्तदन्तात् तमादिः प्रत्ययो न भवति । अयमेषां प्रकृष्टः पटुकः । अयमनयोः प्रकृष्टः पटुकः । प्रकर्षादिमतः कुत्सितत्वादिविवक्षायां तमाद्यन्तेभ्यः कप् भवत्येव । अयमेषामतिशयेन पटुः कुत्सितः— पटुतमकः । अयमनयोः पटुतरकः । पटुरूपकः, पटुकल्पकः, पटुदेश्यकः, पटुदेशीयकः । कप इति किम् ? कुटीरतमः । चकारः किम् ? लोहितकतमो मणिः । लोहितकतममक्षि कोपेन । अच्छिन्नादिभ्य इति किम् ? कुत्सितोऽल्पोऽज्ञातो वा छिन्नः— छिन्नकः । अयमेषामतिशयेन छिन्नकः— छिन्नकतमः । छिन्नकतरः, छिन्नकरूपः, छिन्नककल्पः । छिन्नादयः प्रयोगगम्याः ।

१०. अनत्यन्ते ।

अनत्यन्तेऽर्थे यः कप् तदन्तात् तमादिर्न भवति । छिन्नाद्यर्थं वचनम् । अनत्यन्तं छिन्नं— छिन्नकम् । अनत्यन्तं भिन्नं— भिन्नकम् । इदमेषां प्रकृष्टं छिन्नकम् । प्रकृष्टं भिन्नकम् । इदमनयोः प्रकृष्टं छिन्नकम् । प्रकृष्टं भिन्नकम् । यदा तु प्रकर्षवतोऽनत्यन्तविशिष्टविवक्षा तदा तमाद्यन्तात् 'क्तात् तमादेश्चाऽनत्यन्ते' [८/२/७०] इति कप् भवत्येव । छिन्नतमक,

---

१. मदिरा ।

छिन्नतरकम् । भिन्नतमकं, भिन्नतरकम् ।

११. पाशः क्षेपे ।

क्षेपो निन्दा । क्षेपेऽर्थे वर्तमानान्नाम्न स्वार्थे पाश प्रत्ययो भवति । कुत्सितो वैयाकरण —**वैयाकरणपाशः** । छान्दसपाश , याज्ञिकपाशः । क्षेपे इति किम् ? साधुर्वैयाकरण । प्रत्यासत्ते शब्दप्रवृत्तिनिमित्तकुत्सायामिष्यते । तेनेह न भवति—**वैयाकरणश्चौर** । न ह्यत्र चौर्येण वैयाकरणत्व कुत्स्यते कि तर्हि शीलमिति । कुत्सिता कुमारी—कुमारपाशा । किशोरपाशा । अत्र **'मानिक्यङ्कब्तस्त्रतरतम**···' [३/२/४६] इत्यादिना पुवद्भाव । अथेह वयोवचनत्वात् पुनरीप् कस्मान्न भवति ? उच्यते —कुमारादयो वयोवचना, न कुमारपाशादय । निन्दावचना हि ते इति न भवति[1] ।

१२. बह्वल्पार्थात् कारकादिष्टानिष्टे शस् ।

बह्वर्थादल्पार्थाच्च कारकाभिधायिनो नाम्न शस् प्रत्ययो भवति यथासख्यमिष्टेऽनिष्टे च विषये । इष्टं प्राशित्रादि । अनिष्ट श्राद्धादि । ग्रामे बहवो ददति— बहुशो ददति । बहु धन ददाति—बहुशो धन ददाति । विवाहे बहून् कार्षापणान् ददाति— बहुश. कार्षापणान् ददाति । विवाहे बहुभिर्भुक्तमतिथिभि बहुशो भुक्तमतिथिभि । बहुभ्योऽतिथिभ्यो ददाति—*बहुशोऽतिथिभ्यो* ददाति । *बहुभ्यो ग्रामेभ्य आगच्छति* - *बहुशो ग्रामेभ्य आगच्छति* । बहुषु ग्रामेषु वसति—बहुशो ग्रामेषु वसति । एवं भूरिश , प्रभूतश , गणश । अल्पार्थ—अल्प आगच्छति अल्पश आगच्छति । अल्प धन ददाति—अल्पशो धन ददाति । श्राद्धे अल्पैर्भुक्त - अल्पशो भुक्तम् । अल्पेभ्यो ददाति - अल्पशो ददाति । अल्पेभ्य आगत - अल्पश आगतम् । अल्पेषु वसति—अल्पशो वसति । एव स्तोकश , कतिपयश । बह्वल्पार्थादिति किम् ? गा ददाति । अश्व ददाति । कारकादिति किम् ? बहूना स्वामी । इष्टानिष्टे इति किम् ? बहु ददाति श्राद्धे । अल्प ददाति प्राशित्रादौ ।

१३. संख्यैकार्थाद् वीप्सायाम् ।

सख्यावाचिन एकत्वविशिष्टार्थवाचिनश्च कारकाभिधायिनो नाम्नो वीप्साया गम्यायां शस् प्रत्ययो भवति । वीप्साया द्विर्वचनस्य प्राप्तौ तदपवादोऽयम् । वाधिकारात् पक्षे द्विर्वचनमपि भवति । एकैक ददाति —एकशो ददाति । द्वौ द्वौ द्विश. । एव त्रिश , तावच्छ , कतिश , गणश । एकैकेन दीयते—एकशो दीयते । द्वाभ्या द्वाभ्या द्विश. । त्रिश , तावच्छ , कतिश , गणश । एकार्थ—माष माष देहि माषशो देहि । कार्षापणश , पणश., पादशः, पलशः, प्रस्थश., अर्धश , पर्वश , तिलश , संघश., पूगश , वृन्दश., पङ्क्तिश , वनश. प्रविशति, कूपीश. खनति, कुम्भीश. कलशीशो ददाति । क्रमश इति क्रमवतां भेदात् क्रमेण क्रमेणेति वीप्सा भवति । संख्यैकार्थादिति किम् ? माषौ माषौ ददाति । वीप्सायामिति किम् ? द्वौ ददाति । माष ददाति । कारकादिति किम् ? द्वयोर्द्वयो स्वामी । माषस्य माषस्येष्टे ।

१४. संख्यादेः पादादिभ्यो दानदण्डे चाऽकल् लोपश्च ।

सख्याया प्रकृत्याद्यवयवात् परे ये पादादय शब्दास्तदन्तान्नाम्नो दाने दण्डे चकाराद् वीप्साया च विषये अकल् प्रत्ययो भवति तत्सनियोगे च प्रकृतेरन्त्यस्य लोपो भवति । द्वौ द्वौ पादौ ददाति—द्विपदिकां ददाति । त्रिपदिकां ददाति । द्वे शते व्यवसृजति—द्विशतिका व्यवसृजति । द्विमोदकिका, त्रिमोदकिकां त्यजति । दण्डे—द्वौ पादौ दण्डितः—द्विपदिकां दण्डित. । एवं त्रिपदिकाम् । द्विशतिकां, त्रिशतिकाम् । द्विमोदकिकां, त्रिमोदकिकाम् । वीप्सायां—द्वौ द्वौ पादौ भुङ्क्ते द्विपदिका भुङ्क्ते । त्रिपदिकाम् । द्विशतिका, त्रिशतिकाम् । द्विमोदकिका, त्रिमोदकिकाम् । सख्यादेरिति किम् ? पादं ददाति । पाद दण्डित । पाद पाद भुङ्क्ते । पादादिभ्य इति किम् ? द्वौ द्वौ माषौ ददाति । दानदण्डे चेति किम् ? द्वौ पादौ भुङ्क्ते । चकारो वीप्साया अनुकर्षणार्थ । लकार स्त्रीत्वार्थ । लोपवचनमनिमित्तलोपार्थम्[2] । तेन पाद पद्भावो भवति । परनिमित्ते

---

1. ननु पाशप्रत्ययस्य स्वार्थे उत्पन्नत्वात् कुमारपाशादयोपि वयोवचना इति प्राप्नोति । सत्यम् । यत्र केवलवयोवाचित्वं तत्रैव ईप् गौण-मुख्ययोर्गति न्यायात् । कुमारपाशादयस्तु निन्दाविशिष्टवयोवाचिन इति ।

2. ननु अकल्प्रत्यये **'इवर्णाऽवर्णस्य'** [८/४/७१] इति प्रकृत्यन्तस्य लोपो भविष्यति, किमर्थं लोपवचनमित्याशङ्का ।

तु लोपे स्थानिवद्भावान्न स्यात् । पादादय. प्रयोगतोऽनुसर्तव्याः ।

१५. प्रकृते मयट् ।

प्राचुर्येण प्राधान्येन वा कृत प्रकृतम् । प्रकृतेऽर्थे वर्तमानान्नाम्न स्वार्थे मयट् प्रत्ययो भवति । अन्नं प्रकृत—अन्नमयम्[1] । घृतमय, दधिमयम् । टकार ईबर्थ. । यवागूमयी । अतिवर्तन्तेऽपि[2] स्वार्थिका. प्रकृतिलिङ्गवचनानीति यवागूः प्रकृता—यवागूमयम् । एवमुत्तरत्रापि । अपूपाः प्रकृताः—आपूपिक, अपूपमयम् । शष्कुल्यः प्रकृताः—शाष्कुलिक, शष्कुलीमयम् । प्रकृत इति किम् ? अन्न, घृतम् ।

१६. अस्मिन् ।

प्रकृतेऽर्थे वर्तमानान्नाम्नोऽस्मिन्निति सप्तम्यर्थे मयट् प्रत्ययो भवति । अन्नं प्रकृतमस्मिन्नन्नमयं भोजनम् । अपूपमय पर्व । वटकमयी यात्रा । यवागूमयी इष्टि. ।

१७. तयोः समूहवच्च बहुषु ।

तयो. 'प्रकृते' 'अस्मिन्' इत्येतयोर्विषययोर्बहुषु वर्तमानान्नाम्न. समूहवत् प्रत्ययो भवति चकारान्मयट् च । अपूपाः प्रकृताः—आपूपिक, अपूपमयम् । मौदकिक, मोदकमयम् । शाष्कुलिक, शष्कुलीमयम् । **'कवचिहस्त्यचित्ताच्चेकण्'** [६/२/१५] । धैनुक, धेनुमयम् । **'धेनोरनञः'** [६/३/१६] । अपूपा प्रकृता अस्मिन् आपूपिक. अपूपमयं, पर्व । मौदकिकी, मोदकमयी पूजा । गणिका प्रकृता यस्यां यात्रायां गाणिक्या, गणिकामयी यात्रा । **'गणिकायाः'** [६/३/१८] इति ण्य । अश्वीया, अश्वमयी यात्रा । **'अश्वादीयो वा'** [६/३/२०] ।

१८. अभूततद्भावे कृभ्वस्तिभ्यां कर्मकर्तृभ्यां च्विः ।

भूश्च अस्तिश्च भ्वस्ति, का च भ्वस्ति च कृभ्वस्तिनी, ताभ्या कृभ्वस्तिभ्याम् । द्विवचनं कर्मकर्तृभ्यामिति यथासख्यार्थम् । अभूतस्य विकाररूपेण तदात्मनाभावोऽभूततद्भाव. । अभूततद्भावेऽर्थे वर्तमानाभ्या कर्मकर्तृभ्यां कृभ्वस्तिभ्यां योगे च्वि प्रत्ययो भवति । शुक्लीकरोति पटम् । प्रागशुक्ल शुक्ल करोतीत्यर्थ । शुक्लीक्रियते पट । प्रागशुक्ल शुक्ल. क्रियते इत्यर्थ । शुक्लीकरण पट. । शुक्लीभवति पट । प्रागशुक्ल पट इदानी शुक्लो भवतीत्यर्थ । शुक्लीभवनम् । शुक्लीस्यात् पट । प्रागशुक्ल पट. इदानी शुक्ल स्यादित्यर्थं । एव कारकीकरोति चैत्रम् । कारकीभवति, कारकीस्यात् चैत्र । दण्डीकरोति. दण्डीभवति, दण्डीस्यात् । घटीकरोति मृदम् । घटीभवति, घटीस्यान्मृत् । पटीकरोति तन्तून् । पटीभवन्ति, पटीस्युस्तन्तव । भस्मीकरोति काष्ठम् । भस्मीभवति, भस्मीस्यात् काष्ठम् । **'ईश्च्वाववर्णस्याऽनव्ययस्य'** [४/१/६०] इति ईकारः । कृभ्वस्तिभ्यामिति किम् ? अशुक्ल शुक्ल संपादयति । अशुक्ल शुक्ल सपद्यते । कर्मकर्तृभ्यामिति किम् ? प्रागदेवकुले इदानीं देवकुले करोति । प्रागदेवकुले इदानीं देवकुले भवति । कथ समीपीभवति,[3] दूरीभवति, अभ्यासीभवति ? अत्रापि उपचारात्[4] तत्स्थे द्रव्ये वर्तमानाना समीपादीना कर्तृत्वम् । अभूततद्भावे इति किम् ? शुक्लं करोति । शुक्लो भवति । शुक्ल. स्यात् ।

---

१. अन्नं प्रचुरं प्रधान वेत्यर्थः ।

२. इहान्नमयमित्यादिषु युक्तमन्नादेर्नपुसकत्वात् प्रत्ययस्यापि तत्रैव वृत्तिरिति । यवागूमयीत्यपि युक्तमेव प्रकृत्यर्थस्य स्त्रीत्वात् प्रत्ययस्य स्वार्थिकस्य तत्रैव स्त्रियां वृत्ते , यवागूमयमिति त्वयुक्त यवाग्वर्थस्य स्त्रीत्वात् स्वार्थिकस्य प्रत्ययस्यापि तत्रैव वृत्तेर्नपुसकत्वायोगाद् इत्याशङ्का ।

३. नन्वत्राभूततद्भावो नास्ति प्रकृतिविकाराभावात् । न ह्यसमीप समीपं भवति किं तर्हि असमीपस्थं समीपस्थ भवतीति समीपादिभ्यः च्विः प्रत्ययो वक्तव्य इत्याशङ्क्याह ।

४. समीपशब्दः समीपस्थे वस्तुनि वर्तते इत्यर्थः ।

१९. अरुर्मनश्चक्षुश्चेतोरहोरजसामन्तेऽपि लोपश्च्वौ ।

अरुस्, मनस्, चक्षुस्, चेतस्, रहस्, रजस्—इत्येतेषां केवलानामन्ते वर्तमानानां च च्वौ परे अन्तस्य लोपो भवति। अनरु अरु करोति—अरूकरोति, अरूभवति अरूस्यात्। महारूकरोति, महारूभवति, महारूस्यात्। एवं मनीकरोति, मनीभवति, मनीस्यात्। उन्मनीकरोति, उन्मनीभवति, उन्मनीस्यात्। चक्षूकरोति, चक्षूभवति, चक्षूस्यात्। उच्चक्षूकरोति, उच्चक्षूभवति, उच्चक्षूस्यात्। एवं चेतीकरोति, विचेतीभवति। रहीकरोति, विरहीभवति। रजीकरोति, विरजीभवति। च्वाविति किम्? अरु करोति। अन्तेऽपीति ग्रहणं ग्रहणवता न तदन्तविधिः इत्यस्य व्युदासार्थम्।

२०. इसुसोर्बहुलम् ।

इस्, उस्—इत्येवमन्तस्य च्वौ परे बहुलमन्तस्य लोपो भवति। असर्पि सर्पिः करोति—सर्पीकरोति नवनीतम्। धनूभवति वंशः। न च भवति—सर्पिर्भवति, धनुर्भवति। बहुलग्रहणं प्रयोगानुसरणार्थम्।

२१. ह्रसस्येक् ।

ह्रसान्तस्य च्वौ परे बहुलमीगागमो भवति। दृषदीभवति शिला। समिधीभवति काष्ठम्। न च भवति—दृषद् भवति, समिद् भवति।

२२. कात्स्न्र्ये साद् वा ।

अभूततद्भावे कृभ्वस्तिभ्यां कर्मकर्तृभ्यामिति सर्वमनुवर्तते। कात्स्न्र्यरूपेण गम्यमाने अभूततद्भावेऽर्थे वर्तमानाभ्यां कर्मकर्तृभ्यां कृभ्वस्तिभ्यां योगे सात् प्रत्ययो वा भवति। यदि प्रकृतिः कृत्स्ना विकारतामापद्यते इत्यर्थः। पक्षे च्विः। सर्वं काष्ठं प्रागनग्निमग्निं करोति—अग्निसात् करोति काष्ठम्। अग्निसाद् भवति। अग्निसात् स्यात्। उदकसात् करोति लवणम्। उदकसाद् भवति। उदकसात् स्यात्। पक्षे अग्नीकरोति, उदकीकरोति, अग्नीभवति, उदकीभवतीत्यादि। कात्स्न्र्ये इति किम्? एकदेशेन पटः शुक्लीभवति।

२३. अभिव्याप्तौ संपदा च ।

अभूततद्भावेऽर्थे अभिव्याप्तौ गम्यमानायां संपदा चकारात् कृभ्वस्तिभ्यां च योगे कर्मकर्तृभ्यां सात् प्रत्ययो वा भवति। पक्षे यथाप्राप्तं च्विः। अस्यां सेनायां सर्वं शस्त्रमग्निसात् करोति दैवम्। एवमग्निसाद् भवति। अग्निसात् स्यात्। अग्निसात् संपद्यते। वर्षासु सर्वं लवणमुदकसात् करोति मेघः। उदकसाद् भवति। उदकसात् स्यात्। उदकसात् संपद्यते। पक्षे अग्नीकरोतीत्यादि। यत्रैकदेशेन सर्वा प्रकृतिः कारूपं प्रतिपद्यते सा अभिव्याप्तिः, कात्स्न्र्यं तु सर्वात्मना द्रव्यस्य विकाररूपापत्तौ भवतीति अनयोर्विशेषः। एवं च कात्स्न्र्ये इति सामान्योपादानात् कृभ्वस्तियोगे पूर्वेणैव सात् सिद्धः संपद्यर्थं तु वचनम्। चकार उत्तरत्रोभयोः समुच्चयार्थः।

२४. तत्राऽधीने ।

कर्मकर्तृभ्यामभूततद्भाव इति निवृत्तं अर्थान्तरोपादानात्। कृभ्वस्तिभ्यां संपदा चेत्यनुवर्तते। तत्रेति सप्तम्यन्तात् अधीने आयत्तेऽर्थे कृभ्वस्तिसंपद्भिर्योगे सात् प्रत्ययो भवति। राजन्यधीनं करोति—राजसात् करोति। राजस्वामिकं करोतीत्यर्थः। राजसाद् भवति। राजसात् स्यात्। राजसात् संपद्यते। आचार्यसात् करोति। आचार्यसाद् भवति। आचार्यसात् स्यात्। आचार्यसात् संपद्यते।

२५. देये त्रा च ।

तत्रेति सप्तम्यन्ताद् देयोपाधिकेऽधीनेऽर्थे कृभ्वस्तिसंपद्भिर्योगे त्रा प्रत्ययो भवति। चकारो न सातोऽनुकर्षणार्थः तस्याधीनतामात्रविवक्षायां पूर्वेणैव सिद्धत्वात्, किन्तु कृभ्वस्तिभ्यां संपदा चेत्यस्यानुकर्षणार्थः। तेनोत्तरत्र नानुवर्तते। देवेऽधीनं देयं करोति—देवत्रा करोति द्रव्यम्। देवाय दातव्यमिति यत्स्थापितं तदिदानीं देवाय ददातीत्यर्थः। देवेऽधीनं

देय भवति—देवत्रा भवति। देवत्रा स्यात्। देवत्रा संपद्यते। एवं गुरुत्रा करोति। गुरुत्रा भवति। गुरुत्रा स्यात्। गुरुत्रा सपद्यते। देय इति किम्? राजसाद् भवति राष्ट्रम्।

२६. सप्तमीद्वितीयाद्देवादिभ्यः।

सप्तम्यन्तेभ्यो द्वितीयान्तेभ्यश्च देवादिभ्य. स्वार्थे त्रा प्रत्ययो भवति। देवेषु वसति—देवत्रा वसति। देवेषु भवति—देवत्रा भवति। देवेषु स्यात्—देवत्रा स्यात्। देवान् करोति—देवत्रा करोति। देवान् गच्छति—देवत्रा गच्छति। एव मनुष्यत्रा वसति। मनुष्यत्रा गच्छति। मर्त्यत्रा वसति। मर्त्यत्रा गच्छति। पुरुषत्रा वसति। पुरुषत्रा गच्छति। पुरुत्रा वसति। पुरुत्रा गच्छति। बहुत्रा वसति। बहुत्रा गच्छति। देवादय. शिष्टप्रयोगगम्या।

२७. तीय-शम्ब-बीजात् कृञा कृषौ डाच्।

तीयप्रत्ययान्तात्[1] शम्ब, बीज—इत्येताभ्या च करोतिना योगे कृषिविषये डाच् प्रत्ययो भवति। द्वितीय वार करोति क्षेत्र—द्वितीयाकरोति क्षेत्रम्। द्वितीय वार कृषतीत्यर्थ.। एव तृतीयाकरोति क्षेत्रम्। शम्बाकरोति क्षेत्रम्। अनुलोमकृष्ट पुनस्तिर्यक् कृषतीत्यर्थ.। बीजाकरोति क्षेत्रम्। उप्ते पश्चाद् बीजे सह कृषतीत्यर्थ। कृञा इति किम्? द्वितीय वार कृषति। कृषाविति किम्? द्वितीय पट करोति। चकारो **'डाचि पूर्वस्य'** [८/२/४१] इत्यत्र विशेषणार्थ.।

२८. संख्यायेर्गुणात्।

सख्याया आद्यवयवात् परो यो गुणशब्दस्तदन्तात् कृञा योगे कृषिविषये डाच् प्रत्ययो भवति। द्विगुण कर्षण करोति क्षेत्रस्य—द्विगुणाकरोति क्षेत्रम्। त्रिगुणाकरोति क्षेत्रम्। क्षेत्रस्य द्विगुण त्रिगुण च विलेखन करोतीत्यर्थ। कृषाविति किम्? द्विगुणा रज्जु करोति।

२९. समयाद्यापने।

यापन कालक्षेपः। समयशब्दात् यापने गम्यमाने कृञा योगे डाच् प्रत्ययो भवति। समयाकरोति तन्तुवाय.। अद्य श्वस्ते पट दास्यामीति कालक्षेप करोतीत्यर्थ.। यापन इति किम्? समय करोति।

३०. सपत्रनिष्पत्रादतिव्यथने।

सपत्र, निष्पत्र - इत्येताभ्या कृञा योगेऽतिव्यथने गम्यमाने डाच् प्रत्ययो भवति। अतिव्यथनमतिपीडनम्। सपत्राकरोति मृगम्। पत्र शर., सह पत्रमनेनेति सपत्र, त करोति— शरमस्य शरीरे प्रवेशयतीत्यर्थ.। निष्पत्राकरोति। निर्गत पत्रमस्मादिति निष्पत्र, त करोति—शरमस्यापरपार्श्वेन निष्क्रामयतीत्यर्थ। सपत्राकरोति वृक्ष वायु.। निष्पत्राकरोति वृक्ष वायुः। अत्र पत्रशातनमेव अतिव्यथनम्। सपत्राकरोतीत्यपि मङ्गलाभिप्रायेण वृक्षस्य निष्पत्राकरणमेवोच्यते। यथा दीपो नन्दतीति विध्वस। अतिव्यथन इति किम्? सपत्र करोति वृक्ष जलसेक.। निष्पत्र करोति वृक्षतल भूमिशोधकः।

३१. निष्कुलान्निष्कोषणे।

निष्कुलशब्दान्निष्कोषणेऽर्थे कृञा योगे डाच् प्रत्ययो भवति। निष्क्रुष्ट कुलमवयवसघातोऽस्मादिति निष्कुलम्। अन्तरवयवानां बहिर्निष्कासन निष्कोषणम्। निष्कुल करोति—निष्कुलाकरोति दाडिमम्। निष्कुष्णातीत्यर्थः। एव निष्कुलाकरोति पशु चण्डाल.। निष्कोषण इति किम्। निष्कुल करोति शत्रुम्।

---

१. **'द्वेस्तीयः'** [७/४/५५] इत्यादिविहितत्वात् यस्तु मुखतीय इत्यादौ तीयस्तदन्ताद् अनर्थकत्वान्न भवति।

३२. प्रियसुखादानुकूल्ये ।

प्रिय, सुख—इत्येताभ्या कृना योगे आनुकूल्ये गम्ये डाच् प्रत्ययो भवति। प्रियाकरोति गुरुम्। सुखाकरोति गुरुम्। गुरोरानुकूल्य करोति। तमाराधयतीत्यर्थः। आनुकूल्य इति किम् ? प्रिय करोति सामवचनम्[१]। सुख करोत्यौषधपानम्।

३३. दुःखात् प्रातिकूल्ये ।

दुःखशब्दात् प्रातिकूल्ये गम्ये कृना योगे डाच् प्रत्ययो भवति। दुःखाकरोति शत्रुम्। शत्रो प्रातिकूल्य करोति। प्रतिकूलमाचरति। अनभिमतानुष्ठानेन त पीडयतीत्यर्थः। प्रातिकूल्य इति किम् ? दुःख करोति रोग।

३४. शूलात् पाके ।

शूलशब्दात् पाके गम्यमाने कृना योगे डाच् प्रत्ययो भवति। शूलाकरोति मासम्। शूले पचतीत्यर्थः। पाक इति किम् ? शूलं करोति कदन्नम्।

३५. सत्यादशपथे ।

सत्यशब्दात् शपथादन्यत्र वर्तमानात् कृना योगे डाच् प्रत्ययो भवति। सत्याकरोति वणिग् भाण्डम्। कार्षापणादिदानेन मयाऽवश्यमेवैतत् क्रेतव्यमिति विक्रेतार प्रत्याययति। अशपथ इति किम् ? सत्य करोति। यदीदमेव न स्यात् इद मे इष्ट मा भूत् अनिष्टं वा भवत्विति शपथ करोतीत्यर्थः।

३६. मद्रभद्राद् वपने ।

मद्र, भद्र—इत्येताभ्या वपने—मुण्डने गम्यमाने कृना योगे डाच् प्रत्ययो भवति। मद्र वपन करोति—मद्राकरोति। भद्राकरोति नापित। शिशोर्माङ्गल्य केशच्छेदन करोतीत्यर्थः। मद्रभद्रशब्दौ माङ्गल्यवचनौ। वपन इति किम् ? मद्र करोति। भद्र करोति साधु।

३७. अव्यक्तानुकरणादऽनेकस्वरात् कृभ्वस्तिनाऽनितौ द्विश्च ।

यस्मिन् ध्वनावकारादयो वर्णा विशेषरूपेण नाभिव्यज्यन्ते सोऽव्यक्त, तस्यानुकरणमव्यक्तानुकरणम्। तस्मादऽनेकस्वरादनितिपरात् कृ भू, अस्ति इत्येतैर्धातुभिर्योगे डाच् प्रत्ययो भवति द्विश्चास्य प्रकृतिरुच्यते। प्रत्ययस्य द्विर्वचनानर्थक्यात्[२]। पटत् करोति—पटपटाकरोति। पटपटाभवति, पटपटास्यात्। दमत् करोति—दमदमाकरोति। दमदमाभवति, दमदमास्यात्। एव मसत् करोति—मसमसाकरोति। खरटत् करोति—खरटखरटाकरोति। अव्यक्तवर्णस्याऽपि[३] कथंचिद् ध्वनिमात्रसादृश्यात् व्यक्तवर्णमनुकरण भवति। अव्यक्तानुकरणादिति किम् ? दृषत्करोति। अत्र व्यक्तवर्णमनुकरणम्। अनेकस्वरादिति किम् ? श्रत्करोति, खाट् करोति। कृभ्वस्तिनेति किम् ? पटज्जायते। अनिताविति किम् ? पटिति करोति[४]।

३८. इतावतो लोपः ।

अव्यक्तानुकरणस्याऽनेकस्वरस्य योऽत् इत्यय शब्दस्तस्य इतिशब्दे परे लोपो भवति। पटत् इति पटिति।

---

१. आनुकूल्य हि चेतनधर्मः। तदत्र नास्ति। एवमुत्तरेऽपि।

२. यदि प्रत्ययस्य द्विरुक्तिः क्रियते तथापि **'समानानां सवर्णे…'** [१/२/१२] इत्यादिना दीर्घत्वे एकस्यैव श्रुतिर्भवति।

३. अथ पटदित्यादि व्यक्तवर्णमव्यक्तवर्णस्य कथमनुकरणमनुकरणस्यानुकार्यसदृशत्वादन्यथातिप्रसङ्गः स्यादित्याह—कथंचिदिति।

४. न च परत्वात् **'इतावतो लोपः'** [८/२/३८] इति लोपेन भाव्यमिति वाच्यम्। कृभ्वस्तीनामभावे तस्य चरितार्थत्वात्।

झटत् इति झटिति । एव छमत् छमिति । घटत् घटिति । असिद्धं बहिरङ्गमन्तरङ्गे इति लोपे सति जबत्वं न भवति । अव्यक्तानुकरणस्येति किम् ? जगदिति । अनेकस्वरस्येति किम् ? छत् इति छदिति । स्रत् इति स्रदिति । अत इति किम् ? मरुत् इति मरुदिति । शरद् इति शरदिति । इताविति किम् ? पटदत्र । कथ घटदिति गम्भीरमम्बुदैर्नदित, चकदिति तडितापि कृतमिति ? दकारान्तावेतौ द्रष्टव्यौ ।

३९. न द्वित्वे ।

अव्यक्तानुकरणस्याऽनेकस्वरस्य द्वित्वे द्विर्वचने कृते इतिशब्दे परे योऽत् शब्दस्तस्य लोपो न भवति । पटत्पटदिति । घटन्घटदिति । झटत्झटदिति । वीप्सायां द्विर्वचनम् । द्वित्वे इति किम् ? पटिति । कथ चटच्चटिति, घगद्घगिति, पटत्पटिति ? नात्र द्वित्वं अपि तु समुदायानुकरणमिति भवति ।

४०. तो वा ।

द्वित्वे सति अव्यक्तानुकरणस्याऽनेकस्वरस्य योऽच्छब्दस्तस्य सबन्धिनस्तकारस्य इतौ परे वा लोपो भवति । पटत्पटेति करोति, पटत्पटदिति करोति । घटत्घटेति करोति, घटत्घटदिति करोति ।

४१. डाचि पूर्वस्य ।

अव्यक्तानुकरणस्याऽनेकस्वरस्य अच्छब्दान्तस्य द्वित्वे सति पूर्वस्याऽतस्तकारस्य डाचि प्रत्यये परे लोपो भवति । पटपटा करोति, दमदमा करोति । पूर्वस्येति किम् ? पतपता करोति । डाच टिलोपे मूलप्रकृतेस्तकारस्य लोपो न भवति ।

४२. प्राग् यावात् कच् ।

यावशब्दसकीर्तनात् प्राग् येऽर्थास्तेषु योऽत्येषु कच् प्रत्ययोऽधिकृतो वेदितव्यः । कुत्सितोऽल्पोऽज्ञातो वा अश्वः— अश्वक । गर्दभक । चकारो 'मानिक्यङ्कुचतस्त्र···' [३/२/४६] इत्यत्र विशेषणार्थः । कुत्सिता दरद्— दारदिका । अत्र दरदा राज्ञी 'ह्रस्वरमगध···' [६/२/१२५] इत्यादिनाऽण् । 'अत्रणोरप्राच्य' [६/२/१३३] इति लुक् । ततोऽनेन कचि 'मानिक्यङ्कुच् ··' [३/२/४६] इत्यनेन अणुलोपनिवृत्तिरूपे पुवद्भावे 'आबतः स्त्रियां' [२/३/१] इत्याप् । 'अत इवनित्काप्य···' [२/३/६५] इति इत्वम् ।

४३. त्यादिसर्वादेरऽक् प्राक् टः ।

त्याद्यन्तस्य सर्वादीना च टे. प्राक् अक् प्रत्ययो भवति प्राग् यावीयेष्वर्थेषु । कचोऽपवादः । कुत्सितमल्पमज्ञातं वा पचति—पचतकि । पचतक, पचन्तकि । सर्वादि- सर्वके, विश्वके । सर्वकस्मै, विश्वकस्मै । यकत्पिता[1], तकत्पिता । त्वकत्पिता, मकत्पिता । तदन्तस्यापि सर्वादित्वमस्तीत्यत्राप्यक् । परमसर्वके, परमविश्वके । टेरिति किम् ? त्याद्यन्तात् सर्वादेश्च प्राग् मा भूत् । प्रागिति किम् ? परो मा भूत् ।

४४. युष्मदस्मदोरऽनोत्सभादेः स्यादेः ।

युष्मदस्मदोः परस्य ओकारादिसकारादिभकारादिवर्जितस्य स्यादेष्टेः प्राक् अक् प्रत्ययो भवति प्राग्यावीयेष्वर्थेषु । पूर्वेण शब्दटे. प्रागक् प्राप्तः, अनेन स्यादेष्टे प्रागक् विधीयते । त्वयका, मयका । त्वयकि, मयकि । युष्माकक, अस्माककम् । परमत्वयका, परममयका । युष्मदस्मदोरिति किम् ? तकया, यकया, सर्वकेण, विश्वकेन, इमकेन, अमुकेन, इमकैः, अमुकैः, भवकन्तौ, भवकन्तः । केचिद् भवतोऽपीच्छन्ति, तन्मते भवतका, भवतके, भवतकः, भवतकीत्यपि भवति । अनोत्सभादेरिति किम् ? युवकयोः, आवकयो. । युष्मकासु, अस्मकासु । युवकाभ्यां, आवकाभ्याम् ।

---

१. यकत्पितेत्यादिषु बहुव्रीहिवर्जं समास. कार्यं । बहुव्रीहौ तु 'शेषाद्विभाषा' [८/३/१०६] इति कप् स्यात् ।

४५. अव्ययस्य को दश्च ।

अव्ययस्य टे: प्रागक् प्रत्ययो भवति प्राग् यावीयेष्वर्थेषु, तत्सन्नियोगे यत्ककारान्तमव्ययं तस्य दकारोऽन्तादेशो भवति । कचोऽपवादः । कुत्सितमल्पमज्ञातं वा उच्चैः—उच्चकैः । नीचैस् नीचकैः । धिक् धकित् । हिरुक् हिरकुद् । पृथक् पृथकद् । चकारोऽन्वाचये, तेन सर्वस्याऽव्ययस्याक् भवति । ककारान्तस्य तु अक् दान्तादेशश्च । योगविभागस्त्यादे-र्दादेशाऽभावार्थः । शक्लृत् शक्तौ—यङ्लुक् दिप्—अशाशक् । अकि—अशाशकक् ।

४६. तूष्णीकाम् ।

तूष्णीकामिति तूष्णीमो मकारात् प्राक् का इत्यागमो निपात्यते प्राग् यावीयेष्वर्थेषु । अकोऽपवादः । कुत्सितमल्पमज्ञातं वा तूष्णीं—तूष्णीकामास्ते । तूष्णीका तिष्ठति ।

४७. कुत्सिताऽल्पाऽज्ञातेषु ।

कुत्सितं निन्दितम् । अल्पं महत्प्रतियोगि । अज्ञातं प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित् स्वत्वादिना धर्मेणा-ऽनिश्चितम् । सर्वथा त्वज्ञाते प्रयोगायोगात् । कुत्सिताल्पाज्ञातोपाधिकेऽर्थे वर्तमानाद् यथायोगं कजादयः प्रत्यया भवन्ति । कुत्सितोऽल्पोऽज्ञातो वाश्वः— अश्वकः । गर्दभकः, घृतकं, तैलकम् । पचतकि, भिन्धकि । सर्वकैः, विश्वकैः । उच्चकैः, नीचकैः, तूष्णीकाम् । कथं कुत्सितकः, अल्पकः, अज्ञातकः ? कुत्सादीनां भेदोपपत्तेः कुत्सितादिभ्योऽपि कुत्सितादौ प्रत्ययो भवति, प्रकृष्टतरः इत्यादौ प्रकर्षभेदे तरादिवत् । राधकः, पूर्णकः, शूद्रकः इत्यादौ सत्यामपि संज्ञायां कुत्सायोगात्[2] कुत्सित एव कच् । व्याकरणकेन नाम त्वं गर्वितः, याज्ञिक्यकेन नाम त्वं विकत्थसे इत्यादौ अवक्षेपणमपि[3] कुत्सितमेव । न ह्यकुत्सितं-नाऽवक्षिप्यते ।

४८. अनुकम्पातद्युक्तनीत्योः ।

अनुकम्पा कारुण्येन परस्यानुग्रहः, तया अनुकम्पया युक्ता नीतिस्तद्युक्तनीतिः । नीतिः सामादिप्रयोगः । तत्रानुकम्पायां सामदाने एव न भेददण्डौ तयोः अनुकम्पाया अयोगात् । अनुकम्पायां तद्युक्तायां नीतौ च गम्यमानायां यथायोगं कजादयः प्रत्यया भवन्ति । अनुकम्पा तन्नीतिश्च प्रयोक्तृधर्मौ वेदितव्यौ । पुत्रकः, वत्सकः, बालकः, बुभुक्षितकः, ज्वरितकः, शनकैः, तूष्णीका, स्वपितकि, स्वपिषकि, जल्पतकि, एहकि । अनुकम्पमान एवं प्रयुङ्क्ते—पुत्रक ! एहकि, उत्सङ्गके उपविश, कर्दमकेनासि दिग्धकः, कण्टकस्ते लग्नकः । वत्सक ! तूष्णीकां तिष्ठ, ओदनं भोक्ष्यसे, हन्त ! ते गुडका[4], हन्त ! ते धानका[5] अद्धकि । अत्रोपविश, असि, तिष्ठ, ओदनं भोक्ष्यसे, हन्त ते इत्येतेषु अनभिधानान्न भवति । यत्र त्वभिधानं तत्र भवत्येव—नकं त्वकं पुत्रकं पश्यसकि । असका काकको वृक्षके उच्चकैः प्रणिलीयते । अनुकम्पायाः प्रत्यासत्तेरनुकम्पमानादेव स्यात् नान्यस्मात् उत्सङ्गादेस्ततोऽपि यथा स्यादिति तद्युक्तनीतिग्रहणम् ।

४९. अजातेर्मनुष्यनाम्नो बहुस्वराद् वेयेकेलाः ।

तद्युक्तनीताविति[6] नानुवर्तते अनुकम्प्यादेव प्रत्ययविधानात् । मनुष्यनामधेयाद् बहुस्वरादनुकम्पायां गम्यमानायां

---

१ कुत्सितादेः प्रकृत्यैव गतार्थत्वात् प्रत्ययस्यार्थाभावान्न तदर्थद्योती प्रत्ययोऽत्र युक्त इत्याशङ्का ।

२. तेनान्यैरिव संज्ञायां कच् न विधातव्यः यथा—

> **अज्ञाते कुत्सिते चैव, संज्ञायामनुकम्पने ।**
> **तद्युक्तनीतावप्यल्पे, वाच्ये ह्रस्वे च कः स्मृतः ॥**

३. व्याकरणं कुत्सनं वैयाकरणस्तु कुत्सितः इति व्याकरणात् कथं प्रत्यय इत्याशङ्का ।

४. गुडेन मिश्रा धाना इति विग्रहे **'तयोर्लोपो वा'** [३/२/११८] इति धानाशब्दस्य लोपे अनेन कच् ।

५. अत्र गुडशब्दलोपे कच् ।

६. मनुष्यनाम्न इत्युक्ते । मनुष्यनाम्नो हि अनुकम्पैव घटते न तद्युक्तनीतिः ।

इय, इक, इल—इत्येते प्रत्यया वा भवन्ति न चेन्मनुष्यनाम जातिशब्दो भवति। अनुकम्पितो देवदत्तः—देवियः[1], देविकः, देविल.। वावचनात् कजपि—देवदत्तकः। जिनियः, जिनिकः, जिनिलः, जिनदत्तकः। अजातेरिति किम् ? महिषकः, वराहकः, शरभकः, सूकरकः, गर्दभकः। एते जातिशब्दा मनुष्यनामानि च। अजातेरिति प्रायिको निषेधः। व्याघ्रिलः, सिंहिलः इति हि दृश्यते। बहुस्वरादित्यपि प्रायिकम्। मनुष्यनाम्न इति किम् ? सुसीमकः, सीमा स्फटा। मनुष्यग्रहणं किम् ? अनुकम्पितो देवदत्तो[2] हस्ती—देवदत्तक। नामग्रहणं किम् ? मद्रबाहुकः। विशेषणमेतन्न नाम। बहुस्वरादिति किम् ? रामकः, गुप्तक.।

५०. उपादेरऽडाको च।

उपपूर्वादजातिरूपान्मनुष्यनामधेयाद् बहुस्वरादनुकम्पायां गम्यमानायां अड, अक चकारात् इय, इक, इल—इत्येते प्रत्यया वा भवन्ति। अनुकम्पित उपेन्द्रदत्त—उपड, उपकः, उपियः, उपिकः, उपिल। वावचनात् पक्षे कच्। उपेन्द्रदत्तकः।

५१. वृवर्णात् स्वरादेरादेर्लोपः प्रकृत्या च।

उश्च ऋश्च वृ, तस्माद् उवर्णान्तात् ऋवर्णान्ताच्च परस्यानुकम्पायां विहितस्य स्वरादे प्रत्ययस्य आदेर्लोपो भवति तच्च उवर्णऋवर्णान्तं लोपे सति प्रकृत्या तिष्ठति। न विकारमापद्यते इत्यर्थः। अनुकम्पितो वायुदत्तः—वायुय, वायुकः, वायुल। एवं भानुय, भानुकः, भानुल। अनुकम्पितो मातृदत्त—मातृय, मातृक, मातृल.। एवं पितृयः, पितृक, पितृल। प्रकृतिवद्भावात् अव्रेफादेशौ[3] न भवत। वृवर्णादिति किम् ? अनुकम्पितो देवदत्त—देवियः, देविक., देविलः। अनुकम्पितो वाग्राशी—वाचियः, वाचिकः, वाचिल.। स्वरादेरिति किम् ? मद्रबाहुक। आदेरिति किम् ? सर्वस्य मा भूत्।

५२. उत्तरपदस्य लोपे कन् कज्वच्च।

मनुष्यनाम्नो यदुत्तरपदं तस्य **'तयोर्लोपो वा'** [३/२/११८] इति लोपे सति तत कन् प्रत्ययो भवति स च कच्प्रत्ययवच्चाऽनुकम्पायां गम्यमानायाम्। कजादीनामपवादः। देवदत्तो देवः। अत्र **'तयोर्लोपो वा'** [३/२/११८] इत्युत्तरपदलोप। अनुकम्पितो देव—देवक। अनुकम्पितो यज्ञ—यज्ञक। कज्वत्करण पुंवद्भावार्थम्। अनुकम्पिता देवी—देवका। नकार **'अत इदनित्काप्ययसव्…'** [२/३/६५] इत्यत्र विशेषणार्थ.। उत्तरपदस्येति किम् ? देवदत्ता दत्ता। अत्र **'तयोर्लोपो वा'** [३/२/११८] इति पूर्वपदस्य लोपः। अनुकम्पिता दत्ता—दत्तिका। पूर्वेण कच्।

५३. लोपश्चाजिनान्तात्।

अजिनशब्दान्तान्मनुष्यनाम्नोऽनुकम्पायां गम्यमानायां कन् प्रत्ययो भवति स च कज्वत्, तत्संनियोगे लोपश्चोत्तरपदस्य। व्याघ्राजिनो व्याघ्रमहाजिनो वा नाम मनुष्य, सोऽनुकम्पितः—व्याघ्रक। एवं सिंहकः, शरभकः, वृककः, कृष्णकः, उलक। अनुकम्पिता व्याघ्राजिना व्याघ्रमहाजिना वा—व्याघ्रकाः। सिंहका। **'आतो नेन्द्रवरुणस्य'** [८/४/२२] इत्यत्र ज्ञापनादकृतसंधेरेवोत्तरपदस्य लोपः।

५४. षड्वर्जैकस्वरपूर्वपदस्य स्वरे।

षट्छब्दवर्जितमेकस्वरं पूर्वपद यस्य तत्संबन्धिन उत्तरपदस्यानुकम्पायां गम्यमानाया विहिते स्वरादौ प्रत्यये

१. **'द्वितीयात् स्वरादूर्ध्वं'** [८/२/५५] इति दत्तस्य लोप। **'तयोर्लोपो वा'** [३/२/११८] इत्यनेन तु लोपे कृते बहुस्वरत्वाऽभावादियादयो न स्युः।

२. कस्यचित् हस्तिनो देवदत्त इति नाम।

३. **'उवर्णस्याऽस्वयंभुवोऽव्'** [८/४/६६] इति **'ऋतो रस्तद्धिते ये'** [१/२/३३] इति च।

लोपो भवति । उत्तरसूत्रस्याऽपवादः । अनुकम्पितो वागाशीः वाग्दत्तः वागाशीर्दत्तो वा—वाचियः, वाचिकः, वाचिलः । एवं त्वचियः, त्वचिकः, त्वचिलः । स्रुचियः, स्रुचिकः, स्रुचिलः । षड्वर्जैकस्वरपूर्वपदस्येति किम् ? उपेन्द्रेण दत्तः उपेन्द्रदत्तः, सोऽनुकम्पितः—उपडः, उपकः, उपियः, उपिकः, उपिलः । उत्तरेण लोपः । षड्वर्जेति किम् ? अनुकम्पितः षडङ्गुलिः—षडियः, षडिकः, षाडलः । अत्रोत्तरेण द्वितीयस्वरादूर्ध्वं लोपः । स्वरे इति किम् ? वागाशीकः, वागाशीर्दत्तकः ।

५५. द्वितीयात् स्वरादूर्ध्वम् ।

अनुकम्पायां विहिते स्वरादौ प्रत्यये परतः प्रकृतेर्द्वितीयात्स्वरादूर्ध्वं शब्दस्वरूपस्य लोपो भवति । अनुकम्पितो देवदत्तः—देवियः, देविकः, देविलः । अनुकम्पितः उपेन्द्रदत्तः—उपडः[1], उपकः, उपियः, उपिकः, उपिलः । अनुकम्पितः पितृदत्तः—पितृयः, पितृकः, पितृलः । एवं वायुयः, वायुकः, वायुलः । ऊर्ध्वग्रहणं सर्वलोपार्थम् ।

५६. संध्यक्षरात्तेन ।

अनुकम्पायां विहिते स्वरादौ प्रत्यये परतः प्रकृतेर्द्वितीयात्संध्यक्षररूपात् स्वरादूर्ध्वं शब्दरूपस्य तेन द्वितीयेन संध्यक्षरेण सह लोपो भवति । अनुकम्पितः कुबेरदत्तः—कुबियः, कुबिकः, कुबिलः । अनुकम्पितः कहोडः—कहियः, कहिकः, कहिलः । अनुकम्पितः कपोतरोमा—कपियः, कपिकः, कपिलः । अनुकम्पितः अमोघः अमोघदत्तः अमोघजिह्वो वा—अमियः, अमिकः, अमिलः । संध्यक्षरादिति किम् ? अनुकम्पितो गुरुदत्तः—गुरुयः, गुरुकः, गुरुलः ।

५७. शेवलाद्यादेस्तृतीयात् ।

शेवलादिपूर्वपदस्य मनुष्यनाम्नोऽनुकम्पायां विहिते स्वरादौ प्रत्यये परे तृतीयात् स्वरादूर्ध्वं लोपो भवति । **'द्वितीयात् स्वरादूर्ध्वं'** [८/२/५५] इत्यस्याऽपवादः । अनुकम्पितः शेवलदत्तः—शेवलियः, शेवलिकः, शेवलिलः । एवं सुपरिदत्तः[2]—सुपरियः, सुपरिकः, सुपरिलः । विशालदत्तः—विशालियः, विशालिकः, विशालिलः । वरुणदत्तः—वरुणियः, वरुणिकः, वरुणिलः । अर्यमदत्तः—अर्यमियः, अर्यमिकः, अर्यमिलः । अत्राप्यकृतसंधेरेव लोपः । शेवलेन्द्रदत्तोऽनुकम्पितः शेवलिकः इति यथा स्यात्, शेवलयिक इति मा भूत् । सुपर्याशीर्दत्तोऽनुकम्पितः सुपरिकः इति यथा स्यात्, सुपर्यिक इति मा भूत् । शेवल, सुपरि, विशाल, वरुण, अर्यमन् इति शेवलादिः । केचित्तु विशाखिल, कुमारिल इत्यत्रापीच्छन्ति ।

५८. क्वचित् तुर्यात् ।

अनुकम्पायां विहिते स्वरादौ प्रत्यये परे क्वचिल्लक्ष्यानुसारेण तुर्याच्चतुर्थात् स्वरादूर्ध्वं लोपो भवति । अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिशर्मा वा—बृहस्पतियः, बृहस्पतिकः, बृहस्पतिलः । एवं प्रजापतियः, प्रजापतिकः, प्रजापतिलः । अकृतसंधेरित्येव पूर्ववत् । प्रजापत्याशीर्दत्तोऽनुकम्पितः प्रजापतिक इति यथा स्यात्, प्रजापत्यिक इति मा भूत् । क्वचिद् ग्रहणादिह न भवति—अनुकम्पितः उपेन्द्रदत्तः—उपडः, उपकः, उपियः, उपिलः ।

५९. पूर्वपदस्य वा ।

अनुकम्पायां विहिते स्वरादौ प्रत्यये परे पूर्वपदस्य लोपो वा भवति । अनुकम्पितो देवदत्तः—दत्तियः,[3] दत्तिकः, दत्तिलः । वावचनाद्यथाप्राप्तम् । देवियः, देविकः, देविलः । **'द्वितीयात् स्वरादूर्ध्वं'** [८/२/५५] इति लोपः ।

६०. ह्रस्वे ।

दीर्घप्रतियोगि[4] ह्रस्वम् । ह्रस्वेऽर्थे वर्तमानाच्छब्दरूपाद्यथायोगं कजादयः प्रत्यया भवन्ति । ह्रस्वः पटः—

---

१. अकृतसंधेरेव लोप इत्युत्तरेणाप्राप्तिः । तृतीयत्वं च पूर्ववन्न भवति ।

२. सुष्ठु पिपर्ति सुपरीति पूर्वं पदं नोपसर्गद्वयम् ।

३. 'तयोर्लोपो वा' [३/२/११८] इति पूर्वं लोपे बहुस्वरत्वाभावादियादिर्न स्यादिति वचनम् ।

४. लोहादिकं ह्रस्वं च महच्च संभवतीति महत्प्रतियोगिनि 'अल्पे' [८/३/८१] इति न सिद्ध्यति ।

पटकः। शाटकः। ह्रस्वं पचति—पचतकि। ह्रस्वकालयोगात् क्रिया ह्रस्वेत्युच्यते। ह्रस्वाः सर्वे—सर्वके। विश्वके, उच्चकैः, नीचकैः, तूष्णीकाम्। संज्ञायामपि ह्रस्वत्वयोगात् कप्, अनेनैव सिद्धः। वंशकः, वेणुकः, नडकः, नरकः, ललकः, वरकः।

६१. कुटीशुण्डाद्रः।

कुटी, शुण्डा—इत्येताभ्यां ह्रस्वेऽर्थे वर्तमानाभ्यां रः प्रत्ययो भवति। कपोऽपवादः। ह्रस्वा कुटी—कुटीरः। शुण्डारः। कुदीर इत्यपि कश्चित्।

६२. शम्या रुरच।

शमीशब्दात् ह्रस्वेऽर्थे वर्तमानात् रुश्चकारात् रश्च प्रत्ययो भवति। ह्रस्वा शमी—शमीरुः, शमीरः।

६३. कुत्वा डुपः।

कुतूशब्दात् ह्रस्वेऽर्थे वर्तमानात् डुपः प्रत्ययो भवति। ह्रस्वा कुतूः—कुतुपः। कुतूरिति चर्ममयं तैलाद्यावपन-मुच्यते।

६४. कासूगोणीभ्यां तरट्।

कासू, गोणी—इत्येताभ्यां ह्रस्वेऽर्थे वर्तमानाभ्यां तरट् प्रत्ययो भवति। ह्रस्वा कासूः—कासूतरी। गोणीतरी। पुंलिङ्गमपि दृश्यते इत्येके। कासूतरः, गोणीतरः। कासूः शक्तिर्नामायुधम्। गोणी धान्यावपनम्। टकार ईबर्थः।

६५. वत्सोक्षाश्वर्षभाद् ह्रासे कज्वच्च।

वत्स, उक्षन्, अश्व, ऋषभ—इत्येतेभ्यः शब्दप्रवृत्तिनिमित्तस्य स्वार्थस्य ह्रासे गम्यमाने तरट् प्रत्ययो भवति स च कज्वत्। ह्रसितो वत्सः—वत्सतरः। वत्सः प्रथमवयस्को गौः, तस्य ह्रासो द्वितीयवयःप्राप्तिः। ह्रसित उक्षा—उक्षतरः। उक्षा द्वितीयवयास्तरुणस्तस्य ह्रासस्तृतीयवयःप्राप्तिः। ह्रसितोऽश्वोऽश्वतरः। अश्वेनाश्वायां जातोऽश्वस्तस्य ह्रासो गर्दभपितृकता। आशुगमनाद् वाश्वस्तस्य ह्रासो गमने मन्दता। सर्वथाश्वतरशब्दो जातिशब्दः। ह्रसित ऋषभः—ऋषभतरः। ऋषभोऽनड्वान् बलीयान्, तस्य ह्रासो भारवहने मन्दशक्तिता। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य ह्रासे भवति। इह मा भूत्—कृशो वत्सो वत्सतर इति। कज्वत्करणं पुंवद्भावार्थम्। ह्रसिता वत्सा—वत्सतरी। अश्वतरी।

६६. एकाद् द्वयोर्निर्धार्ये डतरः।

समुदायादेकदेशो जातिगुणक्रियासंज्ञाद्रव्यैर्निष्कृष्य बुद्ध्या पृथक्क्रियमाणो निर्धार्यः। एकशब्दात् द्वयोर्मध्ये निर्धार्येऽर्थे वर्तमानात् डतरः प्रत्ययो वा भवति। एकतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा। वावचनमगर्थम्[1]। एकको भवतोः कठः पटुर्वा। महाबाधिकारान्न भवत्यपि। एको भवतोः पटुः। द्वयोरिति किम्? एकोऽस्मिन् ग्रामे प्रधानम्। निर्धार्य इति किम्? एकोऽनयोर्ग्रामयोः स्वामी।

६७. यत्तत्किमन्येभ्यः।

यद्, तद्, किम्, अन्य—इत्येतेभ्यो द्वयोरेकस्मिन् निर्धार्येऽर्थे वर्तमानेभ्यो डतरः प्रत्ययो भवति। यतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा ततर आगच्छतु। कतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा। अन्यतरो भवतोः कठः पटुर्गन्ता देवदत्तो दण्डी वा। महाबाधिकारात् प्रत्ययो न भवत्यपि। यो भवतोः पटुः स आगच्छतु। को भवतोः

१. महाबाधिकारेणैव सिद्धे किमर्थं वावचनमित्याशङ्का।

पटु । अन्यो भवतो. पटु । द्वयोरिति किम् ? योऽस्मिन् ग्रामे प्रधान स आगच्छतु । निर्धार्य इति किम् ? योऽनयोर्ग्रामयो स्वामी स आगच्छतु ।

६८. बहूनां प्रश्ने डतमश्च वा ।

यद्, तद्, किम्, अन्य—इत्येतेभ्यो बहूना मध्ये निर्धार्येऽर्थे वर्तमानेभ्य. प्रश्नविषये डतमः प्रत्ययो वा भवति चकारात् डतरश्च । यतमो यतरो वा भवतां कठस्ततमस्ततरो वा आगच्छतु । कतम कतरो वा भवता कठ । प्रमाणान्तरात् प्रतिपत्तौ बहूनामप्रयोगेऽपि भवति । यथा बहुष्वासीनेषु कश्चित् कंचित् पृच्छति कतमो देवदत्त, कतरो देवदत्त । अन्यतमोऽन्यतरो वा भवतां कठः । वावचनमगर्थम् । यको भवता कठ सक आगच्छतु । अन्यक एषां कालाप. । किमस्तु साक. कादेश उक्त । महावाधिकारात् प्रत्ययो न भवत्यपि । यो भवता कठ स आगच्छतु । बहूनामिति किम् ? योऽस्मिन् ग्रामे कठ. स आगच्छतु । प्रश्ने इति किम् ? क्षेपे मा भूत् । को भवता कठ । कुत्सित इत्यर्थ । प्रश्नग्रहण किमो विशेषणं नान्यस्याऽसभवात् । एके त्वाहु यत्तत्किभ्यो जातावेव डतम, डतरस्तु बहूना निर्धार्ये किम एव न यत्तद्भ्याम्, स च जातावेव । अन्यशब्दादपि बहुविषये डतम एव न तु डतर । डतरडतमौ न निर्धार्ये अन्यशब्दान्नित्यावेव नाक्, नापि केवलस्य प्रयोग, अन्ये त्वविशेषेणेत्यत्राभिधानमनुसर्तव्यम् ।

६९. एकात् ।

एकशब्दात् बहूनामेकस्मिन् निर्धार्येऽर्थे वर्तमानात् डतम प्रत्ययो वा भवति । एकतमो भवता कठ पटुर्गन्ता देवदत्तो दण्डी वा । वावचनादक् । एकक । महावाधिकारान्न भवत्यपि—एको भवता कठ । पृथग्योगो डतरनिवृत्त्यर्थ ।

७०. क्तात्तमादेश्चाऽनत्यन्ते ।

क्तान्तात् केवलात् तमाद्यन्ताच्च अनत्यन्तेऽर्थे वर्तमानात् कच् प्रत्ययो भवति । क्रियाया स्वेनाश्रयेण साकल्येनानभिसबन्धोऽनत्यन्तता । अनत्यन्त भिन्न—भिन्नकम् । एव छिन्नकम । भिन्निका पटी । छिन्निका रज्जु । तमाद्यन्तात्—अनत्यन्त भिन्नतम भिन्नतमकम् । एव भिन्नतरक, भिन्नकल्पकम् । छिन्नतमक, छिन्नतरक, छिन्नकल्पकम् । तमाद्यन्तेषु क्तान्तता नास्ति इति तमादिग्रहणम् । असमासस्तमादेरित्यत्रापि क्तादित्यस्य सबन्धार्थ, तेनेह न भवति—अनत्यन्त शुक्लतमम् ।

७१. न सामिवचने ।

सामि अर्ध । सामिवचने उपपदे अनत्यन्तेऽर्थे वर्तमानात् क्तान्तात् केवलात् तमाद्यन्ताच्च कच् प्रत्ययो न भवति । सामि अनत्यन्त भिन्नम् । एव कृत, भुक्त, पीतम् । भिन्नतम, भिन्नतरम् । वचनग्रहण पर्यायार्थम् । अर्धमनत्यन्त भिन्नम् । नेममनत्यन्त भिन्नम् । एव शकल, खण्डमित्यादि । अन्ये तु समास एवोदाहरन्ति । सामिकृतं, अर्धकृतमित्यादि । ननु साम्यादिभिरेवाऽनत्यन्तताया अभिहितत्वादुक्तार्थत्वेन कच् न प्राप्नोतीति व्यर्थ प्रतिषेध । उच्यते—साम्यादिभि. समुदायविपर्यक्रियाया एवानत्यन्तता प्रतीयते न स्वविषये । तत्रानत्यन्तविवक्षायां कच् प्राप्नोतीति प्रतिषेधवचनम् ।

७२. यावादिभ्यः कः ।

यावादिभ्य शब्देभ्य स्वार्थे क प्रत्ययो भवति । याव एव यावक । मणिरेव मणिक । अविरेव अविक. । यावादयो यथा—याव, मणि, अवि, अस्थि, लात्र, पात्र, पीत, स्तम्ब, ज्ञात, अज्ञात, पुण्य, नित्य, सत्वत्, दशार्ह, वयस्, चन्द्र, जानु, भूत, भिक्षु इति यावादिराकृतिगण । तेन अभिन्नतरक, बहुतरकमित्यादि सिद्धम् ।

७३. कुमारीक्रीडनेयसोः ।

कुमारीणा यानि क्रीडनानि तद्वाचिभ्य ईयसुप्रत्ययान्तेभ्यश्च स्वार्थे क. प्रत्ययो भवति । कन्दुरेव कन्दुकः ।

उत्कण्टकः, गिरिकः, समुद्गकः, दोलिका, भ्रमरकः, शृङ्गकम्। ईयसु—श्रेयानेव श्रेयस्कः। ज्यायस्कः, भूयस्कः।

७४. लोहितान्मणौ।

लोहितशब्दान्मणौ वर्तमानात् स्वार्थे कः प्रत्ययो भवति। लोहित एव लोहितको मणिः। लिङ्गविशिष्टस्यापि ग्रहणात् लोहिन्येव लोहिनिका मणिः। लोहितैव लोहितिका मणिः। वाधिकारात् न भवत्यपि—लोहितो मणिः। मणाविति किम्? लोहिता गौः।

७५. रक्ताऽनित्यवर्णयोः।

रक्ते द्रव्यान्तरेण लाक्षादिना वर्णान्तरमापादितेऽनित्ये च वर्णे वर्तमानात् लोहितशब्दात् स्वार्थे कः प्रत्ययो भवति। रक्ते—लोहित एव लोहितकः पटः। लोहिनिका शाटी। लोहितिका पटी। अनित्यवर्णे—लोहितकमक्ष्णो रूपं कोपेन। लोहितकमक्षि कोपेन। लोहिनिका, लोहितिका कन्या कोपेन। वाधिकारान्न भवत्यपि—लोहिता लोहिनी वा कोपेन। नित्योऽपि[1] रक्तो वर्णोऽस्ति, यथा कृमिरागादिरक्ते पटे इति रक्तग्रहणम्। अनित्यग्रहणं किम्? लोहित इन्द्रगोपकः। सत्येवाश्रयद्रव्येऽपर्यग्निहानित्य[2] उच्यते। अन्यथा रक्तग्रहणस्यानर्थक्यात्। वर्णग्रहणं द्रव्यनिवृत्त्यर्थम्। असति वर्णग्रहणे स्त्रीणामार्तवे द्रव्ये स्यात्। तद्धि सत्येवाश्रये स्त्रिया कदाचिन्न भवति लोहितशब्दवाच्यं च।

७६. कालात्।

कालशब्दात् कज्जलादिना रक्ते अनित्यवर्णे चार्थे वर्तमानात् स्वार्थे कः प्रत्ययो भवति। रक्ते—काल एव कालकः पटः। अनित्यवर्णे—कालकं मुखं वैलक्ष्येण। वाधिकारान्न भवत्यपि—कालः पटः, कालं मुखम्।

७७. शीतोष्णाद् ऋतौ।

शीत, उष्ण—इत्येताभ्यां ऋतौ वर्तमानाभ्यां स्वार्थे कः प्रत्ययो भवति। शीत एव शीतकः ऋतुः। उष्णकः ऋतुः। ऋताविति किम्? शीतो वायुः। उष्णः स्पर्शः।

७८. लून-वियातात् पशौ।

लून, वियात—इत्येताभ्यां पशौ वर्तमानाभ्यां स्वार्थे कः प्रत्ययो भवति। लून एव लूनकः। वियातकः पशुः। पशाविति किम्? लूनो यवः। वियातो बटुः। विहानशब्दादपीच्छन्त्येके—विहानकः पशुः। विहान एवाऽन्यत्र।

७९. स्नाताद् वेदसमाप्तौ।

स्नातशब्दाद् वेदसमाप्तौ गम्यमानायां स्वार्थे कः प्रत्ययो भवति। वेदं समाप्य स्नातः—स्नातकः। वेदसमाप्ताविति किम्? तीर्थे स्नातः।

८०. तनु-पुत्राणु-बृहती-शून्यात् सूत्र-कृत्रिम-निपुणाच्छादन-रिक्ते।

तनु, पुत्र, अणु, बृहती, शून्य—इत्येतेभ्यो यथासङ्ख्यं सूत्र, कृत्रिम, निपुण, आच्छादन, रिक्त इत्येतेष्वर्थेषु वर्तमानेभ्यः स्वार्थे कः प्रत्ययो भवति। तनोः सूत्रे—तनु सूत्रं तनुकं भङ्गादिमयं कल्पादि च। सूत्र इति किम्? तनुर्वंशः। पुत्रात् कृत्रिमे—कृत्रिमः पुत्रः पुत्रकः। कृत्रिमस्तक्षादिव्यापारनिष्पादितः। कृत्रिम इति किम्? औरसः पुत्रः। अणोर्निपुणे—निपुणो निष्णातोऽणुः अणुकः। निपुण इति किम्? अणुर्व्रीहिः। बृहत्या आच्छादने—बृहतिका आच्छादनविशेषः। आच्छादन

---

१. ननु रक्ते वस्तुनि अनित्य एव वर्णो भवति, यथा हरिद्रादौ। तत्राऽनित्यवर्णे इत्येव सिद्धे किमर्थं रक्तग्रहणमित्याशङ्का।

२. इन्द्रगोपकाऽभावे एव लोहितत्वनिवृत्तौ नाऽनित्यत्वमिति।

इति किम् ? बृहती छन्दः, बृहती औषधिः । शून्याद् रिक्ते—रिक्तो धनप्रज्ञादिना, शून्य एव शून्यकः रिक्तश्चेत् । रिक्त इति किम् ? शुने हितं—शून्यम् । सूत्रादयोऽर्थाः प्रत्ययमन्तरेण न प्रतीयन्ते इति तद्विषय तन्वादिभ्यो नित्य एव प्रत्ययविधिः । एवं पूर्वसूत्रेऽपि ।

८१. प्रियादिभ्यो जातौ ।

प्रियादिभ्यो जातौ वर्तमानेभ्यः स्वार्थे कः प्रत्ययो भवति । प्रियको वृक्षजातिः । चित्रको मृगजातिः । गुह्यको देवजाति । गोलकः कुब्राह्मणजाति । कुब्जकः कुब्जजाति । आकृतिगणोऽयम् । तेन पुलकपुस्तकादयोऽपि सिध्यन्ति ।

८२. औदरिकोऽलसे ।

अलसेऽर्थे औदरिक इति स्वार्थे निपात्यते । औदरिकोऽलसः । उदरे सक्त इत्यर्थ । अलसे इति किम् ? उदरकोऽन्यः ।

८३. धनहिरण्ये कामे ।

धन, हिरण्य—इत्येताभ्यां निर्देशादेव सप्तम्यन्ताभ्यां कामेऽभिलाषेऽर्थे क प्रत्ययो भवति स्वार्थे । धने कामः—धनकः चैत्रस्य । हिरण्यको मैत्रस्य ।

८४. स्वाङ्गेषु सक्ते ।

स्वाङ्गवाचिभ्यो नामभ्यो निर्देशादेव सप्तम्यन्तेभ्यः सक्तेऽर्थे क प्रत्ययो भवति । केशेषु सक्त —केशकः । नखकः, दन्तकः । केशादिरचनायां प्रसक्त उच्यते । बहुवचनात् स्वाङ्गसमुदायादपि भवति । दन्तोष्ठकः, केशनखकः ।

८५. अंशं हारिणि ।

अंशशब्दान्निर्देशादेव द्वितीयान्तात् हारिण्यर्थे क प्रत्ययो भवति । अंश हारी[1]—अंशको दायादः । हारीत्यावश्यके णिन् ।

८६. तन्त्रादचिरोद्धृते ।

तन्त्रशब्दान्निर्देशादेव पञ्चम्यन्तात् अचिरोद्धृतेऽचिरादुत्तीर्णेऽर्थे कः प्रत्ययो भवति । तन्त्रात्पटवानोपकरणादचिरोत्तीर्णः तन्त्रकः पटः । प्रत्यग्र[2] इत्यर्थः ।

८७. ब्राह्मणात्संज्ञायाम् ।

ब्राह्मणशब्दान्निर्देशादेव पञ्चम्यन्ताद् अचिरोद्धृतेऽर्थे क प्रत्ययो भवति संज्ञायां विषये । सदाचारब्राह्मणेभ्यस्तदानी एव उद्धृत्य पृथक्कृतः ब्राह्मणको देशः । यत्रायुधजीविनः काण्डस्पृष्टा नाम ब्राह्मणा भवन्ति । आयुधजीवी ब्राह्मण एव ब्राह्मणक इत्यन्ये ।

८८. उष्णात् ।

उष्णशब्दात् पञ्चम्यन्तात् अचिरोद्धृतेऽर्थे कः प्रत्ययो भवति संज्ञायां विषये । उष्णादग्नेरचिरोद्धृता—उष्णिका यवागूः । अल्पान्ना पेया विलेपिकेति यावत् । उष्णकुण्डान्निसृता नदीति केचित् ।

---

१. अवश्यं हरिष्यति णिन् । 'इन आधमर्ण्ये च' [२/४/६८] इति षष्ठ्या निषेधः । शीलार्थे तु षष्ठी स्यात् ।

२ नूतनः ।

८९. शीताच्च कारिणि ।

शीतशब्दाच्चकारादुष्णाच्च सामर्थ्यात् द्वितीयान्तात् कारिण्यर्थे कः प्रत्ययो भवति संज्ञायां विषये । शीतं मन्दं करोति—शीतकः अलसः । उष्णं क्षिप्रं करोति—उष्णकः दक्षः । संज्ञायामित्यनुवृत्तेः शीतोष्णशब्दाविह मान्द्यशीघ्रवचनौ गृह्येते न स्पर्शवचनौ । क्रियाविशेषणत्वाद् द्वितीया । कारीत्यावश्यके णिन् ।

९०. अधेरारूढे ।

अधिशब्दादारूढेऽर्थे वर्तमानात् स्वार्थे कः प्रत्ययो भवति । आरूढशब्दः कर्तरि कर्मणि च क्तप्रत्यये सिद्धः । तत्र यदा कर्तरि तदा अधिको द्रोणः खार्याः[1], अधिको द्रोणः खार्यामिति च भवति । यदा तु कर्मणि तदा अधिका खारी द्रोणेनेति[2] भवति ।

९१. अनुकाभिकाभीकाः कमितरि ।

अनुक, अभिक, अभीक— इत्येते शब्दाः कमिता इत्यर्थे कप्रत्ययान्ता निपात्यन्ते । अनुकामयते अनुकः । अभिकामयते अभिकः । दीर्घादेशे अभीकः ।

९२. उपत्यकाधित्यके ।

उपत्यका, अधित्यका—इत्येतौ शब्दौ कप्रत्ययान्तौ निपात्येते । निपातनं रूढ्यर्थम् । तेन उपत्यका—पर्वतस्य आसन्नो भागः । अधित्यका—पर्वतस्य उपरिभागः । स्वभावतः स्त्रीलिङ्गावेतौ । पुलिङ्गावपीति कश्चित् । उपत्यको देशः, अधित्यकः पन्था । इत्त्वाभावस्तु क्षिपकादित्वात् ।

९३. सस्येन गुणेन परिजाते ।

सस्यशब्दाद् गुणवाचिनो निर्देशादेव तृतीयान्तात् परिजातेऽर्थे कः प्रत्ययो भवति । परिः सर्वतोभावे । जनिः सत्तौ । सस्येन परिजातः—सस्यकः शालिः । यः सर्वतो गुणैः सपन्नो न यस्य किंचिदपि वैगुण्यमस्ति स एवमुच्यते । एवं सस्यको देशः । सस्यको वत्सः । सस्यकं सीधु । सस्यको मणिः । रूढिशब्दश्चायं[3] मणिविषये । सस्यकः खड्गः । सर्वतः सारेण सबद्धः । सस्यकः साधुः । गुणैन सर्वथा सपन्न इत्यर्थः । गुणेनेति किम् ? धान्यवचनात् मा भूत् । सस्येन परिजातं क्षेत्रम् ।

९४. सोऽस्य मुख्यः ।

स इति प्रथमान्तादस्येति षष्ठ्यर्थे कः प्रत्ययो भवति यत्तत् प्रथमान्तं स चेन्मुख्यः प्रधानं ग्रामणीर्भवति । देवदत्तो मुख्योऽस्य देवदत्तकः संघः । जिनदत्तकः । देवदत्तो मुख्य एषां देवदत्तकाः । जिनदत्तकाः । मुख्य इति किम् ? देवदत्तः शत्रुरेषाम् ।

९५. शृङ्खलकः करभे ।

शृङ्खलकशब्दः कप्रत्ययान्तो निपात्यते करभे—उष्ट्रशिशौ वाच्ये । शृङ्खलं बन्धनमस्य शृङ्खलकः करभ उच्यते । करभाणां काष्ठमयं पादबन्धनं शृङ्खलम् । वयःशब्दश्चायम् । शृङ्खलं बन्धनं भवतु वा मा भूत् ।

---

१. 'पूर्वसोऽधिकेऽ' [२/४/११७] इति पञ्चमीसप्तम्यौ ।

२. 'तृतीयाल्पीयसः' [२/४/११८] इति तृतीया ।

३. गुणेन परिजातोऽस्तु वा मा वा समुदायप्रसिद्धया तु मणिविशेषस्य संज्ञा ।

९६. उदुत्सोरुन्मनसि ।

उत्, उत्सु— इत्येताभ्या अस्य इति उन्मनसि अभिधेये क· प्रत्ययो भवति । उद्गतं मनोऽस्य उत्क· । उत्सुगत मनोऽस्य उत्सुक । उन्मना इत्यर्थः ।

९७. कालहेतुफलाद् रोगे ।

स इत्यनुवर्तते । स इति प्रथमान्तेभ्य: कालविशेषवाचिभ्यो हेतुवाचिभ्य. फलवाचिभ्यश्च अस्येति षष्ठ्यर्थे क: प्रत्ययो भवति यत्तदस्येति निर्दिष्ट तद्रोगश्चेद् भवति । द्वितीयो दिवसोऽस्याविर्भावाय द्वितीयक । तृतीयक । चतुर्थको ज्वर: । सतत: कालोऽस्य सततको ज्वर. । हेतु—विषपुष्पं हेतु· कारणमस्य विषपुष्पक: । काशपुष्पक· । पर्वतको रोग । फल—शीत फलं कार्यमस्य शीतक । उष्णको ज्वर । रोग इति किम् ? द्वितीयो दिवसोऽस्य जातस्य बालकस्य ।

९८. प्रायोऽन्नमऽस्मिन् संज्ञायाम् ।

स इत्यनुवर्तते । स इति प्रथमान्तादस्मिन्निति सप्तम्यर्थे सज्ञाया विषये क प्रत्ययो भवति यत्तत् प्रथमान्तं तच्चेदन्नं प्राय प्रायेण भवति । प्रायशब्दोऽत्र अन्नसमानाधिकरणो नियतलिङ्गसख्य. । प्राय अकृत्स्नबहुत्वम् । गुडापूपा प्रायेण प्रायो वान्नमस्यां गुडापूपिका पौर्णमासी । तिलापूपिका, कृशरिका, त्रिपुटिका । सज्ञायामिति किम् ? अपूपा प्रायेण प्रायो वान्नमवन्तिषु ।

९९. कुल्मासादऽण् ।

कुल्मासशब्दात् प्रथमान्तात् प्रायोऽन्नमस्मिन् इत्यर्थे अण् प्रत्ययो भवति संज्ञायां विषये । कुल्मासा· प्रायेण प्रायो वान्नमस्यां पौर्णमास्यां कौल्मासी । कुल्माष इति मूर्धन्योपधोऽप्यस्ति ।

१००. वटकादिन् ।

वटकशब्दात् प्रथमान्तात् प्रायोऽन्नमस्मिन् इत्यर्थे इन् प्रत्ययो भवति सज्ञायां विषये । वटकानि प्रायेण प्रायो वान्नमस्यां पौर्णमास्यां वटकिनी ।

१०१. साक्षाद् द्रष्टरि ।

साक्षाच्छब्दात् द्रष्टा इत्यस्मिन्नर्थे इन् प्रत्ययो भवति सज्ञायां विषये । साक्षाद् द्रष्टा—साक्षी । साक्षिणौ, साक्षिण: । **'अनाराच्छश्वत्पृथगोऽव्ययस्य'** [८/४/६६] इति टिलोप । सज्ञायामिति किम् ? साक्षाद् द्रष्टा ।

तृतीयश्चरणः

१. समासान्ताः।

अधिकारोऽयं आ पादपरिसमाप्तेः। अतः परं ये प्रत्ययास्ते समासस्यान्ता अवयवा भवन्ति तद्ग्रहणेन गृह्यन्ते। प्रयोजनमव्ययीभावद्विगुबहुव्रीहिद्वन्द्वसंज्ञाः। उपधुरं, उपशरदं—अत्राव्ययीभावग्रहणेन **'अव्ययीभावस्यातोऽम्पञ्चम्याः'** [३/२/२] इत्यम्। द्विधुरी, त्रिधुरी—अत्र द्विगुग्रहणेन **'द्विगोः समाहारात्'** [२/३/४१] इतीप्। सुजम्भे, सुजम्भानौ स्त्रियौ—अत्र बहुव्रीहिग्रहणेन **'अनो बहुव्रीहेः'** [२/३/५] इति विकल्पेन डाप्। कटकवलयिनी, शङ्खनूपुरिणी—अत्र द्वंद्वग्रहणेन **'द्वन्द्वगर्हितरोगात्'**···' [८/१/२७] इत्यादिना इन्।

२. न किमः क्षेपे।

क्षेपेऽर्थे वर्तमानात् किंशब्दात्परः समासान्तो न भवति। किंराजा यो न रक्षति। स किंसखा योऽभिद्रुह्यति। किंगौर्यो न वहति। **'किं क्षेपे'** [३/१/११४] इति समासः। किम इति किम्? कुराजः, दुःसखः। क्षेपे इति किम्? केषां राजा—किंराजः। किंसखः, किंगवः।

३. बहोर्डे।

डे विषये डप्रसङ्गो यत्र ततो बह्वन्तात् समासान्तो डः कप् च न भवति। आसन्ना बहवो येषां ते आसन्नबहवः[१]। उपबहवः[२]। बहोरिति किम्? द्वित्राः, उपदशाः। डे इति किम्? प्रिया बहवोऽस्य प्रियबहुकः[३]।

४. स्वतिभ्यां पूजायामबहुव्रीहेः।

पूजायां वर्तमानाभ्यां सु अति—इत्येताभ्यां यः समासान्तो वक्ष्यते स न भवति बहुव्रीहेरुच्चारणं कृत्वा यो विधिरुक्तस्तं वर्जयित्वा। सुराजा, अतिराजा। सुगौः, अतिगौः। सुसखा, अतिसखा। स्वतिभ्यामिति किम्? परमराजः, परमगवः, परमसखः। पूजायामिति किम्? अतिक्रान्तो राजानमतिराजः। अतिगवः, अतिसखः। अबहुव्रीहेरिति किम्? सुसक्थः, अतिसक्थः, स्वक्षः, अत्यक्षः। ननु कथं शोभना आपो यस्मिन् स स्वाप् इत्यत्र सत्यपि बहुव्रीहिसमासे **'ऋक्पुरप्पथिभ्यः समासे'** [८/३/५६] इति समासान्तो न? उच्यते—नात्र सूत्रे बहुव्रीहेरुच्चारणं कृत्वा विधिरुक्तः, किन्तु समासमात्रस्योच्चारणं कृत्वेति।

---

१. **'आसन्नादूराधिका···'** [३/१/१२६] इत्यादिना समासः। **'बहुगणं भेदे'** [१/१/५८] इति संख्यावद्भावाद् **'संख्याया बहुव्रीहेः'** [८/३/७०] इति डप्रत्ययः प्राप्नोति। तस्मिन्निषिद्धे **'शेषाद् वा'** [८/३/११०] इति कप् च प्राप्नोति। उभयस्यापि सामान्येनाय प्रतिषेध इत्युभयमपि न भवति।

२. **'अव्ययम्'** [३/१/१२७] इति समासः।

३. **'तुल्यार्थं चाऽनेकं च'** [३/१/१२८] इति सामान्यसमासः। ततः **'संख्याया बहुव्रीहेः'** [८/३/७०] इत्यत्र प्रतिपदोक्तबहुव्रीहेर्ग्रहणात् बहोर्वैपुल्यार्थत्वेन वा संख्यात्वाऽभावे डः समासान्तो न भवति, किंतु कप्।

५. नञस्तत्पुरुषात् ।

नञ्पूर्वात् तत्पुरुषसमासात् वक्ष्यमाणः समासान्तो न भवति । न राजा अराजा । अगौः, असखा, अपन्थाः । अपथमिति पथशब्दस्य, यथा कुपथम्[1] । तत्पुरुषादिति किम् ? न विद्यते धूरस्य अधुर शकटम् । अपथोऽयमुद्देशः । राज्ञामभावोऽराज वर्तते ।

६. सखेष्टः ।

तत्पुरुषादित्यनुवर्तते । सखिशब्दान्तात् तत्पुरुषात् टः समासान्तो भवति । राजसखः, अतिसखः, महासखः, पञ्चसखः । पञ्चसखी—टित्वादीप् । पञ्चसख, दशसखम् ।

७. राज्ञोऽस्त्रियाम् ।

अस्त्रियां वर्तमानात् राजन्शब्दान्तात् तत्पुरुषात् टः समासान्तो भवति । देवानां राजा—देवराजः । महाराजः, अतिराजः । अतिराजी[2] । पञ्चानां राज्ञां समाहारः—पञ्चराजी । अस्त्रियामिति किम् ? मद्राणां राज्ञी—मद्रराज्ञी । महाराज्ञी, विद्याराज्ञी ।

८. अह्नः ।

अहन्शब्दान्तात् तत्पुरुषात् टः समासान्तो भवति । परमाह , उत्तमाहः, पुण्याहं, सुदिनाहम् ।

९. संख्यातादऽह्नश्च वा ।

संख्यातशब्दात् परो योऽहन्शब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति तस्य च अहन्शब्दस्य अह्नादेशो वा भवति । संख्यातमहः—संख्याताह्नः, संख्याताहः । अह्नादेशार्थं वचनम् । प्रत्ययस्तु पूर्वेणैव सिद्धः । चकार उत्तरत्राह्नादेशस्य टसनियोगशिष्टत्वार्थः । अन्यथा हि टापवादोऽह्नादेशो[3] विज्ञायेत । तथा च स्त्रियामीप् न स्यात् ।

१०. सर्वांशसंख्याऽव्ययात् ।

सर्वशब्दात् अंश एकदेशस्तद्वाचिभ्यः संख्यावाचिभ्योऽव्ययेभ्यश्च परो योऽहन्शब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति तस्य चाऽहन्शब्दस्य नित्यमह्नादेशो भवति । सर्वमहः—सर्वाह्णः । अंश—पूर्वाह्णः, अपराह्णः, मध्याह्नः, सायाह्नः । संख्या—द्वयोरह्नोर्भवः द्व्यह्नः पटः । द्व्यह्नी अष्टका । एवं त्र्यह्नः, त्र्यह्नी । द्वे अहनी प्रिये यस्य स द्व्यह्नप्रियः । त्र्यह्नप्रियः । द्वे अहनी जातस्य द्व्यह्नजातः । त्र्यह्नजातः । अव्यय—अत्यह्नः, अत्यह्नी कथा । निरह्नः, निरह्नी वेला । व्यह्नः, व्यह्नी ।

११. उरसोऽग्रे ।

अग्रं मुखं प्रधानं वा तत्र वर्तमानो य उरस्शब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति । अश्वाश्च ते उरश्च अश्वोरसं दृश्यते । सेनाया अश्वा मुखमित्यर्थः । अश्वानामुरः अश्वोरसं वर्जयेत् । अश्वानां मुखमग्रदेशमित्यर्थः । अश्वानामुरः अश्वोरसम् । अश्वानां प्रधानमित्यर्थः । एवं हस्त्युरसं, रथोरसम् । अग्रे इति किम् ? अश्वोरस्यावर्तः ।

१२. अनोऽश्मायःसरसो जातिसंज्ञयोः ।

अनस्, अश्मन्, अयस्, सरस्—इत्येतदन्तात् तत्पुरुषात् टः समासान्तो भवति जातावभिधेयायां संज्ञायां च

---

१. यद्यत्र पथिन्शब्दः स्यात्तदा 'का पथ्यक्षयोः' [३/२/१०५] इति प्रवर्तेत ।

२. अत्र राजन्शब्दः स्त्रियां वर्तमानो नास्ति ।

३. 'अतोऽह्नस्य' [२/२/७७] इति 'संख्यातायविभ्यः...' [१/४/५५] इति च ज्ञापकाच्च प्रत्ययशङ्का ।

विषये। इवं च यथासंभवं[1] विशेषणम्। उपानसमिति अन्नविशेषस्य जातिः संज्ञा वा। महानसं पाकस्थानस्य संज्ञा। राज्ञ उपस्थितमित्येके। गोनसं जातिः। स्थूलाश्मः, अमृताश्मः, कनकाश्म—अश्मजातिविशेषा एते। पिण्डाश्मः—जाति संज्ञा वा। कालायसं, लोहितायसं, तीक्ष्णायसं—अयोजातिविशेषा एते। लोहितायसमिति संज्ञा इत्येके। जातसरसं, मण्डूकसरसं—एवंनाम्नी सरसी मण्डूकसरसमिति जातिरित्येके। जातिसंज्ञयोरिति किम्? सदनः, सदश्मा, परमसरः। कथं बिन्दुसरः, बकसरः इति? नैषा संज्ञा। रूढ्या ह्यत्र संज्ञाविज्ञानं शूर्पनखीवत्।

१३. ग्रामकौटात् तक्ष्णः।

ग्राम, कौट—इत्येताभ्यां परो यस्तक्षन्शब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति। ग्रामस्य तक्षा—ग्रामतक्षः। ग्रामसाधारण इत्यर्थः। कुटी शाला, तस्यां भवः—कौटः, कौटस्तक्षा कौटतक्षः। स्वापणशालाया यः कर्म करोति स्वतन्त्रो न कस्यचित् प्रतिबद्ध इत्यर्थः। ग्रामकौटादिति किम्? राजतक्षा। तत्पुरुषादिति किम्? ग्रामश्च तक्षा च ग्रामतक्षाणौ। कौटस्तक्षास्य कौटतक्षा।

१४. गोष्ठातेः शुनः।

गोष्ठ, अति—इत्येताभ्यां परो यः श्वन्शब्दः तदन्तात् तत्पुरुषात् टः समासान्तो भवति। गोष्ठे श्वा गोष्ठश्वः। अतिक्रान्तः श्वानमतिश्वो वराहः। अतिजवन इत्यर्थः। अतिश्वः सेवकः। सुष्ठु स्वामिभक्त इत्यर्थः। अतिश्वी सेवा—अतिनीचेत्यर्थः।

१५. प्राणिन उपमानात्।

प्राणिवाचिन उपमानात् परो यः श्वन्शब्दः तदन्तात् तत्पुरुषात् टः समासान्तो भवति। व्याघ्र इव व्याघ्रः, स चासौ श्वा च व्याघ्रश्वः। **'उपमेयानि व्याघ्रादिभिः सामान्याप्रयोगे'** [३/१/१०४] इति समासः। अत एव वचनात् श्वन्शब्दस्य परनिपातः[2]। मयूरव्यंसकादित्वात् वा समासः। एवं सिंहश्वः, वृकश्वः। प्राणिन उपमानादिति पूर्वपदविज्ञानादिह न भवति—वानर श्वेव वानरश्वा। प्राणिन इति किम्? फलकमिव श्वा फलकश्वा। उपमानग्रहणं किम्? देवदत्तश्वा।

१६. अप्राणिनि।

पूर्वसूत्रे उपमानादिति पूर्वपदस्य विशेषण, इह तु शुनः। अप्राणिनि वर्तते यः उपमानवाची श्वन्शब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति। श्वेव श्वा, आकर्षश्चासौ श्वा च आकर्षश्वः। एव फलकश्वः, शकटश्वः। अप्राणिनीति किम्? वानरः श्वेव वानरश्वा। उपमानादिति किम्? आकर्षे श्वा आकर्षश्वा। अन्ये तु उपमानादप्राणिनीति एकमेव योगमारभन्ते, तन्मते व्याघ्रश्व इत्यादि न भवति।

१७. मृगपूर्वोत्तराच्च सक्थ्नः।

मृग, पूर्व, उत्तर—इत्येतेभ्य उपमानवाचिनश्च शब्दात् परो यः सक्थिशब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति। मृगस्य सक्थि—मृगसक्थम्। पूर्वं सक्थि सक्थ्नः पूर्वं वा पूर्वसक्थम्। एवमुत्तरसक्थम्। उपमानात्—फलकमिव फलकं, फलकं च तत् सक्थि च फलकसक्थम्। व्याघ्रश्वादिवत्समासः। कुक्कुटादपीच्छन्त्यन्ये। कुक्कुटसक्थम्।

१८. जनपदेभ्यो ब्रह्मणः।

जनपदवाचिनः परो यो ब्रह्मन्शब्दस्तदन्तात् तत्पुरुषात् टः समासान्तो भवति। अवन्तौ ब्रह्मा—अवन्तिब्रह्मः।

---

१. क्वापि जातौ क्वापि संज्ञायां चेत्यर्थः।

२. प्रथमोक्तत्वेन उपमेयस्य पूर्वनिपाते प्राप्ते।

एवं सुराष्ट्रब्रह्मः। सुराष्ट्रेषु वसति यः स सौराष्ट्रिको ब्राह्मण इत्यर्थः। काशिब्रह्म.। जनपदेभ्य इति किम् ? देवब्रह्मा नारदः। बहुवचन जनपदवाचिपरिग्रहार्थम्।

१६. कुमहद्भ्यां वा।

कु, महत्—इत्येताभ्यां परो यो ब्रह्मन्शब्दस्तदन्तात् तत्पुरुषात् ट समासान्तो वा भवति। पापो ब्रह्मा—कुब्रह्मा, कुब्रह्मः। महान् ब्रह्मा—महाब्रह्मा, महाब्रह्म। पापो महाश्च ब्राह्मण एवमुच्यते।

२०. गोरऽतद्धितलुकः।

तत्पुरुषादित्यनुवर्तते। गोशब्दान्तात् तत्पुरुषात् ट. समासान्तो भवति न चेत्स तत्पुरुषस्तद्धितलुगन्तो भवति। राज्ञो गौ.—राजगव., राजगवी। पुगव, स्त्रीगवी। अतिगव., अतिगवी। पञ्चगवं, दशगवम्। तत्पुरुषादिति किम्? चित्रगु.। अतद्धितलुक इति किम्? पञ्चभिर्गोभि क्रीत.—पञ्चगु। तद्धितग्रहण किम्? स्यादिलुकि प्रतिषेधो मा भूत्। राजगवमिच्छति—राजगवीयति। लुग्ग्रहण किम्? तद्धिते एव प्रतिषेधो मा भूत्। पञ्चभ्यो गोभ्य आगत—पञ्चगवरूप्य, पञ्चगवमयम्।

२१. द्वित्रिभ्यामञ्जलेर्द्विगोर्वा।

अतद्धितलुक इत्यनुवर्तते। द्वित्रिभ्या परो योऽञ्जलिशब्दस्तदन्ताद् द्विगोष्ट समासान्तो वा भवति न चेत्स द्विगुस्तद्धितलुगन्तो भवति। द्वयोरञ्जलयो समाहार.—द्वयञ्जल, द्वयञ्जलि। त्र्यञ्जलं, त्र्यञ्जलि। द्वयञ्जलमय, द्वयञ्जलिमयम्। द्वयञ्जलप्रिय, द्वयञ्जलिप्रिय.। द्विगोरिति किम्? द्वयोरञ्जलि द्वयञ्जलिः। द्वावञ्जली अस्य द्वयञ्जलिकः। त्र्यञ्जलिक.। अतद्धितलुक इति किम्? द्वाभ्यामञ्जलिभ्या क्रीतः—द्वयञ्जलिर्घटः। त्र्यञ्जलिर्घट.। नित्योऽय विधिरित्येके।

२२. नावः।

नौशब्दान्ताद् द्विगोष्ट समासान्तो भवति न चेत्स द्विगुस्तद्धितलुगन्तो भवति। द्वे नावौ समाहृते—द्विनावम्। त्रिनाव, पञ्चनावम्। द्विनावमय, पञ्चनावमयम्। द्विनावप्रिय, पञ्चनावधन। द्विगोरिति किम? द्वयोर्नौ. द्विनौ.। अतद्धितलुक इति किम्? द्वाभ्यां नौभ्यां क्रीत—द्विनौः।

२३. अर्धाच्च।

अर्धशब्दात् परो यो नौशब्दस्तदन्तात् समासात् टः समासान्तो भवति न चेत्तद्धितलुकः। अर्धं नावः—अर्धनाव[1], अर्धनावी। अर्धादिति किम्? राजनौ., परमनौ। अर्धनाव, अर्धनावीति हि स्त्रीनपुसकयोर्दृश्यते। चकारो द्विगोरनुकर्षणार्थस्तेन उत्तरत्र द्वयमप्यनुवर्तते[2]।

२४. खार्या वा।

अर्धशब्दात् परो य खारीशब्दस्तदन्तात् समासात् द्विगोश्च ट समासान्तो वा भवति न चेत्तद्धितलुकः। अर्धं खार्याः—अर्धखारं, अर्धखारी। 'अर्धं समेंऽशे वा' [३/१/३७] इत्यर्धशब्दे य प्रतिपद[3] समास उक्तस्तत्रायं[4] विधि। विधानसामर्थ्यात् टान्तस्य न स्त्रियां वृत्ति। द्विगु—द्वे खार्यौ समाहृते द्विखारम्। पक्षे 'नपुंसके' [२/३/११३] इति ह्रस्वत्वे द्विखारि। केचिदत्र पुस्त्वमपीच्छन्ति, तन्मते 'अन्यार्थे स्त्रीप्रत्ययगोरन्त्यस्या···' [२/३/११५] इत्यादिना ह्रस्वत्वे

१. टेऽर्धपूर्वपदोऽय नौरिति स्त्रीनपुसकत्वे भवत.।
२ इह तु न प्रयोजनम्।
३ लक्षणप्रतिपदोक्तयोरिति न्यायात्।
४ न बहुव्रीह्यादौ।

द्विखारिः । स्त्रीत्वमप्यन्ये । तन्मते पूर्ववत् ह्रस्वत्वे 'इतोऽमनुष्यात् वा' [२/३/७५] इति ईपि च द्विखारी । एवं पञ्चखारं, पञ्चखारी । द्विखारमयं, द्विखारीमयम् । द्विखारप्रियः, द्विखारीप्रियः । पञ्चखारधनः, पञ्चखारीधनः । द्विगोरिति किम् ? उपखारि, अधिखारि । अतद्धितलुक इत्यस्य प्रत्युदाहरणं नास्ति विशेषाभावात् ।

२५. अनः समाहारे ।

द्विगोरित्यनुवर्तते । समाहारे वर्तमानादन्नन्ताद् द्विगोष्टः समासान्तो भवति । पञ्च तक्षाणः समाहृताः— पञ्चतक्षी, पञ्चतक्षम् । दशोक्षी, दशोक्षम् । शतराजी, शतराजम् । द्व्यहः, त्र्यहः । द्विगोरिति किम् ? समाहृतास्तक्षाणः सतक्षाणः । समाहारे इति किम् ? द्वाभ्यामुक्षाभ्यां क्रीतः—द्व्युक्षा । त्र्युक्षा । विशेषत्वात् परत्वाच्च अह्नः समाहारे 'सर्वांशसंख्याऽव्ययात्' [८/३/१०] इति टोऽनेन बाध्यते । तस्मिन् हि सत्यह्लादेशः स्यात् ।

२६. एकाहम् ।

एकशब्दात् परादहन्शब्दात् तत्पुरुषे समासान्तटप्रत्ययेऽहन्शब्दस्य टिलोपे च एकाहमिति निपात्यते । एकमहः—एकाहम् । निपातनं 'सर्वांशसंख्याऽव्ययात्' [८/३/१०] इति टबाधनार्थम् । तस्मिन् हि सत्यह्लादेशः स्यात् ।

२७. शरदादेरव्ययीभावात् ।

शरदाद्यन्तादव्ययीभावसमासात् टः समासान्तो भवति । शरदः समीपमुपशरदम् । प्रतिशरदं, उपत्यद, प्रतित्यदम् । अव्ययीभावस्य नपुंसकलिङ्गत्वात् टान्तस्य न स्त्रिया वृत्तिः । अव्ययीभावादिति किम् ? परमशरद् । शरदादयो यथा—शरद्, त्यद्, तद्, यद्, कियत्, हिरुक्, हिमवत्, उपसद्, सदस्, अदस्, अनस्, मनस्, विपाश्, दिश्, दृश्, विश्, उपानह्, अनडुह्, चतुर्, दिव् इति शरदादिः । येऽत्र गणे झपान्ताः शब्दाः पठ्यन्ते तेषां नित्यार्थं[1] ग्रहणम् ।

२८. संख्याया नदीगोदावरीभ्याम् ।

संख्यावाचिनः परौ यौ नदीगोदावरीशब्दौ तदन्तादव्ययीभावात् टः समासान्तो भवति । पञ्च नद्यः— पञ्चनदम् । सप्तनदम् । द्विगोदावर, त्रिगोदावरम् । सख्याया इति किम् ? उपनदि । अव्ययीभावादिति किम् ? एकनदी । इह नदीग्रहणं नित्यार्थम् ।

२९. जराया जरस् च ।

जराशब्दान्तादव्ययीभावात् टः समासान्तो भवति तत्सन्नियोगे च जराशब्दस्य जरसादेशः । उपजरस, प्रतिजरसम् ।

३०. प्रति-परः-समनुभ्योऽक्ष्णः ।

प्रति, परस्, सम्, अनु—इत्येतेभ्यः परो योऽक्षिशब्दस्तदन्तादव्ययीभावात् टः समासान्तो भवति । अक्षिणी प्रति—प्रत्यक्षम् । परसमानार्थः परस्शब्दोऽव्ययम् । अक्ष्णोः परं परोक्षम् । संगतमक्ष्णा समीपमक्ष्णो वा समक्षम् । अक्ष्णः समीपमन्वक्षम् । कथं प्रत्यक्षोऽर्थः परोक्षः कालः ? उच्यते—अक्षमिन्द्रियं प्रतिगतः, इन्द्रियाधीनतया य उत्पद्यते स प्रत्यक्षः इति तत्पुरुषेण भविष्यति । एवं परोक्षः । अक्षशब्देन इन्द्रियपर्यायेण सिद्धे प्रत्यादिभ्यः परस्य अक्षिशब्दस्याऽव्ययीभावे प्रयोगो मा भूदिति वचनम् ।

३१. अनः ।

अन्नन्तादव्ययीभावात् टः समासान्तो भवति । उपराजं, उपतक्षम् । अध्यात्मं, प्रत्यात्मम् ।

---

१. 'झयात्' [८/३/३३] इति वक्ष्यमाणसूत्रेण विकल्पे प्राप्ते ।

३२. नपुंसकाद् वा ।

अन्नन्त यन्नपुंसकं तदन्तादव्ययीभावात् ट. समासान्तो वा भवति। उपचर्म, उपचर्म । प्रतिकर्म, प्रतिकर्म। प्रतिसामं, प्रतिसाम । अनुलोम, अनुलोम । प्रतिलोमं, प्रतिलोम। पूर्वेण नित्ये प्राप्ते विकल्प.।

३३. झपात् ।

झपान्तादव्ययीभावात् ट. समासान्तो वा भवति। उपस्रुच, उपस्रुक् । अधिस्रज, अधिस्रक् । उपैडविडं, उपैडविड् । प्रतिमरुतं, प्रतिमरुत् । उपदृषद, उपदृषद् । उपसमिधं, उपसमित् । उपककुभ, उपककुब् ।

३४. गिरि-नदी-पौर्णमास्याग्रहायणीभ्यः ।

गिरि, नदी, पौर्णमासी, आग्रहायणी—इत्येतच्छब्दान्तादव्ययीभावात् ट समासान्तो वा भवति । गिरेरन्त.—अन्तर्गिरं, अन्तर्गिरि । गिरेः समीपमुपगिर, उपगिरि । एव उपनद, उपनदि। उपपौर्णमास, उपपौर्णमासि। उपाग्रहायण, उपाग्रहायणि ।

३५. सरजसोपशुनानुगवम् ।

सरजस, उपशुन, अनुगव---इत्येते शब्दा अव्ययीभावसमासे टप्रत्ययान्ता निपात्यन्ते। सह रजसा---सरजस अभ्यवहरति। साकल्येऽव्ययीभाव । शुन समीपे—उपशुन तिष्ठति। अत्र निपातनाद् वस्योत्वम् । गामन्वायतमनुगवम्। 'अनुरायामे' [३/१/२८] इत्यव्ययीभाव । आयामादन्यत्र न भवति। गवां पश्चात्—अनुगु यानम् ।

३६. द्वंद्वाच्चु-द-ष-हात् समाहारे ।

चवर्ग, दकार, षकार, हकार—इत्येतदन्ताद् द्वद्वसमासात् समाहारेऽर्थे वर्तमानात् ट. समासान्तो भवति। वाक् च त्वक् च वाक्त्वचम्। वाक् च समुच्च वाक्समुच्छम्[1]। श्रीस्रजम्। द—समिद्दृषदम्। सपद्विपदम्। ष—वाक्त्विषम्। वाग्विप्रुषम्। ह—छत्रोपानहम्। गोगोदुहम्। समासान्तत्वेन प्रत्ययस्य द्वद्वावयवत्वात् छत्रोपानहिनीति द्वद्वलक्षणो मत्वर्थीय इन् भवति। चुदषहादिति किम्? दृषत्समित्, यकृन्मेद.। समाहारे इति किम्? प्रावृट्शरद्भ्याम्। अश्वानडुद्भ्याम्। द्वद्वादिति किम्? पञ्च वाच समाहृता—पञ्चवाक् ।

३७. बहुव्रीहौ सक्थ्यक्षिभ्यां स्वाङ्गे ।

स्वाङ्गे वर्तमानाभ्या सक्थि, अक्षि—इत्येताभ्या ट समासान्तो भवति बहुव्रीहिसमासे। दीर्घ सक्थि यस्य स दीर्घसक्थ । दीर्घसक्थी। गौरसक्थ., गौरसक्थी। विशालाक्षः, विशालाक्षी। कमलाक्ष, कमलाक्षी। स्वक्षः, स्वक्षी। सक्थ्यक्षिभ्यामिति किम्? सुबाहु., दीर्घजानु । स्वाङ्गे इति किम्? दीर्घसक्थि शकटम्। स्थूलाक्षिरिक्षुः[2]। बहुव्रीहाविति किम्? परमसक्थि, सदक्षि।

३८. काष्ठेऽङ्गुलेः ।

काष्ठे वर्तमानादङ्गुलिशब्दान् ट समासान्तो भवति बहुव्रीहिसमासे। द्वे अङ्गुली यस्य द्व्यङ्गुलम्। त्र्यङ्गुलं, चतुरङ्गुलं, पञ्चाङ्गुलम्। अङ्गुलिसदृशावयव धान्यकण्टकादीना विक्षेपणकाष्ठमेवमुच्यते। बहुव्रीहाविति किम्? उपाङ्गुलि, अत्यङ्गुला यष्टि । काष्ठ इति किम्? पञ्चाङ्गुलिर्हस्त.। अङ्गुलेरिति निर्देशाद्दीर्घान्तान्न भवति। द्वावङ्गुलीसदृशावयवौ यस्य तत् द्व्यङ्गुलीक दारु। 'न कपि' [२/३/११०] इति ह्रस्वाभाव। टकार ईबर्थः। दीर्घाङ्गुली, तीक्ष्णाङ्गुली यष्टिः।

---

१ उच्छीज्—समाप्तौ इत्यस्य क्विप्, 'च्छ्वोः शूटौ प्रमे च' [४/३/३८] इति शत्वस्यानित्यत्वात् समुच्छीविति वा ।

२. समासान्तविधेरनित्यत्वात् 'अक्ष्णोऽप्राण्यङ्गे' [८/३/५६] इत्यनेनापि न भवति ।

३६. द्वित्रिभ्यां मूर्ध्नो वा ।

द्वि, त्रि—इत्येताभ्यां परो यो मूर्धन्शब्दस्तदन्तात् टः समासान्तो वा भवति बहुव्रीहिसमासे । द्विमूर्धः, द्विमूर्धा । त्रिमूर्धः, त्रिमूर्धा । द्विमूर्धी स्त्री । बहुव्रीहावििति किम् ? द्वयोर्मूर्धा—द्विमूर्धा । टः प्रत्ययो निवृत्तः ।

४०. अः पूरणीभ्यस्तत्प्राधान्ये ।

पूरणप्रत्ययान्तः स्त्रीलिङ्गशब्दः पूरणी, तदन्तात् अः समासान्तो भवति बहुव्रीहिसमासे तत्प्राधान्ये—तस्याः पूरण्याः प्राधान्येऽर्थे । समासेनाभिधीयमानो ह्यर्थः प्रधान भवति । कल्याणी पञ्चमी रात्रिर्यासां रात्रीणा ता. कल्याणीपञ्चमा रात्रय. । अत्र रात्रयः समासार्थ. । तासु पञ्चम्यपि रात्रित्वेनानुप्रविष्टेति प्रधानम् । एवं कल्याणीदशमाः, कल्याणीतुर्याः, कल्याणीतुरीया , कल्याणीद्वितीयाः, कल्याणीतृतीयाः । पूरणीभ्य इति किम् ? द्वितीया भार्या कल्याणी यासां भार्याणां ता. द्वितीयाकल्याणीका । स्त्रीत्वनिर्देश. किम् ? कल्याणपञ्चमका दिवसा. । कल्याणद्वितीयकान्यहानि । बहुवचनं व्याप्त्यर्थम् । तेन कल्याणीपञ्चमा रात्रयः इत्यत्र 'ऋन्नित्यवितः' [८/३/१०६] इति परोऽपि कप् न भवति । तत्प्राधान्य इति किम् ? कल्याणपञ्चमीक पक्ष ।

४१. प्रमाण्याः ।

प्रमाणीशब्दान्तादः समासान्तो भवति बहुव्रीहौ । स्त्री प्रमाणी येषां ते स्त्रीप्रमाणाः कुटुम्बिनः । भार्याप्रमाणाः श्रेणय । कल्याणी प्रमाण्यस्य कल्याणप्रमाण. । प्रमाणशब्देनैव सिद्धे प्रमाणीशब्दान्तात् कबऽभावार्थं वचनम् ।

४२. अन्तर्बहिर्भ्यां लोम्नः ।

अन्तर्, बहिस्—इत्येताभ्यां परो यो लोमन्शब्द. तदन्ताद् बहुव्रीहौ अ. समासान्तो भवति । अन्तर्लोमान्यस्य अन्तर्लोम । बहिर्लोम प्रावार. ।

४३. नक्षत्रान्नेतुः ।

नक्षत्रवाचिनः परो यो नेतृशब्दस्तदन्ताद् बहुव्रीहौ अः समासान्तो भवति । मृगो नेता आसां मृगनेत्रा रात्रयः । एव पुष्यनेत्रा । नक्षत्रादिति किम् ? देवदत्तनेतृक । नेत्रशब्देनैव सिद्धे नेतृशब्दात् कप् मा भूदिति वचनम् ।

४४. नञ्-सु-व्युप-त्रिभ्यश्चतुरः ।

नञ्, सु, वि, उप, त्रि—इत्येतेभ्यः परो यश्चतुर्शब्दः तदन्ताद् बहुव्रीहौ अः समासान्तो भवति । अविद्यमानानि अदृश्यानि वा चत्वारि यस्य सोऽचतुर. । सुदृश्यानि शोभनानि वा चत्वारि यस्य सुचतुरः । विसदृशानि विगतानि वा चत्वारि यस्य विचतुरः । चत्वार. समीपे येषा सङ्ख्येयानां ते उपचतुरा. । त्रयो वा चत्वारो वा त्रिचतुराः । समासान्तविधेरनित्यत्वादिह न भवति । त्रयश्चत्वारो यस्य स त्रिचत्वा उन्मुग्धः । उपगताश्चत्वारो येन स उपचत्वाः ।

४५. नाभेः संज्ञायाम् ।

नाभिशब्दान्ताद् बहुव्रीहौ अः समासान्तो भवति संज्ञायां विषये । पद्मनाभः, ऊर्णनाभः, हेमनाभः, वज्रनाभः, हिरण्यनाभ. । संज्ञायामिति किम् ? विकसितवारिजनाभिः । अधोनाभं प्रहतवानिति अव्ययीभावेऽपि तिष्ठद्ग्वादिषु तथा पाठात् सिद्धम् ।

४६. नञ्बहुभ्यामृचो माणवचरणयोः ।

नञ्, बहु—इत्येताभ्यां परो यः ऋच्शब्दस्तदन्ताद् बहुव्रीहौ अ. समासान्तो भवति यथासंख्यं माणवे चरणे च वाच्ये । न विद्यन्ते ऋचोऽस्य अनृचो माणवः । बह्वृचश्चरणः । माणवचरणयोरिति किम् ? अनृक्कं साम । बह्वृक्कं

सूक्तम्। 'ऋक्पुरप्पथिभ्यः समासे' [८/३/५६] इत्यनेनैव सिद्धे नियमार्थं[1] वचनम्।

४७. नञ्-सु-दुर्भ्यः सक्ति-हलि-सक्थेर्वा।

नञ्, सु, दुर्— इत्येतेभ्यः परे ये सक्ति, हलि, सक्थि इत्येते शब्दास्तदन्ताद् बहुव्रीहौ अः समासान्तो वा भवति। सञ्जन सक्तिः। अविद्यमाना सक्तिरस्य असक्तः। असक्तिः। सुसक्त, सुसक्तिः। दुःसक्तः, दुःसक्तिः। अहलः, अहलिः। सुहल, सुहलिः, दुर्हल। दुर्हलि। असक्थ, असक्थिः। सुसक्थ, सुसक्थिः। दुःसक्थः, दुःसक्थिः। नञ्सुदुर्भ्य इति किम्? बहुहलिः पुरुष। गौरसक्थी स्त्री। दीर्घसक्थि शकटम्। हलसक्तशब्दाभ्यां सिद्धे कबऽभावार्थं[2] वचनम्, तेन न विद्यते हलमस्य अहलक् इत्यादि न भवति। वचनभेदो यथासंख्यनिवृत्त्यर्थ।

४८. धेन्वनडुहर्क्सामर्ग्यजुषाक्षिभ्रुव-दारगवोर्वष्ठीव-पदष्ठीव-नक्तंदिव-रात्रिंदिवाहर्दिवाहोरात्र-वाङ्मनसं द्वंद्वे।

धेन्वनडुहादयः शब्दा द्वन्द्वसमासे अप्रत्ययान्ता निपात्यन्ते। धेनुश्च अनड्वांश्च धेन्वनडुहौ। धेन्वनडुहा। असमाहारार्थं धेन्वनडुहग्रहणम्। समाहारे तु 'द्वंद्वाच्चुदषहात्...' [८/३/३६] इत्यादिनैव सिद्ध। ऋक् च साम च ऋक्सामे। ऋक् च यजुश्च ऋग्यजुषमधीयानान्। अक्षिणी च भ्रुवौ च अक्षिभ्रुवम्। दाराश्च गावश्च दारगवम्। अत्र भ्रूशब्दस्य निपातनादुवादेशोऽक्षिदारशब्दयोश्च पूर्वनिपात[3]। ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम्। अत्र निपातनाद् टिलोपः। पादौ च अष्ठीवन्तौ च पदष्ठीवम्। अत्र पद्भावश्च। नक्तं च दिवा च नक्तंदिवम्। अत्र पूर्वपदस्य मुगागम। रात्रिश्च दिवा च रात्रिंदिवम्। अत्रापि मुगागम। अहश्च दिवा च अहर्दिवम्। अत्र पर्याययोरपि[4] वीप्सायां द्वद्वो निपातनात्। अहरहरित्यर्थ। रात्रिपर्यायो वाऽन्यतर इत्येके। अहर्निशमित्यर्थ। अहश्च रात्रिश्च अहोरात्र। पुण्याविमावहोरात्रौ। वाक् च मनश्च वाङ्मनसे। द्वद्वे इति किम्? धेनोरनड्वान् धेन्वनड्वान्।

४९. जात-महद्-वृद्धादुक्ष्णः कर्मधारयात्।

जात, महत्, वृद्ध— इत्येतेभ्य. परो य उक्षन्शब्दस्तदन्तात् कर्मधारयात् अ. समासान्तो भवति। जातश्चासौ उक्षा च जातोक्ष। महोक्ष, वृद्धोक्ष। जातादिभ्य इति किम्? परमोक्षा, उत्तमोक्षा। उक्ष्ण इति किम्? महाश्मश्रु। कर्मधारयादिति किम्? जातस्य उक्षा— जातोक्षा। महदुक्षा, वृद्धोक्षा।

५०. स्त्रियाः पुंसो द्वंद्वाच्च।

स्त्रीशब्दात् परो य पुंस्शब्दस्तदन्तात् द्वन्द्वाच्चकारात् कर्मधारयाच्च अ. समासान्तो भवति। स्त्री च पुमांश्च स्त्रीपुंसम्। स्त्रीपुंसौ, स्त्रीपुंसा। कर्मधारयात्— स्त्री चासौ पुमांश्च स्त्रीपुंस शिखण्डी। स्त्रीपुंस विद्धि राक्षसम्। द्वद्वाच्चेति किम्? स्त्रियाः पुमान्— स्त्रीपुमान्।

५१. पुरुषायुष-द्व्यायुष-त्र्यायुष-द्विस्ताव-त्रिस्तावं तत्पुरुषे।

पुरुषायुषादय शब्दा अप्रत्ययान्तास्तत्पुरुषसमासे निपात्यन्ते। पुरुषस्यायुः— पुरुषायुषम्। द्वे आयुषी समाहृते— द्व्यायुषम्। त्र्यायुषम्। निपातनात् समाहारादन्यत्र न भवति। द्व्यायु. प्रिय। त्र्यायुः प्रियः। द्विस्तावती द्विस्तावा। त्रिस्तावा वेदि.। वेद्यामनयो प्रयोग.। निपातनादेव अतीशब्दलोपस्तत्पुरुषसमासश्च। प्रकृतौ यावती वेदिस्तावती द्विगुणा

---

१ उभयथापि नियम।

२. अत्र अहल इति साध्य तच्च हलशब्दस्यापि सिध्यति इति सिद्धो सत्यां यत् हलिशब्दोपादानं तज्ज्ञापयति हलादपि कप् न भवति। हलि प्रति तु विकाराशङ्कापि न, तेन हल्यन्ताद् वैकल्पिक कब् भवति।

३. 'अल्पस्वर' [३/१/१७६] इत्यनेन भ्रूगोशब्दयो पूर्वनिपाते प्राप्ते।

४. ननु वाहर्दिवशब्दौ तुल्यार्थौ, तयोश्चोक्तार्थानामप्रयोग इति 'समासमर्थेनकशेषः' [३/१/१३४] इत्येकशेषारम्भाद्वा द्वन्द्वो नोपपद्यत इत्याह।

त्रिगुणा वा कस्यांचिद् विकृतौ भवति । प्रकृतिविकृती यागविशेषौ । अन्यत्रापि दृश्यते—द्विस्तावोऽग्निः, त्रिस्तावोऽग्निः ।

५२. श्वसो वसीयसः ।

श्वसः परो यो वसीयस्शब्दस्तदन्तादः समासान्तो भवति तत्पुरुषसमासे । वसुमच्छब्दादीयसौ मतोष्टेश्च लोपे वसीयः । शोभनं वसीयः—श्वोवसीयसं कल्याणम् ।

५३. निसश्च श्रेयसः ।

निस्शब्दाच्चकारात् श्वस्शब्दाच्च परो यः श्रेयस्शब्दस्तदन्तादः समासान्तो भवति तत्पुरुषसमासे । निश्चितं श्रेयः—निःश्रेयसं निर्वाणम् । शोभनं श्रेयः—श्वःश्रेयसम् ।

५४. संख्याव्ययादङ्गुलेः ।

संख्याया अव्ययाच्च परो योऽङ्गुलिशब्दः तदन्तात् अः समासान्तो भवति तत्पुरुषसमासे । द्वयोरङ्गुल्योः समाहारः—द्व्यङ्गुलम् । त्र्यङ्गुलम् । द्वे अङ्गुली प्रमाणमस्य मात्रट्, तस्य लुक्, ततः समासान्तः—द्व्यङ्गुलम् । त्र्यङ्गुलम् । द्व्यङ्गुलप्रियः, त्र्यङ्गुलप्रियः । अव्यय—निर्गतमङ्गुलिभ्यो निरङ्गुलम् । अत्यङ्गुलम् । तत्पुरुषे इति किम् ? उपाङ्गुलि, पञ्चाङ्गुलिर्हस्त, अनङ्गुलि पुरुषः । कथमात्माङ्गुलं, प्रमाणाङ्गुलं, उत्सेधाङ्गुलमिति ? अङ्गुलशब्दः प्रमाणवाची प्रकृत्यन्तरम् । यथा '**स्वेनाङ्गुलप्रमाणेनाऽङ्गुलानां शतं पुमान्**' । हस्तोऽङ्गुलविंशत्येति ।

५५. सर्वांश-संख्यात-पुण्य-वर्षा-दीर्घाच्च रात्रेः ।

सर्वशब्दादंश एकदेशस्तद्वाचिभ्यः संख्यात, पुण्य, वर्षा, दीर्घ इत्येतेभ्यश्च चकारात् संख्याऽव्ययेभ्यश्च परो यो रात्रिशब्दस्तदन्तात् अ समासान्तो भवति तत्पुरुषसमासे । सर्वा रात्रिः—सर्वरात्रः । अंश—पूर्वरात्रः, अपररात्रः, अर्धरात्रः, द्वितीयरात्रः । संख्याता रात्रि —संख्यातरात्रः । पुण्यरात्रः । वर्षाणां रात्रिः—वर्षारात्रः । दीर्घरात्रः । संख्या—एका रात्रिः एकरात्रः । द्वयोः रात्र्योः समाहार —द्विरात्रः । त्रिरात्रः । द्वयो रात्र्योर्भवः—द्विरात्रः । त्रिरात्रः । द्विरात्रा । द्विरात्रप्रियः, त्रिरात्रप्रियः । द्विरात्रजातः, त्रिरात्रजातः । अव्यय—अतिरात्रः, अतिरात्रा । नीरात्रः, नीरात्रा ।

५६. ऋक्-पुरप्-पथिभ्यः समासे ।

ऋच्, पुर्, अप्, पथिन्—इत्येतदन्तात्समासात् अः समासान्तो भवति समासे—समासमात्रविषये । ऋचोऽर्धं—अर्धर्चः । ऋचः समीपमुपर्चम् । सप्तर्चं सूक्तं, उच्चारितर्चः । श्रिया पूः श्रीश्चासौ पूश्चेति वा श्रीपुरम् । पिष्टपुरं, त्रिपुरं[1], स्फीतपुरो देशः । द्विर्गता आपोऽस्मिन् द्वीपम्[2] । समीपं, प्रतीपं, बह्वपं तडागम् । जलपथः, स्थलपथः, उपपथं, प्रतिपथं, विशालपथं नगरम् । पुरपथशब्दाभ्यां सिद्धे पुर् पथिन् इत्येतयोरुपादानमेतद्विषये प्रयोगनिवृत्त्यर्थम्[3] ।

५७. धुरोऽनक्षस्य ।

धुरन्तात्समासात् अः समासान्तो भवति सा चेद् धूः अक्षसंबन्धिनी न भवति । राज्यधुरा, रणधुरा, द्विधुरी, त्रिधुरी, उपधुरं, महाधुरं शकटम् । अनक्षस्येति किम् ? अक्षधूः, दृढधूरक्षः ।

५८. प्रत्यन्ववात् सामलोम्नः ।

प्रति, अनु, अव—इत्येतेभ्यः परौ यौ सामन्लोमन्शब्दौ तदन्तात्समासात् अः समासान्तो भवति । प्रतिगतं

---

१. तिसृणां पुरां समाहारः । उत्तरपदस्यादन्तत्वाभावात् स्त्रीत्वाभावः, किंतु अन्यो नपुंसकः सर्वः ।

२. '**द्व्यन्तरुपसर्गेभ्योऽप ईत्**' [३/२/१५३] इत्यनेन अप ईप् ।

३. समासान्तविषये हलान्तयोः प्रयोगो न भवतीत्यर्थः ।

माम्न्—प्रतिसामम् । प्रतिगतं सामास्य प्रतिसामः । एवमनुसामं, अनुसामः । अवसामं, अवसामः । प्रतिलोमं, प्रतिलोमः । अनुलोमं, अनुलोमः । अवलोमं, अवलोमः । अव्ययीभावे तु 'नपुंसकाद् वा' [८/३/३२] इति विकल्प एव । साम साम प्रति साम्नोऽभिमुखं वा प्रतिसाम, प्रतिसामम् । साम सामानु साम्नः समीपं साम्ना तुल्यायाम वा अनुसाम, अनुसामम् । एवं प्रतिलोम, प्रतिलोमम् । अनुलोम, अनुलोमम् । प्रत्यन्ववादिति किम् ? निःषाम वचनम् । निर्लोमा पुरुषः । सामलोम्न इति किम् ? प्रतिकर्म ।

५९. अक्ष्णोऽप्राण्यङ्गे ।

अक्षिशब्दान्तात्समासात् अः समासान्तो भवति न चेत् सोऽक्षिशब्द प्राण्यङ्गे वर्तते । लवणस्याक्षि लवणमक्षीवेति वा लवणाक्षम् । पुष्कराक्षं, गवाक्षः, रुद्राक्षं, महिषाक्षो गुग्गुलः । अप्राण्यङ्ग इति किम् ? अजाक्षि, उपाक्षि, वामाक्षि ।

६०. कटात् ।

कटपूर्वादक्षिशब्दात् अः समासान्तो भवति । कटस्याक्षि—कटाक्षः । प्राण्यङ्गार्थं वचनम् ।

६१. ब्रह्म-हस्ति-राज-पल्याद् वर्चसः ।

ब्रह्मन्, हस्तिन्, राजन्, पल्य—इत्येतेभ्यः परो यो वर्चस्शब्दस्तदन्तात्समासात् अः समासान्तो भवति । वर्चस्तेजो बलं वा । ब्रह्मणो वर्चः—ब्रह्मवर्चसम् । एव हस्तिवर्चसं, राजवर्चसं, पल्यवर्चसम् । पल्यं कटकृतं पलालवर्तिकृतं वा धान्यभाजनम् । ब्रह्मादिभ्य इति किम् ? नृपाः सोमार्कवर्चस ।

६२. अन्धसमवात् तमसः ।

अन्ध, सम्, अव—इत्येतेभ्यः परो यस्तमस्शब्दः तदन्तात्समासात् अः समासान्तो भवति । अन्धं करोति इत्यन्धम् । अन्धं च तत्तमश्च अन्धं तमोऽस्मिन्निति वा अन्धतमसम् । अन्धश्च तमश्चेति अन्धतमसं अन्धतमसे वा । संततं तमः संततं तमसा संततं तमोऽस्मिन्निति वा संतमसम् । अवहीनं तमोऽवहीनं तमसा अवहीनं तमोऽस्मिन्निति वा अवतमसम् ।

६३. अन्ववतप्ताद् रहसः ।

अनु, अव, तप्त—इत्येतेभ्यः परो यो रहस्शब्दः तदन्तात्समासात् अः समासान्तो भवति । अनुगतं रहोऽनुगतं रहसा वा अनुरहसम् । अनुगतं रहोऽस्येति अनुरहसः । अवहीनं रहोऽवहीनं रहसा वा अवरहसम् । अवहीनं रहोऽस्य इत्यवरहसः । तप्तं तप्ताय इवानधिगम्यं रहः तप्तरहसम् । तप्तं रहोऽस्येति तप्तरहसः ।

६४. प्रतेरुरसः सप्तम्याः ।

प्रतिशब्दात्परो य उरस्शब्दस्तदन्तात्सप्तम्यन्तात् समासात् अः समासान्तो भवति । उरसि वर्तते—प्रत्युरसम् । कारकार्थेऽव्ययीभावः । उरसि प्रतिष्ठितं—प्रत्युरसम् । 'निरादयो गताद्यर्थे पञ्चम्या' [३/१/६६] इति तत्पुरुषसमासः । सप्तम्या इति किम् ? प्रतिगतमुरः उरः प्रति वा प्रत्युरः ।

६५. उपसर्गादध्वनः ।

उपसर्गात् परो योऽध्वन्शब्दस्तदन्तात् समासात् अः समासान्तो भवति । प्रगतमध्वान प्राध्वं शकटम् । प्राध्वो रथः । उपक्रान्तमध्वानमुपाध्वम् । निरध्वं, अत्यध्वम् ।

६६. संख्या-पाण्डूदक्-कृष्णाद् भूमेः ।

संख्यावाचिभ्यः पाण्डु, उदच्, कृष्ण—इत्येतेभ्यश्च परो यो भूमिशब्दस्तदन्तात्समासात् अः समासान्तो भवति ।

द्वयोर्भूम्योः समाहारो द्विभूमम् । त्रिभूमम् । द्वे भूमी अस्य द्विभूमः । त्रिभूमः प्रासादः । पाण्डुर्भूमिः पाण्डुभूमम् । पाण्डुभूमो देशः । उदीची भूमिः उदग्भूमम् । उदग्भूमो देशः । कृष्णा भूमिः कृष्णभूमम् । कृष्णभूमो देशः । 'संख्याव्ययेन एकार्थे भूममिति'[1] पाण्डुभूमादेर्नपुंसकत्वम् । संख्यादिभ्य इति किम् ? सर्वभूमिः ।

६७. इच् युद्धे ।

युद्धे यः समासो विहितस्तस्मादिच् समासान्तो भवति । केशाकेशि, दण्डादण्डि, मुसलामुसलि, मुष्टामुष्टि, अस्यसि । चकारः **'इच्यस्वरे दीर्घ आच्च'** [३/२/७३] इत्यत्र विशेषणार्थः ।

६८. द्विदण्ड्यादिः क्रियायाम् ।

क्रियायां गम्यमानायां द्विदण्डि इत्येवमादयः समासा इजन्ताः साधवो भवन्ति । द्वौ दण्डावस्मिन् प्रहरणे द्विदण्डि प्रहरति । एवं द्विमुसलि । उभादन्ति, उभयादन्ति । उभाबाहु, उभयाबाहु । उभौ हस्तावस्मिन् पाने उभाहस्ति पिबति । एवमुभयाहस्ति । उभापाणि, उभयापाणि । उभाञ्जलि, उभयाञ्जलि । उभौ कर्णावस्मिन् श्रवणे उभाकर्णि शृणोति । एवमुभयाकर्णि । अन्ते वासोऽस्मिन् स्थाने अन्तेवासि तिष्ठति । अन्तेवासी गुरोरिति ताच्छीलिकान्तोऽन्य एव शब्दः । संहितानि पुच्छान्यस्मिन् सरणे संहितपुच्छि धावति । एक पादोऽस्मिन् गमने एकपदि गच्छति । समानौ पादावस्मिन् सपदि गच्छति । आच्यपादौ आच्यपदि शेते । एव प्रोह्यपदि हस्तिनं वाहयति । निकुच्य कर्णौ निकुच्यकर्णि धावति । तिष्ठद्ग्वादित्वादव्ययीभावः । उभाबाहु, उभयाबाहु इत्यत्र निपातनादिज्लुकि स्थानिवद्भावादिजन्तत्वेन अव्ययीभावसंज्ञा । विभक्त्यलुक् पादस्य पद्भावः समानस्य सभावश्चेत्यादि सर्वं निपातनात् सिद्धम् । क्रियायामिति किम् ? द्वौ दण्डावस्यां शालायां द्विदण्डा । त्रिमुसला ।

६९. नञोऽव्ययात् संख्याया डस्तत्पुरुषात् ।

नञोऽव्ययाच्च परो यः संख्याशब्दस्तदन्तात् तत्पुरुषात् डः समासान्तो भवति । न दश—अदशाः । अनवाः । न्यूना दश, न्यूना नव इत्यर्थः । नञ्पूर्वोऽयं वैकल्ये दृश्यते । अव्यय—निर्गतस्त्रिंशतोऽङ्गुलिभ्यः—निस्त्रिंशः खड्गः । निस्त्रिंश इव क्रूरकर्मा निस्त्रिंश खलः । त्रिंशतो निर्गतानि—निस्त्रिंशानि वर्षाणि । निस्त्रिंशान्यहानि । निश्चत्वारिंशानि । निष्पञ्चाशानि । नञव्ययादिति किम् ? गोत्रिंशत् । नञ्ग्रहणं[2] **'नञस्तत्पुरुषात्'** [८/३/५] इति प्रतिषेधे प्राप्ते प्रतिप्रसवार्थम् । संख्याया इति किम् ? निःशकृत् । तत्पुरुषादिति किम् ? न विद्यन्ते त्रयो यस्य सोऽत्रिः । शोभनास्त्रयो यस्य सुत्रिः । निर्गतास्त्रिंशदस्य निस्त्रिंशत् । डित्वं टिलोपार्थम् ।

७०. संख्याया बहुव्रीहेः ।

संख्यावाचिशब्दान्ताद् बहुव्रीहेर्डः समासान्तो भवति । द्वौ वा त्रयो वा द्वित्राः । पञ्चषाः, द्विदशाः, त्रिदशाः, आसन्नदशाः, अदूरदशाः, अधिकदशाः, उपदशाः, उपगणाः । संख्यान्तस्य प्रतिपदोक्तस्य बहुव्रीहेर्ग्रहणादिह न भवति—अत्रिः, सुत्रिः, प्रियपञ्चानः, प्रियषषः । बहुव्रीहेरिति किम् ? द्वादश, त्रयोदश ।

७१. सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदाजपद-प्रोष्ठपद-भद्रपदाः ।

सुप्रातादयो बहुव्रीहयो डप्रत्ययान्ता निपात्यन्ते । शोभनं कर्म प्रातरस्य सुप्रातः । शोभनं कर्म श्वोऽस्य सुश्वः ।

---

१. श्रीसिद्धलिङ्गानुशासनं, नपुंसकलिङ्गाधिकारः, श्लोक ८ ।

संख्याव्ययेन एकार्थे, भूमं संख्याऽव्ययात्पथम् ।
संख्या शतादिकाऽनन्ता, तथाहः सुदिनं कतः ॥

२. अव्ययद्वारेणापि सिद्धे ।

शोभनं कर्म दिवास्य सुदिवः । शारेरिव कुक्षिरस्य शारिकुक्षः । चतस्रोऽश्रयो यस्य चतुरश्रः । एण्या इव पादावस्य एणीपदः । एवमजपदः । प्रोष्ठो गौस्तस्येव पादावस्य प्रोष्ठपदः । भद्रौ पादावस्य भद्रपदः । निपातनात् पद्भावो विषयव्यवस्था च भवति ।

७२. नञ्सुदुर्भ्यः प्रजाया अस् ।

नञादिभ्यः परो यः प्रजाशब्दस्तदन्ताद् बहुव्रीहेरस् समासान्तो भवति । अविद्यमाना प्रजा अस्य अप्रजाः । अप्रजसौ, अप्रजसः । एवं सुप्रजसौ, दुष्प्रजसौ ।

७३. मन्दाऽल्पाच्च मेधायाः ।

मन्द, अल्प—इत्येताभ्यां चकारात् नञादिभ्यश्च परो यो मेधाशब्दस्तदन्ताद् बहुव्रीहेरस् समासान्तो भवति । मन्दा मेधास्य मन्दमेधाः । मन्दमेधसौ, मन्दमेधसः । एवमल्पमेधाः, अमेधाः, सुमेधाः, दुर्मेधाः ।

७४. द्विपदाद् धर्मादन् ।

धर्मशब्दान्ताद् द्विपदाद् बहुव्रीहेरन् समासान्तो भवति । साधूनामिव धर्मोऽस्य साधुधर्मा । क्षत्रियधर्मा, अनन्तधर्मा, विनाशधर्मा । विकल्पमिच्छन्त्येके--कल्याणधर्मा, कल्याणधर्मकः । तद्धर्मा, तद्धर्मकः । विपरीतधर्मा, विपरीतधर्मकः । द्विपदादिति किम् ? परमः स्वो धर्मोऽस्य परमस्वधर्मः । इह कस्मान्न भवति—परमः स्वधर्मोऽस्य परमस्वधर्मः ? प्रत्यासत्तेर्द्विपदस्य बहुव्रीहेर्यदि धर्म एवोत्तरपदं भवति तदा स्यादितीह न भवति ।

७५. सु-हरित-तृण-सोमेभ्यो जम्भात् ।

सु, हरित, तृण, सोम—इत्येतेभ्यः परो यो जम्भशब्दस्तदन्ताद् बहुव्रीहेरन् समासान्तो भवति । जम्भशब्दोऽभ्यवहार्यवचनो दंष्ट्रावचनो वा । शोभनो जम्भो जम्भा वा अस्य सुजम्भा । हरितजम्भा, तृणजम्भा, सोमजम्भा । दंष्ट्रापक्षे तृणमिव जम्भोऽस्य तृणजम्भा । एवं सोमजम्भा । स्वादिभ्य इति किम् ? चारुजम्भः, पतितजम्भः ।

७६. दक्षिणेर्मा व्याधयोगे ।

दक्षिणेर्मा इति बहुव्रीहिरन्नन्तो निपात्यते व्याधेन योगे सति । ईर्मं व्रणं वा । दक्षिणमङ्गमीर्ममस्य दक्षिणेऽङ्गे ईर्ममस्येति वा दक्षिणेर्मा मृगः । व्यद्धुकामस्य व्याधस्य दक्षिणं भागं वहकृत्य व्यधनानुकूलं स्थितो व्याधेन वा दक्षिणभागे कृतव्रण एवमुच्यते । व्याधयोगे इति किम् ? दक्षिणेर्मं शकटम् । दक्षिणेर्मः पशुः ।

७७. जातेरीयः सामान्यवति ।

जातिशब्दान्ताद् बहुव्रीहेरीय समासान्तो भवति सामान्यवति—सामान्याश्रयेऽन्यपदार्थे वाच्ये । ब्राह्मणो जातिरस्य ब्राह्मणजातीयः । अत्र ब्राह्मणशब्देन ब्राह्मणस्था जातिरुच्यते । एवं क्षत्रियजातीयः, सुजातीयः, दुर्जातीयः, नानाजातीयः, किंजातीयः । सामान्यवतीति किम् ? बहुजातिर्ग्रामः । अत्र ग्रामो न सामान्यवान्, किंतु नरस्था पुरुषाः ।

७८. मासाद् भृतिप्रत्ययादिकः ।

भृतौ वर्तमानात् य प्रत्ययो विहितस्तदन्तात् परो यो मासशब्दस्तदन्ताद् बहुव्रीहेरिकः समासान्तो भवति । पञ्च भृतिरस्य पञ्चकः, पञ्चको मासोऽस्य पञ्चकमासिकः । सप्तकमासिकः, विंशकमासिकः, त्रिंशकमासिकः, शत्यमासिकः, शतिकमासिकः कर्मकरः । भृतिप्रत्ययादिति किम् ? सुमासः । भृतिग्रहणं किम् ? वर्षासु भवो वार्षिकः, वार्षिको मासोऽस्य वार्षिकमासकः । प्रत्ययग्रहणं किम् ? भृतिर्मासोऽस्य भृतिमासकः । मासादिति किम् ? पञ्चको दिवसोऽस्य पञ्चकदिवसकः ।

७९. संप्राज्जानोर्ज्ञुज्ञौ ।

स, प्र—इत्येताभ्यां परस्य जानुशब्दस्य बहुव्रीहौ ज्ञु, ज्ञ इत्येतावादेशौ समासान्तौ भवतः । सगते जानुनी अस्य संज्ञुः, सज्ञः । प्रगते प्रवृद्धे प्रणते प्रकृष्टे वा जानुनी अस्य प्रज्ञुः, प्रज्ञ । सप्रादिति किम् ? विजानु । वचनभेदाद्यथा-संख्याभावः ।

८०. ऊर्ध्वाद् वा ।

ऊर्ध्वशब्दात् परो यो जानुशब्दस्तस्य बहुव्रीहौ ज्ञु, ज्ञ इत्येतावादेशौ समासान्तौ वा भवतः । ऊर्ध्वे जानुनी अस्य ऊर्ध्वज्ञुः, ऊर्ध्वज्ञः, ऊर्ध्वजानुः ।

८१. स्त्रियामूधसो नः ।

स्त्रियां वर्तमानस्य ऊधस्शब्दस्य समासान्तो नोऽन्तादेशो भवति बहुव्रीहौ । अकार उच्चारणार्थः । कुण्ड-मिवोधोऽस्याः कुण्डोध्नी । घटोध्नी, पीवरोध्नी, महोध्नी । स्त्रियामिति किम् ? महोधाः पर्जन्यः । बहुव्रीहेरिति किम् ? ऊधः प्राप्ता—प्राप्तोधा गौः । ननु 'ऊधसः' [२/३/१६] इति सूत्रे एव ऊध्न् इत्यादेशे कर्तव्ये कार्यसिद्धिर्भविष्यति किमिति समासान्तनान्तादेशेन ? उच्यते—पञ्चभिः कुण्डोध्नीभिः क्रीत इतीकणि तल्लुकि च ईबनिवृत्तौ ऊध्नादेशोऽपि निमित्ताभावेन निवृत्तः स्यात् । तेन पञ्चकुण्डोधाः इति विसर्गान्तमपरूपं भवेत् । पञ्चकुण्डोध्नेति चेष्यते ।

८२. धनुषो धन्वन् ।

धनुःशब्दस्य बहुव्रीहौ धन्वन् इत्ययमादेशः समासान्तो भवति । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । पिनाकधन्वा, गाण्डीवधन्वा । कथं **'गाण्डीवधनुषः खेभ्यो निश्चचार हुताशनः'** इति ? सञ्ज्ञात्वविवक्षायामुत्तरेण विकल्पो भविष्यति ।

८३. वा संज्ञायाम् ।

धनुःशब्दस्य बहुव्रीहौ धन्वन् इत्यादेशः समासान्तो वा भवति संज्ञाया विषये । शतधन्वा, शतधनुः । पुष्पधन्वा, पुष्पधनुः ।

८४. खरखुराभ्यां नासिकाया नस् ।

सञ्ज्ञायामित्यनुवर्तते । खर, खुर—इत्येताभ्यां परस्य नासिकाशब्दस्य बहुव्रीहौ नस् इत्ययमादेशः समासान्तो भवति सञ्ज्ञाया विषये । खरा खरस्येव वा नासिका अस्य खरणाः । खरणसौ । खुर इव नासिका अस्य खुरणाः । खुरणसौ । **'पूर्वपदस्थात् संज्ञायामगः'** [२/२/७१] इति णत्वम् । सञ्ज्ञायामिति किम् ? खरनासिकः, खुरनासिकः ।

८५. अस्थूलाच्च नसः ।

स्थूलशब्दवर्जितात् पूर्वपदात् खरखुरशब्दाभ्यां च परस्य नासिकाशब्दस्य बहुव्रीहौ नस इत्ययमादेशः समासान्तो भवति संज्ञायां विषये । द्रुरिव नासिकास्य द्रुणसः । वार्ध्रीव नासिकास्य वार्ध्रीणसः । **'स्वरवृद्धिनिमित्तस्य···'** [३/२/५६] इत्यादिना पुंवद्भावाऽभावः । गोरिव नासिकस्य गोनसः । कुम्भीनसः, खरणसः, खुरणसः । अस्थूलादिति किम् ? स्थूलनासिकः । संज्ञायामिति किम् ? तुङ्गा नासिकास्य तुङ्गनासिकः । कथं गोनासः ? यद्यस्ति नासाशब्देन भविष्यति । चकारः पूर्वेणास्य बाधानिवृत्त्यर्थः ।

८६. उपसर्गात् ।

क्रियायोगे यः प्रादिरुपसर्गसंज्ञो भवति तस्मात् परस्य नासिकाशब्दस्य बहुव्रीहौ नस इत्ययमादेशः समासान्तो भवति । प्रगता प्रवृद्धा वा नासिका अस्य प्रणसं मुखम् । **'नसस्य'** [२/२/७५] इति णत्वम् । उन्नता उद्गता वा नासिका

अस्य उन्नसं मुखम् । असंज्ञार्थं वचनम् ।

८७. वेः खु-ख्य-ख्र-ग्राः ।

विशब्दादुपसर्गात् परस्य नासिकाशब्दस्य बहुव्रीहौ खु, ख्य, ख्र, ग्र—इत्येते आदेशाः समासान्ता भवन्ति । विगता नासिका अस्य विखु., विख्यः, विख्रः, विग्रः । उपसर्गादिति किम् ? वेः पक्षिण इव नासिकास्य विनासिकः ।

८८. जायाया जानिः ।

जायाशब्दस्य बहुव्रीहौ जानिरित्ययमादेशः समासान्तो भवति । युवतिर्जाया अस्य युवजानिः । प्रियजानिः, शोभनजानिः, वधूजानिः, अनन्यजानिः ।

८९. सूत्-पूति-सुरभिभ्यो गन्धादिद् गुणे ।

सु, उत्, पूति, सुरभि—इत्येतेभ्य परो यो गन्धशब्दो गुणे वर्तते तदन्ताद् बहुव्रीहेरित्समासान्तो भवति । शोभनो गन्धो गुणोऽस्य सुगन्धि चन्दनम् । उद्गन्धि कमलम् । पूतिगन्धि करञ्जम् । सुरभिगन्धि केसरम् । उत्तरत्र आगन्तोर्वावचनादिह स्वाभाविकाद् भवति । स्वादिभ्य इति किम् ? तीव्रगन्धं हिङ्गु । उग्रगन्धा वचा । गन्धादिति किम् ? सुरसः । गुणे इति किम् ? शोभना गन्धाः कुष्ठादयोऽस्य[1] सुगन्ध आपणिकः । इदिति तकार उच्चारणार्थः ।

९०. आगन्तौ वा ।

स्वादिभ्यः पर आगन्तौ आहार्ये गुणे वर्तते यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरित् समासान्तो वा भवति । सुगन्धि, सुगन्धं वा शरीरम् । उद्गन्धिः, उद्गन्धो वा आपण. । पूतिगन्धि, पूतिगन्धं वा जलम् । सुरभिगन्धिः, सुरभिगन्धो वा पवनः ।

९१. अल्पे ।

अल्पेऽर्थे यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरित् समासान्तो वा भवति । सूपस्य गन्धो मात्रास्मिन् सूपगन्धि, सूपगन्ध वा भोजनम् । अल्पसूपमित्यर्थ. । माल्यगन्धिः, माल्यगन्धो वा उत्सवः । एवं दधिगन्धि, दधिगन्ध वा भोजनम् । असामानाधिकरण्येऽपि हस्तगमनादित्वाद् बहुव्रीहिः ।

९२. उपमानात् ।

उपमानात् परो यो गन्धशब्दस्तदन्ताद् बहुव्रीहेरित् समासान्तो वा भवति । उत्पलस्येव गन्धो यस्य उत्पलगन्धि, उत्पलगन्ध वा मुखम् । करीषगन्धि, करीषगन्ध वा शरीरम् ।

९३. पादस्य लोपोऽहस्त्यादेः ।

उपमानादित्यनुवर्तते । हस्त्यादिवर्जितादुपमानात् परस्य पादशब्दस्य अन्तस्य लोपो भवति बहुव्रीहौ । व्याघ्रस्येव पादावस्य व्याघ्रपात् । सिंहपाद्, ऋक्षपाद् । अहस्त्यादेरिति किम् ? हस्तिन इव पादावस्य हस्तिपादः । अश्वपादः । हस्त्यादयो यथा—हस्तिन्, अश्व, कटोल, कटोलक, कण्डोल, कण्डोलक, गण्डोल, गण्डोलक, गडोल, गडोलक, गण्ड, महेला, दासी, गणिका, कुसूल, कपोत, जाल, अज इति हस्त्यादिः ।

९४. कुम्भपद्यादिः ।

कुम्भपद्यादयः शब्दाः कृतपादान्तलोपा ईबन्ता एव बहुव्रीहयः समासान्ता निपात्यन्ते । कुम्भाविव पादावस्याः

---

१. कुष्ठ औषधविशेषः ।

कुम्भपदी । जालपदी, एकपदी, शतपदी, स्थूणापदी, सूत्रपदी, मुनिपदी, शितिपदी, आर्द्रपदी, गोधापदी, कलशीपदी, दासीपदी, विष्णुपदी, कृष्णपदी, कुणिपदी, गुणपदी, द्रोणपदी, द्रोणीपदी, सकृत्पदी, सूकरपदी, शुचिपदी, सूचीपदी, विपदी, अपदी, निष्पदी, अष्टापदी, अशीतिपदी इति कुम्भपद्यादिः । येऽत्रोपमानपूर्वास्तेषां पूर्वेण सख्यादीनां चोत्तरेण सिद्धे यदिह वचनं तेन 'पादः' [२/३/१५] इतीब्विकल्पो न भवति । कथमेकपादिति ? केचिदिहैकपदीशब्दं न पठन्ति ।

९५. सुसंख्यायाः ।

सुपूर्वस्य संख्यापूर्वस्य च पादशब्दस्य बहुव्रीहौ अन्तस्य लोपः समासान्तो भवति । शोभनौ पादावस्य सुपाद् । द्विपाद्, त्रिपाद्, चतुष्पाद् । स्त्रिया तु 'पादः' [२/३/१५] इति पक्षे ईप् । सुपदी, सुपात् । द्विपदी, द्विपाद् ।

९६. वयसि दन्तस्य दत् ।

पूर्वमनुवर्तते । सुपूर्वस्य संख्यापूर्वस्य च दन्तशब्दस्य बहुव्रीहौ वयसि गम्यमाने दतृ इत्ययमादेशः समासान्तो भवति । शोभनाः सुजाताः समस्ता वा दन्ता अस्य सुदन् कुमारः । सुदती कुमारी । द्वौ दन्तावस्य द्विदन् बालः । त्रिदन्, चतुर्दन् । षड् दन्ता अस्य षोडन्निति तु 'एकादश षोडश षोडन्...' [३/२/६४] इत्यादिसूत्रे निपातनाद् भविष्यति । वयसीति किम् ? सुदन्तो दाक्षिणात्यः । द्विदन्तः कुञ्जरः । ऋकार ईबाद्यर्थः ।

९७. स्त्रियां संज्ञायाम् ।

बहुव्रीहौ स्त्रियां संज्ञायां विषये दन्तशब्दस्य दत्रादेशः समासान्तो भवति । अय इव दन्ता अस्या अयोदती । फालदती, परशुदती । एवनामा काचित् । स्त्रियामिति किम् ? वज्रदन्तः, नागदन्तः । संज्ञायामिति किम् ? समदन्ती, स्निग्धदन्ती ।

९८. श्यावाऽरोकाद् वा ।

सञ्ज्ञायामित्यनुवर्तते । श्याव, अरोक—इत्येताभ्यां परो यो दन्तशब्दस्तस्य बहुव्रीहौ दत्रादेशः समासान्तो वा भवति संज्ञाया विषये । श्यावाः कपिशा दन्ता अस्य श्यावदन् । श्यावदन्तः । अरोका निश्छिद्रा निर्दीप्तयो वा दन्ता अस्य अरोकदन् । अरोकदन्तः । संज्ञायामिति किम् ? श्यावदन्तः, अरोकदन्तः ।

९९. अग्रान्त-शुद्ध-शुभ्र-वृष-वराहाहि-मूषिक-शिखरात् ।

अग्रान्तेभ्य. शुद्ध, शुभ्र, वृष, वराह, अहि, मूषिक, शिखर—इत्येतेभ्यश्च परो यो दन्तशब्दस्तस्य बहुव्रीहौ दत्रादेश. समासान्तो वा भवति । कुड्मलाग्रमिव दन्ता अस्य कुड्मलाग्रदन् । कुड्मलाग्रदन्तः । शिखराग्रदन्, शिखराग्रदन्तः । शुद्धा दन्ता अस्य शुद्धदन् । शुद्धदन्तः । शुभ्रदन्, शुभ्रदन्तः । वृषस्येव दन्ता अस्य वृषदन् । वृषदन्तः । वराहदन्, वराहदन्तः । अहिदन्, अहिदन्तः । मूषिकदन्, मूषिकदन्तः । शिखरदन्, शिखरदन्तः । योगविभागात् सञ्ज्ञायामिति निवृत्तम् ।

१००. व्युद्भ्यां काकुदस्य लोपः ।

वि, उत् इत्येताभ्यां परस्य काकुदशब्दस्य लोपः समासान्तो भवति बहुव्रीहौ । विगतं काकुदं ताल्वस्य विकाकुत् । उत्काकुत् ।

१०१. पूर्णाद् वा ।

पूर्णशब्दात्परस्य काकुदस्य लोपः समासान्तो वा भवति बहुव्रीहौ । पूर्णं काकुदमस्य पूर्णकाकुत्, पूर्णकाकुदः । पूर्णादिति किम् ? रक्तकाकुदः ।

१०२. ककुदस्याऽवस्थायाम् ।

अवस्था वयः । ककुदशब्दस्य बहुव्रीहौ अवस्थायां गम्यमानायां लोपः समासान्तो भवति । न संजातं ककुदमस्य

असंजातककुद् बाल । पूर्णककुद् युवा । स्थूलककुद् बलवान् । यष्टिककुद् । नातिस्थूलो नातिकृशः । सन्नककुद् कृशः । पन्नककुद् वृद्धः । अवस्थायामिति किम् ? श्वेतककुदः । ककुच्छब्देनैव सिद्धे ककुदशब्दस्य अस्मिन् विषये प्रयोगनिवृत्त्यर्थं वचनम् ।

१०३. त्रिककुद् गिरौ ।

गिरौ पर्वतेऽभिधेये ककुदशब्दस्य त्रिशब्दात् परस्य बहुव्रीहौ ककुदादेशः समासान्तो निपात्यते । त्रीणि ककुदानि ककुदाकाराणि शिखराण्यस्य त्रिककुत् पर्वतः । त्रेर्गिराविति सिद्धे निपातनं गिरिविशेषप्रतिपत्त्यर्थम् । तेन अन्यस्मिन् त्रिककुद इत्येव भवति ।

१०४. सुहृद्दुर्हृदौ मित्रामित्रयोः ।

सुहृत्, दुर्हृदिति सुपूर्वस्य दुष्पूर्वस्य च हृदयशब्दस्य बहुव्रीहौ यथासंख्य मित्रे—सख्यौ अमित्रे—शत्रौ चाभिधेये हृद् इत्ययमादेशः समासान्तो निपात्यते । शोभन हृदय यस्य सुहृन्मित्रम् । दुर्हृदऽमित्र । मित्रामित्रयोरिति किम् ? सुहृदयो मुनिः । दुर्हृदयो व्याधः ।

१०५. उरःसर्पिर्दधि-मधूपानच्छालिभ्यः कप् ।

उरस्, सर्पिस्, दधि, मधु, उपानह्, शालि— इत्येतदन्ताद् बहुव्रीहेः कप् समासान्तो भवति । प्रियमुरो यस्य स प्रियोरस्कः । प्रियसर्पिष्कः, प्रियदधिकः, प्रियमधुक, प्रियोपानत्क, प्रियशालिक । पकारो **'न कपि'** [२/३/११०] इत्यत्र **विशेषणार्थः** ।

१०६. पुमनडुन्नौपयोलक्ष्मीभ्य एकत्वे ।

एकत्वविषये पुम्, अनडुह्, नौ, पयस्, लक्ष्मी— इत्येते शब्दास्तदन्ताद् बहुव्रीहे कप् समासान्तो भवति । प्रिय पुमानस्य प्रियपुंस्क । प्रियानडुत्कः, प्रियनौकः, प्रियपयस्कः, प्रियलक्ष्मीकः । एकत्वे इति किम् ? द्विपुमान्, द्विपुंस्क । बह्वनड्वान्, बह्वनडुत्क । बहुनौ, बहुनौकः । बहुपयाः, बहुपयस्कः । बहुलक्ष्मीः, बहुलक्ष्मीक । **'शेषाद् वा'** [८/३/११०] इति विकल्पः । केचिल्लक्ष्मीशब्दात् द्वित्वबहुत्वयोरपि नित्यं कपमिच्छन्ति । अपरे तुल्ययोगेऽपि । सलक्ष्मीको विनाशित ।

१०७. नञोऽर्थात् ।

नञ परो योऽर्थशब्दस्तदन्ताद् बहुव्रीहे कप् समासान्तो भवति । न विद्यतेऽर्थो यस्यानर्थक वच । नञ इति किम् ? अपार्थ, अपार्थकम् ।

१०८. स्त्रियामिनः ।

स्त्रिया वर्तमानादिन्नन्ताद् बहुव्रीहेः कप् समासान्तो भवति । बहवो दण्डिनोऽस्यां बहुदण्डिका । बहुच्छत्रिका सेना । बहुरासभराविका शाला । **अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति ।** बहुस्वामिका, बहुवाग्मिका पुरी । स्त्रियामिति किम् ? **बहुदण्डी, बहुदण्डिको राजा ।**

१०९. ऋन्नित्यदितः ।

ऋकारान्तान्नित्यं दिदादेशो यस्मात् तदन्ताच्च बहुव्रीहेः कप् समासान्तो भवति । बहुकर्तृकः, बहुहर्तृकः । नित्यदित्—बहुकुमारीकः, बहुब्रह्मबन्धूको ग्रामः । नित्यग्रहण किम् ? पृथुश्रीः, पृथुश्रीकः । लम्बभ्रूः, लम्बभ्रूकः । केचिन्नित्य-दितामीबूडन्तानामेव कपमिच्छन्ति । तन्मते बहुतन्त्रीः, बहुतन्त्रीक. इति **'शेषाद् वा'** [८/३/११०] इति विकल्पः । पूर्वत्र स्त्रियां विधिरिति योगविभागः ।

११०. शेषाद् वा ।

यस्माद् बहुव्रीहेः समासान्तः प्रत्यय आदेशो वा न विहितस्तस्माच्छेषात् कप् प्रत्ययः समासान्तो वा भवति । बह्व्यः खट्वा अस्मिन् बहुखट्वकः, बहुखट्वः । बहुमालकः, बहुमालः । बहुवीणकः, बहुवीणः । शेषादिति किम् ? प्रियपथः, प्रियधुरः, व्याघ्रपाद्, सिंहपाद् । असति शेषग्रहणे पक्षे परत्वात् कप् स्यात् ।

१११. न सुभ्र्वादिभ्यः ।

सु, भ्रू—इत्येवमादिभ्यः कप् समासान्तो न भवति । सुभ्रूः, लेखाभ्रूः, शलाकाभ्रूः, कोमलोरूः, संहितोरूः, वरोरूः, पीवरोरू । जातिवचनत्वाद् ऊङन्ता एते । एवं हि आमन्त्रणे ह्रस्वो भवति । हे सुभ्रु !, हे वरोरु !। बहुवचनमाकृतिगणार्थम् । तेन करभोरूः इत्यादयोऽपि भवन्ति ।

११२. संज्ञायाम् ।

संज्ञायां विषये कप् समासान्तो न भवति । बहुदेवदत्तः, विश्वदेवदत्तः, बहुविष्णुमित्रः, विश्वविष्णुमित्रः । एवंनामानो ग्रामाः । विश्वदेवः, विश्वयशाः—एवनामानौ पुरुषौ । पद्मश्रीः—एवंनामा स्त्री । श्वेताश्वतरिः स्त्री पुरुषो वा ।

११३. ईयसोः ।

ईयस्वन्तात् समासात् कप् समासान्तो न भवति । बहुश्रेयान्, बहुप्रेयान् । लिङ्गविशिष्टस्यापि ग्रहणात् बहुश्रेयसी, बहुप्रेयसी ।

११४. सहात् तुल्ययोगे ।

तुल्ययोगे यः सहशब्दः सामर्थ्यात् तदादेर्बहुव्रीहेः कप् समासान्तो न भवति । तुल्ययोगो वर्तिपदार्थस्य[1] पुत्रादेर्वृत्त्यर्थेन पित्रादिना सह क्रियागुणजातिद्रव्यैः साधारणः सम्बन्धः । सपुत्र आगतः । सपुत्रः स्थूलः । सपुत्रो ब्राह्मणः । सपुत्रो गोमान् । सहादिति किम् ? श्वेताश्वको देवदत्त आगतः । तुल्ययोग इति किम् ? सह विद्यमानानि लोमान्यस्य सलोमकः । सपक्षकः, सकर्मकः ।

११५. भ्रातुः स्तुतौ ।

भ्रातृशब्दान्तात्समासात् कप् समासान्तो न भवति स्तुतौ—भ्रातुः समासार्थस्य वा प्रशंसायां गम्यमानायाम् । शोभनो भ्रातास्य सुभ्राता । कल्याणभ्राता, प्रियभ्राता, बहुभ्राता । भ्रातुरिति किम् ? सुमातृकः । स्तुताविति किम् ? मूर्खभ्रातृकः ।

११६. नाडीतन्त्रीभ्यां स्वाङ्गे ।

स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात्समासात् कप् समासान्तो न भवति । बह्व्यो नाड्यो यस्मिन् बहुनाडिः कायः । बहुतन्त्रीः ग्रीवा । तन्त्रीर्धमनिः । स्वाङ्ग इति किम् ? बहुनाडीकः स्तम्बः । बहुतन्त्रीका वीणा ।

११७. निष्प्रवाणिः ।

निष्प्रवाणिरिति कबभावो निपात्यते । प्रोयतेऽस्यां इति प्रवाणी—तन्तुवायशलाका, सा निर्गताऽस्मादिति निष्प्रवाणिः कम्बलः । निष्प्रवाणिः पटः । तन्त्रादचिरोद्धृतः इत्यर्थः । 'अन्यार्थे स्त्रीप्रत्ययगोरन्त्यस्या···' [२/३/११५] इत्यादिना ह्रस्वः । निर्गतः प्रवाण्या निष्प्रवाणिरिति तत्पुरुषेणैव सिद्धे बहुव्रीहौ कप् मा भूदिति वचनम् ।

---

१. वर्तन्ते पूर्वपदोत्तरपदानि अस्मिन् 'विविधृतेर्वा' [उ० ३/१०६] इति इः वर्तिः, समासः तस्य पदानि तेषां अर्थः ।

चतुर्थश्चरणः

१. वृद्धिः स्वराणामादेर्ञ्णिति तद्धिते ।

ञिति णिति च तद्धिते प्रत्यये परे पूर्वो यः प्रकृतिभागस्तस्य स्वराणां मध्ये य आदिः स्वरस्तस्य वृद्धिरादेशो भवति । ञिति—दाक्षिः, प्लाक्षिः, कार्णिः, नैवाकविः, चौलि । णिति—कापटवः, भार्गवः, शैव, औपगवः । श्रीर्देवता अस्य श्राय. स्थालीपाक । एवं ह्रायः । स्वराणामिति हसापेक्षाव्युदासार्थम् । तेन हसादेरपि भवति । ञ्णितीति किम् ? शङ्कव्यं दारु । तद्धित इति किम् ? चिकीर्षकः ।

२. केकय-मित्रयु-प्रलयानां यादेरिय् च ।

केकय, मित्रयु, प्रलय—इत्येतेषां स्वराणामादेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्यादेश्च शब्दरूपस्य इयादेशो भवति । केकयस्याऽपत्यं—कैकेय. । **'कुर्वादञ्'** [६/२/१२३] इत्यञ् । मित्रयोर्भाव — मैत्रेयिकया श्लाघते । **'गोत्रचरणात्…'** [७/३/७६] इत्यादिना अकञ् । प्रलयादागतं—प्रालेयं हिमम् । **'तत आगते'** [७/१/६१] इत्यण् । ञ्णितीति किम् ? केकयत्वम् ।

३. देविका-शिंशपा-दीर्घसत्र-श्रेयसां तत्प्राप्तावात् ।

देविका, शिंशपा, दीर्घसत्र, श्रेयस्—इत्येतेषां स्वराणामादेः स्वरस्य ञ्णिति तद्धिते निमित्ते तत्प्राप्तौ वृद्धिप्रसङ्गे आकारादेशो भवति । देविकायां भव—दाविकमुदकम् । देविकाकूले भवा —दाविकाकूलाः शालयः । पूर्वदेविका नाम प्राच्यग्रामस्तत्र भवः—पूर्वदाविकः । अत्र **'प्राग्ग्रामाणां'** [८/४/८] इत्युत्तरपदवृद्धिप्राप्ति. । शिंशपाया विकार.—शांशपः स्तम्भ. । शिंशपास्थले भवा —शांशपास्थला. शालयः । पूर्वशिंशपा नाम प्राच्यग्रामस्तत्र भव.—पूर्वशांशप. । दीर्घसत्रे भवं—दार्घसत्रम् । श्रेयोऽधिकृत्य कृतं—श्रायसं द्वादशाङ्गम् । तत्प्राप्ताविति किमर्थम् ? सुदेविकाया भवः सौदेविकः इत्यत्र निषेधार्थं पूर्वोत्तरपदानामपि यथा स्यादित्येवमर्थं च । अन्यथा हि केवलानामेव[1] स्यात् ।

४. वहीनरस्यैत् ।

वहीनरशब्दस्य ञ्णिति तद्धिते परे स्वराणामादेः स्वरस्य ऐकार आदेशो भवति । वहीनरस्याऽपत्यं—वैहीनरिः । वहीनरस्येदं—वैहीनरम् । विहीनरस्य वृद्ध्या सिध्यति, वहीनरस्य वाहीनरिर्मा भूदिति वचनम् ।

५. अंशादृतोः ।

वृद्धिरित्यनुवर्तते । अंशवाचिनः शब्दात् परस्य ऋतुवाचिन उत्तरपदस्य स्वराणामादेः स्वरस्य स्थाने ञ्णिति तद्धिते परे वृद्धिर्भवति । पूर्वासु वर्षासु भवः—पूर्ववार्षिक. । अपरवार्षिकः । **'वर्षाकालेभ्य…'** [६/४/८१] इतीकण् । पूर्वशारदः, अपरशारदः । पूर्वनैदाघः, अपरनैदाघः । पूर्वहैमन., अपरहैमनः । ऋत्वण् । अंशादिति किम् ? पूर्वासु ऋत्वन्तरैर्व्यवहितासु[2] वर्षासु भवः पौर्ववर्षिकः । सुवर्षासु भवः—सौवर्षिकः । ऋतोरिति किम् ? पूर्वपिप्पल्या इदं—

१. ग्रहणवतेति न्यायात् ।

२. अत्र हि पूर्वशब्दो न वर्षाणामेकदेशं ब्रूते, किंतु व्यवहितत्वमिति न पूर्वशब्दोंऽशवचनः ।

पौर्वपिप्पलम् । आर्धपिप्पलम् ।

६. सुसर्वार्धाज्जनपदस्य ।

सु, सर्व, अर्ध—इत्येतेभ्यः परस्य जनपदवाचिन उत्तरपदस्य स्वराणामादेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्भवति। सुपञ्चालेषु भवः—सुपाञ्चालकः । सर्वपाञ्चालकः, अर्धपाञ्चालकः । सुमागधकः, सर्वमागधकः, अर्धमागधकः । '**बहुविषयेभ्यः**'[1] [६/४/४५] इत्यकञ् । जनपदस्येति किम् ? सुगन्धाः पण्यमस्य सौगन्धिकः । अर्धपिप्पल्यां भवः—आर्धपिप्पलः ।

७. अमद्रस्य दिशः ।

दिग्वाचिनः परस्य जनपदवाचिनो मद्रशब्दवर्जितस्योत्तरपदस्य स्वराणामादेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्भवति । पूर्वपाञ्चालकः, अपरपाञ्चालकः, दक्षिणपाञ्चालकः, उत्तरपाञ्चालकः । अमद्रस्येति किम् ? पौर्वमद्रः । दिश इति किम् ? पूर्वं पञ्चालानां पूर्वपञ्चालाः । अंशिसमासः । तेषु भवः—पौर्वपञ्चालकः । अवयववृत्तेरपि[2] पूर्वशब्दस्य दिशि दृष्टत्वेन दिक्शब्दत्वात् तदन्तविधौ सति '**बहुविषयेभ्यः**' [६/४/४५] इत्यकञ् । एके त्वस्य दिक्शब्दत्वं नेच्छन्ति । तन्मते तदन्तविध्यभावेऽणेव । पौर्वपञ्चालः ।

८. प्राग्ग्रामाणाम् ।

प्राग्देशग्रामवाचिनां योऽवयवो दिग्वाची ततः परस्याऽवयवस्य दिश परेषां च प्राग्ग्रामवाचिनां स्वराणां मध्ये आदेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्भवति। पूर्वकृष्णमृत्तिका नाम प्राक्षु ग्रामः, तत्र भवः—पूर्वकार्ष्णमृत्तिकः । एवमपरकार्ष्णमृत्तिकः । पूर्वेषुकामशमः, अपरैषुकामशमः । बहुवचनाद् ग्रामग्रहणेन नगरमपि गृह्यते । पूर्वस्मिन् कन्यकुब्जे भवः—पूर्वकान्यकुब्जः । अपरकान्यकुब्जः । पूर्वपाटलिपुत्रकः, अपरपाटलिपुत्रकः । प्राग्ग्रहणं किम् ? देवदत्तं नाम वाहीकग्रामः, पूर्वस्मिन् देवदत्ते भवः—पौर्वदेवदत्तः । आपरदेवदत्तः ।

९. संख्याऽधिकाभ्यां वर्षस्याऽभाविनि ।

सङ्ख्यावाचिनोऽधिकशब्दाच्च परस्य वर्षशब्दस्य स्वराणामादेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्भवति अभाविनि—न चेत्स तद्धितो भावीत्यस्मिन्नर्थे विहितो भवति । द्वाभ्यां वर्षाभ्यां निर्वृत्तः, द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा, द्वे वर्षे भूतो वा—द्विवार्षिकः । त्रिवार्षिकः, अधिकवार्षिकः । अभाविनीति किम् ? द्वे वर्षे भावि—द्वैवर्षिकम् । त्रैवर्षिकं धान्यम् । द्वाभ्यां वर्षाभ्यां भृतोऽधीष्टो वा कर्म करिष्यति द्विवार्षिको मनुष्यः इति । भृताधीष्टयोः प्रत्ययो न भाविनीति प्रतिषेधो न भवति । गम्यते ह्यत्र भविष्यत्ता न तु प्रत्ययार्थः ।

१०. मान-संवत्सरस्याऽशाण-कुलिजस्याऽसंज्ञायाम् ।

मीयते परिच्छिद्यते येन तन्मानं परिमाणादि । संख्याया अधिकशब्दाच्च परस्य शाणकुलिजशब्दवर्जितस्य मानवाचिनः संवत्सरशब्दस्य च स्वराणामादेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्भवति असंज्ञायां विषये । सङ्ख्याधिकाभ्यां मानसंवत्सरस्य वचनभेदान्न यथासङ्ख्यम् । द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः । त्रिकौडविकः, अधिककौडविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं - द्विसौवर्णिकम्[3] । त्रिसौवर्णिकम्, अधिकसौवर्णिकम् । द्वाभ्यां षष्टिभ्यां निर्वृत्तः, द्वाभ्यां षष्टिभ्यां भृतोऽधीष्टो वा, द्वे षष्टी भृतो भावी वा—द्विषाष्टिकः । त्रिषाष्टिकः, अधिकषाष्टिकः । द्विसाप्ततिकः, त्रिसाप्ततिकः, अधिकसाप्ततिकः ।

---

१. सुसर्वार्धदिक्शब्देभ्यो जनपदस्य इति ज्ञापकात् तदन्तस्यापि भवति ।

२. तत्र हि दिक्शब्देभ्य इत्युक्तं न तु दिग्वाचिन इति ।

३. अत्र तु 'कार्षापणसहस्रसुवर्ण···' [७/२/६७] इत्यनेनेकणो वा लुग् भवति ।

द्विषष्ट्यादिशब्दा:[1] संख्येये काले वर्तन्ते इति कालाधिकारप्रत्ययमुत्पादयन्ति[2]। द्वाभ्यां नवतिभ्यां क्रीतमिति **'मूल्यैः क्रीते'** [७/२/१०५] इतीकण्। तस्य **'द्विगोः प्लुगद्विः'** [७/२/६६] इति लुकि द्विनवति द्रव्यम्। तेन द्वौ च नवतिश्च द्विनवतिस्तया वा क्रीतं – द्विनावतिकम्। एवं त्रिनावतिकम्। संवत्सर—द्वाभ्यां संवत्सराभ्यां निर्वृत्त., द्वाभ्यां संवत्सराभ्यां भूतोऽधीष्टो वा, द्वौ संवत्सरौ भूतो भावी वा—द्विसांवत्सरिक। त्रिसांवत्सरिक। संवत्सरग्रहणात् कालो[3] मानग्रहणेन न गृह्यते, तेन द्वैसमिक:, त्रैसमिक:, द्वैरात्रिक:[4], त्रैरात्रिक:। अशाणकुलिजस्येति किम्? द्वाभ्यां शाणाभ्यां क्रीतं—द्वैशाणम्[5]। त्रैशाणम्। द्वे कुलिजे पचति संभवत्यवहरति च—द्वैकुलिजिक[6]। त्रैकुलिजिक.। असंज्ञायामिति किम्? पञ्च लोहिन्य: परिमाणमस्य पाञ्चलोहितिकम्। पाञ्चकलायिकम्[7]। तद्धितान्तमिदं परिमाणविशेषस्य नाम।

११. जाते प्रोष्ठभद्रात् पदस्य।

प्रोष्ठशब्दाद् भद्रशब्दाच्च परस्य पदशब्दस्योत्तरपदस्य स्वराणामादे: स्वरस्य स्थाने जातेऽर्थे विहिते ञ्णिति तद्धिते परे वृद्धिर्भवति। प्रोष्ठपदासु[8] जात:—प्रोष्ठपाद:। भद्रपादो माणवक। जाते इति किम्? प्रोष्ठपदासु भव:—प्रौष्ठपदो मेघ:। ऊर्ध्वमौहूर्तिक इति **'यावादिश्चोर्ध्वमौहूर्तिके'** [४/४/१०५] इति निपातनात्, गुरुलाघवमिति गुरोर्लाघव गुरुश्च गुरुत्वं लाघवं चेति वा, सहतपारार्थ्यमिति संहते पारार्थ्यमिति सिद्धमऽतो नार्थ उत्तरपदवृद्धिविधानेन।

१२. अर्धात्परिमाणस्याऽनतो वा त्वादेः।

अर्धशब्दात्परस्य परिमाणवाचिन: कुडवादे. शब्दरूपस्य उत्तरपदस्य स्वराणामादे. स्वरस्यानतोऽकाररहितस्य ञ्णिति तद्धिते परे वृद्धिर्भवति वा त्वादे:—परिमाणात्पूर्वस्य त्वर्धशब्दस्य वा भवति। अर्धकुडवेन क्रीत—आर्धकौडविक, अर्धकौडविकम्। आर्धमौष्टिकं, अर्धमौष्टिकम्। आर्धद्रौणिक, अर्धद्रौणिकम्। परिमाणस्येति किम्? अर्धक्रोश: प्रयोजनमस्य आर्धक्रोशिकम्। अनत इति किम्? आर्धप्रस्थिक, अर्धप्रस्थिकम्। आर्धकंसिक[9] अर्धकंसिकम्। आर्धचमसिक, अर्धचमसिकम्। आदिविकल्प उत्तरवृद्ध्यनपेक्ष इति भवत्येव। अत. प्रतिषेधादाकारस्य वृद्धिर्भवति। अर्धखार्यां भवा—अर्धखारी। ननु च को विशेषोऽत्र वृद्धौ सत्यामसत्यां वा? उच्यते—अर्धखारी भार्याऽस्येति अर्धखारीभार्य। यद्यत्र वृद्धिप्रतिषेध. स्यात् तर्हि अय तद्धितो न वृद्धिनिमित्तमिति पुंवद्भावप्रतिषेधो न स्यात्। यथा— अर्धप्रस्थे भवा अर्धप्रस्थी, सा भार्यास्य अर्धप्रस्थभार्य[10] इति।

१३. प्राद् वाहणस्यैये।

वा त्वादेरित्यनुवर्तते। प्रशब्दात् परस्य वाहणस्य एयप्रत्यये ञ्णिति तद्धिते परे स्वराणामादे: स्वरस्य वृद्धिर्भवति आदे: पूर्वपदस्य प्रशब्दस्य तु वा भवति। प्रवाह यतीति प्रवाहण.। प्रवाहणस्यापत्य—प्रावाहणेय, प्रवाहणेय।

---

१. द्वे षष्टी सप्तती वा दिवसाना मासानामर्धमासाना वेति विवक्षया कालवृत्तित्वम्।

२. **'कालात्परिजय्य'''** [७/२.१४६] इत्यस्मिन कालाधिकारे विहित **'निर्वृत्ते'** [७/२/१५०] इत्यादिभि. प्रत्ययमिकण्रूपम्।

३ मीयते अनेनेति व्युत्पत्त्या मानग्रहणेन कालस्यापि ग्रहणप्रसङ्गे सतीत्यर्थ।

४. अत्र **'सर्वांशसंख्यातपुण्य'''** [८/३/५५] इति अ. समासान्त:। तत इकण्।

५. **'द्वित्र्यावेरण् च'** [७/२/१०४] इत्यण्। तस्य विधानसामर्थ्यात् **'द्विगोः प्लुगद्विः'** [७/२/६६] इति लुगऽभाव।

६. अत्र **'संभवत्यवहरति च'** [७/२/१२६] इति इकण्। **'कुलिजाद्वा लुक् च'** [७/२/१२९] इति वा लुक्।

७ कलायो धान्यविशेषो मालविकप्रसिद्ध:। तत्कणाना पञ्चाना यावत्परिमाण भवति तावन्मात्रस्य परिमाणविशेषस्येदं नाम। अत एव **'द्विगोः प्लुगद्विः'** [७/२/६६] इति लुगपि न भवति।

८. हरीतक्यादिषु न लिङ्गस्याऽतिवर्तनमिति वचनात् कालेऽपि प्रोष्ठपदादय स्त्रीलिङ्गा:।

९. अर्धकंसशब्दात् क्रीतेऽर्थे इकण् न भवति। **'अर्धात् पलकंसकर्षात्'** [७/२/८८] इतीकटा बाधितत्वात् तत. प्रयोजनेऽर्थे इकण् बोध्य:।

१० अत्रानत इति भणनाऽत्रोत्तरपदवृद्धि। पूर्वपदस्यापि 'वा त्वादे.' इति वचनान्न भवति। ततस्तद्धितस्य स्वरवृद्धिनिमित्तत्वाभावाच्च पुंवन्निषेध:।

शुभ्रादित्वादेयण् । अत्राप्युत्तरपदवृद्धेः पूर्वोक्तमेव प्रयोजनम्, तेन प्रवाहणेयी भार्या यस्य प्रवाहणेयीभार्य इति पुंवद्भावप्रतिषेधो भवति ।

१४. एयस्य ।

एयप्रत्ययान्तावयवात् प्रशब्दात् परस्य वाहणशब्दस्य ञ्णिति तद्धिते परे स्वराणामादेः स्वरस्य वृद्धिर्भवति आदेस्तु प्रशब्दस्य वा भवति । प्रवाहणेयस्यापत्यं युवा—प्रावाहणेयिः, प्रवाहणेयिः । प्रवाहणेयस्येदं सखादि तस्य भावो वा—प्रावाहणेयक, प्रवाहणेयकम् । बाह्यतद्धितनिमित्ता[1] वृद्धिरेयाश्रयेण विकल्पेनाशक्या बाधितुमिति सूत्रारम्भः ।

१५. नञः शुचीश्वर-क्षेत्रज्ञ-कुशल-चपल-निपुणानाम् ।

नञः परेषां शुचि, ईश्वर, क्षेत्रज्ञ, कुशल, चपल, निपुण—इत्येतेषां प्रकृत्यवयवानां ञ्णिति तद्धिते परे स्वराणामादेः स्वरस्य वृद्धिर्भवति आदेस्तु नञो वा भवति । न शुचिरशुचिस्तस्येद—आशौच, अशौचम् । न विद्यते शुचिरस्येति वा अशुचिस्तस्य भाव कर्म वा—आशौच, अशौचम् । अनीश्वरस्येद -आनैश्वरं, अनैश्वरम् । अनीश्वरस्य भाव कर्म वा—आनैश्वर्यं, अनैश्वर्यम् । एवमाक्षैत्रज्ञ[2], अक्षैत्रज्ञम् । आक्षैत्रज्ञ्य, अक्षैत्रज्ञ्यम् । अकुशलस्येद—आकौशलं, अकौशलम् । एवमाचापल, अचापलम् । आनैपुणं, अनैपुणम् । आयथातथ्यमिति समासात् प्रत्ययः । अयाथातथ्यमिति प्रत्ययान्तेन समासः । एवमायथापुर्यं, अयाथापुर्यम् । यथा—आचतुर्यं, अचातुर्यमिति । यथातथा, यथापुरा इत्यखण्डमव्यय वा । **'नाम नाम्ना…'** [३/१/१६] इति वा समासः । **'यथाऽसादृश्ये'** [३/१/२४] इत्यव्ययीभावो वा अकारान्तः[3] ।

१६. जङ्गल-धेनु-वलजस्योत्तरपदस्य तु वा ।

आदेरित्यनुवर्तते वेति तु निवृत्तं उत्तरपदस्य चेत्यकरणात् । जङ्गल, धेनु, वलज—इत्येतदुत्तरपदानां शब्दानामादेः पूर्वपदस्य ञ्णिति तद्धिते परे स्वराणामादे स्वरस्य नित्यं वृद्धिर्भवति उत्तरपदस्य पुनर्वा भवति । कुरुजङ्गलेषु भवः—कौरुजाङ्गलः, कौरुजङ्गल । वैश्वधैनव , वैश्वधेनव । सौवर्णवालजः, सौवर्णवलजः ।

१७. हृद्-भग-सिन्धोः ।

आदेरुत्तरपदस्येति च द्वयमप्यनुवर्तते । हृद्, भग, सिन्धु—इत्येतदन्तानां शब्दाना ञ्णिति तद्धिते परे आदेः पूर्वपदस्य उत्तरपदस्य च स्वराणामादेः स्वरस्य वृद्धिर्भवति । सुहृद सुहृदयस्य वा इदं भाव. कर्म वा **'तस्येदं'** [७/१/११२] इत्यणि युवाद्यणि वा सौहार्दम् । एव दौर्हार्दम् । सुहृदो भावः कर्म वा राजादित्वात् टयणि सौहार्द्यम् । दौर्हार्द्यम् । बहुलाधिकारात् सुहृद्दुर्हृच्छब्दयोर्मित्रामित्रार्थयो सौहृद, दौर्हृदमित्यपि भवति । सुभगस्य भाव.—सौभाग्यम् । दौर्भाग्यम् । सुभगाया अपत्यं—सौभागिनेय. । दौर्भागिणेय. । एकपदत्वात् णत्वम् । सक्तुप्रधानाः सिन्धव. सक्तुसिन्धवः, तेषु भव.—साक्तुसैन्धवः । पानसैन्धवः, लावणसैन्धवः, माहासैन्धव., सौरसैन्धवः । कच्छादित्वादण् । तत्र तदन्तविधेरपीष्टत्वात्[4] ।

१८. प्राचां नगरस्य ।

प्राचां देशे वर्तमानस्य नगरान्तस्य शब्दस्य ञ्णिति तद्धिते परे पूर्वपदस्योत्तरपदस्य च स्वराणामादेः स्वरस्य वृद्धिर्भवति । सुह्मनगरे भवः—सौह्मनागरः । पौण्ड्रनागरः, वैराटनागर., गैरिनागर. । प्राचामिति किम् ? उदीचां

---

१. बाह्यस्तद्धित एयव्यतिरिक्तस्तन्निमित्ता वृद्धि. **'वृद्धिस्वराणामादेः…'** [८/४/१] इत्यनेन नित्य प्राप्ता, एयाश्रयेण विकल्पेन **'प्राद् वाहणस्यैये'** [८/४/१३] इति विहितेनेति योजना ।

२. **'नञ्तत्पुरुषाद्बुधादेः'** [७/३/५८] इत्यनेन टयण् न बाध्यते । क्षेत्रज्ञेश्वरयोर्बुधादिपाठात् ।

३. अव्ययीभावस्य नपुंसकत्वे **'नपुंसके'** [२/३/११२] इत्यनेन ह्रस्वः ।

४. न केवलं सिन्धु इत्यस्य केवलस्य कच्छादौ पाठात् केवलात् प्रत्यय., किंतु सिन्ध्वन्तेति पाठात् तदन्तादपीत्यर्थ. ।

मद्रनगरं, तत्र भवः—माद्रनगरः ।

१९. अनुशतिकादीनाम् ।

अनुशतिक इत्येवमादीनां शब्दानां ञ्णिति तद्धिते परे पूर्वपदस्योत्तरपदस्य च स्वराणामादेः स्वरस्य वृद्धिर्भवति । अनुशतिकस्येदं—आनुशातिकम् । अनुशतिकस्याऽपत्यमानुशातिकिः । अनुहोडेन चरति—आनुहौडिकः । अनुशतिकादयो यथा—अनुशतिक, अनुहोड, अनुसवत्सर, अनुसवरण, अनुरहत्, अगारवेणु, असिहत्या, अश्विहत्य, अस्यहेति, अस्यहेतु, अनिषाद, अधेनु, कुरुकत, कुरुपञ्चाल, अधिदेव, अधिभूत, इहलोक, परलोक, सर्वलोक, सर्वपुरुष, सर्वभूमि, वध्योग, प्रयोग, अभिगम, परस्त्री, पुष्करसद्, उदकशुद्ध, सूत्रनड, चतुर्विद्या, शातकुम्भ, सुखशयन । इत्याकृतिगणोऽयम् ।

२०. राजपुरुषाद्व्यणि ।

राजपुरुषादीनां शब्दानां पूर्वपदस्योत्तरपदस्य च ञ्णिति तद्धिते ट्यणि प्रत्यये परे स्वराणामादेः स्वरस्य वृद्धिर्भवति । राजपौरुष्यं, पारिमाण्डल्य[1], प्रातिभाव्यं सार्ववैद्य—चतुर्वर्णादित्वात् ट्यण् । ट्यणीति किम् ? राजपुरुषस्याऽपत्यं—राजपुरुषायणिः । '**वृद्धादपौत्रादेर्वा**' [६/२/८४] इति आयनिञ् ।

२१. देवतानामात्वादौ ।

देवतार्थानां शब्दानामात्वादौ विषये ञ्णिति तद्धिते परे पूर्वपदस्य उत्तरपदस्य च स्वराणामादेः स्वरस्य वृद्धिर्भवति । अग्निश्च विष्णुश्च देवता अस्य आग्नावैष्णवं सूक्तम् । ऐन्द्रापौष्णं हविः । आग्निमारुतं कर्म । आग्निवारुणीमनड्वाहीमालभेत । आत्वादाविति किम् ? स्कन्दविशाखयोरिदं—स्कान्दविशाखम् । ब्राह्मप्रजापत्यम् । '**देवतानामवायूनां**…' [३/२/४२] इत्यत आरभ्य '**दिवस्दिवः पृथिव्यां वा**' [३/२/४७] इति यावत् आत्वादयः ।

२२. आतो नेन्द्रवरुणस्य ।

आकारान्तात् पूर्वपदात् परस्य इन्द्रशब्दस्य वरुणशब्दस्य चोत्तरपदस्य स्वराणामादेः स्वरस्य ञ्णिति तद्धिते परे वृद्धिर्न भवति । अग्निश्च इन्द्रश्च अग्नेन्द्रौ, तौ देवता अस्य आग्नेन्द्रं सूक्तम् । सौमेन्द्रं हविः । ऐन्द्रावरुण, मैत्रावरुणम् । आत इति किम् ? आग्निवारुणम् । उत्तरपदस्येति किम् ? ऐन्द्राग्नमेकादशकपालं पुरोडाशं निर्वपेत् । ननु चेन्द्रशब्दस्य द्वौ स्वरौ तत्राद्यः संधिकार्येण ह्रियतेऽपर '**इवर्णादेरस्य**' [८/४/७१] इत्यतोऽस्वरः एवेन्द्रशब्दस्तस्य किं फलं वृद्धिप्रतिषेधेन ? सत्यम् । किन्त्वनेनैतद् ज्ञाप्यते बहिरङ्गमपि पूर्वं पूर्वोत्तरपदयोः कार्यं भवति, पश्चात् संधिकार्यम्, तेन पूर्वैषुकामशम[2] इत्यादि सिद्धं भवति ।

२३. संधिय्वोरैदौत् च ।

नेत्यनुवर्तते । तद्धिते ञिति णिति च प्रत्यये परे संधिजाभ्यां यकारवकाराभ्यां परस्य स्वराणामादेः स्वरस्य वृद्धिर्न भवति, किंतु तयोर्यकारवकारयोर्यथासङ्ख्यं ऐट्, औट् इत्येतावागमौ भवतः । टित्वादादौ । व्याकरणमधीते—वैयाकरणः । नैयायिकः, नैयासिकः । व्यसने भवः—वैयसनम् । स्वागमं वेत्त्यधीते वा—सौवागमिकः । स्वश्वस्याऽपत्यं—सौवश्विः । स्वश्वस्यायं—सौवश्वः । संधिग्रहणं किम् ? यष्टिप्रहरणमस्य याष्टीकः । यत्र यकारवकाराभ्यामुत्तरस्य वृद्धिप्रसङ्गो नास्ति तत्रेदं न प्रवर्तते । दाध्यश्विः, माध्वश्विः । उत्तरपदवृद्धेरप्ययं प्रतिषेधः । पूर्वत्र्यलिन्दो नाम प्राग्ग्रामस्तत्र भवः—पूर्वत्रैयलिन्दः । यत्र पूर्वपदस्थाभ्यां यकारवकाराभ्यां पूर्वपदे एव उत्तरपदस्थाभ्यां यकारवकाराभ्या-

---

१ परिमण्डलमणूनां परिमाणं, तद्योगात् परमाणवोपि परिमण्डलास्तेषां भावः ।

२. अत्र भवेऽण् । '**प्राग्ग्रामाणां**' [८/४/८] इत्युत्तरपदवृद्धिः । अत्र यदि पूर्वं संधिः स्यात् तदा इकारस्य पूर्वपदस्वात् पुत्सबन्धिन उकारस्य वृद्धिः स्यात् ।

मुत्तरपदे एव वृद्धिप्रसङ्गस्तत्रायं प्रतिषेधः स्यात्। तेनेह न—द्वाभ्यामशीतिभ्यां निर्वृत्तोऽधीष्टो भृतो वा, द्वे अशीती भूतो भावी वा—द्व्याशीतिकः। त्र्याशीतिकः। अत्र पूर्वपदस्थस्य इकारस्य स्थाने भवो यकार. 'मानसंवत्सरस्य…' [८/४/१०] इत्यादिना वृद्धिप्रसङ्गस्तु उत्तरपदे। वृद्ध्यपवादश्चैऔडागमः। तेन तद्धितस्य स्वरवृद्धिनिमित्तत्वाभावात् पुंवद्भावप्रतिषेधो न भवति। वैयाकरणभार्यः। शौवश्वभार्यः।

२४. द्वारादेः।

पूर्वमनुवर्तते। द्वारादीनां शब्दानां यकारवकाराभ्यां परस्य स्वराणामादेः स्वरस्य वृद्धिर्न भवति, किंतु तयोर्यथासंख्यं ऐट्, औट् इत्येतावागमौ भवतः ञिति णिति च तद्धिते परे। असंधिजाभ्यां यकारवकाराभ्यां विध्यर्थं वचनम्। द्वारे नियुक्त—दौवारिक.। स्वरमधिकृत्य कृतो ग्रन्थः—सौवरः। स्वर्भवः—सौवः[1]। 'अनाराच्छश्वत्पृथगोऽव्ययस्य' [८/४/६६] इति टिलोप। स्वस्तीत्याह—सौवस्तिकः। अव्युत्पन्नोऽयम्। सुपूर्वस्य तु पूर्वेणैव सिद्धम्। स्वादुमृदोऽपत्यं—सौवादुमृद। व्यल्कसे भवो वैयल्कस[2]। विपूर्वस्य तु पूर्वेणैव सिद्धम्। श्वो भवः—शौवस्तिकः। 'श्वसस्तुट् च' [६/४/८५] इतीकण्। शुन इद—शौवन मासम्। स्फ्यकृतस्याऽपत्य—स्फैयकृत.। ऋष्यण्। स्वस्येदं—सौवम्। स्वाध्यायेन जयति—सौवाध्यायिक। 'तेन दीव्यतिखनति…' [७/२/२] इत्यादिना इकण्। स्वग्रामे भव—सौवग्रामिकः। अध्यात्मादित्वादिकण्। 'श्वादेरिति'[3] [८/४/२८] इति प्रतिषेधात् द्वारादिपूर्वाणामपि भवति। द्वारपालस्याऽपत्यं—दौवारपालिः। 'अत इञ्' [६/२/३४] द्वारपाल्या अपत्य—दौवारपालिकः। रेवत्यादित्वादिकण्। स्वराध्याये भव—सौवराध्यायः। स्वर्गमनमाह—सौवर्गमनिक। प्रभूतादित्वादिकण्। श्वादंष्ट्रायां भव—शौवादंष्ट्रो[4] मणि.। शौवभस्त्र.। यकारवकाराभ्यामिति पाठात् वैयल्कस इत्यत्र यकारादेव वृद्धित्वात् ऐट् न तु औट्। स्वपाठेनैव सिद्धे स्वाध्यायस्वग्रामपाठात् स्वापतेय स्वाजन्यमित्यादौ न भवति। द्वारादयो यथा—द्वार, स्वर, स्वर्, स्वस्ति, स्वादुमृद्, व्यल्कस, श्वस्, श्वन्, स्फ्यकृत, स्व, स्वाध्याय, स्वग्राम इति द्वारादि।

२५. न्यग्रोधस्य केवलस्य।

तद्धिते ञिति णिति च परे केवलस्य न्यग्रोधशब्दस्य यकारात्परस्य स्वराणामादेः स्वरस्य स्थाने वृद्धिर्न भवति, किंतु तस्यैडागमो भवति। न्यग्रोधस्य विकारो नैयग्रोधो दण्ड.। नैयग्रोध. कषायः। केवलस्येति किम्? न्यग्रोधमूले भवा.—न्याग्रोधमूला शालय। न्यग्रोधाः सन्त्यस्मिन् ऋष्यादित्वाच्चातुरर्थिकः कः। न्यग्रोधकम्। तत्र भवो न्याग्रोधकः। इदमपि[5] द्वारादीनां तदादिविधेर्ज्ञापकम्। न्यग्रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम्। केवलस्यैवेति। अव्युत्पत्तिपक्षे तु विध्यर्थं वचनम्।

२६. न क्रियाव्यतिहारे।

तद्धिते ञ्णिति प्रत्यये परे यकारवकाराभ्यां परस्य स्वराणामादेः स्वरस्य स्थाने यो वृद्धिप्रतिषेधः प्राप्तः स क्रियाव्यतिहारे न भवति न चैऔडावागमौ। व्यावक्रोशी, व्यावलेखी, व्यावचर्ची, व्यावहासी, व्यात्युक्षी। 'व्यतिहारेऽनीहादिभ्यो ञः' [५/४/११६] इति ञ.। ततो 'ञिनो नित्यं' [७/४/६१] इत्यण्। स्त्रियामीप्।

---

१. अत्र भवे अण्। अथ स्वर्शब्दस्याव्ययत्वात् 'सायंचिरं…' [६/४/६०] इत्यनेन कथं न तनट्? सत्यम्। 'वर्षाकालेभ्यः…' [६/४/८१] इत्यतः कालाधिकारात्।

२ अत्र यकारस्वरस्य वृद्धिप्राप्तिरिति यकारस्यैडागमः न तु वकारस्यौडागम.। वकारसमीपे स्वरस्यैवाऽभावेन वृद्धिप्राप्तिर्नास्तीति।

३ श्वन्शब्दोपि द्वारादिस्तस्य तदादे. कार्यप्रतिषेधात् तत्प्राप्तिर्विज्ञायत इत्यर्थः।

४. अत्र यद्यपि श्वादंष्ट्रायां भव इति वाक्ये श्वन्शब्दस्यात्व दृश्यते तथापि 'शुनः' [३/२/६३] इत्यस्मिन्नात्वविधायके सूत्रे बहुलाधिकारादणि प्रत्यय एव सत्यात्व भवति। अन्यथा प्रथममात्वे कृते 'वृद्धावीयः' [६/४/३२] इतीयः स्यात्।

५. न केवल 'श्वादे.' इति निषेधः, किंतु केवलग्रहणमपीत्यर्थः।

२७. स्वङ्गादेः ।

स्वङ्गादीनां शब्दानां यकारवकाराभ्यां परस्य स्वराणामादे. स्वरस्य स्थाने यो वृद्धिप्रतिषेधः प्राप्तः ञिति णिति च तद्धिते परे स न भवति ऐडौडावागमावपि न भवत । स्वङ्गस्यापत्यं—स्वाङ्गिः । व्याङ्गिः, व्याडिः । स्वागतमित्याह—स्वागतिक. । स्वध्वरेण चरति—स्वाध्वरिक. । व्यवहारेण चरति—व्यावहारिक. । व्यायामः प्रयोजनमस्याः व्यायामिकी विद्या । स्वङ्गादयो यथा—स्वङ्ग, व्यङ्ग, व्यड, स्वागत, स्वध्वर, व्यवहार, व्यायाम इति स्वङ्गादिः ।

२८. श्वादेरिति ।

श्वन्शब्द आदिरवयवो यस्य तस्य श्वादेर्नाम्न. वकारात्परस्य स्वराणामादे· स्वरस्य स्थाने यो वृद्धिप्रतिषेधः प्राप्तः स इति—इकारादौ ञ्णिति तद्धिते परे न भवति औडागमोऽपि च न । श्वभस्त्रस्यापत्य—श्वाभस्त्रिः । श्वाशीर्षिः, श्वादंष्ट्रि. । श्वगणेन चरति—श्वागणिकः । श्वायूथिकः । आदिग्रहण किम् ? श्वभिश्चरति—शौविक । इतीति किम् ? श्वहानस्येद—शौवहानम् । शौवभस्त्रम् । श्वादंष्ट्राया. विकार—शौवादंष्ट्रो मणिः ।

२९. इञः ।

श्वादेरित्यनुवर्तते । श्वादेरिञ्प्रत्ययान्तस्य वकारात्परस्य तद्धिते ञिति णिति च परे स्वराणामादेः स्वरस्य स्थाने यो वृद्धिप्रतिषेध. प्राप्तः स न भवति औडागमोऽपि च न भवति । श्वाभस्त्रेरिद—श्वाभस्त्रम् । श्वाकर्णे.[1] श्वाकर्णम् । इकारादौ निमित्त उच्यमान· पूर्वेण प्रतिषेध. इञन्तस्य प्रत्ययान्तरे न प्राप्नोतीति वचनम् ।

३०. पदस्याऽनिति वा ।

श्वादेरित्यनुवर्तते । तद्धिते इकारादिवर्जिते ञ्णिति प्रत्यये परे पदशब्दान्तस्य श्वादेः शब्दस्य वकारात्परस्य स्वराणामादेः स्वरस्य स्थाने वृद्धिप्रतिषेधः औडागमश्च वा भवतः । शुन इव पदमस्य श्वापद[2], तस्य विकार.—श्वापद, शौवापदम् । अनितीति किम् ? श्वापदेन चरति—श्वापदिक । श्वन्शब्दस्य द्वारादिषु पाठात् तत्र तदादिविधेर्ज्ञापितत्वात् नित्यमौडागमे प्राप्ते विकल्प. ।

३१. न्यङ्कोः ।

वेत्यनुवर्तते । तद्धिते ञिति णिति च प्रत्यये न्यङ्कुशब्दस्य यकारात्परस्य स्वराणामादेः स्वरस्य स्थाने वृद्धि-प्रतिषेधः ऐडागमश्च वा भवत. । न्यङ्कोरिदं—नैयङ्कव, न्याङ्कवम् ।

३२. श्रीष्ठेयस्सु विन्मतुवतोर्लुक् ।

विन्, मतु, वतु—इत्येतेषां प्रत्ययानां लुग् भवति ञि, इष्ठ, ईयसु इत्येतेषु प्रत्ययेषु परेषु । वचनभेदो यथा-संख्यनिवृत्त्यर्थ. । स्रग्विणमाचष्टे—स्रजयति । अयमेषां स्रग्विणामतिशयेन स्रग्वी—स्रजिष्ठ. । अयमनयोः स्रग्विणोरति-शयेन स्रग्वी—स्रजीयान् । त्वग्वन्तमाचष्टे—त्वचयति । अयमेषामतिशयेन त्वग्वान्—त्वचिष्ठः । अयमनयोरतिशयेन त्वग्वान्—त्वचीयान् । श्रीमन्त करोति आचष्टे वा—श्रययति । अयमेषामतिशयेन श्रीमान्—श्रयिष्ठ. । अयमनयोरति-शयेन श्रीमान्—श्रयीयान् । कुमुद्वन्तमाचष्टे—कुमुदयति । कुमुदिष्ठः, कुमुदीयान् । अत एव वचनाद् अगुणाङ्गादपीष्ठेयसू । निर्दिश्यमानत्वात् प्रत्ययमात्रस्य लुक् ।

---

१. वाक्ये पूर्वेण औडनिषेधः ।

२. श्वापदशब्दो बाहुलकात् पुनपुंसकः ।

३३. युवाऽल्पयोः[1] कन् वा ।

युवन्, अल्प—इत्येतयोः कन् इत्यादेशो वा भवति णि, इष्ठ, ईयसु इत्येतेषु परेषु । कनयति, कनिष्ठः, कनीयान् । पक्षे—यवयति, यविष्ठः, यवीयान् । अल्पयति, अल्पिष्ठः, अल्पीयान् ।

३४. प्रशस्यस्य श्रः ।

प्रशस्यशब्दस्य णीष्ठेयस्सु परतः श्र इत्ययमादेशो भवति । श्रयति, श्रेष्ठः, श्रेयान् ।

३५. वृद्धस्य च ज्यः ।

वृद्धशब्दस्य चकारात् प्रशस्यशब्दस्य च ज्य इत्यादेशो भवति णीष्ठेयस्सु परतः । ज्यापयति, ज्येष्ठः । ज्ययतीत्यपि कश्चित् ।

३६. ज्यायान् ।

ज्यायानिति पूर्वसूत्रेण विहितात् ज्यादेशात्परस्य ईयसोरीकारस्य आकारादेशो निपात्यते । अयमनयोरतिशयेन प्रशस्यो वृद्धो वा—ज्यायान्, ज्यायसी ।

३७. अन्तिक-बाढयोर्नेद-साधौ ।

अन्तिक, बाढ—इत्येतयोर्यथासंख्यं नेद, साध इत्येतावादेशौ भवतः णीष्ठेयस्सु परतः । नेदयति, नेदिष्ठः, नेदीयान् । साधयति, साधिष्ठः, साधीयान् ।

३८. प्रिय-स्थिर-स्फिरोरु-गुरु-बहुल-तृप्र-दीर्घ-ह्रस्व-वृद्ध-वृन्दारकाणामिमन्यऽपि प्र-स्थ-स्फ-वर-गर-बंह-त्रप-द्राघ-ह्रस-वर्ष-वृन्दाः ।

प्रियादीनामेकादशानां यथासंख्यं प्रादय एकादश आदेशा भवन्ति यथासंभवमिमनि णीष्ठेयस्सु च परेषु । प्रियस्य प्र—प्रेमा, प्रापयति, प्रेष्ठः, प्रेयान् । स्थिरस्य स्थ—स्थेमा, स्थापयति, स्थेष्ठः, स्थेयान् । स्फिरस्य स्फ—स्फापयति, स्फेष्ठः, स्फेयान् । उरोर्वर—वरिमा, वरयति, वरिष्ठः, वरीयान् । गुरोर्गर—गरिमा, गरयति, गरिष्ठः, गरीयान् । बहुलस्य बंह—बंहिमा, बंहयति, बंहिष्ठः, बंहीयान् । तृप्रस्य त्रप—त्रपिमा, त्रपयति, त्रपिष्ठः, त्रपीयान् । दीर्घस्य द्राघ—द्राघिमा, द्राघयति, द्राघिष्ठः, द्राघीयान् । ह्रस्वस्य ह्रस—ह्रसिमा, ह्रसयति, ह्रसिष्ठः, ह्रसीयान् । वृद्धस्य वर्ष—वर्षिमा, वर्षयति, वर्षिष्ठः, वर्षीयान् । वृन्दारकस्य वृन्द—वृन्दिमा, वृन्दयति, वृन्दिष्ठः, वृन्दीयान् । स्फिरशब्दस्याऽवर्णत्वादऽपृथ्वादित्वादऽदृढादित्वाच्च न इमन् प्रत्ययः । वरादीनामकार उच्चारणार्थः । कश्चित्तु करोत्यर्थे णौ प्राद्यादेशं नेच्छन्ति । तन्मते प्रिययति, स्थिरयतीत्यादि ।

३९. पृथु-मृदु-भृश-कृश-दृढ-परिवृढस्य ऋतो रः ।

पृथ्वादीनामृकारस्य रेफादेशो भवति इमनि णीष्ठेयस्सु च परेषु । प्रथिमा, प्रथयति, प्रथिष्ठः, प्रथीयान् । म्रदिमा, म्रदयति, म्रदिष्ठः, म्रदीयान् । भ्रशिमा, भ्रशयति, भ्रशिष्ठः, भ्रशीयान् । क्रशिमा, क्रशयति, क्रशिष्ठः, क्रशीयान् । द्रढिमा, द्रढयति, द्रढिष्ठः, द्रढीयान् । परिव्रढिमा, परिव्रढयति, परिव्रढिष्ठः, परिव्रढीयान् । केचित्तु वृढशब्दस्यापीच्छन्ति । व्रढिमा, व्रढयति, व्रढिष्ठः, व्रढीयान् । पृथ्वादीनामिति किम् ? ऋजिमा, ऋजयति, ऋजिष्ठः, ऋजीयान् । कृष्णिमा, कृष्णयति, कृष्णिष्ठः, कृष्णीयान् । ऋत इति किम् ? सर्वस्य मा भूत् ।

---

१. अत्रापि अगुणाङ्गादपि इष्ठेयसू वचनसामर्थ्याद् भवतः । अन्यथा 'स्थूलदूर…' [८/४/४२] इत्यनेन यणादेरवयवस्य लुगपि न स्यात्तयोरभावात् । एवमुत्तरेष्वपि द्रष्टव्यम् ।

४०. बहोर्णीष्ठे भूय् ।

बहुशब्दस्य णीष्ठयोः परयोर्भूय् इत्यादेशो भवति । भूययति, भूयिष्ठः । बहोराख्यानं—भूयनम् । णौ केचिद् विकल्पमाहुः । भूययति, भूयनम् । पक्षे बहयति, बहनम् । बहोर्णौ भाविति कश्चित् । भावयति ।

४१. भूर्लोपश्चेवर्णस्य ।

बहुशब्दस्य ईयसौ इमनि च परे भू इत्यादेशो भवति अनयोरिवर्णस्य लोपश्च । भूयान्, भूयांसौ, भूयांसः । भूमा । भू ऊ इति ऊकारप्रश्लेषादवादेशो न भवति । इवर्णस्येति किम् ? सर्वस्य मा भूत् ।

४२. स्थूल-दूर-युव-क्षिप्र-क्षुद्राणां यलादेर्नामिनो गुणश्च ।

स्थूलादीनां यथासंभवमिमनि णीष्ठेयस्सु च परेषु यलादेरवयवस्य लोपो भवति नामिनश्च गुणो भवति । स्थूल—स्थवयति, स्थविष्ठः, स्थवीयान् । दूर—दवयति, दविष्ठ, दवीयान् । युवन्—यवयति, यविष्ठ, यवीयान् । क्षिप्र—क्षेपिमा, क्षेपयति, क्षेपिष्ठः, क्षेपीयान् । क्षुद्र—क्षोदिमा, क्षोदयति, क्षोदिष्ठ, क्षोदीयान् । केचित्तु स्थूलदूरयूनां करोत्यर्थे णौ नेच्छन्ति । स्थूलं करोति—स्थूलयति । दूरयति, युवयति ।

४३. तुः ।

तृप्रत्ययस्य लोपो भवति इमनि णीष्ठेयस्सु च परेषु । कर्तारमाचष्टे करोति वा—कारयति, करिष्ठः, करीयान् । कर्तृमन्तमाचष्टे—कारयति । करयतीत्यपि कश्चित् । मातयति, भ्रातयतीत्यत्र अनर्थकत्वान्[१] तृशब्दस्य न भवति ।

४४. टेः ।

टेर्लोपो भवति इमनि णीष्ठेयस्सु च परेषु । पटिमा, पटयति, पटिष्ठ, पटीयान् । लघिमा, लघयति, लघिष्ठः, लघीयान् । विमनसो भावो विमनिमा । सन्मनसो भावः—सन्मनिमा । दृढादित्वादिमन् । विन्मतुवतोर्लुकि अनेकस्वरस्य टेर्लोपं विकल्पेन इच्छन्त्येके, लोपाऽभावपक्षे गुण चेच्छन्ति । पयस्विनमाचष्टे—पययति, पयसयति । पयिष्ठः, पयसिष्ठः । पयीयान्, पयसीयान् । वसुमन्तमाचष्टे—वसयति, वसवयति । वसिष्ठः, वसविष्ठ । वसीयान्, वसवीयान् ।

४५. नैकस्वरस्य ।

एकस्वरस्य शब्दरूपस्य टेर्लोपो न भवति इमनि णीष्ठेयस्सु च परेषु । स्रग्विणमाचष्टे—स्रजयति । स्रजिष्ठः, स्रजीयान् । स्रुग्वन्तमाचष्टे—स्रुचयति । स्रुचिष्ठः, स्रुचीयान् । एकस्वरस्येति किम् ? वसुमन्तमाचष्टे—वसयति । वसिष्ठः, वसीयान् । ननु 'टेरनेकस्वरस्य' इत्येव वाच्यं किं योगविभागेन ? उच्यते—योगविभागसामर्थ्यात् 'इवर्णावर्णस्य' [८/४/७१] इत्यस्याऽपि प्रतिषेधो भवति । श्रेष्ठः, श्रेयान् ।

४६. दण्डिहस्तिनोरायने ।

दण्डिन्, हस्तिन्—इत्येतयोरायने प्रत्यये टेर्लोपो न भवति । 'नोऽपदस्य तद्धिते' [८/४/६२] इति प्राप्तौ प्रतिषेधः । दण्डिनोऽपत्य—दाण्डिनायनः । हास्तिनायनः । नडाद्यायनण् । आयन इति किम् ? दण्डिनां समूहो दाण्डम् । हास्तिकम् ।

४७. वाशिन आयनौ ।

वाशिन्शब्दस्य आयनि प्रत्यये परे टेर्लोपो न भवति । वाशिनोऽपत्यं—वाशिनायनिः । 'वृद्धाद्यपौत्रादेर्वा'

---

१. अनर्थकत्वं चास्य अव्युत्पन्नत्वात् । तृप्रत्ययस्य वर्णानुपूर्वीविज्ञानार्थः ।

[६/२/८४] इत्यायनिञ् ।

४८. जिह्माशिन एये ।

जिह्माशिन्शब्दस्य एये प्रत्यये परे टेर्लोपो न भवति । जिह्माशिनोऽपत्य—जैह्माशिनेयः । शुभ्रादित्वादेयण् ।

४९. अध्वात्मनोरीने ।

अध्वन्, आत्मन्—इत्येतयोरीने प्रत्यये परे टेर्लोपो न भवति । अध्वानमलंगामी—अध्वनीन. । 'अध्वनो येनौ' [७/३/१०४] इतीन । आत्मने हितः—आत्मनीनः । 'भोगान्तात्मम्यामीनः' [७/३/४०] इतीनः । ईन इति किम् ? प्राध्वं, अध्यात्मम् ।

५०. अथर्वण इकणि ।

अथर्वन्शब्दस्य इकणि प्रत्यये परे टेर्लोपो न भवति । अथर्वाणं वेत्त्यधीते वा—आथर्वणिकः । न्यायादित्वादिकण् ।

५१. राजन्यमनुष्ययूनामऽके ।

राजन्य, मनुष्य, युवन्—इत्येतेषां प्राप्तो लोपो न भवति अकप्रत्यये परे । राजन्याना समूहो राजन्यकम् । एव मानुष्यकम् । 'तद्धितेऽजातियस्वरे' [८/४/७८] इति यलोपे प्राप्ते प्रतिषेधोऽयम् । यूनो भावः—यौवनिका । चौरादित्वादकञ् । 'नोऽपदस्य तद्धिते' [८/४/६२] इति टेर्लोपे प्राप्ते प्रतिषेधः । अक इति किम् ? युवा प्रयोजनमस्य यौविकम् ।

५२. अनोऽटये ये ।

अन्नन्तस्य टेर्लोपो न भवति टचवर्जिते ये प्रत्यये परे । सामनि साधु —सामन्य. । एव वेमन्यः । मूर्धनि भवः—मूर्धन्य । तक्ष्णोऽपत्य—ताक्षण्य. । कुर्वादित्वात् ञ्य. । अटच इति वचनात् सानुबन्धेऽपि प्रतिषेधः । अन इति किम् ? छत्रिषु साधु—छत्र्यः । अटच इति किम् ? राज्ञो भावः कर्म वा—राज्यम् । दौरात्म्यम् । य इति किम् ? परमराजः, द्विमूर्ध ।

५३. अणि ।

अन्नन्तस्य टेर्लोपो न भवति अणि तद्धिते परे । सुत्वनोऽपत्य—सौत्वनः । याज्वनः । साम देवताऽस्य सामन । वैमन. । संदिष्ट कर्म—कार्मणम् । पर्वणि भवः—पार्वणः । अणीति किम् ? कर्म शीलमस्य कार्मः । छत्रादित्वादञ् । कर्मणे शक्तं—कार्मुकम् । 'कर्मण उकञ्' [७/२/१७७] इत्युकञ् । योगविभाग उत्तरार्थः ।

५४. संयोगादिनः ।

संयोगात् परो य इन् तदन्तस्य टेर्लोपो न भवति अणि प्रत्यये परे । शङ्खिनोऽपत्यं—शाङ्खिनः । चाक्रिणः, वाज्रिणः, शाग्मिणः, माद्रिण., भाद्रिणः । सयोगादिति किम् ? मेधाविनोऽपत्यं—मैधावः । मायावः । अणीति किम् ? प्राकारमर्दिनोऽपत्य—प्राकारमर्दि. । बाह्वादित्वादिञ् । अनपत्ये उत्तरेण सिद्धत्वादपत्यार्थोऽयमारम्भः ।

५५. गाथि-विदथि-केशि-पणि-गणिनः ।

गाथिन्, विदथिन्, केशिन्, पणिन्, गणिन्—इत्येतेषां इन्नन्तानां टेर्लोपो न भवति अणि प्रत्यये परे । गाथिनोऽपत्यं—गाथिनः । वैदथिनः, कैशिनः, पाणिनः, गाणिनः ।

५६. अनपत्ये ।

इन्नन्तस्य अपत्यादन्यत्रार्थे योऽण् तस्मिन् परे टेर्लोपो न भवति । सांकूटिनं वर्तते—सांकोटिमम् । साराविण,

सांमार्जिनम् । गर्भिणीनां समूहो गार्भिणम् । भिक्षादित्वादण् । गुणिन इदं —गौणिनम् । स्रग्विण इद—स्राग्विणम् । अनपत्ये इति किम् ? मेधाविनोऽपत्यं—मैधावः । अणीति किम् ? गर्भिणा समूहो गार्भम् । दण्डिनां दाण्डम् । चक्रिणा चाक्रम् । 'दण्डादिभ्योऽञ्' [६/३/२६] इत्यञ् ।

५७. उक्ष्णो लोपः ।

उक्षन्शब्दस्याऽनपत्ये अणि परे टेर्लोपो भवति । उक्ष्ण इद—औक्ष पदम् । अनपत्य इति किम् ? उक्ष्णोऽपत्यं—औक्ष्णः ।

५८. ब्रह्मणः ।

ब्रह्मन्शब्दस्याऽनपत्ये अणि परे टेर्लोपो भवति । ब्रह्मण इद—ब्राह्ममस्त्रम् । ब्राह्मो मन्त्रः । योगविभाग उत्तरार्थः ।

५९. जातौ ।

ब्रह्मन्शब्दस्य जातावभिधेयायां अनपत्ये एवाऽणि परे टेर्लोपो भवति । ब्रह्मण इय—ब्राह्मी ओषधिः । पूर्वेण सिद्धे जातावनपत्ये एवेति नियमार्थं वचनम् । तेनोत्तरसूत्रेणाऽपत्ये लोपो न भवति । ब्रह्मणोऽपत्य—ब्राह्मणः । जाताविति किम् ? ब्रह्मणोऽपत्यं—ब्राह्मो नारद. ।

६०. मनोऽवर्मणोऽपत्ये ।

वर्मन्शब्दवर्जितस्य मन्नन्तस्याऽपत्यार्थविहिते अणि परे टेर्लोपो भवति । सुषाम्नोऽपत्य—सौषामः । माद्रसाम., भाद्रसामः । मन इति किम् ? सुत्वनोऽपत्य—सौत्वन । याज्वन । अवर्मण इति किम् ? चक्रवर्मणोऽप य—चाक्रवर्मण.[1] । अपत्य इति किम् ? चर्मणा छन्नश्चार्मणो रथः ।

६१. हितनाम्नो वा ।

हितनामन्शब्दस्याऽपत्ये अणि परे टेर्लोपो वा भवति । हितनाम्नोऽपत्य—हैतनामनः, हैतनाम । अपत्य इति किम् ? हैतनामन ।

६२. नोऽपदस्य तद्धिते ।

नकारान्तानामपदसंज्ञकानां टेर्लोपो भवति तद्धिते परे । मेधाविनोऽपत्यं—मैधाव. । मायाव., औडुलोमिः, शारलोमिः, आग्निशर्मि. । द्वयोरह्नो समाहारो द्वयहः । त्र्यह. । हस्तिना समूहो हास्तिकम् । न इति किम् ? वैद्युत तेजः । अपदस्येति किम् ? मेधाविरूप्य, मेधाविमयम् । तद्धित इति किम् ? हस्तिना, हस्तिने ।

६३. कलाप्यादेः ।

कलाप्यादीनां नकारान्तानामपदसंज्ञकानां टेर्लोपो भवति तद्धिते परे । अत्र ये इन्नन्तास्तेषा 'अनपत्ये' [८/४/५६] इति, शिखण्डिपीठसर्पिणोरपत्येऽपि 'संयोगादिनः' [८/४/५४] इति, सूकरसद्मसुपर्वणोस्तु 'अणि' [८/४/५३] इति निषेधे प्राप्ते लोपार्थं वचनम् । कलापिना प्रोक्त वदमधीयते—कालापा. । कौथुमा । तैतली, जाजली, लाङ्गली चाचार्याः । तत्कृतो ग्रन्थोऽपि उपचारात् तच्छब्देनोच्यते । तमधीयते—तैतलाः, जाजला., लाङ्गलाः । शिखण्डिन इमेऽपत्यानि वा—शैखण्डा । शिलालिनः—शैलालाः । सब्रह्मचारिणः—साब्रह्मचारा. । पीठसर्पिणः—पैठसर्पाः । सूकरसद्मनः—सौकरसद्माः । सुपर्वणः—सौपर्वाः ।

---

१. अत्र व्यावृत्तौ सर्वत्र 'नोऽपदस्य....' [८/४/६२] इत्यनेनापि टेर्लोपो न 'अणि' [८/४/५३] इत्यनेन निषेधात् ।

६४. वाऽश्मनो विकारे ।

अश्मन्शब्दस्याऽपदस्य टेर्लोपो वा भवति विकारे विहिते तद्धिते परे । अश्मनो विकारः—आश्मः आश्मनो वा । विकारे इति किम् ? आश्मनो मन्त्रः । नित्यमिच्छन्त्येके ।

६५. चर्म-शुनोः कोश-संकोचयोः ।

चर्मन्, श्वन्—इत्येतयोरपदभूतयोर्यथासंख्य कोशे संकोचे चार्थे तद्धिते परे टेर्लोपो भवति । चर्मणो विकारः—चार्मः कोशः । कोशादन्यत्र चार्मणः । शुनोऽयं—शौवः सकोचः । सकोचादन्यत्र शौवनः । कथ शुनो विकारोऽवयवो वा—शौवं मांसं, शौवं पुच्छमिति ? हेमादित्वादजि 'नोऽपदस्य तद्धिते' [८/४/६२] इत्येव भविष्यति ।

६६. अनाराच्छश्वत्पृथगोऽव्ययस्य ।

आरात्, शश्वत्, पृथग्—इत्येतद्वर्जितस्य अपदसंज्ञकस्य अव्ययस्य टेर्लोपो भवति तद्धिते परे । स्वर्भवः—सौवः । बहिर्जातः—बाह्यः, बाहीकः । मातप्रातिकः, पौनःपुनिकः । 'वर्षाकालेभ्य…' [६/४/८१] इतीकण् । अनभिधानादव्ययलक्षणस्तनट्[1] न भवति । पौनःपुण्यम् । उपरिष्टादागतः—औपरिष्टः । परत आगतः—पारतः । एकैकशो भावः—एकैकश्यम्[2] । अनाराच्छश्वत्पृथग इति किम् ? आरातीयः, शाश्वतिकः, शाश्वतः, पार्थक्यम् । अपदस्येति किम् ? कंयुः, शयुः, अहंयुः ।

६७. अतोऽह्नोऽनीनटे ।

अपदस्य अहन्शब्दस्य अकारस्य लोपो भवति ईनटवर्जिते तद्धिते परे । अह्नां समूहः—आह्नम् । अह्ना निर्वृत्तं—आह्निकम् । अनीनटे इति किम् ? द्वाभ्यामहोभ्यां निर्वृत्तः, द्वाभ्यामहोभ्यां भृतोऽधीष्टः, द्वे अहनी भूतो भावी वा—द्व्यहीनः । त्र्यहीणः । 'रात्र्यहःसंवत्सरात्…' [७/२/१५५] इत्यादिना ईनः । टे—द्वयोरह्नोः समाहारः द्व्यहः । त्र्यहः । 'अनः समाहारे' [८/३/२५] इति टः । उत्तमाहः, परमाहः, पुण्याहः, सुदिनाहम् । 'अह्नः' [८/३/८] इति टः । अन्वहं, प्रत्यहम् । 'नपुंसकाद्वा' [८/३/३२] इति टः ।

६८. विंशतेस्तेर्डिति ।

विंशतिशब्दस्याऽपदसंज्ञकस्य यस्तिशब्दस्तस्य लोपो भवति डिति तद्धिते परे । विंशत्या क्रीतः—विंशकः[3] । विंशतिरधिका अस्मिन् शते—विंशं शतम् । एकविंशम् । विंशतेः पूरणः—विंशः । एकविंशः । आसन्ना विंशतिरेषा आसन्नविंशाः । विंशतेरिति किम् ? एकसप्ततेः पूरणः—एकसप्ततः । एकाशीतः । तद्धित इति किम् ? विंशतौ ।

६९. उवर्णस्याऽस्वयंभुवोऽव् ।

स्वयंभूशब्दवर्जितस्य अपदसंज्ञकस्य उवर्णान्तस्य तद्धिते परे अव् इत्यादेशो भवति । उपगोरपत्यं—औपगवः । कापटवः, बाभ्रव्यः, माण्डव्यः, शङ्कव्यं दारु, पिचव्यः कार्पासः, बाहविः, औपबिन्दविः, औपबाहविः । अस्वयंभुव इति किम् ? स्वायंभुवः ।

७०. एयेऽकद्रूपाण्डवोर्लोपः ।

कद्रूपाण्डुशब्दवर्जितस्य अपदसंज्ञकस्य उवर्णान्तस्य एये तद्धिते परे लोपो भवति । कमण्डल्वा अपत्यं—कामण्डलेयः ।

---

१. अथाव्ययसमुदायोऽव्ययग्रहणेन गृह्यते इति 'सार्वचिरं…' [६/४/९०] इति सायप्रातरादिभ्यस्तनट् कस्मान्न भवति इत्याह ।

२. एकमेकं ददाति—एकशब्दस्याऽन्तस्य वीप्सायां द्वित्वं, 'एकस्याद्वेर्वीप्सायाः प्लुक् च' [८/४/८६] इत्यमो लुकि 'बह्वल्पार्थात्…' [८/२/१२] इति कारके शस् । एकैकशो भावः, ट्यण् ।

३. 'असंज्ञायां कः' [७/२/९५] इति कप्रत्ययः ।

माद्रबाहेयः, शैतिबाहेयः, जाम्बेयः, लैखाभ्रेयः । अत्र परत्वादुवादेशो बाध्यते । अकद्रूपाण्ड्वोरिति किम् ? काद्रवेयः, पाण्डवेयः । एय इति किम् ? माण्डव्यः ।

७१. इवर्णावर्णस्य ।

इवर्णस्य अवर्णस्य चऽपदसञ्ज्ञकस्य लोपो भवति तद्धिते परे । इवर्ण—नाभेय , सांकृत्यः, दौलेय , रौहिणेयः । अवर्ण—दाक्षि., प्लाक्षिः, चौडिः, बालाकिः । अपदस्येति किम् ? शुचितर , शुक्लतमः, ऊर्णायुः । तद्धित इति किम् ? अग्न्योः, वृक्षे ।

७२. ईप्यऽतः ।

अकारस्य लोपो भवति ईपि प्रत्यये परे । कुरुचरी, मद्रचरी, औपगवी, वाशिष्ठी, गौतमी । अत इति किम् ? दण्डिनी, कर्त्री ।

७३. मत्स्यस्य यः ।

मत्स्यशब्दसंबन्धिनो यकारस्य लोपो भवति ईपि परे । मत्सी । गौरादित्वादीप् ।

७४. हसात् तद्धितस्य ।

हसात् परस्य तद्धितस्य यकारस्य लोपो भवति ईपि परे । मनोरपत्य स्त्री --मनुषी । गर्गस्यापत्य पौत्रादि स्त्री—गार्गी । सोमो देवता अस्याः सौमी दिक् । वार्कणी, सार्मिधेनी । हसादिति किम् ? कारिकाया अपत्यं—कारिकेयी । हारिकेयी । तद्धितस्येति किम् ? वैश्यस्य भार्या—वैश्यी । ईपीति किम् ? आवट्या ।

७५. सूर्यागस्त्ययोरीये च ।

सूर्य, अगस्त्य—इत्येतयोर्यकारस्य लोपो भवति ईयप्रत्यये चकारादीपि च परे । सूर्यस्य भार्या मानुषी - - सूरी । सूर्यस्येयं इति अणि सौरी प्रभा । अगस्त्यस्य इय—आगस्ती । सौर्यस्याय—सौरीय । एवमागस्तीय । ईय चेति किम् ? सूर्यो देवता अस्य सौर्य. । अगस्त्यस्याऽयमागस्त्यः ।

७६. तिष्यपुष्ययोर्नक्षत्रेऽणि ।

नक्षत्रे वर्तमानयोरनयोर्यकारस्य लोपो भवति अणप्रत्यये परे । तिष्येण चन्द्रयुक्तेन युक्ता तैषी रात्रि. । तैषमह । पौषी रात्रि , पौषमह । तिष्ये भव.—तैष. शिशुः । एव पौष । तिष्यपुष्ययोरिति किम् ? सिध्येन चन्द्रयुक्तेन युक्त—सैध्यमहः । नक्षत्र इति किम् ? तिष्यो देवतास्य तैष्यश्चरु । पुष्यस्य माणवकस्येद—पौष्यम् ।

७७. आपत्यस्य क्वि्क्यययोः ।

हसादित्यनुवर्तते । हसात्परस्य आपत्यस्य यकारस्य लोपो भवति च्वौ क्ये च प्रत्यये परे । अगार्ग्यो गार्ग्यो भूतः— गार्गीभूत.[1] । वात्सीभूत. । क्य—गार्ग्यमिच्छति गार्गीयति । वात्सीयति । गार्ग्य इवाचरति—गार्गायते । वात्सायते । आपत्यस्येति किम् ? सकाशेन निर्वृत्त साकाश्य, तत्र साकाश्यीभूत [2], साकाश्यीयति, साकाश्यायते । हसादिति किम् ? कारिकेयीभूतः, कारिकेयीयति, कारिकेयायते ।

---

१. येन नाव्यवधानमिति न्यायादीकाराकारादिना व्यवहितस्यापि यस्य लुक् ।

२ असाकाश्य. साकाश्यो देशो भूत. ।

७८. तद्धितेऽनातियस्वरे ।

हसात्परस्यापत्ययकारस्य यकारादौ आकारादिवर्जिते स्वरादौ च तद्धिते परे लोपो भवति । गार्ग्ये साधुः— गार्ग्यः । गर्गाणां समूहो गार्गकम् । एव वात्सकम् । गार्ग्यस्याऽयं— गार्गीय. । एव वात्सीयः । आपत्यस्येति किम् ? संकाशेन निर्वृत्त सांकाश्यं, तत्रभवः साकाश्यकः । एवं काम्पील्यकः । तद्धिते इति किम् ? गार्ग्येण, वात्स्येन । यस्वरे इति किम् ? गार्ग्यरूप्य. । अनातीति किम् ? गार्ग्यायणः । हसादिति किम् ? कारिकेयिः, हारिकेयिः ।

७९. बिल्वकीयादेरीयस्य ।

नडादिषु[1] बिल्वादय. पठ्यन्ते तेषां कीयप्रत्ययान्तानामिह निर्देश । बिल्वकीयादीनां दशानां शब्दानां अवयवस्य ईयस्य लोपो भवति तद्धिते यकारे स्वरे च परे । अनातीति नानुवर्तते आतोऽसंभवात् । बिल्वा. सन्ति अस्यामिति बिल्वकीया नाम नदी, तस्या भवा बैल्वकाः । एव वैणुकाः, वैत्रकाः, वैतसकाः, तैकाः, ताक्षकाः, ऐक्षुकाः, काष्टकाः, कापोतकाः, क्रौञ्चकाः । बिल्वकीयादेरिति किम् ? नाडकीयः, प्लाक्षकीय । यस्वरे इति किम् ? बिल्वकीयरूप्यम् । तद्धित इति किम् ? बिल्वकीया ।

८०. ऋवर्णोवर्णसुर्दोस्म्यं इकस्येतः ।

लोप इत्यनुवर्तते । ऋवर्ण, उवर्ण— इत्येतदन्तात् इसन्तादुमन्तात् दोषशब्दाच्च परस्य इकप्रत्ययसंबन्धिन इकारस्य लोपो भवति । मातुरागतं— मातृकम् । पैतृकम् । '**ऋत इकण्**' [७/१/६३] । उवर्ण—निषादकर्ष्वां भवो नैषादकर्षुक. । शाबरजम्बुक । '**उवर्णादिकण्**' [६/४/३६] । इस्- सर्पि. पण्यमस्य सार्पिष्कः । बार्हिष्कः । उस्—धनुः प्रहरणमस्य धानुष्कः । याजुष्क. । इसुसो. प्रत्यययोर्ग्रहणादिह न भवति । आशिषा चरति— आशिषिकः । वसेः क्विप् उस्, उषा चरति— औषिकः । दोर्भ्यां तरति—दौष्कः ।

८१. तोऽशश्वदकस्मात् ।

पूर्वमनुवर्तते । शश्वत्, अकस्मात्— इत्येतद्वर्जितात् तकारान्ताच्छब्दात्परस्य इकप्रत्ययसबन्धिन इकारस्य लोपो भवति । उदश्विना ससृकृत ओदन — औदश्वित्क । शकृता ससृष्टः— शाकृत्क । याकृत्कः । अशश्वदकस्मादिति किम् ? शश्वद् भव— शाश्वतिकम् । '**वर्षाकालेभ्य**'' [६/४/८१] इति इकण् । आकस्मिकम् । अध्यात्मादित्वादिकण् । मथितं पण्यमस्य माथितिक इत्यत्रापि तान्तत्वस्य लाक्षणिकत्वान्न भवति ।

८२. सारवैक्ष्वाक-मैत्रेय-भ्रौणहत्य-धैवत्य-हिरण्मयाः ।

सारवादय. शब्दा अणादिप्रत्ययान्ता. कृता अय्लोपादयो निपात्यन्ते । सरय्वां भवं— सारवमुदकम् । सरयूशब्दस्याऽणि प्रत्यये अय् इत्यस्य लोप. । इक्ष्वाकोरपत्यं —ऐक्ष्वाक । '**रूढाबञ्**' [६/२/१२३] । इक्ष्वाकोरिदं— ऐक्ष्वाकम् । इक्ष्वाकुशब्दस्य अञि अणि चोकारलोपः । मित्रयोरपत्यं—मैत्रेयः । मित्रयुशब्दस्य गृष्टयादित्वादेयञि युलोप. । भ्रूणघ्नो भावः कर्म वा—भ्रौणहत्यम् । धीव्नो भावः कर्म वा— धैवत्यम् । अत्र टयणि नकारस्य तकारः । हिरण्यस्य विकारो हिरण्मयम् । अत्र मयटि यशब्दलोपः ।

८३. अन्तमान्तितमान्तितोऽन्तियान्तिषद् वा ।

अन्तमादय. शब्दास्तमादिप्रत्ययान्ताः कृततिकादिलोपादयो वा निपात्यन्ते । अयमेषामतिशयेन अन्तिकः— अन्तम. । पक्षे अन्तिकतम । अत्रान्तिकशब्दस्य तमप्रत्यये तिकशब्दलोपो '**नोऽप्रशानः सक् छलेऽमपरे**···' [१/३/१३]

---

१. ननु बिल्वकीयादयो द्विधा । केचिन्नडादे कीये सति, अपरे कुत्सितार्थकपप्रत्ययान्तादीये सति, तत्केषामिह ग्रहणमित्याशङ्क्य आदिशब्दस्य व्यवस्थावाचित्वादित्याह ।

इत्यादिना सगागमाऽभावश्च निपात्यते। अयमेषामतिशयेन अन्तिकः—अन्तितमः। अत्र कशब्दस्य लोपः। पक्षे अन्तिकतमः। अन्तिकादागच्छति—अन्तित आगच्छति। अत्राऽपादानलक्षणे तसौ कशब्दस्य लोपः। पक्षे अन्तिकत आगच्छति। अन्तिके साधुः—अन्तियः। अत्र यप्रत्यये कशब्दस्य लोपः इकारस्य च लोपाऽभावः। पक्षे अन्तिक्यः। अन्तिके सीदति—अन्तिषद्। अत्र सदिति क्विबन्ते कलोपः सस्य षत्वं च। पक्षे अन्तिकसत्।

८४. डिति टेः।

डिति प्रत्यये परे टेर्लोपो भवति। मुनौ, साधौ। महत्या करः महाकरः। महाधामः, उपसरजः। आसन्नाश्चत्वारो येषां ते आसन्नचताः। अदूरचताः। डितीति किम्? दृषदौ, दृषद।

८५. भृशाभीक्ष्ण्यसातत्यवीप्सासु द्विः प्राक् तमादेः।

क्रियायाः साकल्यं भृशार्थः। पौनःपुन्यं आभीक्ष्ण्यम्। क्रियान्तरैरव्यवधानं सातत्यम्। बहूनां सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियया गुणेन द्रव्येण जात्या वा युगपत् प्रयोक्तुर्व्याप्तुमिच्छा वीप्सा। भृशादिष्वर्थेषु यत्पदं वाक्यं वा वर्तते तत्तमादिप्रत्ययेभ्यः प्रागेव द्विर्भवति। भृशे—लुनीहि लुनीहीत्येवायं लुनाति। अधीष्वाधीष्वेत्येवायमधीते। आभीक्ष्ण्ये—भोजं भोजं व्रजति। भुक्त्वा भुक्त्वा व्रजति। सातत्ये—पचति पचति। अधीते अधीते। ब्रह्मचर्यं चरति चरति। प्रपचति प्रपचति। सत्करोति सत्करोति। अलंकरोति अलंकरोति। पुनः पुनः पचति। भूयो भूयः पठति। मन्दं मन्दं नुदति। स्तोकं स्तोकं चलति। भृशादयः क्रियाऽव्ययकृता धर्माः। क्रियाविशेषणस्यापि क्रियात्वेन अध्यवसायात् भृशादियोगे द्विर्वचनं भवति। वीप्सायाम्—वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः। गृहे गृहे अश्वाः। योद्धा योद्धा क्षत्रियः। रूपं रूपं पश्यति। भृशादिष्विति किम्? लुनीहि, भुक्त्वा व्रजति, पचति। प्राक् तमादेरिति किम्? पचतिपचतितमाम्। पचतिपचतितराम्। अत्र तमादेरातिशायिकात्पूर्वमेव द्विर्वचनं, पश्चात्तमादि। अन्यथा ह्यनियमः स्यात्।

८६. एकस्यादेर्विभक्तेः प्लुक् च।

एकशब्दस्य द्वित्वे कृते आदेरेकशब्दस्य विभक्तेः प्लुग्भवति। पित्करणं पुंवद्भावार्थम्। एकैकमक्षरं पठति। एकैकयाहुत्या जुहोति। एकएकयाहुत्या जुहोति। एकैकस्या। एकएकस्या। अत्रावसानस्य विवक्षितत्वात्पुंवद्भावे सति सन्धिकार्यं न भवति, यथा अग्रे अग्रे सूक्ष्माः। एकशब्दस्य नामत्वाद् वीप्सा, वीप्साया पूर्वेण द्वित्वम्। चकार उत्तरत्र प्लुग्द्विर्वचनयोः समुच्चयार्थः।

८७. आबाधे।

आबाधः मनःपीडा स च प्रयोक्तृधर्मः। आबाधे वर्तमानं पदं द्विर्भवति तत्रादेर्विभक्तेः प्लुक् च। गतगतः, नष्टनष्टः, पतितपतितः। प्रियस्य विरहात् पीड्यमानायाः कस्याश्चिद् उक्तिः। गतगता, नष्टनष्टा, पतितपतिता। प्रियाया विरहात् पीड्यमानस्य कस्यचिद् उक्तिः।

८८. सादृश्ये गुणो वा पुंवच्च।

सादृश्ये वर्तमानो गुणवाची शब्दो वा द्विर्भवति तत्रादेर्विभक्तेः प्लुक् पुंवच्च। पित्त्वेनैव पुंवद्भावे सिद्धे पुंवत्करणं प्रतिषिद्धस्यापि पुंवद्भावस्य विधानार्थम्। गुणे गुणी चेह गृह्यते। शुक्लशुक्लं रूपम्। शुक्लशुक्लः पटः। कालककालिका। शुक्लादिसदृशमपरिपूर्णगुणमेवमुच्यते। वाग्रहणात् पक्षे जातीयोऽपि भवति। शुक्लजातीयः, पटुजातीयः। गुण इति किम्? अग्निर्माणवकः, गौर्वाहीकः। सादृश्य इति किम्? शुक्लः पटः। पटुश्चैत्रः।

८९. अकृच्छ्रे प्रियसुखे।

क्लेशाऽभावत्वं अकृच्छ्रम्। अकृच्छ्रे वर्तमानौ प्रियसुखशब्दौ द्विर्वा भवतः तत्रादेर्विभक्तेः प्लुक् च। प्रियप्रियेण ददाति, प्रियेण ददाति। अतिप्रियमपि वस्तु अखिद्यमान एव ददातीत्यर्थः। सुखसुखेनाधीते, सुखेनाधीते। अतिकठिनमपि

अनायासेनाधीते इत्यर्थः । अकृच्छ्र इति किम् ? प्रियः पुत्रः । सुखो रथः ।

९०. द्वंद्वं वा ।

द्वंद्वमिति वीप्सायां द्विरुक्तस्य द्विशब्दस्य आदेर्विभक्तेः प्लुक् इकारस्याम्भाव उत्तरत्रेकारस्यात्वं विभक्तेश्चाम्भावो वा निपात्यते । द्वंद्वं तिष्ठतः, द्वौ द्वौ तिष्ठतः । नरकपटलान्यधोऽधो द्वंद्वं हीनानि, द्वाभ्यां द्वाभ्यां हीनानि । द्वंद्वं युद्धं वर्तते, द्वयोर्द्वयोर्युद्धं वर्तते । द्वंद्वं कृतं, द्वाभ्यां द्वाभ्यां कृतम् । द्वंद्वं स्थितं, द्वयोर्द्वयोः स्थितम् ।

९१. रहस्य-मर्यादोक्ति-व्युत्क्रान्ति-यज्ञपात्रप्रयोगेषु ।

द्वंद्वमिति द्विशब्दस्य द्विर्वचनं शेषं पूर्ववत् रहस्यादिषु गम्यमानेषु निपात्यते । रहस्ये—द्वंद्वं मन्त्रयन्ते । रहस्यं[1] मन्त्रयन्त इत्यर्थः । मर्यादोक्तौ—आचतुरं हीमे पशवो द्वंद्वं मिथुनायन्ते । माता पुत्रेण पौत्रेण प्रपौत्रेण तत्पुत्रेण च मैथुनं यातीत्यर्थः । व्युत्क्रान्तौ—द्वंद्वं व्युत्क्रान्ताः । द्वैराश्येन भिन्ना इत्यर्थः । व्युत्क्रान्तिर्भेदः । यज्ञपात्रप्रयोगे—द्वंद्वं यज्ञपात्राणि प्रयुनक्ति । द्वे द्वे प्रयुनक्तीत्यर्थः । रहस्यादिष्विति किम् ? द्वौ तिष्ठतः । उक्तिग्रहणं शब्दोपात्तायां मर्यादायां यथा स्यात् प्रकरणादिगम्यायां मा भूदित्येवमर्थम् । द्वन्द्वः समासः । द्वंद्वः कलहः । द्वंद्वं युद्धम् । द्वंद्वं युग्मम् । द्वंद्वानि सहते—दुःखानीत्यर्थः । अत्र द्वंद्व इति शब्दान्तरम् ।

९२. लोकज्ञातेऽत्यन्तसाहचर्ये ।

लोकज्ञातेऽत्यन्तसाहचर्ये द्योत्ये द्विशब्दस्य पूर्ववत् द्वंद्वमिति निपात्यते । द्वंद्वं नारदपर्वतौ । द्वंद्वं रामलक्ष्मणौ । द्वंद्वं बलदेववासुदेवौ । द्वंद्वं स्कन्दविशाखौ । द्वंद्वं शिववैश्रवणौ । लोकज्ञात इति किम् ? द्वौ चैत्रमैत्रौ । अत्यन्तसाहचर्य इति किम् ? द्वौ युधिष्ठिरार्जुनौ । द्वंद्वमिति च सूत्रत्रयेऽपि नपुंसकं वेदितव्यमनुप्रयोगस्य नपुंसकत्वार्थम् ।

९३. संभ्रमे यावद्बोधम् ।

भयादिभिश्चित्तव्याक्षेपात् प्रयोक्तुस्त्वरणं संभ्रमः । संभ्रमे द्योत्ये यत्पदं वाक्यं वा तत् यावद्बोधं द्विर्भवति । नावश्यं वारद्वयमेव शब्दाः प्रयोक्तव्याः, किंतु यावद्भिः शब्दैः सोऽर्थोऽवगम्यते तावद्वारमेव शब्दाः प्रयोक्तव्या इत्यर्थः । अहिरहिः । बुध्यस्व बुध्यस्व । अहिरहिरहिः । बुध्यस्व बुध्यस्व बुध्यस्व । हस्त्यागच्छति हस्त्यागच्छति । लघु पलायध्वं लघु पलायध्वम् । कृतद्विर्वचनानामपि रूपार्थयोरभेदेन स्थानिवद्भावेन चैकपदत्वात् कौतस्कुतः[2], पौनःपुन्यं, पौनःपुनिकः इत्यादिषु तद्धितः सिद्धो भवति ।

९४. अधोऽध्युपरि सामीप्ये ।

सामीप्यं देशकृता कालकृता वा प्रत्यासत्तिः । अधस्, अधि, उपरि—इत्येतानि शब्दरूपाणि द्विर्भवन्ति सामीप्ये द्योत्ये । अधोऽधो लोकम् । लोकस्य अधस्तात् समीपे देशे इत्यर्थः । अध्यधि ग्रामम् । उपर्युपरि नगरम् । उपर्युपरि दुःखानि । सामीप्य इति किम् ? अधः पन्नगाः । अधि ब्रह्मदत्ते पञ्चालाः । उपरि चन्द्रमाः । कथमुपरि शिरसो घट इति ? अत्रौत्तराधर्यमात्रं विवक्षितं, न सदपि सामीप्यमिति न भवति । यथायथमिति मकारान्तमव्ययं यथास्वमित्यर्थे आश्रीयते इति यथास्वे यथायथमिति नारभ्यते ।

९५. प्रोपोत्समः पादपूरणे ।

प्र, उप, उत्, सम्—इत्येतान्युपसर्गरूपाणि द्विर्भवन्ति, तेन चेत् पादः पूर्यते ।

---

१. अत्र द्वंद्वशब्दो रहस्यार्थः, न तु द्विशब्दार्थः संख्या काचिदस्ति । यदनेकार्थः द्वंद्वः स द्वंद्वमाहवे रहस्ये मिथुने युग्मे इति ।

२. कस्कादौ कौतस्कुतेपि पाठादागतेर्थं अनेव न तु 'क्वाभ्येहृ...' [६/४/१५] इति त्यप् ।

प्रप्रशान्तकषायाग्नेरुपोपप्लववर्जितम् ।
उदुज्ज्वलं तपो यस्य संसंश्रयत तं जिनम् ॥

पादपूरणे इति किम् ? प्रणम्य सच्छासनवर्धमानम्। इद छन्दसीति कश्चित्।

९६. आधिक्यानुपूर्व्ये।

आधिक्यं प्रकर्षः। आनुपूर्व्यं क्रमानुल्लङ्घनम्। आधिक्ये आनुपूर्व्ये च वर्तमानं शब्दरूप द्विर्भवति। आधिक्ये—नमो नमः। अधिकं नम इत्यर्थः। कन्या दर्शनीया कन्या दर्शनीया। मह्य रोचते मह्य रोचते। आनुपूर्व्ये—मूले मूले स्थूलाः। अग्रे अग्रे[1] सूक्ष्माः। ज्येष्ठं ज्येष्ठं अनुप्रवेशय। कनिष्ठं कनिष्ठमासय। मूलाद्यानुपूर्व्येणैषां स्थौल्यादय इत्यर्थः।

९७. नानावधारणे।

नानाभूतानां भेदेन इयत्तापरिच्छेदो नानावधारणम्। नानावधारणे वर्तमानं शब्दरूपं द्विर्भवति। अस्मात् कार्षापणादिह भवद्‌भ्यां माषं माषं देहि। प्रत्येकं माषमात्र देहि, नाधिकमित्यर्थः। द्वौ द्वौ देहि त्रीन् त्रीन् देहि। एषु[2] कार्षापणसंबन्धिनो माषा न साकल्येन दित्सिताः कि तर्हि प्रत्येकं माषमात्रमेव द्वावेव त्रय एव वेति न वीप्सास्ति। नानाग्रहणं किम् ? अस्मात् कार्षापणात् इह भवद्‌भ्यां माषं देहि। एकमेवेत्यर्थ। अवधारण इति किम् ? अस्मात् कार्षापणात् इह भवद्‌भ्यां माषं द्वौ त्रीन् वा देहि।

९८. पूर्वप्रथमावन्यतोऽतिशये।

अतिशयस्तदर्थस्याधिकता। पूर्वप्रथमशब्दौ द्विर्भवत अन्यतोऽतिशये तदर्थस्य प्रकर्षे द्योत्ये। आतिशायिकापवादः[3]। पूर्वं पूर्वं पुष्प्यन्ति। प्रथमं प्रथमं पच्यन्ते। अन्येभ्य पूर्वतरं पुष्प्यन्ति, प्रथमतरं पच्यन्त इत्यर्थः। अन्यत इति किम् ? पूर्वतरं पुष्प्यन्ति। प्रथमतरं पच्यन्ते। अत्र स्वव्यापारापेक्षयातिशयो गम्यते न तु अन्यापेक्षया[4]। अतिशय इति किम् ? पूर्वं, प्रथमम्।

९९. डतरडतमौ समानां स्त्रीभावप्रश्ने।

समा. केनचिद् गुणेन तुल्यतया संप्रधारिताः। समानां स्त्रीलिङ्गस्य भावस्य प्रश्ने वर्तमानं यद् डतरान्तं डतमान्तं च शब्दरूपं तद् द्विर्भवति। उभाविमावाढ्यौ, कतरा कतरा अनयोराढ्यता कि दैवकृता उत पौरुषकृतेत्यर्थः। कतमा कतमा अनयोराढ्यता किं साधनसंबन्धकृता उतान्यसंबन्धकृता आहोस्विदुभयसंबन्धकृतेत्यर्थः। एवं सर्वे इमे आढ्याः, कतरा कतरा एषामाढ्यता। कतमा कतमा एषामाढ्यता। सर्वे इमे आढ्याः, यतरा यतरा एषां विभूतिः ततरा ततरा कथ्यताम्। यतमा यतमा एषां संपत् ततमा ततमा कथ्यताम्। डतरडतमाविति किम् ? उभाविमावाढ्यौ, कानयोराढ्यता। समानामिति किम् ? आढ्योऽयं, कतरास्याढ्यता। कतमास्याढ्यता। स्त्रीग्रहणं किम् ? उभाविमावाढ्यौ, कतरदनयोराढ्यत्वम्। कतमोऽनयोर्विभवः। भावग्रहणं किम् ? उभाविमौ लक्ष्मीवन्तौ, कतरानयोर्लक्ष्मीः। कतमानयोर्लक्ष्मीः। लक्ष्यतेऽनया पुण्यकर्मेति लक्ष्मीः। इय स्त्री भवति न भाव इति। प्रश्न इति किम् ? उभाविमावाढ्यौ, यतरानयोराढ्यता ततरा श्रूयताम्। केचित् डतरडतमाभ्या स्त्रीलिङ्गाभ्यान्यत्रापीच्छन्ति। उभाविमावाढ्यौ, कीदृशी कीदृशी अनयोराढ्यता। कतरत्कतरदनयोराढ्यत्वम्। कतम. कतमोऽनयोर्विभवः। करताऽनयोराढ्यता इत्यादौ प्राप्ते स्वार्थिकं द्विर्वचनम्।

---

१. अत्राऽवसानविवक्षणात् 'न संधिः' [१/३/४२] इति संधिनिषेधः।

२. वीप्सा हि द्विरुच्यमानस्य यावन्तोर्थभेदास्तावतां प्रत्येकं क्रियादिना व्याप्तुमिच्छा सा न द्वयोस्त्रयाणां वा सबन्धे भवति। अपि तु सर्वेषामेव। अत्र च कार्षापणो नामानेकमाषसमुदायरूपस्तत्र तत्सबन्धिनो माषा. सर्वे एव न दातुमिष्टाः किंतु द्वावेव, वीप्सायां तु सर्वं ददात्येव।

३ प्रकृष्ट· स्वव्यापारापेक्षयातिशायिकोऽर्थस्तस्यापवादः।

४. क्रमो हि किशलयानन्तरं पुष्पं, तत्त्यागे न प्रथममेव पुष्पम्। एवं पुष्पपरित्यागे न फलमिति।

१००. वाक्यस्य परिवर्जने वा॥

वाक्यस्याऽवयवो यः परिशब्दो न पदस्य स वर्जने वर्तमानो द्विर्वा भवति। परिपरि त्रिगर्तेभ्यो वृष्टो मेघः। परि त्रिगर्तेभ्यो वृष्टो मेघः। एवं परिपरि सौवीरेभ्यः। परि सौवीरेभ्यः। वाक्यस्येति किम्? परित्रिगर्तं वृष्टो मेघः। वाक्यस्यैवेत्यवधारणविज्ञानात्[1] पदावयवे न भवति। परिरिति किम्? अप त्रिगर्तेभ्यो वृष्टो मेघः। वर्जन इति किम्? साधुर्देवदत्तो मातरं परि।

१०१. संमत्यसूयाकोपकुत्सनेष्वाद्यामन्त्रितमादौ स्वरेष्वऽन्त्यश्च प्लुतो वा।

कार्येष्वाभिमत्यं सम्मतिः पूजनं वा। परगुणासहनमसूया। कोपः क्रोधः। निन्दा कुत्सनम्। एते प्रयोक्तृधर्मा नाभिधेयधर्मा.। एतेष्वर्थेषु वर्तमानस्य वाक्यस्यादिभूतं यदामन्त्रितं पदं तद् द्विर्भवति। तत्र द्विर्वचने आदौ पूर्वोक्तौ स्वरेषु स्वराणां मध्ये योऽन्त्यस्वरः स प्लुतो वा भवति। अनुवर्तमानेऽपि विकल्पे पुनर्वाग्रहणं प्लुतस्यैव विकल्पार्थं, तेन द्विर्वचने विकल्पो न संबध्यते। संमतौ—माणवक३! माणवक!, माणवक! माणवक, अभिरूपक३! अभिरूपक!, अभिरूपक! अभिरूपक! शोभनः खल्वसि। असूयायां—माणवक३! माणवक!, माणवक! माणवक, अभिरूपक३! अभिरूपक!, अभिरूपक! अभिरूपक! रिक्त ते आभिरूप्यम्। कोपे—माणवक३! माणवक!, माणवक! माणवक, अविनीतक३! अविनीतक!, अविनीतक! अविनीतक! इदानीं ज्ञास्यसि जाल्म!। कुत्सने—शक्तिके३! शक्तिके!, शक्तिके! शक्तिके, यष्टिके३! यष्टिके!, यष्टिके! यष्टिके! रिक्ता ते शक्तिः। संमत्यसूयाकोपकुत्सनेष्विति किम्? देवदत्त! गामभ्याज शुक्लां दण्डेन। आदीति किम्? शोभनः खल्वसि माणवक!। आमन्त्रितमिति किम्? उदारो देवदत्त.। आदाविति किम्? उत्तरोक्तौ मा भूत्। स्वरेष्विति किम्? हसान्तस्यापि यथा स्यात्। अन्त्य इति किम्? आदिर्मध्यो वा मा भूत्। चकारो द्विर्वचनानुकर्षणार्थः। तथा च चानुकृष्टत्वादुत्तरत्र नानुवर्तते।

१०२. भर्त्सने पर्यायेण।

भर्त्सनं कोपेन दण्डाविष्करणम्। तत्र द्विर्वचनं सिद्धमेव प्लुतार्थ आरम्भः। भर्त्सने वर्तमानस्य वाक्यस्य यदामन्त्रितं पदं तद् द्विर्भवति। तत्र पर्यायेण पूर्वस्यामुत्तरस्यां वोक्तौ स्वरेष्वन्त्यस्वरः प्लुतो वा भवति। चौर३! चौर!, चौर! चौर३!, चौर!चौर! दस्यो३! दस्यो!, दस्यो! दस्यो३!, दस्यो! दस्यो! घातयिष्यामि त्वां, बन्धयिष्यामि त्वाम्।

१०३. त्यादेः साकाङ्क्षस्याऽङ्गेन।

वाक्यस्य स्वरेष्वन्त्यः प्लुतो वेत्यनुवर्तते भर्त्सने इति च। भर्त्सने वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य अङ्ग इत्यनेन निपातनेन युक्तस्य संबन्धी प्लुतो वा भवति। अङ्ग! कूज३, अङ्ग! कूज इदानीं ज्ञास्यसि जाल्म!। अङ्ग! व्याहर३, अङ्ग! व्याहर इदानीं ज्ञास्यसि जाल्म!। त्यादेरिति किम्? अङ्ग! देवदत्त! मिथ्या वदसि। साकाङ्क्षस्येति किम्? अङ्ग! पच, नैतदपरमाकाङ्क्षति। अङ्गेनेति किम्? देवदत्त! कूजेदानी ज्ञास्यति जाल्म!। भर्त्सन इति किम्? अङ्गाधीष्व मोदक ते दास्यामि।

१०४. क्षियाशीःप्रैषेषु।

क्षिया—आचारनाशः। आशीः—प्रार्थनाविशेषः। प्रैषोऽसत्कारपूर्विका व्यापारणा। एतेषु वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यः स्वरस्त्याद्यन्तस्य पदस्य वाक्यान्तराकाङ्क्षस्य संबन्धी प्लुतो वा भवति। क्षियायां—स्वयं ह रथेन याति३ उपाध्यायं पदातिं गमयति। स्वयं ह रथेन याति उपाध्यायं पदातिं गमयति। स्वयं ह ओदनं भुङ्क्ते३ उपाध्यायं सक्तून् पाययति। स्वयं ह ओदनं भुङ्क्ते उपाध्यायं सक्तून् पाययति। आशिषि—सिद्धान्तमध्येषीष्ठाः३ व्याकरणं च तात!। सिद्धान्तमध्येषीष्ठा व्याकरण च तात!। पुत्रांश्च लप्सीष्ठाः३ धनं च तात!। पुत्रांश्च लप्सीष्ठाः धनं च तात!।

---

१. यद्यपि यः पदावयवः स वाक्यस्यापि तथापि यो वाक्यस्यैव भवतीति।

प्रैषे—त्वं ह पूर्वं ग्रामं गच्छ३ चैत्रो दक्षिणम् । त्वं ह पूर्वं ग्रामं गच्छ चैत्रो दक्षिणम् । कटं च कुरु३ ग्रामं च गच्छ३ । कटं च कुरु ग्रामं च गच्छ । त्यादेरिति किम् ? भवता खलु कट. कर्तव्य ग्रामश्च गन्तव्य । साकाङ्क्षस्येति किम् ? दीर्घं ते आयुरस्तु ।

१०५. चित्युपमार्थे ।

उपमार्थे वर्तमाने चित् इत्यस्मिन्निपाते प्रयुज्यमाने वाक्यस्य स्वरेष्वन्त्य. स्वर. प्लुतो वा भवति । अग्निश्चिद् भाया३त्, अग्निश्चिद् भायात् । राजा चिद् भूया३त्, राजा चिद् भूयात् । अग्निरिव राजेवेत्यर्थः । चितीति किम् ? अग्निरिव भायात् । चितीति रूपसत्ताश्रयणात् अप्रयोगे न भवति । अग्निर्माणवको भायात् । उपमार्थे इति किम् ? कथंचिदाहुः—कृच्छ्रेणाहुरित्यर्थः ।

१०६. प्रतिश्रवणनिगृह्यानुयोगयोः ।

प्रतिश्रवणं परोक्तस्याभ्युपगम. स्वयं प्रतिज्ञान श्रवणाभिमुख्य च । निगृह्य स्वमतात् प्रच्याव्यानुयोगो निग्रहपदस्याविष्करणं निगृह्यानुयोगः उपालम्भ इति यावत् । एनयोर्वर्तमानस्य वाक्यस्य स्वरेष्वन्त्यस्वर. प्लुतो वा भवति । अभ्युपगमे—गां मे देहि भोः ! । हन्त ते ददामि३, हन्त ते ददामि । स्वयं प्रतिज्ञाने—नित्य शब्दो भवितुमर्हति३, नित्यः शब्दो भवितुमर्हति । श्रवणाभिमुख्ये—भो देवदत्त ! कि मार्ष३, भो देवदत्त ! कि मार्ष । मार्षेति श्रवणाभिमुख्य-द्योतको निपातः । निगृह्यानुयोगे—अद्य श्राद्धमित्यात्थ३, अद्य श्राद्धमित्यात्थ । अद्य श्राद्धेति वादी युक्त्या स्वमतात् प्रच्याव्यैवमुपालभ्यते ।

१०७. विचारे पूर्वस्य ।

किमिदं स्यात् किमिदमिति निरूपण विचार सशय इति यावत् । तस्मिन् विषये सशय्यमानस्य यत्पूर्वं तस्य स्वरेष्वन्त्यः स्वरः प्लुतो वा भवति । अहिर्नु३ रज्जुर्नु । अहिर्नु रज्जुर्नु । स्थाणुर्नु३ पुरुषो नु । स्थाणुर्नु पुरुषो नु ।

१०८. ओमः प्रारम्भे ।

प्रारम्भे—प्रणामादेरभ्यादाने[1] वर्तमानस्य ओम्शब्दस्य स्वरेष्वन्त्य स्वर प्लुतो वा भवति । ओ३म् ऋषभ पवित्रम् । ओमृषभं पवित्रम् । एवं ओ३म् ऋषभमृषभगामिन प्रणमत । ओमृषभमृषभगामिनं प्रणमत । प्रारम्भ इति किम् ? ओं ददामि । ओमत्राभ्युपगमे ।

१०९. हेः प्रश्नाख्याने ।

प्रश्नस्याख्याने पृष्टप्रतिवचने वर्तमानस्य वाक्यस्य स्वरेष्वन्त्य स्वरो हिशब्दसंबन्धी प्लुतो वा भवति । अकार्षीः कट देवदत्त ! । अकार्ष हि३, अकार्ष हि । अलावी केदार देवदत्त ! । अलाविष हि३, अलाविष हि । हेरिति किम् ? अकार्षीः कटं देवदत्त !, करोमि ननु । प्रश्नग्रहणं किम् ? कट देवदत्ताकार्ष हि । अप्रश्नपूर्वक आख्याने न भवति । आख्यानग्रहण किम् ? देवदत्त ! कटमकार्षीर्हि । उत्तरेण सिद्धे नियमार्थं वचनम् । हे. प्रश्नाख्यान एव, हेः प्रश्नाख्याने वाक्यस्य स्वरेष्वन्त्य एव प्लुत इति च ।

११०. प्रश्ने च प्रतिपदम् ।

प्रश्ने प्रश्नाख्याने च वर्तमानस्य वाक्यस्य सर्बान्धिन पदस्य स्वरेष्वन्त्यः स्वरः प्रतिपदं प्लुतो वा भवति । प्रश्ने—अगमः३ पूर्वा३न् ग्रामा३न् देवदत्त३ !? अगम. पूर्वान् ग्रामान् देवदत्त !? प्रश्नाख्याने—अगम३म् पूर्वा३न् ग्रामा३न् जिनदत्त३ ! । अगम पूर्वान् ग्रामान् जिनदत्त ! । प्रश्ने चेति किम् ? देवदत्त ! ग्रामं गच्छ । प्रतिपदमिति किम् ?

---

१. ओम् इत्यस्य प्लुतविधानात् प्रणामादेरेव प्रारम्भो गम्यते ।

वाक्यस्यैवान्त्यः स्वरः प्लुतो मा भूत् ।

१११. दूरादामन्त्रितस्य गुरुर्वैकोऽनन्त्योऽपि लनृत ।

यत्र प्राकृतात् प्रयत्नात् प्रयत्नविशेषे आश्रीयमाणे सदेहो भवति किमय श्रोष्यति नवेति तद् दूरम् । वाक्यस्य य. स्वरेष्वन्त्यः स्वरो दूरादामन्त्रितस्य पदस्य सबन्धी गुरुर्वाऽनन्त्योऽपि ऋकारवर्जित.[1] स्वर लृकारश्चैको दूरादामन्त्रितस्यैव संबन्धी स प्लुतो वा भवति । आगच्छ भो माणव ! कपिलक३ !। आगच्छ भो माणव ! कपिलक !। आगच्छ भो देवदत्त३!। आगच्छ भो देवदत्त !। आगच्छ भो इन्द्रभूते३ !। आगच्छ भो ! इन्द्रभूते !। आगच्छ भोः क्लृप्तशिख३ !। आगच्छ भोः क्लृप्तशिख !। गुरुर्वैकोऽनन्त्योऽपि लनृत्—सक्तून् पिब दे३वदत्त !। सक्तून् पिब देवदत्त !। आगच्छ भो इ३न्द्रभूते !। आगच्छ भो इन्द्रभू३ते !। आगच्छ भो नृ३षभ !। आगच्छ भो नृषभ !। आगच्छ भोः क्लृ३प्तशिख !। आगच्छ भोः क्लृप्तशिख !। महाविभाषयैव प्लुतविकल्पे सिद्धे वाग्रहणं न विकल्पार्थं, किंतु अन्त्यप्लुतेन सह गुरोरऽसमावेशार्थम्[2] । तेन क्लृ३प्तशिख३ इति न भवति। दूरादिति किम् ? शृणु देवदत्त !। आमन्त्रितस्येति किम् ? आगच्छतु देवदत्तः। प्रधाने कार्यसंप्रत्ययादिह न भवति—आगच्छ भो कपिलक ! माणव !। अत्र माणवेति कपिलक इत्यस्य विशेषणमित्यऽप्रधानता । गुरुरिति किम् ? अनन्त्यस्य लघोर्मा भूत्। एक इति किम् ? अनेकस्य गुरोर्यौगपद्येन मा भूत्। अनन्त्योऽपीति किम् ? अन्त्यस्यैव मा भूत्। लृकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम्। अन्यथा 'ऋलृवर्णयो' [१/१/१६] इति ऋवर्णलृवर्णयोर्मिथः सवर्णसंज्ञकत्वात् तस्याऽपि प्रतिषेध स्यादेव। अनृदिति किम् ? कृष्णमि३त्र, कृष्णमित्र३। अनृदिति गुरुर्विशिष्यते न स्वरेष्वन्त्यस्तेनेहापि भवति । आगच्छ भो कर्तृ३ !। आगच्छ भो कर्तृ !। वाक्यस्य स्वरेष्वन्त्यः प्लुत इत्यनुवृत्तेरिह न भवति। देवदत्त ! अहो आगच्छ। अभिपूजितेऽपि दूरादामन्त्रितस्यैव प्लुत इष्यते इति अभिपूजिते चेति नारम्भणीयम्। शोभनः खल्वसि माणवक३ !। शोभनः खल्वसि माणवक !।

११२. हेहैष्वेषामेव ।

दूरादामन्त्रितस्य सबन्धिनौ यौ हेहैशब्दौ आमन्त्रणे वर्तेते, तयोः प्रयुज्यमानयोस्तयोरेव वाक्ये यत्रतत्रस्थयोरन्त्यः स्वरः प्लुतो वा भवति। हे३ देवदत्त ! आगच्छ। आगच्छ हे३ देवदत्त !। आगच्छ देवदत्त ! हे३। है३ देवदत्त ! आगच्छ। आगच्छ है३ देवदत्त !। आगच्छ देवदत्त ! है३। हेहेष्वित्यवधारणस्य विषयार्थम्। एषामिति स्थानिनिर्देशार्थम्। बहुवचनं ह इ हे, ह ए है इति लाक्षणिकयोरपि परिग्रहार्थम्। एवकारोऽन्त्यस्य प्लुतस्य व्युदासार्थ। अत एव चैवकारात् यत्रतत्रस्थयो[3] प्लुतो विज्ञायते।

११३. प्रत्यभिवादेऽस्त्रीशूद्रे भोगोत्रनाम्नः ।

वेत्यनुवर्तते। यदभिवाद्यमानो गुरुः कुशलानुयोगेन आशिषा वा युक्तं वाक्य प्रयुङ्क्ते स प्रत्यभिवादः। प्रत्यभिवादे स्त्रीशूद्रवर्जिते विषये वर्तमानस्य वाक्यस्य स्वरेष्वन्त्य स्वरो भोःशब्दस्य गोत्रस्य नाम्नो वा आमन्त्रितस्य संबन्धी प्लुतो वा भवति। अभिवादये देवदत्तोऽहं भो. !। आयुष्मानेधि भो.३ !। आयुष्मानेधि भोः !। आयुष्मानेधि देवदत्त ! भो३। आयुष्मानेधि देवदत्त ! भोः। गोत्रे—अभिवादये गार्ग्योऽहं भोः। कुशल्यसि गार्ग्य३ !। कुशल्यसि गार्ग्य !। आयुष्मानेधि गार्ग्य३ !। आयुष्मानेधि गार्ग्य !। राजन्यविशोरपि गोत्रत्वमेव—अभिवादयेऽहमिन्द्रवर्मा भोः !। आयुष्मानेधि इन्द्रवर्म३न्, इन्द्रवर्मन्। अभिवादये इन्द्रपालितोऽहं भो. !। आयुष्मानेधीन्द्रपालित३!, इन्द्रपालित !। नाम—अभिवादये देवदत्तोऽहं भोः। आयुष्मानेधि देवदत्त३ !, देवदत्त !। प्रत्यभिवादे इति किम् ? अभिवादये स्थाल्यहं भो. !। आयुष्मानेधि स्थालि ३। अभिवादयिता धूर्ततया आह—भोः न मम ईकारान्ता सञ्ज्ञा, किंतु दण्डिवदिन्नन्ता। पुनर्गुरुराह—आयुष्मानेधि स्थालि३न्। स पुनरपि धूर्ततया आह—ईकारान्तैव मम संज्ञा, न त्विन्नन्ता। तदा गुरुराह—असूयकस्त्वमसि

१. गुरोरेव विशेषणम्।

२. तेन यदा अन्त्यस्य प्लुतस्तदा अन्त्यस्यैव न तु गुरोः। यदा तु गुरोस्तदा गुरोरेव न तु अन्त्यस्येत्यर्थः।

३. यदि पुनरन्तभूतानामेव हेहायां प्लुतः स्यात्तदाऽपरस्यान्त्यभूतस्याऽसंभवात् प्राप्तिरेव नास्ति, किमेवकारेण।

आस्म !, न त्वं प्रत्यभिवादमर्हसि, भिद्यस्व वृषल स्थालि । स्त्रीशूद्रवर्जनं किम् ? अभिवादये गार्ग्यहं भोः !, आयुष्मती भव गार्गि !। शूद्र --अभिवादये तुषजकोऽहं भोः, आयुष्मानेधि कुशल्यसि तुषजक !। भोगोत्रनाम्न इति किम् ? देवदत्त ! कुशल्यसि । देवदत्तायुष्मानेधि ।

११४. प्रश्नपूजाविचारे च संधेयसंध्यक्षरस्याविदुत्परो नित्यम् ।

संधेय —संधियोग्य.[1], यः क्वचित्स्वरे परे विकारमापद्यते । प्रश्ने पूजायां विचारे चकारात् प्रत्यभिवादे च वर्तमानस्य वाक्यस्य संबन्धिनः स्वरेष्वन्त्यस्वरस्य संधेयसध्यक्षरस्य आकारादेशो भवति स च इदुत्परः नित्य प्लुतो भवति । स च प्रत्यासत्त्या एकारैकारयोरिकारपर ओकारौकारयोरुकारपरो भवति । नित्यग्रहण विकल्पनिवृत्त्यर्थम् । प्रश्ने— अगमः३ पूर्वा३न् ग्रामा३न् अग्निभूता३इ ? पटा३उ ? अदा३ स्तस्मा३इ ? अहौषी३ रग्ना३उ ? **'प्रश्ने च प्रतिपदं'** [८/४/११०] इति प्लुतः । पूजायां—शोभन. खल्वसि अग्निभूना३इ । पटा३उ । **'दूरादामन्त्रितस्य···'** [८/४/१११] इति प्लुतः । विचारे—वस्तव्यं कि निर्ग्रन्थस्य सागारिका३इ उतानागारिके । प्रत्यभिवादे—आयुष्मानेधि अग्निभूता३इ । पटा३उ । आयुष्मन्तौ भूयास्तां देवदत्तजिनदत्ता३उ । प्रश्नपूजाविचारे चेति किम् ? आगच्छ भो अग्निभूते३ !। संधेयग्रहणं किम् ? कच्चि३त् कुशल३म् भवत्यो.३ कन्ये३ ? अगम ३ पूर्वा३न् ग्रामा३ नहो३ भद्रकासि गौः३ । आयुष्मानेधि भो३ । संध्यक्षरस्येति किम् ? भद्रिकासि कुमारि३ !। वाक्यस्य स्वरेष्वन्त्यस्वर इति विज्ञानादिह न भवति । अगमः३ पूर्वौ३ ग्रामौ३ देवदत्त३ !।

११५. तयोर्य्वौ स्वरे संहितायाम् ।

तयोः प्लुताकारात्परयोरिदुतो. स्थाने स्वर परे सहिताया विषये यथासख्य यकारवकारावादेशौ भवतः । अविरामः सहिता । अगम३ अग्निभूता३ यत्रागच्छ । अगम३ अग्निभूता३यिहागच्छ । अगमः३ पटा३वत्रागच्छ । अगमः३ पटा३वुदकमानय । सवर्णे दीर्घत्वस्य असवर्णे स्वरे ह्रस्वत्वस्य बाधनार्थं वचनम् । स्वरे इति किम् ? अग्ना३इ । पटा३उ । सहितायामिति किम् ? अग्ना३इ इन्द्रम् । पटा३उ उदकम् । अग्ना३इ अत्र । पटा३उ अत्र । केचिदैदौतोश्चतुर्मात्रं प्लुतमिच्छन्ति । ऐ४तिकायन । औ४पगव ।

११६. स्थानिवदादेशोऽवर्णविधौ ।

स्थानं प्रसङ्गः, सोऽस्यास्तीति स्थानी आदेशी । आदेशस्थानिनो पृथक्त्वात् स्थानिकार्यमादेशे न प्राप्नोतीति अतिदिश्यते । आदेश स्थानिवद् भवति—स्थानि कार्याणि प्रतिपद्यते, अवर्णविधौ—न चेत्तानि वर्णाश्रयाणि भवन्ति । तत्र धातुप्रकृतिविभक्तिकृदव्ययपदादेशा उदाहरणम् । धात्वादेशो धातुवद् भवति । **'अस्तेर्भूरशिति'** [४/२/६४], **'ब्रुवो वच्'** [४/२/६५] भूवचोस्तृजादयो भवन्ति । भविता, भवितु, भवितव्यम् । वक्ता, वक्तु, वक्तव्यम् । प्रकृत्यादेशः प्रकृतिवत् । कस्मै, के, केषाम् । किम. कादेशे कृते सर्वादित्वात् स्मायादयो भवन्ति । विभक्त्यादेशो विभक्तिवत् । वृक्षाय, प्लक्षाय, राजा । अत्र स्यादित्वाद्दीर्घत्व पदत्व च भवति । पचेय, पचेयु । अत्र त्याद्यन्तत्वात् पदत्वम् । कृदादेश कृद्वत् । प्रकृत्य, प्रहृत्य । अत्र क्त्वो यबादेशे **'ह्रस्वस्य पित्कृति तुक्'** [४/४/४७] इति तुगागमो भवति । अव्ययादेशोऽव्ययवत् । प्रस्तुत्य उपस्तुत्य । अत्र **'अव्ययस्य'** [३/२/७] इति स्यादेर्लुग् भवति । पदादेश पदवत् । धर्मो वो रक्षतु । धर्मो नो रक्षतु । अत्र पदत्वात् सकारस्य विसर्गः । वत्करण सादृश्यार्थम् । अन्यथा स्थानीत्यादेशस्य सज्ञा विज्ञायेत । तेन आहत, आवधिष्टेत्यादौ **'आङो यमहनो निजाङ्गकर्मकाच्च'** [४/३/७७] इत्यनेनोभयत्रापि आत्मनेपदं भवति । अन्यथा वधेरेव स्यात् । अवर्णविधाविति किम् ? वर्णाश्रयो विधिर्वर्णविधिरिति समासस्याश्रयणात् वर्णात्परस्य विधिर्वर्णे परतो विधिर्वर्णस्य स्थाने विधिर्वर्णेन विधिरप्रधानवर्णाश्रयो वा विधिर्वर्णविधिरिति सर्वत्रावर्णविधाविति प्रतिषेधो भवति । तत्र वर्णात्परस्य विधिः—द्यौः, पन्थाः, सः । अत्र औत्वात्वत्यदाद्यत्वेषु कृतेषु स्थानिवद्भावात् हसात्परस्य सेर्लोप प्राप्नोति, स न भवतीति । वर्णे परतो विधिः—क इष्टः, स उप्तः । अत्र संप्रसारणे कृते **'हबे'** [१/३/५०] इति विसर्गस्य उत्वं **'सैषाद्वसे लोपः'**

---

१. संधियोग्य इति । यस्य ईद्रूदेद् द्विवचनमित्येवमादिर्भिनिषेधो नास्ति ।

[१/३/६०] इति सेर्लोपश्च न भवति। वर्णस्य स्थाने विधिः—श्रीदवतास्य श्रायं हविः। अत्रेकारस्य वृद्धौ कृतायां स्थानिवद्भावात् 'इवर्णावर्णस्य' [८/४/७१] इति लोपः प्राप्तो न भवति। वर्णेन विधिः—उरःकेण[1], उरःपेण[2], उरःकेण, उर‍ःपेण। अत्र सकारादेशानां विसर्गजिह्वामूलीयोपध्मानीयानां स्थानिवद्भावात् णत्वं न प्राप्तं, तच्च स्थानिवद्भावप्रतिषेधात् 'अट्कुप्वनुस्वारविसर्ग' [२/२/७०] इत्यादिना भवति। व्यूढोरस्केन[3], महोरस्केन—इत्यत्र तु सकारे कृते णत्वं न प्राप्नोति। 'प्रत्ययेषु' [२/२/५] इति यः कृतः सकारस्तदाश्रयाणत्वस्य अप्राप्तिर्न तु उरस् इति मूलभूतसकारस्याश्रयात् तस्य वर्णत्वात् वर्णाश्रये च स्थानित्वप्रतिषेधात्। अप्रधानवर्णाश्रयो विधिः—प्रदीव्य, प्रसीव्य। अत्र सतादीत्यन्यपदार्थस्याऽशितः प्राधान्यात् सतयोरप्राधान्यमिति स्थानिवद्भाव प्रतिषेधो भवति। स्थानिवद्भावाऽभावे च 'उदितः क्त्वो वा' [४/३/७६] इति इट् प्राप्तः, सकारतकाररूपाऽप्रधानवर्णाश्रयत्वान्न भवति। स्थानिवर्णाश्रयकार्यप्रतिषेधाच्च आदेशवर्णाश्रयाणि स्थान्यनुबन्धाश्रयाणि च कार्याणि भवन्त्येव। आदेशवर्णाश्रयाणि—देवाय। अत्र ङ्यें कृते यकाराश्रयमात्वं भवति। स्थान्यनुबन्धाश्रयाणि—प्रभिद्य, निरुध्य, प्रणीय, प्रलूय। अत्र क्त्वो यबादेशे कृते स्थानिवद्भावेन क्ङितीति गुणप्रतिषेधो भवति। अनुबन्धा ह्यसन्त एव गुणाभावादिकं कार्यं कुर्वन्ति। अथ कथमग्रहीत्—इत्यत्र इटो दीर्घत्वे स्थानिवद्भावात् 'इट ईटि' [३/४/५०] इति सिचो लोपो भवति, वर्णविधिर्ह्येष[4]? उच्यते—नायं वर्णविधिः। विशिष्ट ह्येष समुदायमवर्णमाश्रयते इटं नाम।

११७. स्वरस्य परे पूर्वविधौ।

स्वरस्यादेश परे परनिमित्तको व्यवहितेऽव्यवहिते वा पूर्वस्य विधौ कर्तव्ये स्थानिवद् भवति। कथयति, अवधीत्। अत्राऽल्लोपस्य स्थानिवद्भावादुपधालक्षणा वृद्धिर्न[5] भवति। स्पृहयति, मृगयते। अत्र लघूपधलक्षणो गुणो न भवति। पादाभ्यां तरति—पादिकः। अत्र पद्भावो न भवति। शातनी, पातनी। अत्र अनोऽस्य लोपो न भवति। धरणस्याऽपत्यं—धारणिः। रवणस्याऽपत्यं—रावणिः। अत्र 'नोऽपदस्य···' [८/४/६२] इत्यादिना टेर्लोपो न भवति। स्रंस्यते, ध्वंस्यते। अत्र त्रिलोपस्य स्थानिवद्भावात् उपधानकारलोपो न भवति। याज्यते, वाप्यते। अत्र संप्रसारणं न भवति। निरादनं पूर्व—निराद्य। समाद्य। अत्र जग्धादेशो न भवति। घात्यात्। अत्र वधादेशो न भवति। निगार्यते, निगाल्यते। अत्र 'वा स्वरे' [४/२/७५] इति पक्षे लत्वम्। चातुरौ, आनडुहौ। अत्र औत्वादेशस्य स्थानिवद्भावात् 'चतुर आम्' [१/४/७८] इति 'अनडुहः' [१/४/७६] इति च आम् न भवति। पादे। अत्र एत्वादेशस्य स्थानिवद्भावात् पदादेशो न भवति। उभयजन्यत्वेऽपि अन्यतरव्यपदेशात् औत्वैत्वयो[6] परनिमित्तत्वम्। अवीवदत् वीणां परिवादकेन—इत्यत्र तु त्रिजात्याश्रयणादुपधाया ह्रस्वो भवति। द्वाभ्या—इत्यत्र तु निमित्तापेक्षया पूर्वविधौ आत्वेऽत्वस्य न स्थानित्व, 'वैकत्र द्वयोः···' [२/४/६२] इति निर्देशात्। स्वरस्येति किम्? अत्राष्टा, अद्राष्टाम्। अत्र सिचो लोपो न स्वरादेश इति 'षढोः कः से' [२/१/६३] इति कत्वे स्थानिवन्न भवति। आगत्य, अभिमत्य। अत्र अमलोपो ह्रस्वलक्षणे तुकि स्थानिवन्न भवति। पर इति किम्? द्वौ पादौ ददाति—द्विपदिकां ददाति। अत्र अल्लोपस्य परनिमित्तत्वाभावात् स्थानित्वाभावे पदादेशो भवति। पूर्वविधाविति किम्? बाभ्रव्यस्य छात्राः—बाभ्रवीयाः। अत्र 'तद्धितेऽस्वातियस्वरे' [८/४/७८] इति यलोपे परविधौ कर्तव्येऽवादेशः स्थानिवन्न भवति। निधानं निधिः, तस्यापत्यं—नैधेयः, निधिकः। अत्र 'आतोऽशिति' [४/२/५३] इत्याकारलोपो द्विस्वरलक्षण एयणिकप्रत्ययविधौ परस्मिन् स्थानिवन्न भवति। अन्यथा त्रिस्वरत्वात् प्रत्ययो न स्यात्। इलुकाया अदूरभवं नगरमैलुकम्। परिखायाः पारिखम्। तत्र भवः—ऐलुकीयः, पारिखीयः। अत्राण्याकारलोपः परविधौ कखोपधलक्षणे ईये स्थानिवन्न भवति। पूर्वस्माद् विधिः पूर्वविधिः इत्यपि आश्रीयते। तेन अधुक्षन्तेति 'सकोऽतः स्वरे' [३/४/५२] इति

१. उरसि कं—शिरः इत्युरःकं तेन।
२. उरः पातीति उरःपः। 'आतो ड···' [५/२/५], तेन।
३. 'उरःसर्पिर्दधि···' [८/३/१०४] इत्यादिना कप्।
४. वर्णात्परतो विधिरिति समासात्।
५. 'उपधायाः' [४/२/२२] 'हलादेरुपधस्य शेटि' [४/२/३३] इत्याभ्याम्।
६. इष्टसिद्ध्यर्थमकारस्यैव व्यपदेशः कार्यः न त्वौकारैकारयोः।

सकोऽकारलोपस्य परमप्यदादेशं प्रति स्थानिवद्भाव इति स न भवति। पूर्वत्राऽवर्णविधाविति प्रतिषेधाद् वर्णविध्यर्थं वचनम् ।

११८. न संधियक्विद्वित्वदीर्घाणां विधौ ।

पूर्वेणातिप्रसक्त स्थानिवद्भावः प्रतिषिध्यते । सधिविधौ यविधौ क्विविधौ द्वयोर्द्वित्वस्य विधौ दीर्घविधौ च स्वरस्यादेशः स्थानिवन्न भवति । **'सि-औ-जस्···'** [१/४/१] इत्यत प्राक् सधिविधि । तत्र वियन्ति, अपयन्ति । अत्रेणो यत्व स्वरादेश. परनिमित्तक: पूर्वविधौ दीर्घत्वे एत्वे च कर्तव्ये स्थानिवन्न भवति । तानि सन्ति, तौ स्तः । अत्रास्तेरल्लोपो यत्वे आवादेशे च कर्तव्ये स्थानिवन्न भवति। वैयाकरण, सौवश्व. । अत्र यकारवकारयोः स्थानिवद्भावाऽभावात् ऐदौतोरायावादेशौ न भवत । शिण्ढि, पिण्ढि । अत्र नमोऽकारलोपो **'म्नां झपे अमः सवर्णोऽपदान्ते'** [१/३/३४] इति अमे कर्तव्ये स्थानिवन्न भवति । शिषन्ति, पिषन्ति—इत्यत्र तु अनुस्वारे । जक्षतु, जक्षु । अत्र च षत्वे घसेरुपधालोप. । निमित्तापेक्षयापि पूर्वविधिरिष्यते । तेन नयनं, लवन—इत्यत्र गुणस्य स्थानिवद्भावप्रतिषेधादयवादेशौ सिद्धौ । स्थानिवद्भावे तु इयुवादेशौ स्याताम् । यविधौ— कण्डूति. । कण्डूयते. क्तौ अतो लोप. परनिमित्तको **'य्वोः पुगयहसे'** [४/४/४६] इति लोपे कर्तव्ये स्थानिवन्न भवति । सूर्येणैकदिक् सौरी बलाका । अत्रैकाऽण्यकारलोपो द्वितीय ईपि तयो. स्थानिवत्त्वाद्यकारस्याऽनन्तर ईब् न भवतीति यलोपो न स्यात्, स्थानिवद्भावनिषेधाच्च भवति । क्विविधौ—देवयतेः क्विप्—दयू. । लवमाचष्टे लवयतेः क्विप्—लौ । अत्र ञिलोप. अल्लोपश्च क्विब्विधौ ऊटि कर्तव्ये न स्थानिवद्भवत. । द्वित्वविधौ—दद्ध्यत्र, मद्ध्वत्र । अत्र यत्ववत्वयो स्थानिवद्भावाऽभावादेकहसलक्षण धकारस्य द्वित्वं भवति । द्वित्वस्य सधिकार्यत्वेनैव स्थानिवद्भावप्रतिषेधे सिद्धे द्वित्वग्रहणं **असिद्धं बहिरङ्गमऽन्तरङ्गे** इति न्यायबाधनार्थम् । तेनान्तरङ्गे द्वित्वे क्रियमाणे यकारवकारौ परपदाश्रितत्वेन बहिरङ्गावपि नासिद्धौ भवतः । दीर्घविधौ— शामशाम, अशामि, शशामशशाम, अशशामि । अत्र ञ्यन्तात् यङन्ताच्च ञौ णम्णिचो परयोर्ञिलोपो यङो लोपश्च स्थानिवन्न भवति। सधीत्यादेर्विधिना असमासकरण विधेरुत्तरानुवर्तनार्थम् ।

११९. असिद्धस्याऽस्कलोपे ।

असिद्धविधौ स्वरादेश स्थानिवन्न भवति, **'स्कोः संयोगाद्योर्लोप.'** [२/१/११८] इति स्कोर्लोपविधिं वर्जयित्वा । असिद्धाधिकारे विहितो विधिरसिद्धविधि । तत्र यायज्यतेर्यायिष्ट । सज्ञाया तिक् । पापच्यतेः पापक्तिः । याजयतेर्याष्टिः । पाचयतेः पाक्ति. । अत्र अल्लोपञिलोपयो स्थानिवद्भावप्रतिषेधात् षत्वकत्वे भवत । देहयतेर्देग्धिः । लेहयतेर्लेढिः । अत्र ञिलोपस्य स्थानिवद्भावप्रतिषेधात् झसनिमित्ते घत्वढत्वे भवत. । प्रतिदीव्ना, प्रतिदीव्ने । अत्र **'अनोऽतोऽवमयुक्तात्'** [२/१/२८] इत्यल्लोपो **'भ्वादेरिदुतोर्दीर्घोर्वोहसे'** [२/१/६४] इति दीर्घत्वे स्थानिवन्न भवति । स्कलोपविधेः प्रतिषेध. किम् ? सुकुस्मयते क्विप्— सुकू. । काष्ठ तक्षयति क्विप्—काष्ठतक् । अत्र सयोगाद्यो. स्कोर्लोपे ञिलोपस्य स्थानिवद्भाव-प्रतिषेधाऽभावात् स्कोर्लोपो न भवति । सयोगान्तस्य लोपस्त्वसिद्धविधौ स्थानिवद्भावप्रतिषेधात् भवत्येव । काष्ठतडिति अञ्यन्तस्य । प्रायिकोऽय निषेधः । तेन मधुश्चयतीति क्विप्—मधुक्[1] । अत्र शलोपसिद्धः । वेतस्वानित्यऽल्लोपस्य[2] स्थानिवद्भावाऽभावेऽपि **'न स्ते मत्वर्थे'** [१/१/२६] इति पदत्वाऽभावात् सकारस्य विसर्गो न भवति । ब्रह्मबन्ध्वौ, ब्रह्मबन्ध्व इति ऊङादेशस्य[3] वकारस्य स्थानिवद्भावाऽभावेपि अन्तरङ्गे धस्य जबत्वे लोपे च बहिरङ्गत्वेनाऽसिद्धत्वम् ।

१२०. लुक्यऽसंप्रसारणलेनतः ।

परस्य प्रत्ययस्य लुकि सति लुग्भूतपरनिमित्तक पूर्व कार्य न भवति सप्रसारण लत्वमेनदादेशं च वर्जयित्वा ।

---

१. मधुक्—इत्यत्र ञिलोपस्य स्थानिवद्भावप्रतिषेधात् **'स्कोः संयोगाद्योर्लोपः'** [२/१/११८] इति सलोप. सिद्धः । मधुश्च्योततीति क्विपि मधुश्चुत्, तमाचष्टे ञौ टेर्लोपे मधुश्चयति, तत. क्विपि ञेर्लोपे सलोपे च मधुगिति सिद्धम् ।

२. **'कुमुदनडवेतसेभ्यो डित्'** [६/३/१३६] इति डित्वादल्लोप. ।

३. ऊङ्प्रत्ययादेशो वकारोऽपि प्रत्ययस्तस्मिन् धस्य पदत्वे **'झसा जबाः'** [२/१/१०८] इति धस्य दत्व तन्निषेधे संयोगान्तत्वात् **'संयोगस्य'** [२/१/११६] इति लोपो वा प्राप्नोतीत्याशङ्का ।

तद्, यद्—अत्र स्यमोर्लुकि कृते स्थानिवद्भावप्रतिषेधात् त्यदाद्यत्वसत्वे न भवतः। गर्गस्याऽपत्यानि—गर्गाः। गर्गादित्वाद्यञ्। 'यञञोऽश्यापर्णान्तगोपवनादेः' [६/२/१३६] इति लुक्। कुवल्याः विकारः फलं—कुवलम्। हेमादित्वादञ्। 'फले' [६/३/६०] इति तस्य लुक्। अत्र वृद्धिर्न भवति। प्लुक्यपि लुग्रूपताऽस्त्येव। तेन पञ्चगोणिरित्यत्रैकणः प्लुकि वृद्धिर्न भवति। लुकीति वचनात् लोपे भवत्येव। गोमान्, यवमान्। अत्र सिलोपे तन्निमित्तं दीर्घत्वं भवति। लुकीति सप्तमीनिर्देशात् पूर्वस्य यत्कार्यं प्राप्तं तन्निषिध्यते, समुदायस्य तु भवत्येव। पयः, साम, पञ्च, सप्त। अत्र पदसंज्ञा तथा च तन्निबन्धनानि विसर्गनलोपादीनि भवन्ति। कथं पापक्ति, पापचीतीत्यत्र द्वित्वम्? नेदं यङि निमित्ते, किंतु यङन्तस्य। असंप्रसारणलेनत इति किम्? संप्रसारणं—व्यध्—वेविद्धि, श्वि—शोशवीति, ग्रह्—जरीगृहीति। ल्—गृ—निजागलीति। एनत्—एनत् पश्य, एनच्छ्रितकः[1]। 'स्थानिवदादेशोऽवर्णविधौ' [८/४/११६] इति लुकः स्थानिवद्भावेन प्राप्तानां पूर्वेषां कार्याणां प्रतिषेधार्थं वचनम्।

१२१. सप्तम्या निर्दिष्टे पूर्वस्य।

सूत्रे सप्तम्या निर्दिष्टे यत् कार्यमुच्यते तत्पूर्वस्याऽनन्तरस्य स्थाने भवति। **'इवर्णादीनां स्वरे यवरलाः'** [१/२/१]—दध्यत्र, मध्वत्र। निर्दिष्टग्रहणादिह न भवति—समिदत्र, त्रिष्टुबत्र। व्यवहितेऽपि पूर्वशब्दो दृश्यते। यथा—मथुरायाः पूर्वं पाटलिपुत्रमिति। स्वरे इत्यादौ औपश्लेषिकमधिकरणं पूर्वं परं च संभवति, तत्र परमेव ग्राह्यमिति नियमार्थं वचनम्।

१२२. पञ्चम्या परस्य।

सूत्रे पञ्चम्या निर्दिष्टे यत्कार्यमुच्यते तत्परस्य स्थाने भवति। **'भिस ऐस्'** [१/४/६] इत्यत्र अत इति पञ्चम्यनुवर्तनात् वृक्षैः, प्लक्षैः। इह न भवति—मालाभिरत्र। निर्दिष्टस्याऽनन्तर्यार्थत्वादिह न भवति—दृषद्भिः। व्यवहितेऽपि परशब्दो दृश्यते। यथा—महोदयात्पर साकेतमिति। अत इत्यादौ दिग्योगलक्षणा पञ्चमी। तत्र पूर्वस्य परस्य च कार्यं स्यादिति नियमार्थं वचनम्।

१२३. षष्ठ्याऽन्त्यस्य।

सूत्रे षष्ठ्या निर्दिष्टे यत्कार्यमुच्यते तदन्त्यस्य षष्ठीनिर्दिष्टस्यैव योऽन्त्यो वर्णस्तस्य स्थाने भवति न तु समस्तस्य **'वाष्टन आः स्यादौ'** [१/४/६]—अष्टाभिः, अष्टासु।

१२४. शिदऽनेकवर्णः सर्वस्य।

श इत् यस्य स शित्। एकस्मादधिको वर्णो यस्य स अनेकवर्णः। शिदादेशः अनेकवर्ण आदेशश्च षष्ठ्या निर्दिष्टस्य सर्वस्यैव स्थाने भवति। शित्—**'जस इः'** [१/४/१९]—सर्वे। अनेकवर्ण—**'त्रिचतुरः स्त्रियां तिसृचतसृ स्यादौ'** [२/१/८७]—तिसृभिः, चतसृभिः। सर्वस्येति निर्दिश्यमानापेक्षम्। तेन किरति, गिरति—इत्यत्र **'ऋतां क्ङितीर्'** [४/३/५३] इति निर्दिष्टस्य ऋकारस्यैव स्थाने इर् भवति न तु कृ गृ इति समुदायस्य। पूर्वस्याऽपवादोऽयम्।

१२५. विशेषणमन्तः।

विशिष्यतेऽनेनेति विशेषणम्। विशेषणं विशेष्यस्य समुदायस्याऽन्तोऽवयवो भवति। इह शास्त्रे धात्वादि समुदायोऽभेदेनाऽवयवविशेषणक उपादीयते। तत्र सोऽवयवः तत्समुदायस्यान्तत्वेन नियम्यते। **'अतोऽम्'** [२/१/४]—कुण्डं तिष्ठति, कुण्डं पश्य। इह न भवति—तद्। **'ऋवर्णवृदृवशिरणिगमिग्रहेरल्'** [५/४/५१]—करः, गरः, चयः, जयः, स्तवः इह न भवति—सेकः, योगः। इणोऽलि अय इत्यादौ व्यपदेशिवद्भावाद् भवति।

---

१. नन्वर्थतच्छब्दस्य साकाङ्क्षस्यासमर्थत्वात् कथं समास एनवादेशश्च? उच्यते—अर्थात् प्रकरणाद् वा अपेक्ष्ये निश्चिते समास एनवादेशश्च भवत्येव।

१२६. सप्तम्या आदिः ।

सप्तम्यन्तस्य विशेष्यस्य यद् विशेषणं तत्तस्यादिरवयवो भवतीति वेदितव्यम् । **'पथिन्मथिनृभुक्षां टेर्लोपः'** [२/१/२७]—पथः, पथाम् । इह न भवति—पथिषु । **'इघुक्तोपधायाः शिति स्वरे'** [४/२/१४]—नेनिजानि, अनेनिजम् । इह न भवति— नेनेक्ति । **'उत औरङ्के:'** [४/३/१०]—यौति, रौति । इह न भवति—अम्नवीत् । पथा, अयौत्—इत्यादौ व्यपदेशिवद्भावाद् भवति । अन्तत्वाऽपवादो योगः ।

१२७. प्रत्ययः प्रकृत्यादेः ।

यस्माद् यः प्रत्ययो विधीयते सा तस्य प्रकृतिः । प्रत्ययः प्रकृत्यादेः समुदायस्य विशेषणं भवतीति वेदितव्यं नोनाधिकस्य । मातुर्भोगो मातृभोगस्तस्मै हितः—मातृभोगीणः । **'भोगान्तात्मम्यामीनः'** [७/३/४०] । खरपस्याऽपत्यं—खारपायणः । नडादित्वादायनण् । अत्र **'तदन्तं पदं'** [१/१/२२] इति पदसंज्ञा समुदायस्य भवति न तूनस्य भोगीण इत्यादिरूपस्य, तेनैकपदत्वात् णत्वं[१] सिद्धम् । राज्ञः पुरुषः—राजपुरुषः । **'षष्ठ्ययत्नाच्छेषे'** [३/१/६३] इति समासः । अधिकस्य न भवति—ऋद्धस्य राज्ञः पुरुषः । गार्ग्यस्याऽपत्यं—गार्ग्यायणः । **'यञिञः'** [६/२/७३] इत्यायनण् । अधिकात् समुदायान्न भवति—परमगार्ग्यस्याऽपत्यम् । पुत्रमिच्छति—पुत्रकाम्यति । अधिकान्न भवति—महान्त पुत्रमिच्छति । न्यूनाधिकव्यवच्छेदार्थं वचनम् । तदन्तत्वं च **'विशेषणमन्तः'** [८/४/१२५] इत्येव सिद्धम् ।

१२८. गौण ईबादिः ।

ईबमारभ्य श्यं यावदीबादिः प्रत्ययः स गौण उपसर्जनं सन् प्रकृत्यादेः समुदायस्य विशेषणं भवति नोनाधिकस्य । कारीषगन्ध्यामतिक्रान्तः स बन्धुरस्य अतिकारीषगन्ध्यबन्धुः । अतिकौमुदगन्ध्यबन्धुः । अत्र श्येनाऽधिकस्याऽग्रहणात् **'बन्धौ बहुव्रीहौ'** [२/३/६३] इति ईच् न भवति । गौण इति किम् ? अगौणोऽधिकस्याऽपि समुदायस्य विशेषणं भवति । परमकारीषगन्धीबन्धुः, परमकौमुदगन्धीबन्धुः । पूर्वेणैव सिद्धेऽगौणस्याऽधिकपरिग्रहार्थं वचनम् ।

१२९. कृत् सगतिकारकस्याऽपि ।

कृत्प्रत्ययः प्रकृत्यादेः समुदायस्य गतिकारकपूर्वस्य अपिशब्दात् केवलस्याऽपि विशेषणं भवति । यथेह समासो भवति—भस्मनिहुतं,[२] प्रवाहेमूत्रितं तथा उदकेविशीर्णं, अवतप्तेनकुलस्थितमिति सगतिकेन सकारकेण च क्तान्तेन **'क्षेपे'** [३/१/८४] इति समासः सिद्धो भवति । तथा व्यावक्रोशी, व्यावहासी, साकोटिनं, सारावणिमिति **'अञिनो नित्यं'** [७/४/६१] इति अण् सिद्धः । **'प्रत्ययः प्रकृत्यादेः'** [८/४/१२७] इत्यतोऽप्राप्ते वचनम् ।

१३०. परः ।

यः प्रत्ययः स प्रकृतेः पर एव भवति । अजा, खट्वा । वृक्षः, वृक्षौ, वृक्षाः । जुगुप्सते, मीमांसते, कार्यं, गम्यं, औपगवः ।

१३१. स्पर्धे ।

द्वयोर्विध्योरन्यत्र सावकाशयोस्तुल्यबलयोः एकत्र[३] अनेकत्र[४] च उपनिपातः[५] स्पर्धः । तत्र यः सूत्रपाठे परः स विधिर्भवति । **'शसोऽता दीर्घः सश्च न पुंसि'** [१/४/७२] इत्यस्यावकाशः । वृक्षान्, मुनीन् । **'जस्शसोः शिः'** [२/१/७]

---

१. अन्यथा **'एकपदे रषृवर्णात्'''** [२/२/६६] इति एकपदत्वाऽभावात् णत्वं न स्यात् ।

२. भस्मनिहुतमित्यादिषु **'तत्पुरुषे कृति'** [३/२/२२] इति सप्तम्या अलुक् ।

३. एकस्मिन् स्थानिनि ।

४. अनेकस्मिन् स्थानिनि उपनिपातो द्वयोर्विध्योरित्यर्थः ।

५. प्रसङ्गो द्वयोर्विध्योः ।

इत्यस्य तु महान्ति, यशांसि । इहोभयं प्राप्नोति । वनानि, मधूनि । तत्र परत्वाच्छिरेव भवति । अयं तावदेकस्य द्विकार्ययोगे स्पर्ध उक्तः । अनेकस्याऽप्यसंभवे सति भवति । 'ईदग्नेः सोमवरुणयोः' [३/२/४३] इत्यस्यावकाशः । अग्नीवरुणौ । 'देवतानामात्वादौ' [८/४/२१] इति वृद्धेः अवकाशः । आग्नावैष्णवं हविः । इहोभयं प्राप्नोति । आग्निवारुणीमनड्वाहीमालभेत । परत्वात् तु वृद्धिर्भवति । अत्र ह्यग्नेरीत्वं वरुणशब्दस्य च वृद्धिरिति नैको द्विकार्ययुक्तः । असंभवस्त्वस्ति वृद्धौ सत्यां 'इद् वृद्धिमत्यविष्णौ' [३/२/४४] इति अग्नेरीत्वाऽपवाद इर्भवति । परस्परप्रतिबन्धेनाऽप्रवृत्तौ पर्याये वा प्राप्ते वचनम् ।

१३२. आसन्नः ।

इह आसन्नाऽनासन्नप्रसङ्गे यथासवर्णं स्थानार्थप्रमाणादिभिरासन्न एव विधिर्भवति । तत्र स्थानेन—दण्डाग्रं, क्षुपाग्रम् । कण्ठ्ययोरकारयोः कण्ठ्य एव आकारो दीर्घो भवति । अर्थेन—वातण्ड्ययुवतिः, दारदवृन्दारिका । अत्र वतण्डीशब्दस्य दरच्छब्दस्य च 'पुंवत्कर्मधारये' [३/२/६१] इति पुंवद्भावे कर्तव्ये अर्थत आसन्नो वातण्ड्यभावो दारदभावश्च[1] भवति । प्रमाणेन—अमुष्मै, अमूभ्याम् । 'मादुवर्णोऽनु' [२/१/८१] इति मात्रिकस्य मात्रिको द्विमात्रस्य च द्विमात्रः ।

१३३. संबन्धिनां संबन्धे ।

सबन्धिशब्दानां यत्कार्यमुक्तं तत्संबन्धे एव सति भवति नान्यथा । 'श्वशुराद्यः' [६/२/११४] । श्वशुरस्याऽपत्यं—श्वशुर्यः । संज्ञाशब्दात् तु इञेव । श्वाशुरिः । 'मातृपितृभ्यां स्वसुः' [२/२/२१] । मातृष्वसा । धान्यमातुः स्वसुस्तु न भवति । मातृस्वसा ।

१३४. समर्थः पदविधिः ।

समर्थपदाश्रितत्वात् समर्थः । पदसंबन्धी विधिः पदविधिः । तेन यः पदाद् विधिः यश्च पदे यश्च पदस्य पदयोः पदानां वा स सर्वः पदविधिरेव । सर्वः पदविधिः समर्थो वेदितव्यः । समर्थानां पदानां विधिर्वेदितव्य इत्यर्थः । तच्च सामर्थ्यं व्यपेक्षा[2] एकार्थीभावश्च । अत्र व्यपेक्षायां सबद्धार्थं[3] सप्रेक्षितार्थो[4] वा पदविधिः साधुर्भवति । एकार्थीभावे तु विग्रहवाक्यार्थाभिधाने यः शक्तः सगतार्थः[5] ससृष्टार्थो[6] वा पदविधिः स साधुर्भवति । अत्र च पदानि उपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि

---

१ न तु वतण्डदरद्भावः पुंस्त्वे तु तस्यापि विद्यत एव परमनासन्नो गौणानभिधानात् ।

२. परस्पराकाङ्क्षेत्यर्थः, सा च वाक्ये संभवति । एकार्थीभावस्तु समासे ।

३. संबद्धोऽर्थो यस्य यत्र झटित्येव पदानामन्वयः प्रतीयते । राज्ञः पुरुषः इत्यादौ संबद्धार्थः पदविधिः ।

४. संप्रेक्षितः कष्टकल्पनया प्रतीतोऽर्थो यत्र, तथा—

राजोत्पले हरिभुजामिह के शवस्य,
यस्योरसीन्दुरदनं च जटाकलापे ।
शं खाम्बरोऽपि पवनाशिरिनाथसूनुः,
कान्ता स वोऽगतनया विपुलं ददातु ।।

इत्यादौ क्लिष्टकाव्ये कष्टकल्पनयार्थः प्रतीयते । अस्य काव्यस्य व्याख्येयं—

यस्य उरसि हरिभुजां वायुभुजां सर्पाणां राजा शेषः, यस्य च जटाकलापे इन्दुर्यस्य च शवस्य के मृतकस्य उत्पले निर्मांसे अदनं भक्षणं, यस्य च कान्तागतनयाद्रिसुता स खाम्बरोऽपि विपुलं शं—सुखं वो ददातु पवनात् सर्पस्तस्यारिर्मयूरस्तस्य नाथः कार्त्तिकेयः स सूनुर्यस्येत्यर्थः ।

५ संगतार्थो गतार्थः । यथा—वीरपुरुषको ग्रामः, अतिखट्व इति । अत्र हि पदानामर्थः सर्वोऽपि गतः समासार्थ एव प्रतीयते ।

६. संसृष्टार्थस्तु मिलितार्थः । यथा—राजपुरुष इति ।

वा प्रधानार्थोपादानात् द्व्यर्थानि[1] अर्थान्तराभिधायीनि[2] वा भवन्ति। पदविधिश्च समासनामधातुकृत्तद्धितोपपदविभक्तियुष्मदस्मदादेशप्लुतरूपो भवति। तत्र समासः **'श्रितादिभिः'** [३/१/४५]—धर्मं श्रितः धर्मश्रित.। **'तृतीया तत्कृतेन'** [३/१/४८]—शङ्कुलया कृतः खण्डः शङ्कुलाखण्ड.। **'चतुर्थी प्रकृत्या'** [३/१/५६]—यूपाय दारु यूपदारु। **'पञ्चमी भयादिभिः'** [३/१/६०]—वृकाद् भयं वृकभयम्। **'षष्ठ्ययत्नाच्छेषे'** [३/१/६३]—राज्ञ पुरुष राजपुरुषः। **'सप्तमी शौण्डादिभिः'** [३/१/७७]—अक्षेषु शौण्डः अक्षशौण्ड.। **'विशेषणं विशेष्येण तुल्यार्थं कर्मधारयश्च'** [३/१/१००)—नीलं च तदुत्पलं च नीलोत्पलम्। एषु पूर्वोत्तरपदयोर्वाक्यावस्थायां परस्पराकाङ्क्षालक्षणा व्यपेक्षा। वृत्त्यवस्थाया तु पृथगर्थानां सतामेकार्थीभाव इति। तथा हि—धर्ममित्येतत्साधनत्वात् साध्यभूता क्रियामपेक्षते। श्रित इत्येतदपि श्रयणक्रियोपसर्जनकर्तृवाचि स्वक्रियाविषयं साधनमपेक्षते। तयोश्च परस्परससर्गात् मूर्छितावयव[3] इव वृत्तौ एकार्थीभावो भवति। धर्मं श्रितो धर्मश्रितश्चैत्रः इति। एवं शङ्कुलया कृत. खण्ड शङ्कुलाखण्डः इति। कर्तृकर्मणोर्गम्यमानकरोतिक्रियाकृता वाक्ये व्यपेक्षा, वृत्तावेकार्थीभावः। एव चतुर्थीसमासादावपि यूपायेत्यादि सामान्यमवच्छेदाय भेदानाकाङ्क्षति, किं यूपाय गच्छत्यागच्छति पुष्पं दारु वेति। दार्वपि यूपाय गृहाय दाहाय वेति भेदानाकाङ्क्षति। एव सर्वत्र उपसर्जनानां[4] प्रधानानां च परस्परमाकाङ्क्षावतां क्वचित् प्रकृतिविकारभावलक्षण, क्वचिदवध्यवधिमद्भावात्मक, क्वचित् स्वस्वामिभाव., क्वचिद् विषयविषयिभावरूप संबन्धो वाक्ये व्यपेक्षा वृत्तौ त्वेकार्थीभाव। एवं नीलमित्येतद् विशेषण गुणत्वात् द्रव्यमाकाङ्क्षति[5]। उत्पलमित्येतदपि सर्वोत्पलावग्रहरूपेण प्रवृत्त सत् विशेष्यत्वाद् विशेषणं गुणमाकाङ्क्षति। वृत्तौ पुनरेकार्थीभावेन पांशूदकवदविभागापन्नौ तौ उभावपि अर्थौ एकस्मिन्नधिकरणे मूर्छिताविव भवत। नीलं च तदुत्पलं च नीलोत्पलमिति। तदेतत्सामर्थ्यमविशेषोक्तमपि लोकव्यपेक्षया वृत्त्यवृत्त्यो स्वभावेन विभक्तमवतिष्ठते। यत्र त्वसामर्थ्य तत्र समासो न भवति। पश्य धर्मं श्रितो मैत्रो गुरुकुलम्। किं ते शङ्कुलया खण्डो मैत्र उपलेन। गच्छ यूपाय दारु शोभन शैले। निवर्तस्व व्याघ्रात् भय चैत्रस्य मैत्रात्। भार्या राज्ञ पुरुषो देवदत्तस्य। सक्तस्त्वमक्षेषु शौण्ड पिबति पानागारे इति। नामधातुः—पुत्रमिच्छति—पुत्रीयति। श्येन इवाचरति—श्येनायते। समर्थ इति किम्? पश्यति पुत्रमिच्छति सुखम्। कृत्—कुम्भं करोति—कुम्भकार। समर्थ इति किम्? पश्य कुम्भ करोति कटम्। तद्धित—उपगोरपत्यमौपगव। समर्थ इति किम्? गृहमुपगोरपत्य तव। उपपदविभक्ति—नमो देवेभ्य। अभिजानासि देवदत्त! काश्मीरेषु वत्स्याम। उपाध्यायश्चेदागच्छेदाशंसे युक्तोऽधीयीय। समर्थ इति किम्? इद नमो देवा शृणुत। देवदत्त! मातर स्मरसि। अवसाम दीर्घं मगधेषु। युष्मदस्मदादेश—धर्मस्ते स्वम्। धर्मो मे स्वम्। धर्मो व स्वम्। धर्मो न. स्वम्। समर्थ इति किम्? ओदनं पच तव भविष्यति, मम भविष्यति। प्लुत- अङ्ग कूज३इदानी ज्ञास्यसि जाल्म!। समर्थ इति किम्? अङ्ग[6] कूजत्ययमिदानी ज्ञास्यसि जाल्म। पदग्रहणाद् वर्णविधिरसामर्थ्येऽपि भवति। तिष्ठतु दध्यशान त्वं शाकेन। तिष्ठतु कुमारीच्छत्र हर देवदत्तेति। अत्र यत्व द्वित्व च भवति। एव समासनामधातुकृत्तद्धितेषु वाक्ये व्यपेक्षा वृत्तावेकार्थीभाव। शेषेषु पुनर्व्यपेक्षैव सामर्थ्यं भवति। ननु राज्ञ. पुरुषमानयेत्युक्ते योऽर्थ आनीयते राजपुरुषमानयेत्युक्तेऽपि स एव तत्कोऽत्र व्यपेक्षैकार्थीभावयोर्विशेष? उच्यते—सङ्ख्याविशेषो व्यक्ताभिधानमुपसर्जनविशेषण चयोगश्चेति। तत्र राज्ञः पुरुषः, राज्ञो. पुरुष. राज्ञां पुरुष. इति वाक्ये संख्याविशेषो भवति। समासे न भवति—राजपुरुष। वाक्ये ह्युपसर्जनानि विभक्तार्थाभिधायित्वात् सङ्ख्याविशेषयुक्तं स्वार्थं प्रतिपादयन्ति। समासेऽन्तर्भूतस्वार्थं प्रधानार्थमभिदधतीत्यभेदैकत्वसङ्ख्यां गमयन्ति। संख्याविशेषाणामविभागेनावस्थानमभेदैकत्वसंख्या।

---

१ प्रधानोऽर्थं समासार्थलक्षणः, तदुपादानात् द्व्यर्थानीति। अयमर्थ. एकस्तावत् प्रधानोऽर्थं परः स्वार्थं इति द्व्यर्थता।

२ अर्थान्तर समासार्थलक्षण, तदऽभिधायीनीति।

३. मूर्च्छित भिन्नपदार्थावयव इत्यर्थः।

४. द्वितीयाद्यन्तानां विशेषणानां प्रथमान्तानां विशेष्याणां चेत्यर्थः।

५. द्रव्याश्रयो गुण इति गुणलक्षणात्।

६ अत्र **'स्यादे साकाङ्क्षस्य…'** [८/४/१०३] इत्यनेन सूत्रेणायमित्यनेन आकाङ्क्ष्यमाणस्य इदानीं ज्ञास्यतीत्यस्य वाक्यस्य भेदकत्वेनासामर्थ्यात् प्लुतो न भवति।

यथौषधरसाः सर्वे, मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः ।।

विभक्तिवाच्यैव तु सख्या वृत्तौ निवर्तते नामादिगम्या तु न निवर्तते । यथा—द्विपुत्रः, पञ्चपुत्रः इत्यादौ नामार्थ एव सख्याविशेषः । तावकीनो मामकीनः इत्यादेशाभिव्यङ्ग्यमेकत्वम् । शौर्पिकः, मासजात. इति परिमाण-स्वाभाव्यादेकत्वसंख्यावगमः[1] । कारकमध्यं, हसमध्य इत्यादौ मध्यान्यथानुपपत्त्या द्वित्वावगमः । यत्रापि वृत्तौ विभक्तेर्लुक् नास्ति—दास्याःपुत्रः, देवानांप्रियः, आमुष्यायणः, अप्सव्यः, गोपुचरः, वर्षासुजः इति तत्रापि संख्याविशेषो नास्ति, सामान्येन विशेषणमात्रप्रतीतेः । अत एव वृत्तौ संख्याभेदाभावात् स्वभावतो निवृत्ता विभक्तिर्लुका अन्वाख्यायते[2] । अलुक्समासे तु शब्दान्तरं विभक्त्यन्तप्रतिरूपावयवमनेनोपायेन प्रतिपाद्यते । तथा वाक्ये व्यक्ताभिधानं भवति । ब्राह्मणस्य कम्बलस्तिष्ठति । समासे पुनरव्यक्तं ब्राह्मणकम्बलस्तिष्ठतीति । सदिह्यतेऽत्र षष्ठीसमासो वा संबोधन वेति । किंचित् पुनरव्यक्त वाक्ये । यथा—अर्ध पशोर्देवदत्तस्येति । पशुगुणस्य देवदत्तस्य वा यदर्ध यो वा संज्ञीभूतः पशुस्तस्य यदर्धमिति । तच्च समासे व्यक्त—अर्धपशु देवदत्तस्येति । तथा वाक्ये उपसर्जनविशेषण भवति । ऋद्धस्य राज्ञः पुरुष । समासे न भवति—राजपुरुषः । यथाहु—सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति । विशेषणयोगे हि सापेक्षत्वे-नागमकत्वात् सामर्थ्यं न भवति । यत्र च क्वचिद् विशेषणयोगेऽपि गमकत्व तत्र भवत्येव समासः । यथा—देवदत्तस्य गुरुकुलम् । यज्ञदत्तस्य दासभार्या । यदाह—

संबन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते ।
स्वार्थवत्सा व्यपेक्षास्य वृत्तावपि न हीयते ।।

तथा वाक्ये चयोगो[3] भवति स्वचयोग स्वामिचयोगश्च । राज्ञो गौश्चाश्वश्च पुरुषश्च । चैत्रस्य मैत्रस्य मित्रस्य च गौ । समासे न भवति—राज्ञो गोश्वपुरुषा. । चैत्रमैत्रमित्राणां गौरिति । यदि समर्थ. पदविधिः कथमसामर्थ्ये[4] सूर्यमपि न पश्यन्त्यसूर्यपश्या राजदारा, पुनर्न[5] गीयन्तेऽपुनर्गेया. श्लोका., श्राद्ध न भुङ्क्तेऽश्राद्धभोजी, अलवणभोजी, सर्वश्चर्मणा कृत सार्वचर्मीणो रथ., कृत. पूर्वं कटोऽनेनेति कृतपूर्वी कटमित्याद्या वृत्तयो भवन्ति ? किं[6] हि वचनान्न भवति ।

विवृत्त्याऽलंकृत्याऽष्टममिति रघोऽध्यायमधुना-
धुनास्येवं हृष्टः कथमथ निजैर्बद्धिविभवैः ।

---

१ यद्यपि शूर्पाभ्यां शूर्पैर्वा क्रीत इति, मासौ मासा वा जातस्येति विग्रहे सख्याविशेषोऽस्ति तथापि वृत्तौ परिमाणस्वाभाव्यादेकत्वमेव प्रतीयते ।

२. नहि विद्यमानेऽर्थे विभक्तेर्लुगन्वाख्यायते अपि तु संख्याभेदाभावात् । कोऽर्थः ? एकत्वद्वित्वबहुत्वाभावात् स्वत एव निवृत्ता विभक्तिः, 'समासप्रत्यययोः' [३/२/६] इति लुकान्वाख्यायते ।

३. वाक्ये भिन्नत्वात् पदार्थाना भेदनिबन्धनसमुच्चयद्योतनाय चशब्द. प्रयुज्यते । वृत्तौ तु समूहलक्षणैकार्थप्रादुर्भावात् भेदस्य निवर्तनात् द्योत्यार्थाभावात् द्योतकस्य चशब्दस्य निवृत्तिः ।

४. अत्र हि सूर्यकर्मिकया दृशिक्रियया नञः संबन्धः न सूर्यसत्तया ।

५. गानेन नञः संबन्धो न पुनःशब्दार्थेन । अश्राद्धभोजीत्यादौ भुजिना नञ संबन्धो न श्राद्धादिना, श्राद्धादिभोजननिषेधावगमात् । एवं सार्वचर्मीण, कृतपूर्वीत्यत्र सर्वशब्दस्य कृतशब्देन कृतशब्दस्य कटशब्देन च संबन्धो न चर्मपूर्वशब्दाभ्यामिति ।

६. गमकत्वात् 'नञ् तत्पुरुषः' [३/१/३४] इत्यनेनाऽसामर्थ्येऽपि बाहुलकाद् भवतीत्यर्थः ।

क्षमो वेत्तुं बालोऽप्यहह गणिकालोरिह कृपां,
न[1] कश्चित् क्रीणीते गुणगणमणि कापणकणैः ॥

इत्याशुकविरत्नायुर्वेदाचार्यजैनदर्शनसन्निष्ठपण्डितरघुनन्दनेन निर्मितायां व्याकरणविशारदमुनिपुङ्गवचौथमल्ल-विरचितश्रीभिक्षुशब्दानुशासनस्य बृहद्वृत्तौ समाप्तोऽयमष्टमोऽध्यायः।

सबृहद्वृत्तिकं श्रीभिक्षुशब्दानुशासनं समाप्तम्।

१. मत इति शेषः।

श्रीभिक्षुशब्दानुशासनस्य अध्यायसूत्रचक्रम्

अध्याय सङ्ख्या	प्रथमश्चरण.	द्वितीयश्चरण:	तृतीयश्चरण	चतुर्थश्चरण:	योग:
१	६७	४५	६५	८९	२६६
२	१२३	१०५	११६	१२८	४७२
३	२०१	१६०	१०३	१२०	५८४
४	१४२	१३८	१२२	११४	५१२
५	८५	१०५	९०	१२४	४०४
६	८५	१५३	१४६	९४	४७८
७	१३२	१९१	१०८	१०४	५३५
८	१४३	१०१	११७	१३४	४९५
				सर्वयोग	३७४६

प्रशस्तिश्लोकाः

१. आसीत्कश्चिद् विपश्चिद् धृतपदकमलो भिक्षुनामा मुनीन्द्रो,
यः श्रीजैनोदितानामनुभवविभवैर्भूरिभावान् विभाव्य ।
मुग्धानुद्धर्तुकामः सपदि निपतितान् पापिपाषण्डजाले,
तेरापन्थाह्वमऽर्च्यं व्यरचयत सतां संपदं संप्रदायम् ॥

२. भारीमालस्तदनु मुनिपो रायचन्द्रस्ततोऽभूत्,
जातः पश्चादऽगणितगुणो जीतमल्लो गणीशः ।
तस्यान्तेऽभूद् गणपमघवा तत्पदे चोत्तमोऽस्थात्,
श्रीमाणिक्यस्तदनु च मतो डालचन्द्रो मुनीन्द्रः ॥

३. समुपगम्य ततोष्टमपट्टकं,
नियमिनां यमिनां धुरिकीर्तितः ।
क्षितितले गणिकालुरयं गुणै-
रतिविभाति विभाकरवत् करैः ॥

४. शुभगुणगणारामे मेघः कुमार्गनगाशनिः,
दुरिततिमिरध्वंसे भानुर्भवाब्धिघटोद्भवः ।
सुगतिकमलां दातुं शक्तो जिनेन्द्रसमो भुवि,
स जयतु महाराजः कालुश्चिरं गुणमन्दिरम् ॥

५. तच्छिष्यवर्यमुनिचौथमलाऽभिधेन,
सम्यक्तया मथितशब्दमहार्णवेन ।
एकं कलासु सकलास्वपि दिक्षु भिक्षु-
शब्दानुशासनमिदं निरमाय्यमेयम् ॥

६. सर्वं गुरोर्भवति यन्मम किञ्चन स्या-
देवं विचार्य मतिमानिति शब्दशास्त्रं ।
ग्रन्थे स्वतो विरचितेऽपि गणिप्रधान-
श्रीभिक्षुनाम निजकर्तृपदे न्ययुङ्क्त ॥

७. नोणादिधातुगणबद्धविधिः परेषां,
पुष्टे कृशाम्बरमिवेह सुजाघटीति ।
तत्रोक्तपाठमपि तत्[1] परिवर्त्य सम्य-
गक्षुण्णधीपरिचयः समदायि कर्त्रा ॥

८. एतद् विवृण्वन्तमलीगढस्थित-
सुनामयीग्रामनिवासिभूसुरम् ।
स्थलीस्थले वैद्यकवृत्तिवर्तिनं,
जानीत तं मां रघुनन्दनाह्वयम् ॥

९. श्रीपूज्यसेवैकफलाभिलाषिणं,
सत्साधुसङ्गे सुतरां विलासिनम् ।
प्राप्याऽवकाशं निजवैद्यवृत्तितः,
प्रवर्तमानं वृतवृत्तिवर्णने ॥ युग्मम् ॥

१०. सरससरलसूत्रं निर्विवादं वरेण्यं,
सदयहृदयसेव्यं स्वल्पकालाभिलभ्यम् ।
निजविषयविशेषं भैक्षवं शब्दशास्त्रं,
जयतु जगति नित्यं साधुसाध्यं तदेतत् ॥

८ ८ ६ १
११. नगाऽङ्कनिध्यब्जतपस्त्रयोदशी-
दिने सचन्द्रे शनिपुष्ययोजिते ।
निवेशने छापरनामके वरे,
वृत्तेः समाप्तिः सुखपूर्विकाऽभवत् ॥

---

१. तस्माद्धेतोः ।

शुद्धाशुद्धि-पत्रकम्

प्रथमोऽध्यायः

अशुद्धम्	शुद्धम्	पृष्ठम्	सूत्रम्	पङ्क्तिः
सर्वमुख···	सर्वमुख···	६	१८	८
सानुनासिकानिर···	सानुनासिका निर···	६	१८	१५
रेफोष्माणां	रेफोष्मणां	६	१८	१६
सर्व	सर्व	६	टि० १	१
अंघो	अघो	१०	४०	४
उच्चस्तमाम्	उच्चैस्तमाम्	१२	५१	३
होतृका.	होतृकारः	१६	१०	१
छान्दसावेतौ ?	छान्दसावेतौ।	२०	४१	२
इत्यत्रेव	इत्यत्रैव	४१	टि० १	१

द्वितीयोऽध्यायः

अशुद्धम्	शुद्धम्	पृष्ठम्	सूत्रम्	पङ्क्तिः
समानदीर्घत्वाडूंना···	समानदीर्घत्वार्ङूना···	६२	८८	१
उद्गिरन्तितामिति	उद्गिरन्ति तामिति	६३	टि० ३	१
उज्झलौ	अज्झलौ	६७	११६	४
वाङ्वक्ति	वावङ्क्ति	६७	११८	४
आकृतिगणाऽयम्	आकृतिगणोऽयम्	८१	७४	१
संस्थानव्यङ्ग्या	संस्थानव्यङ्ग्या	६२	३६	२
स्र्शपयति	स्पर्शयति	११०	२१	८
शपे	शेषे	१२४	८७	०

तृतीयोऽध्यायः

अशुद्धम्	शुद्धम्	पृष्ठम्	सूत्रम्	पङ्क्तिः
षठ्या	षष्ठ्या	१७८	३३	१
प्रत्यया्ऽप्रत्ययो:	प्रत्ययाऽप्रत्यययो.	१६०	टि० १	२
अमूदृश	अमूदृशः	१६५	१३४	३

चतुर्थोऽध्यायः

अशुद्धम्	शुद्धम्	पृष्ठम्	सूत्रम्	पङ्क्तिः
ध्वञ्जंङ्ज	ध्वञ्जंङ्ज्	२६८	८५	६

पञ्चमोऽध्यायः

कर्त्रेकनिष्ठ···	कर्त्रैकनिष्ठ	३३४	२२	२
संव्य	संव्यः	३४०	६६	१
वर्णघातः	वर्णसंघातः	३४५	१०	४
पदसंसंघाटः	पदसंघाटः	३४५	१०	४
पदसंघ तः	पदसंघातः	३४५	१०	४
फणगतति	फणगर्तेति	३५३	टि० ४	१

षष्ठोऽध्यायः

सबन्धे	सम्बन्धे	४०७	६०	१
वर्तमानस्याऽन्दस्य	···ऽन्यस्य	४०८	६८	१
भारद्वाजोः	भारद्वाजो	४२२	५६	२
तैतित	तैतिल	४२६	८१	३
बाङ्गी	वाङ्गी	४३४	१३३	६
लमकः	लमक	४३६	१४०	२
ज्ञापक	ज्ञापकं	४६६	२४	३
द्विवस्वरादिति	द्विस्वरादिति	४६६	२६	३
बाटारिक	बाटारकि	४७१	६५	६
एदत्	एतद्	४७१	टि० १	१
शेर्षेऽर्थे	शेषेऽर्थे	४७३	७८	१

सप्तमोऽध्यायः

पूर्वाह्ण	पूर्वाह्णे	४७६	४	१
परशब्द	पदशब्द	५०३	३४	१

अष्टमोऽध्यायः

दण्निडो	दण्डिनो	४६१	१	१७
स्नेहवान्	स्नेहनवान्	५६४	१६	३
यत्तकिभ्यो	यत्तत्किभ्यो	५६६	६८	७
या	वा	६११	७०	१
चतुरश्रेणी···	चतुरश्रेणी···	६११	७१	०
चक्रवर्मणोऽपय	चक्रवर्मणोऽपत्यं	६२८	६०	२
चऽपद···	चाऽपद···	६३०	७१	१
तत्रभवः	तत्र भवः	६३१	७८	३